স্মৃতিশাস্ত্রম্।

# শ্রাদ্ধবিবেকঃ।

মহামহোপাধ্যায়শূলপাণিভট্টাচার্য্য-
বিরচিতম্

শ্রীকৃষ্ণতর্কালঙ্কারকৃতটীকয়া সমেতম্।

শ্রীযুক্তচণ্ডীচরণস্মৃতিভূষণেন
সংস্কৃতং প্রকাশিতঞ্চ

কলিকাতা, গরানহাটাষ্ট্রীট, ১১।১ নং।

দ্বিতীয়সংস্করণম্।

কলিকাতানগরে
সরস্বতীযন্ত্রে
শ্রীক্ষেত্রমোহনমুখোপাধ্যায়েন
মুদ্রিতম্।
সন ১২৯৯।

# শ্রাদ্ধবিবেকসূচীপত্রম্ ।


| | পৃষ্ঠা | পঙ্ক্তিঃ |
|---|---|---|
| শ্রাদ্ধলক্ষণং | ২ | ১ |
| দেবতাধিকরণং | ৩৬ | ৪ |
| শ্রাদ্ধভেদাঃ | ৭০ | ৬ |
| শ্রাদ্ধদেশাঃ | ৮০ | ৯ |
| নিন্দিতদেশাঃ | ৮৪ | ৭ |
| শ্রাদ্ধকালাঃ | ৮৬ | ৯ |
| আবশ্যককালাঃ | ৯১ | ১ |
| মঘাত্রয়োদশী | ১০৩ | ২ |
| কন্যাগতাপরপক্ষঃ | ১২৩ | ৩ |
| শস্ত্রহতচতুর্দ্দশী | ১৪০ | ৪ |
| অষ্টকাঃ | ১৪৬ | ৪ |
| যুগাদ্যাঃ | ১৫২ | ১ |
| সংক্রান্ত্যাদি | ১৫৪ | ৪ |
| কাম্যতিথিশ্রাদ্ধ-কালাঃ | ১৫৬ | ১ |
| শ্রাদ্ধবেলাঃ | ১৫৭ | ৫ |
| শ্রাদ্ধনিষেধঃ | ১৬৬ | ১ |
| পর্য্যুদাসঃ | ১৭১ | ৬ |
| মলমাসঃ | ১৮৩ | ৪ |
| অমাবাস্যা | ২১৯ | ১ |
| প্রতিমাসপার্ব্বণা-শক্তস্য কর্ত্তব্যং | ২৩৪ | ৯ |
| পঙ্‌ক্তিপাবনাঃ | ২৩৮ | ১ |
| ব্রাহ্মণসংখ্যা | ২৫৬ | ৫ |

| | পৃষ্ঠা |
|---|---|
| মাতামহব্রাহ্মণো-পবেশনং | ২৬১ |
| দর্ভাঃ | ২৬৫ |
| উপবীতং | ২৭৪ |
| অর্ঘ্যঃ | ২৮০ |
| অগ্নৌকরণং | ২৮৫ |
| হুতশেষদানং | ২৯০ |
| অন্নাদিসংকল্প-বাক্যং | ২৯১ |
| ব্রাহ্মণভোজনপিণ্ড-দানয়োঃ প্রাধান্য-বিচারঃ | ২৯৮ |
| শ্রাদ্ধশেষভোজনং | ৩০২ |
| জীবৎপিতৃকশ্রাদ্ধং | ৩১৬ |
| দ্বিপিতৃকশ্রাদ্ধং | ৩২৭ |
| পুত্রিকাপুত্রশ্রাদ্ধং | ৩৩২ |
| একোদ্দিষ্টং | ৩৩৪ |
| অম্বষ্টশ্রাদ্ধং | ৩৬৩ |
| সপিণ্ডীকরণং | ৩৭২ |
| সপিণ্ডনোত্তর-শ্রাদ্ধং | ৪১৭ |
| শ্রাদ্ধাধিকারিণঃ | ৪৩৭ |
| বৃদ্ধিশ্রাদ্ধং | ৪৫৯ |
| নিত্যশ্রাদ্ধং | ৪৯৮ |

# শ্রাদ্ধবিবেকঃ।

বিলোক্য ধর্ম্মশাস্ত্রাণি কামধেন্বাদিসংগ্রহান্।
বিবেকঃ পার্ব্বণাদীনাং ক্রিয়তে শূলপাণিনা ॥ ১ ॥

পাদাম্বুজে দ্বে ভুবনাবলম্বে প্রণম্য ভূয়ো জগদম্বিকায়াঃ। শ্রীকৃষ্ণবিপ্রো বিবৃতিং বিতেনে বুধাদৃতে শ্রাদ্ধবিবেকসংগ্রহে ॥ প্রারম্ভে বিঘ্নবিঘাতায় দেবতানামকীর্ত্তনরূপং মঙ্গলমাচরন্ শিষ্যপ্রবৃত্ত্যর্থং গ্রন্থস্যাভিধেয়প্রয়োজনসম্বন্ধাংশ্চ প্রদর্শয়ন্ শিষ্যাবধানায় প্রতিজানীতে বিলোক্যেতি। শূলপাণিনা ধর্ম্মশাস্ত্রাণি বিলোক্য কামধেন্বাদিসংগ্রহাংশ্চ বিলোক্য বিশেষেণালোচ্য পার্ব্বণাদীনাং শ্রাদ্ধানাং বিবেকঃ ক্রিয়তে ইত্যন্বয়ঃ। ধর্ম্মশাস্ত্রাণি ধর্ম্মপ্রধানানি শাস্ত্রাণি মন্বাদিকৃতসংহিতারূপাণি চত্বারো যে বর্ণা ব্রাহ্মণাদয়ঃ যে চ আশ্রমিণশ্চত্বারো ব্রহ্মচারিপ্রভৃতয়ঃ তেষাং যে ধর্ম্মাঃ শৌচাচারাদয়ঃ তৎপ্রতিপাদনস্যৈব তেষাং মুখ্যত্বাৎ অন্তরান্তরেতরার্থপ্রতিপাদকত্বেঽপি প্রাসঙ্গিকত্বে তদভিধানস্যামুখ্যত্বাৎ। পুরাণাদিষু তু ইতরার্থপ্রতিপাদনমেব মুখ্যং কাচিৎকং বর্ণাশ্রমধর্ম্মাভিধানঞ্চ প্রাসঙ্গিকমতস্তে পৃথক্। অতএব—পুরাণন্যায়মীমাংসাধর্ম্মশাস্ত্রাঙ্গমিশ্রিতাঃ। বেদাঃ স্থানানি বিদ্যানাং ধর্ম্মস্য চ চতুর্দ্দশেতি। যাজ্ঞবল্ক্যেন ধর্ম্মশাস্ত্রপুরাণয়োঃ পৃথগভিধানং কৃতমিতি। এতেন সংগ্রহকরণে সংহিতাজ্ঞানস্যাপেক্ষিতত্বেন আত্মনস্তদ্বত্ত্বং প্রতিপাদিতমিতি। নন্ু পূর্ব্বপূর্ব্বসংগ্রহেভ্য এব প্রকৃতার্থস্য সিদ্ধত্বাৎ তদর্থং গ্রন্থান্তরকরণমনর্থকমেবেতি শঙ্কামপনেতুমাহ কামধেন্বাদীতি। ভোজরাজকৃতঃ কামধেনুঃ সংগ্রহঃ তস্যাতি-

## অথ শ্রাদ্ধলক্ষণম্ ॥ ২ ॥

প্রামাণিকত্বাৎ প্রাধান্যেন নির্দেশঃ সংগ্রহান্ নানাগ্রন্থসম্বন্ধা নানার্থাঃ সংগৃহ্যন্তে একস্থানস্থাঃ ক্রিয়ন্তে ইতি সংগ্রহাঃ তান্ সংগ্রহান্ গ্রন্থবিশেষান্ তথাচ তান্ বিলোক্যাধুনা নির্ণয়ঃ ক্রিয়তে ইত্যনেন তেষাং কুত্রচিৎ কুত্রচিৎ তাৎপর্য্যভ্রমমূলকান্যথার্থবোধমূলকত্বেন তেভ্যঃ প্রকৃতার্থসিদ্ধির্ন জাতৈবেতি তদর্থং গ্রন্থান্তরকরণং সার্থকমেবেতি ভাবঃ। পার্ব্বণাদীনামিতি পার্ব্বণস্য প্রাধান্যার্থং স্ববাচকপদেনোপাদানং তেন তস্য প্রকৃতিত্বং শ্রাদ্ধান্তরাণাং তদ্বিকৃতিত্বমিতি সূচিতম্। বিবেকঃ বিবিচ্যন্তে লক্ষণস্বরূপতদঙ্গাদিভির্বিশেষরূপেণ জ্ঞাপ্যন্তে শ্রাদ্ধান্যনেনেতি করণব্যুৎপত্ত্যা গ্রন্থ ইত্যর্থঃ। অতএব গ্রন্থশেষে মনোহরঃ শ্রাদ্ধবিবেকসংগ্রহ ইত্যনেন যৌগিকবলমালম্ব্য শ্রাদ্ধবিবেকনামকত্বমস্য বক্ষ্যতি। বিবেকপদস্য ভাবসাধনে কর্ম্মসাধনে তদনুপপত্তেরিতি বোধ্যম্। কেচিৎ তু শ্রাদ্ধানাং বিবেকো বিবেচনং ক্রিয়তেঽনেন গ্রন্থেনেতি শেষ ইতি ব্যাচক্রুঃ। তদসৎ অধ্যাহারকল্পনাগৌরবাৎ। অত্র শূলপাণিধর্ম্মপদয়োর্দেবতানামতয়া তদুচ্চারণেন মঙ্গলম্। অভিধেয়ানি চ শ্রাদ্ধানি এতৈঃ সহ গ্রন্থস্য জ্ঞাপ্যজ্ঞাপকভাবঃ সম্বন্ধঃ। প্রয়োজনঞ্চ পরম্পরয়া বিশিষ্টশ্রাদ্ধজ্ঞানমূলকশ্রাদ্ধনিষ্পত্ত্যা তজ্জন্যফলমেব। তদ্‌যথা - আয়ুঃ প্রজাং ধনং বিদ্যাং স্বর্গং মোক্ষং সুখানি চ। প্রযচ্ছন্তি তথা রাজ্যং প্রীতা নৃণাং [illegible]হা ইত্যাদি। এবং শ্রাদ্ধজ্ঞানদ্বারা শ্রাদ্ধকর্ত্তু তুল্যফলমপি। যথা বৃহস্পতিঃ—য এবং বেত্তি মতিমান্ তস্য শ্রাদ্ধফলং ভবেদিতি। ফলেন সহ সম্বন্ধশ্চ প্রযোজ্যপ্রযোজকভাবঃ সর্ব্বমেতৎ প্রতিপন্নং বেদিতব্যম্। এবমত্র শূলপাণিপদস্যাভিধামূলব্যঞ্জনয়া ঈশ্বরস্যোপস্থিতিঃ তদনন্তরঞ্চ তেন সহ গ্রন্থকর্ত্তুরুপমানোপমেয়ভাবঃ প্রতীয়তে। তথাচ শূলপাণিনা ইব শূলপাণিনেত্যুপমাধ্বনিঃ পদপ্রকাশ্যঃ ॥ ১ ॥

তত্র শ্রাদ্ধানাং নিরূপণে কর্ত্তব্যে তেষাং শ্রাদ্ধানাং পার্ব্বণাদীনামিত্যনেনোদ্দিষ্টত্বাদুদ্দেশো লক্ষণং পরীক্ষা চেতি শাস্ত্রপ্রাপ্তক্রমানু-

তত্র কল্পতরুঃ। অথৈতন্মনুঃ শ্রাদ্ধশব্দং কর্ম্ম প্রোবাচ প্রজানিঃশ্রেয়সার্থং তত্র পিতরো দেবতাঃ ব্রাহ্মণাশ্চা-

---

রোধাদনন্তরং লক্ষণমাহ অথেতি। কেচিৎ তু শ্রাদ্ধপদার্থাপরিচয়ে তদ্বিবেচনস্য কর্ত্তুমশক্যত্বাৎ প্রথমং লক্ষণমাহ অথেতি গ্রন্থমবতারয়তি তদসৎ প্রথমং লক্ষণকরণে শাস্ত্রপ্রাপ্তক্রমবিরোধাৎ। অথ প্রতিজ্ঞানন্তরমিতি সম্প্রদায়ঃ। তদসৎ অভিধানক্রমেণৈব তদানন্তর্য্যস্য প্রাপ্তত্বাৎ বৈয়র্থ্যাপাতাৎ। বস্তুতঃ শাস্ত্রীয়ক্রমপ্রাপ্ত্যর্থমুদ্দেশানন্তরমিত্যেবাথশব্দার্থঃ। লক্ষণমসাধারণো ধর্ম্মঃ নিরূপ্যতে ইতি শেষঃ॥ ২॥

তত্র পরোক্তলক্ষণস্যাদুষ্টত্বে লক্ষণান্তরকরণমকিঞ্চিৎকরমতস্তদাদৌ দূষয়িতুমুত্থাপয়তি তত্র কল্পতরুরিতি। তত্র শ্রাদ্ধলক্ষণপ্রসঙ্গে কল্পতরুঃ অথৈতদিত্যাদি ব্রাহ্মণস্যাহবনীয়তুল্যতেত্যন্তঃ কল্পতরুনামা গ্রন্থঃ। কল্পতরুপদস্য গ্রন্থকারপরত্বে আহবনীয়তুল্যতেত্যনন্তরমাহেতি ক্রিয়াধ্যাহারেণান্বয়ঃ। অথৈতদিত্যাদি অপরাহ্নঃ শ্রেয়ানিত্যন্তং আপস্তম্বসূত্রপঞ্চকম্। তেষাময়মর্থঃ বেদার্থমননান্মনুঃ পিতৃভ্যো দদ্যাৎ পূর্ব্বেদ্যুর্ব্রাহ্মণান্ সন্নিপাত্যেত্যনেন ময়াপস্তম্বেনোক্তমেতৎ কর্ম্ম। অথ ব্রাহ্মণপরীক্ষানন্তরং গৃহস্থস্যাগ্ন্যাধানাদিকর্ম্মাভিধানানন্তরং বা। পূর্ব্বেদ্যুরপরেদ্যুর্বা শ্রাদ্ধকর্ম্মণ্যুপস্থিতে। নিমন্ত্রয়ীত ত্র্যবরান্ সম্যগ্বিপ্রান্ যথোদিতানিত্যনেন শ্রাদ্ধশব্দং শ্রাদ্ধনামধেয়ং প্রোবাচ শ্রাদ্ধকর্ম্মণ্যুপস্থিত ইত্যনেন তৎকর্ম্মণঃ শ্রাদ্ধেতি নাম প্রতিপাদিতবানিত্যর্থঃ। কর্ম্মণঃ ফলাকাঙ্ক্ষায়াং দ্বিতীয়সূত্রম্। প্রজেতি প্রজাসন্ততিঃ নিঃশ্রেয়সো মোক্ষঃ তাবর্থৌ প্রয়োজনে যস্য তত্তথা মোক্ষসন্ততিফলকমিত্যর্থঃ। নমু পিতৃভ্যো দদ্যাদিতি শ্রুতেঃ শ্রাদ্ধং কিং পিত্রুদ্দেশ্যকং ব্রাহ্মণনিমন্ত্রণশ্রুতেঃ ব্রাহ্মণোদ্দেশ্যকং বা ইত্যাশঙ্কায়াং তৃতীয়সূত্রং পিতর ইতি দেবতা হবিস্ত্যাগজন্যফলভাগিত্বেনোদ্দেশ্যাঃ ন তু ত্যাজ্যমানহবিঃস্বামিত্বেনোদ্দেশ্যা ইতি দেবতাশব্দস্যার্থঃ। তথাত্বে লক্ষণেঽপি তাদৃশোদ্দেশ্যতায়া নিবেশ্যত্বাৎ বক্ষ্যমাণস্য পিতৃগতফলাভি-

হবনীয়ার্থে মাসি মাস্যপরপক্ষস্যাপরাহ্নঃ শ্রেয়ানিত্যা-

---

সন্ধানেন কৃতে হিরণ্যাদিদানে ইতি দূষণস্যালগ্নকত্বাপত্তেঃ। নন্বু তর্হি ব্রাহ্মণনিমন্ত্রণং কিমর্থং অত আহ চতুর্থসূত্রং ব্রাহ্মণাশ্চেতি চোঽবধারণেঽন্বয়শ্চাস্য ভিন্নক্রমেণ আহবনীয়োঽগ্নিস্তস্যার্থে তস্য স্থানে তৎতুল্যা এব ব্রাহ্মণা ইত্যর্থঃ। অবধারণবচনাচ্চ ব্রাহ্মণানাং শ্রাদ্ধদেবতাত্বনিরাসঃ। তথাচ যথা যাগে দেবতা ইন্দ্রাদয়ঃ। আহবনীয়স্তু ত্যক্তস্য হবিষঃ প্রতিপত্তিস্থানং তথা শ্রাদ্ধেঽপি দেবতাঃ পিতরঃ ব্রাহ্মণাঃ ত্যক্তদ্রব্যস্য প্রতিপত্তিভাগিন ইতি তৎপ্রতিপত্ত্যর্থমেব ব্রাহ্মণনিমন্ত্রণমিতি ভাবঃ। কদা কর্ত্তব্যমিতি কালাকাঙ্ক্ষায়ামাহ পঞ্চমসূত্রং মাসি মাসীতি প্রতিমাসীয়াপরপক্ষস্য কৃষ্ণপক্ষস্যাপরাহ্নঃ শ্রেয়ান প্রশস্ত ইত্যর্থঃ। অপরাহ্নস্তু পঞ্চধাবিভক্তদিনস্য চতুর্থো ভাগঃ। যথা-প্রাতঃকালো মুহূর্ত্তাংস্ত্রীন্ সঙ্গবস্তাবদেব তু। মধ্যাহ্নস্ত্রিমুহূর্ত্তঃ স্যাদপরাহ্নস্ততঃ পরম্। সায়াহ্নস্ত্রিমুহূর্ত্তঃ স্যাৎ শ্রাদ্ধং তত্র ন কারয়েদিতি। অপরাহ্নস্য প্রাশস্ত্যাভিধানাৎ পর্য্যুদস্তরাত্রিসন্ধ্যাদীতরকালেঽপি শ্রাদ্ধং সূচিতম্। স্বরসাদিতি তত্র পিতরো দেবতা ইত্যনেন পিত্রুদ্দেশ্যকত্বং বেদমেয়ত্যাগোদ্দেশ্যস্য দেবতাত্বাৎ। ব্রাহ্মণাশ্চাহবনীয়ার্থে ইত্যনেন ব্রাহ্মণস্বীকারপর্য্যন্ততা চ শ্রাদ্ধস্য লব্ধেতি ভাবঃ। অত্র সূত্রান্তরকথনং ন লক্ষণস্বরসায় কিন্তু প্রসঙ্গাদুক্তমিতি প্রাঞ্চঃ একেমেব সূত্রমিত্যেকে। পিতৃনুদ্দেশ্যেতি নন্বত্র পিতৃপদস্য জনকপরত্বে ভ্রাত্রাদিশ্রাদ্ধেঽব্যাপ্তিঃ প্রাপ্তপিতৃলোকপরত্বে চ প্রেতশ্রাদ্ধেঽব্যাপ্তিরিতি চেন্ন পিতৃপদস্য মৃতমাত্রপরত্বাৎ তত্রাপি পিতৃপদস্য নিরূঢ়ত্বাৎ। অতএব—প্রাচীনাবীতিনা কার্য্যমপসব্যমতন্ত্রিণা। পিত্র্যমানিধনাৎ কার্য্যং বিধিবদ্দর্ভপাণিনে-ত্যত্র নিধনাবধীত্যনেন প্রেতকর্ম্মাপি পিত্র্যমিত্যুক্তম্। অত্রাপসব্যপদং পিতৃতীর্থপরং তর্জ্জন্যঙ্গুষ্ঠয়োরন্তরাপশলবি অপসব্যং বেত্যুক্তেঃ। এবং পিত্রে তু দ্বিগুণা দর্ভা ইত্যাদাবপি দ্রষ্টব্যম্। উদ্দিশ্য হবিস্ত্যাগজন্যফলভাগিত্বেনোদ্দিশ্য তথাচ মৃতোদ্দেশ্যকত্বে সতি ব্রাহ্মণস্বীকার-

পস্তম্ববচনস্বরসাৎ পিতৄনুদ্দিশ্য দ্রব্যত্যাগো ব্রাহ্মণ-
স্বীকারপর্য্যন্তঃ শ্রাদ্ধম্ ॥ ৩ ॥

---

ফলকত্যাগত্বং লক্ষণম্। অত্র সত্যন্তাদানে ব্রাহ্মণসম্প্রদানকদানে-ঽতিব্যাপ্তিরতস্তদুপাদানম্। তর্পণেঽতিব্যাপ্তিবারণায় বিশেষ্যদলম্। অত্র ক্রমঃ তৃতীয়সূত্রেণ পিতৃদেবতাকত্বমুক্তং পঞ্চমসূত্রেণ চ কৃষ্ণপক্ষ-কর্ত্তব্যতাভিহিতা। তেন কৃষ্ণপক্ষকর্ত্তব্যপিতৃদেবতাকহবিস্ত্যাগো লব্ধঃ প্রথমসূত্রেণ চ তস্যৈব শ্রাদ্ধনামকত্বমুক্তম্। তথাচ কৃষ্ণপক্ষক্রিয়মাণ-পার্ব্বণস্যৈব শ্রাদ্ধসংজ্ঞা কৃতেতি। তত্রৈব শ্রাদ্ধপদং মুখ্যং শ্রাদ্ধান্তরে সর্ব্বত্র গৌণমিতি সিদ্ধম্। অতএবাপস্তম্বেনাপি অমাবাস্যায়াং পিতৃভ্যো দদ্যাৎ পূর্ব্বেদ্যুর্ব্রাহ্মণান্ সন্নিপাত্যেতি সূত্রেণ কৃষ্ণপক্ষপার্ব্বণমভি-ধায়ানন্তরমথৈতন্মনুরিতি সূত্রেণ তস্যৈব পার্ব্বণস্যৈতৎ শব্দো-পস্থাপ্যস্য শ্রাদ্ধনামকত্বং মনুনোক্তমিত্যভিহিতম্। ইত্থঞ্চ তস্যৈব পার্ব্বণস্য লক্ষ্যতয়া লক্ষণে পিতৃপদমপি প্রাপ্তপিতৃলোকপরমেব ন তু মৃতমাত্রপরং তথাত্বে প্রেতশ্রাদ্ধেঽতিব্যাপ্তেঃ। ন চ তথাপি প্রাপ্ত-পিতৃলোকীয়সাংবৎসরিকশ্রাদ্ধেঽতিব্যাপ্তিরিতি বাচ্যং পিতৄনিতি বহু-বচনেনানেকপিত্রুদ্দেশ্যকত্বস্য লক্ষণঘটকত্বাৎ। নন্বেবমপি অশ্বযুক্কৃষ্ণ-পক্ষমৃতস্যামাবাস্যামৃতস্য বা বিকৃতপার্ব্বণেঽতিব্যাপ্তিঃ। তস্যাপ্যনেক-পিত্রুদ্দেশ্যকত্বাদিতি চেন্ন। অমাবস্যাং ক্ষয়ো যস্য প্রেতপক্ষেঽথবা পুনঃ। সপিণ্ডীকরণাদূর্দ্ধং তস্যোক্তঃ পার্ব্বণো বিধিরিতি বচনে বিধিপদস্বরসাৎ। পার্ব্বণেতিকর্ত্তব্যতাকৈকোদ্দিষ্টশ্রাদ্ধস্যৈব বিকৃতিপার্ব্বণরূপতয়া শ্রাদ্ধ-প্রদীপকারাদিসম্মততয়া তন্মতে নৈতল্লক্ষণকরণাৎ। অতএব সাগ্নিকৌ-রসক্ষেত্রজক্রিয়মাণে বিকৃতপার্ব্বণরূপসাংবৎসরিকেঽপি নাতিব্যাপ্তিঃ। তত্রাপি তুল্যযুক্ত্যা পার্ব্বণেন বিধানেন দেয়মগ্নিমতা সদেতি বচনে বিধান-পদবলেন পার্ব্বণেতিকর্ত্তব্যতাকৈকোদ্দিষ্টস্যৈব প্রদীপকারাদিমতানু-সারিব্যবস্থাসিদ্ধত্বাৎ। যদি চৈতয়োঃ শ্রাদ্ধয়োস্ত্রিপিণ্ডকত্বস্য বহুবাদি-সম্মততয়া নাত্র সন্তোষঃ তদা কৃষ্ণপক্ষনিমিত্তকত্বমপি লক্ষণে নিবেশ-নীয়ং তেন কুত্রাপি সাংবৎসরিকে নাতিপ্রসঙ্গঃ তেষাং মৃতাহনিমিত্তক-

দেবশ্রাদ্ধাদৌ তু শ্রাদ্ধশব্দো গৌণঃ তদ্ধর্ম্মপ্রাপ্ত্যর্থঃ। কৌণ্ডপায়িনাময়ন ইবাগ্নিহোত্রশব্দঃ ॥ ৪ ॥

ত্বাৎ। ইত্থঞ্চানেকপিত্রুদ্দেশ্যকত্বমপি লক্ষণেন নিবেশনীয়ং কিন্তু পিত্রুদ্দেশ্যকত্বমাত্রং নিরগ্নিক্রিয়মাণসাংবৎসরিকশ্রাদ্ধস্যাপ্যুক্তবিশেষণেনৈব বারণাৎ। এবং স্থিতে দেবশ্রাদ্ধাদৌ শ্রাদ্ধশব্দো গৌণ ইত্যত্রাদিপদাৎ কৃষ্ণপক্ষপার্ব্বণেতরদেবশ্রাদ্ধেতরশ্রাদ্ধসামান্যস্যৈব পরিগ্রহঃ। দূষণগ্রন্থেঽপি একোদ্দিষ্টাদিসংগ্রহার্থং দেবশ্রাদ্ধস্য ইত্যস্য দেবশ্রাদ্ধাদেরিত্যর্থঃ ইতি নানুপপত্তিঃ কুত্রাপীতি এতৎ সুধীভির্বিভাবনীয়ম্ ॥৩॥

দেবশ্রাদ্ধাদৌ মৃতোদ্দেশ্যকত্বাভাবাদব্যাপ্তিমাশঙ্ক্যাহ দেবশ্রাদ্ধাদাবিতি। গৌণ ইতি তথাচ তল্লক্ষ্যমেব নেতি নাব্যাপ্তিরিতি ভাবঃ। লাক্ষণিকপ্রয়োগস্য প্রয়োজনমাহ তদ্ধর্ম্মেতি। তদ্ধর্ম্মস্য দক্ষিণাদানাদেঃ প্রাপ্ত্যর্থ ইত্যর্থঃ। তচ্ছব্দলক্ষণীয়ার্থে তদীয়মুখ্যস্য ধর্ম্মপ্রাপ্তৌ দৃষ্টান্তমাহ কৌণ্ডপায়িনাময়ন ইবেতি। কুণ্ডপায্যাখ্যঃ ক্রতুবিশেষঃ তদ্‌যাজিনো যে ব্রাহ্মণাস্তে কৌণ্ডপায়িনস্তেষাং করণীয়েঽয়নেঽয়নাখ্যমাসসাধ্যযাগবিশেষেঽগ্নিহোত্রশব্দো যথা যাবজ্জীবাগ্নিহোত্রস্য মুখ্যস্যেতিকর্ত্তব্যতারূপধর্ম্মপ্রাপ্ত্যর্থো গৌণস্তথেহাপীত্যর্থঃ। অত্রায়মর্থঃ যাবজ্জীবমগ্নিহোত্রং জুহোতীতি শ্রুতিরস্তি। অত্রাগ্নিহোত্রপদং জ্যোতিষ্টোমেন যজেতেতিবৎ কর্ম্মণো নামধেয়মেবান্যথা তদুপাদানবৈয়র্থ্যাৎ। ন চাগ্নৌ হোত্রমগ্নিহোত্রমিতি ব্যুৎপত্ত্যাগ্নৌ হোমপ্রাপ্ত্যর্থমেব তদুপাদানং সার্থকমিতি বাচ্যং জুহোতীত্যনেনৈব তৎসিদ্ধেঃ। অগ্নিপ্রক্ষেপাবচ্ছিন্নত্যাগস্যৈব জুহোত্যর্থত্বাৎ অগ্নৌ তদ্বাধেনৈব পদে জুহোতীত্যাদৌ বিশিষ্টদেশপ্রক্ষেপাবচ্ছিন্নত্যাগবোধনাত্তত্র তস্য লাক্ষণিকত্বাৎ ভবতু বা বিশিষ্টদেশপ্রক্ষেপাবচ্ছিন্নত্যাগে শক্তিস্তথাপি হোত্রপদবৈয়র্থ্যাৎ অগ্নৌ জুহোতীত্যনেনৈব প্রকৃতার্থলাভাৎ। ন চাগ্নয়ে হোত্রমগ্নিহোত্রং ইত্যর্থকতয়া হোমস্যাগ্নিদেবতাকত্বপ্রাপ্ত্যর্থমেবাগ্নিহোত্রপদমর্থবদস্তু ইতি বাচ্যং যদগ্নয়ে চ প্রজাপতয়ে চ

ায়ং প্রাতর্জুহোতীত্যঙ্গবিধিনৈব তৎসিদ্ধেঃ। তস্মাৎ অগ্নিহোত্রপদং কর্ম্মণো নামধেয়মেব তেনাগ্নিহোত্রপদস্য যাবজ্জীবাগ্নিহোত্রে শক্তিঃ সিদ্ধা। তথা শ্রুত্যন্তরমপি শ্রূয়তে উপসদ্ভিশ্চরিত্বা মাসমগ্নিহোত্রং জুহোতীতি। অস্যার্থঃ—উপসদাখ্যো যাগবিশেষো দ্বাদশাহসাধ্যঃ। উপসদ্ভিরিতি বহুবচনং কপিঞ্জলন্যায়েন ত্রিত্বপর্য্যবসিতং তথাচোপসত্ত্রয়ং কৃত্বা মাসং ব্যাপ্যাগ্নিহোত্রপদনির্দ্দেশ্যং যাগবিশেষং কুর্য্যাদিতি। অত্রাপ্যগ্নিহোত্রপদং প্রযুক্তং তচ্চ ন মুখ্যং যাবজ্জীবাগ্নিহোত্রশক্তস্যাস্য যাগান্তরেঽপি শক্তিকল্পনেঽন্যায়শ্চানেকার্থত্বমিতি ন্যায়েন নানাশক্তিকল্পনাগৌরবাৎ শব্দপ্রয়োগস্য লক্ষণয়াপ্যুপপন্নত্বাৎ। অতোঽত্র গৌণ এবাগ্নিহোত্রপদপ্রয়োগঃ তৎপ্রয়োজনঞ্চ যাবজ্জীবাগ্নিহোত্রধর্ম্মস্য তদিতিকর্ত্তব্যতারূপস্য প্রাপ্তিরিতি। নন্বেবং দ্বয়োরেব শ্রুতিত্বাৎ মাসসাধ্যযাগে এবাগ্নিহোত্রপদং মুখ্যং যাবজ্জীবাগ্নিহোত্র এব গৌণমিতি বৈপরীত্যমেব কিং ন স্যাদিতি চেন্ন যাবজ্জীবাগ্নিহোত্রে তৎপদস্য গৌণপ্রয়োগে প্রয়োজনাভাবাৎ তদিতিকর্ত্তব্যতায়াঃ তদীয়াঙ্গবিধিভিরেব প্রতিপাদিতত্বাৎ মাসসাধ্যযাগেতিকর্ত্তব্যতানভিধানাৎ তৎপ্রাপ্তিরূপপ্রয়োজনসত্ত্বাৎ তত্রৈব গৌণত্বাদিতি। অথৈবং উপসদ্ভিশ্চরিত্বেতিশ্রুতির্যদি উপসত্ত্রয়ানন্তর্য্যমাসৈকসাধ্যত্বরূপগুণদ্বয়বিশিষ্টযাগান্তরবিধিঃ স্যাত্তদৈব যাগান্তরে গৌণাগ্নিহোত্রপদস্য দৃষ্টান্তত্বসম্ভবঃ তদেব ন তথা সতি কর্ম্মান্তরকল্পনাগৌরবাৎ প্রধানবিধিত্বকল্পনাগৌরবাচ্চ কিন্তু শ্রুত্যন্তরপ্রাপ্তযাবজ্জীবাগ্নিহোত্রমনূদ্য মাসৈকসাধ্যত্ব উপসত্ত্রয়ানন্তর্য্যরূপগুণদ্বয়বিধিঃ। কর্ম্মান্তরাকল্পনে লাঘবাৎ অঙ্গবিধিত্বলাঘবাচ্চ তথাচাগ্নিহোত্রপদং যাবজ্জীবাগ্নিহোত্র এব প্রযুক্তমিতি মুখ্যমেব তৎ কথমত্র যাগান্তরে গৌণতৎপ্রয়োগমভ্যুপেত্য দৃষ্টান্তীকরোষীতি চেৎ নৈবং যদি শ্রুত্যন্তরপ্রাপ্তাগ্নিহোত্রমনূদ্য গুণদ্বয়বিধিঃ স্যাত্তদাগ্নিহোত্রং মাসং ব্যাপ্য কুর্য্যাৎ উপসত্ত্রয়ানন্তরং কুর্য্যাদিতি বিধিভেদাদ্বাক্যভেদঃ স্যাৎ বিধেয়য়োঃ পরস্পরানন্বিতত্বেনৈকবাক্যাসম্ভবাৎ। তথাচোক্তং ভট্টপাদৈঃ। প্রাপ্তে কর্ম্মণি নানেকো বিধাতুং শক্যতে গুণঃ। অপ্রাপ্তে তু বিধীয়ন্তে বহবোঽ-

শ্রাদ্ধমিতিশব্দো বাচকো যস্য তত্তথা ত্যক্তদ্রব্য-প্রতিপত্তিস্থানত্বেন ব্রাহ্মণস্যাহবনীয়তুল্যতেতি তচ্চিন্ত্যম্ ॥ ৫ ॥

---

প্যেকযত্নত ইতি। অস্যার্থঃ—প্রমাণান্তরাৎ প্রাপ্তে কর্ম্মণি অনেকো গুণঃ ন বিধাতুং ন বিধেয়ীকর্ত্তুং শক্যতে একযত্নত একেন বাক্যেন ইত্যর্থঃ প্রমাণান্তরাপ্রাপ্তে তু কর্ম্মণি বহবোঽপি গুণা একেন বাক্যেন বিধীয়ন্তে বিধাতুং শক্যন্তে তত্র তাবদ্গুণবিশিষ্টস্য কর্ম্মণ একস্যৈব বিধেয়ত্বেন বাক্যভেদাপ্রসক্তেরিতি। ন চ মাসৈকসাধ্যত্ববিশিষ্টোপসদ্‌যাগান-ন্তর্য্যমেকমেব বিধেয়মস্তু অতো ন বাক্যভেদ ইতি বাচ্যং উপসদো দ্বাদ-শাহসাধ্যত্বেন মাসসাধ্যত্ববাধাৎ অগ্নিহোত্রস্য উপসদনন্তরমেব কর্ত্ত-ব্যত্বে যাবজ্জীবকর্ত্তব্যত্ববিধিবিরোধাচ্চ অতএব নোপসদানন্তর্য্যবিশি-ষ্টমাসৈকসাধ্যত্ববিধিরপীতি। তস্মাদুপসদ্ভিশ্চরিত্বেতি শ্রুতির্গুণদ্বয়-বিশিষ্টকর্ম্মান্তরবিধিরেবেতি স্থিতে তত্র গৌণাগ্নিহোত্রপদস্য দৃষ্টান্তী-করণমব্যাহতমেবেতি দিক্ ॥ ৪ ॥

শ্রাদ্ধশব্দং কর্ম্ম প্রোবাচেতি সূত্রে কর্ম্মণঃ শ্রাদ্ধশব্দাভিন্নত্বং লভ্যতে। তচ্চ বাধিতম্ অতঃ কল্পতরুরেব ব্যাচষ্টে শ্রাদ্ধমিতীতি। অত্রেতিশব্দো দশরথ ইত্যুদাহৃত ইত্যত্রেব শ্রাদ্ধেতি স্বরূপমাত্রাবির্ভাবকো ন তু বিভক্ত্যন্তাবির্ভাবকঃ বিভক্ত্যন্তস্য বাক্যত্বেনাবাচকত্বাদিতিশব্দস্য বাচক-শব্দস্য সমাসে ন প্রবেশঃ সমাসবাক্যে তয়োরশ্রবণাৎ। তেন শ্রাদ্ধে-ত্যানুপূর্ব্ব্যাবচ্ছিন্নঃ শব্দো যস্য ইতি সমাসেনার্থঃ। বাচক ইতি শব্দ-বিশেষণোপাদানঞ্চ ষষ্ঠ্যর্থসম্বন্ধস্য বাচ্যবাচকভাবরূপস্য লাভায়। তথাচ শ্রাদ্ধশব্দবাচ্যং কর্ম্ম প্রোবাচেতি সূত্রার্থস্য পর্য্যবসিতত্বান্ন বাধ ইতি ভাবঃ। কেচিৎ তু শ্রাদ্ধমিতীতি। শ্রাদ্ধানাং মিতির্জ্ঞানং যস্মাদিতি ব্যুৎপত্ত্যা শ্রাদ্ধবিষয়কবোধজনকশব্দোঽবগম্যতে স এব বাচকঃ স্বনিষ্ঠ-বাচকতানিরূপিতবাচ্যতাসম্বন্ধেন প্রতিপাদকো যস্য কর্ম্মণঃ তথা চ শ্রাদ্ধবিষয়কবোধজনকশব্দপ্রতিপাদ্যকর্ম্মেত্যন্বেতি এতেন নিবাপাদি-

দৈবশ্রাদ্ধস্য শ্রাদ্ধশব্দানভিধেয়ত্বে দৈবিকং দশমং স্মৃতমিতি শ্রাদ্ধভেদানুপপত্তেঃ ॥ ৬ ॥

কিঞ্চ প্রাস্যেদগ্নৌ তদন্নন্তু দদ্যাদ্বা ব্রহ্মচারিণে ইতি বশিষ্ঠবচনাৎ ব্রাহ্মণাসম্পত্তাবগ্নিপ্রতিপত্তিপক্ষে-ঽব্যাপ্তেঃ। কিঞ্চ পিণ্ডপিতৃযজ্ঞস্য ব্রাহ্মণপ্রতিপত্তি-

শব্দানামপি তৎপ্রতিপাদকত্বমিত্যাহুঃ। ব্রাহ্মণস্য যদাহবনীয়তুল্যত্বমুক্তং তৎ সাধর্ম্ম্যপ্রদর্শনেন স্পষ্টয়তি ত্যক্তদ্রব্যেতি। লক্ষণং দূষয়তি তচ্চিন্ত্য-মিতি ॥ ৫ ॥

শ্রাদ্ধভেদানুপপত্তেরিতি শ্রাদ্ধবিভাগানুপপত্তেরিত্যর্থঃ। সামান্যধর্ম্মা-বচ্ছিন্নানামেব বস্তূনাং পরস্পরবিরুদ্ধতদ্ব্যাপ্যধর্ম্মপ্রকারেণ প্রতিপাদনং বিভাগঃ প্রকৃতে চ দেবশ্রাদ্ধস্য শ্রাদ্ধত্বসামান্যধর্ম্মানাক্রান্তত্বেন দেব-শ্রাদ্ধস্য শ্রাদ্ধত্বব্যাপ্যধর্ম্মত্বাভাবেন চ তদ্বিভাগোঽনুপপন্ন ইতি ভাবঃ। ননু যথা গৌড়ী পৈষ্টী চ মাধ্বী চ বিজ্ঞেয়া ত্রিবিধা সুরেত্যত্র সুরাশব্দস্য মদহেতুভূতান্নবিকারবিশেষশক্তত্বেন তাদৃশসুরাত্বমাদায় ন গৌড়ীমা-ধ্বোর্বিভাগঃ তয়োস্তদসত্ত্বাৎ কিন্তু তিসৃষ্বেব সুরাশব্দস্য ভূরিপ্রয়োগাৎ ত্রিতয়সাধারণেন পাতিত্যহেতুভূতপানকর্ম্মদ্রব্যত্বরূপেণ নিরূঢ়ত্বং গৌড়ী-মাধ্বীপানস্যাপি পাতিত্যহেতুত্বাৎ অতস্তাদৃশনিরূঢ়লক্ষতাবচ্ছেদক-সামান্যধর্ম্মমাদায় তিসৃণাং বিভাগঃ। তথা প্রকৃতেঽপি শ্রাদ্ধশব্দস্য শ্রাদ্ধসামান্যে ভূরিপ্রয়োগাৎ দেবশ্রাদ্ধাদিসকলশ্রাদ্ধসাধারণেন সাক্ষাৎ-পরম্পরোদাসীনয়তোপকারবিশেষজনকত্যাগত্বরূপসামান্যধর্ম্মেণ নিরূ-ঢ়ত্বং বাচ্যম্ ॥ ৬ ॥

তথাচ তেনৈব রূপেণ সামান্যেন সকলশ্রাদ্ধান্যুপাদায় তেষাং বিশেষ-রূপেণ বিভাগসম্ভবান্ন বিভাগানুপপত্তিরত আহ কিঞ্চেতি। অব্যাপ্তেরিতি তত্র ত্যাগে ব্রাহ্মণস্বীকারফলকত্বাভাবাদিতি ভাবঃ। ননু ব্রাহ্মণস্বীকার-ফলকত্বমিত্যনেন তদ্‌যোগ্যত্বং বাচ্যং নতু ফলোপধায়কত্বং যেনাব্যাপ্তিঃ

**পর্য্যন্তত্বাভাবাৎ শ্রাদ্ধরূপতা ন স্যাৎ ন স্যাদেবেতি চে পিণ্ডপিতৃযজ্ঞমভিধায় তৎ শ্রাদ্ধমিতরদন্বাহার্য্যমমাবস্যায়ামিতি গোভিলবিরোধাৎ ॥ ৭ ॥**

স্যাৎ। যোগ্যতা চ ব্রাহ্মণপ্রতিপাদ্যত্বেন বেদবোধিতদ্রব্যত্যাগত্বমেব তচ্চ ব্রাহ্মণাসম্পত্তিপক্ষেঽপি তদ্‌দ্রব্যস্য ব্রাহ্মণপ্রতিপাদ্যত্বেন সামান্যবিধিবোধিতত্বসত্ত্বাৎ তত্ত্যাগেঽপ্যবিকলমেবেতি নাব্যাপ্তিরত আহ কিঞ্চেতি পিণ্ডপিতৃযজ্ঞস্যেতি সাগ্নিকর্ত্তব্যস্য কৃষ্ণপক্ষবিহিতশ্রাদ্ধবিশেষস্যেত্যাদিন স্যাদেবেতি। তথাচ তস্যালক্ষত্বান্নাব্যাপ্তিরিতি ভাবঃ। গোভিলবিরোধাদিতি তচ্ছ্রাদ্ধমিতরদন্বাহার্য্যং ইতি গোভিলসূত্রম্। অস্যার্থঃ—তৎপিণ্ডপিতৃযজ্ঞরূপং শ্রাদ্ধং ইতরচ্চান্বাহার্য্যপদাভিধেয়ং পার্ব্বণশ্রাদ্ধং তদুভয়মমাবাস্যায়াং কার্য্যং সাগ্নিনেতি শেষ ইতি। তথাচ পিণ্ডপিতৃযজ্ঞস্যাপি তেন শ্রাদ্ধত্বকথনাৎ তস্য শ্রাদ্ধত্বানঙ্গীকারে তদ্বিরোধাদিত্যর্থঃ। ন চ সূত্রে তৎ শ্রাদ্ধমিতি নান্বয়ঃ কিন্তু তৎপিণ্ডপিতৃযজ্ঞরূপং ইতরচ্চ শ্রাদ্ধং অন্বাহার্য্যপদাভিধেয়ং ইত্যেবান্বয়ঃ। তথাচ পিণ্ডপিতৃযজ্ঞস্য তেন শ্রাদ্ধত্বাকীর্ত্তনাৎ ন তদ্বিরোধ ইতি বাচ্যম্। ইতরাদিপদানাং স্বার্থাংশে যদ্বিধেয়তাবচ্ছেদকং তদবচ্ছিন্নস্যৈব যস্য কস্যচিৎ ভেদবোধকত্বস্য ব্যুৎপত্তিসিদ্ধত্বাৎ। অয়মেকো ঘটঃ অয়মপর ইত্যত্রাপরপদার্থবিধেয়তাবচ্ছেদকঘটত্বাক্রান্তস্য ঘটান্তরস্যৈব ভেদবোধাৎ। অন্যথা অয়মেকঃ পটঃ অয়মপরো ঘট ইত্যপি স্যাৎ পটভেদস্যাপি ঘটে বিদ্যমানত্বাৎ তদ্বোধসম্ভবাৎ। নচেদেবং তত্রাপি ইতরাদিপদবৈয়র্থ্যাপাতাৎ। তেষামেতদেব প্রয়োজনং যৎ স্বপ্রতিপাদ্যভেদপ্রতিযোগিনি স্বার্থবিধেয়ীভূতস্য সাজাত্যপ্রতিপাদনমিতি। এবঞ্চ প্রকৃতেঽপি তৎ পিণ্ডপিতৃযজ্ঞমিতরৎ শ্রাদ্ধমিত্যত্র ইতরপদার্থবিধেয়তাবচ্ছেদকং যৎ শ্রাদ্ধত্বং তদবচ্ছিন্নযৎকিঞ্চিদ্রূপস্য পিণ্ডপিতৃযজ্ঞস্য ভেদ এবেতরপদার্থেন সূত্রে প্রতিপাদিতস্তথাচ পিণ্ডপিতৃযজ্ঞস্য শ্রাদ্ধত্বপ্রাপ্ত্যা তদ্বিরোধস্য বজ্রলেপত্বাৎ। কেচিৎ তু বিশেষণী-

পিণ্ডাংস্তু গোঽজবিপ্রেভ্যো দদ্যাদগ্নৌ জলেঽপি বা
ইতি যাজ্ঞবল্ক্যবচনাত্তস্যাপি ব্রাহ্মণপ্রতিপত্তিপর্য্যান্তেতি
চেন্ন পিত্র্যবলিদানস্যাপি শ্রাদ্ধত্বাপত্তেঃ পিণ্ডবচ্চ পশ্চিমা
প্রতিপত্তিরিতি ছন্দোগপরিশিষ্টকৃতা তস্যাপি ব্রাহ্মণে
প্রতিপত্ত্যতিদেশাৎ। কিঞ্চ পিতৃগতফলাভিসন্ধানেন
কৃতে হিরণ্যদানাদাবতিব্যাপ্তিঃ। কিঞ্চ বক্ষ্যমাণৈক-
রূপেণ দেবশ্রাদ্ধাদৌ মুখ্যত্বসম্ভবে গৌণত্বমন্যায্যম্ ॥ ৮ ॥

ভূতানামিতরাদিপদানাং বিশেষাসজাতীয়প্রতিযোগ্যপস্থাপকত্বনিয়মাদ-
ত্রাপীতরনিষ্ঠভেদপ্রতিযোগিনঃ পিণ্ডপিতৃযজ্ঞস্য শ্রাদ্ধজাত্যাবগমাদন্যো
ঘট ইত্যাদিবদিত্যাহুঃ। তদসৎ অন্যো ঘট ইত্যাদৌ অন্যাদিপদার্থ এব
ঘটাদের্বিধেয়তয়া ভানাদন্যাদিপদানামবিশেষণত্বাৎ ॥ ৭ ॥

নন্ম সাক্ষাদ্‌ব্রাহ্মণপ্রতিপত্তির্লক্ষণে ন নিবেশনীয়া কিন্তু সাক্ষাৎ-
পরম্পরোদাসীনব্রাহ্মণপ্রতিপত্তিমাত্রং তচ্চ ইহাপ্যস্তি উত্তরকালং
পিণ্ডানাং ব্রাহ্মণপ্রতিপত্ত্যাভিধানাদিত্যাশঙ্কতে পিণ্ডাংস্ত্বিতি। পিত্র্য-
বলিদানস্যাপীতি পিত্র্যবলীনামপ্যুত্তরকালং ব্রাহ্মণপ্রতিপত্তেঃ শাস্ত্রবো-
ধিতত্বাদিতি ভাবঃ। তচ্ছাস্ত্রমাহ পিণ্ডবদিতি অতিদেশাদিতি পিণ্ডানাং
প্রতিপত্তিদ্বয়ং তত্র পূর্ব্বা প্রতিপত্তিঃ কুশোপরি পিণ্ডদানরূপা। পশ্চিমা
তু গোঽজাদিভ্যঃ প্রতিপাদনরূপা। তত্র পিত্র্যবলীনামপি পশ্চিমা প্রতি-
পত্তিঃ পিণ্ডবদিত্যতিদেশাদিত্যর্থঃ। এবমত্র সাম্প্রদায়িকমতে দার্শা-
হিকপিণ্ডদানেঽপ্যতিব্যাপ্তির্বোদ্ধব্যা অতিদেশস্য পিণ্ডসামান্যসাধা-
রণত্বাৎ। নন্ম বিধির্দ্বিবিধঃ উপদেশোঽতিদেশশ্চ। তত্র কর্ম্মণাং সাক্ষাৎ-
কর্ত্তব্যতাবোধকো বিধিরুপদেশঃ। অহরহঃ সন্ধ্যামুপাসীত পিতৃভ্যো
দদ্যাদিত্যাদিঃ। কর্ম্মান্তরপ্রাপ্তধর্ম্মাণাং কর্ম্মান্তরে তৎকর্ম্মতুল্যত্বপ্রতি-
পাদনমুখেন প্রতিপাদকো বিধিরতিদেশঃ। যথাঽহনি তথা প্রাতর্নিত্যং
স্নায়াদনাতুর ইত্যাদিঃ। এবঞ্চ বেদবোধিতত্বমিত্যত্র উপদেশবিধিবোধি-

উচ্যতে। সম্বোধনপদোপনীতান্ পিত্রাদীন্ চতুর্থ্য-ন্তপদেনোদ্দিশ্য হবিস্ত্যাগঃ শ্রাদ্ধম্॥ ৯॥

---

তত্ত্বং বাচ্যং তেন পিত্র্যবল্যাদিব্যাবৃত্তিঃ তৎপ্রতিপত্তেরুক্তাতিদেশ-লভ্যত্বাৎ ব্রাহ্মণপ্রতিপাদ্যত্বেন উপদেশবিধিবোধিতত্বাভাবঃ। অত আহ কিঞ্চেতি হিরণ্যাদিদানে ইতি এতস্যাপি নিরুক্তপিত্রুদ্দেশ্যকত্বাৎ দেয়স্য হিরণ্যাদেঃ সাক্ষাদ্‌ব্রাহ্মণপ্রতিপত্ত্যুপদেশাচ্চেতি ভাবঃ। ইদ-মুপলক্ষণং উক্তবিবক্ষায়াং সাম্প্রদায়িকমতে যুগাদ্যাদিশ্রাদ্ধানামপি লক্ষতয়া তেষু পার্ব্বণধর্ম্মাতিদেশাদব্যাপ্তিরপি বোদ্ধব্যা। ননূদ্দেশ্যত্বং ন হবিস্ত্যাগজন্যফলভাগিত্বেন ইচ্ছাবিষয়ত্বং কিন্তু ত্যক্তস্য হবিষঃ স্বামিত্বেন ইচ্ছাবিষয়ত্বমেব তেন নোক্তাতিব্যাপ্তিঃ দানে ব্রাহ্মণস্যৈব স্বামিত্বেন ইচ্ছাবিষয়ত্বাৎ পিতৄণাঞ্চ ত্যাগজন্যফলভাগিত্বেনৈব উদ্দে-শ্যত্বাদিত্যত আহ কিঞ্চেতি মুখ্যত্বসম্ভবে ইতি তথাচ পিতৄন্ শ্রাদ্ধেন নৃনন্নৈরিত্যত্র সর্ব্বশ্রাদ্ধানামেব পিতৄণামানৃণ্যহেতুত্বপ্রতিপাদনান্মতে তত্র শ্রাদ্ধপদং মুখ্যয়ৈব বৃত্ত্যা সর্ব্বশ্রাদ্ধোপস্থাপকং ভবন্মতে তু মুখ্য-গৌণবৃত্তিভ্যাং সকলশ্রাদ্ধোপস্থাপকতা বাচ্যা। তথাচ বৃত্তিদ্বয়কল্পনা-গৌরবাৎ যুগপদ্বৃত্তিদ্বয়বিরোধাচ্চ সাহসমাত্রমেতেতি ভাবঃ॥ ৮॥

সর্ব্বেষাং শ্রাদ্ধানাং মুখ্যত্বমভ্যুপেত্য তেষাং সামান্যলক্ষণমাহ সম্বোধনেতি। অত্র ত্যাগমাত্রস্য শ্রাদ্ধত্বে সুবর্ণদানাদাবতিব্যাপ্তিরতো হবিরিতি হবিঃপদঞ্চাত্র হূয়তে যত্তদ্ধবিরিতি ব্যুৎপত্ত্যাহগ্নিপ্রক্ষেপ-যোগ্যপরং যোগ্যতা চ অগ্নিপ্রতিপাদ্যত্বেন উপদিষ্টত্বং তেন দানে নাতি-ব্যাপ্তিঃ দীয়মানদ্রব্যস্যাগ্নিপ্রতিপাদ্যতায়াঃ শাস্ত্রানুপদিষ্টত্বাৎ শ্রাদ্ধীয়-দ্রব্যস্য চ প্রাশ্যেদগ্নৌ তদন্নন্তু দদ্যাদ্বা ব্রহ্মচারিণে ইত্যাদ্যুপদেশাৎ যোগ্যতাস্ত্যেবেতি নাব্যাপ্তিঃ। অতএব পিত্র্যবলিদানেনাতিব্যাপ্তিঃ তেষা-মগ্নিপ্রতিপাদ্যতায়া অতিদিষ্টত্বেন উপদিষ্টত্বাভাবাৎ। নন্বেবং কৃষ্ণপক্ষ-পার্ব্বণাতিরিক্তশ্রাদ্ধ এবাব্যাপ্তিস্তদীয়দ্রব্যাণামগ্নিপ্রক্ষেপস্য পার্ব্বণা-তিদেশেনৈব লব্ধত্বাদিতি চেৎ ভ্রান্তোহসি। ব্রাহ্মণানামলাভে তু শ্রাদ্ধ-

কর্ম্মণ্যুপস্থিতে। তদন্নং প্রক্ষিপেদগ্নৌ জলে বিপ্রেঽথবার্পয়েদিত্যাদিনা শ্রাদ্ধীয়দ্রব্যসামান্যস্যৈবাগ্নিপ্রক্ষেপোপদেশাৎ। এবং পিণ্ডপিতৃযজ্ঞেঽপি নাব্যাপ্তিঃ। পিণ্ডাংস্তু গোঽজবিপ্রেভ্য ইত্যনেন তৎপিণ্ডস্যাপি অগ্নিপ্রক্ষেপোপদেশাৎ। এবমপি হোমাতিব্যাপ্তেরাহ পিত্রাদীনুদ্দিশ্যেতি আদিনা দেবপরিগ্রহঃ। এতেন পিত্রাদীনামপি মন্ত্ররূপতয়াঽচেতনত্বং প্রতিপাদিতম্। উদ্দেশশ্চাভিসন্ধানং তচ্চ ত্যাগজন্যফলভাগিত্বেন স্বত্ববলেন চ তৎপূর্ব্বকত্বলাভঃ। তথাচ অচেতননিষ্ঠত্যাগজন্যফলভাগিত্বাবচ্ছিন্নবিষয়তাশাল্যভিসন্ধানপূর্ব্বকত্বে সতি হবিস্ত্যাগঃ শ্রাদ্ধং হোমে তু ত্যাগজন্যফলভাগিত্বেনোদ্দেশ্যতা ন দেবগতা কিন্তু স্বগতৈব ইতি নাতিব্যাপ্তিঃ। কাম্যতিথিশ্রাদ্ধাদৌ স্বগতফলভাগিত্বেনোদ্দেশ্যতাসত্বেঽপি পিতৃগততৎফলভাগিত্বেনোদ্দেশ্যতায়া অব্যাহতত্বান্নাব্যাপ্তিঃ। নন্বেবং হবিরিতি ব্যর্থং নিরুক্তসত্যন্তেনৈব দানবারণাৎ তত্র ব্রাহ্মণস্যাচেতনত্বাভাবাৎ ফলভাগিত্বেনোদ্দেশ্যত্বাভাবাচ্চ আত্মনঃ ফলভাগিত্বেনোনোদ্দেশ্যত্বেঽপি অচেতনত্বাভাবাদিতি চেন্ন পিতৃগতফলকামকৃতদানেঽতিব্যাপ্তিবারকত্বেনার্থবত্বাৎ তত্রাচেতনপিতৃগতফলভাগিত্বেনোদ্দেশ্যতাসত্বাৎ তর্পণাতিব্যাপ্তিবারকত্বাচ্চ তর্পণজলাদেরগ্নিপ্রতিপত্ত্যনুপদেশাৎ অন্যথা তদবারণাৎ নচৈবমপি শ্রাদ্ধাঙ্গে পিণ্ডদানাদাবতিব্যাপ্তিঃ তেষাং শ্রাদ্ধত্বস্য ইষ্টত্বাৎ নোচে প্রধানবিধিবিষয়ত্বেন ফলজনকত্বেন বা ত্যাগস্য বিশেষণীয়ত্বাৎ অঙ্গানাঞ্চ অঙ্গবিধিবিধেয়ত্বেন প্রধানবিধিবিধেয়ত্বাভাবাৎ নিষ্ফলত্বাচ্চ নাতিব্যাপ্তিঃ। গয়াপিণ্ডদানাদেশ্চ প্রধানীভূতস্য শ্রাদ্ধত্বমিষ্টমেব পিণ্ডপিতৃযজ্ঞবৎ ন চ তথাপি দাশাহিকপিণ্ডদানেঽতিব্যাপ্তিঃ তৎপিণ্ডস্য জলপ্রতিপত্তের্বিশেষবিধিপ্রাপ্তত্বেন পিণ্ডাংস্তু গোঽজবিপ্রেভ্য ইতি সামান্যবিধিপ্রাপ্তাগ্নিপ্রতিপত্ত্যবিষয়ত্বাৎ। তথাচাদিপুরাণে। পূরকপিণ্ডদানবিষয়কং বচনং—প্রযাতি যাবদাকাশং পিণ্ডাদ্বাষ্পময়ী শিখা। তাবৎ তু সংমুখস্তিষ্ঠেৎ সর্ব্বং তোয়ে ততঃ ক্ষিপেদিতি। ন চ শ্রাদ্ধবিধিসিদ্ধাভিলাপপূর্ব্বকং তাদৃশদ্রব্যত্যাগেঽতিব্যাপ্তিঃ তাদৃশাভিলাপপূর্ব্বকং ত্যক্তদ্রব্যস্যৈবাগ্নিপ্রতিপত্তেরনভিধা-

অতো ন হিরণ্যদানাদাবতিব্যাপ্তিঃ নাপি দেবশ্রাদ্ধে-পিণ্ডপিতৃযজ্ঞাদাবব্যাপ্তিঃ। এবমৃষিমনুজাদিশ্রাদ্ধেঽপি

---

নেন তদীয়দ্রব্যস্যাগ্নিপ্রতিপত্তেরনুপদিষ্টত্বাৎ। অতএব ইচ্ছয়া কৃতে ইত্থঞ্চ সম্বোধনপদোপনীতান্ চতুর্থ্যন্তপদেনেতি ন লক্ষণঘটকং বৈয়র্থ্যাৎ কিন্তু তাদৃশাভিলাপপূর্ব্বকদ্রব্যত্যাগস্যৈব শ্রাদ্ধত্বমিত্যেদর্থং শ্রাদ্ধ-শরীরপঠিতমেবেতি বোধ্যম্। দেবমুদ্দিশ্য দ্রব্যত্যাগেঽপি নাতিব্যাপ্তি-রিতি এবঞ্চাচেতননিষ্ঠফলভাগিত্বাবচ্ছিন্নাভিসন্ধানপূর্ব্বকত্বে সতি প্রধা-নফলজনকত্বে চ সতি অগ্নিপ্রতিপাদ্যত্বেন উপদিষ্টদ্রব্যত্যাগঃ শ্রাদ্ধ-মিতি লক্ষণবাক্যার্থনিষ্কর্ষঃ। এবমস্মদ্ব্যাখ্যানেনৈব সামঞ্জস্যে লক্ষণ-মন্যথা ব্যাখ্যায় তত্রানুপপত্তিশতনিরাকরণায় কস্যচিদ্ব্যাকুলভাবো মোহবিজৃম্ভিত এবেতি সুধীভির্বিভাবনীয়ম্। কেচিৎ তু পিত্রাদীনিতি ন লক্ষণান্তর্নিবিষ্টং অননুগমাদ্বৈয়র্থ্যাচ্চ চতুর্থ্যন্তপদেন উদ্দেশ্যেত্যনেন দেবতাত্বমুক্তম্। তদ্ধিতেন চতুর্থ্যা বা মন্ত্রলিঙ্গেন চৈব হি। দেবতাসঙ্গ-তিস্তত্র দুর্ব্বলন্তু পরম্পরমিতি। বচনাচ্চতুর্থীবলেন দেবতাত্বাবগমোক্তেঃ তেন সম্বোধিতদেবতাকো হবিস্ত্যাগঃ শ্রাদ্ধমিতি লক্ষণমাহুঃ তদসৎ যজুর্ব্বেদীয়প্রেততর্পণেঽতিব্যাপ্তেঃ অম্বে অম্বালিকে ইত্যাদিমন্ত্রকরণ-কাম্বিকাহোমাতিব্যাপ্তেশ্চেতি। মৈথিলাস্তু বেদবোধিতপাত্রালম্বন-পূর্ব্বকো হবিস্ত্যাগঃ শ্রাদ্ধমিত্যাহুঃ তদসৎ একোদ্দিষ্টে হুতশেষদানা-ভাবেন পাত্রালম্বনবাধস্য গ্রন্থকৃতৈবাগ্রে বক্ষ্যমাণতয়া তত্রাব্যাপ্তিঃ। নবীনাস্তু যাং কাঞ্চিৎ শ্রাদ্ধব্যক্তিমুপাদায় তদ্ব্যক্তিসমবেত ইচ্ছাত্বান্য ইচ্ছান্যাসমবেতধর্ম্মসমবায়িত্বং লক্ষণম্। অত্র উপেক্ষাত্বমাদায়োপে-ক্ষায়ামতিব্যাপ্তিবারণায় তদ্ব্যক্তিসমবেতেতি ইচ্ছাত্বমাদায় যাগাদাবতি-ব্যাপ্তিবারণায় ইচ্ছাত্বান্যেতি সত্তাগুণত্বাভ্যাং দ্রব্যাদ্যতিব্যাপ্তিবারণায় ইচ্ছান্যাসমবেতেতি বদন্তি॥ ৯॥

কল্পতরূক্তলক্ষণদোষাসত্ত্বং স্বলক্ষণে দর্শয়তি অত ইতি ষষ্ঠ্যন্তাৎ তস্য অস্য লক্ষণস্যেত্যর্থঃ। এবং এবংলক্ষণকরণে মুখ্যঃ স্যাদিতি

শ্রাদ্ধশব্দো মুখ্যঃ স্যাৎ। যথা সন্ন্যাসং প্রকৃত্য নরসিংহপুরাণম্—দিব্যপিতৃভ্যো দেবেভ্যঃ স্বপিতৃভ্যশ্চ যত্নতঃ। দত্ত্বা শ্রাদ্ধমৃষিভ্যশ্চ মনুজেভ্যস্তথাত্মনে॥ ননু শ্রাদ্ধং যাগো বা দানং বা হোমো বা ত্যাগস্য চৈতৎ-

---

তথাচ তন্মতে ঋষিমনুজাদিশ্রাদ্ধেশ্রাদ্ধশব্দস্য গৌণত্বদোষোঽপ্যস্মল্লক্ষণপক্ষে নাস্তীতি ভাবঃ। ঋষিমনুজাদিশ্রাদ্ধে প্রমাণমাহ যথেতি সন্ন্যাসং প্রকৃত্যেতি প্রব্রজেদিত্যনেনোক্তং সন্ন্যাসং প্রকৃত্যেত্যর্থঃ। দিব্যপিতৃভ্যঃ কব্যবাহনাদিভ্যো দেবেভ্যো বিশ্বাদিদেবতাভ্যঃ স্বপিতৃভ্যঃ জনকাদিভ্যঃ ঋষিভ্যো মরীচ্যাদিভ্যঃ মনুজেভ্যঃ সনকাদিভ্যঃ আত্মনে স্বস্মৈ শ্রাদ্ধং দত্ত্বা প্রব্রজেদিতি প্রক্রান্তেনান্বয়ঃ। অত্র দিব্যপিতৃদেবাদ্যাকারতয়া ধ্যাতানাং তত্তন্মন্ত্রাণাং দেবতাত্বেনাস্মদুক্তলক্ষণশ্রাদ্ধত্বস্য সর্ব্বত্র সত্ত্বেন শ্রাদ্ধশব্দো মুখ্য এবেতি ভাবঃ। লক্ষণেন নিরূপ্য যাগত্বাদিনাপি তন্নিরূপণার্থং বিচারমবতারয়তি নন্বিতি। ত্যাগস্য শ্রাদ্ধত্বেনোক্তত্বাৎ যাগদানাদিবিকল্পাপ্রসক্তেরাহ ত্যাগস্য চেতি স্বত্বধ্বংসফলকস্য ন মমেদমিত্যাকারকেচ্ছারূপস্যেত্যর্থঃ। তেন পরকীয়দ্রব্যেণ মমেদমিতীচ্ছা ন ত্যাগঃ তস্যাঃ পরকীয়ে স্বত্বধ্বংসাজনকত্বাৎ। যাগদানহোমস্বরূপং যত্র নিরূপিতং তদ্‌যাগদানহোমাধিকরণং তত্র ত্যাগস্য যাগদানহোমত্রিতয়ান্যতমরূপতা দর্শিতেত্যর্থঃ। তথা চ ত্যাগত্বস্য এতত্ত্রিতয়ান্যতমত্বব্যাপ্যত্বাৎ যাগাদিবিকল্পো যুক্ত এবেতি ভাবঃ। ননু ব্রাহ্মণাসন্নিধৌ ত্যাগে ব্যভিচারঃ স হি ন দানং পরস্বত্বাজনকত্বাৎ স্বস্বত্বধ্বংসপরস্বত্বোৎপত্তিফলকত্যাগস্যৈব দানত্বাৎ। ন চ তত্র ত্যাগাদেবোদ্দেশ্যগতস্বামিত্বং জায়ত ইতি বাচ্যং ত্যাগানন্তরং সম্প্রদানস্বীকারাদেব তৎস্বত্বোৎপত্তেঃ অন্যথা যাজনাধ্যাপনপ্রতিগ্রহৈর্ব্রাহ্মণো ধনমর্জ্জয়েদিত্যাদিবচনবিরোধাৎ অনেন স্বত্বহেতুভূতব্যাপাররূপধাত্বর্থার্জ্জনে প্রতিগ্রহাভেদবোধনাৎ অস্বং স্বং করোতীতি স্বীকারপদব্যুৎপত্তেশ্চ। ন চাত্র স্বপদস্য যথেষ্ট-

বিনিযোজ্যত্বরূপেণ লক্ষণা প্রমাণাভাবাৎ। নাপি যাগঃ দেবতোদ্দেশ্য-কত্বাভাবাৎ। অতএব ন হোমোঽপি বিশিষ্টদেশপ্রক্ষেপাবচ্ছিন্নযাগ-স্যৈব হোমত্বাদিতি চেন্ন অস্যাপি উদ্দেশ্যগতস্বামিত্বজনকত্বেন দানরূপ-তয়া ব্যভিচারাৎ চেতনোদ্দেশ্যকত্যাগমাত্রস্যৈব তৎস্বত্বজনকত্বনিয়মাৎ। মনসা পাত্রমুদ্দিশ্য ভূমৌ তোয়ং বিনিঃক্ষিপেৎ। বিদ্যতে সাগরস্যান্তো-দানস্যান্তো ন বিদ্যতে ইত্যনেনাসন্নিধিপাত্রকত্যাগস্যাপি দানত্বাভিধা-নাৎ মনুনা চ প্রদানং স্বাম্যকারণমিত্যনেন দানস্য স্বত্বকারণত্বপ্রতিপাদ-নাৎ। অন্যথা স্বীকারস্য স্বত্বহেতুত্বাভ্যুপগমে ত্যক্তদ্রব্যস্য স্বীকারাৎ পূর্ব্বমস্বামিকতয়া তদানীং তদপহর্ত্তুশ্চৌর্য্যদোষানুপপত্তেঃ। নচৈবং প্রতিগ্রহস্যার্জ্জনত্বোক্তিবিরোধস্তত্রার্জ্জনপদস্য স্বত্বপ্রযোজকে লাক্ষণি-কত্বাৎ অন্যথা যাজনাদৌ দক্ষিণাদানাদেব স্বত্বোৎপত্তের্যাজনাধ্যাপনয়ো-রর্জ্জনরূপতা ন স্যাৎ প্রয়োজকতা তু যাজনাধ্যাপনয়োর্দক্ষিণাদানদ্বারে-ণৈব প্রতিগ্রহস্যাপি প্রযোজকীভূতজ্ঞানবিষয়ত্বেন দত্তে সতি অয়ং প্রতি-গৃহ্লাতীত্যেবং জ্ঞানে সত্যেব তমুদ্দিশ্য দানাৎ অয়ং প্রতিগ্রহবিমুখঃ ইতি জ্ঞানে তমুদ্দিশ্যাদানাৎ মনুবিরোধেন চ স্বীকারপদস্য যথেষ্ট-বিনিযোজ্যত্বরূপেণৈব লাক্ষণিকত্বাৎ অত্র দ্রব্যত্যাগেন স্বত্বজননে সম্প্র-দানস্বীকার প্রাগ্‌ভাবোঽপি সহকারী কল্প্যতে। তেন যত্র ব্রাহ্মণমুদ্দিশ্য দ্রব্যত্যাগঃ কৃতঃ পশ্চাদমুষ্মৈ প্রতিপাদিতং তস্যৈব স্বত্বং ত্যাগাজ্জায়তে নান্যেষামিতি নাতিপ্রসঙ্গঃ। অন্যথা অন্যেষামপি তত্র সত্বে তেষামনু-মতিমন্তরেণ তৎদ্রব্যস্য তদ্ব্যবহার্য্যতানুপপত্তেঃ প্রতিপত্তেরন্যেষাং তাবৎ স্বত্বনাশকত্বকল্পনে চ মহাগৌরবাপত্তেঃ অতএব মৃতভ্রান্ত্যা মৃতমু-দ্দিশ্য ত্যক্তে ত্যাগবিস্মরণাৎ স্বয়ং ভুক্তে বা ন দাতুঃ স্বত্বহানিরতো ন তত্র দানং সহকারিবিরহাদিতি। অতএব উদ্দেশ্যপাত্রবিশেষো যদি পশ্চান্ন-স্বীকরোতি তদা সোপাধিত্যাগবিশেষস্যানির্ব্বাহান্ন দাতুঃ স্বত্বং নিব-র্ত্ততে ইতি রত্নাকরপ্রভৃতয়োঽপি বদন্তীতি। যাগোপেক্ষাদয়স্তু কিঞ্চিদ-নপেক্ষমেব স্বামিনঃ স্বত্বধ্বংসং জনয়ন্তি ন তু পরস্য স্বত্বমপি জনয়ন্তীতি বোধ্যম্। ন চ যদি ত্যাগাদেব স্বত্বং তদা যত্র দূরস্থপাত্রমুদ্দিশ্য গৌস্ত্যক্তা তস্যাঃ সম্প্রদানপ্রতিপত্তেঃ প্রাগপালনবধে সম্প্রদানস্য প্রায়-

প্রকারত্রিতয়ান্যতমরূপতা যাগদানহোমাধিকরণে দর্শিতা ॥ ১৩ ॥

শ্চিত্তাপত্তিঃ স্বামিত্বাদিতি বাচ্যং দানোত্তরমুত্তরপ্রতিপত্তেঃ শাস্ত্রবিহিতত্বেন তাবৎপর্য্যন্তং পালকত্বেন ত্যক্তুরেব প্রায়শ্চিত্তত্বাৎ। অথৈবমপি পাত্রাসন্নিধিত্যাগস্য ন দানত্বসম্ভবঃ সম্প্রদানরূপসহকারিবিরহাৎ অন্যথা সম্প্রদানস্য কারকতাপি ন স্যাৎ দদস্বেতি অনুমতিদ্বারা দানক্রিয়ানিষ্পাদনকত্বেনৈব তস্য ক্রিয়ানিমিত্তরূপকারকত্বসম্ভবাৎ। অতএব দ্বৈতনির্ণয়েহপি যত্র দানোদ্দেশ্যো ন প্রাক্ স্বীকরোতি তত্র ন দাননিত্যভিহিতমিতি চেন্ন ন হি ক্রিয়ানিমিত্তত্বং কারকত্বং ইত্যত্র ক্রিয়াজনকত্বমর্থঃ গ্রামং গচ্ছতীত্যাদৌ গমনাদিক্রিয়াদ্যজনকত্বেন গ্রামাদেঃ কর্ম্মণঃ কারকত্বানুপপত্তেঃ কিন্তু বিভক্ত্যর্থদ্বারা সাক্ষাৎ ক্রিয়ান্বয়িত্বমেব ক্রিয়ানিমিত্তত্বম্। তেন চৈত্রস্য পুত্রো গচ্ছতীত্যাদৌ চৈত্রাদের্ন কারকত্বং তস্য ষষ্ঠ্যর্থদ্বারা নামার্থে পুত্র এবান্বয়িত্বেন ক্রিয়ান্বয়িত্বাভাবাৎ। সাক্ষাদিতিকরণাচ্চ ষষ্ঠ্যর্থান্বিতপুত্রদ্বারা ক্রিয়ান্বয়সম্ভবেহপি ন ক্ষতিঃ। নন্বেবমপি বিপ্রানথ তপস্বিদুর্গতানাং প্রতিকুর্ব্বীত ভিষক্ স্বভেষজৈরিত্যত্র ধাত্বর্থপ্রতিকাররূপায়াং ক্রিয়ায়াং ষষ্ঠ্যর্থদ্বারা সাক্ষাদেব বিপ্রাদীনামন্বয়াত্তেষাং কারকত্বাপত্তিঃ। মৈবং প্রতিকারো হি রোগনাশনঃ তস্য চাত্মনো রোগাভাবেন বাধিতত্বাদবশ্যমধ্যাহর্ত্তব্যার্থে শরীর এব ষষ্ঠ্যর্থদ্বারা তেষামন্বয়াৎ তেন ভিষক্ স্বকীয়ৌষধৈর্বিপ্রাদীনাং শরীরবৃত্তিরোগং নাশয়েদিতি তদ্বাক্যার্থতয়া সম্বন্ধার্থকষষ্ঠীভিন্নবিভক্ত্যর্থদ্বারা ক্রিয়ান্বয়িত্বং কারকত্বমিতি বিবক্ষয়া বোক্তাতিপ্রসঙ্গাভাবাৎ। সম্বন্ধার্থকেতি বিশেষণাচ্চ মাতুঃ স্মরতীত্যাদৌ ন মাতুঃ কর্ম্ম কারকত্বানুপপত্তিঃ। তত্র ষষ্ঠ্যাঃ কর্ম্মত্বপরতয়া সম্বন্ধার্থকত্বাভাবাৎ। ইত্থঞ্চ নিরুক্তকারকত্বং দূরস্থপাত্রস্যাপি অক্ষুন্নমেবেতি নানুপপত্তিঃ। সম্প্রদানস্যানুমতিদ্বারাপেক্ষণীয়তা চ। ন দানসামান্যোৎপত্তৌ। কিন্তু প্রশস্তদান এব তত্রৈব তস্যাঙ্গত্বেনাভিধানাৎ। তথাহি দাতা প্রতিগ্রহীতা চ শ্রদ্ধাদেয়ঞ্চ ধর্ম্মযুক্।

দেশকালৌ চ দানানামঙ্গান্যেতানি ষড়্‌বিদুরিতি দেবলবচনম্‌। অস্যার্থঃ দাতা শ্রদ্ধাবান্‌ অনিন্দ্যপুরুষঃ। প্রতিগ্রহীতা বিদ্যাযুক্তো ধর্ম্মশীলঃ প্রশান্তঃ ক্ষান্তো দান্তঃ সত্যবাদী কৃতজ্ঞঃ। বৃত্তিগ্লানো গোহিতো গোশরণ্যো দাতা যজ্বা ব্রাহ্মণঃ পাত্রমাহুঃ॥ ইত্যুক্তরূপো ব্রাহ্মণঃ। শ্রদ্ধা শাস্ত্রার্থে দৃঢ়প্রত্যয়ঃ। দেয়ং দ্রব্যং ন্যায়ার্জ্জিতম্‌। দেশো গঙ্গাতীরকুরুক্ষেত্রাদিঃ। কালো গ্রহণসংক্রান্ত্যাদিঃ। এতৎ সর্ব্বং প্রশস্তদানাঙ্গং ন ত্বন্যায়ার্জ্জিতদ্রব্যস্য শ্রদ্ধাং বিনা বা তত্তদ্দেশাদিকং বিনা বা নিন্দিতদাত্রা বা কৃতং দানমেব ন ভবতীতি। অতএব—সর্ব্বত্র গুণবদ্দানং শ্বপাকাদিষ্বপি স্মৃতম্‌। দেশকালবিধানেন পাত্রে দত্তং বিশেষতঃ॥ ইত্যনেন শ্বপাকাদিষ্বপি দানং গুণবৎ ফলবদিত্যুক্তং ইতি ভাব্যম্‌। নন্বেবমপি বৃষোৎসর্গাদৌ উপেক্ষায়ামুক্তনিয়মস্য ব্যভিচারঃ। এতস্যাঃ স্বামিত্বাজনকত্বেন দানত্বাভাবাৎ। দেবতোদ্দেশ্যকত্বাভাবেন যাগত্বাভাবাৎ। অতএব হোমত্বাভাবাচ্চেতি চেন্ন কিঞ্চিন্নিষ্ঠস্বামিত্বাভিসন্ধানপূর্ব্বকত্বেন স্বামিত্বাবচ্ছিন্নবিষয়তাশালিত্বেন বা ত্যাগস্য বিশেষণীয়ত্বাৎ। উপেক্ষায়াশ্চ তথাত্বাভাবান্ন ব্যভিচারঃ। এবমদৃষ্টার্থকত্বেনাপি ত্যাগো বিশেষণীয়ঃ। তেন বিক্রয়েঽপি ন ব্যভিচার ইতি। অন্যে তু বৃষোৎসর্গো ন ত্যাগঃ কিন্তু হলশকটবহননিবৃত্তিফলকব্যাপারবিশেষ এব। অথ বৃত্তে বৃষোৎসর্গে দাতা বক্রোক্তিভিঃ পদৈঃ। ব্রাহ্মণানাহ যৎকিঞ্চিৎ ময়োৎসৃষ্টস্তু নির্জ্জনে॥ তং কশ্চিদন্যো ন নয়েদবিভাজ্যং যথাক্রমমিত্যনেন হলশকটবহননিবৃত্ত্যাদেরেব তৎফলত্বপ্রতিপাদনাৎ বৃষে তু স্বত্বমস্ত্যেব। অতএব মহোক্ষোৎসৃষ্টপশবঃ সূতিকাগন্তুকাদয়ঃ। পালো যেষাস্তু তে মোচ্যা দৈবরাজপরিপ্লুতাঃ॥ ইতি যাজ্ঞবল্ক্যবচনেন মহোক্ষাদীনাং মধ্যে যেষাং পালোঽস্তি তে মোচ্যাঃ অর্থাৎ পালাভাবে বন্ধনীয়াঃ স্বামিনো দণ্ড্যার্থমিত্যুক্তমুপপদ্যতে ইতি ন ব্যভিচার ইত্যাহুঃ। তদসৎ। যন্ন সর্ব্বায় চোৎসৃষ্টং যচ্চাভোজ্যনিপানজম্‌। তদ্বর্জ্জ্যং সলিলং তাত সদৈব পিতৃকর্ম্মণি॥ ইতি কৃত্রিমজলবর্জ্জনবচনে জলাশয়োৎসর্গাদৌ বিধিবাক্যে চ ত্যাগ এবোৎসর্গপদপ্রয়োগাত্তত্রৈবাস্য উৎসৃজতেঃ শক্তত্বাৎ। এবং যুবানং পতিং বো দদামি ইত্যুৎসর্গমন্ত্রে দাধাতোস্ত্যাগার্থত্বাচ্চ হল-

শকটবহননিবৃত্তিফলকব্যাপারপরত্বে লক্ষণাপ্রসঙ্গাৎ। সতি স্বত্বে দানবিক্রয়াদ্যাপত্তেশ্চ। কিঞ্চ হলশকটবহননিবৃত্তিফলমিতি যদুক্তং তত্র হলশকটবহননিবৃত্তিঃ প্রধ্বংসঃ প্রাগভাবঃ অত্যন্তাভাবো বা। নাদ্যঃ ধ্বংসস্য প্রতিযোগ্যধীনত্বেন বৃষস্য হলশকটবহনাপত্তেঃ। ন দ্বিতীয়ঃ প্রাগভাবস্যানাদিত্বেন ফলত্বাসম্ভবাৎ তস্য প্রতিযোগিব্যাপ্যতয়া প্রতিযোগ্যাপত্তেশ্চ। নাপি তৃতীয়ঃ অত্যন্তাভাবস্য নিত্যত্বাৎ। ন চ তদধীনসম্বন্ধবত্ত্বরূপং যোগক্ষেমসাধারণতৎফলত্বং বাচ্যং তচ্চাত্যন্তাভাবেঽপ্যক্ষতমিতি বাচ্যং অত্যন্তাভাবীয়সমবায়সম্বন্ধে নিত্যান্তরসাধারণস্য সদাতনত্বস্যৈব প্রযোজকত্বেন উৎসর্গস্য তদপ্রযোজকত্বাৎ। যচ্চ যাজ্ঞবল্ক্যবচনং উৎসৃষ্টবৃষে স্বামিত্বে প্রমাণমুক্তং তদ্বচনার্থানভিজ্ঞত্বেন। বচনস্যায়মর্থঃ— মহক্ষোঽনিবার্য্যবলীবর্দ্দঃ দেবতোদ্দেশেন পিত্রুদ্দেশেন বা উৎসৃষ্টাঃ পশবঃ সূতিকা অনির্গতপ্রসবাবধিদশাহা আগন্তুকা ভিন্নগ্রামাৎ প্রপলায্যাগতা এতে পশবো মোচনীয়া ন তু বন্ধনীয়াঃ। এতদন্যেষাং যেষাং বা পশূনাং পালোঽস্তি তেঽপি মোচনীয়াঃ। অর্থাত্তত্র দণ্ডার্থং পাল এব বন্ধনীয় ইতি ন তু এষাং পশূনাং মধ্যে যেষাং পালোঽস্তি তে মোচ্যা ইতি ভবদুক্তো বচনার্থঃ। তথাত্বে পশুসামান্যস্যৈব পালসত্ত্বে মোচনীয়তয়া মহোক্ষাদীনাং বিশেষোপাদানবৈয়র্থ্যাপত্তেঃ। উৎসৃষ্টপশূনাং গবাদীনাং অপালনবধে তদুৎস্রষ্টুঃ স্বামিত্বেন প্রায়শ্চিত্তপ্রসক্তৌ ব্যবহারবিরোধাপত্তেশ্চ। এবমপি প্রব্রজ্যাস্থলীয়সর্ব্বস্বোপেক্ষাদৌ ব্যভিচারাবারণাচ্চ ন কিঞ্চিদেতৎ। নবীনাস্তু বৃষোৎসর্গো যাগ এব বৎসতরীরুদ্দেশ্য বৃষত্যাগরূপত্বাৎ বৎসতরীণাঞ্চ বেদমেয়ত্যাগোদ্দেশ্যত্বেন দেবতাত্বাৎ দেবতোদ্দেশ্যকদ্রব্যত্যাগস্য চ যাগত্বাৎ। এনং যুবানং পতিং বো দদানি তেন ক্রীড়ন্ত্যশ্চরথ প্রিয়েণ মা নঃ সাপ্তজনুষা সুভগা রায়স্পোষেণ সমিষামদেম ইতি ত্যাগমন্ত্রেণ বৎসতরীরুদ্দিশ্য বৃষত্যাগস্য প্রতিপাদনাৎ। এবং বৎসতরীণাং ত্যাগোঽপি যাগঃ তন্মন্ত্রে মান ইত্যনেন হে বৎসতর্য্যো যূয়মপি নোঽস্মাকং মা নঃ স্ব ত্বাস্পদীভূতা ইত্যর্থকেন তাসামপি বৃষমুদ্দিশ্যত্যাগপ্রতিপাদনাৎ। অত উক্তনিয়মে ন ব্যভিচার ইতি সমাদধিরে তদপ্যসৎ মন্ত্রলিঙ্গেন হি বৎসতরীষু বৃষস্য পত্নীত্বেন

অত্র কশ্চিদ্ যাগোঽয়ং দেবতোদ্দেশেন দ্রব্যত্যাগো

বৃষে চ তাসাং পতিত্বেনোদ্দেশ্যতা প্রতিপাদিতা। তেন কিং নহ্যেতাদৃশ্যো-দ্দেশ্যতা যাগলক্ষণে প্রবিষ্টা। তথা সতি ইন্দ্রাদিযাগ এবাব্যাপ্তেঃ কিন্তু স্বামিত্বেন উদ্দেশ্যতৈব যাগলক্ষণঘটিকেতি কথমস্য যাগত্বেন সমাধানম্। নন্নু দেবস্যেদং ভবত্বিত্যাকারিকা ইচ্ছৈব যাগঃ। তথাচ সামান্যত এব সম্বন্ধবিষয়তাং নিবেশ্য দেবনিষ্ঠবিষয়তা নিরূপিতসম্বন্ধনিষ্ঠবিষয়তা নিরূপিতদ্রব্যনিষ্ঠবিশেষ্যতাশালীচ্ছাত্বমেব যাগলক্ষণং বাচ্যম্। এবঞ্চ বৃষোৎসর্গস্যাপি বৎসতরীণাং বৃষো ভবত্বিত্যাকারিকেচ্ছাত্মকতয়া বৎ-সতরীনিষ্ঠবিষয়তানিরূপিতপতিপত্নীভাবসম্বন্ধনিষ্ঠবিষয়তানিরূপিতবৃষনি-ষ্ঠবিশেষ্যতাশালিত্বাৎ যাগত্বমক্ষুণ্ণমেবেতি চেন্ন। এবং সতি দেব-দ্রব্যয়োর্জন্যজনকভাবরূপসম্বন্ধাবগাহিন্যাং দেবদ্রব্যমিদং ন মমেত্যু-পেক্ষায়ামতিব্যাপ্তেস্তস্যা অপি দেবনিষ্ঠবিষয়তানিরূপিতজন্যজনক-ভাবরূপসম্বন্ধনিষ্ঠবিষয়তানিরূপিতদ্রব্যনিষ্ঠবিশেষ্যতাশালীচ্ছারূপত্বাৎ। তস্মাৎ বিশিষ্যস্বত্বনিষ্ঠবিষয়তা তেনৈব সম্বন্ধবিষয়তাং নিবেশ্য দেবনিষ্ঠবিষয়তানিরূপিতস্বত্বনিষ্ঠবিষয়তানিরূপিত-দ্রব্যনিষ্ঠবিষয়তাশালী-চ্ছাত্বং যাগলক্ষণং ভবতাপি বাচ্যং তৎ কথং বৃষোৎসর্গসাধারণ্যং ন চাত্র স্বত্ববিষয়তাপি তাদৃশী বর্ত্তত ইতি বাচ্যং উক্তমন্ত্রলিঙ্গাৎ স্বত্বা-নবগমাৎ কিন্তু পতিপত্নীভাবসম্বন্ধস্যৈবাবগমাদিতি সুধীভির্ভাব্যম্॥১০॥

এবং প্রশ্নে কশ্চিদুত্তরয়তীতি শেষঃ উত্তরমাহ যাগোঽয়মিতি দূষয়তি তন্নেতি অন্যোন্যাশ্রয়াপত্তেরিতি দেবতাত্বস্য যাগত্বঘটিতত্বেন যাগত্ব-স্যাপি দেবতাত্বঘটিতত্বেনান্যোন্যাশ্রয়াপত্তেরিত্যর্থঃ। অন্যোন্যাশ্রয়-নিরাসায়ান্যথা দেবতালক্ষণমাশঙ্কতে নচ হবিরিতি হবিস্ত্যাগোদ্দেশ্যত্ব-মিত্যর্থঃ। অত্র হবিঃপদং ঘৃতাদিত্যাজ্যদ্রব্যমাত্রপরং হবনকর্ম্মদ্রব্যপরং বা। আদ্যে দূষণমাহ ঘৃতাদিদানে ইতি তথাত্বাপত্তেঃ দেবতাত্বাপত্তেঃ। তথা চ দানমপি যাগঃ স্যাদিতি ভাবঃ। দ্বিতীয়মাশঙ্ক্য দূষয়তি নচে-ত্যাদি। অগ্নিপ্রক্ষেপেতি অগ্নিপ্রতিপাদ্যত্বেন বিধিবোধিতত্বমিত্যর্থঃ। তেন দানবারণং দীয়মানদ্রব্যস্যাগ্নিপ্রক্ষেপানভিধানাৎ। শ্রাদ্ধীয়দ্র-

যাগঃ ইতি যাগলক্ষণব্যাপনাৎ তন্ন যাগোদ্দেশ্যা দেবতা দেবতোদ্দেশেন দ্রব্যত্যাগো যাগ ইত্যন্যোন্যাশ্রয়াপত্তেঃ। ন চ হবিঃ প্রত্যুদ্দেশ্যত্বং দেবতাত্বং ঘৃতাদিদানে ব্রাহ্মণস্য তথাত্বাপত্তেঃ। ন চ হূয়ত ইতি হবি-

---

ব্যস্য তু ব্রাহ্মণাসম্প্রত্তাবগ্নিপ্রতিপত্তেরভিহিতত্বেন হবিষ্ত্বমেবেতি তৎসংগ্রহঃ। যথাশ্রুতস্তু ন সংগচ্ছতে সাক্ষাদ্‌ব্রাহ্মণস্থানীয়শ্রাদ্ধস্যাগ্নিপ্রক্ষেপোপহিতত্যাগত্বাভাবেন তদীয়দ্রব্যস্য নিরুক্তহবিষ্ত্বাভাবাৎ তদসংগ্রহাপত্তেঃ। ন চাগ্নিপ্রক্ষেপোপহিতেতি ন ত্যাগবিশেষণং কিন্তু কর্ম্মবিশেষণম্। তথা চ অগ্নিপ্রক্ষেপরূপো য উপাধিস্তদ্বান্ তৎসম্বন্ধী। সম্বন্ধশ্চ তদ্বোধকবিধিবোধ্যত্বম্। তেনাগ্নিপ্রক্ষেপবোধকবিধিবোধ্যত্বে সতি ত্যাগকর্ম্মত্বং হবিষ্ত্বম্। সাক্ষাদ্‌ব্রাহ্মণকশ্রাদ্ধীয়দ্রব্যাণামপি তথাত্বাৎ। ন তদসংগ্রহ ইতি বাচ্যং তথা সতি ঘৃতাদিদানস্যৈবাবারণাপত্তেঃ ঘৃতাদীনাং আজ্যং জুহুয়াদিতি বিধিবোধ্যত্বাৎ ত্যাগকর্ম্মত্বাচ্চ পদে জুহোতীত্যাদিনা বর্ত্মনি জুহোতীত্যস্য পরিগ্রহঃ। অব্যাপ্তেরিতি তত্র জুহোতীতি শ্রুতের্যাগত্বমস্য বোধিতব্যং বিশিষ্টদেশপ্রক্ষেপাবচ্ছিন্নযাগস্যৈব জুহোতীত্যর্থত্বাৎ হবনীয়স্যাজ্যস্য চাত্র পাদবর্ত্মপ্রক্ষেপস্যৈব বিধেয়ত্বেনাগ্নিপ্রতিপত্তেরনভিধানাৎ নিরুক্তহবিষ্ত্বাভাবেন তদুদ্দেশ্যস্য দেবতাত্বাভাবাৎ যাগলক্ষণাব্যাপ্তেরিত্যর্থঃ। এবং দেবেভ্যো নৈবেদ্যাদিদানেঽপ্যব্যাপ্তির্দ্রষ্টব্যা। নন্থ চেতননিষ্ঠস্বামিত্বাভিসন্ধানপূর্ব্বকত্যাগকর্ম্মত্বং হবিষ্ত্বং বাচ্যং তেন দীয়মান দ্রব্যস্য ন হবিষ্ত্বম্। তস্য চেতনসম্প্রদানস্বামিত্বাভিসন্ধানপূর্ব্বকদানকর্ম্মত্বাৎ। যাগাদৌ চ সর্ব্বত্র ত্যাজ্যদ্রব্যস্য অচেতননিষ্ঠস্বামিত্বাভিসন্ধানপূর্ব্বকত্যাগকর্ম্মত্বং হবিষত্বমক্ষুণ্ণমেবেতি নাব্যাপ্তিঃ। অতো দ্বিতীয়দলং বিকল্প্য দূষয়তি অপিচেতি। নিরুক্তহবিস্ত্যাগোদ্দেশ্যত্বং দেবতাত্বমিতি লক্ষণং পর্য্যবসিতম্। তত্র তদুদ্দেশ্যত্বং কিমিতি বিকল্পয়তি উদ্দেশ্যত্বমিতি। প্রয়োজনত্বং প্রযুজ্যতেঽনেনেতি ব্যুৎপত্ত্যা প্রয়োজকত্বমিত্যর্থঃ। দেবতানাং ফলদাতৃত্বজ্ঞানস্যৈব

রিতি ব্যুৎপত্ত্যাগ্নিপ্রক্ষেপোপহিতত্যাগকর্ম্মত্বং হবিষ্ত্বং ঘৃতাদীনাং দানবিষয়ে নাস্তীতি বাচ্যং পদে জুহোতি বর্ত্মনি জুহোতীত্যাদাবব্যাপ্তেঃ। অপিচ উদ্দেশ্যত্বং যদি প্রয়োজনত্বং ত্যাগোৎপত্তেঃ প্রাগ্বুদ্ধিস্থত্বং বা উভয়থা পূর্ব্বেণাতিব্যাপ্তেঃ ॥ ১১ ॥

ন চ ত্যাগং প্রতি চতুর্থ্যন্তপদনির্দ্দেশ্যত্বং দেবতাত্বং স্বগতোদ্দেশেন কৃতে দ্রব্যত্যাগে তস্য দেবতাত্বাপত্তেঃ।

প্রয়োজকত্বং ন তু দেবতানামিত্যভিপ্রায়েণ বিকল্পাবতারমাহ ত্যাগোৎপত্তেরিতি। ত্যাগোৎপত্তিপ্রযোজকবুদ্ধিবিষয়ত্বমিত্যর্থঃ। উভয়থেতি উভয়পক্ষেঽপীত্যর্থঃ। ত্যাগস্যাপূর্ব্বজ্ঞানসাপেক্ষতয়া দেবতানামিবাপূর্ব্বস্যাপি প্রয়োজকত্বাৎ প্রয়োজকীভূতজ্ঞানবিষয়ত্বাচ্চেতি ভাবঃ। অপূর্ব্বেণেতি স্থাল্যা পচতীতিবৎ সপ্তম্যর্থে তৃতীয়া। ইদমুপলক্ষণং উক্তক্রমেণ স্বর্গাদিফলেঽপ্যতিব্যাপ্তির্দ্রষ্টব্যা। ন চ স্বামিত্বেনারোপবিষয়ত্বমেব উদ্দেশ্যত্বং অতো নোক্ত দোষ ইতি চেত্তদা ত্যাজ্যদ্রব্যস্বামিত্বেনারোপবিষয়ত্বমিতি লক্ষণস্যৈব সম্যক্ত্বেন নিরুক্তহবিষ্ত্বনিবেশস্য লক্ষণে বৈয়র্থ্যাপত্তেঃ ব্রাহ্মণস্য স্বামিত্বেন তদারোপবিষয়ত্বাভাবাত্তাবতৈব দানবারণাৎ। তৎপরিত্যাগে চ বক্ষ্যমাণাস্মন্মতানুবাদ এব ন পৃথগিতি ভাবঃ ॥১১॥

লক্ষণান্তরমাশঙ্ক্য দূষয়তি নচেতি ত্যাগং প্রতীতি। ত্যাগে ভবিষ্যতি সতীত্যর্থস্তেন ত্যাগোৎপত্তেঃ প্রাক্ চতুর্থ্যন্তপদনির্দ্দেশ্যত্বমিত্যর্থঃ। অথবা ত্যাগং প্রতি ত্যাগেচ্ছয়া তথাচ ত্যাগেচ্ছাধীনচতুর্থ্যন্তপদনির্দ্দেশ্যত্বমিত্যর্থঃ। অশ্বত্থং বন্দয়েন্নিত্যং পূর্ব্বাহ্ণে প্রহরদ্বয়ে ইত্যুক্তাঽশ্বত্থবন্দনাদৌ অশ্বত্থায় নম ইত্যাদিবাচনিকনমস্কাররূপচতুর্থ্যন্তপদনির্দ্দেশ্যানাং দেবতাত্ববারণায় ত্যাগং প্রতীতি অপূর্ব্বাদৌ চ অত্র মতেনাতিপ্রসঙ্গশঙ্কা তেষাং চতুর্থ্যন্তপদনির্দ্দেশ্যত্বাভাবাৎ। ন চ চতুর্থ্যন্তপদনির্দ্দেশ্যত্বং তৎপ্রতিপাদ্যত্বম্। তথাচ ইন্দ্রায় স্বাহেত্যত্র

**ন চ বেদমেয়চতুর্থ্যন্তপদনির্দ্দেশ্যত্বং দেবতাত্বং ধৃতিহোমে ধৃত্যাদীনামদেবতাত্বপ্রসঙ্গাৎ তত্র চতুর্থীনিষেধাৎ যথা ছন্দোগপরিশিষ্টম্। ধৃতিহোমে ন প্রযুঞ্জ্যাৎ গোনামসু তথাষ্টসু। চতুর্থীমঘ্ন্য ইত্যেতৎ গোনামসু হি হূয়তে ॥ ১২ ॥**

চতুর্থ্যন্তপদপ্রতিপাদ্যা ইন্দ্রে যা উদ্দেশ্যতা তস্যা এব দেবতাত্বং স্যাদিতি বাচ্যং চতুর্থী অন্তো যস্য ইত্যতদ্গুণসংবিজ্ঞানবহুব্রীহিণা চতুর্থী প্রকৃতিপ্রতিপাদ্যত্বস্যোক্তত্বাৎ। নচ তথাপি চতুর্থীপ্রকৃতেরিন্দ্রপদস্য প্রতিপাদ্যঃ সহস্রাক্ষরূপবিগ্রহবান্ এব তস্য দেবতাত্ব মন্ত্রময় দেবতাসিদ্ধান্তবিরোধ ইতি বাচ্যং সর্ব্বত্র মন্ত্রে ঐন্দ্রাদিপদানাং ইন্দ্রায় স্বাহেত্যাদিমন্ত্রে লাক্ষণিকত্বেন তত্তন্মন্ত্রাণামেব তত্তৎপ্রতিপাদ্যত্বাৎ। যস্য যস্য তু মন্ত্রস্য উদ্দিষ্টা যা চ দেবতা। তদাকারং ভবেত্তস্য দেবত্বং দেবতোচ্যতে॥ ইত্যনেন তদ্দেবতাকারাবচ্ছিন্নমন্ত্রাণামেব বেদমেয়ত্যাগোদ্দেশ্যত্বরূপদেবত্বপ্রতিপাদনাৎ। লক্ষণা চেয়ং নিরূঢ়া অনাদিপ্রয়োগযোগিত্বাৎ ইতি ন দোষঃ। সুগতেতি সুগতো বুদ্ধঃ তস্য চাপাত্রতয়া তদুদ্দেশেন দ্রব্যত্যাগস্য বেদমেয়ত্বাভাবাৎ তস্য দেবতাত্বাভাবস্য বাস্তবিকত্বাদিতি ভাবঃ। বেদমেয়েতি বেদমেয়ত্যাগোৎপত্তেঃ প্রাক্ চতুর্থ্যন্তপদনির্দ্দেশ্যত্বমিত্যর্থঃ। যথাশ্রুতন্তু ন সঙ্গচ্ছতে জলাশয়োৎসর্গাদৌ সর্ব্বভূতান্তঃপাতিনঃ সুগতস্যাপি বেদমেয়চতুর্থ্যন্তপদনির্দ্দেশ্যত্বাৎ। ধৃতিহোম ইতি তত্র গোনামাষ্টকহোমে চেত্যর্থঃ। তেন ধৃতিহোমে দেবতান্তরবিরহে ন ধৃত্যাদীনামিত্যাদিপদানুপপত্তিঃ। ধৃতিহোমেনেতি ধৃতিহোমে তথা অঘ্ন্যাদি গোনামকহোমে চ চতুর্থীং ন প্রযুঞ্জ্যাদিত্যন্বয়ঃ। তদা কথং হোমস্তত্রাহ অঘ্ন্য ইত্যেতদিতি। অঘ্ন্যাদিপদং গোনাম তথাচার্জ্জুন্যঘ্ন্যা রোহিণী স্যাদিত্যমরঃ। অঘ্ন্যা ইতি গবাং নাম ইতি মহাভারতঞ্চ। তস্য সম্বোধনে অঘ্ন্যে ইতি রূপং ইত্যেতৎ ইত্যনেন ক্রমেণ সম্বোধনান্তেন অঘ্ন্যাদিগোনামাষ্টকেন। গোনামসু

কিঞ্চ দানে চতুর্থ্যন্তপদনির্দ্দেশ্যত্বস্য বেদমেয়ত্বাদতিব্যাপ্তেঃ। যথা ছন্দোগপরিশিষ্টম্। অহমস্মৈ দদানীতি এবমাভাষ্য দীয়তে। তস্মাদ্দেবলোক্তো নিয়তোদ্গাত্রাদিসাধ্যো নিয়তপশ্বাদিদ্রব্যকো নিয়তদক্ষিণস্ত্যাগো যাগঃ। যথা দেবলঃ। পশুক্ষী রাজ্যপুরোডাশ সোমৌষধিচরুপ্রভৃতিভির্হবির্ভিঃ খদিরপলাশাশ্বত্থন্যগ্রোধোডুম্বরপ্রভৃতিভিঃ সমিদ্ভিঃ শ্রুক্স্রুবোদূখলমুষলকুঠারখনিত্রযূপদারুদর্ভচর্ম্মভাণ্ডপবিত্রভাজনাদিভির্দ্রব্যোপকরণৈরুদ্গাতৃহোত্রধ্বর্য্যুব্রহ্মাদিভিঋত্বিগ্ভিঃ কাম্যনৈমিত্তিকানাং পক্ষাদিপূর্ব্বকাণাং যথোক্তদক্ষিণানাং যজ্ঞানাং

---

গোনামাষ্টকহোমেষু হুয়তে ইত্যর্থঃ। সাহচর্য্যাচ্চ ধৃতিহোমেঽপি সম্বুদ্ধ্যন্ততা প্রতীয়তে॥ ১২॥

নন্থ চতুর্থ্যন্তপদনির্দ্দেশ্যত্বমিত্যনেন চতুর্থ্যর্থকবিভক্ত্যন্তপদনির্দ্দেশ্যত্বং বাচ্যং ধৃতিহোমাদৌ চ সম্বোধনবিভক্তেরেব চতুর্থ্যর্থকত্বান্নাব্যাপ্তিরত আহ কিঞ্চেতি। দানে সম্প্রদানে। চতুর্থ্যন্তপদনির্দ্দেশ্যত্বস্য চতুর্থ্যন্তপদনির্দ্দেশস্য বেদমেয়ত্যাগোৎপত্তেঃ প্রাক্ সত্বাৎ অতিব্যাপ্তেঃ সম্প্রদানে দেবতালক্ষণস্য তথৈব দানে যাগ লক্ষণস্য চাতিব্যাপ্তেঃ। দানাৎ পূর্ব্বং সম্প্রদানস্য চতুর্থ্যন্তপদনির্দ্দেশ্যত্বে প্রমাণমাহ যথেতি। অহমস্মা ইতি অত্রৈবমাভাষ্য দীয়তে ইত্যনেন দানপূর্ব্বং চতুর্থ্যন্তপদেন সম্প্রদানাভাষণস্য অভিহিতত্বাদিতি ভাবঃ। যদ্যপি অহমস্মৈ দদানীতি এবমাভাষ্য দীয়তে। নৈতাবপৃষ্ট্বা দদতঃ পাত্রেঽপি ফলমস্তি হীতি ছন্দোগপরিশিষ্টবচনং ন দানবাক্যবিধায়কং কিন্তু গুরুকুলর্ত্বিজোরশৌচে তাভ্যাং দানাসম্ভবাৎ তয়োঃ সন্নিধাবস্মৈ দানে তয়োরনুমতিগ্রহণবিধায়কম্। তথাপি অনুমতিগ্রহণবাক্যে চতুর্থ্যন্ততাদর্শনাৎ দানবাক্যেঽপি তথা কল্প্যতে ইত্যাশয়ঃ। বস্তুতো নামগোত্রে সমুচ্চার্য্য প্রদদ্যাৎ

সমাপনং যজনম্। এতেন যাজনং ব্যাখ্যাতম্। অতোঽস্য ন যাগরূপতা। অতএব ন হোমরূপতা চ যাগাবান্তরপ্রকারত্বাত্তস্য যাগ এব ত্যাগে বিশিষ্টদেশপ্রক্ষেপোপহিতো হোম ইত্যুক্তত্বাৎ॥ ১৩॥

ন চ দানরূপতা উদ্দেশ্যপিত্রাদিগতস্বামিত্বাজন-

শ্রদ্ধয়ান্বিতঃ। পরিতুষ্টেন ভাবেন তুভ্যং সম্প্রদদে ইতি। ব্যাসবচনমেব দানে চতুর্থ্যন্তদানমন্ত্রনির্দ্দেশপূর্ব্বকত্বে প্রমাণং বোধ্যম্। তস্মাদিতি। যস্মাদীদৃক্ যাগলক্ষণং দৃষ্টং তস্মাদিত্যর্থঃ। দেবলোক্তো দেবলোক্তযাগ এব ইত্যন্বয়ঃ। তথাচ নিয়তোদ্গাত্রাদিসাধ্যনিয়তপশ্বাদিদ্রব্যকনিয়তদক্ষিণকত্যাগত্বমেব যাগলক্ষণমিতি ভাবঃ। হবির্ভির্হবনীয়দ্রব্যৈঃ। দ্রব্যোপকরণৈর্দ্রব্যবিনিয়োগসাধনৈঃ। উদ্গাতা সামগঃ। হোতা ঋগ্বেদী। অধ্বর্য্যুর্যজুর্ব্বেদী। ব্রহ্মা যজ্ঞভদ্রাভদ্রবিবেচনার্থং বৃতো ব্রাহ্মণঃ। কাম্যনৈমিত্তিকানামিতি। স্বর্গাদিতত্তৎফলকামনয়া ক্রিয়মাণানাং কাম্যানাং প্রায়শ্চিত্তবিধয়া ক্রিয়মাণানাঞ্চ নৈমিত্তিকানাং দর্শপৌর্ণমাসাদীনামিত্যর্থঃ। পক্ষাদিঃ প্রতিপৎ তৎপূর্ব্বকাণাং তদারভ্য ক্রিয়মাণানাম্। এতেন এতাদৃশযাগলক্ষণকরণেন। যাজনমিতি এতাদৃশযাগকারকত্বম্। যাজনমিতি যাজনলক্ষণমপি ব্যাখ্যাতমুক্তমিত্যর্থঃ। অত ইতি উক্তলক্ষণাক্রান্তস্যৈব যাগত্বান্নাস্য শ্রাদ্ধস্য যাগরূপতেত্যর্থঃ। অতএব যাগত্বাভাবাদেব ন হোমরূপতা ন হোমত্বমস্য ইতি পূর্ব্বেণান্বয়ঃ। যাগাবান্তরপ্রকারত্বাৎ যাগত্বব্যাপ্যাবান্তরধর্ম্মত্বাৎ। তস্য হোমত্বস্য ব্যাপ্যত্বমেব দর্শয়তি যাগ এবেতি বিশিষ্টদেশেতি বৈশিষ্ট্যং পঞ্চধাভূসংস্কারাঃ। অতএব পঞ্চধা ভূসংস্কারমভিধায় এষ এব বিধির্যত্র কুত্রচিদ্ধোম ইতি পারস্করেণোক্তম্। ইত্যুক্তত্বাদিতি। বিশিষ্টদেশপ্রক্ষেপাবচ্ছিন্নযাগত্বস্যৈব হোমত্বরূপতয়া যাগত্বব্যাপ্যত্বং হোমত্বস্য সুতরামিতি ভাবঃ॥ ১৩॥

পিত্রাদীনামিতি আদিনা দেবপরিগ্রহঃ। স্বীকারাভাবাদিতি তেষাং মন্ত্রময়ত্বেন অচেতনতয়া স্বীকারাভাবাদিত্যর্থঃ। ইদঞ্চ স্বীকারস্য

কত্বাৎ। অস্বামিত্বঞ্চ পিত্রাদীনাং মমেদমিতি স্বীকারা-ভাবাৎ। আদিত্যাদিদেবতাসম্প্রদানকদানে তু দান-শব্দো গৌণঃ তদ্ধর্ম্মদক্ষিণাদানাদ্যতিদেশার্থঃ। দেব-গ্রামো হস্তিগ্রাম ইত্যাদিপ্রয়োগস্তু গৌণ এবেত্যুক্তং তির্য্যগধিকরণে॥ ১৪॥

স্বত্বহেতুত্বমতেনাভিহিতং পূর্ব্বোক্তাস্মদুক্তস্বীকারপ্রাগ্‌ভাবসহকৃতস্যৈব স্বত্বহেতুতয়া সহকারিবিরহান্ন ত্যাগাৎ পিত্রাদীনাং স্বত্বোৎপত্তি-রিতি ভাব্যম্। নন্বু তর্হি—শালিতণ্ডুলপ্রস্থস্য কুর্য্যাদন্নং সুসং-স্কৃতম্। সূর্য্যায় চরুকং দত্ত্বা যৎ ফলং লভতে শৃণু॥ তথা—বিষ্ণোঃ-শঙ্খপ্রদানেন বারুণং লোকমাপ্নুয়াদিত্যাদৌ কথং দানপদপ্রয়োগ ইত্যত আহ আদিত্যাদীতি। আদিত্যাদিসম্প্রদানকদানে তদুদ্দেশ্যক-ত্যাগে গৌণপ্রয়োগ ফলমাহ তদ্ধর্ম্মেতি। নন্বু দেবাদীনাং স্বত্বাভাবাৎ তেষাং স্বত্বোল্লেখে প্রয়োগানুপপত্তিরত্রাহ দেবগ্রাম ইতি গৌণ ইতি। তথাচাত্র স্বস্বামিভাবরূপসম্বন্ধবাধাৎ মুখ্যপ্রয়োগো ন ভবত্যেব। কিন্তু তদুদ্দেশ্যকত্যাগে ষষ্ঠী লাক্ষণিকী তেন দেবোদ্দেশ্যকত্যাগবিষয়ো গ্রাম ইত্যর্থে গৌণ ইত্যর্থঃ। লুপ্তবিভক্ত্যনুসন্ধানং বিনাপি বোধাভ্যুপ-গমে তু দেবপদস্যৈব দেবোদ্দেশ্যকত্যাগবিষয়ে লক্ষণেতি বোধ্যম্। তির্য্যগধিকরণ ইতি। তথাহি তির্য্যক্‌পঙ্গ্বত্র্যার্ষেয়দেবানাং নাত্রাধিকারঃ। ইতি সূত্রম্। অস্যার্থঃ—অত্র যাগে তির্য্যক্‌প্রভৃতীনাং নাধিকারঃ। তিরশ্চাং পশ্বাদীনাং মমেদমিতি স্বীকারাভাবেন দ্রব্যস্বাম্যাভাবাৎ। পঙ্গোঃ প্রচরণবিরহাৎ যাগে চ যজমানঃ প্রচরতীত্যনেন যজমানস্য তদ্বিধানাৎ। ত্র্যার্ষেয়াণাং অন্ধবধিরমূকানাং ত্রীণি চক্ষুঃকর্ণমুখানি আর্ষেয়াণি ঋষিযোগ্যানি যেষামিতি ব্যুৎপত্তেঃ। ঋষীণাং হি তত্ত্বজ্ঞান-শীলতয়া তদীয়চক্ষুরাদীনাং স্বস্বকার্য্যাক্ষমত্বেন অন্ধাদেরপি চক্ষুরাদে-ল্যত্বাৎ। তত্রান্ধস্য হবির্বীক্ষণাভাবাৎ বধিরস্য শ্রবণাসামর্থ্যাৎ

উচ্যতে। য এবং বিদ্যান্ পিতৄন্ যজেত পিতৃভ্যো দদ্যাদিত্যুভয়পদপ্রয়োগদর্শনাদুভয়লক্ষণব্যাপনাচ্চ যাগ-দানরূপতাস্য। পিতরো দেবতা ইত্যাপস্তম্বেন দেবতো-দ্দেশেন দ্রব্যত্যাগো যাগ ইতি যাগলক্ষণং সূচিতম্। দেব-

মূকস্য পাঠবিরহাৎ। এতেষাঞ্চ যজমানেক্ষিতং হবির্জুহোতি যজমানঃ শৃণোতি যজমানঃ পঠতীতি এভির্যাজমানিকত্বপ্রতিপাদনাৎ দেবানাঞ্চ ইন্দ্রাদীনাং অচেতনতয়া দ্রব্যস্বাম্যাভাবাৎ। তর্হি কথং দেবগ্রাম ইতি প্রয়োগঃ গৌণ ইত্যুক্তং তির্য্যগধিকরণে ইত্যর্থঃ ॥ ১৪ ॥

সিদ্ধান্তমাহ উচ্যত ইতি। উভয়প্রয়োগদর্শনাৎ যাগদানার্থকযজতি-দদাত্যুভয়প্রয়োগদর্শনাৎ। নন্বু পিতৃভ্যো দদ্যাদিত্যত্র তদুদ্দেশ্যক-ত্যাগমাত্রে দদাতির্গৌণ এব পিতৄণাং স্বাম্যাভাবেন তেভ্যো দানস্য বাধি-তত্বাৎ। অত আহ উভয়লক্ষণ ইতি। অত্র উভয়লক্ষণব্যাপনাদিত্যনেন হেতুনা যত্র সাক্ষাদ্ব্রাহ্মণস্থলে এব শ্রাদ্ধস্য উভয়লক্ষণব্যাপনাদুভয়-রূপতা। ব্রাহ্মণাসম্পত্ত্যাবগ্ন্যাদিপ্রতিপত্তিপক্ষে তু দানলক্ষণাহব্যাপনাৎ তস্য যাগরূপতেতি প্রতিপাদিতম্। অত্র কেচিৎ অগ্নিপ্রতিপত্তিপক্ষে তু শ্রাদ্ধস্য হোমরূপতাপীতি প্রলপন্তি। তদসৎ বিশিষ্টদেশপ্রক্ষেপাব-চ্ছিন্নযাগস্যৈব হোমত্বাৎ বৈশিষ্ট্যস্য পঞ্চধাভূসংস্কারস্যোক্তত্বাৎ। ইহ তু সংস্কারানপেক্ষয়ৈবাগ্নিমাত্রে তৎপতিপত্তের্বাভিহিতত্বাৎ। ন চ যাগার্থ-সংস্কৃতাগ্নিপ্রক্ষেপপক্ষে এব হোমত্বমাস্তামিতি বাচ্যং প্রতিপত্তেরুত্তর-কালকর্ত্তব্যত্বেন শ্রাদ্ধস্য তদজনকত্বাৎ। উভয়রূপতাং নিরূপয়িষ্যন্ প্রথমং যাগরূপতায়াং আপস্তম্বস্বরসং দর্শয়তি পিতরো দেবতা ইতি। দেবতোদ্দেশেনেতি দানবারণার্থমিদং ত্যাগবিশেষণম্। নন্বেবং দেব-পূজাপি যাগঃ স্যাৎ। অত্র ইষ্টাপত্তিমাহ দেবপূজাপীতি। পূর্ব্বোক্তা-ন্যোন্যাশ্রয়পরীহারায় দেবতাত্বং অন্যথা নির্বক্তি দেবতাত্বঞ্চেতি। অত্র সুগতোদ্দেশেন দ্রব্যত্যাগেহতিব্যাপ্তিবারণায় বেদমন্ত্রেতি ত্যাগ-বিশেষণমিতি কেচিৎ। তদসৎ তস্য যাগত্বেন ইষ্টত্বাৎ অন্যথা ত্যাগ-

ত্বাপূজাপি যাগ এব। অতএব পূজামাত্রে শচীযাগঃ মাতৃযাগ ইতি যাগপদপ্রয়োগো দৃশ্যতে। দেবতাত্বঞ্চ বেদমেয়ত্যাগোদ্দেশ্যত্বম্। উদ্দেশ্যত্বঞ্চ তস্যেদমিত্যারোপজ্ঞানবিষয়ত্বম্ ॥ ১৫ ॥

ব্রাহ্মণাশ্চাহবনীয়ার্থ ইত্যনেন স্বামিত্বজনকস্ত্যাগো

রূপস্য তস্য ত্রিতয়ভিন্নত্বে যাগদানহোমাধিকরণবিরোধাপত্তেঃ। ন চ দানরূপতৈবাস্য ভবেৎ উদ্দেশ্যস্বীকারবিরহেণ স্বামিত্বাজনকত্বাৎ। তস্মাদ্বেদমেয়েতি ন লক্ষণান্তর্গতমুক্তদোষাদ্বৈয়র্থ্যাচ্চেতি প্রতীমঃ। দানাতিব্যাপ্তিমাশঙ্ক্যাহ উদ্দেশ্যত্বঞ্চেতি তস্যেদমিতীতি। স্বত্বাংশে নিরূপকত্বসম্বন্ধেন ভ্রমত্বঘটকীভূত প্রকারতাশ্রয়ত্বমিত্যর্থঃ। তেন দ্রব্যাদীনাং তাদৃশারোপবিষয়ত্বেঽপি ন দেবতাত্বপ্রসঙ্গঃ। দানবিষয়ে তু সম্প্রদানস্য নৈতাদৃশী প্রকারতা। তত্র তন্নিরূপিতস্বত্বস্যৈব দ্রব্যে জায়মানত্বাদিতি তদ্বারণম্। যাগস্থলে তু দেবতাগতোক্তপ্রকারতা ভ্রমত্বঘটিতৈব তন্নিরূপিতস্বত্বস্যালীকত্বাৎ। নন্বু যত্র মনসা পাত্রমুদ্দিশ্য ত্যাগঃ কৃতঃ পশ্চাচ্চ তেন স্বীকারো ন কৃতঃ। তত্র যত্র বা জীবদ্ভ্রমেণ মৃতমুদ্দিশ্য ত্যাগ কৃতঃ তত্রাপ্যুক্তারোপবিষয়তা সম্প্রদানস্য ইত্যতিপ্রসঙ্গ ইতি চেন্ন আরোপে আহার্য্যত্বস্য নিবেশনীয়ত্বাৎ আহার্য্যঞ্চ বাধকালীনত্বম্। উক্তস্থলে তু তদানীমস্বীকারমরণয়োরজ্ঞাতত্বেন বাধবুদ্ধিবিরহাৎ নাহার্য্যারোপবিষয়ত্বমিতি নাতিপ্রসঙ্গঃ। তথাচ স্বত্ব বিশেষ্যকাহার্য্যভ্রমপ্রকারীভূতোদ্দেশ্যকদ্রব্যত্যাগত্বং যাগলক্ষণং পর্য্যবসিতম্। বস্তুতস্তু এতস্য গুরুতয়া স্বামিত্বাজনকত্বে সতি স্বত্বাবচ্ছিন্নবিষয়তাশালিত্যাগত্বং অচেতনোদ্দেশ্যকদ্রব্যত্যাগত্বং বা লঘুযাগলক্ষণমাদরণীয়ম্। প্রথমলক্ষণে সত্যন্তেন দাননিরাসঃ বিশেষ্যদলাচ্চোপেক্ষানিরাস ইতি বোধ্যম্ ॥ ১৫ ॥

উক্তলক্ষণব্যাপনাৎ শ্রাদ্ধস্য যাগরূপতাং প্রতিপাদ্য দানরূপতাং ব্যুৎপাদয়িতুং তত্রাপ্যাপস্তম্বস্বরসমাহ ব্রাহ্মণাশ্চেতি স্বামিত্বজনক ইতি। তত্র দায়ে স্বামিত্বজনকে পিতৃনিধনাদাবতিব্যাপ্তিবারণায় ত্যাগপদং

**দানমিতি দানলক্ষণমত্রাস্তীতি সূচিতং ব্রাহ্মণগতস্বামিত্ব-জনকত্বাৎ। ন তু উদ্দেশ্যগতত্বমপি তত্র বিশেষণমব্যাব-র্ত্তকত্বাৎ। দ্বিতীয়ায়াঃ ক্রিয়াফলবোধকত্বে ঈপ্সিতত্বমিব ॥ ১৬ ॥**

---

অত্রাদৃষ্টজনকত্বেনাপি ত্যাগো বিশেষণীয়ঃ। তেন ন ঋণদানাতিব্যাপ্তিঃ। যদ্যপি আহবনীয়স্যাস্বামিত্বাৎ তত্তুল্যত্বেন ব্রাহ্মণস্যামিত্বমেব আয়াতি তৎকথং দানত্বসূচনং তথাপি আহবনীয়স্যাচেতনতয়া ন স্বামিত্বং ব্রাহ্মণস্য তু প্রকৃষ্টচেতনস্য প্রক্ষেপে সতি স্বীকারাবশ্যম্ভাবাৎ স্বামিত্বমেবেতি তথাত্বসূচনম্। অতএবাভিহিতং ব্রাহ্মণগতস্বামিত্বজনকত্বাদিতি। অত্র কেচিৎ উক্তলক্ষণস্য পশ্বাদিকামনয়া ক্রিয়মাণে যাগেঽতিব্যাপ্তিঃ। তস্যাপি পশ্বাদিস্বামিত্বজনকত্বাদিতি পূর্ব্বপক্ষয়ন্তি। তদসৎ সাক্ষাজ্জনকত্বস্যৈব লক্ষণে নিবেশনীয়ত্বেনাদৃষ্টদ্বারা তজ্জনকযাগাতিব্যাপ্তেরপ্রসক্তত্বাৎ। যচ্চাপরৈরুক্তং দূরস্থপাত্রমুদ্দিশ্য কৃতে দ্রব্যত্যাগে পাত্রস্বীকারাৎ পূর্ব্বং স্বামিত্বজনকত্বাভাবাৎ কথং দানত্বমিতি তদপি ন স্বীকারাৎ পূর্ব্বমেব তৎপ্রাগভাবসহকৃতেন ত্যাগেন দূরস্থপাত্রস্যাপি স্বামিত্বজননাৎ। এতচ্চ প্রাগেব বিবেচিতম্। নন্বু উদ্দেশ্যগতস্বামিত্বজনকত্যাগ এব দানং উদ্দেশ্যত্বঞ্চ স্বামিত্বেনাভিসন্ধীয়মানত্বম্। তথাচ প্রকৃতে উদ্দেশ্যানাং পিত্রাদীনাং স্বামিত্বাজনকত্বাৎ কথমস্য দানত্বমত আহ ন ত্বিতি। বিশেষণং দানলক্ষণঘটকস্বামিত্ববিশেষণম্। অব্যাবর্ত্তকত্বাদিতি উদ্দেশ্যতাপ্রত্যাসত্ত্যৈব ত্যাগস্য স্বামিত্বং প্রতিহেতুতয়াঽনুদ্দেশ্যগতস্বামিত্বজনকত্যাগাপ্রসিদ্ধ্যা ব্যাবৃত্ত্যভাবেনাব্যাবর্ত্তকত্বাদিত্যর্থঃ। অত্র দৃষ্টান্তমাহ দ্বিতীয়ায়া ইতি। ঈপ্সিতে ক্রিয়াফলে দ্বিতীয়েত্যনুশাসনবলেন দ্বিতীয়ায়া ঈপ্সিতক্রিয়াজন্যফলবোধকত্বমবগম্যতে। তত্র চ ক্রিয়াজন্যফলমাত্রে তস্যাঃ শক্তিঃ কল্প্যতে। ন তু ফলবিশেষণতয়া ঈপ্সিতত্বমপি নিবিশ্যতে। ক্রিয়াজন্যফলস্যেপ্সিতত্বাব্যভিচারিত্বেনাব্যাবর্ত্তকত্বাৎ তদ্বদিত্যর্থঃ ॥ ১৬ ॥

অস্তি চোদ্দেশ্যতাপি ব্রাহ্মণস্য। তদ্গতস্বামিত্বাভিসন্ধানেন দ্রব্যত্যাগাৎ। পিত্রপেক্ষয়া যাগত্বং ব্রাহ্মণাপেক্ষয়া দানত্বং প্রতিযোগিভেদান্ন বিরুদ্ধম্॥ ১৭॥

---

দানে উদ্দেশ্যগতত্ববিশেষণঘটকত্বমঙ্গীকৃত্যাপ্যস্য দানত্বং সম্পাদয়তি অস্তি চেতি। অন্যে তু নন্থ যত্র বিষয়বৈরাগ্যেণ ক্রোধাদিনা বা দ্রব্যমুপেক্ষিতং তদুপেক্ষাঙ্কাবধার্য্যান্যেন তৎ স্বীকৃতং তত্রোপেক্ষয়া অপি স্বীকর্ত্তুঃ স্বামিত্বজনকত্বাৎ তদ্বারণায়াবশ্যমুদ্দেশ্যগতত্ববিশেষণং নিবেশনীয়ম্। তথাচ উদ্দেশ্যস্য পিত্রাদেঃ স্বামিত্বাজনকত্বাৎ কথমস্য দানত্বং ইত্যত আহ অস্তি চেতীতি গ্রন্থমবতারয়ন্তি। তদসৎ উপেক্ষায়াঃ স্বামিত্বাজনকত্বাৎ তস্যা উপেক্ষিতুঃ স্বত্বধ্বংসজননমাত্রোপক্ষীণত্বাৎ। ন চ স্বত্বধ্বংসদ্বারা ঔপাদানিকস্বত্বেঽপি তস্যা হেতুত্বং প্রমাণাভাবাৎ। ভবতু বা তথাপি দানে সাক্ষাজ্জনকত্বস্যৈব ঘটকত্বাৎ। অন্যথা জলাশয়োৎসর্গস্যাপি ঔপাদানিকস্বত্বহেতুত্বাপত্ত্যা দানত্বাপত্তেঃ। অতঃ সর্ব্বভূতান্তঃপতিতত্বেন দাতুরপ্যুদ্দেশ্যতয়া উদ্দেশ্যগতত্ব বিশেষণেনাপি তদ্বারণাসম্ভবাৎ। সর্ব্বভূতানাং তত্র স্বামিত্বেন উদ্দেশ্যতা নাস্তীতি চেৎ উক্তাপেক্ষায়ামপি তদ্বিরহস্য তুল্যত্বাৎ ইয়ান্ পরং বিশেষঃ। জলাশয়োৎসর্গে উৎসর্গানান্তরমৌপাদানিকস্বামিত্বাভিসন্ধানপূর্ব্বকত্যাগত্বং উৎসর্গত্বমিতি ফলিতম্। উদ্দেশ্যত্বমপীতি। তথাচোদ্দেশ্যগতস্বামিত্বজনকস্ত্যাগো দানমিতি দানলক্ষণেঽপি শ্রাদ্ধস্য দানত্বমব্যাহতমেব। ব্রাহ্মণস্যাপি স্বামিত্বেন উদ্দেশ্যত্বাদিতি ভাবঃ। এতেন ইদং পিতুর্ব্রাহ্মণস্য ইতি শ্রাদ্ধশরীরং প্রতিপাদিতম্। নন্থ শ্রাদ্ধস্য দানত্বে দানাভিলাপপ্রসঙ্গঃ স চাভিলাপঃ—নামগোত্রে সমুচ্চার্য্য প্রদদ্যাৎ শ্রদ্ধয়ান্বিতঃ। পরিতুষ্টেন ভাবেন তুভ্যং সম্প্রদদে ইতি॥ ইতি ব্রহ্মপুরাণোক্তেঃ। তস্মাৎ শ্রাদ্ধং ন দানমিতি চেন্নৈবং নহ্যভিলাপপ্রসক্তির্দানত্বং বাধিতুমর্হতি তস্য বাস্তবিকত্বাৎ। তদুক্তং ন হি প্রয়োজনভিয়া সামগ্রী কার্য্যং নার্জ্জয়তি ইতি প্রয়োজনভিয়াঽতিপ্রসক্তিভিয়া ইত্যর্থঃ।

ভ্রান্তিজ্ঞানস্যেব পরমতে প্রমাণতাঽপ্রমাণতা। অনুমানস্যেব গুরুমতে আত্মস্বত্বাংশে প্রত্যক্ষরূপতা ॥ ১৮ ॥

---

দানাভিলাপপ্রসক্তিস্ত অমুকামুকগোত্রৈতত্তুভ্যমন্নং স্বধা নম ইতি শ্রাদ্ধরূপদানে ব্রহ্মপুরাণোক্তবিশেষবিধিনৈব বাধ্যতে। তথাহি দানং দ্বিবিধং—শ্রাদ্ধরূপমশ্রাদ্ধরূপঞ্চ। তত্র শ্রাদ্ধরূপদানে বিশেষবিধিমহিম্না সামান্যদানবাক্যবিধিঃ অশ্রাদ্ধরূপে দানে প্রবর্ত্ততে। অপবাদবিষয়পরিত্যাগেনোৎসর্গপ্রবৃত্তেরিতি। একস্যোভয়রূপতা বিরুদ্ধা ইত্যাশঙ্কামপনয়তি পিত্রপেক্ষয়েতি। প্রতিযোগিভেদাদিতি নিরূপকভেদাদিত্যর্থঃ। তথাচ একস্যৈব শ্রাদ্ধস্য পিত্রুদ্দেশ্যকত্বাংশে যাগত্বং ব্রাহ্মণোদ্দেশ্যকত্বাংশে দানরূপত্বং ইত্যবচ্ছেদকভেদান্ন বিরোধ ইতি ভাবঃ ॥ ১৭ ॥

অত্র দৃষ্টান্তমাহ ভ্রান্তিজ্ঞানস্যেবেতি ভ্রান্তিপদেনাভিলপ্যমানজ্ঞানস্যেত্যর্থঃ। অন্যথৈতন্মতে বস্তুতো ভ্রমাপ্রসিদ্ধ্যা সিদ্ধবন্নির্দ্দেশানুপপত্তেঃ। পরমতে নৈয়ায়িকমতে তন্মতে হি ইদং রজতমিতি ভ্রমে ইদমংশে প্রমাণতা বাধিতরজতাংশেঽপ্রমাণতা যথা তদ্বৎ। ধর্ম্মিণি সর্ব্বমভ্রান্তং প্রকারে তু বিপর্য্যয় ইতি তৎসিদ্ধান্তাৎ। স্বমতেঽপি দৃষ্টান্তমাহ অনুমানস্যেতি। গুরুমতে ইতি তদেব স্বমতম্। অত্র মতে মতির্ম্মাতা মেয়ঞ্চ ত্রয়ং জ্ঞানমাত্রস্য বিষয়ঃ। তথাচানুমিতয়োঽপি পর্ব্বতো বহ্নিমান্ পর্ব্বতে বহ্নিমনুমিনোমীত্যাদ্যাকারাঃ। তত্রাত্মাংশে মাত্রংশে স্বাত্মাংশে স্বং জ্ঞানং তদ্রূপাংশে প্রত্যক্ষরূপতা মেয়বহ্ন্যংশে ত্বনুমিতিরূপতা যথা তদ্বৎ। ন চ তদুভয়াংশেঽপ্যনুমিতিরূপতেতি বাচ্যং তয়োরনুমিতিসামগ্রীবিরহাৎ। কিন্ত আত্মমনঃসংযোগাদিঘটিতপ্রত্যক্ষসামগ্র্যাৎ প্রত্যক্ষরূপতৈব। এতেন মিশ্রৈরেকত্র শ্রাদ্ধে যাগত্বদানত্বাভ্যুপগমে জাতিসাঙ্কর্য্যমুদ্ভাবিতং তদপাস্তং প্রত্যক্ষত্বানুমিতিত্ববৎ যাগত্বদানত্বয়োরপি জাতিত্বানভ্যুপগমাৎ। কিন্ত তেষামখণ্ডোপাধিত্বস্যৈব তৈরুপগমাৎ ॥ ১৮ ॥

অবিরুদ্ধসঙ্করোত্তরস্যেব মিথ্যোত্তরস্যাপি কারণো-ত্তরতাঽংশভেদাৎ॥ ১৯॥

ব্রাহ্মণস্য সম্প্রদানত্বে কথং পিতৃভ্যো দদ্যাদিতি চতুর্থীতি চেন্নহীয়ং মুখ্যসম্প্রদানে চতুর্থী কিন্তুনিরাকর্ত্তৃক-

উভয়মতসাধারণং দৃষ্টান্তমপ্যাহ অবিরুদ্ধেতি। অত্রায়মর্থঃ ব্যবহারস্তাবদ্ভাষোত্তরক্রিয়ানির্ণয়াত্মা চতুষ্পাদঃ। অত্র শতং ধারয়সীত্যভিযোগো ভাষাপাদঃ। সত্যং মিথ্যাকারণঞ্চ প্রাঙ্‌ন্যায়শ্চোত্তরাঃ স্মৃতা ইত্যুক্তচতুর্ব্বিধমুত্তরং উত্তরপাদঃ। সাক্ষিলেখ্যাদিরূপঞ্চ ক্রিয়াপাদঃ। এককোটিনিশ্চয়রূপশ্চ নির্ণয়পাদঃ। ধারয়সীত্যভিযোগে ধারয়ামীত্যুত্তরং সত্যোত্তরম্। মিথ্যোত্তরঞ্চ দ্বিবিধং—সাক্ষান্মিথ্যোত্তরং সোপদেশমিথ্যোত্তরঞ্চ। মিথ্যেতি ন ধারয়ামীত্যাদিরূপং বা সাক্ষান্মিথ্যোত্তরম্। অমুকদেশে মত্তো গৃহীতং অমুকসময়ে বা মত্তো গৃহীতমিতি দেশগর্ভে বাঽভিযোগে তস্মিন্ দেশে ময়া ন গতং তস্মিন্ সময়ে নাহং জাত ইত্যাদি সোপদেশমিথ্যোত্তরং অর্থবলেনাভিযোগমিথ্যাত্বলাভাৎ। পরিশোধিতমিতি কারণোত্তরম্। অস্মিন্নভিযোগে ত্বং ময়া জিত ইতি কারণোত্তরম্। এবং স্থিতে যত্র ত্বং মহ্যং সুবর্ণানাং শতং ধারয়সীতি বাদিনো ভাষায়াং প্রতিবাদিনাং শতং মিথ্যা পঞ্চাশৎ ধারয়ামি পঞ্চবিংশতিঃ পরিশোধিতা ইত্যুত্তরিতং তদুত্তরস্য যথা শতাংশে মিথ্যোত্তরত্বং পঞ্চাশদংশে সত্যোত্তরত্বং পঞ্চবিংশত্যংশে চ কারণোত্তরত্বং তদ্বৎ। তথাচৈতেষু সর্ব্বেষু বিরুদ্ধধর্ম্মাণাং যথা একত্রাবস্থানমবচ্ছেদক ভেদাদবিরুদ্ধং তথা শ্রাদ্ধেঽপি অবচ্ছেদকভেদাৎ যাগত্বদানত্বমবিরুদ্ধমিতি ভাবঃ॥ ১৯॥

আশঙ্কতে ব্রাহ্মণস্যেতি। সম্প্রদানত্বেন ব্রাহ্মণস্যৈব সম্প্রদানত্বেন সম্প্রদানত্বং হি ত্যাজ্যদ্রব্যস্বামিত্ববত্ত্বং তচ্চ ব্রাহ্মণস্যৈব। তত্রৈব চতুর্থ্যা মুখ্যত্বং পিতৃণাং স্বাম্যাভাবেনাসম্প্রদানত্বাৎ তদুত্তরং চতুর্থী কথং ইত্যর্থঃ। সমাধত্তে নহীতি। ইয়ং পিতৃপদোত্তরং শ্রূয়মাণা চতুর্থী ন

সংপ্রদানে তচ্চ গৌণমেবেতি ন বিরোধঃ। দেবলবচনস্তু প্রত্যেকসমুদায়াভ্যাং দর্শপৌর্ণমাসাদাবব্যাপকত্বান্ন লক্ষণপরম্ ॥ ২০ ॥

কিন্তু—যাজনং যোনিসম্বন্ধং স্বাধ্যায়ং সহ ভোজনম্। কৃত্বা সদ্যঃ পতত্যেব পতিতেন ন সংশয়ঃ ॥ ইতি স্বয়মুক্ত-

---

মুখ্যসম্প্রদানে ন মুখ্যসম্প্রদানত্ববোধিকা যেন বাধঃ স্যাদিতি ভাবঃ। অনিরাকর্তৃকত্বে ত্যাজ্যদ্রব্যস্বামিত্বাবোপবিষয়ত্বরূপে। তচ্চ অনিরাকর্তৃকত্বঞ্চ গৌণং ন তু মুখ্যং অবিরোধ ইতি তথাচ উক্তার্থে চতুর্থী লাক্ষণিকী লক্ষ্যার্থস্য চ পিতৃগতত্বান্ন বাধ ইত্যর্থঃ। অত্র চ দদ্যাদিতি দদাতির্মুখ্য এব ব্রাহ্মণস্যাপ্যুদ্দেশ্যতয়া তদর্থত্যাগস্য দানরূপত্বাৎ। অতএবাত্র দদাতিরপি ত্যাগমাত্রে গৌণ ইতি যৎ কেনচিদুক্তং তদসৎ অস্য ত্যাগমাত্রপরত্বে এতৎপ্রয়োগস্য ত্যাগত্বমাত্রবোধকত্বেন। দদ্যাদিতি প্রয়োগদর্শনাৎ শ্রাদ্ধস্য দানরূপতায়া গ্রন্থকৃদুক্তায়া অসঙ্গত্যাপত্তেঃ। স্বোক্তযাগলক্ষণস্য দেবলোক্তযাগলক্ষণেন সহ বিরোধং পরিহরতি দেবলবচনস্ত্বিতি। প্রত্যেকসমুদায়াভ্যামিতি। প্রত্যেকপক্ষে হি পশুদ্রব্যকস্ত্যাগো যাগঃ। এবং ক্ষীরদ্রব্যকস্ত্যাগো যাগ ইত্যাদি লক্ষণং ভবিষ্যতি। সমুদায়পক্ষে চ পশ্বাদিতাবৎদ্রব্যকস্ত্যাগো যাগ ইতি লক্ষণং ভবিষ্যতি। তথাচ দর্শপৌর্ণমাসে পশোরভাবাৎ এবমপরাপরযাগে কুত্রচিৎ ক্ষীরাভাবাৎ কুত্রচিৎ পুরোডাশাদ্যভাবাৎ প্রত্যেকলক্ষণানামব্যাপ্তিঃ। অতএব সমুদায়ঘটিতলক্ষণস্যাপ্যব্যাপ্তিঃ প্রত্যেকঘটিতস্যাব্যাপনেন সমুদায়ঘটিতাব্যাপনস্য স্ফুটত্বাৎ। অতো ন লক্ষণপরমিত্যর্থঃ। তথাচ তস্য লক্ষণপরত্বাভাবাৎ নাস্মদুক্তলক্ষণবিরোধ ইতি ভাবঃ ॥ ২০ ॥

ননু তর্হি লক্ষণপরত্বাভাবাৎ দেবলবচনং কিমর্থমত আহ কিন্ত্বিতি। যাজনবিশেষেতি। যজ্ঞকারয়িতৃত্বরূপং যাজনং পাতহেতুরিতি স্বয়মুক্তং তন্ন যাজনসামান্যপরং কিন্ত্বীদৃশ মহাযজ্ঞযাজনপরং ইত্যুক্ত-

সদ্যঃপতনহেতুতয়া যাজনপদস্য গুরুতরযাজনবিশেষো-পসংগ্রহার্থং ন ত্বন্যদ্ যজনমেব ন ভবতীতি তস্যার্থঃ। ইতরথা প্রাগ্‌যজ্ঞপদার্থাপরিজ্ঞানে আত্মাশ্রয়াপ-ত্তেঃ। অতএবাচার্য্যাদ্‌ব্রতনিয়মশুশ্রূষাদিভিস্ত্রয়ীবিদ্যো-পাদানমধ্যয়নমিত্যত্র সদ্যঃপাতহেত্বধ্যয়নাভিপ্রায়মেব দেবলেনোক্তং ন তু ব্যাকরণাদীনামধ্যয়নমেব ন ভব-তীতি। যৎ তু জিকনেনোক্তং সাক্ষাৎপরম্পরোদাসীনো-দ্দেশ্যগতভোগজনকস্ত্যাগো দানমিতি দানলক্ষণং ভোগশ্চ ত্যক্তদ্রব্যস্য পরম্পরয়া পিত্রাদীনাং শ্রূয়তে। যথা বিষ্ণুপুরাণে। শ্রদ্ধাসমন্বিতৈর্দত্তং পিতৃণাং নামগোত্রতঃ। যদাহারাস্তু তে জাতাস্তদাহারত্বমেতি তৎ॥ তথা

যজনস্যৈব বিশেষনিষ্ঠতয়া উপসংহারার্থং প্রতিপাদনার্থমিত্যর্থঃ। তস্য দেবলবচনস্যার্থঃ তাৎপর্য্যার্থঃ যেন লক্ষণপরতা স্যাদিতি ভাবঃ। লক্ষণ-পরত্বে দূষণান্তরমাহ ইতরথেতি। আত্মাশ্রয়াপত্তেরিতি। যজ্ঞানাং সমাপনমিত্যনেন উক্তপশ্বাদীতিকর্ত্তব্যতাকযজ্ঞত্বং ভবন্মতে যাগলক্ষণং ভবিষ্যতি। যজ্ঞত্বঞ্চ যাগাঙ্গকযাগত্বং যাগাঙ্গকযাগো যজ্ঞ ইতি তল্ল-ক্ষণাৎ। তথাচ যাগত্বস্য যাগত্বঘটিতত্বাৎ আত্মাশ্রয়াপত্তেরিত্যর্থঃ। এতস্য দূষকতাবীজং জ্ঞানাসম্ভবরূপং প্রদর্শয়িতুমুক্তং প্রাগ্‌যজ্ঞেতি। যজ্ঞত্বস্য যাগঘটিতত্বেন বিশেষণতয়া যাগত্বজ্ঞানং প্রাগপেক্ষিতম্ তস্য চ স্বরূপতয়া স্বজ্ঞানাৎ পূর্ব্বং তজ্‌জ্ঞানাসম্ভবে ইত্যর্থঃ। যদ্যপ্যত্র যজ্ঞপদস্য ন বিরুদ্ধযজ্ঞপরত্বং কিন্তু ত্যাগমাত্রপরত্বং তেনোক্তেতি-কর্ত্তব্যতাকত্যাগত্বং যাগলক্ষণং ইত্যুক্তৌ নাত্মাশ্রয়দোষঃ। তথাপি পূর্ব্বোক্তপ্রত্যেকসমুদায়াভ্যামিত্যনেনাব্যাপ্তিদোষ এব দুরুদ্ধর ইতি বোধ্যম্। অতএব উক্তযজনসাহচর্য্যাদেব আচার্য্যাদ্‌ব্রতনিয়মেত্যাদি যদুক্তং তদপি নাধ্যয়নলক্ষণাভিপ্রায়কং কিন্তু স্বোক্তসদ্যঃপাতহেতু-

মৎস্যপুরাণম্। দেবো যদি পিতা জাতঃ শুভকর্ম্মানুযোগতঃ। তস্যান্নমমৃতং ভূত্বা দেবত্বেঽপ্যনুগচ্ছতি॥ দৈত্যত্বে ভোগরূপেণ পশুত্বে চ তৃণং ভবেৎ। শ্রাদ্ধন্তু বায়ুরূপেণ নাগত্বেঽপ্যুপতিষ্ঠতে॥ দনুজত্বে তথা মদ্যং প্রেতত্বে রুধিরোদকম্। মনুষ্যত্বেঽন্নপানাদি নানাভোগরসং ভবেৎ॥ ২১॥

তচ্চিন্ত্যম্। প্রতিগৃহীতাভুক্তনষ্টধনে লক্ষণাব্যাপ্তেঃ। কিঞ্চ এবমিন্দ্রাদীনাং বহুশো ভোগশ্রুতেঃ যাগোঽপি

---

ভূতাধ্যয়নপরমিত্যর্থঃ। ব্রতমামিষাদিভক্ষণনিবৃত্তিঃ নিয়মো মৈথুননিবৃত্তিঃ শুশ্রূষা গুরুসেবা আদিনা তৎকালীনার্জ্জিতধনস্য গুরবে প্রতিপত্তেঃ পরিগ্রহঃ। ত্রয়ী ঋগ্‌যজুঃসামলক্ষণবেদত্রয়ং ইতি বেদাস্ত্রয়স্ত্রয়ীত্যমরকোষাৎ ব্যাকরণাদীনামিত্যনন্তরমুপাদানমিতি পূরণীয়ম্। তেন ব্যাকরণাদীনামুপাদানমধ্যয়নমেবেতি তদভিপ্রায়কমিত্যর্থঃ। স্বাভিমতদানলক্ষণাক্রান্ততয়া শ্রাদ্ধস্য দানরূপতা জিকনোক্তা। তদ্ দূষয়িতুমুপন্যস্যতি যত্ত্বিতি। তন্মতমাহ সাক্ষাদিত্যাদি। সাক্ষাৎ পরম্পরাভ্যামুদাসীনং তদ্রহিতমিত্যর্থঃ তেন সাক্ষাৎপরম্পরাজনকত্বং ন নিবিষ্টং কিন্তু উদ্দেশ্যগতভোগজনকত্বমাত্রমিত্যর্থঃ। যদ্যপি ভোগঃ সুখসাক্ষাৎকারঃ তজ্জনকতা তু ত্যাগে নাস্তি তথাপি প্রযোজকত্বমেবাত্র জনকত্বং বোধ্যম্। তেন উদ্দেশ্যগতভোগপ্রয়োজকস্ত্যাগো দানমিতি লক্ষণং অত্র যত্র কেনচিৎ কিঞ্চিৎ দ্রব্যমুপেক্ষিতং তদুপেক্ষামবধার্য্য যেন তদ্‌দ্রব্যং স্বীকৃত্য ভুক্তং তত্র তদ্ভোগপ্রয়োজকে তদুপেক্ষারূপত্যাগেঽতিব্যাপ্তিবারণায় উদ্দেশ্যগতত্বং ভোগবিশেষণম্। উদ্দেশ্যত্বঞ্চ ভোগাশ্রয়ত্বেনাভিসংহিতত্বং শুভকর্ম্মানুযোগতঃ শুভকর্ম্মসম্বন্ধতঃ ভোগরূপেণ দৈত্যভোগ্যদ্রব্যরূপেণ নানাভোগরসং ভবেদিতি নানাজাত্যাপন্নানাং পিতৄণাং তত্তন্নানাভোগ্যরসং ভবেদিত্যর্থঃ॥ ২১॥

প্রতিগৃহীতা ভুক্তেতি প্রতিগৃহীতং যন্ন ভুক্তং কিন্তু নষ্টং তত্র ধনে-

দানং স্যাৎ স্তুতিমাত্রং তদিতি চেন্ন প্রকৃতেঽপি তুল্যত্বাৎ বাধকাভাবান্নেহ স্তুতিলক্ষণেতি চেন্ন যাগেঽপি তুল্যত্বাৎ বিগ্রহবত্ত্বঞ্চেন্দ্রাদীনামপি তির্য্যগধিকরণে দর্শিতম্। দেবতাত্বং তথাবিধানাং নেষ্টমিতি ॥ ২২ ॥

তদ্ধনদানে ইত্যর্থঃ। ননু ভোগঃ সুখানুভবঃ। স চ প্রতিগ্রহানন্তরমবশ্য-স্থাবী এতৎ দ্রব্যং মদীয়ং জাতমিতি জ্ঞানেন হর্ষোদয়াৎ। অতো না-ব্যাপ্তিরত আহ কিঞ্চেতি ইতি কেচিৎ। তদসৎ প্রতিগ্রহবিমুখেন বলাৎ প্রতিগ্রহীতাঽভুক্তনষ্টধনস্থলে লক্ষণাব্যাপ্তেরনুদ্ধারাৎ প্রতিগ্রহ-বিমুখস্য প্রতিগ্রহানন্তরং দুঃখস্যৈব উদয়াৎ। বস্তুতো ভোগজনকত্বং তজ্জননযোগ্যত্বং বাচ্যং যোগ্যতা চ চেতনোদ্দেশ্যকত্যাগত্বম্। এতচ্চ উক্তস্থলীয়ত্যাগেঽপ্যস্তি এবং শ্রাদ্ধেঽপ্যেতদবিকলং উদ্দেশ্যপিতৃণাং তন্মতে চেতনত্বাদতো নাব্যাপ্তিরিত্যত আহ কিঞ্চৈবমিতি এবং পরম্প-রয়া ভোগশ্রবণাৎ। স্তুতিমাত্রমিতি যজ্ঞভাগভুজঃ সর্ব্বে ইতি তৃপ্তা ভবতি চণ্ডিকা যদ্যপ্যদন্তকঃ পূষা পৈষ্টমত্তি সদা চরুমিত্যাদি সর্ব্বং যাগ-প্রশংসামাত্রমিত্যর্থঃ। প্রকৃতেঽপীতি শ্রাদ্ধে পিতৃণাং ভোগশ্রবণস্য শ্রাদ্ধপ্রশংসামাত্রত্বসম্ভবেন তুল্যত্বাদিত্যর্থঃ। বাধকাভাবাদিতি। দেবানাং মন্ত্রময়ত্বেন ভোগবাধাৎ স্তুতিলক্ষণা পিতৃণান্তু স্বস্বকর্ম্মভোগার্থং শরীর-পরিগ্রহস্য পূর্ব্বোক্তবিষ্ণুপুরাণাদিভিরেব প্রতিপাদিতত্বাৎ ভোগে বাধ-বিরহাৎ নেহ স্তুতিলক্ষণেত্যর্থঃ। তুল্যত্বাদিতি বাধকাভাবস্য তুল্য-ত্বাদিত্যর্থঃ। ননু দেবানাং বিগ্রহাভাব এব বাধকোঽস্তি তৎ কথং বাধকাভাব ইত্যত আহ বিগ্রহবত্ত্বঞ্চেতি তির্য্যগধিকরণ ইতি। তত্র হি দেবানাং যাগে অনধিকার ইত্যুক্তম্। তথাচ দেবানাং শরীরবির-হাৎ কুতস্তৎপ্রসক্তিস্তস্মাদ্দেবানাং শরীরমস্তীতি তত্র সিদ্ধান্তিতমি-ত্যর্থঃ। তথাচ বাধকাভাবস্তুল্য এবেত্যর্থঃ। এবঞ্চ যাগে ভবদুক্তদান-লক্ষণাতিব্যাপ্তির্দুষ্পরিহারৈব ইতি। ননু বিগ্রহবতাং দেবতাত্বেঽপ-সিদ্ধান্ত ইত্যত আহ দেবতাত্বঞ্চেতি ত্যাগোদ্দেশ্যত্বমিত্যর্থঃ। তথাচ ত্যাগোদ্দেশ্যঃ ন বিগ্রহবানিতি তৎসিদ্ধান্তার্থ ইতি ভাবঃ॥ ২২ ॥

নন্বিন্দ্রাদীনাং বিগ্রহবত্ত্বে কিং প্রমাণং অর্থবাদ ইতি চেন্ন তস্য সিদ্ধেঽর্থেঽপ্রামাণ্যাৎ কথং বা বিগ্রহবতাম-দেবতাত্বম্। ঐন্দ্রং হবিরিত্যাদৌ তদ্ধিতাদিভিঃ প্রকৃত্যর্থস্য দেবতাত্ববোধনাৎ ইন্দ্রাদিপদানি চ সহস্রচক্ষুরা-

দেবানাং তির্য্যগধিকরণোক্তযাগানধিকারস্য মন্ত্রময়ত্বপক্ষেঽপি যথা-কথঞ্চিদুপপন্নত্বাৎ প্রমাণান্তরেণ তৎ সাধয়িতুং বিগ্রহবতাং অদেবতাত্ব-বীজঞ্চ প্রদর্শয়িতুং ক্রমেণাশঙ্কতে নন্বিতি কথং বেতি চ। অর্থবাদ ইতি। ইন্দ্রঃ সুরপতিশ্চৈব বজ্রহস্তো মহাবল ইত্যাদ্যর্থবাদ ইতি। অর্থবাদশ্চ বিধ্যসমভিব্যাহৃত বাক্যরূপঃ। সোঽপি ত্রিবিধঃ গুণবাদানুবাদভূতার্থ-বাদভেদাৎ। যথা—বিরোধে গুণবাদঃ স্যাদনুবাদোঽবধারিতে। ভূতার্থ-বাদস্তদ্ধানৌ অর্থবাদস্ত্রিধা মতঃ॥ ইতি। অয়মর্থঃ। বিরোধে বিশেষ্য-বিশেষণয়োঃ সামানাধিকরণ্যেনান্বয়বিরোধে গুণবাদঃ অঙ্গকথনরূপত্বাৎ। যথা যজমানঃ প্রস্তর ইত্যত্র হি প্রস্তরঃ কুশমুষ্টিঃ তস্য যজমানেঽভেদা-ন্বয়বাধাৎ যজমানস্য কুশমুষ্টিধারণরূপাঙ্গবাদরূপত্বাৎ গুণবাদঃ। অবধা-রিতে প্রমাণান্তরসিদ্ধেঽর্থে যো বাদঃ সোঽনুবাদঃ। যথা নান্তরীক্ষে-ঽগ্নিশ্চেতব্যঃ অগ্নির্হিমস্য ভেষজমিত্যাদি চ অগ্নিচয়নস্যাসম্ভবেন তদ-ভাবস্যাগ্নের্হিমনাশকত্বস্য চ লৌকিকপ্রমাণসিদ্ধত্বাদনুবাদঃ। তদ্ধানৌ তয়োর্ব্বিরোধাবধারণয়োরভাবে ভূতার্থবাদঃ। ইন্দ্রো বৃত্রমহন্নিত্যাদি। সোঽপি দ্বিবিধঃ স্তুত্যর্থবাদো নিন্দার্থবাদশ্চ। সন্ধ্যামুপাসতে যে তু সততং শংসিতব্রতাঃ। বিধূতপাপাস্তে যান্তি ব্রহ্মলোকমনাময়ম্॥ ইত্যাদিঃ স্তুত্যর্থবাদঃ। তৈলস্ত্রীমাংসসম্ভোগী পর্ব্বস্বেতেষু বৈ পুমান্। বিণ্মূত্রভোজনং নাম প্রয়াতি নরকং মৃতঃ॥ ইত্যাদিঃ নিন্দার্থবাদ ইতি। অর্থবাদস্য সিদ্ধেঽর্থে সিদ্ধার্থমাত্রবোধকতয়া অপ্রমাণ্যাদিতি প্রবর্ত্তক-বাক্য এব ব্যবহারাদ্ব্যুৎপত্তিগ্রহেণাস্যাপ্রবর্ত্তকতয়া ব্যুৎপত্ত্যগ্রহেণা-বোধকত্বাদিত্যর্থঃ। তথাচ জৈমিনিসূত্রম্। আম্নায়স্য ক্রিয়ার্থত্বাদানর্থক্য-মতদর্থানামিতি। আম্নায়স্য বেদস্য ক্রিয়ার্থত্বাৎ প্রবৃত্তিফলকত্বেন কার্য্য-

দিমতীষু ব্যক্তিষু মুখ্যানি। মন্ত্রপরত্বে লক্ষণাপ্রসঙ্গাৎ ॥ ২৩ ॥

উচ্যতে। ঐন্দ্রাদিপদকামাধিকারিকবিধিবাক্যস্থ-কামিশ্রুতিরত্র প্রমাণম্। অন্যথা স্বর্গশরীরেঽপ্যনাশ্বাসঃ স্যাৎ। যত্রাপ্যর্থবাদাদৈন্দ্রাদিপদপ্রাপ্ত্যবগতিস্তত্রাপি তৎ-ফলত্বে রাত্রিসত্রন্যায় এব প্রমাণম্। বিগ্রহবতামিন্দ্রা-

প্রতিপাদকত্বাৎ অতদর্থানাং কার্য্যাপ্রতিপাদকানাং আনর্থক্যমপ্রামাণ্যমিত্যর্থঃ। নন্থ প্রমাণাভাবাদেব বিগ্রহবতাং ন দেবতাত্বং অতঃ প্রমাণমাহ ঐন্দ্রমিতি। তদ্ধিতাদিভিঃ সাম্যদেবতেত্যাদিনা বিহিতান্ প্রত্যয়াদিভঃ। আদিনা যদগ্নয়ে চ প্রজাপতয়ে চ সায়ং প্রাতর্জ্জু-হোতীত্যাদৌ চতুর্থীপরিগ্রহঃ। প্রকৃত্যর্থস্য ইন্দ্রাদিরূপস্য। নন্থ প্রকৃত্যর্থ ইন্দ্রাদির্ম্মন্ত্রময় এব তস্যৈব চ দেবতাত্বং তদ্ধিতাদিভিঃ প্রতিপাদিতং ন তু বিগ্রহবতামিত্যত আহ ইন্দ্রাদিপদানি চেতি। সহস্রচক্ষু-রাদিমতীষু মূর্ত্তিমদিন্দ্রাদিষু লক্ষণাপ্রসঙ্গাদিতি মূর্ত্তিমদ্বৃত্তীন্দ্রত্বাদে-শ্চৈত্রত্বাদিবজ্জাতিরূপতয়া লঘুতয়া তদ্রূপেণৈব ইন্দ্রাদিপদানাং শক্তি-কল্পনাৎ তত্তদানুপূর্ব্বীবিশেষরূপেণ মন্ত্রপরত্বে লক্ষণাপ্রসঙ্গাদিত্যর্থঃ ॥২৩॥

ইন্দ্রাদীনাং বিগ্রহবত্ত্বং সাধয়তি উচ্যতে ইতি ইন্দ্রাদিপদেতি। ঐন্দ্রাদিপদকামোঽধিকারী যস্য যৎপ্রতিপাদ্যঃ তদ্রূপং বিধিবাক্যং তৎস্থকা-মিশ্রুতিরেবৈন্দ্রকাম ইত্যাদিশব্দোঽত্র বিগ্রহবত্ত্বে প্রমাণমিত্যর্থঃ। অয়ং ভাবঃ। ইন্দ্রপদকামঃ শতাশ্বমেধেন যজেত ইত্যত্র পদমধিকারঃ স্বামিত্ব-লক্ষণঃ তস্য চাচেতনে বাধাদিন্দ্রপদং বিগ্রহবৎপরমেব। স চ বিগ্রহ-বান্ ইন্দ্রঃ সহস্রাক্ষঃ শচীভর্ত্তা পুরন্দর ইত্যর্থবাদোপস্থিতঃ। এতস্যার্থ-বাদত্বেঽপি উক্তবিধিশেষত্বাৎ প্রামাণ্যং এবমন্যত্রাপি বিগ্রহবত্ত্বসিদ্ধিঃ। অন্যথা শরীরং বিনাপি ইন্দ্রপদস্য স্বামিত্বলক্ষণস্যাভ্যুপগমে। স্বর্গেতি। স্বর্গঃ সুখম্ তচ্চ শরীরজন্যং অতঃ স্বর্গকামো যজেতেতি বিধ্যন্যথানু-পপত্ত্যা স্বর্গিশরীরসিদ্ধিঃ। কিন্ত্বত্র হস্তপাদাদৌ প্রমাণাভাবাৎ কুষ্মা-

দীনাং সন্নিধানস্য প্রত্যক্ষবাধিতত্বেন তথাবিধানাং পূজ্যত্বাসম্ভবাৎ। অগত্যা তদাকারতয়া ধ্যাতস্য মন্ত্রস্য লক্ষিতস্য দেবতাত্বমিতি রহস্যম্ ॥ ২৪ ॥

ণ্ডাকারমেব শরীরমিতি সিদ্ধান্তঃ। তত্রাপ্যনাশ্বাসঃ স্যাদিতি ভবন্মতে স্বাৰ্নিত্বস্যেব তুল্যন্যায়েন স্বৰ্গসুখস্যাপি শরীরং বিনাভ্যুপগমসম্ভবাদিতি ভাবঃ। সাক্ষাৎ শ্রুত্যা বিগ্রহবত্তাং প্রসাধ্যার্থবাদাধীনকল্পনীয়শ্রুত্যাপি তাং সাধয়তি যত্রাপীতি অর্থবাদাদিতি। যো রাজা রাজসূয়েন যজতে স ইন্দ্রপদমাপ্নোতীত্যর্থবাদ এতস্মাদিন্দ্রপদপ্রাপ্ত্যবগতিঃ। তৎফলত্বেঽর্থবাদোপস্থিতরাজসূয়স্য ইন্দ্রপদরূপফলজনকত্বে রাত্রিসত্রন্যায় এব রাত্রিসত্রন্যায়কল্পনীয়ো বিধিঃ প্রমাণমেবেত্যর্থঃ। স চ ন্যায়ো যথা প্রতিতিষ্ঠন্তি হ বৈ য এতা রাত্রীরুপযজন্তীত্যর্থবাদঃ তেন চ প্রতিষ্ঠাকামো রাত্র্যাখ্যসত্রেণ যজেত ইতি বিধিঃ কল্প্যতে। যতোঽস্য কাম্যতয়া ফলকামস্যাধিকারিণোঽবশ্যমপেক্ষিতত্বং ফলান্তরকামস্যাধিকারিত্বেঽশ্রুতফলকল্পনে গৌরবং অর্থবাদোপস্থিতপ্রতিষ্ঠারূপফলকল্পনে লাঘবং অতঃ প্রতিষ্ঠাকাম এবাধিকারী কল্পনীয়বিধ্যন্বয়ী ন তু ফলান্তরকাম ইতি তথেহাপি উক্তার্থবাদেন বিধৌ কল্পনীয়ে ফলকামস্যাধিকারিণোঽবশ্যমপেক্ষণীয়ত্বেনাশ্রুতফলান্তরকল্পনায়াং গৌরবাদর্থবাদোপস্থিত ইন্দ্রকামরূপফলকাম এবাধিকারিত্বেনান্বীয়তে। তথাচ ইন্দ্রপদকামো রাজসূয়েন যজেতেতি বিধিঃ কল্পনীয়ঃ স এব পূর্ব্বোক্তক্রমেণ ইন্দ্রস্য বিগ্রহত্বে প্রমাণমিত্যর্থঃ। ইদানীং বিগ্রহবতামদেবতাত্ববীজং প্রদর্শয়তি বিগ্রহবতামিতি। বিগ্রহবতাং সন্নিধানাভাবস্য প্রত্যক্ষসিদ্ধত্বেন আবাহিতান্ পূজয়েদিত্যনেন আবাহনপূজনয়োঃ সমানবিষয়ত্বাবগমেন চ তেষাং পূজ্যত্বাসম্ভবাৎ গত্যন্তরাভাবেন তত্তদ্দেবাকারতয়া ধ্যাতস্য মন্ত্রস্য স্বপরলক্ষণয়া স্বেনৈব উপস্থিতস্য দেবতাত্বং ত্যাগোদ্দেশ্যত্বমিত্যর্থঃ। ন চ তেষাং অতীন্দ্রিয়তয়া তৎসন্নিধানা-

ইন্দ্রাকারতয়া ধ্যানাদিন্দ্রপ্রীতিরপ্যুপপন্না। তথা যোগি-যাজ্ঞবল্ক্যঃ। যস্য যস্য তু মন্ত্রস্য উদ্দিষ্টা যা চ দেবতা। তদাকারং ভবেত্তস্য দেবত্বং দেবতোচ্যতে॥ ইতি। নন্ু দেবানাং বিগ্রহবত্ত্বে তেষামেবারাধিতানাং ফলদাতৃত্বং কুতো ন ভবেৎ অলমপূর্ব্বকল্পনয়া। তথা ভবিষ্যপুরাণে। যদ্যদ্দ্রব্যং নরো মৃষ্টমাদিত্যায় প্রযচ্ছতি। তত্তস্য শত-সাহস্রমুৎপাদয়তি ভাস্করঃ॥ যাজ্ঞবল্ক্যঃ। আয়ুঃ প্রজাং

ভাবো ন প্রত্যক্ষসিদ্ধ ইতি বাচ্যং তেষাং অতীন্দ্রিয়ত্বস্যৈবাভাবাৎ বশিষ্ঠাদিমহর্ষীণাং দশরথাদিরাজর্ষীণাঞ্চ চক্ষুর্গ্রাহ্যত্বেন শতশঃ পুরাণ-ভাবতেষু শ্রবণাৎ তৈরপি বশিষ্ঠাদিভিঃ পূজার্থমাবাহনকালে বিগ্রহ-বতাং সন্নিধীভাবস্য প্রত্যক্ষীকৃতত্বাৎ। এতেন যৎ কৈশ্চিদুক্তং বিগ্রহবতাং তেষামনতীন্দ্রিয়তয়া যদ্যপি ন প্রত্যক্ষবাধঃ তথাপি নানা-যাগেষ্বেকদাবাহনে সর্ব্বত্রৈকদা সন্নিধানস্যাসম্ভবাৎ মন্ত্রস্যৈব দেবতাত্ব-মিতি তদপি প্রত্যুক্তং বেদিবত্যং সৌভরিমুন্যাদিবৎ তপোমহিম্না শক্তিবিশেষেণ বা কায়ব্যূহক্রমেণ একদা সর্ব্বত্রাধিষ্ঠানসম্ভবাচ্চ। অত্রেদমুচ্যতে। আবাহনং তাবদ্যাগাঙ্গতয়া শাস্ত্রবোধিতং ন ত্বাবাহি-তানাং তত্র সন্নিধানমপি। তথাত্বে মন্ত্রপক্ষেঽপ্যসংগতেঃ সন্নিধানস্যা-ন্তগরূপস্যাচেতনানাং সুদূরপরাহতত্বাৎ। পরন্তু পূজয়েদিত্যনুবৃত্তৌ প্রজেশং মন্ত্রবিগ্রহমিত্যাদিনা মন্ত্রাণাং পূজ্যত্বাভিধানাৎ তেষামেব দেবতাত্বং ন বিগ্রহবতাং শ্রাদ্ধে তু তাদৃশমন্ত্রাভাবাদভিলাপস্যৈব দেবতাত্বমিতি সুধীভির্ভাব্যং॥ ২৪॥

নন্বেবং চেৎ তদা যাগে তদুক্তদানলক্ষণাতিব্যাপ্তির্ন ঘটতে উদ্দে-শ্যানাং মন্ত্রাণামচেতনত্বেন ভোগবাধাৎ বিগ্রহবতাং ভোগসম্ভবেঽপি তেষামনুদ্দেশ্যত্বাদত আহ ইন্দ্রাকারতয়েতি প্রীতিরপ্যুপপন্নেতি। তথাচ ত্যাগজন্যপ্রীতিভাগিত্বেনোদ্দেশ্যতা। তেন লক্ষণে নিবেশিতা

ধনং বিদ্যাং স্বর্গং মোক্ষং সুখানি চ। প্রযচ্ছন্তি তথা রাজ্যং প্রীতা নৃণাং পিতামহাঃ॥ তদাচ দেবতাধিকরণ-সিদ্ধান্তবিরোধঃ স্যাৎ। উচ্যতে। দেবানামিন্দ্রাদীনাং পিতৃণাং বস্বাদীনাং যুগমন্বন্তরাদিভেদেন নানাত্বাবগমাৎ ফলোদয়কালে পূর্ব্বস্য চ্যুতাধিকারত্বেন ফলদাতৃত্বাশক্তেঃ। অন্যস্য চানারাধিতত্বেন ফলদাতৃত্বাযোগাৎ তত্রাপূর্ব্বে শব্দশক্তৌ বাচকশব্দসদ্ভাবাৎ সর্ব্বত্রৈব তদভিধানম্।

সা চ বিগ্রহবতামপ্যস্তীতি অতিব্যাপ্তের্দুর্ব্বারৈব ইত্যাশয়ঃ। যদ্যপি স্বামিত্বেনোদ্দেশ্যতানিবেশে নৈষ দোষস্তথাপি তত্র গৌরবমেব দোষ ইতি বোধ্যম্। মন্ত্রাণাং ইন্দ্রাকারতয়া ধ্যানে প্রমাণমাহ তথেতি যস্যেতি। যস্য মন্ত্রস্য শাস্ত্রে যা দেবতা সহস্রাক্ষাদিব্যক্তিরূপা উদ্দিষ্টা কথিতা তস্য মন্ত্রস্য দেবত্বং ত্যাগোদ্দেশ্যত্বম্। তদাকারং তদাকারাবচ্ছিন্নম্। তদাকারতয়া ধ্যাতস্য তস্য দেবত্বং ভবেদিত্যর্থঃ। অতএব সা ব্যক্তি-দেবতোচ্যতে ত্যাগোৎপত্তেঃ প্রাগ্‌বুদ্ধিবিষয়ত্বেন লক্ষণয়া দেবতাপদেন নির্দ্দেশ্যতে ইত্যর্থঃ নতু স্বামিত্বেনাভিসন্ধীয়মানত্বলক্ষণং বাস্তবদেবতাত্বং ব্যক্তেরিতি ভাবঃ। নন্বিতি দেবানাং বিগ্রহবত্ত্বে বিগ্রহবদ্দেবাভ্যুপগমে। তেষামেব ইতোবকারেণ যাগোঽপি ন ফলজনকঃ কিন্তু দেবতাপ্রীত্যুপ-ক্ষীণ ইতি প্রতিপাদিতম্। আরাধিতানাং উক্তক্রমেণ যাগৈঃ প্রীতা-নাম্। অলং ব্যর্থম্। অপূর্ব্বকল্পনয়েতি বিধিবাচ্যাপূর্ব্বস্বীকারেণে-ত্যর্থঃ। তন্মতে কাম্যাপূর্ব্বস্য বাচ্যতয়া কল্পনীয়ত্বাভাবাৎ যথাশ্রুতা সঙ্গতেঃ। দেবানাং পিতৃণাঞ্চ ফলদাতৃত্বং বচনেনাপি সাধয়তি তথা-চেতি। মৃষ্টং শুদ্ধম্ সংস্কারেণ পূতমিতি যাবৎ। দেবতাধিকরণেতি তত্রা-পূর্ব্বস্যৈব স্বর্গাদিফলজনকতা ন ত্বিন্দ্রাদীনামিতি সিদ্ধান্তাৎ তদ্বিরোধ ইত্যর্থঃ। ইন্দ্রাদীনাং সহস্রাক্ষাদিবিগ্রহবতাং বস্বাদীনাং বস্বাদি-বিগ্রহবতাম্। নানাত্বাবগমাৎ বিভিন্নত্বাৎ। পূর্ব্বস্যারাধিতস্য ফল-

অতএব কাম্যে ক্লৃপ্তশক্তিলিঙাদির্নিত্যে নিষেধে চাপূর্ব্বমাহেত্যুক্তম্ ॥ ২৫ ॥

এবঞ্চাপূর্ব্বানুপ্রবেশাৎ সহকারিতয়া যদি দেবতাপি ফলদাত্রী কচিৎ তদা কো বিরোধঃ। কিঞ্চ ব্রাহ্মণ-

দাতৃত্বাশক্তেরিত্যধিকারচ্যুতৌ ফলদানশক্তেরপি নাশ আবশ্যকঃ। অন্যথা ইন্দ্রাদীনাং মনুষ্যাদিশরীরপরিগ্রহণে ফলদাতৃত্বাপত্তেরিতি ভাবঃ। তত্র ফলোদয়কালে আরাধিতদেবতাধিকারচ্যবনবিষয়ে শব্দশক্তাবিতি শব্দস্য লিঙ্‌ত্বব্যাদিবিধিরূপস্য শক্তৌ ক্লৃপ্তায়ামিত্যর্থঃ। সর্ব্বত্রৈব যথাকালে আরাধিতদেবতাধিকারস্বত্ববিষয়ে তদন্যথাবিষয়ে চ তদভিধানমপূর্ব্ববোধঃ। অত্রায়মর্থঃ তত্রোক্তবিষয়ে দেবানাং ফলদাতৃত্বাসম্ভবাদগত্যা স্বর্গ এব ফলজনকো বাচ্যঃ এবং সতি যজেতেত্যাদিবিধিনাপি যাগ এব স্বর্গাদিফলজনকতা প্রতিপাদনীয়া। তথাচাশুবিনাশিনো যাগস্য চিরতরকালান্তরভাবি ফলজনকত্বান্বয়বোধে তৎকালপর্য্যন্তস্থায়িব্যাপারবত্বং যোগ্যতা চিরাতীতানুভবস্মৃতিজনকত্বান্বয়বোধে সংস্কারবত্ত্বমিব। যোগ্যতাজ্ঞানঞ্চ প্রাগপেক্ষিতং উপস্থাপকান্তরাভাবাচ্চ তদুপস্থিত্যর্থং বিধেরেব তত্র শক্তিঃ কল্প্যতে। যদ্যপি অপূর্ব্বে শক্তিগ্রহো দুর্ঘটঃ প্রমাণান্তরাবেদ্যত্বেন তস্য প্রাগনুপস্থিতেঃ। তথাপি কার্য্যত্বেন ঘটাদিবিষয়কশক্তিগ্রহাদনন্তরং তদ্বাধবলেনাপূর্ব্বং কার্য্যমাদায় যাগজন্যং কার্য্যমিতি কার্য্যান্বয়বোধঃ পর্য্যবস্যতি। ইত্থং যোগ্যতাজ্ঞানসম্পত্ত্যাবনন্তরং যাগে স্বর্গসাধনত্বান্বয়বোধ ইতি অতএবোক্তরীত্যা কাম্যস্থলে লিঙাদেরপূর্ব্বশক্তেঃ ক্লৃপ্তত্বাদেব নিত্যে অহরহঃ সন্ধ্যামুপাসীত ইত্যাদিনিত্যবিধৌ নিষেধে ন কলঞ্জং ভক্ষয়েদিত্যাদিনিষেধবিধৌ আহ বোধয়তীত্যুক্তং দেবতাধিকরণে ইতি বিশেষঃ। ইদমেব চ নিত্যনিষেধাপূর্ব্বয়োঃ ফলাজনকয়োরপি স্বীকারে বীজমিতি ॥ ২৫ ॥

নম্বেবমপূর্ব্বস্যৈব ফলজনকত্বে দেবতায়াঃ প্রাগুক্তফলদাতৃত্ববচনবিরোধ ইত্যত আহ এবঞ্চেতি। উক্তযুক্ত্যাপূর্ব্বস্য ফলজনকত্বাবশ্যকত্বে

সংপ্রদানকহিরণ্যদানাদৌ ব্রাহ্মণস্য কালান্তরে ফল-
দাতৃত্বাসম্ভবাদবশ্যমদৃষ্টং বাচ্যং তদা চ পূর্ব্বোক্তরীত্যা
সর্ব্বত্রৈব তৎসিদ্ধিঃ দেবতাপ্রীতিসহকৃতকর্ম্মজনিতা-
পূর্ব্বস্য ফলজনকত্বাৎ দেবতাপি ফলদাত্রীত্যুচ্যতে।২৬॥

নন্নু পিত্রাদীনাং নিরপেক্ষাণাং ন দেবতাত্বম্। অথ
শ্রাদ্ধমমাবাস্যায়াং পিতৃভ্যো দদ্যাদিতি গোতমবচনে

---

চেত্যর্থঃ। ক্বচিৎ আরাধিতদেবতায়াঃ ফলোদয়কালবিদ্যমানাধিকার-
বিষয়ে কো বিরোধ ইতি। তথাচ ক্বাচিৎকস্থলেঽপূর্ব্বস্য সহকারিতয়া
দেবতায়াঃ ফলদাতৃত্ববোধকং তদ্বচনং ন ত্বপূর্ব্বনৈরপেক্ষ্যেণেতি ন তদ্বি-
রোধ ইতি ভাবঃ। ন চান্যত্র কৢপ্তনিয়তপূর্ব্ববর্ত্তিন এব তৎসম্ভবে তৎ-
সহভূতত্বমিতি অন্যথাসিদ্ধের্দেবতানাং তৎ ফলং প্রতীতি বাচ্যং তস্য
কারণতাগ্রাহকপ্রমাণাভাবে সতীতি বিশেষণীয়ত্বাৎ ইহ কারণতাগ্রাহক-
শাস্ত্রপ্রমাণস্য সত্ত্বাৎ। অতএব জনকজনকত্বান্যথাসিদ্ধত্বেঽপি বিশেষণ-
মেব তন্নিবেশনীয়ং অন্যথা ঘটজনকভ্রম্যাদিজনকত্বেন দণ্ডাদেরপি
ঘটং প্রতি অন্যথাসিদ্ধিত্বাপত্তেঃ বিশেষণস্যোক্তস্য নিবেশে তু দণ্ডাদেঃ
স্বতন্ত্রান্বয়ব্যতিরেকস্য প্রত্যক্ষপ্রমাণস্যৈব সত্ত্বাৎ নানুপপত্তিরিতি।
প্রকারান্তরেণাপ্যপূর্ব্বং সাধয়তি কিঞ্চেতি। হিরণ্যদানাদাবিত্যাদিনা
তীর্থস্নানপরিগ্রহঃ। কালান্তর ইত্যত্যন্তাসম্ভবপ্রতিপাদনায় ন হি
প্রীতো বটুস্তদানীং ফলদানসমর্থ ইতি। পূর্ব্বোক্তরীত্যা বাচকশব্দ-
সম্ভবেন তৎসিদ্ধিরপূর্ব্বসিদ্ধিঃ। দেবতা ফলদাত্রীতি ব্যপদেশং
সমর্থয়তি দেবতাপ্রীতিরিতি। প্রীতদেবতাসহকৃতেত্যর্থঃ প্রীতেরাশু-
বিনাশিত্বাৎ। উচ্যতে ব্যপদিশ্যতে। তথাচায়ং ব্যপদেশো নাপূর্ব্বনির-
পেক্ষফলদাতৃত্ববোধকঃ কিন্তু তৎসহকারিত্বেনৈব ইতি ভাবঃ॥ ২৬॥

ইদানীং পিত্রাদীনাং সহিতদেবতাত্বং দূষয়িত্বা প্রত্যেকং দেবতাত্বং
ব্যবস্থাপয়িতুমুপন্যস্যতি নন্বিত্যাদি। প্রত্যেকদেবতাত্বে পিত্রে পিতা-
মহায় প্রপিতামহায়েতি বাক্যং স্যাৎ। সহিতদেবতাত্বে পিতৃপিতামহ-

পিতৃভ্যো দদ্যাৎ পূর্ব্বৈত্র্যব্র্রাহ্মণান্ সন্নিপাত্যেতি বশিষ্ঠ-বচনে চ বহুবচনাৎ সাহিত্যপ্রতীতেঃ। সাহিত্যে হি দ্বিব-

প্রপিতামহেভ্যঃ স্বধেতি বাক্যং স্যাৎ একপুরুষিকপার্ব্বণবিঘাতশ্চেতি বিচারফলং বোধ্যম্। পিত্রাদীনামিতি পিত্রাদ্যাকারতয়া ধ্যাতমন্ত্রাণামিত্যর্থঃ। নিরপেক্ষাণাং সাহিত্যনিরপেক্ষাণাং প্রত্যেকরূপাণামিত্যর্থঃ। দেবতাত্বমুদ্দেশ্যত্বম্। বহুবচনাৎ সাহিত্যপ্রতীতৌ প্রমাণমাহ সাহিত্যে ইতি। দর্শিতত্বাৎ জৈমিনিনেতি শেষঃ। সাহিত্যমেব কিমিত্যত্রাহ সাহিত্যঞ্চেতি। পরস্পরসাপেক্ষাণামিতি। একক্রিয়াসম্বন্ধাহ্র্ত্বমেকক্রিয়ান্বয়িত্বং অত্রান্বয়িত্বমাত্রোক্তৌ রাজপুরুষ ইত্যত্রাতিব্যাপ্তিরত উক্তং ক্রিয়েতি কশ্চিৎ তদসৎ রাজপুরুষয়োর্ব্বিশেষণবিশেষ্যভাবান্বয়েন তুল্যরূপত্বাভাবাদেব তদ্বারণাৎ কিন্তু ঘটপটবদ্ভূতলমিত্যাদৌ ঘটপটাদেঃ সাহিত্যবারণাৎ ক্রিয়েতি তত্রাপি চৈত্রমৈত্রাবাগচ্ছত ইত্যত্র ক্রিয়ান্বয়িত্বাৎ চৈত্রমৈত্রয়োঃ সাহিত্যাপত্তিরত একেতি ক্রিয়াবিশেষণম্। তথাচ একান্বয়িনী যা ক্রিয়াব্যক্তিস্তদন্বয়িনঃ অপরস্য তৎসাহিত্যমিত্যর্থঃ। উক্তস্থলে চ গমনক্রিয়ায়াঃ প্রত্যেকপরিসমাপ্তত্বেন একস্যাং ক্রিয়ায়ামুভয়ান্বয়াভাবান্নাতিপ্রসঙ্গঃ। এবমপি সপত্নীকো ধর্ম্মমাচরেদিত্যত্র তত্তদ্ধর্ম্মাচরণক্রিয়ায়ামেকস্যাং পত্নীপত্যোরন্বয়াৎ। তথা দামোদরায় নভসি তুলায়াং লোলয়া সহ প্রদীপস্তে প্রযচ্ছামীত্যাদাবেকস্যাং প্রদীপদানক্রিয়াব্যক্তৌ লোলাদামোদরয়োরন্বয়াদেশ্চ সাহিত্যাপত্তিরত উক্তং তুল্যরূপাণামিতি পরস্পরবিশেষ্যাবিশেষণভাবানাপন্নানামিত্যর্থঃ। উক্তস্থলে চ পত্ন্যাঃ পতিবিশেষণত্বাপন্নত্বাৎ লোলাদৌ দামোদরাদিবিশেষণতাপন্নত্বাৎ ন দোষঃ পরস্পরেতিকরণাচ্চ নীলপীতঘটপটৌ দেহি ইত্যাদৌ নীলাদিভির্বিশেষণবিশেষ্যভাবাপন্নত্বেঽপি ঘটপটয়োর্ন সাহিত্যানুপপত্তিঃ। ইত্থমপি চৈত্রো গ্রামং গচ্ছতি কাষ্ঠৈঃ স্থাল্যামোদনং পচতি ইত্যাদৌ কর্ত্তৃকর্ম্মকারকয়োঃ করণাদিকারকাণাঞ্চ বিশেষণবিশেষ্যভাবানাপন্নায়ামেকস্যাং গমনপাকাদিক্রিয়ায়ামন্বয়িত্বাদতিব্যাপ্তিঃ। অতঃ পরস্পরসাপেক্ষাণামিতি তৎক্রিয়ান্বয়িতাবচ্ছেদকৈকরূপোপস্থিতিবিষয়াণামিত্যর্থঃ।

**চনবহুবচনে দ্বন্দ্বসমাসো বেতি দর্শিতত্বাৎ। সাহিত্যঞ্চ পরস্পরসাপেক্ষাণাং তুল্যরূপাণামেকক্রিয়াসম্বন্ধার্হত্ব-মিত্যুক্তং সহ সাহিত্যবিবেকে ॥ ২৭ ॥**

---

চৈত্রো গ্রামং গচ্ছতীত্যত্র চ ক্রিয়ান্বয়িতাবচ্ছেদকং চৈত্রত্বং তেন রূপেণ চ নগ্রামোপস্থিতিঃ। এবং তাদৃশমপরং গ্রামত্বং তেন রূপেণ ন চৈত্রোপ-স্থিতিঃ। এবং কাষ্ঠৈঃ স্থাল্যামিত্যাদাবপীতি নাতিপ্রসঙ্গঃ। অতএব ঘটং পটঞ্চ পশ্যতীত্যাদাবেকস্যাং সমূহালম্বনাত্মিকায়াং দর্শনক্রিয়ায়াং ঘট-পটয়োরন্বয়েঽপি ন সাহিত্যং অন্বয়িতাবচ্ছেদকঘটত্বাদ্যৈকৈকরূপেণ দ্বয়োরনুপস্থিতেঃ। অতএব প্রধানীভূতায়ামেকস্যাং যাগাদিক্রিয়ায়াং তত্ত-দঙ্গসজ্ঘানামন্বয়িত্বেঽপি নাতিপ্রসঙ্গঃ তেষাং নিরুক্তপরস্পরসাপেক্ষত্বা-ভাবাৎ। অতএব সপত্নীকো ধর্ম্মমাচরেদিত্যাদ্যুক্তেঃ পত্নীবিশিষ্টপতিত্বং লোলাবিশিষ্টদামোদরত্বরূপান্বয়িতাবচ্ছেদকৈকরূপোপস্থিতিবিষয়ত্বাৎ। তদুভয়োস্তদ্বারণায় তুল্যরূপাণামিতি। চৈত্রমৈত্রৌ গচ্ছত ইত্যত্র ক্রিয়ান্বয়িতাবচ্ছেদকদ্বিত্বেনৈকরূপেণৈব তয়োরুপস্থিতত্বাৎ তদ্বারণায় চ ক্রিয়ৈকত্ববিবক্ষণমপি সার্থকং বোধ্যম্। ধবখদিরপালাশাংশ্ছিন্দীত্যাদৌ চ ধবাদীনাং ক্রিয়ান্বয়িতাবচ্ছেদকত্রিত্বেনৈকরূপেণ উপস্থিতত্বাৎ পরস্পর-বিশেষণবিশেষ্যভাবানাপন্নত্বাদেকচ্ছিদিক্রিয়াব্যক্ত্যন্বয়িত্বাচ্চ সাহিত্য-সঙ্গতিঃ। এবং ধবং খদিরঞ্চ ছিন্দীত্যাদৌ ন সাহিত্যং তাদৃশৈক-রূপেণ তয়োরুপস্থিত্যভাবাৎ। ঘটপটৌ পশ্যতীত্যত্র চ তদস্তি তাদৃশ-দ্বিত্বেন দ্বয়োরুপস্থিতত্বাদিতি বোধ্যম্। সহত্বমপি তদেব কিন্তু তুল্যরূ-পাণামিতি বিশেষঃ। তথাচ তৎক্রিয়ান্বয়িতাবচ্ছেদকৈকরূপোপস্থিতি-বিষয়াণাং বিশেষ্যবিশেষণভাবাপন্নানামেকক্রিয়ান্বয়িত্বং সহত্বং সপ-ত্নীকো ধর্ম্মমাচরেদিত্যাদৌ বোদ্ধব্যম্। অত্রেদং বিচার্য্যতে ধবখদিরৌ ছিন্দীত্যত্র ধবান্বয়িক্রিয়ান্বিতখদিরত্বং খদিরান্বয়িক্রিয়ান্বিতধবত্বরূপঞ্চ সাহিত্যং প্রত্যেকবিশ্রান্তং এবং ক্রিয়ান্তরান্বয়িপদার্থান্তরেষ্বপি সাহিত্য-মেব প্রাতিস্বিকরূপং তেষু চ দ্বিবচনাদেঃ কেনরূপেণ শক্তিঃ সাহিত্যত্বেন

নাপি সহিতানাং পিতরো দেবতা ইত্যাপস্তম্ববচনে দেবতা ইতি বহুবচনাৎ প্রত্যেকং দেবতাত্বাবগমাৎ পৃথঙ্ নিবেশিতত্বাদ্বহুত্বস্য তথার্ঘ্যদানাম্নোৎসর্গপিণ্ডদানাদিষু শ্রুতৌ স্মৃতৌ চ বহুশঃ প্রত্যেকমেব দেবতাত্ব-

---

তত্তদ্ব্যক্তিত্বেন বা নাদ্যঃ সাহিত্যত্বস্য সর্ব্বানুগতস্যৈকস্যাভাবাৎ। ন দ্বিতীয়ঃ অনন্তশক্তিকল্পনায়াং মহাগৌরবাপত্তেঃ তেষাঞ্চ প্রাতিস্বিকরূপেণ উপস্থিতে যুগসহস্রেণাপি অশক্যতয়া তত্র শক্তিগ্রাহকাসম্ভবাচ্চ। কিঞ্চৈবং পিতৃভ্যো দদ্যাদিত্যত্রাপি সাহিত্যস্য পিত্রাদিপ্রত্যেকপরিসমাপ্ততয়া ত্রিতয়সাধারণ্যাভাবেন প্রত্যেকদেবতাত্বপর্য্যবসানেনাপি সহিতানামিতি কল্পান্তরোপন্যাসাসঙ্গতিশ্চ। কিঞ্চ উক্তস্থলে তথাবিধধবান্বয়িচ্ছিদান্বিতখদিরং ছিন্দি এবং তাদৃশখদিরান্বয়িচ্ছিদান্বিতধবং চিন্ধীত্যন্বয়বোধোঽভ্যুপেয়ঃ। তথাচানুভববিরোধঃ ক্রিয়াকারকান্বয়স্য প্রাগেব সিদ্ধতয়া বাক্যস্যানুবাদাপত্তিশ্চেতি। তস্মান্নোক্তরূপং সাহিত্যং ন বাত্র দ্বিবচনবহুবচনয়োঃ শক্তিঃ কিন্তু সাহিত্যমতিরিক্ত এব পদার্থো ব্যাসজ্যবৃত্তিস্তত্রৈব দ্বিবচনবহুবচনয়োঃ শক্তিরিতি তৌতাতিকমতমেব সমীচীনমিতি সুধীভির্ভাবনীয়ম্। কেচিৎ তু সাহিত্যমুক্তরূপমেব তচ্চ ন দ্বিবচনাদিবাচ্যং উক্তানুশাসনস্য তু যত্রৈব সাহিত্যং তত্রৈব দ্বিবচনাদিরিত্যর্থঃ ন তু সাহিত্যে দ্বিবচনাদেঃ শক্তিরিতি তদর্থঃ। ইত্থঞ্চ সাহিত্যস্য উত্তরকালিক এব মানসো বোধ ইত্যাহুঃ। তদসৎ অগ্নিসোমীয়ং পশুমালভেত ইত্যত্র পশুযাগেঽগ্নীষোময়োঃ সাহিত্যেনৈকদেবতাত্বসিদ্ধান্তানুপপত্তেঃ। নিরুক্তসাহিত্যস্য প্রত্যেকপরিসমাপ্ততয়া উভয়সাধারণৈকরূপত্বাসম্ভবাদিতি। সহসাহিত্যবিবেক ইতি সহসাহিত্যয়োর্ব্বিবেকো যত্র তদ্রূপাধিকরণে ইত্যর্থঃ॥ ২৭॥

নাপি সহিতানামিতি দেবতাত্বমিত্যনুষঙ্গঃ। বহুবচনাদিতি। ন চাত্র পিতরো দেবতা ব্রাহ্মণাশ্চাহবনীয়ার্থে ইতি সূত্রয়োঃ ক্রমেণ নির্দ্দিষ্টত্বাৎ ঘোষবতি পরে বিসর্গলোপমঙ্গীকৃত্য বহুবচনং ব্রূষে তথাচ তৎকল্পনায়াং

মবগম্যতে। তথা শ্রুতিঃ। অসাবেতত্তে যজমানস্য পিত্রে অসাবেতত্তে যজমানস্য পিতামহায় অসাবেতত্তে যজমানস্য প্রপিতামহায় ইতি বৈজবাপঃ পিতরেতত্তেহর্ঘ্যং পিতামহৈতত্তেহর্ঘ্যং প্রপিতামহৈতত্তেহর্ঘ্যমিত্যনুদিশতি। যথা বিষ্ণুঃ। নমো বিশ্বেভ্যো দেবেভ্যো ইত্যন্নমাদৌ প্রাঙ্মুখয়োর্নিবেদ্য পিত্রে পিতামহায় প্রপিতামহায় চ নামগোত্রাভ্যামুদঙ্মুখেষু ব্রাহ্মণেষু। ব্রহ্মপুরাণে। পিতৃভ্যশ্চ ততো দদ্যাদন্নমামন্ত্রণে ন তু। অমুকামুকগোত্রৈতৎ তুভ্যমন্নং স্বধা নমঃ॥ বিষ্ণুঃ। উচ্ছিষ্টসন্নিধৌ দক্ষিণাগ্রেষু কুশেষু পৃথিবী দর্বিরক্ষিতামত্যেকং পিণ্ডং পিত্রে নিদধ্যাৎ। অন্তরীক্ষং দর্বিরক্ষিতামিতি দ্বিতীয়ং পিণ্ডং পিতামহায় দ্যৌর্দর্বিরক্ষিতামিতি তৃতীয়ং পিণ্ডং প্রপিতামহায়েত্যাদি। কাত্যায়নঃ। পিতৃভ্যঃ পিতামহেভ্যঃ প্রপিতামহেভ্যঃ স্বধোচ্যতামিতি। অত্রোভয়োরেব প্রামাণিকত্বাৎ বিকল্প ইতি কেচিৎ॥ ২৮॥

প্রমাণাভাবাৎ দেবতা ইত্যেকবচনান্তমেব বক্তব্যং তৎ কথং বহুবচনং প্রত্যেকদেবতাত্বে প্রমাণয়তীতি বাচ্যং সূত্রয়োঃ সন্নিকর্ষাভাবাৎ লোপাভাবেন বিসর্গস্যৈব বিদ্যমানত্বেন তৎকল্পনাবিরহাৎ। অতএব শ্লোকান্তবিসর্গস্য তদুত্তরশ্লোকস্যাদৌ ঘোষবদ্বর্ণসত্ত্বেঽপি ন লোপ ইতি। পৃথগিতি পিতর ইত্যতঃ পৃথগ্বহুবচনস্য দেবতাপদোত্তরং নিবেশিতত্বাৎ দেবতানানাত্বাবগমাদিত্যর্থঃ। অত্র বিসর্গলোপে বিবাদাৎ প্রত্যেকমেব দেবতাত্বে শ্রুতিং স্মৃত্যন্তরাণি চ প্রমাণয়তি তথেতি অসাবিতি সম্বোধনান্তনামোপলক্ষণং এতদিতি ত্যাজ্যদ্রব্যপরং তে ইতি চতুর্থ্যন্তং তথাচ বচনান্তরসংবাদিতয়া অমুকগোত্রপিতরমমুকদেবশর্ম্মন্নেতত্তেঽন্নং

বস্তুতস্তু সহিতানাং দেবতাত্বে প্রমাণং নাস্তি। নহি পিতৃভ্যো দদ্যাদিত্যাদি চতুর্থী দেবতাত্বং বোধয়তি তত্রাননুশাসনাৎ। কিন্তু যদগ্নয়ে চ প্রজাপতয়ে চ সায়ং প্রাতর্জুহোতীতিবৎ চতুর্থ্যবগতাহনিরাকর্তৃক-সংপ্রদানানুপপত্ত্যা কল্পনীয়ং। ন চ তৎসহিতানাং কল্পয়িতুং শক্যতে পূর্ব্বোপদর্শিতবচনৈর্নিরপেক্ষদেবতাত্বাবগমাৎ সাহিত্যন্ত্বভিধানক্রিয়াপেক্ষয়া লোকে দৃষ্টং গর্গা

স্বধেত্যুচ্চার্য্য যজমানস্য পিত্রে যজমানো দদ্যাদিত্যর্থঃ। এবং পিতামহ-প্রপিতামহাভ্যামপি। তথা চাত্র পিত্রে পিতামহায় ইত্যাদি পৃথক্ পৃথক্ চতুর্থীভ্যঃ প্রত্যেকদেবতাত্বাবগম ইতি। অনুদিশতি বদতি উদঙ্-মুখেষু নিবেদয়েদিতি শেষঃ। পিতৃভ্যশ্চ ইতি অভিধানক্রিয়াপেক্ষয়া বহুবচনং উত্তরদানবাক্যবিধৌ অমুকামুকগোত্রেত্যেকবচননির্দ্দেশাৎ প্রত্যেকদেবতাত্বাবগমাৎ। উচ্ছিষ্টসন্নিধাবিতি ঋগ্বেদিনাং পিণ্ডদান-পরিপাটীয়ম্। তথাচ ঋগ্বেদী দক্ষিণাগ্রেষু দর্ভেষু গোত্রনামাদ্যভিলাপ-পূর্ব্বকং পৃথিবী দর্বিরক্ষিতামিত্যুচ্চার্য্য একপিণ্ডং পিত্রে এবং অন্তরীক্ষং দর্বিরক্ষিতামিতি দ্বিতীয়ং পিণ্ডং পিতামহায় তথা দ্যৌর্দর্বিরক্ষিতামিতি তৃতীয়ং পিণ্ডং প্রপিতামহায় দদ্যাদিত্যর্থঃ। পিতৃভ্য ইতি বহুবচনত্রয়ং মন্ত্রঘটকমাত্রং প্রত্যেকং বহুবচনস্যাসমবেতত্বেনাবিবক্ষিতত্বাৎ। এতদ্বঃ পিতরো বাস ইত্যাদিবৎ উভয়োঃ প্রত্যেকদেবতাত্বসমুদিতদেবতাত্বয়োর্ব্বিকল্পঃ ইচ্ছাবিকল্পঃ॥ ২৮॥

কেচিদিত্যস্বরসং প্রকাশয়ন্নেব সিদ্ধান্তমাহ বস্তুতস্ত্বিতি। নন্নু পিতৃভ্যো দদ্যাদিতি চতুর্থী সহিতদেবতাত্বে প্রমাণমস্তীত্যত আহ ন হীতি। দেবতাত্বং বেদমেয়ত্যাগোদ্দেশ্যত্বং তস্যা উদ্দেশ্যতামাত্রবোধকত্বাদিতি ভাবঃ। চতুর্থ্যবগতেতি স্বামিত্বে সতি ত্যাগোদ্দেশ্যত্বং সম্প্রদানত্বং তত্রৈব চতুর্থ্যাঃ শক্তেঃ তচ্চেহ বাধিতং দেবতানামচৈতন্যেন

ভোক্তব্যমিত্যাদৌ শ্রুতৌ চ দম্পতী ক্ষৌমে বসানা-বগ্নিমাদধীয়াতামিতি। অত্র ভোজনবসনয়োঃ প্রত্যেক-পরিসমাপ্তত্বেন তদপেক্ষয়া সাহিত্যাসম্ভবাৎ। অতএব পরিষদধিকরণে সপ্তদশাবরা ঋদ্ধিকামা সত্রমুপাসীরন্নিতি

---

স্বামিত্বাভাবাৎ অস্বামিত্বে সতি ত্যাগোদ্দেশ্যত্বমনিরাকর্তৃ সম্প্রদানত্বং গুরুতয়া চাত্র চতুর্থী নিরূঢলাক্ষণিকী তস্মিংশ্চ দেবতাসু চতুর্থ্যা প্রতি-পাদিতে তদন্যথানুপপত্ত্যা দেবতাত্বং কল্পনীয়মিত্যর্থঃ। সহিতানামেব তৎ কল্প্যতাং অত্রাহ ন চেতি ন হীত্যর্থঃ। পূর্ব্বোপদর্শিতেতি অস্মারেতস্তে ইত্যাদ্যুক্তশ্রুতিস্মৃতিবচনৈরিত্যর্থঃ। তথাচ কল্পনীয়স্য ক্লৃপ্তাবাধে-নৈব কল্পনার্হত্বাৎ ক্লৃপ্তপ্রত্যেকদেবতাত্ববিরোধেন সহিতানাং ন দেব তাত্বকল্পনমিতি ভাবঃ। তর্হি কিমত্র চতুর্থী সাহিত্যং ন বোধয়ত্যেব ইত্যত্রাহ সাহিত্যন্ত্বিতি। গর্গা ভোজ্যন্তামিত্যাদৌ অভিধানক্রিয়াপেক্ষয়া সাহিত্যং লোকে দৃষ্টমিত্যন্বয়ঃ। অভিধানক্রিয়া উক্তিঃ তদপেক্ষয়া তদৈ-ক্যাপেক্ষয়া। তথাচ একোক্তিপ্রতিপাদ্যত্বরূপং সাহিত্যং লোকে দৃষ্ট-মিত্যর্থঃ। শ্রুতাবপি তদ্বর্ণনমাহ ক্ষৌমে ইতি। ক্ষৌমে বসনে বসানাবি-ত্যর্থঃ। উক্তবিষয়ে মুখ্যসাহিত্যবাধমাহ অত্রেতি। তথাচাত্র ইব পিতৃভ্যো দদ্যাদিত্যত্রাপি চতুর্থী বহুবচনমেকাভিধানপ্রতিপাদ্যত্বরূপং সাহিত্যং লক্ষণয়া বোধয়তি ন তু মুখ্যসাহিত্যমিতি ভাবঃ। যচ্চাত্র মিশ্রেণাভি-হিতং পিতৃভ্য ইতি চতুর্থী নাভিধানক্রিয়াপেক্ষয়া সাহিত্যে লাক্ষণিকী কিন্তু মুখ্যসাহিত্যপরৈব কিন্ত্বেতস্য একত্র দ্বয়মিতি ন্যায়েন পিতৃষু ভানং ন তূদ্দেশ্যতাবচ্ছেদকত্বেনেতি। তদসৎ মুখ্যসাহিত্যস্য বাধিতত্বেন তদ্বো-ধাসম্ভবাৎ। অতএবাভিধানক্রিয়াপেক্ষয়া সাহিত্যমাদায়াপি বহুবচনস্য চরিতার্থত্বাদেব। ফলস্য সত্রোপাসনারূপক্রিয়ায়াঃ প্রত্যেকপরিসমাপ্তত্বাৎ প্রতিব্যক্তিভিন্নত্বাৎ পরিষদঃ সহিতস্যাধিকারোঽধিকারিত্বেন সত্রান্বয়ঃ। তথাচৈকস্যাং উপাসনাক্রিয়ায়াং সপ্তদশাবরাণামন্বয়িত্বাভাবেন সাহি-ত্যস্য বাধিতত্বেন তদবচ্ছিন্নানাং তেষাং ন সত্রেঽধিকারিত্বেনান্বয়ঃ কিন্তু

প্রত্যেকপরিসমাপ্তত্বাৎ ফলস্য ন পরিষদোঽধিকার ইত্যুক্তম্ ॥ ২৯ ॥

অতঃ সাহিত্যমন্যথাপ্যুপপদ্যমানং ন প্রমাণসিদ্ধং দেবতানৈরপেক্ষ্যং বাধিতুমীষ্টে। নন্বু বিধিবাক্যস্থত্বাদুৎপত্তিশিষ্টত্বাচ্চ সাহিত্যমেব বলবৎ। অর্ঘ্যাগ্নৌৎসর্গপিণ্ড-

---

স্বস্বমৃদ্ধিকামনাবত্ত্বরূপপ্রত্যেকরূপেণৈব তথেতি ভাবঃ। ইত্যুক্তং পরিষদধিকরণে ইতি পূর্ব্বেণান্বয়ঃ। ফলপদস্য নিরূপসত্রফলতয়া ব্যাখ্যানন্ত্বসৎ ক্রিয়াফলস্য প্রত্যেকপরিসমাপ্তত্বেঽপি সাহিত্যান্বয়বাধকাভাবাৎ অন্যথা ধবখদিরৌ ছিন্দীত্যত্রাপি ছিদাক্রিয়াফলয়োরবয়ববিভাগয়োর্ধবে খদিরে চ প্রত্যেকং পরিসমাপ্তত্বেন সাহিত্যান্বয়ো ন স্যাদিতি ॥ ২৯ ॥

উপসংহরতি অত ইতি। সাহিত্যং সাহিত্যপ্রতিপাদনযোগ্যবহুবচনরূপং অন্যথাপ্যুপপদ্যমানং অভিধানক্রিয়াপেক্ষয়া সাহিত্যমাদায়াপি চরিতার্থম্। দেবতানৈরপেক্ষ্যং নিরপেক্ষ্যদেবতাত্বং প্রত্যেকরূপেণ দেবতাত্বমিতি যাবৎ। অত্র বিধিশ্চতুর্ব্বিধঃ—উৎপত্তিবিধিঃ নিয়োগবিধিঃ প্রয়োগবিধিঃ অধিকারবিধিশ্চ। তত্তৎকর্ম্মস্বরূপজ্ঞাপকবিধিরুৎপত্তিবিধিঃ। অহরহঃ সন্ধ্যামুপাসীত ইত্যাদিঃ। কার্য্যাপূর্ব্ববোধকো বিধির্নিয়োগবিধিঃ। যথা স্বর্গকামোঽশ্বমেধেন যজেতেত্যাদিঃ। ইতিকর্ত্তব্যতাবোধকবিধিঃ প্রয়োগবিধিঃ। যথা দর্শপৌর্ণমাসযাগেতিকর্ত্তব্যতাবোধক ইড়ো যজতি সমিধো যজতি বর্হির্যজতীত্যাদিঃ প্রযাজাদিবিধিঃ। অধিকারবোধকো বিধিরধিকারবিধিঃ। যথা শুচিনা কর্ম্ম কর্ত্তব্যমিত্যাদিঃ। বস্তুতো বিভাজকোপাধিরেব চতুর্ব্বিধঃ। তেন পিতৃভ্যো দদ্যাৎ পূর্ব্বেদ্যুর্ব্রাহ্মণান্ সন্নিপাত্য ইত্যাদিঃ প্রয়োগোৎপত্ত্যাদ্যুভয়াত্মকত্বেঽপি ন ক্ষতিঃ। এবং স্থিতে পিতৃভ্যো দদ্যাদিতি বিধিরেব তদবগতত্বঞ্চ সাহিত্যং বলবৎপ্রথমপ্রবৃত্তবিধিবাক্যেন প্রাক্ প্রতিপন্নত্বাৎ। পিতরো দেবতা ইত্যঙ্গার্থবাদাবগতপিতৃত্বাদি প্রত্যেকরূপং দুর্ব্বলং অঙ্গবোধকবাক্যানাং প্রধান-

দানাদিমন্ত্রাবগতং দেবতানৈরপেক্ষ্যং বাধতাং মন্ত্রস্য বিধিসাপেক্ষত্বাৎ ॥ ৩০ ॥

দৃষ্টা চ অগ্নীষোমীয়ং পশুমালভেতেত্যত্র উৎপত্তিশিষ্টদেবতাসাহিত্যবিরোধাৎ কেবলাগ্নিপদবতি মনোহেতি মন্ত্রে সোমসাহিত্যলক্ষণা। তন্ন পিতরো দেবতা ইতি তদ্ধিতসমানার্থত্বেন দেবতাপদাৎ প্রত্যেকং দেবতাত্বাবগমাৎ তদ্বিরোধান্ন চতুর্থীতঃ সাহিত্যকল্পনা

---

বিধ্যুত্থাপিতাকাঙ্ক্ষোত্থাপিতত্বেন পশ্চাৎ প্রবৃত্ততয়া তদধীনতদবগতস্য পশ্চাদ্ভাবিত্বাৎ। তথাচ সাহিত্যমেব বিবক্ষণীয়ং ন তু প্রত্যেকরূপমিত্যাশঙ্ক্যতে নম্বতি। ননু প্রত্যেকরূপমপি বিধিবাক্যস্থং তৎপ্রতিপাদকোক্তশ্রুতিস্মৃতীনামঙ্গবিধিত্বাৎ। অত আহ উৎপত্তিশিষ্টত্বাচ্চেতি। তথাচ পিতৃভ্যো দদ্যাদিতি শ্রাদ্ধরূপকর্ম্মস্বরূপজ্ঞাপকতয়া উৎপত্তিবিধিঃ। উক্তশ্রুতিস্মৃতয়শ্চাঙ্গবিধয়ঃ। উৎপত্তিবিধিরুপজীব্যঃ অঙ্গবিধয়স্তু উপজীবকাঃ। উৎপত্তিবিধিনা কর্ম্মস্বরূপপ্রতিপাদনানন্তরমেবাকাঙ্ক্ষায়াং তেষামুত্থানাৎ এবঞ্চোপজীবকগতত্বেন প্রত্যেকরূপং দুর্ব্বলম্। উপজীব্যগতত্বেন চ সাহিত্যং বলবদতোঽর্ঘ্যাম্নোৎসর্গাদ্যবগতং নৈরপেক্ষ্যং প্রত্যেকরূপং বাধতামিত্যর্থঃ। অঙ্গবিধেরুপজীবকত্বং দর্শয়তি মন্ত্রস্যেতি। অর্ঘ্যাদ্যঙ্গবিধেরিত্যর্থঃ। বিধিসাপেক্ষত্বাৎ উৎপত্তিবিধিমুপজীব্যপ্রযুক্তত্বাৎ ॥ ৩০ ॥

উক্তদৌর্ব্বল্যে দৃষ্টান্তমাহ দৃষ্টা চেতি অগ্নীষোমীয়ং পশুমালভেত ইত্যুৎপত্তিবিধিবাক্যস্থোত্তরবর্ত্তিতদ্ধিতাবগতসাহিত্যবিরোধাৎ অঙ্গবিধিপ্রাপ্তযাগকরণীভূতমনোহামন্ত্রস্থকেবলাগ্নিপদে সোমসাহিত্যবিশিষ্টে লক্ষণা দৃষ্টেত্যর্থঃ। মনোহামন্ত্রশ্চ যেঽস্পরস্তরগ্নয়ঃ প্রবিষ্টা গোহ্যোপগোহ্যো ময়ূখা মনোহা ইত্যত্রাগ্নিপদে সোমসাহিত্যবিশিষ্টে লক্ষণেত্যর্থঃ। অতএবোক্তং মন্ত্রস্য বিধ্যপেক্ষত্বাৎ

দুর্ব্বলত্বাৎ। যদাহুঃ। তদ্ধিতেন চতুর্থ্যা বা মন্ত্রলিঙ্গেন চেষ্যতে। দেবতাসঙ্গতিস্তত্র দুর্ব্বলন্তু পরম্পরম্॥ অন্যে ত্বেকব্রাহ্মণপক্ষে সমুদিতত্বমনেকব্রাহ্মণপক্ষে চাসমুদিতত্বমিতি বর্ণয়ন্তি ন তু শব্দানুপাত্তাভিধানক্রিয়াপেক্ষয়া সাহিত্যং যুক্তং অগত্যা হি গর্গা ভোজ্যন্তামিত্যাদৌ

---

প্রামাণ্যম্। দুর্ব্বলং তত ইতি ততো বিধিত ইত্যর্থঃ। তদ্ধিতস্য চতুর্থীতো বলবত্ত্বমুক্ত্বা পূর্ব্বাচার্য্যৈরুক্তং সা চ যুক্তিরগ্রে বক্ষ্যতে। তয়ৈব চ যুক্ত্যা দেবতাপদস্যাপি চতুর্থীতো বলবত্ত্বমিতি তৎপ্রতিপাদনার্থং তদ্ধিতসমানার্থেতি দেবতাপদবিশেষণমুক্তম্। তথাচ বলবতো বহুবচনান্তাদ্দেবতাপদাৎ প্রত্যেকদেবতাত্বাবগমান্ন তদ্বিরোধেন চতুর্থীতঃ সাহিত্যেন দেবতাত্বকল্পনা চতুর্থ্যাস্তদপেক্ষয়া দুর্ব্বলত্বাদিত্যর্থঃ। আচার্য্যসিদ্ধান্তমাহ যদাহুরিতি। অয়মর্থঃ। দেবতার্থে তদ্ধিতবিধানাৎ তদ্ধিতস্য তদ্বাচকত্বং চতুর্থ্যাস্তুনিরাকর্ত্তৃকসম্প্রদানত্বান্যথানুপপত্তিমুখেন তৎকল্পকত্বমেব ন তু তদ্বাচকত্বমতো দুর্ব্বলা চতুর্থীত্যর্থঃ। মন্ত্রলিঙ্গন্তু মন্ত্রসামর্থ্যরূপং তচ্চ চতুর্থীতো দুর্ব্বলং মন্ত্রস্য লক্ষণয়াপ্যুপপন্নত্বেনান্যথাসিদ্ধত্বাৎ বিধিবাক্যগতা চতুর্থী তদপেক্ষয়া বলবতী অন্যথানুপপন্নত্বাৎ। যথা পৃথিবী দর্বিরক্ষিতামিত্যেকং পিণ্ডং পিত্রে নিদধ্যাৎ অন্তরীক্ষং দর্বিরক্ষিতামিতি দ্বিতীয়ং পিণ্ডং পিতামহায় নিদধ্যাদিতি বিষ্ণূক্তেঃ পিত্রে নিদধ্যাদিত্যাদিবিধিবাক্যস্থচতুর্থ্যা পিত্রাদের্দেবতাত্বাবগমাৎ তদ্বিরোধেন পৃথিবী দর্বিরক্ষিতামিত্যাদিমন্ত্রে পৃথিব্যাদিমন্ত্রে পৃথিব্যাদিপদানাং পিত্রাদৌ লক্ষণা। ন চ মন্ত্রলিঙ্গবিরোধাদ্বিধিবাক্যস্থপিত্রাদিপদানামেব কুতঃ পৃথিব্যাদৌ লক্ষণা ন স্যাদিতি বাচ্যং বাক্যানাং পিত্রাদিশ্রাদ্ধতাৎপর্য্যবিরোধাৎ বিধেঃ প্রথমপ্রবৃত্তত্বেন বাধকাভাবাৎ মুখ্যত্বাৎ উত্তরকালপ্রবৃত্তমন্ত্রস্যৈব প্রাক্ প্রতীতার্থবিরোধেন লাক্ষণিকত্বাৎ তেন চতুর্থ্যাদিবাধকাভাব এব মন্ত্রলিঙ্গাৎ দেবতাত্বকল্পনম্। যথা ভূঃ স্বাহেত্যাদৌ ভূম্যাদেরিতি দ্রষ্টব্যং এবঞ্চ

তথেতি তন্ন উক্তযুক্তের্দ্দেবতাসাহিত্যানবগমাৎ ব্যবস্থায়া নির্ব্বাসনত্বাচ্চ ॥ ৩১ ॥

কিঞ্চ। পিতৃভ্যো দদ্যাৎ পূর্ব্বেদ্যুর্ব্রাহ্মণান্ সন্নিপাত্যেতি বশিষ্ঠবচনে ব্রাহ্মণানিতি বহুবচনাৎ অনেকব্রাহ্মণপক্ষ এব সাহিত্যশ্রুতেঃ। শব্দানুপাত্তত্বঞ্চ উদ্দেশ্যক্রিয়ায়া অপ্যবিশিষ্টং ধাতোস্ত্যাগমাত্রপরত্বাৎ। এতেনেদং নিরস্তং সমুদিতদৈবতং শ্রাদ্ধমসমুদিতদৈবতশ্রাদ্ধঞ্চ

যথা তদ্ধিতস্য দেবতাবাচকত্বাৎ চতুর্থীতো বলবত্ত্বং তথা দেবতাপদমপি তদ্বাচকত্বাদ্বলবদিতি বোধ্যম্। প্রমাণসিদ্ধং সহিতদেবতাত্বং প্রত্যেকদেবতাত্বঞ্চ ব্যবস্থিতবিকল্পেন ব্যবস্থাপয়তীতি মতং দূষয়িতুমুপন্যস্যাতি অন্যে ত্বিতি। নন্বিতি শব্দানুপাত্তং শব্দাশক্যং যদভিধানক্রিয়াপেক্ষয়া সাহিত্যং তদ্বহুবচনপ্রতিপাদ্যমিতি যুক্তং ন ত্বিত্যর্থঃ পদানাং মুখ্যত্বস্য ঔৎসর্গিকত্বাদিতি ভাবঃ। তর্হি গর্গা ভোজ্যন্তামিত্যাদৌ কা গতিরিত্যত আহ অগত্যেতি। তত্র ভোজনক্রিয়ায়াঃ প্রত্যেকপরিসমাপ্তত্বেন তদপেক্ষয়া সাহিত্যরূপগত্যভাবেনাভিধানক্রিয়াপেক্ষয়ৈব সাহিত্যবর্ণনমিত্যর্থঃ। উক্তযুক্তেস্তদ্ধিতসমানার্থকদেবতাদিপদাদিত্যুক্ত যুক্তেঃ। ব্যবস্থায়া উক্তব্যবস্থিতবিকল্পস্য। নির্ব্বাসনত্বান্নির্যুক্তিকত্বাৎ। একব্রাহ্মণপক্ষে প্রত্যেকদেবতাত্বমনেকব্রাহ্মণপক্ষে তু সমুদিতদেবতাত্বমিত্যস্যাপ্যনুপপত্ত্যভাবেন বক্তুং শক্যত্বাদিতি ভাবঃ ॥ ৩১ ॥

বিরোধমপ্যাহ কিঞ্চেতি। অনেকব্রাহ্মণপক্ষ এবেতি। তথাচানেকব্রাহ্মণপক্ষেঽসমুদিতদেবতাত্বং ভবদুক্তমেতদ্বিরুদ্ধমিতি ভাবঃ। নতু শব্দানুপাত্তত্বঞ্চেতি শব্দানুপাত্তাভিধানক্রিয়াপেক্ষয়েতি যদুক্তং তৎপ্রতিবন্দিমুদ্ধরতি শব্দাশক্যত্বঞ্চেত্যর্থঃ অবিশিষ্টমিতি শব্দানুপাত্তত্বং যথাভিধানক্রিয়ায়াং তথোদ্দেশ্যক্রিয়ায়ামপীত্যর্থঃ। ননূদ্দেশক্রিয়াপেক্ষয়ৈব প্রকৃতে

সমুচ্চয়েঽনৈকস্মিন্নেব প্রয়োগে কর্ত্তব্যমিতি। এবং সমুদি- তাসমুদিতপক্ষাভ্যাং ব্রাহ্মণচতুষ্টয়ে দ্বয়ে বা। দ্বৌ দৈবে পিতৃকৃত্যে ত্রীনেকৈকমুভয়ত্র বা। ইতি মনুবচনবি- রোধাৎ। অত্র পিতরো দেবতাঃ পিতৃভ্যো দদ্যাদিত্যাদি- বিধিবাক্যেঽর্ঘ্যদানাম্নোৎসর্গপিণ্ডদানাদিমন্ত্রেষু চ পত্নী- নিরপেক্ষাণামেব পিত্রাদীনাং কীর্ত্তনাৎ ন সপত্নীকানাং দেবতাত্বম্ ॥ ৩২ ॥

---

সাহিত্যং তত্রৈব পিত্রাদীনামন্বয়াৎ ন তু দদাত্যর্থক্রিয়াপেক্ষয়া তত্র তেষাৎ সাক্ষাদনন্বয়িত্বাৎ। তস্যাঃ শ্রাদ্ধকর্ত্তৃবৃত্তিত্বেন ব্যধিকরণতয়োদ্দেশ্য- বৃত্তিসাহিত্যস্য তদবচ্ছেদকত্বাসম্ভবাচ্চ। তথাচ পিতৃভ্যো দদ্যাদিত্যত্রো- দ্দেশ্যক্রিয়ায়াশ্চতুর্থ্যুপাত্তত্তয়া কথং শব্দানুপাত্তত্বমিতি চেদত্রোচ্যতে যাদৃশী উদ্দেশ্যক্রিয়া সাহিত্যশরীরে প্রবিষ্টা তাদৃশ্যুদ্দেশ্যক্রিয়া শব্দানুপাত্তৈব। তথাহি সাহিত্যলক্ষণে একক্রিয়ান্বয়িত্বমিত্যত্র ক্রিয়া- পদেন ধাতূপস্থাপ্যমুচ্যতেঽন্যথা ক্রিয়াপদবৈয়র্থ্যাপত্তেঃ। চতুর্থ্যু- পাত্তায়া উদ্দেশ্যক্রিয়ায়াশ্চ ন ধাতূপস্থাপ্যত্বং অতঃ সাহিত্যঘটকী- ভূতোদ্দেশ্যক্রিয়ায়াঃ শব্দানুপাত্তত্বমেবেতি ভাবঃ। ননূদ্দেশ্যগতস্বামিত্ব- জনকত্যাগো দানমিতি দানলক্ষণাৎ উদ্দেশ্যক্রিয়ায়া দদাতিধাতূপস্থা- প্যত্বমেব তৎ কথং শব্দানুপাত্তত্বমিত্যত আহ ধাতোরিতি। পিতৃভ্যো দদ্যাদিত্যত্র যাগার্থকদাধাতোস্ত্যাগমাত্রে লক্ষণা। তথাচ যদি দদাতে- র্দ্দানপরতা স্যাত্তদা উদ্দেশক্রিয়াপি ঘটকতয়া ধাতূপস্থাপ্যা স্যাৎ সৈব তুসিদ্ধা বাধাদিতি ভাবঃ। কেচিৎ তু সমুদিতাসমুদিতদৈবতত্বয়ো- র্দ্বয়োরেব শাস্ত্রার্থয়োবিচ্ছাবিকল্পে চাষ্টদোষগ্রাসাৎ সমুচ্চয় এব। তথাচোভয়ক্রমেণৈব বাক্যরচনয়া শ্রাদ্ধদ্বয়মেকোপক্রমেণ কার্য্যমিতি বদন্তি তদপি নিরাকরোতি এতেনেতি। উক্তক্রমেণ সমুদিতদেবতাত্বস্য নিরস্তত্বেন মনুবিরুদ্ধোঽপি সমুচ্চয়পক্ষ ইত্যাহ এবমিতি। ব্রাহ্মণচতু- ষ্টয়ে দ্বয়ে বা প্রাপ্তে ইতি শেষঃ। বহুব্রাহ্মণসম্ভবেঽসমুদিতশ্রাদ্ধার্থং

তথা। ন যোষিদ্ভ্যঃ পৃথগ্দদ্যাদবসানদিনাদৃতে। স্বভর্ত্তৃপিণ্ডমাত্রাভ্যস্তৃপ্তিরাসাং যতঃ স্মৃতা॥ ইতি ছন্দোগপরিশিষ্টবচনেঽবসানদিনব্যতিরেকেণ যোষিতাং দাননিষেধাৎ ন পত্নীবিশিষ্টস্য দেবতাত্বং পত্নীবিশিষ্টস্য হি দেবতাত্বে তদ্দানং পত্ন্যা অপি স্যাৎ। অত্র হেতুমাহ স্বভর্ত্তৃপিণ্ডভাগাদেব তৎ তৃপ্তেঃ। বিশিষ্টদেবতাপক্ষে স্বভর্ত্তৃপিণ্ড ইতি ন স্যাৎ তৎপিণ্ডত্বাদপি তস্য অতো হেতুমন্নিগদবিরোধাদপি ন সপত্নীকানাং দেবতাত্বম্। যথা শাতাতপঃ। সপিণ্ডীকরণাদূর্দ্ধং যৎ পিতৃভ্যঃ প্রদীয়তে। সর্ব্বেষ্বংশহরা মাতা ইতি ধর্ম্মেষু নিশ্চয়ঃ॥ অত্র পিতৃমাত্রস্যৈব দানে মাতুরংশহরত্বাভিধানাৎ। অন্যথোভয়োরেব দানেঽংশহরত্বাভিধানমসঙ্গতং স্যাৎ। ন চাংশহরত্বানু-

---

ত্রয়ো ব্রাহ্মণাঃ সমুদিতশ্রাদ্ধার্থ কৈকো ব্রাহ্মণ ইতি ব্রাহ্মণচতুষ্টয় প্রাপ্তিঃ বহুব্রাহ্মণাসম্ভবে সমুদিতশ্রাদ্ধার্থমেকো ব্রাহ্মণঃ অসমুদিতদৈবতশ্রাদ্ধার্থঞ্চ এক ইতি ব্রাহ্মণদ্বয়প্রাপ্তিরিত্যর্থঃ। অত্রেদং বোধ্যং একস্মিন্নেব ব্রাহ্মণে সমুদিতাসমুদিতশ্রাদ্ধদ্বয়সম্ভবাৎ কথং ব্রাহ্মণদ্বয়প্রাপ্তিঃ ন হি দেবতাভেদেন ব্রাহ্মণভেদঃ তথাত্বে সিদ্ধান্তমতে পিত্রাদিত্রিদৈবতৈকব্রাহ্মণকশ্রাদ্ধকরণপক্ষস্যাসম্ভবিত্বাপত্তেঃ। এবং ব্রাহ্মণত্রয়পক্ষেঽপি ত্রিষ্বেব শ্রাদ্ধদ্বয়সম্ভবান্ন চতুষ্টয়প্রাপ্তিরিতি দূষণং এতদকিঞ্চিৎকরম্। কিন্ত্বেতেন ইত্যুক্ত এব দোষোঽত্রেতি সপত্নীকত্বেন পিত্রাদীনাং দেবতাত্বমিতি প্রাচীনমতং প্রসঙ্গাত্তদপি নিরাকরোতি অত্রেতি॥ ৩২॥

সাধকাভাবমুক্ত্বা বাধকমপ্যাহ তথা ন যোষিদ্ভ্য ইতি। অবসানদিনং মরণদিনম্। মাত্রাঽংশঃ পত্ন্যা অপি স্যাদিতি। তথাচ বিশিষ্টদেবতাকশ্রাদ্ধমপি নিষেধবিষয় ইতি ভাবঃ। অত্র দাননিষেধে

পপত্ত্যা এব তদুদ্দেশেন দানমবগম্যতে হিরণ্যদানে পত্নী-বিশিষ্টব্রাহ্মণানুদ্দেশেঽপি পত্ন্যাস্তদংশহরত্বাৎ ॥ ৩৩ ॥

অতএব দম্পত্যোর্মধ্যগং ধনমিত্যুক্তম্। ননু ন যোষিদ্ভ্যঃ পৃথগ্ দদ্যাদিত্যত্র পৃথক্পদোপাদানাদেব পিত্রাদিবিশেষণতয়া যোষিতাং দানমবগম্যতে। অন্যথা দানমাত্রনিষেধে পৃথক্পদবৈয়র্থ্যাপত্তেঃ। কিঞ্চ পৃথঙ্ন

তৎপিণ্ডত্বাদপীতি। তস্যেতি পাঠে তস্য বিশিষ্টদেবতাকপিণ্ডস্য তৎপিণ্ডত্বাদপি যোষিৎপিণ্ডত্বাদপীত্যর্থঃ। তস্যা ইতি পাঠে স পিণ্ডো যস্যাঃ সা তৎপিণ্ডা তস্যা যোষিতোঽপীতি ভিন্নক্রমেণাপি নান্বয়ঃ। হেতুমন্নিগদঃ সহেতুকবাক্যম্। বিরোধাদিতি স্বপিণ্ডেত্যনুক্ত্বা স্বভর্তৃ-পিণ্ডেত্যুক্তেস্তদ্বিরোধাদিত্যর্থঃ। পিতৃমাত্রস্যেবেতি পিতৃভ্যঃ প্রদীয়তে ইতি নিরপেক্ষপিতৃত্বমাত্রশ্রুতেরিতি ভাবঃ। অংশহরত্বাভিধানাদিতি ন সপত্নীকস্য দেবতাত্বমিতি পূর্ব্বেণান্বয়ঃ। অন্যথা পিতৃমাত্রস্যা-দানেঽনর্থকং স্যাদিতি। উদ্দেশ্যত্বে তস্যা অপি তত্রাংশিতায়া অভিধানং বিনাপি প্রাপ্তেরিতি ভাবঃ। ত্যক্তদ্রব্যস্যাংশহরত্বং ত্যাগো-দ্দেশ্যতা নিয়তমিত্যভিপ্রায়েণ শঙ্কতে ন চেতি ন হীত্যর্থঃ। নিয়মে ব্যভিচারমাহ হিরণ্যদান ইতি ॥ ৩৩ ॥

পত্ন্যাস্তদংশহরত্বে প্রমাণমাহ অতএবেতি। ধনং পত্যুর্ধনং ন তু পত্ন্যা অপি ধনং তস্যাঃ সৌদায়িকধনে পত্যুরস্বামিত্বাৎ। দম্প-ত্যোরাশ্রমস্বামিনোঃ মধ্যগং তদুভয়স্বামিকমিত্যর্থঃ। পৃথক্পদদানা-দেব পৃথক্পদোপাদানাদেব। ননু পূর্ব্বোপদর্শিতবচনৈর্নিরপেক্ষ-দেবতাত্বাবগমঃ পৃথক্পদস্বরসসিদ্ধসপত্নীকদেবতাত্বং বাধতামত আহ-কিঞ্চেতি। তথাচাপৃথগ্দদ্যাদিতি স্ফুটবিধ্যনুরোধাৎ পূর্ব্বোপদর্শিত-বচনেষু পিতৃপদানাং সপত্নীকপিতৃপরত্বমেবোচিতমিতি ভাবঃ। অথবা ননু পৃথক্পদোপাদানাৎ কথং সহভাবেন দানমবগম্যতে ইত্যতস্ত-দুপপাদয়তি কিঞ্চেতি শাস্ত্রত ইতি। ন চামাবাস্যায়াং পিতৃভ্যো দদ্যা-

দদ্যাদিতি নায়ং নিষেধবিধিঃ পৃথগ্দানস্য শাস্ত্রতো রাগতো বাঽপ্রাপ্তেঃ ॥ ৩৪ ॥

কিন্ত্বপৃথগ্দদ্যাদিতি পর্য্যুদাসবিধিঃ তদা ব্যক্তমেব সহভাবেন যোষিতাং দানং হেতুবন্নিগদস্ত্বন্যথা ব্যাখ্যেয়ঃ। স্বপিণ্ডশ্চ ভর্ত্তৃপিণ্ডশ্চ স্বভর্ত্তৃপিণ্ডস্তস্য মাত্রাভ্যো যতস্তৃপ্তিরাসাং অতোঽপৃথক্পিণ্ডো দেয়ঃ উভয়োরুদ্দেশে-

---

দিত্যত্র পিতৃপদস্য যোষিৎসাধারণপ্রাপ্তপিতৃলোকত্বপ্রকারেণ বোধকতয়া যোষিতামপি শ্রাদ্ধপ্রাপ্তিরিতি বাচ্যম্। তত্র পিতৃপদস্যাসাবেতত্তে যজমানস্য পিত্রে অসাবেতত্তে যজমানস্য পিতামহায় অসাবেতত্তে যজমানস্য প্রপিতামহায়েতি শ্রুত্যৈকবাক্যতয়া পিত্রাদিত্রয়বোধকত্বেন তেষ্বেব রূঢ়ত্বাৎ মাতামহাদিশ্রাদ্ধপ্রাপ্তিস্তু পিতরো যত্র পূজ্যন্তে তত্র মাতামহা ধ্রুবমিতি পৃথক্বিধিত এবেতি। ন চ তথাপি শাস্ত্রতঃ প্রাপ্তৌ পর্য্যুদাসস্যৈব সিদ্ধান্তসিদ্ধতয়া কথং নিষেধাশঙ্কেতি বাচ্যম্। যদ্যবসানদিনাতিরিক্তে যোষিদ্ভ্যো দদ্যাদিতি পৃথক্ শাস্ত্রং তিষ্ঠেত্তদা ষোড়শিগ্রহণাগ্রহণবত্তুল্যবিষয়তয়া বিকল্পেন নিষেধবিধিসম্ভবাৎ প্রকৃতে চ তাদৃশপৃথক্শাস্ত্রাভাবাৎ শাস্ত্রতোঽপ্রাপ্তেরিত্যুক্তত্বাৎ। ন চ বৃদ্ধ্যষ্টকাদৌ সর্ব্বশাখিগোচরস্য যোষিতাং পৃথগ্দানস্য প্রাপ্তেঃ ছন্দোগযোষিদ্গোচরো নিষেধ এবাস্ত্বিতি বাচ্যং বৃদ্ধ্যষ্টকাদিবিধীনাং ছন্দোগবিষয়ত্বে তত্র চাস্য নিষেধরূপত্বে বিকল্প এব স্যাৎ। তথা চ বৃদ্ধ্যষ্টকাদিবিধেঃ শাখ্যন্তরবিষয়ে নিত্যবদ্বিধায়কস্য ছন্দোগবিষয়ে বিকল্পেনানিত্যবদ্বিধায়কত্বে নিত্যানিত্যসংযোগরূপবিধিবৈষম্যাপত্তেঃ পৃথক্পদবৈয়র্থ্যাপাতাচ্চ তস্মান্ন নিষেধসম্ভব ইতি ॥ ৩৪ ॥

কিন্ত্বিতি। যদ্যপি পর্য্যুদাসপক্ষেঽপি সামান্যশাস্ত্রপ্রাপ্তিরঙ্গং তদপ্রাপ্তৌ পর্য্যুদসনীয়স্যাভাবাৎ। অতএব বক্ষ্যতি যোষিতাং দানাপ্রাপ্তৌ কথং নিষেধঃ পর্য্যুদাসো বেতি তথাপি যোষিদ্ভ্যো দদ্যাদিতি সামান্য-

নৈব দেয় ইত্যর্থঃ। উচ্যতে। এবং পিত্রাদীনামপি অব-
সানদিনাদন্যত্রাপৃথগ্দানাৎ গোষিদ্ভ্য ইত্যনর্থকং স্যাৎ

---

বিধিকল্পনে তাসাং পৃথগ্দানস্যাপি প্রসক্তেঃ তৎপর্য্যুদাসেন
সহত্বলক্ষণাপৃথক্ত্ববিশিষ্টদানবিধিরেবাত্র পর্য্যুদাসেনেতরব্যাবৃত্তরূপেণ
বিধিঃ পর্য্যুদাসবিধিপদার্থঃ। যদ্বা নঞন্বিতপৃথক্ পদাৎ সহরূপার্থ-
প্রাপ্ত্যা সহদানবিধিঃ পর্য্যুদাসবিধিঃ। অয়ন্তু পর্য্যুদাসবিধিশ্ছন্দোগ-
গোচর এব অন্যেষাং বৃদ্ধ্যষ্টকাদিবিধিভ্যঃ পৃথক্শ্রাদ্ধপ্রাপ্তেঃ। তদেতি
উক্তবিধৌ সতীত্যর্থঃ। নন্বেবং সতি দত্তপিণ্ডস্য যোষিতোঽপি পিণ্ডতয়া
স্বভর্তৃপিণ্ডেতি হেতুমন্নিগদবিরোধ ইত্যত আহ হেতুমন্নিগদস্ত্বিতি।
স্বপিণ্ডশ্চেতি ইত্থঙ্কার্থকথনমাত্রং সমাসস্তু স্বঞ্চ ভর্ত্তা চ স্বভর্ত্তারৌ
তয়োঃ পিণ্ডঃ স্বভর্তৃপিণ্ড ইতি। দেয় ইতি সপত্নীকোদ্দেশেন দেয়
ইত্যর্থঃ। এবমিতি অবসানদিনাদৃতে সর্ব্বত্র সপত্নীকস্য দেবতাত্বে
যথা পত্নীনাং অপৃথগ্দানং তথা পুংসামপীতি যোষিৎপদমব্যাবর্ত্তকতয়া-
ব্যর্থমিত্যর্থঃ। ননু যোষিৎপদাভাবে ভর্ত্রা সহাপৃথগিতি ন লভ্যতে
ইতি চেৎ যোষিৎপদদত্তেঽপি তৎ কথং লভ্যতে স্বভর্তৃপিণ্ডমাত্রাভ্য
ইতি হেতুমন্নিগদাৎ তদা যোষিৎপদাদানেঽপি তুল্যমিতি। ননু জীবন্তীষু
যোষিৎসু পুংসাং পৃথক্শ্রাদ্ধদর্শনাৎ তদ্ব্যাবর্ত্তকতয়া যোষিৎপদং সার্থক-
মেবেতি চেন্ন পরিপ্রাপ্তে যোষিতাং শ্রাদ্ধেঽনেন বচনেনাপৃথক্ত্বং বিধী-
য়তে কিং বা পরিপ্রাপ্তপুংসম্প্রদানকশ্রাদ্ধে যোষিৎসহভাবো বিধীয়তে।
নাদ্যঃ পূর্ব্বোক্তক্রমেণাবসানদিনাতিরিক্তেঽমাবাস্যাদৌ যোষিৎশ্রাদ্ধা-
প্রাপ্ত্যা তদনুবাদেন অপৃথক্ত্ববিধানাসম্ভবাৎ। ন দ্বিতীয়ঃ তদা
যোষিৎপদে সত্যপি জীবন্তীষু যোষিৎসু যোষিৎসহত্বরূপবিশেষণা-
সিদ্ধৌ কথং পুংসাং শ্রাদ্ধসিদ্ধিঃ। ন হি দধ্না জুহোতীত্যাদৌ দধ্যাদি-
গুণবাধে যাগসিদ্ধিঃ সশ্রীকত্বগুণবাধে সশ্রীকায় শ্রীপতয়ে স শ্রীমান্
ভুবি জায়তে ইত্যুক্তদানসিদ্ধির্বেতি। ন চাপৃথক্ত্ববিশিষ্টশ্রাদ্ধান্তর-
বিধিরেবায়ং ভবত্বিতি বাচ্যং তদাঽবসানদিনাদৃতে ইত্যস্য বৈয়র্থ্যা-

সর্ব্বেষামপৃথগ্দানং বিধীয়তে। যোষিৎপদমনুবাদমাত্র-মিতি চেৎ ন হেতুমন্নিগদবিরোধাৎ ॥ ৩৫ ॥

তদ্বরং পৃথক্পদমনুবাদোঽস্তু যোষিতাং দানমাত্রং

পক্ষেঃ। অবসানদিনে ধ্রুবাণি তু প্রকুর্ব্বীত প্রমীতাহনি সর্ব্বদেতি ছন্দোগপরিশিষ্টেনৈব স্ত্রীপুংসাধারণ্যেন পৃথক্শ্রাদ্ধোক্তেঃ সর্ব্বশাখা-প্রত্যয়মেকং কর্ম্ম ইতি ন্যায়েন স্ত্রীণামপ্যেবমেবৈতদেকোদ্দিষ্টমুদা-হৃতম্। মৃতাহনি যথান্যায়ং নৃণাং যদ্বদিহোদিতম্। ইতি মার্কণ্ডেয়-পুরাণীয়েন চ সর্ব্বশাখিযোষিতামেব পৃথক্শ্রাদ্ধোক্তেশ্চ অপৃথক্ত্ব-বিশিষ্টশ্রাদ্ধবিধেস্তদিতরপরত্বস্যাবসানদিনাদৃতে ইত্যস্যানুপাদানেঽপি প্রাপ্তেরিতি। হেতুমন্নিগদবিরোধাদিতি সর্ব্বেষামেবাপৃথগ্দানে স্ত্রীণাং পুংসাঞ্চ তস্মাৎ তৃপ্তেরর্থসিদ্ধতয়া আসামিতি যোষিন্মাত্রো-পাদানাৎ ন্যূনত্বরূপতদ্বিরোধাদীতি ঋজবঃ। বস্তুতস্তু স্বভর্তৃপিণ্ডেত্যত্র ভর্তৃশব্দস্য সম্বন্ধিশব্দতয়া তদুত্থাপিতাকাঙ্ক্ষাপূরণক্ষমস্বশব্দেন ষষ্ঠী-সমাস এব ব্যুৎপত্তিসিদ্ধো ন তু দ্বন্দ্বঃ ন হি চৈত্রপিতৃপিণ্ডমিত্যুক্তে কদাচিদপি চৈত্রতৎপিত্রোঃ পিণ্ডপ্রতীতিঃ কিন্তু চৈত্রস্য পিতৃপিণ্ড-প্রতীতিরেব ইতি। দ্বন্দ্বে বিনিগমনাবিরহাৎ উভয়পদ এব সাহিত্য-বিশিষ্টোভয়পদার্থয়োর্লক্ষণা। ষষ্ঠীসমাসে তু পূর্ব্বপদমাত্রে সম্বন্ধিলক্ষ-ণেতি ষষ্ঠীসমাসস্য বলবত্তয়া তৎসম্ভবে দ্বন্দ্বাপ্রসক্তেশ্চ। অতএব রাজ-পুরোহিতৌ সাম্রাজ্যকামৌ যজেয়াতামিত্যত্র দ্বন্দ্বাৎ ষষ্ঠীসমাসস্য বলবত্ত্বেন ষষ্ঠীসমাসো ভবত্বিতি পূর্ব্বপক্ষয়িত্বা একস্য রাজ্ঞঃ পুরোহিত-দ্বয়াশ্রবণাৎ অগত্যা গুরুরপি দ্বন্দ্বোঽঙ্গীক্রিয়তে ইতি মিশ্রেণাপ্যভি-হিতম্। তথাচাস্য স্বস্য ভর্তৃপিণ্ডমাত্রাভ্য ইত্যর্থকত্বে সিদ্ধে তদ্বি-রোধাদিত্যর্থঃ। উভয়োর্দ্দেবতাত্বে তৎপিণ্ডস্য তস্যা অপি পিণ্ডত্বা-দুভয়োদ্দেশ্যকপিণ্ডমাত্রাভ্য ইত্যেব বক্তুমৌচিত্যাদিতি ॥ ৩৫ ॥

তদ্বরমিতি পৃথক্পদমনুবাদোঽস্ত্বিতি তবন্মতে যোষিৎপদানুবাদঃ

নিষিধ্যতাং অবসানদিনাদন্যত্র সামান্যতো যোষিতাং দানাপ্রাপ্তৌ কথং নিষেধঃ পর্য্যুদাসো বেতি চেৎ ন বৃদ্ধিশ্রাদ্ধান্বষ্টকাদৌ সামান্যতঃ শাখিমাত্রকর্ত্তৃতয়া যোষিতাং দানপ্রাপ্তৌ ছন্দোগানাং নিষেধঃ পর্য্যুদাসো বা ভবিষ্যতি ॥ ৩৬ ॥

---

হেতুমন্নিগদবিরোধশ্চেতি স্বয়ং মন্মতে তু পৃথক্পদানুবাদমাত্রং অতো বরমিত্যর্থঃ। তদুক্তং মীমাংসকৈঃ। অব্যয়ানান্ত সর্ব্বেষামনেকার্থত্ব-দর্শনাৎ। ন দোষস্ত্বনুবাদত্বং দোষস্তদিতরস্য ত্বিতি। ইদমুপলক্ষণং যোষিৎপদানুবাদত্বে প্রকৃতিপ্রত্যয়য়োর্দ্বয়োরেবানুবাদত্বং পৃথক্-পদস্য ত্বনুবাদত্বে তস্যাব্যয়ত্বেন বিভক্তিশূন্যতয়া কেবলপ্রকৃতেরেবানু-বাদতা ইত্যপি বোধ্যম্। কথমিতি নিষেধস্য প্রাপ্তিমাত্রসাপেক্ষত্বাৎ পর্য্যুদাসস্যাপি শাস্ত্রপ্রাপ্তসাপেক্ষত্বাদিতি ভাবঃ। ছন্দোগানাং নিষেধ ইতি অবসানদিনাতিরিক্তে যোষিদ্ভ্যঃ পৃথক্শ্রাদ্ধং ছন্দোগো ন দদ্যাদিতি বিধিরিত্যর্থঃ। নিষেধপক্ষে প্রাপকসামান্যশাস্ত্রস্যোপ-জীব্যস্য বাধাপত্তিঃ পূর্ব্বোক্তন্যায়েন সামান্যবিধিবৈয়র্থ্যাপত্তিশ্চ ইত্যত উক্তং পর্য্যুদাসো বেতি। অবসানদিনাতিরিক্তে বৃদ্ধ্যাদৌ যোষিদ্ভ্যঃ পৃথক্শ্রাদ্ধং ছন্দোগেতরো দদ্যাদিতি পর্য্যুদাস ইত্যর্থঃ। ন চৈবং আদ্যশ্রাদ্ধষাণ্মাষিকশ্রাদ্ধানাং মৃতাহেতরক্রিয়মাণানাং ছন্দোগ-যোষিতাং কথং প্রাপ্তিঃ তেষাং সর্ব্বশাখিসাধারণেন বিধ্যন্তরেণ প্রাপ্তত্বাৎ অন্যথা ছন্দোগেতরযোষিতামপি শ্রাদ্ধপ্রাপ্তির্ন স্যাৎ উক্ত পর্য্যুদাসবিধেঃ প্রকরণাৎ সপিণ্ডনোত্তরবৃদ্ধ্যাদিশ্রাদ্ধবিষয়কত্বাদিতি এবং ছন্দোগেতরেণ পিতামহ্যাদিভির্মাতুঃ সপিণ্ডীকরণে ক্রিয়মাণে পিতামহ্যাদিশ্রাদ্ধম্। মাতুঃ সপিণ্ডীকরণং পিতামহ্যা সহোদিতমিতি। ছন্দোগপরিশিষ্টস্যৈব বিশেষবচনাৎ। এবং মাতুঃ প্রথমতঃ পিণ্ডং নির্ব্বপেৎ পুত্রিকাসুতঃ। দ্বিতীয়ঞ্চ পিতুস্তস্যাঃ তৃতীয়ঞ্চ পিতুঃ পিতুরিতি। বিশেষ-বচনাদেব সর্ব্বেষাং পার্ব্বণে মাতৃশ্রাদ্ধপ্রাপ্তিরিতি ॥ ৩৬ ॥

তথা মৎস্যপুরাণে। উৎসবানন্দসন্তানে যজ্ঞোদ্বাহাদিমঙ্গলে। মাতরঃ প্রথমং পূজ্যাঃ পিতরস্তদনন্তরম্। বিষ্ণুঃ। অন্বষ্টকাস্বষ্টকাবদুক্ত্বা মাত্রে পিতামহ্যৈ প্রপিতামহ্যৈ চ পূর্ব্ববদ্‌ব্রাহ্মণান্ ভোজয়িত্বেত্যাদি। যৎ তু বৃহস্পতিবচনম্। স্বেন ভর্ত্রা সহ শ্রাদ্ধং মাতা ভুঙ্‌ক্তে স্বধাময়ম্। পিতামহী চ স্বেনৈব স্বেনৈব প্রপিতামহীতি। তদ্ভোজন এব সহভাবং বোধয়তি ন তু দানে। ভোজনে সহভাবানুপপত্ত্যা দানেঽপি সহত্বং কল্পনীয়মিতি চেন্ন হিরণ্যদানাদৌ ব্যভিচারাৎ। কিঞ্চ ভর্ত্তুরেব সহভাবোঽত্রাবগম্যতে ন পত্ন্যাঃ তদা সহভর্ত্তৃকায়ৈ মাত্রে ইতি বাক্যং স্যাৎ। যৎ তু পঠন্তি। অন্বষ্টকায়াং বৃদ্ধৌ চ গয়ায়াং মৃতবাসরে। অত্র মাতুঃ পৃথক্ শ্রাদ্ধমন্যত্র পতিনা সহ॥

---

বৃদ্ধ্যন্বষ্টকাদৌ সামান্যতো মাতৃশ্রাদ্ধপ্রাপ্তিং দর্শয়তি তথেতি উৎসবেতি। উৎসবঃ পুত্রজন্ম আনন্দসন্তানঃ গর্ভাধানপুংসবনসীমন্তোন্নয়নানি। যজ্ঞো জ্যোতিষ্টোমাদিঃ। আদিশব্দাদুপনয়নাদিগ্রহণম্। বৃদ্ধিশ্রাদ্ধে প্রমাণমুক্ত্বা অন্বষ্টকায়াং তদাহ বিষ্ণুরিতি। সপত্নীকায় দানে প্রমাণান্তরমাশঙ্ক্য দূষয়তি যত্ত্বিতি। ভোজনসহভাবানুপপত্ত্যেতি। তথাচ ত্যক্তদ্রব্যস্য তদ্ভোগে চ ত্যাগোদ্দেশ্যতানিয়ম ইতি অগত্যা সহত্বং কল্পনীয়মিতি ভাবঃ। নিয়মে ব্যভিচারমাহ হিরণ্যদানাদাবিতি। ব্রাহ্মণমুদ্দিশ্য ক্রিয়মাণহিরণ্যাদিদানাৎ দম্পত্যোর্মধ্যগং ধনমিত্যনেন পত্ন্যা আত্মস্বত্বোদয়াদ্ভোগদর্শনেন ব্যভিচারাদিত্যর্থঃ। তথাচ যথা তত্র অনুদ্দেশ্যায়া আত্মপত্ন্যা ভোগস্তথা শ্রাদ্ধেঽপ্যনুদ্দেশ্যায়া মাতুর্ভোগবাধাভাব ইতি ভাবঃ। সপত্নীকায়া ইতি বাক্যং সর্ব্বথৈব দুষ্টমিত্যাহ কিঞ্চেতি বাক্যং স্যাদিতি। তথাচাস্য বচনস্য ভোজনসহভাব এব তাৎপর্য্যং ন

ইতি তদনাকরং সাকরত্বেঽপি বিধৌ মন্ত্রে চ নিরপেক্ষ্য-দেবতাত্বাবগমাৎ ভোগ্যপদমধ্যাহার্য্যং বৃহস্পতিসমা-নার্থম্। কিঞ্চৈবং পত্ন্যরেব সহভাবঃ স্যান্ন পত্ন্যা ইতি প্রাগেবোক্তম্। নন্থ পিত্রাদীনাং প্রত্যেকং দেবতাত্বে কুশাসনগন্ধাদিদানান্নোৎসর্গেষু তন্ত্রতা ন স্যাৎ॥ ৩৭॥

ন হি দেবতাভেদে তন্ত্রমনুষ্ঠানং দৃষ্টং সম্ভবতি বা দেবতৈক্যে হি দধিপয়সোস্তন্ত্রমনুষ্ঠানং দৃষ্টং ঐন্দ্রং দধ্য-মাবাস্যায়াং ঐন্দ্রং পয়োঽমাবাস্যায়ামিতি। অত্র দেব-তাভেদেঽপি দ্রব্যৈক্যাৎ কুতো ন তন্ত্রমনুষ্ঠানং পিত্রে

ভু শ্রাদ্ধে তথাত্বমিতি ভাবঃ। অতএব পূর্ব্বোক্তা নিরপেক্ষদেবতাত্ববোধি-কাশ্চ শ্রুতিস্মৃতয়োঽপি সংগচ্ছন্তে ইতি। পত্ন্যাঃ সহত্বে প্রমাণান্তরমাশ-ঙ্কতে যদ্বিতি। অন্যত্রামাবস্যাদৌ দূষয়তি তদনাকরমিতি। বিধৌ পিতৃভ্যো দদ্যাদিত্যাদৌ। মন্ত্রে অসাবেতত্তে যজমানস্য পিত্রে ইত্যাদৌ। নিরপে-ক্ষেতি পত্নী নিরপেক্ষেত্যর্থঃ। প্রত্যেকদেবতাত্বে সিদ্ধান্তসিদ্ধতন্ত্রতানু-পপত্তিমাশঙ্কতে নন্বিতি। বহূদ্দেশেন সকৃদনুষ্ঠানং তন্ত্রতা বহুত্বঞ্চ কুত্রচিৎ কর্ম্মণাম্। যথা দর্শাখ্যযাগত্রয়মুদ্দেশ্য প্রযাজাদেঃ সকৃদনুষ্ঠানম্। কুত্রচিৎ ফলানাম্। যথা সংক্রান্ত্যাদিনানাস্নানফলান্যুদ্দেশ্য সকৃৎস্নানম্। কুত্রচিৎ ত্যাজ্যদ্রব্যাণাম্। যথেন্দ্রযাগস্থলে দধিপয়সোঃ সকৃত্ত্যাগানুষ্ঠানং কুত্রচি-দুদ্দেশ্যানাম্। যথা প্রত্যেকতর্পণাশক্তৌ দেবর্ষিপিতৃমনুষ্যাণাং সকৃদ-ঞ্জলিদানরূপতর্পণানুষ্ঠানম্। এবঞ্চাত্র বহূন্ পিত্রাদীনুদ্দিশ্য যদি সকৃ-ত্ত্যাগঃ ক্রিয়তে তদৈব তন্ত্রতা ঘটতে। সকৃত্ত্যাগশ্চাত্র ন সম্ভবতি অতস্ত-ন্ত্রতা ন স্যাদিত্যর্থঃ॥ ৩৭॥

অসম্ভবে হেতুমাহ ন হীতি। দেবপিত্রাদিবিভিন্নদেবতাকশ্রাদ্ধানাং নানাদেবতাকযাগানাং বা সকৃদনুষ্ঠানাদর্শনাৎ দৃষ্টং ন হীত্যর্থঃ। অন্যত্রা-দর্শনমাত্রেণ প্রমাণসিদ্ধস্য বস্তুনোঽন্যথাকরণাসম্ভবাদাহ সম্ভবতি বেতি।

পিতামহায় প্রপিতামহায় ইদমন্নং স্বধেতি তন্ত্রেণৈবোৎ-সর্গাদিবাক্যমস্তিতি চেন্ন প্রত্যেকং স্বধেত্যনুষঙ্গে অনু-ষঙ্গাধিকরণন্যায়াৎ বাক্যভেদে কথং তন্ত্রতেতি। অননু-ষঙ্গে চ সন্নিধানাৎ প্রপিতামহসম্বন্ধে পিত্রাদীনামুৎসর্গ-ক্রিয়ান্বয়ো ন স্যাৎ। সহিতদেবতাপক্ষেঽপি পিতৃপিতা-মহপ্রপিতামহেভ্য এতদন্নং স্বধেতি ঘটত এব তন্ত্রতেতি। অতএব জৈমিনিরাচার্য্যো দেবতাভেদে দ্রব্যৈক্যেঽপি ন তন্ত্রতাং ক্বচিদুক্তবান্। ন হ্যাজ্যদ্রব্যকানাং পঞ্চানাং প্রযাজাদীনামাঘারয়োরাজ্যভাগয়োরনুযাজাদীনাঞ্চ তন্ত্র-

ত্রয়মুদ্দেশ্য একাভিলাপস্যাসম্ভবাদিতি ভাবঃ। তদসম্ভবোঽগ্রে স্ফুটী-ভবিষ্যতি। সকৃত্তর্পণে তু আব্রহ্মস্তম্বপর্য্যন্তং জগতৃপ্যত্বিদং জপন্নিতি দেবলবচনোক্তৈকবাক্যরচনেতি। দেবতৈক্যে হীতি দেবতৈক্য এবে-ত্যর্থঃ। ঐন্দ্রং দধি ভবত্যমাবাস্যায়াং ঐন্দ্রং পয়ো ভবত্যমাবাস্যায়ামিত্যু-ক্তবিধিদ্বয়প্রাপ্তয়োর্দধিপয়সোস্তন্ত্রমনুষ্ঠানং দৃষ্টমিতি পূর্ব্বেণান্বয়ঃ। দেব-তাভেদেঽপীতি। যথা দ্রব্যভেদেঽপি দেবতৈক্যাৎ তন্ত্রতা তথা দেবতা-ভেদেঽপি দ্রব্যৈক্যাৎ তন্ত্রতায়াস্তুল্যন্যায়েন সম্ভবাদিতি ভাবঃ। এক-বাক্যাসম্ভবে দোষমুদ্ধরতি পিত্রে ইত্যাদি দূষয়তি চেন্নেতি উক্ত-বাক্যে স্বধানুষঙ্গোঽস্তি ন বা আদ্যে প্রত্যেকমিতি একস্যৈব স্বধাপ-দস্য পিত্রে ইত্যনেনান্বয়ে পুনরনুষঙ্গেন পিতামহায় প্রপিতামহায়েতি দ্বাভ্যাং প্রত্যেকমন্বয়ে পিত্রে স্বধা পিতামহায় স্বধা ইতি প্রত্যেক-বাক্য সমাপ্তৌ বাক্যত্রয়েণৈবোৎসর্গাৎ কথং তন্ত্রতেত্যর্থঃ। অনুষঙ্গা-ধিকরণন্যায়াদিতি তদধিকরণে হি জনিতৈকবাক্যার্থবোধকপদস্য বাক্যান্তরে পুনরনুসন্ধানমনুষঙ্গ ইত্যুক্তের্বাক্যভেদ এবানুষঙ্গসম্ভবা-দিতি ভাবঃ। দ্বিতীয়ং দূষয়তি অননুষঙ্গে চেতি সন্নিধানাদাসত্তিতঃ। পিত্রাদীনাৎ পিতৃপিতামহয়োঃ সহিতদেবতাপক্ষে ইতি তথাচ

তেষ্যতে। যদি চ স্যাৎ তদা ত্রয়োদশাহুতিসংখ্যা বিলুপ্যেত। তত্র কশ্চিদাহ কুশাসনগন্ধাদিদানান্নোৎসর্গেষু তন্ত্রতা নাস্ত্যেব তদসৎ। অর্ঘ্যেঽক্ষয্যোদকে চৈব পিণ্ডদানেঽবনেজনে। তন্ত্রতা বিনিবৃত্তিঃ স্যাৎ স্বধাবাচন এব চ॥ ইতি ছন্দোগপরিশিষ্টবচনেঽর্ঘ্যাদৌ বিশেষোপাদানাৎ অন্যত্র তন্ত্রতাপ্রতীতেঃ ॥ ৩৮ ॥

উচ্যতে। এবং মা ভবতু নৈয়ায়িকী তন্ত্রতা বাচনিক্যেব সা ভবিষ্যতি। কিঞ্চ যদি ন্যায়তোঽপ্রাপ্তা তন্ত্রতা কথং বচনেন নিষিধ্যেত। কিঞ্চাসতি বাধকে লাঘবমেব

তন্ত্রতাবিধ্যনুরোধাৎ সহিতানামেব দেবতাত্বমঙ্গীকার্য্যমিতি ভাবঃ। ঘটত এব তন্ত্রতেতি। সাহিত্যেনোপস্থিতানাং ত্রয়াণামেকদৈব স্বধাস্বয়েনানুষঙ্গাভাবাৎ বাক্যভেদাভাবাদিতি ভাবঃ। অতএবেতি উক্তক্রমেণ বাক্যভেদাৎ তন্ত্রতাসম্ভবাদেবেত্যর্থঃ। দেবতাভেদে দ্রব্যৈক্যাৎ তন্ত্রতাভ্যুপগমে বাধকমাহ ন হীতি। তথাচ উক্তানাং প্রযাজাদীনাং সর্ব্বেষামেব আজ্যদ্রব্যকত্বেন তন্ত্রেণৈব হোমঃ স্যাদিতি ভাবঃ। ইষ্টাপত্তৌ দোষমাহ যদি চেতি যদি চেষ্যতে তন্ত্রতা তদৈকয়া আহুত্যা প্রযাজাদিসর্ব্বযাগসিদ্ধৌ ত্রয়োদশাহুতিসংখ্যালোপঃ স্যাদিতি। ত্রয়োদশাহুতয়শ্চ প্রযাজা ইডো যজতি ইত্যাদয়ঃ পঞ্চ আঘারদ্বয়ং আজ্যভাগদ্বয়ং অনুযাজাশ্চত্বার ইতি মিলিত্বা ত্রয়োদশ। নাস্ত্যেবেতি। তথাচোক্তরীত্যা বাক্যত্রয়েণৈব কুশাসনাদ্যুৎসর্গ ইতি ভাবঃ॥ ৩৮ ॥

দেবতাভেদেঽপি তন্ত্রতামুপপাদয়তি উচ্যতে ইতি। নৈয়ায়িকী ন্যায়সিদ্ধা বাচনিকী উক্তচ্ছন্দোগপরিশিষ্টবচনবোধিতা। নন্বয়ং যদি অর্ঘ্যাদ্যতিরিক্তে তন্ত্রতা স্যাদিতি পর্য্যুদাসঃ স্যাৎ তদৈব তন্ত্রতা বাচনিকী স্যাৎ স এব ন সম্ভবতি সামান্যশাস্ত্রপ্রাপ্ত্যভাবাৎ কিন্তু লাঘবেনৈব প্রাপ্তিঃ। তথাচ রাগপ্রাপ্ততয়া নিষেধ এব ইতি কথং তন্ত্রতা

তন্ত্রতান্যায়ে যুক্তিঃ সা চেহাপ্যস্তি তুভ্যমিতি পদেন প্রকৃতবাচিনা নিরপেক্ষাণামেব পিত্রাদীনাং সম্বোধনান্ত-পদোপনীতানাং তন্ত্রেণোদ্দেশসম্ভবাৎ তন্ত্রেণৈব স্বধা-

---

বাচনিকীত্যুচ্যতে ইত্যত আহ কিঞ্চেতি। তথাচ নিষেধস্য প্রাপ্ত্যুপ-জীবিতয়া শাস্ত্রপ্রাপ্ত্যভাবাৎ ন্যায়েনৈব তৎপ্রাপ্তির্বাচ্যা স চ ন্যায়ঃ অর্ঘ্যাদাবিব কুশাসনদানাদাবপ্যবিশিষ্ট ইতি নৈয়ায়িক্যে বাত্র তন্ত্রতা ইতি ভাবঃ। নন্বু ন্যায়ো যুক্তিঃ সা চেহ কীদৃশী ইত্যত্রাহ কিঞ্চেতি অসতীতি। কালদেশকর্তৃভেদাদির্বাধকঃ তদভাবে সতি লাঘবমনুষ্ঠা-নৈকরূপং তন্ত্রতান্যায়ে তন্ত্রানুষ্ঠানে হেতুভূতা যুক্তিরিত্যর্থঃ। ইহ কুশাসনদানাদৌ অপিকারাদর্ঘ্যাদিদানে চ। নন্বনুষঙ্গাননুষঙ্গাভ্যাং বাক্যরচনয়োর্দূষিতত্বাৎ অভিলাপৈক্যাসম্ভবস্যৈব বাধকস্য সত্ত্বা-ন্ন্যায়াসত্ত্বাৎ কথং তন্ত্রতামত্র ঘটয়সীত্যত্রাহ তুভ্যমিতীতি। প্রকৃত-বাচিনা যদ্রূপেণ যৎ প্রক্রান্তং তদ্রূপেণ তদ্বাচিনা তুভ্যমিতি পদেন পিত্রাদীনাং নিরপেক্ষাণাং প্রত্যেকরূপাবচ্ছিন্নানাং সম্বোধনপদো-পস্থিতানাং তন্ত্রেণ যুগপদুদ্দেশসম্ভবাদুপস্থিতিসম্ভবাৎ তন্ত্রেণৈব একদৈব স্বধান্বয়াৎ সা চ ইহাপ্যস্তীতি পূর্ব্বেণান্বিতোঽর্থঃ। তথাত্র অমুকগোত্র পিতরমুকদেবশর্ম্মন্ তথাবিধ পিতামহ দেবশর্ম্মন্ প্রপিতা-মহ দেবশর্ম্মন্ ইদং তুভ্যং স্বধেতি অভিলাপেনোৎসর্গঃ। অত্র ত্রয়াণা-মেব তুভ্যমিতি পদেন যুগপদুপস্থিতানামাসত্তিতৌল্যাৎ একদৈব স্বধান্বয়েনানুষঙ্গবিরহাচ্চ পূর্ব্বোক্তদোষবিরহাৎ তেনাভিলাপৈক্যা-সম্ভবরূপবাধকবিরহাদ্যুক্তেরত্র সত্ত্বাৎ তন্ত্রতা সুঘটৈবেতি ভাবঃ। নন্বেবং প্রযাজাদাবপ্যুক্তক্রমেণৈব বাক্যরচনয়া সর্ব্বানুদ্দেশ্য তন্ত্রে-ণৈকাহুতিঃ স্যাদত আহ প্রযাজাদৌ ত্বিতি রচনাভাবাদিতি। নন্বু যথা নানানিমিত্তকগঙ্গাস্নানানাং তন্ত্রত্বে তন্নানানিমিত্ততত্তৎফলকাম-ঘটিতবাক্যরচনাভাবে সতি লাঘবাৎ কল্প্যতে তথেহাপি সা কল্প্যতামিতি চেন্ন তত্র ত্রয়োদশাহুতিসংখ্যাভিধানেনার্থতঃ প্রত্যেক-

সম্বন্ধাৎ প্রযাজাদৌ তু নৈতাদৃশী বাক্যরচনা বচনাভাবাৎ অত্র মুনিভিরেব সা কৃতা। যথা ব্রহ্মপুরাণে।

---

বাক্যরচনায়া অপ্যভিহিতত্বেন তদ্বিরোধাৎ তৎকল্পনাপ্রশক্ত্যভাবাৎ সা বাক্যরচনা কৃতা প্রতিপাদিতা। পিতৃভ্যশ্চেতি। অত্রামুকামুকগোত্রৈতৎ তুভ্যমন্নং স্বধা ইত্যভিলপ্য পিতৃভ্যো দদ্যাদিত্যর্থপ্রতিপাদনাৎ অমুকামুকগোত্রেতি চ সামান্যমুখেন প্রত্যেকরূপেণ ত্রিতয়নির্দ্দেশবোধনাচ্চ উক্তৈব বাক্যরচনা প্রতিপাদিতেতি ভাবঃ। অত্রামুকামুকগোত্রেত্যনেন ত্রয়াণাং প্রত্যেকরূপেণ প্রক্রান্তত্বেন তুভ্যমিত্যনেন ত্রয়াণাং যুগপদুপস্থিতিঃ। পিতৃভ্য ইত্যনেন চ ত্রয়াণাং যুগপৎ স্বধান্বয়শ্চ প্রতিপাদিত ইতি বোধ্যম্। নম্বত্র বহুবচনদর্শনাৎ সাহিত্যেন দেবতাত্বভ্রমঃ কার্য্যঃ দেবতাসাহিত্যস্য বিস্তরেণ প্রাগেব দূষিতত্বাৎ অমুকামুকগোত্রেতি চ সম্বোধনান্তবাক্যরচনামাত্রতাৎপর্য্যকং অন্যথা ক্রমপরত্বে নায়ঃ পরং গোত্রাভিলাপাপত্তেঃ। এবঞ্চ কুশাসনদানান্নোৎসর্গাদৌ তন্ত্রতাসিদ্ধৌ অসাবেতত্তে যজমানস্য পিত্রে ইত্যাদিকং অর্ঘ্যপিণ্ডাদিদানপরমেবেতি বোধ্যম্। নন্বেবং সতি কথং তুভ্যমিত্যেকবচনং বহূনাং প্রতিপাদ্যত্বেন বহুবচনস্যৈব ঔচিত্যাদিতি চেৎ ন্যায়মতমেবৈতৎ নৈয়ায়িকৈর্বহুষু বহুবচনাঙ্গীকারাৎ। মীমাংসকনয়ে তু নৈতদ্বাধকং তৈঃ সাহিত্যপ্রতীতিস্থল এব বহুবচনাভ্যুপগমাৎ সাহিত্যে দ্বিবচনবহুবচনে দ্বন্দ্বসমাসো বা ইত্যনুশাসনাৎ। অত্র শ্রীপতিবাচস্পতিমিশ্রপ্রভৃতিভিরন্নদানাদৌ তন্ত্রতা নাভিহিতা। অর্ঘ্যেঽক্ষয্যোদকে ইতি বচনঞ্চানাকরমিত্যুক্তং তন্ন তদ্বচনস্য কামধেনুগ্রন্থাদ্যুপনিবন্ধত্বেন সাকরত্বাৎ এতদ্বচনেঽর্ঘ্যাদিবিশেষনির্দ্দেশবলেনৈব তদিতরত্রান্নোৎসর্গাদৌ তন্ত্রতাসিদ্ধেরিতি। অনিরুদ্ধভট্টেন তু গন্ধাদিদানে তন্ত্রতা নোক্তা। তস্যায়মভিপ্রায়ঃ তিলোদকে দদাতি পিতুর্নাম গৃহীত্বা অসাবেতত্তে তিলোদকং যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধা এবং ইতরয়োরিতি সূত্রেণ প্রত্যেকং তিলোদক-

পিতৃভ্যশ্চ ততো দদ্যাদন্নমামন্ত্রণে ন তু। অমুকামুক-গোত্রৈতত্ত্ব তুভ্যমন্নং স্বধা নমঃ॥ ইত্যাদি বক্ষ্যতে ॥৩৯॥

নন্বু জনকাদীনাং ন শ্রাদ্ধে দেবতাত্বং কিন্তু বসুরুদ্রাদিত্যানাং পিতৃপিতামহপ্রপিতামহপদোপনীতানাম্। যথা মনুঃ। বসূন্ বদন্তি তু পিতৃন্ রুদ্রাংশ্চৈব পিতামহান্। প্রপিতামহাংস্তথাদিত্যান্ শ্রুতিরেষা সনাতনী॥ দেবলঃ। বসবঃ পিতরো জ্ঞেয়া রুদ্রা জ্ঞেয়াঃ পিতামহাঃ। প্রপিতামহাস্তথাদিত্যাঃ শ্রুতিরেষা সনাতনী। যাজ্ঞবল্ক্যঃ।

---

দানমুক্ত্বাঽনন্তরোক্তেন তথা গন্ধানিতি সূত্রান্তরেণ গন্ধাদিদানেঽপি তথাশব্দেন তন্ত্রতাভাববিধানাদিতি। তন্ন তথা গন্ধানিতি তথাশব্দেন যে চাত্রেতি মন্ত্রস্যৈবাতিদেশনাং ন তু তন্ত্রতাভাবস্যাপি তস্যাঃ প্রমাণ-সিদ্ধতয়া তদ্বাধাযোগাদিতি। অথৈবং মাতামহাদীনামপি পিত্রাদিভিঃ সহ তন্ত্রেণৈকমেব শ্রাদ্ধং স্যাৎ পিতৃপিতামহ প্রপিতামহ মাতামহ প্রমাতামহ বৃদ্ধপ্রমাতামহ তুভ্যং স্বধেতি একবাক্যসম্ভবাদিতি চেন্ন। মাতামহানামপ্যেবং তন্ত্রং বা বৈশ্বদেবিকম্। তথা। মাতৃণামগ্রতঃ কৃত্বা পিতৃণাং তদনন্তরম্। ততো মাতামহানাঞ্চ বৃদ্ধৌ শ্রাদ্ধত্রয়ং ভবে-দিত্যাদিনা পৃথক্ মাতামহশ্রাদ্ধপ্রতিপাদনাৎ তন্ত্রতাভাবসিদ্ধেঃ। তন্ত্রত্বে হি ত্যাগস্যৈক্যাৎ পৃথক্ শ্রাদ্ধানুপপত্তেঃ। তন্ত্রং বা বৈশ্বদেবি-কমিত্যনেন যদ্‌যদঙ্গানাং তন্ত্রত্বে বাধকাভাবস্তেষাং তন্ত্রত্বং প্রতি-পাদিতম্। অতএবাহ নাগ্নৌকরণান্নবিকরণনমস্কারবিসর্জ্জনাদীনাং তন্ত্রতা গৌড়মৈথিলাভ্যামুক্তা সংগচ্ছতে ইতি॥ ৩৯॥

জনকাদীনাং জনকাদিপ্রকাশকমন্ত্রাণাং অভিলাপরূপাণাং বসুরুদ্রা-দিত্যানাং তৎপ্রকাশকমন্ত্রাণাং পিতৃপিতামহপ্রপিতামহপদোপনীতানাং ইতি নিরূঢ়লক্ষণয়েতি শেষঃ। মনুদেবলবচনাভ্যাং বস্বাদিষু পিত্রাদি-পদপ্রয়োগসিদ্ধাবপি ন বস্বাদীনাং শ্রাদ্ধদেবতাত্বসিদ্ধিরত আহ যাজ্ঞবল্ক্য

বস্বুরুদ্রাদিতিসুতাঃ পিতরঃ শ্রাদ্ধদেবতাঃ। প্রীণয়ন্তি মনুষ্যাণাং পিতৄন্ শ্রাদ্ধেন তর্পিতাঃ॥ পৈঠীনসিঃ। ক এতে পিতরো নাম যেভ্যো দত্তমথাক্ষয়ম্। বসবঃ পিতরো জ্ঞেয়া রুদ্রা জ্ঞেয়াঃ পিতামহাঃ। প্রপিতামহাস্তথাদিত্যাঃ তেভ্যো দত্তমথাক্ষয়ম্। উচ্যতে। অসাবেতত্ত ইতি যজমানস্য পিত্রে অসাবেতত্ত ইতি যজমানস্য পিতামহায় অসাবেতত্ত ইতি যজমানস্য প্রপিতামহায়েত্যাদিশ্রুতৌ স্বজনকাদীনাং দেবতাত্বাবগমবিরোধাৎ মন্বাদিস্মৃতীনামন্যথাবর্ণনং কার্য্যং উক্তং হি বিরোধাধিকরণে শ্রুত্যা স্মৃতির্ব্বাধ্যতে। তথা জাবালঃ। শ্রুতিস্মৃতিবিরোধে তু শ্রুতিরেব গরীয়সী। অবিরোধে সদা কার্য্যং স্মার্ত্তং বৈদিকবৎ সদা॥ তথা স্মৃতিভ্যো বহুশো নামগোত্রসম্বন্ধকীর্ত্তনবলাৎ স্বজনকাদীনাং দেবতাত্বমবগম্যতে। যথা ব্রহ্মপুরাণম্। অমুকামুকগোত্রৈতৎ তুভ্যমন্নং স্বধা নমঃ॥ ইতি। ছন্দোগপরিশিষ্টম্। গোত্রনামভির্ামন্ত্র্য

---

ইতি। ননু বস্বাদীনাং শ্রাদ্ধদেবতাত্বে মৃতানাং শ্রাদ্ধাতৃপ্তিঃ শাস্ত্রোক্তা কথমুপপদ্যতামতস্তদুপপাদয়তি প্রীণয়ন্তীতি তথাচ শ্রাদ্ধস্য বস্বাদিপ্রীতিজননদ্বারা মৃতপ্রীতিজনকত্বমিতি ভাবঃ। জনকাদীনামিতি। বস্বাদীনাং যজমানপিতৃপিতামহত্বাদিবাধেন পিত্রে ইত্যাদি চতুর্থ্যা যজমানপিত্রাদীনামেব নির্দ্দিষ্টত্বাদিতি ভাবঃ। ননূক্তমন্বাদিস্মৃতিবিরোধাৎ শ্রুতেঃ কথং নান্যথাবর্ণনং অত আহ উক্তং হীতি ঔডুম্বরীং স্পৃষ্ট্বা উদ্গায়তি শ্রুত্যা সহ সর্ব্বা ঔডুম্বরী বেষ্টয়িতব্যেতি স্মৃতেঃ সর্ব্বাবচ্ছেদেন বেষ্টনে স্পর্শাসম্ভবাদ্বিরোধেন তৎপরিহারার্থং শ্রুতের্বলবত্ত্বাৎ স্মৃতাবেব সর্ব্বপদস্য সঙ্কোচ ইতি যত্র প্রতিপাদিতং তদ্বিরোধাধিকরণং তত্র শ্রুত্যা

পিতুর্নর্ঘ্যং প্রদাপয়েৎ। ধ্রিয়মাণে তু পিতরি পূর্ব্বেষামেব নির্ব্বপেৎ ॥ বিষ্ণুঃ। যস্য পিতা প্রেতঃ স্যাৎ স পিত্রে পিণ্ডং নিধায় পিতামহাৎ পরং দ্বাভ্যাং দদ্যাৎ। দেবলঃ। প্রেতানুদ্দিশ্য যৎ কর্ম্ম ক্রিয়তে মানুষৈরিহ। তুষ্যন্তি পিতরস্তেন ন প্রেতাঃ পিতরঃ স্মৃতাঃ ॥ ৪০ ॥

পিতৃপরাধীনাঃ প্রেতা ইত্যর্থঃ। তদেবমাদিশ্রুতিস্মৃতিবিরোধাৎ বস্বাদিপদানাং মুখ্যার্থত্বে পিত্রাদিপদৈস্তুল্যাধিকরণত্বানুপপত্তেঃ। গৌণং পিত্রাদিষু বস্বাদিপদং বস্বাদিরূপতয়া পিতৃণাং ধ্যানাতিদেশার্থং বস্বাদিরূপ-

---

স্মৃতির্বাধ্যতে ইত্যুক্তমিত্যর্থঃ বলাবলভাবে চ বীজং শ্রুতেঃ স্বতন্ত্রপ্রমাণত্বং স্মৃতেস্তু শ্রুতিপ্রামাণ্যাধীনপ্রামাণ্যমিতি। ননু তথাপি স্মৃত্যনুমিতশ্রুত্যা সহ বিরোধঃ কথং সমাধেয়ঃ প্রত্যক্ষশ্রুতিবিরোধেন ততঃ শ্রুত্যনুমানস্যৈবাসম্ভবাৎ শ্রুত্যবিরুদ্ধস্মৃতেরেব শ্রুতিলিঙ্গত্বাৎ। ঔডুম্বরী তাম্রময়ী প্রতিমাশ্রুতের্বলবত্ত্বং বচনেনাপি সাধয়তি তথেতি। ব্রহ্মপুরাণচ্ছন্দোগপরিশিষ্টবচনয়োর্বস্বাদীনাং গোত্রাভাবাৎ স্বজনকাদীনাং দেবতাত্বাবগমঃ। মনুবচনে পূর্ব্বেষামিত্যনেন পিতৃপূর্ব্বেষাং পিতামহাদীনাং প্রতিপাদনাৎ। বিষ্ণুবচনে চ পিতামহাৎ পরং দ্বাভ্যামিত্যনেন প্রপিতামহতৎপিত্রোঃ প্রতিপাদনাৎ। দেবলবচনে চ প্রেতানুদ্দিশ্য ইত্যভিধানাৎ তেষাং তদবগম ইতি ॥ ৪০ ॥

ন প্রেতাঃ পিতরঃ স্মৃতা ইত্যস্য তাৎপর্য্যার্থমাহ পিতৃপরাধীনা ইতি। যতঃ প্রেতা ন পিতর ন স্বাতন্ত্র্যেণ শ্রাদ্ধোদ্দেশ্যাঃ অতএব ন সাক্ষাৎ শ্রাদ্ধজনিততৃপ্তিভাজঃ কিন্তু বস্বাদ্যাকারতয়া ধ্যাতা এব তথেতি শ্রাদ্ধজনিতবস্বাদিপ্রীত্যধীনপ্রীতিভাজঃ অতঃ পিতৃপরাধীনা ইত্যর্থঃ। তুল্যাধিকরণত্বানুপপত্তেরিতি। বস্বাদীনাং পিত্রাদিভ্যো ভিন্নতয়া বস্বাদিপদপিত্রাদিপদানাং ভিন্নরূপেণ একধর্ম্মিবোধকত্বরূপশাব্দ-

তয়া ধ্যানে প্রীতা বস্বাদয়ঃ পিতৄনপি প্রীণয়ন্তীতি যুক্তম্।
অতএব পৈঠীনসিঃ। য এবং বিদ্বান্ পিতৄন্ যজত ইতি
বস্বাদ্যাকারতয়া ধ্যাতানাং জনকাদীনাং দেবতাত্বাৎ
শ্রাদ্ধদেবতাত্বব্যপদেশঃ। ইন্দ্রাকারতয়া ধ্যানে মন্ত্রে
ইব ইন্দ্রাদিব্যপদেশ ইতি সর্ব্বমনাকুলম্ ॥ ৪১॥

অথ শ্রাদ্ধভেদাঃ। তত্র বিশ্বামিত্রঃ। নিত্যং নৈমিত্তিকং
কাম্যং বৃদ্ধিশ্রাদ্ধং সপিণ্ডনম্। পার্ব্বণঞ্চেতি বিজ্ঞেয়ং
গোষ্ঠ্যাং শুদ্ধ্যর্থমষ্টমম্ ॥ কর্ম্মাঙ্গং নবমং প্রোক্তং
দৈবিকং দশমং স্মৃতম্। যাত্রাস্বেকাদশং প্রোক্তং পুষ্ট্য-

---

সামানাধিকরণ্যানুপপত্তেরিত্যর্থঃ। গৌণমিতি বসূন্ বদন্তি হি
পিতৄনিত্যাদিবচনেষু বস্বাদিপদং বস্বাদ্যাকারত্বেন রূপেণ পিত্রাদিষু
গৌণমিত্যর্থঃ। তৎপ্রয়োজনমাহ বস্বাদিরূপতয়েতি বস্বাদ্যাভিন্নত্বে-
নেত্যর্থঃ ন তু প্রসন্নবদনাঃ সৌম্যা ইত্যাদ্যুক্তপ্রসন্নবদনত্বাদিবস্বাদিধর্ম্ম-
প্রকারেণ। তথাত্বে বস্বাদীনাং ধ্যানবিষয়তয়া তেষাং প্রীত্যনুপপত্তেঃ।
ধ্যানাতিদেশার্থং ত্যাগাৎ পূর্ব্বং ধ্যানপ্রতিপাদনার্থম্। যাজ্ঞবল্ক্যবচন-
স্যোপপত্তিমাহ বস্বাদিরূপতয়া ধ্যানে ইতি। য এবমিতি পিতৄন্
এবং জানন্ বস্বাদিত্বেন জানন্ যজতে ইত্যর্থঃ। নন্বেবং বস্বাদীনাং
শ্রাদ্ধানুদ্দেশ্যত্বে কথং তেষাং শ্রাদ্ধদেবতাত্বব্যপদেশঃ অত আহ
বস্বাদ্যাকারতয়েতি। জনকাদীনাং পিত্রাদিমন্ত্রাণাং শ্রাদ্ধদেবতাত্বব্যপ-
দেশঃ বস্বাদীনামিতি শেষঃ। অত্র দৃষ্টান্তমাহ ইন্দ্রাকারতয়েতি। মন্ত্র
ইবেত্যত্র মন্ত্রপদং নিমিত্তসপ্তম্যন্তং তথাচ ইন্দ্রাকারতয়া ধ্যানং যস্য
তাদৃশমন্ত্রনিমিত্তং ইন্দ্রাদিব্যপদেশঃ যাগে দেবতাব্যপদেশ ইত্যর্থঃ ॥৪১॥

অথ লক্ষণস্বরূপাভ্যাং শ্রাদ্ধনিরূপণানন্তরং শ্রাদ্ধভেদা উচ্যন্তে
ইতি শেষঃ। এতচ্চ উক্তদ্বাদশবিধশ্রাদ্ধঞ্চ ভবিষ্যপুরাণে প্রোক্তং
বিবৃতমিত্যর্থঃ। অহন্যহনীতি তেন অহরহঃ ক্রিয়মাণশ্রাদ্ধত্বং বিভা-

র্থং দ্বাদশং স্মৃতম্ ॥ এতদ্ভবিষ্যপুরাণে বিবৃতং প্রোক্তম্। যথা ভবিষ্যে। অহন্যহনি যচ্ছ্রাদ্ধং তন্নিত্যমভিধীয়তে। বৈশ্বদেববিহীনং তদশক্তাবুদকেন তু ॥ একোদ্দিষ্টন্তু যচ্ছ্রাদ্ধং তন্নৈমিত্তিকমুচ্যতে। তদপ্যদৈবং কর্ত্তব্যমেযুগ্মান্ নাশয়েদ্দ্বিজান্ ॥ কাময় তু হিতং কাম্যমভিপ্রেতার্থসিদ্ধয়ে। পার্ব্বণেন বিধানেন তদপ্যুক্তং খগাধিপ ॥ বৃদ্ধৌ যৎ ক্রিয়তে শ্রাদ্ধং বৃদ্ধিশ্রাদ্ধং তদুচ্যতে। সব্যং প্রদক্ষিণং কার্য্যং পূর্ব্বাহ্ণে তূপবীতিনা ॥ গন্ধোদকতিলৈর্যুক্তং কুর্য্যাৎ পাত্রচতুষ্টয়ম্। অর্ঘ্যার্থং পিতৃপাত্রেষু প্রেতপাত্রং প্রসেচয়েৎ ॥ যে সমানা ইতি দ্বাভ্যামেতজ্জ্ঞেয়ং সপিণ্ডনম্। নিত্যেন তুল্যং শেষং স্যাৎ একোদ্দিষ্টং স্ত্রিয়া অপি ॥ অমাবস্যাং যৎ ক্রিয়তে তৎ পার্ব্বণমুদাহৃতম্। ক্রিয়তে বা পর্ব্বণি যৎ তৎ পার্ব্বণমিতি স্থিতিঃ ॥ গোষ্ঠ্যাং যৎ ক্রিয়তে শ্রাদ্ধং গোষ্ঠীশ্রাদ্ধং তদুচ্যতে। বহূনাং বিদুষাং সম্পৎসুখার্থং পিতৃতৃপ্তয়ে ॥ ক্রিয়তে শুদ্ধয়ে যৎ তু ব্রাহ্মণানান্তু ভোজনম্। শুদ্ধ্যর্থমিতি তৎ প্রোক্তং বৈনতেয় মনীষিভিঃ ॥ নিষেককালে সোমে চ সীমন্তোন্নয়নে তথা। জ্ঞেয়ং পুংসবনেচৈব শ্রাদ্ধং কর্ম্মাঙ্গমেব চ ॥ দেবানুদ্দিশ্য যচ্ছ্রাদ্ধং তদ্দৈ-

---

জকোপাধিঃ তদ্রূপেণ চ নিত্যপদং পরিভাষিতং পার্ব্বণানাঞ্চ তথাত্বাৎ তেষাং পৃথগ্বিভাগ ইতি একোদ্দিষ্টন্তু যচ্ছ্রাদ্ধমিত্যত্র মরণনিরূপ্যতিথিকর্ত্তব্যত্বে সতি সপিণ্ডীকরণভিন্নত্বং বিভাজকোপাধিঃ। তেন আদ্যষাণ্মাসিকবিকৃতপার্ব্বণশ্রাদ্ধানাং সংগ্রহঃ। তথা সপিণ্ডীকরণস্য

বিকমিহোচ্যতে। হবিষ্যেণ বিধানেন সপ্তম্যাদিষু যত্নতঃ॥ গচ্ছন্ দেশান্তরং যৎ তু শ্রাদ্ধং কুর্য্যাচ্চ সর্পিষা। যাত্রার্থমিতি তৎ প্রোক্তং প্রবেশে চ ন সংশয়ঃ॥ শরীরোপচয়ে শ্রাদ্ধমর্থোপচয় এব চ। পুষ্ট্যর্থমেতদ্বিজ্ঞেয়মৌপচায়িকমেব চ॥ কামায় তু হিতমিত্যন্বয়প্রদর্শনমুখেন কাম্যশব্দার্থো নিরুক্তঃ॥ ৪২॥

সর্ব্বেষাং শ্রাদ্ধানাং পিতৃপ্রীতিফলত্বাৎ কাম্যতা স্যাদিত্যাহ অভিপ্রেতার্থসিদ্ধয়ে ইতি অভিপ্রেতং স্বগতত্বেন ধনপুত্রাদিলক্ষণং তৎসিদ্ধয়ে তিথিশ্রাদ্ধাদি। এতেনার্থবাদিকপিতৃ প্রীতিফলত্বাৎ বিষুবাদিশ্রাদ্ধানামপি

পৃথগ্বিভাগশ্চ সংগচ্ছতে। উক্তবচনানামস্পষ্টার্থভাগান্ ক্রমেণ চ ধৃত্বা ব্যাচষ্টে কামায় তু হিতমিত্যাদিনা। অন্বয়প্রদর্শনমুখেনেতি কামতদ্ধিতপদার্থয়োরন্বয়প্রদর্শনমুখেন কাম্যশব্দস্য যোগার্থো নিরুক্ত ইত্যর্থঃ। তেন ফলজনকশ্রাদ্ধং কাম্যমিতি প্রতিপন্নং কাম্যতা স্যাদিতি তথাচ ফলজনকশ্রাদ্ধত্বস্য শ্রাদ্ধত্বব্যাপকতয়া ন শ্রাদ্ধান্তরবিভাজকোপাধিত্বসম্ভব ইতি ভাবঃ॥ ৪২॥

স্বগতত্বেনেতি। তথাচ স্বগতফলকামনাক্রিয়মাণশ্রাদ্ধত্বং বিভাজকোপাধিঃ তদ্রূপেণৈবাত্র কাম্যপদং নিরূঢ়মিতি নোক্তদোষঃ। অন্যথা শ্রাদ্ধসামান্যস্যৈব। আয়ুঃ প্রজাং ধনং বিদ্যাং স্বর্গং মোক্ষং সুখানি চ। প্রযচ্ছন্তি তথা রাজ্যং প্রীতা নৃণাং পিতামহাঃ॥ ইত্যার্থবাদিকানুষঙ্গিকফলেন কাম্যত্বাদব্যাবর্ত্তকত্বাপত্তেঃ অভিপ্রেতার্থসিদ্ধয়ে ইত্যস্য বৈয়র্থ্যাপত্তেশ্চেতি ভাবঃ। তদেব শ্রাদ্ধং পরিচায়য়তি তিথিশ্রাদ্ধাদীতি। আদিনা নক্ষত্রশ্রাদ্ধাদীনাং পরিগ্রহঃ। এতেন স্বগতফলকামক্রিয়মাণশ্রাদ্ধস্যৈব কাম্যশব্দার্থত্বেন ধুরিলোচনাবিতি কাম্যে চ ধুরিলোচনাবিত্যনেন কাম্যশ্রাদ্ধেষু ধুরিলোচনয়োর্বিশ্বেদেবত্বে-

কাম্যত্বে তত্র ধুরিলোচনৌ স্যাতামিতি নিরস্তম্। অতএব কামায় তু হিতং কাম্যমিতি শাতাতপবচনং তিথিশ্রাদ্ধো-পক্রমে কামধেনুকৃতা লিখিতম্। বৃদ্ধিঃ পুত্রজন্মাদি যদ্ভূতং সন্নিমিত্তং নিত্যেনেতি পূর্ব্বপরিভাষিতনিত্যস্যা-ত্রাসম্ভবাদাবশ্যকং নিত্যং পার্ব্বণমেকোদ্দিষ্টঞ্চাভিমতম্। তেনায়মর্থঃ সপিণ্ডীকরণস্যোভয়াত্মকত্বাৎ পার্ব্বণাংশে পার্ব্বণেন তুল্যং একোদ্দিষ্টাংশে চৈকোদ্দিষ্টেন তুল্যং

---

নোক্তত্বাদিতি ভাবঃ। অতএবেতি যত এব তিথিশ্রাদ্ধাদেরেবোক্তরূপ-কাম্যত্বং অতএবেত্যর্থঃ। এবঞ্চ তিথিশ্রাদ্ধাদীনামপি স্বপিতৃতৃপ্ত্যাদি-ফলকামক্রিয়মাণত্বেন কাম্যত্বমিতি বোদ্ধব্যম্। বৃদ্ধিঃ পুত্রজন্মাদীতি। আদিনা গৃহপ্রবেশাদিপরিগ্রহঃ। যদহর্ব্বা বৃদ্ধিরাপদ্যেত ইতি গোভিল-বচনাদুপনয়নাদীনামপি সপিণ্ডীকরণাপকর্ষনিমিত্তত্বেন বক্ষ্যমাণত্বাত্তেষা-মপি বৃদ্ধিতয়া তদ্রূপবৃদ্ধেঃ প্রকৃতে বিবক্ষণে উপনয়নাদিস্থলীয়কর্ম্মাঙ্গ-শ্রাদ্ধানামপি তদন্তর্ভূতত্বাৎ কর্ম্মাঙ্গত্বেন তেষাং পৃথগ্বিভাগানুপপত্তিঃ স্যাৎ অতস্তদ্ব্যাবৃত্তিরূপেণ বৃদ্ধিপদার্থমনুগময়তি যদ্ভূতং সদিতি। তথাচ ভূতনিমিত্তকশ্রাদ্ধত্বং অত্র বিভাজকোপাধিঃ। পুত্রজন্মগৃহপ্রবেশা-দীনামনন্তরমেব শ্রাদ্ধস্য কর্ত্তব্যতাভূতানামেব তত্র নিমিত্তত্বাৎ। এতচ্চ শ্রাদ্ধং নৈমিত্তিকমেব ন তু কর্ম্মাঙ্গং পুত্রজন্মাদীনাং লৌকিকত্বেন অলৌকিকস্য শ্রাদ্ধস্য তত্রাঙ্গত্বাসম্ভবাৎ। অলৌকিকং লৌকিকে নাঙ্গ-মিতি দক্ষসূত্রবিরোধাৎ উপনয়নাদীনাস্তু নানিষ্ট্বা তু পিতৄন্ শ্রাদ্ধৈঃ কর্ম্ম বৈদিকমারভেদিত্যনেন ভাবিনামেব জ্ঞাতানাং নিমিত্তত্বং তেষু চ শ্রাদ্ধমঙ্গমেব তেষামপ্যলৌকিকত্বেন তদঙ্গতায়াং দক্ষসূত্রবিরোধ-রূপবাধকবিরহাৎ। এবং স্থিতে কর্ম্মাঙ্গত্বেন পৃথগ্বিভাগঃ সুপপন্ন এবেতি। ইত্থঞ্চ মঠপ্রতিষ্ঠাবৃষোৎসর্গাদিস্থলীয়শ্রাদ্ধানামপি কর্ম্মাঙ্গত্ব-মেব ন তূক্তবৃদ্ধিশ্রাদ্ধত্বং মঠপ্রতিষ্ঠাদীনামপ্যুক্তবচনাৎ ভাবিনামেব

শেষসঙ্গজাতং বোদ্ধব্যম্। একোদ্দিষ্টমিতি তদ্যোগাৎ সপিণ্ডীকরণং লক্ষয়তি। তেন সপিণ্ডীকরণং স্ত্রিয়া অপি কর্ত্তব্যমিতি প্রসঙ্গাৎ উক্তমিতি কল্পতরুঃ ॥ ৪৩ ॥

তন্ন এতৎ সপিণ্ডীকরণমেকোদ্দিষ্টং স্ত্রিয়া অপীতি যাজ্ঞবল্ক্যেন সপিণ্ডনৈকোদ্দিষ্টয়োঃ পৃথগুপাদানাৎ। তস্মাৎ শ্রাদ্ধেষু মধ্যে এতদেব শ্রাদ্ধদ্বয়ং স্ত্রিয়ৈব কর্ত্তব্যম্। স্ত্রিয়া চেতি নিয়মার্থমিদমুক্তম্। অমাবাস্যামিতি পর্ব্ব-

জ্ঞাতানাং নিমিত্ততয়াভূতনিমিত্তকশ্রাদ্ধত্ববিরহাৎ। অতস্তত্র বৃদ্ধিশ্রাদ্ধপদপ্রয়োগো গৌণ এব। তেনাভিলাপে পুত্রজন্মাদিনিমিত্তকশ্রাদ্ধস্য উপনয়নাদিনিমিত্তকশ্রাদ্ধস্য চ বৃদ্ধিশ্রাদ্ধত্বেনোল্লেখঃ। মঠপ্রতিষ্ঠাদৌ তু শ্রাদ্ধস্যাভ্যুদয়িকত্বেনেতি বিশেষ ইতি বোধ্যম্। পূর্ব্বপবিভাষিতস্যেতি অহন্যহনীত্যাদি নেত্যাদিঃ। আবশ্যকমিতি যদকরণে প্রত্যবায়স্তন্নিত্যমেবাত্র নিত্যপদেনোক্ত ইত্যর্থঃ। তদ্যোগাদিতি প্রেতাংশে একোদ্দিষ্টেতিকর্ত্তব্যতাযোগিত্বাদেকোদ্দিষ্টপদং সপিণ্ডীকরণং লক্ষয়তীত্যর্থঃ। তেনৈকোদ্দিষ্টপদস্য সপিণ্ডীকরণরূপত্বেন ॥ ৪৩ ॥

কল্পতরুব্যাখ্যানং দূষয়তি তন্নেতি পৃথগুপাদানাদিতি। তথাচ সপিণ্ডীকরণৈকোদ্দিষ্টয়োর্দ্বয়োরেবাত্র স্ত্রিয়াঃ কর্ত্তব্যত্বেন উক্তত্বাদেতদ্বিরোধেন সপিণ্ডীকরণমাত্রস্য স্ত্রিয়াঃ কর্ত্তব্যত্বব্যাখ্যানং তদুক্তং নেত্যর্থঃ। তথাচ ন লক্ষণা কিন্তূক্তযাজ্ঞবল্ক্যবচনৈকবাক্যত্বানুরোধেনাত্রাপিকারস্য সপিণ্ডীকরণসমুচ্চায়কস্য ভিন্নক্রমেণ যোজনং একোদ্দিষ্টমপি স্ত্রিয়া ইতি বচনার্থ ইতি ভাবঃ। ননু মৃতাহে প্রতিমাসং কুর্য্যাদিত্যাদিনা প্রতিসংবৎসরঞ্চৈব ইত্যাদিনা চ সামান্যতঃ স্ত্রীপুংগোচরতয়া শ্রাদ্ধদ্বয়ং প্রাপ্তমেব তৎ কিমর্থং উপাদানং পৃথক্ অত আহ তস্মাদিতি স্ত্রিয়ৈ কর্ত্তব্যং স্ত্রিয়া বেতি। তথাচ স্ত্রিয়া অপীতি কৃদ্যোগে ষষ্ঠী তস্যাশ্চ কর্তৃত্বাখ্য উদ্দেশ্যত্বাখ্যশ্চ সম্বন্ধরূপোঽর্থো দ্বিবিধ এব

**শব্দোঽত্র সংক্রান্ত্যাদিপরঃ। তথা বিষ্ণুপুরাণে। চতুর্দ্দশ্যষ্টমী চৈব অমাবাস্যাথ পূর্ণিমা। পর্ব্বাণ্যেতানি রাজেন্দ্র রবিসংক্রান্তিরেব চ ॥ ৪৪ ॥**

---

বিবক্ষিতঃ বচনান্তরসংবাদাদিতি ভাবঃ। নিয়মার্থমিতি এতদ্দ্বয়াতিরিক্তশ্রাদ্ধেষু পার্ব্বণাদিষু ন স্ত্রিয়াঃ কর্তৃতা ন বোদ্দেশ্যতেতি পরিসঙ্খ্যারূপনিয়মার্থমিত্যর্থঃ। অতএব নিয়মাতে ইত্যনেনেতি ব্যুৎপত্ত্যা নিয়মপদার্থস্যাগ্নযোগব্যবচ্ছেদাখ্যপরিসঙ্খ্যারূপতয়া অযোগব্যবচ্ছেদরূপতয়া চ দ্বৈবিধ্যং শ্রাদ্ধশেষভোজনপ্রকরণে পশ্চাদ্বিচারয়িষ্যতে। এতচ্চোদ্দেশ্যতানিয়মনং ছন্দোগযোষিৎপরং ন যোষিদ্ভ্যঃ পৃথগ্দদ্যাদিত্যনেনৈকমূলত্বাৎ। অন্যাসাং তু বৃদ্ধ্যন্বষ্টকাদাবপ্যুদ্দেশ্যতায়া বিশেষবচনেনাভিহিতত্বাৎ। ন চৈবং ছন্দোগযোষিতাং অমাবাস্যাদিমরণনিমিত্তকপার্ব্বণং সাগ্নিকৌরসক্ষেত্রজপুত্রকর্তৃকপার্ব্বণঞ্চ ন স্যাদিতি বাচ্যং সপিণ্ডীকরণপদেন সপিণ্ডীকরণান্তপ্রেতশ্রাদ্ধস্য একোদ্দিষ্টপদেন প্রাপ্তপিতৃলোকপ্রতিসাংবৎসরিকশ্রাদ্ধস্য উক্তত্বাৎ। বস্তুতঃ স্ত্রিয়া ইতি ষষ্ঠ্যাঃ কর্তৃত্বমাত্রমর্থঃ। তথাচ শ্রাদ্ধেষু মধ্যে সপিণ্ডীকরণং একোদ্দিষ্টঞ্চেতি শ্রাদ্ধদ্বয়মেব স্ত্রীকর্তৃকং ন শ্রাদ্ধান্তরমিতি ন কাপ্যনুপপত্তিরিতি বোধ্যম্। পর্ব্বশব্দোঽত্রেতি। অমাবাস্যায়াঃ পৃথগুপাদানাৎ পর্ব্বশব্দঃ সংক্রান্ত্যাদিমাত্রপর ইতি ভাবঃ। অত্র পর্ব্বক্রিয়মাণত্বেনৈবামাবাস্যাশ্রাদ্ধস্যাপি যৌগিকপার্ব্বণত্বসম্ভবে যত্তস্য পৃথগুপাদানং তদমাবাস্যাক্রিয়মাণশ্রাদ্ধত্বেন তত্র পার্ব্বণশব্দস্য রূঢ়িত্বার্থং তেন রূঢ্যর্থস্য শীঘ্রোপস্থিতিকতয়া পার্ব্বণেন বিধানেন দেয়মগ্নিমতা সদা ইত্যাদিনা যত্র যত্র পার্ব্বণধর্ম্মাতিদেশঃ তত্রামাবাস্যাশ্রাদ্ধধর্ম্মাতিদেশ এব লভ্যতে ন ত্বষ্টকাদিধর্ম্মাণাং শাকাদীনামিতি অষ্টকাশ্রাদ্ধাদীনাং প্রকৃতিপ্রত্যয়রূপনানাবয়বশক্ত্যধীনোপস্থিতিকতয়া বিলম্বিতত্বাৎ। ক্রিয়তে পর্ব্বণি যদিত্যনেন চ যোগবলাৎ সংক্রান্ত্যাদিশ্রাদ্ধেষ্বপি পার্ব্বণশব্দস্য মুখ্যত্বং প্রতিপাদিতং তেনামাবাস্যাশ্রাদ্ধে

এতেন যুগাদ্যাদিশ্রাদ্ধেষু পার্ব্বণশব্দো গৌণস্তদ্ধর্ম্মাতিদেশার্থঃ। গোষ্ঠ্যামিতি। গোষ্ঠী চাত্র শ্রাদ্ধকর্তৃসমুদায়ঃ। শ্রাদ্ধসম্পদা যৎ সুখং তদর্থং বহূনাং বিদুষাং কেনচিন্নিমিত্তেন যুগপৎ শ্রাদ্ধে কর্ত্তব্যে সমুপস্থিতে পৃথক্‌পাকাদ্যসম্পত্তৌ সম্ভূয় শ্রাদ্ধসামগ্রীসম্পাদনেন শ্রাদ্ধং যৎ ক্রিয়তে তদ্‌গোষ্ঠীশ্রাদ্ধমিতি শঙ্খধরঃ। ক্রিয়তে শুদ্ধয় ইতি প্রায়শ্চিত্তব্রতাচরণানন্তরং কর্ত্তব্যং

সংক্রান্ত্যাদিশ্রাদ্ধে চ সর্ব্বত্র পার্ব্বণশব্দোল্লেখঃ। অন্যত্র তু যুগাদ্যা নবান্নশ্রাদ্ধাদৌ পার্ব্বণবিধিনা ইত্যুল্লেখ্যমিতি বোধ্যম্ ॥ ৪৪ ॥

এতেনেতি। যুগাদ্যা শ্রাদ্ধকালশ্চ শুক্লপক্ষে পূর্ব্বেদ্যুঃ কৃষ্ণপক্ষে চাপরেদ্যুঃ শুক্লপক্ষস্য পূর্ব্বেদ্যুঃ শ্রাদ্ধং কুর্য্যাদ্বিচক্ষণ ইতি বক্ষ্যমাণবচনাৎ। সম্ভূয়েতি। একস্য সামগ্র্যভাবাৎ পৃথক্ পাকাসম্ভবেন একৈকেন একৈকদ্রব্যাহরণ ক্রমেণ পাকসামগ্রীসম্পাদনেন বহুভির্যৎ নানাশ্রাদ্ধং ক্রিয়তে তদ্‌গোষ্ঠীশ্রাদ্ধমিত্যর্থঃ। শঙ্খধর ইত্যস্বরসোদ্ভাবনং তদ্বীজন্তু শ্রাদ্ধং ক্রিয়তে ইত্যনেন শ্রাদ্ধস্যৈকত্বপ্রতিপাদনাৎ তদ্বিরোধ ইতি। অন্যে তু সর্ব্বেষাং পিতৄনুদ্দেশ্য একমেব শ্রাদ্ধমেকং ন ক্রিয়তে ইতি ব্যাচক্ষতে তদপ্যসৎ একস্য সর্ব্বেষাং পিতৃশ্রাদ্ধেঽনধিকারাৎ তাদৃশাভিলাপস্য দুষ্করত্বাৎ নানাপুরুষীয়নানাপিত্রাদ্যুদ্দেশ্যকৈকশ্রাদ্ধস্যাশাস্ত্রার্থত্বাচ্চ। বস্তুতস্তু গোষ্ঠীশ্রাদ্ধং ভোক্তৃসমুদায়ঃ বিদ্বৎসু ব্রাহ্মণেষু চ ইত্যেকবাক্যত্বাৎ। তথাচ বহূনাং বিদুষাং পাত্রভূতানাং সম্প্রদানাভেদেন যৎ সুখং পিতৃপ্রীত্যতিশয়রূপং তদর্থং তন্নিমিত্তং গোষ্ঠ্যাং পাত্রসমুদায়রূপায়াং যৎ শ্রাদ্ধং বহুব্রাহ্মণকশ্রাদ্ধং তদ্‌গোষ্ঠীশ্রাদ্ধমিত্যর্থঃ। পিতৃতৃপ্তয়ে ইতি তু স্বগতফলকামনয়া ক্রিয়মাণতাদৃশশ্রাদ্ধস্য গোষ্ঠীশ্রাদ্ধত্বং নাস্তি কিন্তু পিতৃগতফলকামনয়া ক্রিয়মাণতাদৃশশ্রাদ্ধস্যৈব ইতি প্রতিপাদনার্থমিতি এতচ্চ বিভাজকোপাধিভেদমাত্রং সর্ব্বেষামেব শ্রাদ্ধানাং বহুপাত্র-

পাপক্ষয়ার্থং যদ্বিহিতং শ্রাদ্ধম্। যথা জাবালঃ। আরম্ভে সর্ব্বকৃচ্ছ্রাণাং সমাপ্তৌ চ বিশেষতঃ। আজ্যেনৈব হি শালাগ্নৌ জুহুয়াদাহুতীঃ পৃথক্॥ শ্রাদ্ধং কুর্য্যাৎ ব্রতস্যান্তে গোহিরণ্যাদিদক্ষিণম্। নিষেককাল ইতি সকলশ্রৌতস্মার্ত্তকর্ম্মোপলক্ষণম্। নানিষ্ট্বা তু পিতৄন্ শ্রাদ্ধৈঃ কর্ম্ম বৈদিকমারভেদিতি শাতাতপবচনাৎ। গচ্ছন্ দেশান্তরমিতি তীর্থযাত্রাবিষয়ম্॥ ৪৫॥

কত্বসম্ভবাৎ অতএবাগ্রে কর্ম্মাঙ্গত্বেঽপি যাত্রার্থশ্রাদ্ধস্য যাত্রার্থত্বেন পৃথগ্বিভাগঃ সুপপন্নঃ। অতএব চ প্রকরণশেষে সর্ব্বমুপাধিভেদাদবিরুদ্ধমিতি বক্ষ্যতি। প্রায়শ্চিত্তব্রতেতি। পাপক্ষয়ার্থং যৎ প্রায়শ্চিত্তব্রতং তদাচরণানন্তরং কর্ত্তব্যত্বেন বিহিতং যচ্ছ্রাদ্ধমিত্যর্থঃ। পাপক্ষয়স্য প্রায়শ্চিত্তেনৈব জনিতত্বাৎ শ্রাদ্ধস্য তদজনকত্বাৎ যথা শ্রুতান্বয়াসঙ্গতেরিতি কেচিৎ তদসৎ ক্রিয়তে শুদ্ধয়ে ইত্যনেন শ্রাদ্ধস্যাপি তজ্জনকত্বপ্রতিপাদনাৎ শুদ্ধয়ে পাপক্ষয়ায় ইতি তদর্থাৎ শালাগ্নৌ লৌকিকাগ্নৌ প্রায়শ্চিত্তিনঃ স্মার্ত্তাগ্নেরসম্ভবাৎ। নিষেকেতি নিষেককাল ইতি ন গর্ভাধানমাত্রপরং কিন্তু সকলশ্রৌতস্মার্ত্তকর্ম্মপরমিত্যর্থঃ। অতএবৈতদ্বচনস্য সঙ্কোচে প্রমাণাভাবাৎ সামগানামপি গর্ভাধানে শ্রাদ্ধমস্তীতি বৃদ্ধিশ্রাদ্ধপ্রকরণে বিবেচয়িষ্যতে। এতচ্ছ্রাদ্ধস্য কর্ম্মাঙ্গত্বে প্রমাণমাহ নানিষ্ট্বেতি। উৎসবানন্দসন্তানে যজ্ঞোদ্বাহাদিমঙ্গলে ইত্যাদিবচনৈরভিহিতস্য শ্রাদ্ধস্য নানিষ্ট্বা তু পিতৄন্ শ্রাদ্ধৈরিত্যনেন প্রাক্কর্ত্তব্যত্বপ্রতিপাদনাৎ ভাবিনিমিত্তকত্বেন কর্ম্মাঙ্গত্বমেবেতি ভাবঃ। অতএব গোভিলেনাপি সকলমভিধায় সর্ব্বাণ্যেব অন্বাহার্য্যবন্তীত্যনেনাযোগব্যবচ্ছেদপরমতস্তেষাং শ্রাদ্ধানাং কর্ম্মাঙ্গত্বং প্রতিপাদিতম্। তীর্থযাত্রাবিষয়মিতি। তেন তীর্থযাত্রায়াং কর্ত্তব্যতায়াং সপ্তম্যাদিযু যচ্ছ্রাদ্ধং ক্রিয়তে তদ্‌যাত্রার্থমিত্যর্থঃ। ॥ ৪৫ ॥

প্রবেশেঽপি তীর্থযাত্রাং কত্বৈবেত্যাহ ব্রহ্মপুরাণম্। যো যঃ কশ্চিত্তীর্থযাত্রান্তু গচ্ছেৎ সুসংযতঃ স চ পূর্ব্বং গৃহে স্বে। কৃতোপবাসঃ শুচিরপ্রমত্তঃ সংপূজয়েদ্ভক্তিনম্রো গণেশম্॥ দেবান্ পিতৄন্ ব্রাহ্মণাংশ্চৈব সাধূন্ ধীমান্ প্রীণয়ন্ বিত্তশক্ত্যা প্রপন্নান্। প্রত্যাগতশ্চাপি পুনস্তথৈব দেবান্ পিতৄন্ ব্রাহ্মণান্ পূজয়েচ্চ॥ শরীরোপিচয় ইতি শরীরোপচয়হেতৌ রসায়নাদিকে কর্ত্তব্যে। কথং তর্হি পঞ্চবিধত্বমাহ বৃহস্পতিঃ। নিত্যং নৈমিত্তিকং কাম্যং বৃদ্ধিশ্রাদ্ধং তথৈব চ। পার্ব্বণঞ্চেতি মনুনা শ্রাদ্ধং পঞ্চ-

তীর্থযাত্রাং কৃত্বৈবেতি। তেন কৃততীর্থযাত্রেণ গৃহপ্রবেশে কর্ত্তব্যে যচ্ছ্রাদ্ধান্তরং তদপি যাত্রার্থমিত্যর্থঃ। যো য ইত্যত্র পূর্ব্বং পিতৄন্ পূজয়েদিত্যনেন যাত্রাতঃ পূর্ব্বং শ্রাদ্ধং দর্শিতং শ্রাদ্ধঞ্চাত্র নান্দীমুখমেবেতি প্রতিহস্তাদয়ঃ পার্ব্বণবিধিনৈবেতি বাচস্পতিমিশ্রাঃ। বস্তুতস্তু প্রতিহস্তাদিমতমেব সাধীয়ম্। নিষেধকালে সোমে চ ইত্যস্য সকলশ্রৌতস্মার্ত্তকর্ম্মোপলক্ষণতয়া তীর্থযাত্রায়া অপি স্মার্ত্তকর্ম্মত্বেন তদঙ্গশ্রাদ্ধস্য নান্দীমুখস্যৈব প্রাপ্তেঃ। উৎসবানন্দসন্তানে যজ্ঞোদ্বাহাদিমঙ্গলে। মাতরঃ প্রথমং পূজ্যাঃ পিতরস্তদনন্তরম্। ইত্যুক্তনান্দীমুখশ্রাদ্ধস্যৈব নানিষ্ট্বা তু পিতৄন্ শ্রাদ্ধৈরিত্যনেন প্রাক্কর্ত্তব্যত্বোপদেশাৎ। অতএব নির্ণয়ামৃতলিখিতং ব্রহ্মপুরাণবচনম্। সেতুবৃক্ষজলাদীনাং প্রতিষ্ঠাসু তথৈব চ। তীর্থযাত্রাবৃষোৎসর্গে বৃদ্ধিশ্রাদ্ধং বিধীয়তে॥ ইতি। শ্রাদ্ধং কুর্য্যাৎ তু সর্পিষা ইত্যনেনাস্য শ্রাদ্ধস্য বহুসর্পিষ্কত্বং প্রতিপাদিতম্। শরীরোপচয় ইতি উপলক্ষণতয়াঽর্থোপচয়োঽপি বোধ্যঃ। হেতুপদঞ্চাত্র কার্য্যপরং কো হেতুঃ কারণং কিংবেত্যাদাবিব রসায়নাদিকে ইত্যাদিনা কৃষ্যাদিরূপার্থোপচয়পরিগ্রহঃ। তথাচ শরীরোপচয়রূপফলার্থং রসায়নারম্ভেঽর্থোপচয়ার্থং

বিধং স্মৃতম্॥ কূর্ম্মপুরাণে। অহন্যহনি নিত্যং স্যাৎ কাম্যং নৈমিত্তিকং পুনঃ। একোদ্দিষ্টঞ্চ বিজ্ঞেয়ং বৃদ্ধিশ্রাদ্ধঞ্চ পার্ব্বণম্। এতৎ পঞ্চবিধং শ্রাদ্ধং মনুনা পরিকীর্ত্তিতম্॥ সত্যং স্বরূপতো দ্বাদশবিধত্বেঽপি পঞ্চবিধবিধানোপাধি-ভেদাৎ পঞ্চবিধত্বম্। গোষ্ঠীশ্রাদ্ধাদীনাং পার্ব্বণকাম্যবৃদ্ধি-শ্রাদ্ধৈরপৃথগ্বিধানাদেতেষ্বেবান্তর্ভাব ইত্যভিপ্রায়ঃ। সপিণ্ডীকরণস্যাপ্যংশতঃ পার্ব্বণবিধানাদংশত একোদ্দি-ষ্টবিধেরুভয়াত্মকত্বান্ন পৃথক্ত্বম্। নিত্যপার্ব্বণাৎ কাম্যস্য দেবতাভেদাৎ পৃথগ্বিধানম্। বস্তুতস্তু প্রপঞ্চার্থমেব দ্বাদশবিধত্বং যুগাদ্যাদিশ্রাদ্ধানামপি সত্ত্বাৎ॥ ৪৬॥

কৃষ্যাদ্যারম্ভে বা যচ্ছ্রাদ্ধমিচ্ছয়া ক্রিয়তে তৎপুষ্ট্যর্থমিত্যর্থঃ। কাম্যান্ত-র্গতত্বেঽপি এতয়োর্বিভাজকোপাধিভেদেনৈব পৃথগ্বিভাগ ইতি কূর্ম্মপুরাণ ইতি একোদ্দিষ্টং পুনর্নৈমিত্তিকং বিজ্ঞেয়মিত্যন্বয়ঃ। তেন পঞ্চবিধত্ব-ব্যাঘাতঃ বিশ্বামিত্রোক্ত নিত্যনৈমিত্তিকত্বাদি স্ব স্ব ধর্ম্মতঃ। গোষ্ঠীশ্রাদ্ধা-দীনামিতি গোষ্ঠীশ্রাদ্ধপুষ্টিশ্রাদ্ধশুদ্ধ্যর্থশ্রাদ্ধানাং পার্ব্বণান্তর্ভাবাৎ কর্ম্মাঙ্গ-যাত্রার্থশ্রাদ্ধয়োর্বৃদ্ধিশ্রাদ্ধান্তর্ভাবাৎ দেবশ্রাদ্ধস্য কাম্যান্তর্ভাবাচ্চ পঞ্চবি-ধত্বমেব শ্রাদ্ধমিত্যভিপ্রায়ো বৃহস্পত্যাদেরিত্যর্থঃ। নন্বু গোষ্ঠীশ্রাদ্ধাদীনা-মিব কাম্যানাং তিথিশ্রাদ্ধাদীনামপি পার্ব্বণান্তর্ভূতত্বাৎ কথং পৃথগভি-ধানমত আহ নিত্যপার্ব্বণাৎ অমাবাস্যাদিক্রিয়মাণাবশ্যকপার্ব্বণাৎ কাম্যস্য তত্তত্তিথ্যাদিনিমিত্তিককাম্যপার্ব্বণস্য দেবতাভেদাৎ পৃথ-গ্বিধানমিত্যর্থঃ। তত্রাবশ্যকপার্ব্বণে পুরূরবোমাদ্রবসোর্দেবতাত্বম্। পুরূ-রবা মাদ্রবাশ্চ পার্ব্বণে সমুদাহৃতৌ ইত্যুক্তেঃ। কাম্যপার্ব্বণে চ ধুরি-লোচনয়োর্দেবতাত্বং কাম্যে চ ধুরিলোচনাবিত্যুক্তেঃ। প্রপঞ্চার্থমেব শ্রাদ্ধস্যানেকবিধত্বজ্ঞাপনার্থমেব ন তু দ্বাদশবিধমেব পঞ্চবিধমেব ইতি

যৎ তু মৎস্যপুরাণে। নিত্যং নৈমিত্তিকং কাম্যং ত্রিবিধং শ্রাদ্ধমুচ্যতে। তত্র নিত্যপদমুক্তার্থমেব নৈমিত্তিকপদং আগন্তুকনিমিত্তোৎপন্নত্বেন পার্ব্বণৈকোদ্দিষ্টয়োঃ পরিগ্রহার্থং কাম্যপদং দৃষ্টফলত্বেন তিথিশ্রাদ্ধাদীনামভ্যুদয়স্য চ গ্রহণার্থমিত্যবিরোধঃ। বিষ্ণুনা তু নিত্যকাম্যরূপতয়া দ্বৈবিধ্যং বক্ষ্যতে। তত্র নিত্যপদমাবশ্যকরূপতয়া পার্ব্বণৈকোদ্দিষ্টয়োরপি পরিগ্রহার্থং কাম্যপদমনাবশ্যকার্থং সর্ব্বমিদমুপাধিভেদাদবিরোধঃ ॥ ৪৭ ॥

অথ শ্রাদ্ধদেশাঃ ॥ তত্র বিষ্ণুঃ। পুষ্করেষ্বক্ষয়ং শ্রাদ্ধং জপহোমতপাংসি চ। পুষ্করে স্নাতমাত্রস্তু সর্ব্বপাপাৎ প্রমুচ্যতে ॥ ইত্যভিধায় এবমন্যেষু তীর্থেষু সরিদ্বরাসু সঙ্গমেষু চ প্রভবেষু চ পুলিনেষু নিকুঞ্জেষু প্রশ্রবণেষু চ বনেষূপবনেষু গোময়েনোপলিপ্তেষু গেহেষু মনোজ্ঞেষু চ।

---

নিয়মার্থং দ্বাদশবিধত্বং দ্বাদশবিধত্বাত্যন্তনিয়মপক্ষে দোষমাহ যুগাদ্যাদীতি। আদিনা মন্বন্তরাশ্রাদ্ধপরিগ্রহঃ। তেষাং নিরুক্তপার্ব্বণত্ব কাম্যত্বাদাসম্ভবাদিতি ভাবঃ ॥ ৪৬ ॥

উক্তার্থমেব অহন্যহনীত্যুক্তার্থমেব। পার্ব্বণৈকদ্দিষ্টয়োরিতি একোদ্দিষ্টপদেন সপিণ্ডীকরণস্যাপি পরিগ্রহঃ। অবিরোধ ইতি সর্ব্বেষামেব বচনানাং উপাধিভেদমুখেন কেবলং প্রপঞ্চার্থত্বাৎ অবিরোধ ইত্যর্থঃ ॥ ৪৭ ॥

অথেতি শ্রাদ্ধপ্রভেদপ্রতিপাদনানন্তরমিত্যর্থঃ। পুষ্করেষ্বিতি এষাং ত্রিত্বাদ্বহুবচনম্। তথাচোক্তং অগ্নিত্রয়ং ত্রীণি চ পুষ্করাণীতি। এবমিত্যক্ষয়মিত্যর্থঃ। স্বজন্মভূমিপরত্বং প্রভবপদস্য নিরাকরোতি প্রভবোঽত্রেতি। প্রস্রবত্যেতি সরিদ্বরাস্বিত্যনেন নদীনামুপস্থিতত্বাৎ অনন্তরোক্তেশ্চ। সঙ্গ-

প্রভবোহত্র নদীনামুৎপত্তিস্থানম্। সরিদ্বরাসু সঙ্গমেষু চেতি প্রস্তুত্য প্রভবোষ্বিত্যভিধানাৎ। পুলিনং নদীতোয়োখিতদেশঃ। নিকুঞ্জো লতাবেষ্টিতদেশঃ। প্রস্রবণং নির্ঝরঃ উপবনং গৃহবাটিকা। মনোজ্ঞং রমণীয়ম্ দেবলঃ। শ্রাদ্ধস্য পূজিতো দেশো গয়া গঙ্গা সরস্বতী। কুরুক্ষেত্রং প্রয়াগশ্চ নৈমিষং পুষ্করাণি চ॥ নদীতটেষু তীর্থেষু শৈলেষু পুলিনেষু চ। বিবিক্তেষু চ তুষ্যন্তি দত্তেনেহ পিতামহাঃ॥ বিবিক্তং বিজনম্। বৃহস্পতিঃ। কাঙ্ক্ষন্তি পিতরঃ পুত্রান্নরকাপাতভীরবঃ। গয়াং যাস্যতি যঃ কশ্চিৎ সোহস্মান্ সন্তারয়িষ্যতি॥ করিষ্যতি বৃষোৎসর্গমিষ্টাপূর্ত্তং তথৈব চ। পালয়িষ্যতি বার্দ্ধক্যে শ্রাদ্ধং দাস্যতি চান্বহম্॥ গয়ায়াং ধর্ম্মপৃষ্ঠে চ সদসি ব্রহ্মণস্তথা। গয়াশীর্ষেহক্ষয়বটে পিতৄণাং

---

মেষ্বিত্যত্র তাসামেবান্বয়াৎ তৎসাহচর্য্যাৎ। প্রভবেষ্বিত্যত্রাপি তাসামন্বয়ো ন্যায্যঃ নত্বনুপস্থিতশ্রাদ্ধকর্ত্তৄরিতি ভাবঃ। ইষ্টাপূর্ত্তমিতি দেবদ্বন্দ্বে দীর্ঘঃ। ইষ্টং—অন্তর্বেদ্যাঞ্চ যদ্দানমিষ্টমিত্যভিধীয়তে ইতি মৎস্যপুরাণোক্তং আগ্রয়ণেষ্ট্যাদি চ। পূর্ত্তম্। বাপীকূপতড়াগাদিদেবতায়তনানি চ। অন্নপ্রদানমারমাঃ পূর্ত্তমিত্যভিধীয়তে। ইতি তত্রৈবোক্তম্। গয়াস্থানং বিশেষয়তি। ধর্ম্মপৃষ্ঠব্রহ্মসদঃপ্রভৃতয়ো গয়ান্তর্গতদেশাঃ তেষাং গোবৃষন্যায়েনাধিকফলপ্রতিপাদনার্থং পুনর্নির্দেশ ইত্যর্থঃ। গামানয় ইত্যুক্ত্বা বৃষমানয় ইত্যুক্তেহন্যগোভ্যো বৃষস্য প্রাশস্ত্যাবগমাৎ। নন্বু পুষ্করেষ্বক্ষয়ং শ্রাদ্ধমিত্যাদিকং কিং যুগাদ্যাদিশ্রাদ্ধবৎ পৃথক্ শ্রাদ্ধবিধিঃ কিং বা প্রাপ্তেঽমাবাস্যাদিশ্রাদ্ধে পুষ্করাদিদেশাখ্যগুণফলবিধিরিতি বিতর্ক্যাহ অত্রেতি তীর্থপ্রাপ্তীতি। দ্রব্যব্রাহ্মণপ্রাপ্ত্যোরপ্যুপলক্ষণম্। তীর্থে দ্রব্যোপপত্তৌ চ সদ্যঃ শ্রাদ্ধং বিধীয়তে। পাত্রঞ্চ ব্রাহ্মণং প্রাপ্য

ন্তমক্ষয়ম্ ॥ ধর্ম্মারণ্যং ধর্ম্মপৃষ্ঠং ধেনুকারণ্যমেব চ। দৃষ্ট্বৈতানি পিতৄংশ্চার্চ্চ্য বংশান্ বিংশতিমুদ্ধরেৎ ॥ অত্র গয়ামুপাদায় গয়াস্থানবিশেষোপন্যাসোঽধিকফলার্থঃ। ইহ শ্রাদ্ধদেশত্বেন কথিতা নানাদিগ্‌দেশীয়তীর্থবিশেষস্বরূপাস্তত্তদ্দেশনিবাসিভ্যোঽবগন্তব্যাঃ। অত্র পুষ্করেষ্বক্ষয়ং শ্রাদ্ধমিত্যাদিবিষ্ণ্বাদিবাক্যৈঃ সামান্যতস্তীর্থপ্রাপ্তিনিমিত্তেঽমাবাস্যাদিশ্রাদ্ধে চ প্রাপ্তে পুষ্করাদিদেশাখ্যগুণফলবিধিঃ ॥ ৪৮ ॥

গোদোহেনাপঃ প্রণয়েৎ পশুকামস্যেতিবৎ ন তু বিশিষ্টশ্রাদ্ধান্তরবিধানং বিধিগৌরবাপত্তেঃ অগত্যাত্র

ন কালমবধারয়েদিত্যুক্তেঃ। অমাবাস্যাদীত্যাদিপদাৎ অষ্টকাযুগাদ্যাদিসকলশ্রাদ্ধানাং পরিগ্রহঃ। প্রাগুক্তবচনাৎ অমাবাস্যায়াং পিতৃভ্যো দদ্যাদিত্যাদিবচনাচ্চ সামান্যতোদেশমাত্রাধিকরণত্বেন প্রাপ্তে পুষ্করাখ্যেতি পুষ্করাখ্যশ্চ দেশরূপো যো গুণঃ তেন যৎ প্রধানীভূততত্তৎশ্রাদ্ধজন্যং প্রশস্তকালং তদ্বিধিরিত্যর্থঃ। তথাচ প্রাপ্তপ্রকৃততত্তচ্ছ্রাদ্ধানাং পুষ্করাদৌ ক্রিয়মাণানামক্ষয়ফলমিত্যর্থঃ। পুষ্করাদীনাং অক্ষয়ফলজনকশ্রাদ্ধাঙ্গত্বাদ্‌গুণত্বং ন তু পুষ্করাখ্যগুণজন্যং যৎ ফলং তদ্বিধিরিত্যর্থঃ। অঙ্গানাং ফলাজনকত্বাৎ ফলবৎসন্নিধাবফলং তদঙ্গমিতি জৈমিনিনা ফলাজনকস্যৈবাঙ্গত্বপ্রতিপাদনাৎ। যত্রাপি যস্য পর্ণময়ী জুহূর্ভবতি ন স পাপশ্লোকং শৃণোতি দধ্নেন্দ্রিয়কামস্যেত্যাদাবঙ্গে ফলশ্রুতিরস্তি তত্রাপি তত্তদঙ্গসহিতপ্রধানস্যৈব তৎ ফলং ন ত্বঙ্গানাং অন্যথা যত্র কর্ম্মণি জুহূর্দর্ব্বাদিরূপাঙ্গনিষ্পত্তির্জ্জাতা যাগো ন জাতস্তত্রাপি তৎ ফলং স্যাদিতি সুধীভির্ভাবনীয়ম্ ॥ ৪৮ ॥

অত্র দৃষ্টান্তমাহ গোদোহেনেতি। দর্শপৌর্ণমাসপ্রকরণে চমসেনাপঃ প্রণয়েদিতি গোদোহেনাপঃ প্রণয়েৎ পশুকাম ইতি চ দ্বয়ং শ্রূয়তে অত্র

সোমেন যজেতেত্যাদৌ। তথা মনুঃ। শুচিং দেশং বিবিক্তঞ্চ গোময়েনোপলেপয়েৎ। দক্ষিণাপ্লবনঞ্চৈব প্রযত্নেনোপপাদয়েৎ॥ অবকাশেষু চোক্ষেষু নদীতীরেষু চৈব হি। বিবিক্তেষু চ তুষ্যন্তি দত্তেন পিতরঃ সদা॥ অশুচিমবিবিক্তমদক্ষিণাপ্লবনং যত্নতঃ শুচিত্বাদিনোপপাদয়েৎ। বিবিক্তং বিজনম্। চোক্ষেষু মনোজ্ঞেষু। বিবিক্তেষু বনাদিষু। যমঃ। দক্ষিণাপ্লবনং স্নিগ্ধং বিবিক্তং শুভলক্ষণম্। শুচিং দেশং পরীক্ষ্যাশু গোময়েনোপলেপয়েৎ॥ আগারেষু বিবিক্তেষু তীর্থেষু চ নদীষু চ। বিবিক্তেষু চ তুষ্যন্তি দত্তেন পিতরঃ সদা॥ পারক্যে ভূমিভাগে চ পিতৄণাং নির্ব্বপেৎ তু যঃ।

কিং চমসকরণকাপঃপ্রণয়াৎ ফলসাধনীভূতঘটাদিরূপগোদোহপাত্রকরণকাপঃপ্রণয়নান্তরবিধির্গোদোহেনেতি বাচ্যং কিং বা তস্মিন্নেবাপঃপ্রণয়নে চমসস্থানে ফলসাধনগোদোহরূপাঙ্গবিধির্ব্বা ইতি সন্দেহে অপঃপ্রণয়নান্তরকল্পনাগৌরবাৎ ধর্ম্মিকল্পনাতো ধর্ম্মকল্পনায়া লঘুত্বাৎ বিশিষ্টবিধ্যন্তরকল্পনাগৌরবাচ্চ। যথা প্রাপ্ত এবাপঃপ্রণয়নে চমসস্থলে ফলসাধনগোদোহপাত্ররূপাঙ্গমাত্রবিধিস্তথেহাপি প্রাপ্তেঽমাবাস্যাদিশ্রাদ্ধে পুষ্করাদিদেশরূপগুণফলবিধির্ন তু শ্রাদ্ধান্তরবিধিরিত্যর্থঃ। নন্থ তর্হি কথং সোমেন যজেতেত্যস্য দর্শপৌর্ণমাসপ্রকরণপঠিতস্য কর্ম্মান্তরবিধিত্বমত আহ অগত্যেতি দর্শপৌর্ণমাসে ব্রীহিভির্যজেত ইত্যত্র যদ্যপি ব্রীহিস্থানে সোমরূপদ্রব্যবিধিরুচ্যতে তদা পুরোডাশবাধাপত্তিঃ সোমেন পুরোডাশাসম্ভবাৎ। পুরোডাশং জুহোতি ইত্যুক্তপুরোডাশসাধনদ্রব্যাকাঙ্ক্ষায়ামেব ব্রীহিভির্যজেত ইতি বিধ্যুত্থানাৎ তথা সোমে ফলাশ্রবণাচ্চ গুণফলবিধিত্বাসম্ভবাচ্চ অগত্যা কর্ম্মান্তরবিধিরিত্যর্থঃ। শুচিমিতি যদ্যপ্যুপলেপয়েদিত্যব্যবহিতক্রিয়ান্বয়ং বিহায় উপপাদয়েদিতি ব্যবহিতক্রিয়ান্বয়ো ন যুক্তস্তথাপি শুচিদেশস্য

তদ্ভূমিস্বামিপিতৃভিঃ শ্রাদ্ধকর্ম্ম বিহন্যতে॥ তস্মাৎ শ্রাদ্ধানি দেয়ানি পুণ্যেষ্বায়তনেষু চ। নদীতীরেষু তীর্থেষু স্বভূমৌ চ প্রযত্নতঃ॥ উপহ্বরনিতম্বেষু তথা পর্ব্বতসানুষু। গোময়েনোপলিপ্তেষু বিবিক্তেষু গৃহেষু চ॥ স্নিগ্ধং স্তিমিতম্। বিবিক্তেষু দেশেষু স্বভাবাদুপবনাদিষু। উপহ্বরমত্র পর্ব্বতান্তিকম্॥ ৪৯॥

অথ নিন্দিতদেশাঃ। বিষ্ণুঃ। ন ম্লেচ্ছবিষয়ে শ্রাদ্ধং কুর্য্যান্ন চ গচ্ছেৎ। তথা। চাতুর্ব্বর্ণ্যব্যবস্থানং যস্মিন্ দেশে ন বিদ্যতে। তং ম্লেচ্ছদেশং জানীয়াদার্য্যাবর্ত্তমতঃ পরম্॥ বায়ুপুরাণে। ত্রিশঙ্কোর্ব্বর্জ্জয়েদ্দেশং সর্ব্বং দ্বাদশযোজনম্।

তদুপলেপনবিধিবৈয়র্থ্যাৎ ব্যবহিতান্বয় এব ইত্যভিপ্রায়ঃ। বস্তুতস্তু শুচিং দেশং পরীক্ষ্যাথ গোময়েনোপলেপয়েদিতি বক্ষ্যমাণবচনৈকবাক্যতয়া সন্নিহিতক্রিয়ান্বয় এব অত্রাপি যুক্তঃ। এতৎ সংস্কারাধানার্থং শুচিদেশেঽপি গোময়েনোপলেপনস্যাবশ্যকত্বাদতএব গঙ্গাপুলিনবারাণস্যাদাবপ্যুপলেপনমাবশ্যকমিতি গঙ্গাতীরে তুন উপলেপনাপেক্ষা। তথাচ ব্রহ্মাণ্ডে। সার্দ্ধহস্তশতং যাবৎ গর্ভতস্তীরমুচ্যতে। তত্র ন প্রতিগৃহ্নীয়াৎ প্রাণৈঃ কণ্ঠগতৈরপি। ন মন্ত্রো ন বিধিঃ কালো ন মৃদো ন চ গোময়মিতি। দক্ষিণাপ্লবনমিতি নিম্নদক্ষিণদিগ্‌ভাগমিত্যর্থঃ। শুভলক্ষণং তুষাঙ্গারাদিবর্জ্জিতম্। তস্মাদিতি পুণ্যায়তনাদীনামস্বামিকত্বাদিত্যর্থঃ। গোময়েনোপলিপ্তেম্বিতি নদীতীরেষ্বিত্যাদৌ সর্ব্বত্রান্বয়ঃ॥ ৪৯॥

নিন্দিতদেশা ইতি। সামান্যতস্তদিতরদেশানাং শ্রাদ্ধার্হত্বজ্ঞাপনমেতৎপ্রয়োজনম্ ম্লেচ্ছবিষয়ে ম্লেচ্ছস্বত্বাস্পদীভূতদেশে তদধিষ্ঠিতদেশে চ। অতঃ পরমিতি উক্তম্লেচ্ছবিষয়াদিভিন্নস্থানং আর্য্যাবর্ত্তং শ্রাদ্ধার্হং আর্য্যাবর্ত্তকৃতকর্ম্মণামেব ফলজনকত্বাৎ এতস্যাপি শ্রাদ্ধস্বন্য-

উত্তরেণ মহানদ্যা দক্ষিণেন তু কীকটাৎ ॥ দেশস্ত্রৈশঙ্কবো নাম সর্ব্বকর্ম্মণি গর্হিতঃ। কারস্করাঃ কলিঙ্গাশ্চ সিন্ধো-রুত্তরমেব চ। প্রণষ্টাশ্রমধর্ম্মাশ্চ দেশা বর্জ্জ্যাঃ প্রযত্নতঃ ॥ কারস্করো দেশবিশেষঃ। কীকটো মগধঃ। সিন্ধুর্নদীবি-শেষঃ। ব্রহ্মপুরাণে। পরকীয়গৃহে যস্তু স্বান্ পিতৄংস্তর্পয়ে-জ্জড়ঃ। তদ্ভূমিস্বামিনস্তস্য হরন্তি পিতরো বলাৎ। অগ্র-ভাগং ততস্তেভ্যো দদ্যান্মূল্যঞ্চ জীবতাম্ ॥ গৃহ ইতি ভূভা-গমাত্রোপক্ষণম্। পারক্যে ভূমিভাগে ইতি বচনাৎ অভূ-ম্যভাবে কথং শ্রাদ্ধমিত্যাহ অগ্রভাগমিতি। শ্রাদ্ধীয়দ্র-ব্যস্য তেভ্যস্তদ্ভূমিস্বামিপিতৃভ্য উৎসৃজ্য দেয়ং জীবতাং স্বামিনাং মূল্যং দেয়ম্। যমঃ। অটব্যঃ পর্ব্বতাঃ পুণ্যা নদ্যস্তীর্থানি যানি চ। সর্ব্বাণ্যস্বামিকান্যাহুর্নাহতেষু

---

কলজনকত্বজ্ঞাপনার্থমার্য্যাবর্ত্তত্বেনোক্তিঃ। স দেশ ইত্যত্রাহ উত্তরে-ণেতি দক্ষিণেনেতি সপ্তম্যর্থে এনপ্রত্যয়ঃ। মহানদ্যা গঙ্গায়াঃ। মূল্যঞ্চে-ত্যত্র চকারো ন সমুচ্চয়ার্থঃ কিন্তু বিকল্পার্থঃ। জীবতাং মূল্যদানেনৈব তাৎ-কালিকস্বত্বোপপত্তেরিতরস্য ব্যর্থত্বাৎ বিকল্পেঽপি নৈচ্ছিকঃ অষ্টদোষ-গ্রাসাৎ। তে চাষ্টৌ দোষা অগ্রে পর্য্যুদাসবিবরণপ্রকরণে ব্যখ্যাতব্যাঃ কিন্তু ব্যবস্থিতঃ। তথাচ জীবৎসু ভূস্বামিষু সন্নিধানেষু মূল্যং দদ্যাৎ অন্যথা তু মৃতেভ্যোঽগ্রভাগং দদ্যাদিত্যর্থঃ অন্যে তু ইচ্ছাবিকল্পম-ভ্যুপেত্য স্বামিষু জীবৎস্বপি মৃতেভ্যোঽগ্রদানাৎ শ্রাদ্ধসিদ্ধিরিত্যাহুঃ। অত্র ভূস্বামিপিতৃভ্যো নম ইতি। নমঃপদেনৈবাগ্রভাগদানং কৃত-সপিণ্ডীকরণাকৃতসপিণ্ডীকরণসাধারণ্যেনৈব উদ্দেশ্যত্বাৎ স্বধাপদা-প্রসক্তেঃ স্বধাকারঃ পিতৄণামিতি বচনেন প্রাপ্তপিতৃলোকানামেব স্বধাপদ-বিধানাদিতি প্রাঞ্চঃ। নবীনাস্তু অকৃতসপিণ্ডীকরণস্যাপি স্বধাপদেনৈব শ্রাদ্ধাদিরূপত্যাগঃ। ন স্বধাঞ্চ প্রযুঞ্জীত প্রেতপিণ্ডে দশাহিকে ইত্যনেন

পরিগ্রহঃ॥ স্বাম্যভাবে হেতুমাহ ন হি তেষ্বিতি পরিগ্রহো দানবিক্রয়াদিযথেষ্টবিনিয়োগলক্ষণঃ। তথা। রূক্ষং ক্রমিযুতং ক্লিন্নং সঙ্কীর্ণানিষ্টগন্ধিকম্। দেশন্ত্বনিষ্টশব্দঞ্চ বর্জ্জয়েৎ শ্রাদ্ধকর্ম্মণি॥ রূক্ষং ধূলিযুতম্। ক্লিন্নং পঙ্কিলম্। অনিষ্টগন্ধিকমসুরভিগন্ধিকম্। অনিষ্টশব্দং প্রতিকূলশব্দম্॥ ৫০॥

অথ শ্রাদ্ধকালাঃ। তত্র যাজ্ঞবল্ক্যঃ। অমাবাস্যাষ্টকাবৃদ্ধিঃ কৃষ্ণপক্ষোঽয়নদ্বয়ম্। দ্রব্যং ব্রাহ্মণসম্পত্তির্বিষুবৎসূর্য্যসংক্রমঃ॥ ব্যতিপাতো গজচ্ছায়া গ্রহণং চন্দ্রসূর্য্যয়োঃ। শ্রাদ্ধং প্রতিরুচিশ্চৈব শ্রাদ্ধকালাঃ প্রকীর্ত্তিতাঃ॥ অষ্টকায়োর্দ্ধমাগ্রহায়ণ্যাস্তমিশ্রাষ্টমীতি গোভিলোক্তা। বৃদ্ধিঃ

---

দাশাহিকপিণ্ডদান এব স্বধানিষেধেন অন্যত্র স্বধাপ্রাপ্তঃ স্বধাকারঃ পিতৃণামিত্যত্র পিতৃপদস্য মৃতমাত্রপরত্বাৎ। পিত্রে তু দ্বিগুণা দর্ভাঃ পিত্র্যমা নিধনাৎ কার্য্যং পিত্র্যং কর্ম্ম প্রাচীনাবীতিনা কার্য্যং পিত্র্যে দক্ষিণামুখ ইত্যাদাবিব তেন ইদং শ্রাদ্ধীয়াগ্রভাগান্নাদিকমেতদ্ভূস্বামিপিতৃভ্যঃ স্বধেতি বাক্যেনৈবাগ্রভাগদানমিতি প্রাহুঃ। এতদ্দানঞ্চান্নোৎসর্গাৎ প্রাক্কালে ইতি শ্রীদত্তাদয়ঃ প্রয়োগপ্রাক্কাল এবেতি বাচস্পতিমিশ্রাঃ। যুক্তঞ্চৈতৎ অন্যথা আসনাদিহরণনিবারণানুপপত্তেঃ। যদ্যপি বিশেষশব্দস্য সামান্যপরত্বে লক্ষণা তথাপি প্রমাণসিদ্ধত্বাৎ সা ন দোষায় ইত্যাহ পারক্য ইতি। তথাচ বচনয়োরেকবাক্যতয়া পরকীয়ভূমিভিন্নে শ্রাদ্ধং কুর্য্যাদিতি পর্য্যুদাসবিধিরেক এবেতি ভাবঃ॥ ৫০॥

শ্রাদ্ধদেশমভিধায় সামান্যেনাবশ্যকানাবশ্যকশ্রাদ্ধকালমাহ অথেতি। অষ্টকায়োর্দ্ধমিতি একবচনমবিবক্ষিতং তিসৃণামেবাষ্টকানাং শ্রাদ্ধকালত্বেন বক্ষ্যমাণত্বাৎ অষ্টকাশ্রাদ্ধঞ্চ কৃষ্ণপক্ষশ্রাদ্ধাৎ পৃথক্ প্রকরণভেদেন কৃষ্ণপক্ষশ্রাদ্ধাৎ পৃথগেবাষ্টকাশ্রাদ্ধস্য বিষ্ণ্বাদিবচনসিদ্ধত্বাৎ অন্বষ্টকাবৎ অত-

পুত্রজন্মাদিঃ। কৃষ্ণপক্ষঃ সর্ব্ব এব। অমাবাস্যাগ্রহণং প্রাশস্ত্যার্থম্। দ্রব্যং খড়্গমাংসাদি। ব্রাহ্মণসম্পত্তিঃ পঙ্‌ক্তিপাবনাদিসম্পত্তিঃ। সূর্য্যসংক্রম ইতি অয়নবিষুবেতরপরং গোবৃষন্যায়াৎ অয়নবিষুবয়োঃ পৃথগুপাদানং ফলাধিক্যার্থম্। ব্যতীপাতঃ সূর্য্যাচন্দ্রমসোঃ সংক্রান্তিসাম্যং জ্যোতিরাগমগম্যমিতি কল্পতরুঃ। যোগবিশেষ ইতি কশ্চিৎ। গজচ্ছায়া ব্রহ্মপুরাণোক্তা। যথা। যোগো মঘাত্রয়োদশ্যাং কুঞ্জরচ্ছায়সংজ্ঞিতঃ। ভবেন্মঘায়াং সংস্থে চ শাশন্যর্কে করে স্থিতে ॥ ৫১ ॥

---

এবাগ্রে অষ্টকা মাঘ্যভ্যুদয়াস্তীর্থপাত্রোপপত্তয়ঃ। পিতৃণামতিরেকোঽয়ং মাসিকান্নাৎ ধ্রুবঃ স্মৃতঃ॥ ইতি বচনং মাসিকান্নাদমাবাস্যাশ্রাদ্ধাদতিরেকঃ অষ্টকাদিশ্রাদ্ধগণ ইতি গ্রন্থকার এব ব্যাখ্যাস্যতি অন্যথামাবাস্যাদিবৎ কৃষ্ণপক্ষীয়শ্রাদ্ধেঽষ্টকায়াঃ প্রাশস্ত্যে অমাবাস্যাক্রিয়মাণকৃষ্ণপক্ষশ্রাদ্ধাৎ অষ্টকাদিশ্রাদ্ধানামতিরিক্তত্বাভিধানমসঙ্গতং স্যাৎ তেন কৃতেঽপ্যষ্টকাশ্রাদ্ধে কৃষ্ণপক্ষশ্রাদ্ধং পৃথক্ কর্ত্তব্যমিত্যর্থঃ। পুত্রজন্মাদীত্যাদিনা নামকরণাদীনাং গ্রহণম্। অমাবাস্যাগ্রহণং প্রাশস্ত্যার্থমিতি ন চামাবাস্যাগ্রহণম্ সাগ্নিপরমেবাস্ত্বিতি বাচ্যং অমাবাস্যাদি সকলশ্রাদ্ধমভিপ্রায় এতচ্চানুপনীতোঽপি কুর্য্যাৎ সর্ব্বেষু পর্ব্বসু। শূদ্রোঽপি মন্ত্রবৎ কুর্য্যাৎ অনেন বিধিনা বুধঃ॥ ইতি মৎস্যপুরাণীয়েন সর্ব্বেষামেবাধিকারপ্রতিপাদনাৎ অতএবামাবাস্যায়াং বিশেষেণেতি নিগমেন কণ্ঠত এব প্রাশস্ত্যমুক্তম্। ব্রাহ্মণসম্পত্তিরিত্যত্র ব্রাহ্মণপদার্থং বিবৃণোতি পঙ্‌ক্তিপাবনাদীতি গোবৃষন্যায়াদিতি। গামানয় বৃষমানয়েত্যত্র গোপদস্য বৃষেতরগোপরত্বম্। অন্যথা সামান্যাভিধানেনৈব তৎসিদ্ধের্বৃষপদবৈয়র্থ্যাৎ তদ্বদত্রাপীত্যর্থঃ। তথাপি বিশেষাভিধানস্য কিং প্রয়োজনং অত আহ ফলাধিককথনমিতি। ননু সর্পার্দ্ধাদ্দক্ষিণং

মুখ্যত্বার্থং দেশপরত্বৈব যুক্তা কালপরত্বে লক্ষণাপ্রসঙ্গাদিতি চেৎ ন শ্রাদ্ধকালাঃ প্রকীর্ত্তিতা ইতি বাক্যাব-

---

ভানোর্ধনিষ্ঠাদ্যং তথোত্তরম্। কদাচিদাসীদয়নমুৎপাতান্ন চ শাস্ত্রতঃ॥ ইত্যয়নান্তরমুক্তম্। তথা। প্রথমে কৃত্তিকাভাগে যদা ভাস্বান্ তদা শশী। বিশাখায়াশ্চতুর্থেঽংশেঽয়নে তিষ্ঠত্যসংশয়ম্॥ তদৈব বিষু-বাখ্যো বৈ কালঃ পুণ্যোঽভিধীয়তে। তত্র দদ্যাৎ পিতৃভ্যশ্চ সুখমেতৎ তু দানজম্॥ ইতি বিষুবান্তরমপ্যুক্তম্। তথাচ তদুভয়পরতয়ৈব সামঞ্জস্যে কিমর্থং গোবৃষন্যায়ানুসরণং গত্যন্তরাসম্ভব এব তস্যানুস্মরণীয়ত্বাদিতি চেন্ন আদিত্যসংক্রমণং বিষুবদ্বয়ং বিশেষেণায়নদ্বয়মিতি বিষ্ণুবচনেন সংক্রান্তিরূপয়োরেবায়নবিষুবয়োঃ প্রাশস্ত্যপ্রতিপাদনাৎ তদেকবাক্যতালাঘবাৎ প্রসিদ্ধত্বেন শীঘ্রোপস্থিতিকতয়া তয়োরেব গ্রহণৌচিত্যাচ্চ। বিষ্ণুপুরাণোক্তবিশেষস্যাদন্তবিষুবশব্দবাচ্যত্বেন প্রকৃতে বিষুবৎশব্দস্য তকারান্তস্য তৎপরত্বাসম্ভবাচ্চেতি। জ্যোতিরাগমগম্যমিতি সংক্রান্তিসাম্যমিত্যস্য বিশেষণম্। তথাচ জ্যোতিরাগমে তদনুসন্ধেয়মিতি ভাবঃ। যোগবিশেষ ইতি। শ্রবণাশ্বিধনিষ্ঠার্দ্রা নাগদৈবতমস্তকে। যদ্যমারবিবারেণ ব্যতীপাতঃ স উচ্যতে॥ ইত্যুক্তযোগবিশেষ ইত্যর্থঃ। নাগদৈবতমশ্লেষামস্তকং মৃগশিরাঃ এষাং মস্তকে আদিপাদে ইতি বার্থঃ। বিষ্কুম্ভাদ্যন্তর্গতযোগবিশেষ ইত্যপি কশ্চিৎ। গজচ্ছায়েতি যদ্যপি কুঞ্জরচ্ছায়াপদস্যৈব পরিভাষার্থং ব্রহ্মপুরাণোক্তং তথাপি কুঞ্জরচ্ছায়সংজ্ঞিত ইতীত চ প্রত্যয়েন কুঞ্জরচ্ছায়াদিকা সংজ্ঞা জাতা যস্যেত্যর্থবিহিতেন কুঞ্জরচ্ছায়াবোধকানাং পদানাং বাক্যানাঞ্চ সর্ব্বেষামেব তত্র পরিভাষাত্বস্য ব্রহ্মপুরাণেন প্রতিপাদনাৎ ধুস্তূরকনকাহ্বয় ইতিবৎ অন্যথা কুঞ্জরচ্ছায়সংজ্ঞ ইত্যেব ব্রূয়াৎ ইতি॥ ৫১॥

মুখ্যত্বার্থমিতি ছায়ায়াং কুঞ্জরস্য চেতি বচনৈকবাক্যতয়া গজস্য ছায়া গজচ্ছায়া ইত্যর্থবলাৎ মুখ্যত্বার্থমিত্যর্থঃ। ইদন্তু তমশ্চলতি

ধৃতকালপরত্বানুপপত্ত্যা লক্ষণায়া এব যুক্তত্বাৎ দৃষ্টা চ বাক্যাবধৃততণ্ডুলপরত্বানুপপত্ত্যা ধান্যমসীতি মন্ত্রে তণ্ডুললক্ষণা দ্রব্যশব্দে দ্রব্যপ্রাপ্তিকালবৎ গজচ্ছায়া-প্রাপ্তিকাললক্ষণৈব কুতো ন ভবতীতি চেৎ নিরূঢ়-লক্ষণায়া বলীয়স্ত্বাৎ অন্যথা শক্তেতবৈয়র্থ্যাপত্তেঃ। কিঞ্চ

নীলং তম ইতি প্রত্যয়ানুরোধাৎ ছায়ান্ধকারাপরনাম্নী। দশমদ্রব্যমিতি তৌতার্কিকমতাবলম্বনেনাভিধানম্। অন্যথা তস্যা অভাবরূপত্বে শ্রাদ্ধাধি-করণত্ববাধাৎ ছায়াধিকরণত্ববাধাৎ ছায়াধিকরণদেশলক্ষণাবশ্যকত্বে মুখ্য-ত্বার্থমিত্যনুপপত্তেরিতি বোধ্যম্। লক্ষণাপ্রসঙ্গাদিতি গজচ্ছায়াধিকরণ-কালপরত্বেন লক্ষণাপ্রসঙ্গাদিত্যর্থঃ। স্ববাক্যাবধৃতেতি শ্রাদ্ধকালাঃ প্রকী-র্ত্তিতা ইত্যুপসংহারবাক্যেন উক্তানাং সর্ব্বেষামেব কালতাৎপর্য্যকত্বে নির্ণীতে দেশপরত্বে তদ্বাধাৎ গজচ্ছায়াপদস্য তদধিকরণরূপলক্ষণায়া আবশ্যকত্বাদিত্যর্থঃ। বাক্যবিরোধেন লক্ষণায়াং দৃষ্টান্তমাহ দৃষ্টা চেতি যাগবিশেষে দৃশদি তণ্ডুলানাবপতি ইত্যুক্তং অনেন চ বিধিনা পাষাণে তণ্ডুলানামাবাপো বিধীয়তে তত্র মন্ত্রাকাঙ্ক্ষায়াং ধান্যমসী-ত্যুক্তং তেন ধান্যমসি ধিনুহি দেবান্ ধিনুহি যজ্ঞপতিং ধিনুহি মাং যজ্ঞন্যমিতি ইতি মন্ত্রেণ তণ্ডুলানাবপতীত্যর্থঃ। অত্র চ মন্ত্রলিঙ্গেন ধান্যস্যাবাপলক্ষণো বিনিয়োগোঽবগম্যতে। ধান্যত্বঞ্চ সতুষং ধান্য-মুচ্যতে ইত্যনেন তত্রৈব ধান্যপদস্য রূঢ়ঃ বিধিবাক্যেন চ তণ্ডুলস্য সোঽবমগ্যতে ইতি বিধিমন্ত্রয়োর্বিরোধে বিধেঃ প্রথমপ্রবৃত্তত্বেন বল-বত্তয়া তদধীনসিদ্ধতণ্ডুলতাৎপর্য্যানুরোধেন মন্ত্রস্যোত্তরপ্রবৃত্তত্বেন দুর্ব্ব-লতয়া তত্র ধান্যপদে তণ্ডুললক্ষণা দৃষ্টা চেত্যর্থঃ। যদ্যপ্যত্র বলাবল-ভাবসত্ত্বাৎ তথা প্রকৃতে তু তদ্বিরহান্ন দৃষ্টান্তদার্ষ্টান্তয়োঃ সমতা তথাপি তাৎপর্য্যানুপপত্ত্যা লক্ষণৈবেতি দৃষ্টান্তদার্ষ্টান্তয়োরর্থঃ। দৃষ্টান্তে বিধিবাক্যং তাৎপর্য্যগ্রাহকং দার্ষ্টান্তে তু উপসংহারবাক্যমিতি ফলতো ন কশ্চিদ্বিশেষঃ। ন চ লক্ষণাভ্যুপগমাপেক্ষয়া উপসংহারবাক্যস্য

দেবদত্তাদিশব্দবৎ শঙ্কেতি তস্যৈব মুখ্যত্বম্। শ্রাদ্ধং প্রতিরুচিরিতি যদৈব যজমানস্য শ্রাদ্ধেচ্ছা ভবতি তদৈব শ্রাদ্ধকালঃ শুক্লপক্ষেঽপি যস্যাং কস্যাঞ্চিত্তিথাবিত্যর্থঃ ॥ ৫২ ॥

---

গজচ্ছায়েতরপরতয়া সঙ্কোচস্যৈব ন্যায্যত্বেন নাস্য গজচ্ছায়াপদে কালতাৎপর্য্যগ্রাহকত্বমিতি বাচ্যং তথাত্বে গজচ্ছায়ায়া উপসংহারান-ন্বয়িত্বেন গজচ্ছায়া শ্রাদ্ধদেশঃ প্রকীর্ত্তিত ইত্যধ্যাহারেণৈব তদন্বয়ো বাচ্যঃ। তথাচ নানাপদাধ্যাহারকল্পনে গৌরবাত্তদপেক্ষয়া লক্ষণায়া এব ন্যায্যত্বাৎ। অন্যথা গঙ্গায়াং ঘোষ ইত্যাদাবপি গঙ্গায়াং মৎস্যঃ তীরে ঘোষ ইত্যধ্যাহারেণৈবোপপত্তৌ লক্ষণা ন স্যাদিতি। দ্রব্যশব্দে ইতি। দ্রব্যং ব্রাহ্মণসম্পত্তিরিত্যত্র দ্রব্যশব্দে ইত্যর্থঃ। কুতো নেতি লক্ষণায়া অবশিষ্টত্বাদিতি ভাবঃ। তথা হস্তিচ্ছায়ায়ামেব শ্রাদ্ধং ভবতু ন যোগবিশেষরূপে কালে ইতি পূর্ব্বপক্ষঃ নিরূঢ়লক্ষণায়া ইতি গজচ্ছায়াপদস্য তৎপ্রাপ্তিকালে লক্ষণা আধুনিকী তস্মিন্নর্থে তস্যা-নাদিপ্রয়োগাভাবাৎ অতোঽপ্রসিদ্ধত্বেন বিলম্বোপস্থিতিকতয়া দুর্ব্বলা। যোগবিশেষে তু তস্য লক্ষণা নিরূঢ়া তত্র তস্যানাদিপ্রয়োগযোগিত্বাৎ মুনিকৃতসঙ্কেতেনৈব তৎসিদ্ধেঃ। তত্র তস্যাশ্চ প্রসিদ্ধত্বেন শীঘ্রো-পস্থিতিকতয়া শক্তিতুল্যত্বেন বলবত্ত্বাদিত্যর্থঃ। অথেতি সঙ্কেতবিষ-য়েঽপি লক্ষণায়া নিরূঢত্বানঙ্গীকারে ইত্যর্থঃ। ননু গজচ্ছায়া ইতি নৈক-বচনান্তং গজচ্ছায়াপদং কিন্তু বহুবচনান্তং গজচ্ছায়াপদম্। তথাচ গজস্য ছায়া যেষু কালেষু ইতি ব্যুৎপত্ত্যা গজচ্ছায়াপদেন তদধিকরণকালা এব উচ্যন্তে। এবঞ্চ বহুব্রীহাবপি সম্বন্ধিলক্ষণায়া নিরূঢত্বমেবেতি সাম্যে কিং বিনিগমকমাহ কিঞ্চেতি। তথাচ সম্ভবতি মুখ্যত্বে লক্ষণায়া অযোগা-দিত্যর্থঃ। দেবদত্তাদিশব্দবদিতি পুত্ত্রাদিষু পিত্রাদিকৃতদেবদত্তাদি-নাম্নামিবেত্যর্থঃ। দ্বাদশেঽহনি পিতা নাম কুর্য্যাদিতি সামান্যং তত্রা-পীশ্বরেচ্ছায়াঃ সত্ত্বাৎ অত্রাপি মুনিসঙ্কেতবলেন তদনুমানাদিতি ভাবঃ।

অথাবশ্যককালাঃ। তত্র বিষ্ণুঃ। অমাবাস্যাস্তিস্রোঽষ্ট-কাস্তিস্রোঽন্বষ্টকা মাঘীপ্রোষ্ঠপদ্যূর্দ্ধং কৃষ্ণত্রয়োদশীব্রীহি-যবপাকৌ চেতি। এতাংস্তু শ্রাদ্ধকালান্ বৈ নিত্যানাহ প্রজাপতিঃ। শ্রাদ্ধমেতেম্বকুর্ব্বাণো নরকং প্রতিপদ্যতে॥ তিস্রোঽষ্টকা ইতি অষ্টকান্তরস্য নিত্যত্বব্যবচ্ছেদার্থং যা চাপ্যন্যা চতুর্থী স্যাত্তাঞ্চ কুর্য্যাদ্বিশেষত ইতি বায়ু-পুরাণবচনাৎ। তিস্রোঽন্বষ্টকা ইত্যন্বষ্টকান্তরব্যবচ্ছে-

স এবেতি ইচ্ছাবচ্ছিন্নপর্য্যুদস্তেতরকাল এব শ্রাদ্ধকাল ইত্যর্থঃ। যস্যাং কস্যাংশ্চিত্তিথাবিতি ইচ্ছাবলেন শ্রাদ্ধং কার্য্যমিতি শেষঃ॥ ৫২॥

আবশ্যককালমাহ নিত্যকালা ইতি। অষ্টকান্তরস্যেতি তস্য নিত্যত্বব্যবচ্ছেদার্থং তিস্র ইত্যর্থঃ সংখ্যাপরিমাণয়োর্ন্যূনাধিকত্বব্যব-চ্ছেদফলত্বাদিতি ভাবঃ। অষ্টকান্তরে প্রমাণমাহ যা চেতি। অত্র মিশ্রাঃ তিস্র ইতি সংখ্যা ন্যূনসংখ্যাব্যবচ্ছেদফলিকৈব ন ত্বধিকসংখ্যাব্যব-চ্ছেদিকা। পিত্র্যদানায় মূলে স্যুরষ্টকাস্তিস্র এব চ। যা চাপ্যন্যা চতুর্থী স্যাত্তাঞ্চ কুর্য্যাদ্বিশেষতঃ॥ ইত্যভিধায় আশু শ্রাদ্ধং দ্বিজঃ কুর্য্যাৎ সর্ব্বস্বে-নাপি নিত্যশঃ। ক্ষিপ্রং প্রাপ্নোতি শ্রেয়াংসি পরত্রেহ চ মোদতে॥ ইতি বায়ুপুরাণে নিত্যশ ইত্যভিধানাৎ। বর্ষাসু মেধ্যশাকৈশ্চ চতুর্থ্যামেব সর্ব্বদা ইতি ব্রাহ্মে সর্ব্বদা ইতি শ্রবণাচ্চ তস্মাদষ্টকাচতুষ্টয়মেব নিত্য-মিত্যাহুঃ তন্ন তথা সতি তিস্রমিতি ব্যর্থং স্যাৎ ন্যূনসংখ্যাব্যবচ্ছেদ-কত্বাপ্রসক্ত্যা নিরসনীয়াপ্রতীতেঃ। বায়ুপুরাণে চ। অষ্টকাস্তিস্র এব চ। যা চাপ্যন্যা চতুর্থী স্যাদিতি পৃথগভিধানং তিসৃণাং নিত্যত্বার্থং চতুর্থ্যাশ্চ কাম্যত্বার্থম্। অতএব আশু শ্রাদ্ধং দ্বিজঃ কুর্য্যাৎ সর্ব্বস্বেনাপি নিত্যশ ইতি তিসৃণামেব নিত্যত্বমুক্তম্। ক্ষিপ্রং প্রাপ্নোতি শ্রেয়াংসীত্য-নেন ফলদর্শনে চতুর্থ্যা এব কাম্যত্বমুক্তম্। অন্যথা চতুসৃণামেব নিত্যত্বে তত্র ফলান্বয়ো ন স্যাৎ নিত্যত্বকাম্যত্বয়োর্বিরোধস্য যাবজ্জী-বাধিকরণদর্শিতত্বাৎ ফলশ্রুতেঃ স্তুতিপরত্বে লক্ষণাপ্রসঙ্গাৎ কর্ম্মভেদ-

দার্থমেব মাঘীপৌর্ণমাসীতি কল্পতরুঃ। যথা বিষ্ণুধর্ম্মো-ত্তরে। ব্রীহিপাকে চ কর্ত্তব্যং যবপাকে চ পার্থিব। ন তাবাদ্যৌ মহারাজ বিনা শ্রাদ্ধং কথঞ্চন॥ পৌর্ণমাসী তথা মাঘী শ্রাবণী চ নরোত্তম। প্রোষ্ঠপদ্যামতীতায়াং তথা কৃষ্ণা ত্রয়োদশী। এতাংস্তু শ্রাদ্ধকালান্ বৈ নিত্যানাহ প্রজাপতিঃ॥ মাঘী ত্রয়োদশী বিশেষণমিত্যন্যে। নন্থ মঘাযুক্তা ত্রয়োদশী প্রোষ্ঠপদ্যূর্দ্ধমেব সম্ভবতি অতস্তদন-র্থকং স্যাৎ ন শ্রাবণ্যূর্দ্ধমপি সিংহস্থচন্দ্রেণোত্তরফল্গুনী-নক্ষত্রেণামাবাস্যায়াং ততঃ প্রাক্ ত্রয়োদশ্যাং মঘানক্ষ-ত্রসম্ভবাৎ॥ ৫৩॥

কল্পনাগৌরবাৎ অগত্যা হি জাতেষ্ট্যাদৌ সংবলিতাধিকারকল্পনাৎ। ব্রহ্মপুরাণে চ সর্ব্বদেত্যস্য শাকৈরিত্যনেন সম্বন্ধাৎ অশক্তাবপি শাকং বিনা শ্রাদ্ধঃ ন কুর্য্যাদিতি তদর্থাদিতি। অন্বষ্টকান্তরেতি বর্ষাকর্ত্তব্যান্বষ্ট-কাব্যবচ্ছেদার্থমিত্যর্থঃ। মাঘী পৌর্ণমাসীতি বিষ্ণুধর্ম্মোত্তরৈকবাক্যত্বা-দিতি তদভিপ্রায়ঃ। তদেব স্পষ্টয়তি তথেতি। বস্তুতঃ কার্ত্তিকীমাঘ্যাদি-পদানাং তত্তন্মাসীয়পৌর্ণমাস্যাং নিরূঢতয়া শীঘ্রোপস্থিতিকত্বমিতি কল্পতরোরভিপ্রায়ঃ। ন তাবিতি তৌ ব্রীহিযবৌ শ্রাদ্ধং বিনা নাদ্যৌ ন ভক্ষণীয়াবিত্যর্থঃ। এতেন শ্রাদ্ধং বিনা নৈতয়োঃ শুদ্ধিরিত্যপি সিধ্যতি। তথাচ ব্রীহিযবপাকৌ চেত্যনেন নিত্যতয়োক্তৌ তচ্ছ্রাদ্ধস্য প্রত্যবায়পরীহারো দ্রব্যশুদ্ধিশ্চেতি দ্বয়মেব প্রয়োজনং অতোঽকৃত-শ্রাদ্ধাভ্যাং এতাভ্যাং ন দৈবপিত্র্যকর্ম্মকরণমিত্যর্থ ইতি বোধ্যম্। ত্রয়োদশীবিশেষণমিতি মঘাযুক্তা মাঘীতি যোগবলাৎ মঘাযুক্তাং ত্রয়ো-দশীমিত্যেকবাক্যত্বাচ্চেতি ভাবঃ। প্রোষ্ঠপদ্যূর্দ্ধমেব ভবতীতি অমা-বাস্যায়াং সূর্য্যাচন্দ্রমসোরেকনক্ষত্রাবস্থানং নিয়তং সূর্য্যাচন্দ্রমসোর্যঃ পরঃ সন্নিকর্ষঃ সামাবাস্যেতি গোভিলোক্তেঃ। তথাচ ত্রয়োদশ্যাং চন্দ্রস্য

ব্রীহিঃ শরৎপক্কধান্যং তত্রৈব ব্রীহিশব্দস্য মুখ্যত্বাৎ। অন্যথা ব্রীহ্যুপচারে শালিপ্রতিনিধিদর্শনং পৃথগুপাদানঞ্চ নোপপদ্যতে। তথা ছন্দোগপরিশিষ্টং কাত্যায়নঃ। যথোক্তবস্তুসম্পত্তৌ গ্রাহ্যং তদনুকারি যৎ। যবানামিব গোধূমা ব্রীহীণামিব শালয়ঃ॥ ব্রীহয়ঃ শালয়ো মুদ্গা গোধূমাঃ সর্ষপাস্তিলাঃ। যবাশ্চৌষধয়ঃ সপ্ত বিপদো ঘ্নন্তি ধারিতাঃ॥ বামনপুরাণে। হবিষা সংস্কৃতা যে তু যবগোধূমশালয়ঃ।

---

মঘাবস্থানেঽমাবাস্যায়াং উত্তরফল্গুনীনক্ষত্রে তদবস্থিতিঃ স্যাৎ তদাচ সূর্য্যস্যাপ্যুত্তরফল্গুনীনক্ষত্রাবস্থিতিরাবশ্যকী। অন্যথৈকনক্ষত্রাবস্থিতিরূপস্য পরমসন্নিকর্ষস্যাভাবপ্রসঙ্গাদিত্যুত্তরফল্গুনীকন্যার্কে মঘাত্রয়োদশী প্রোষ্ঠপদ্যূর্দ্ধমেব ভবতীতি তৎপ্রাপকং প্রোষ্ঠপদ্যূর্দ্ধমিতি নিরর্থকমিত্যভিমানঃ। প্রোষ্ঠপদীমুখ্যচান্দ্রভাদ্রপূর্ণিমাশ্রাবণ্যূর্দ্ধমপীতি তথাচ উত্তরফল্গুনীনক্ষত্রস্য সিংহকন্যোভয়ঘটকত্বাৎ শ্রাবণীপূর্ণিমানন্তরামাবাস্যায়াং সিংহার্কসম্বন্ধিন্যাং তন্নক্ষত্রলাভেঽপি সূর্য্যাচন্দ্রমসোরুত্তরফল্গুনীসিংহাবস্থানেন পরমসন্নিকর্ষাসম্ভবাৎ তৎপূর্ব্বত্রয়োদশ্যাং মঘাযোগসম্ভবেন তদ্ব্যাবর্ত্তনার্থং প্রোষ্ঠপদ্যূর্দ্ধমিতি সার্থকমিতি ভাবঃ। তস্মিংস্তু পক্ষে মাঘ্যা নিত্যত্বং বিষ্ণুধর্ম্মোত্তরবচনাদেবেতি মন্তব্যম্॥ ৫৩॥

ব্রীহিপদার্থমাহ ব্রীহিরিতি। হৈমন্তিকবারণায় শরদিতি। অন্যথা সামান্যতঃ শালিমাত্র এব ব্রীহিশব্দস্য মুখ্যত্বে ব্রীহ্যুপচারে ব্রীহ্যসম্পত্তৌ। ব্রীহ্যপচারে ইতি পাঠে ব্রীহিকার্য্যে ইত্যর্থঃ। পৃথগুপাদানং দর্শয়তি ব্রীহয় ইত্যাদিবচনদ্বয়েন। ননু শালের্ব্রীহিপ্রতিনিধিত্বস্য তস্মাৎ পৃথগ্ভাবস্য চ সিদ্ধাবপি ব্রীহিপদস্য শরৎপক্কধান্যে মুখ্যত্বং ন হৈমন্তিকে ইত্যত্র কিং বিনিগমকং ইত্যত আহ অতএবেতি ব্রীহিশব্দস্য শরৎপক্কধান্যে মুখ্যত্বাদেবেত্যর্থঃ। তেন দেবানিতি। তথাচ ব্রহ্মপুরাণে শরৎপক্কধান্যেনৈব শ্রাদ্ধং বিহিতং বিষ্ণুনা চ ব্রীহিযবপাকৌ চেত্যাদিনা ব্রীহিপাকে

তিলমুদ্গাদয়ো মাষা ব্রীহয়শ্চ প্রিয়া হরেঃ॥ অতএব কামধেনুকৃতা আশ্বিনমাসীয়তিথিকৃত্যে নবান্নশ্রাদ্ধ-বিষয়ং ব্রহ্মপুরাণবচনং লিখিতম্॥ যথা। শুক্লপক্ষে নবং ধান্যং পক্বং জ্ঞাত্বা সুশোভনম্। গচ্ছেৎ ক্ষেত্রী বিধা-নেন গীতবাদ্যপুরঃসরঃ॥ ইত্যভিধায় তেন দেবান্ পিতৃংশ্চৈব তর্পয়েদর্চ্চয়েত্তথা। ইত্যস্মাদেব বচনাৎ শুক্লপক্ষ এব তৎ শ্রাদ্ধং বৃশ্চিকে ব্রীহিপাকনিমিত্তং শ্রাদ্ধং ন স্যাদিতি চেন্ন স্যাদেব নবন্নাগমনিমিত্তন্তু স্যাদিতি ক্রমঃ। অত-এব নবোদকে নবান্নে চেতি বক্ষ্যতি অথবা ব্রীহিপ্রাপ্তৌ ব্রীহিপাকনিমিত্ত এব শ্রাদ্ধে ধান্যান্তরবিধানাৎ বৃশ্চি-

---

শ্রাদ্ধং বিহিতং এতয়োশ্চৈকবাক্যতালাঘবেন ব্রীহিশব্দস্য শরৎপক্বধান্যে মুখ্যত্বং সিদ্ধমিতি ভাবঃ। শুক্লপক্ষ এব এতচ্ছ্রাদ্ধমিতি কালাকাঙ্ক্ষা-নিবর্ত্তয়া শুক্লপক্ষ ইত্যস্য দেবতাপিতৃতর্পণেঽপ্যন্বয়াদিতি ভাবঃ। বৃশ্চিক ইতি বৃশ্চিকপক্বস্য শরৎপক্বত্বাভাবাদিতি ভাবঃ। এতেন ন তাবাদ্যাবিতি বচনাৎ ভক্ষণনিমিত্তকং শ্রাদ্ধমিতি কৈশ্চিদুক্তং নিরস্তম্। ব্রীহিপাকে চ কর্ত্তব্যমিত্যাদিবিধিবাক্যে পাকস্যৈব নিমিত্তত্বাভিধানাৎ বিনা শ্রাদ্ধমিত্যভিধানেন তু শ্রাদ্ধং বিনা ভক্ষণ-নিষেধমাত্রমুক্তং ন তু ভক্ষণস্য শ্রাদ্ধনিমিত্তত্বমিতি ভাবঃ। ননু তর্হি বৃশ্চিকে প্রাচাং শ্রাদ্ধাচরণং কথমুপপদ্যতাং অত আহ নবান্নাগমন-নিমিত্তমিতি। তথাচ নবোদকে নবান্নে চ ইত্যাদিবচনোক্তং নবান্ন-শ্রাদ্ধং পৃথগেবেতি ভাবঃ। অত্র যদ্যপি নবান্নে চেতি নিমিত্তসপ্তম্যা নবান্নস্যৈব নিমিত্তত্বমায়াতি তথাপি নবশস্যাগমে তথেতি বিষ্ণুপুরাণাৎ তস্যৈব নিমিত্তত্বং আগমশ্চ তেন কর্ম্মানুষ্ঠানং নিমিত্ততা চাস্য নবান্না-গমযবান্নাগমোভয়সাধারণেন নবান্নাগমত্বেন একরূপেণৈব লাঘবাৎ। ব্রীহিপাকে চ কর্ত্তব্যং যবপাকে চ পার্থিবেতি তু ন ব্রীহিপাকত্বাদিনা

কে ব্রীহিপাকনিমিত্ত এব শ্রাদ্ধম্। তথাচ ছন্দোগপরিশিষ্টবচনম্। শরদ্বসন্তয়োঃ কেচিন্নবযজ্ঞং প্রচক্ষতে। ধান্যপাকবশাদন্যে শ্যামাকো বনিনঃ স্মৃতঃ॥ বনী বানপ্রস্থঃ॥ ৫৪॥

যজ্ঞতুল্যন্যায়াৎ শ্রাদ্ধমপি ধান্যপাকবশাদেব অতএব

নিমিত্ততাবোধকং কিন্তু শ্রাদ্ধদ্বয়বোধকমেব অন্যথা নবান্নস্য ব্রীহিপাকাদের্ব্বা নিমিত্তত্বে তচ্ছ্রাদ্ধস্য নিত্যতয়া তদব্দে নবান্নেন কর্ম্মাননুষ্ঠাতুরপি তচ্ছ্রাদ্ধাকরণে প্রত্যবায়াপত্তেরিতি বোধ্যম্। ননু নবান্নাগমনিমিত্তেন পৃথক্ শ্রাদ্ধকল্পনে শ্রুতিভেদঃ স্যাৎ অত আহ অথবেতীতি কেচিৎ তন্ন অথবা পক্ষেঽপি নবান্নাগমনিমিত্তমপি নিত্যমিত্যনেন বক্ষ্যমাণগ্রন্থেন শ্রাদ্ধদ্বয়াঙ্গীকারাৎ শ্রুতিভেদস্যাবশ্যকত্বাৎ। বস্তুতস্তু ননু তর্হি ব্রীহিপাকনিমিত্তকশ্রাদ্ধলোপে প্রত্যবায়ঃ স্যাৎ অত আহ অথবেতি। ব্রীহিপাকনিমিত্তমেব ইত্যেবকারোঽপ্যর্থঃ। ননু প্রাপ্তব্রীহিপাকনিমিত্তকশ্রাদ্ধে ধান্যান্তরং বৃশ্চিকাখ্যঃ কালশ্চ যদি বিধীয়তে তদা গুণদ্বয়বিধানাৎ বাক্যভেদাপত্তিরিতি চেৎ ইষ্টত্বাৎ অনন্যগতের্ব্বচনাৎ। অথবা কালো ন বিধীয়তে কিন্তু ধান্যান্তরমেব তদ্বিধেরন্যথানুপপত্ত্যা চ কালোঽনুমীয়তে অতএবোক্তং ধান্যান্তরবিধানাদ্বৃশ্চিকেঽপীতি অন্যথা ধান্যান্তরকালয়োর্ব্বিধানাদিত্যেব ব্রুয়াদিতি। ধান্যান্তরবিধৌ প্রমাণমাহ তথেতি। অন্যে ইতি ধান্যপাকবশাৎ নবযজ্ঞং প্রচক্ষতে ইত্যন্বয়ঃ। অত্র ধান্যপাকবশাদিতি সামান্যাভিধানেন পূর্ব্বার্দ্ধবিহিতশরৎকর্ত্তব্যস্য বসন্তকর্ত্তব্যস্য চ নবযজ্ঞস্য হৈমন্তিকাদিপ্রাক্বশেনাপি বৃশ্চিকাদাবর্থবশলভ্যে কর্ত্তব্যতোক্তেতি ভাবঃ। বনীতি ব্যাচষ্টে বানপ্রস্থ ইতি। তস্য শ্যামাকপাকবশেন বর্ষাসু নবযজ্ঞ ইত্যর্থঃ। অতএব বনী বর্ষাসু শ্যামাকেনেত্যাদিস্মৃতয়ঃ। নবযজ্ঞো নবান্নাগমনিমিত্তিকো যাগঃ স চ শালিনৈব কার্য্যঃ॥ ৫৪॥

নমু যজ্ঞ এব ধান্যান্তরবিধিরুক্তো ন তু শ্রাদ্ধ ইত্যত আহ যজ্ঞ-

নিত্যত্বং শুক্লপক্ষনিয়তত্বঞ্চ নবান্নাগমনিমিত্তমপি নিত্যমিতি বক্ষ্যতি। ধনুষ্যপি কুতো ন ভবতীতি চেন্ন জ্যোতিঃশাস্ত্রবিরোধাৎ। যথা বরাহঃ। বৃশ্চিকে শুক্লপক্ষে তু নবান্নং শস্যতে বুধৈঃ। অপরে ক্রিয়মাণং হি ধনুষ্যেব কৃতং ভবেৎ॥ যৎ কৃতং ধনুষি শ্রাদ্ধং মৃগনেত্রাসু রাত্রিষু। পিতরস্তন্ন গৃহ্লন্তি নবান্নামিষকাঙ্ক্ষিণঃ॥ এবঞ্চ ধনুষঃ পর্য্যুদাসাদ্বৃশ্চিকে তদকরণে মাঘেঽপি তৎ কর্ত্তব্যমেব। নিত্যানিতি নিত্যকর্ম্মসম্বন্ধান্নিত্যান্ নিত্যত্বমত্রাবশ্যকত্বমভিপ্রেতং অকরণে প্রত্যবায়শ্রুতেঃ। শাতাতপঃ।

---

তুল্যন্যায়াদিতি। শ্রাদ্ধে যজ্ঞানন্তরকর্ত্তব্যত্বাভিধানং ন্যায়ঃ। অতএব বৃশ্চিকাদিক্রিয়মাণশ্রাদ্ধস্য ব্রীহিপাকনিমিত্তকশ্রাদ্ধত্বাদেব নিত্যত্বমিতি ব্রীহিযবপাকৌ চেত্যাদিনা তচ্ছ্রাদ্ধস্য নিত্যত্বাভিধানাৎ শুক্লপক্ষে নবং ধান্যমিত্যনেন শুক্লপক্ষকর্ত্তব্যত্বাভিধানাচ্চ ইতি ভাবঃ। নন্বেবং শরদ্বিহিতশ্রাদ্ধস্যৈব নিত্যত্বমায়াতং তর্হি হৈমন্তিকনবান্নগমনানিমিত্তকশ্রাদ্ধস্য নিত্যত্বে কিং প্রমাণং তস্যাপি আগ্রয়ণাভিধেয়স্য অকৃতাগ্রয়ণশ্চৈব ধান্যজাতং নরোত্তম। রাজমাষানণূংশ্চৈব মসূরাংশ্চ বিবর্জ্জয়েদিত্যনেন গ্রহণে চ ব্যতিপাতে শালিধান্যাগমে তথা। জন্মর্ক্ষগ্রহপীড়ায়াং শ্রাদ্ধং পার্ব্বণমিষ্যতে॥ ইতি ব্রহ্মপুরাণেন চ শালিপদবাচ্যহৈমন্তিকসংস্কারার্থং কর্ত্তব্যত্বাভিধানাৎ। অত আহ নবান্নাগমনিমিত্তমপীতি অনেন চ বচনেন যথা ব্রীহিশ্রাদ্ধং বিনা ব্রীহীণামভক্ষ্যত্বং তথা নবান্নাগমনশ্রাদ্ধং বিনা হৈমন্তিকানামপি ইতি প্রতিপাদিতম্। বক্ষ্যতীতি নবোদকে নবান্নে চ গৃহপ্রচ্ছাদনে তথা। পিতরঃ স্পৃহয়ন্ত্যন্নমষ্টকাসু মঘাসু চ। তস্মাদ্দদ্যাৎ সদা যুক্তো বিদ্বৎসু ব্রাহ্মণেষু চেত্যত্র সদিতি শ্রবণান্নিত্যত্বমিতি বক্ষ্যতীত্যর্থঃ। তথাচৈতয়োঃ শ্রাদ্ধয়োস্তন্ত্রতা ন্যায়বলেনৈকমেবানুষ্ঠানং ন তু পৃথগিতি

**সর্ব্বস্বেনাপি কর্ত্তব্যং শ্রাদ্ধং বৈ রাহুদর্শনে। অকুর্ব্বাণস্তু তচ্ছ্রাদ্ধং পঙ্কে গৌরিব সীদতি ॥ নবোদকে নবান্নে চ গৃহপ্রচ্ছাদনে তথা। পিতরঃ স্পৃহয়ন্ত্যন্নমষ্টকাসু মঘাসু চ। তস্মাদ্দদ্যাৎ সদা যুক্তো বিদ্বৎসু ব্রাহ্মণেষু চ। সর্ব্বস্বেনাপীতি অশুদ্ধধনেনাপীত্যর্থঃ অথবা যস্যাল্পবিত্তস্য শ্রাদ্ধসামগ্রীব্যয়েন সর্ব্বস্বক্ষয়ো ভবতি তেনাপি কর্ত্তব্যমিত্যর্থঃ এতেনাবশ্যকত্বং দর্শিতং অকরণে দোষশ্রবণাচ্চ ॥৫৫॥**

---

ভাবঃ। ধনুষ্যপীতি। অত্রাপি নবান্নাগমসম্ভবাদিতি ভাবঃ। অত্র কেচিৎ বৃশ্চিকশুক্লপক্ষাকরণে কৃষ্ণপক্ষে পঞ্চমীপর্য্যন্তং শ্রাদ্ধং কর্ত্তব্যমিতি প্রলপন্তি তদসৎ প্রমাণাভাবাৎ। অপরে কৃষ্ণপক্ষে। মৃগনেত্রাস্বিতি মৃগশিরোনক্ষত্রং মৃগঃ স এব নেতা প্রাপয়িতা যাসাং রাত্রীণাং তা মৃগনেত্রা মার্গশীর্ষস্য বিংশতিদণ্ডাধিকত্রয়োবিংশতিদিনোপরি ভবন্তি। তথাহি মার্গশীর্ষে বৃশ্চিকস্থসূর্য্যস্য বৃষ এবাস্তগমনং তস্য স্বরাশিতঃ সপ্তমরাশাবস্তনিয়মাৎ। বৃষশ্চ কৃত্তিকাপাদত্রয়ং সম্পূর্ণরোহিণী মৃগশিরোঽর্দ্ধমিতি নবনক্ষত্রপাদপরিচ্ছিন্নঃ। তত্র ত্রিংশদ্দিনাত্মকমাসস্য ভাগব্যবস্থায়াঃ পাদং প্রতি বিংশতিদণ্ডাধিকদিবসত্রয়ং ভবতি। তেন মৃগশিরোঽর্দ্ধেন শেষীভূতেন চত্বারিংশদ্দণ্ডাধিকদিনষট্কং বৃশ্চিকস্য শেষে ভবতীতি তা মৃগনেত্রা ইতি। তথাচ জ্যোতিষে। দিনত্রয়াধিকে বিংশে রাত্রে মার্গস্য বৈ গতে। মৃগনেত্রা স্মৃতা রাত্রিস্তত্র শ্রাদ্ধং বিবর্জ্জয়েৎ ॥ তথা। মৃগনেত্রা ভবেচ্ছেষৈঃপাদোনৈঃ সপ্তভির্দিনৈঃ। ইতি। অত্র রাত্রিপদং অহোরাত্রপরং রাত্রৌ শ্রাদ্ধাকরণস্য সিদ্ধত্বাৎ। নবান্নামিষমিতি নবান্নমেবামিষং লোভ্যদ্রব্যং তৎকাঙ্ক্ষিণ ইত্যর্থঃ। নবান্নশ্রাদ্ধে নিষেধান্তরমপি বোধ্যম্। যথা। সূর্য্যে চৈব বিশাখগে স্মর তিথৌ পাপে ত্রিজন্মান্বিতে নন্দ্যমন্দমহীজকাব্যদিবসে পৌষে মধৌ কার্ত্তিকে। ভেষ্গ্রাহি শিবেষু বিষ্ণুশয়নে কৃষ্ণে শশিন্যষ্টমে শ্রাদ্ধং ভোজনকং নবান্নবিহিতং পুত্রার্থনাশপ্রদম্ ॥ সূর্য্যশ্চ বিশাখগো বিংশতিদণ্ডাধিক-

তথা নবোদকে সর্ষোপক্রমে। গৃহপ্রচ্ছাদনে নবগৃহসম্পত্তৌ। মঘাসু ত্রয়োদশীযোগে বিদ্বৎসু ব্রাহ্মণেষু চ প্রাপ্তেষ্বিত্যর্থঃ। যুক্তো যত্নবান্ সদাগ্রহণান্নিত্যত্বম্। হারীতঃ। তীর্থে দ্রব্যোপপত্তৌ চ ন কালমবধারয়েৎ।

বৃশ্চিকপ্রথমদিনত্রয়পর্য্যন্তমিতি। এবঞ্চেতি বিশেষপর্য্যুদাসেন তদিতরসামান্যস্য প্রাপ্তেরিতি ভাবঃ। মাঘেঽপীতি অপিশব্দাৎ ফাল্গুনেঽপি। অতএব পৌষে চৈত্রে কৃষ্ণপক্ষে নবান্নং নাচরেদ্বুধঃ। ইত্যনেন চৈত্র এব নিষিদ্ধো ন তু ফাল্গুনাদিরিতি। অত্রাপ্যসম্ভবে ব্রীহিযবয়োরন্যোন্যকালাৎ প্রাগপি তৎ কর্ত্তব্যম্। শ্যামাকৈর্ব্রীহিভিশ্চৈব যবৈরন্যোন্যকালতঃ। প্রাগ্ যষ্টুং যুজ্যতেঽবশ্যং ন ত্বেবাগ্রয়ণাত্যয়ঃ॥ ইতি বচনাদিতি। অত্র মৈথিলাঃ ধান্যান্তরেণ ব্রীহিপাকশ্রাদ্ধে কৃতে প্রত্যবায়পরীহারস্য জাতত্বেঽপি তদ্দ্রব্যেণ শ্রাদ্ধস্যাজাতত্বাৎ ব্রীহের্ন শ্রাদ্ধার্হতা ন বা ভক্ষণার্হতা ইত্যাহুঃ। তন্ন ব্রীহিস্থানে ধান্যান্তরবিধানাৎ তৎকৃতশ্রাদ্ধস্য ব্রীহিশ্রাদ্ধে কার্য্যকারিত্বে বিরোধাভাবাৎ। ননু এতাংস্তু শ্রাদ্ধকালান্ বৈ নিত্যানাহ প্রজাপতিরিত্যনেনামাবাস্যাদিকালোপাধের্নিত্যত্বমুক্তং তচ্চ বাধিতমত আহ নিত্যানিতি নিত্যসম্বন্ধাদিতি। তথাচ এতান্ শ্রাদ্ধকালান্ নিত্যান্ নিত্যশ্রাদ্ধনিমিত্তান্ প্রজাপতিরাহ ইতি বচনার্থঃ। শ্রাদ্ধস্য হি ত্যাগরূপস্য নিত্যত্বং বাধিতং অত আহ নিত্যত্বমাত্রেতি রাহুদর্শননিমিত্তকশ্রাদ্ধস্যাপি নিত্যত্বমাহ শাতাতপ ইতি। তদ্ধনেনাপীতি ধনং সপ্তবিধং শুদ্ধমিত্যনেনান্বয়াগতাদিসপ্তবিধধনস্যৈব শুদ্ধত্বোক্তেস্তদিতরেণাশুদ্ধেন চৌর্য্যাদিলব্ধধনেনাপীত্যর্থঃ। অত্র পক্ষে সঙ্কল্পেনাপীত্যস্য লক্ষণাপত্তেরাহ অথবেতি। অকরণ ইতি পূর্ব্বার্দ্ধ ইতি শেষঃ॥ ৫৫॥

বর্ষোপক্রমে ইতি বর্ষারম্ভে আর্দ্রাস্থরবাবিতি যাবৎ। আর্দ্রাদিতো বিশাখান্তং রবিবারেণ বর্ষতীত্যনেনার্দ্রাস্থরবৌ বর্ষারম্ভপ্রতীতেঃ। নবগৃহসম্পত্তাবিতি নবগৃহসমাপ্তিনিমিত্তকশ্রাদ্ধং পার্ব্বণবিধিনা কার্য্যং তত্র প্রবেশে তু নান্দীমুখশ্রাদ্ধমিতি কেচিৎ।

পাত্রঞ্চ ব্রাহ্মণং প্রাপ্য সদ্যঃ শ্রাদ্ধং বিধীয়তে॥ তীর্থং বারাণস্যাদি। দ্রব্যং খড়্গমাংসাদি। ন কালমবধারয়েৎ নামাবাস্যাশ্রাদ্ধং পরাহ্লং বা প্রতীক্ষেত নিষিদ্ধন্তু রাত্র্যাদি বর্জ্জয়েদেব। অতএব দেবীপুরাণে। অকালেঽপ্যথবা কালে তীর্থে শ্রাদ্ধং তথা নরৈঃ। প্রাপ্তৈরেব সদা কার্য্যং কর্ত্তব্যং পিতৃতর্পণম্॥ পিণ্ডদানন্তু তচ্ছস্তং পিতৃণাঞ্চাতিদুর্লভম্। বিলম্বো নৈব কর্ত্তব্যো ন চ বিঘ্নং সমাচরেৎ॥ ন কালমবধারয়েদিত্যনেন নিত্যত্বমস্য দর্শিতম্। ব্যক্তমাহ স এব অষ্টকামাঘ্যভ্যুদয়াস্তীর্থপাত্রোপপত্তয়ঃ। পিতৃণামতিরেকোঽয়ং মাসিকান্নাদ্‌ধ্রুবঃ স্মৃতঃ॥ মাসিকান্নাদমাবাস্যাশ্রাদ্ধাৎ অয়মতিরেকোঽধিকোঽষ্টকাদিশ্রাদ্ধকালঃ ধ্রুবমাবশ্যক ইত্যর্থঃ। কৃষ্ণপক্ষমাত্রং নিত্যমিত্যাহ কাত্যায়নঃ। শ্রদ্ধান্বিতঃ শ্রাদ্ধং কুর্ব্বীত শাকেনাপ্যপরপক্ষং

বস্তুতস্তু নবগৃহসম্পত্তাবিতি সতি সপ্তম্যা নবগৃহসমাপ্ত্যুত্তররূপঃ প্রবেশকাল এবোক্তঃ প্রবেশে নববেশ্মন ইত্যনেনৈকমূলত্বলাঘবাৎ অন্যথা শ্রুতিভেদকল্পনে শ্রাদ্ধদ্বয়কল্পনে চ গৌরবং স্যাৎ। অতএব বর্দ্ধমানোপাধ্যায়েন প্রচ্ছাদনে প্রবেশে ইতি ব্যাখ্যাতম্। কেবলমঘানক্ষত্রস্য শ্রাদ্ধনিমিত্ততায়াঃ স্বয়মভ্যুপগমাদাহ ত্রয়োদশীযোগ ইতি প্রোষ্ঠপদ্যূর্দ্ধং ত্রয়োদশীযোগ ইত্যর্থঃ। প্রোষ্ঠপদ্যামতীতায়াং মঘাযুক্তাং ত্রয়োদশীম্। প্রাপ্য শ্রাদ্ধং হি কর্ত্তব্যং মধুনা পায়সেন চেতি বক্ষ্যমাণবচনৈকবাক্যত্বাদিতি ভাবঃ। পাত্রং পঙ্‌ক্তিপাবনত্বাদিগুণযুক্তং খড়্গমাংসাদীত্যাদিনা মধ্বাদিপরিগ্রহঃ। নিষিদ্ধন্ত্বিতি রাত্র্যাদীনাং সামান্যত এব পর্য্যুদস্তত্বাদিতি ভাবঃ। ননু রাত্র্যাদিপর্য্যুদাসবিধিবিরোধাৎ ন কালমবধারয়েদিত্যস্য সঙ্কোচঃ। কিংবা ন কালমবধারয়েদিত্যনেন বিরোধাৎ রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত ইত্যাদি-

নাতিক্রামেৎ মাসি মাসি বোঽশনমিতি শ্রুতেঃ। বৈজবাপঃ কৃষ্ণপক্ষে শ্রাদ্ধং কুর্ব্বীতান্নং সংস্কৃত্য। ব্রহ্মপুরাণে। পয়োমূলফলৈঃ শাকৈঃ কৃষ্ণপক্ষে চ সর্ব্বদা। পরাধীনঃ প্রবাসী চ নির্ধনো বাপি মানবঃ। মনসা শুদ্ধভাবেন শ্রাদ্ধে দদ্যাত্তিলোদকম্। ন সন্তি পিতরশ্চেতি কৃত্বা মনসি যো নরঃ। ন তর্পয়তি তান্ ভক্ত্যা দেহান্তদ্রুধিরঞ্চ তে। পিবন্তি সর্ব্বনাশঞ্চ কুর্ব্বন্ত্যথ পদে পদে। এতেন কৃষ্ণপক্ষস্য যস্যাং কস্যাঞ্চিত্তিথৌ শ্রাদ্ধং

---

পর্য্যুদাসবিধেরেব সঙ্কোচ ইত্যত্র কিং বিনিগমকমিতি চেন্ন পর্য্যুদাসবিধেঃ সঙ্কোচে আসুরী রাত্রীরন্যত্র ইত্যাদিনিন্দার্থবাদানামপি সঙ্কোচঃ বৈপরীত্যে তু নিন্দার্থবাদবিরহাৎ ন তৎসঙ্কোচ ইত্যস্যৈব বিনিগমকত্বাৎ। অতএবেতি যত এব ন কালমবধারয়েদিত্যস্য ন প্রশস্তকালমবধারয়েদিত্যেবার্থঃ। ন তু কালমাত্রং অবিচারয়েদিত্যর্থোঽত এবেত্যর্থঃ। অকালেঽপ্রশস্তকালেঽমাবাস্যাতদপরাহ্লাদিপ্রশস্তভিন্নকালে ইত্যর্থঃ। কালেঽমাবাস্যাতদপরাহ্লাদৌ প্রাপ্তেরিত্যনেন প্রাপ্তের্নিমিত্তত্বং দর্শিতম্। তেন তীর্থপ্রাপ্তাবিতি সঙ্কল্পে নিবেশনীয়ম্। পিণ্ডদানন্ত্বিতি দ্রব্যসম্পত্তৌ শ্রাদ্ধকরণাসামার্থ্যে পিণ্ডদানমাত্রং কার্য্যং অয়ং কর্ম্মান্তরবিধিরুক্তঃ গয়াপিণ্ডদানবৎ। বিলম্বো নৈবেতি স্বেচ্ছয়েতি শেষঃ। তেন পূর্ব্বদিনে সায়াহ্নপ্রাপ্তৌ তীর্থপ্রাপ্তাবপি পরদিনে শ্রাদ্ধার্থং বিলম্বো নৈব কর্ত্তব্য এবেতি সিদ্ধং তীর্থপ্রাপ্ত্যব্যবহিতপর্য্যদস্তেতরকালে এব শ্রাদ্ধস্য কর্ত্তব্যত্বাৎ। অতএব মিশ্রাঃ যদি রাত্রাদৌ তীর্থপ্রাপ্তিস্তত্রাপ্যুত্তরদিনেঽচিরোদিতমুহূর্ত্তদ্বয়ানন্তরং শ্রাদ্ধমুচিতমেব প্রাপ্ত্যুত্তরদিনবিহিতমুহূর্ত্ত এব শ্রাদ্ধবিধানাৎ ন চ বিলম্বো দোষায় স্বয়মকরণাৎ ন চৈবং প্রাপ্ত্যনন্তরমেব বক্ষ্যতে তদন্তেঽপি শ্রাদ্ধাপত্তিঃ প্রাপ্তেরেব কার্য্যমিত্যনেন প্রাপ্ত্যনন্তরবিহিতমুহূর্ত্তস্য

কর্ত্তব্যম্। দশম্যাদৌ প্রাশস্ত্যমাহ মনুঃ। কৃষ্ণপক্ষে দশম্যাদৌ বর্জ্জয়িত্বা চতুর্দ্দশীম্। শ্রাদ্ধে প্রশস্তাস্তিথয়ো যথৈতা ন তথেতরাঃ ॥ ৫৬ ॥

আপস্তম্বঃ। মাসি মাস্যপরপক্ষস্যাপরাহ্লঃ শ্রেয়ান্ তথাপরপক্ষস্য জঘন্যান্যহানি সর্ব্বেষ্বেবাপরপক্ষস্যাহঃসু ক্রিয়মাণেষু পিতৄন্ প্রীণাতি তথা শ্রেয়াংসীত্যর্থঃ। জঘন্যানি দশম্যাদীনি যথৈতান্ তথেতরাঃ প্রশস্তাঃ শ্রেয়াংসীত্যভিধানাৎ অন্যাস্বপি তিথিষু শ্রাদ্ধং দর্শিতম্। অমা-

---

তচ্ছ্রাদ্ধাধিকরণত্বেন বিহিতস্য ব্যতিক্রমাদিত্যাহুঃ। অন্যে তু পরদিনে শ্রাদ্ধং ন কর্ত্তব্যমেব নিমিত্তনৈমিত্তিকয়োঃ সমানদিনকর্ত্তনিয়মাৎ অন্যথা গৃহপ্রবেশেঽপি পরদিনে শ্রাদ্ধং স্যাদিতি বদন্তি। স এব হারীত এব নিত্যত্বং ব্যক্তমাহেত্যর্থঃ। শাকেনাপীতি অন্নাদ্যসম্ভবে শাকেন অপিকারাৎ পয়োমূলফলৈরপি চ কৃষ্ণপক্ষে শ্রাদ্ধং কুর্য্যাদেবেত্যর্থঃ যস্যাং কস্যাঞ্চিদিতি সকৃৎ কৃতে কৃতঃ শাস্ত্রার্থ ইতি ন্যায়াদিতি ভাবঃ। দশম্যাদাবিতি দশম্যাদয় ইত্যর্থে সুপাং সুপ্ তথাচ কৃষ্ণপক্ষে শ্রাদ্ধে তন্নিমিত্তকশ্রাদ্ধে চতুর্দ্দশীং বর্জ্জয়িত্বা দশম্যাদয়ো যথা প্রশস্তাঃ তথা ইতরঃ প্রতিপদাদয়ো ন প্রশস্তা ইত্যর্থঃ ॥ ৫৬ ॥

শ্রেয়ানিত্যনেন অপরাহ্লং বিনাপি শ্রাদ্ধং দর্শিতম্। সর্ব্বেষ্বিতি পক্ষং ব্যাপ্য ক্রিয়মাণেষু শ্রাদ্ধেষু পিতৄনতিশয়েন প্রীণাতীত্যর্থঃ। তথেতি ব্যাচষ্টে শ্রেয়াংসীতি তৎ পূর্ব্বং শ্রেয়ানিত্যুক্তেরিতি ভাবঃ। জঘন্যান্যহানি শ্রেয়াংসীত্যুক্তিবললভ্যং অন্যাসামপ্রাশস্ত্যমাহ ন তথেতরা ইতি। অতিপ্রাশস্ত্যমুক্ত্বা দশম্যাদিভ্যোঽপি প্রাশস্ত্যং দর্শ এবাঙ্গভূতেতি। তথাচ কৃষ্ণপক্ষত্বেনৈব নিমিত্ততা সাগ্নিনিরগ্নিসাধারণী অন্যত্রাঙ্গভূতাগ্ন্যুদ্ধরণাসম্ভবাদ্দর্শ এব সাগ্নিনা তচ্ছ্রাদ্ধং ক্রিয়তে এতদর্থমেবাস্যাষ্টকাবৃদ্ধিঃ কৃষ্ণপক্ষোঽয়নদ্বয়মিত্যত্রামাবাস্যায়াঃ পৃথগুপাদানং উক্তন্যায়মূলমেব চ ন দর্শেন বিনা শ্রাদ্ধমাহিতাগ্নের্দ্বিজন্মন ইতি বচনং

বাস্যায়ামতিপ্রাশস্ত্যমাহ নিগমঃ। অপরপক্ষে যদহঃ সম্পাদ্যতে অমাবাস্যায়ান্তু বিশেষেণ এতৎ কৃষ্ণপক্ষবিহিতং শ্রাদ্ধং সাগ্নিনামাবাস্যায়ামেব কর্ত্তব্যমিত্যাহ মনুঃ। ন দর্শেন বিনা শ্রাদ্ধমাহিতাগ্নের্দ্বিজন্মনঃ। দর্শ এবাঙ্গভূতাগ্ন্যুদ্ধরণস্য বিদ্যমানত্বাদিতি ভাবঃ। অষ্টকায়াস্ত্বগত্যাঙ্গবাধেনাপি যথাকথঞ্চিদ্বিপ্রপাণ্যাদৌ কর্ত্তব্যমিতি বক্ষ্যতে। শক্তিসম্ভবাসম্ভবতারতম্যেন বহূন্ কল্পানাহ গোতমঃ। অথ শ্রাদ্ধমমাবাস্যায়াং পিতৃভ্যো দদ্যাৎ পঞ্চমীপ্রভৃতি বাপরপক্ষস্য শ্রাদ্ধং সর্ব্বস্মিন্ বা দ্রব্যদেশব্রাহ্মণসন্নিধানে কালনিয়মঃ শক্তিতঃ। যোঽয়মমাবাস্যাদিকালনিয়ম উক্তঃ স শক্তস্য সদ্রব্যস্যারোগিণো বোদ্ধব্যঃ। তথা পার্ব্বণশ্রাদ্ধমভিধায়াহ দেবলঃ। অনেন বিধিনা শ্রাদ্ধং কুর্য্যাৎ সংবৎসরং সকৃৎ। ত্রিশ্চতুর্ব্বা যথাশক্তি মাসে মাসে দিনে দিনে॥ অত্র দিনে দিনে ইতি বীপ্সাশ্রুত্যাঽপরপক্ষশ্রাদ্ধমবগম্যতে॥ ৫৭॥

---

ন ত্বমাবাস্যাসাগ্নিকশ্রাদ্ধে পৃথক্ নিমিত্তমিতি ভাবঃ। অথ শ্রাদ্ধমিতি সতি সম্ভবেঽমাবাস্যায়াং কুর্য্যাদিতি প্রাশস্ত্যাৎ। তত্রাসম্ভবে পঞ্চমীপ্রভৃতিদশসু চতুর্দ্দশীভিন্নাসু তিথিষু মধ্যে যত্র দ্রব্যসম্পত্তিস্তত্রৈব কুর্য্যাৎ তত্রাপ্যসম্ভবে প্রতিপদাদিসর্ব্বাসাং মধ্যে যত্র শক্নোতি তত্রৈব কুর্য্যাদিতি। দ্রব্যং খড়্গমাংসাদি। দেশঃ পুষ্করাদিঃ। ব্রাহ্মণঃ পঙ্‌ক্তিপাবনাদিঃ। এতদন্যতমসম্পত্তৌ পিতৃভ্যো দদ্যাদিতি পূর্ব্বেণান্বয়ঃ। কালনিয়মঃ শক্তিত ইত্থং বচনং ব্যাচষ্টে যোঽয়মিতি। প্রতিমাসপার্ব্বণাশক্তস্য বিধিমাহ পার্ব্বণশ্রাদ্ধমভিধায়েতি সকৃদিতি কন্যায়াং দ্বিরিতি কন্যাতুলয়োর্ব্ব্বৃষকুম্ভয়োর্ব্বেতি সম্প্রদায়ঃ। চতুর্ব্বেতি কন্যা-

অথ মঘাত্রয়োদশী। ব্রহ্মপুরাণে। যোগো মঘাত্রয়োদশ্যাং কুঞ্জরচ্ছায়সংজ্ঞিতঃ। ভবেন্মঘায়াং সংস্থে চ শশিন্যর্কে করে স্থিতে॥ আশ্বযুজ্যাস্তু কৃষ্ণায়াং ত্রয়োদশ্যাং মঘাসু চ। প্রাবৃড়্‌তৌ যমঃ প্রেতান্ পিতৄংশ্চাথ যমালয়াৎ॥ বিসর্জ্জয়তি মানুষ্যে কৃত্বা শূন্যং স্বকং পুরম্। ক্ষুধার্ত্তাঃ কীর্ত্তয়ন্তশ্চ দুষ্কৃতঞ্চ স্বয়ং কৃতম্॥ কাঙ্ক্ষন্তঃ পুত্রপৌত্রেভ্যঃ পায়সং মধুসংযুতম্। তস্মাত্তান্ সূত্রবিধিনা

---

তুলাবৃষকুম্ভেষু এতচ্চতুষ্টয়াসামর্থ্যে কন্যাকুম্ভবৃষেষু ত্রয়মপি বোধ্যম্। কন্যাকুম্ভবৃষস্থেঽর্কে ইতি বচনাৎ অত্র রাশিপুরস্কারেণ বিধানাৎ অমাবাস্যাশ্রাদ্ধে নিত্যেঽপ্যাচারপ্রাপ্তং বাক্যং সৌরেণৈব ইতি গৌড়াঃ। মাসে মাসে ইতি তু শক্তস্য প্রতিমাসকৃষ্ণপক্ষীয়ায়াং যস্যাং কস্যাঞ্চিত্তিথৌ। দিনে দিনে ইতি শক্ততমস্য কৃষ্ণপক্ষব্যাপকশ্রাদ্ধার্থং সর্ব্বস্মিন্ সর্ব্বেষ্বেবাপরপক্ষস্যাহঃসু ইতি আপস্তম্ববচনৈকবাক্যত্বাদিতি বোধ্যম্ ॥ ৫৭ ॥

মঘাত্রয়োদশীং বিবেচয়তি অথেতি যোগ ইতি। আশ্বযুজ্যাঞ্চ কৃষ্ণায়ামিতি বক্ষ্যমাণবচনাৎ মঘাত্রয়োদশীত্বেন খ্যাতে শ্রাদ্ধনিমিত্তীভূতে কালে কুঞ্জরচ্ছায়সংজ্ঞিতোঽপরো যোগঃ পিতৄণাং প্রীত্যতিশয়হেতুঃ। মঘানক্ষত্রে স্থিতে শশিনি অর্কে করে হস্তনক্ষত্রে স্থিতে ভবেদিত্যর্থঃ। এতেন মঘাত্রয়োদশীনিমিত্তকশ্রাদ্ধে কুঞ্জরচ্ছায়যোগো গুণঃ ন তু পৃথক্‌শ্রাদ্ধনিমিত্তমিতি প্রতিপাদিতম্। অতএব কৃষ্ণপক্ষে ত্রয়োদশ্যাং মঘাস্বিন্দুঃ করে রবিঃ। যদা তদা গজচ্ছায়াশ্রাদ্ধে পুণ্যৈরবাপ্যতে॥ ইত্যুক্তং ন তু শ্রাদ্ধায়েতি অন্যথা ত্রয়োদশীবিশেষণত্বেন মঘাপদোপাদানবৈয়র্থ্যাপাতাৎ। উত্তরার্দ্ধে মঘায়াং সংস্থে শশিনীত্যনেনৈব তল্লাভাৎ। ন চৈবং মঘাত্রয়োদশ্যামিত্যনেনৈব মঘাপ্রাপ্তৌ মঘায়াং সংস্থে শশিনীতি ব্যর্থমিতি বাচ্যম্। ত্রয়োদশ্যাং যস্মিন্ কালে মঘানক্ষত্রে শশী তস্মিন্ কালে চেদর্কো হস্তস্থস্তদৈবায়ং যোগো ন তু মঘো-

তর্পয়েৎ পায়সেন চ॥ মধ্বাজ্যতিলমিশ্রেণ তথা শীতেন চাম্ভসা। গ্রাসমাত্রং পরগৃহাদ্ভক্তং যঃ প্রাপ্নুয়ান্নরঃ॥ ভিক্ষামাত্রেণ যঃ প্রাণান্ সন্ধারয়তি বা স্বয়ম্। যো বা সংবর্দ্ধয়েদ্দেহং প্রত্যহং স্বাত্মবিক্রমাৎ॥ শ্রাদ্ধং তেনাপি কর্ত্তব্যং তৈস্তৈর্দ্রব্যৈঃ সুসঞ্চিতৈঃ। ত্রয়োদশ্যাং প্রযত্নেন বর্ষাসু চ মঘাসু চ॥ নাস্মাৎ পরতরঃ কালঃ শ্রাদ্ধেষ্বন্যত্র বর্ত্ততে। যত্র সাক্ষাচ্চ পিতরো গৃহ্লন্ত্যমৃতমক্ষয়ম্॥ করে হস্তানক্ষত্রে সার্দ্ধনবমদিবসোপরি সপাদত্রয়োবিংশতিদিবসপর্য্যন্তং হস্তাবস্থানমর্কস্য॥৫৮॥

পলক্ষিতত্রয়োদশ্যামপি হস্তস্থার্কমাত্রে তথাত্বে যদা কন্যাদশমদিবসে রাত্রৌ ত্রয়োদশ্যাং মঘাযোগঃ পরদিনে চ মঘা ন নিঃসৃতা কিন্তু ত্রয়োদশ্যেবতত্রাপি কন্যৈকাদশদিবসে মঘোপলক্ষিতত্রয়োদশ্যামর্কস্য হস্তাবস্থানেন তদ্যোগাপত্তেরিত্যেতদর্থপ্রাপকতয়া তস্য সার্থকত্বাৎ। এতচ্চ কুঞ্জরচ্ছায়যোগস্য গুণফলত্বং স্বয়মেবাগ্রে বক্ষ্যতে। মঘায়ামিত্যেকবচনমার্ষং মঘাশব্দস্য নিত্যবহুবচনান্তত্বাৎ। অতএব মঘাসু চেতি বক্ষ্যতি। মঘাত্রয়োদশীং বিবৃণোতি আশ্বযুজ্যামিতি। উক্তবচনানামস্পষ্টার্থং ক্রমেণ ধৃত্বা ব্যাচষ্টে করে হস্তানক্ষত্রে ইত্যাদি। সার্দ্ধনবমদিবসোপরীতি। ননু নবভির্নক্ষত্রপাদৈরেকো রাশিঃ পরিচ্ছিদ্যতে কন্যারাশিস্তু উত্তরফল্গুনীপাদত্রয়ং হস্তাপাদচতুষ্টয়চিত্রাপাদদ্বয়ৈর্নবভিঃ পাদৈঃ সমাপ্যতে। রাশিশ্চ ত্রিংশতা দিনৈঃ সূর্য্যেণ ভুজ্যতে তত্র ভাগব্যবস্থায়াঃ পাদং পাদং প্রতি বিংশতিদণ্ডাধিকদিনত্রয়েণ ভোগ ইত্যুত্তরফল্গুনীপাদত্রয়ং দশদিনপর্য্যন্তমেব তৎ কথং সার্দ্ধনবমদিনোপরীত্যুক্তং ইতি চেন্ন সঙ্কারাৎপরং তদ্দিনেঽপ্যর্কেণ উত্তরফল্গুন্যাঃ কিঞ্চিদ্ভুক্তত্বাৎ ভুক্ততুল্যাংশন্যূনদশমদিনপর্য্যন্তমেব তস্যোত্তরফল্গুন্যামবস্থানাৎ তদনন্তরং দশমদিনাবস্থানাৎ সার্দ্ধপদস্যাসমগ্রপরত্বাৎ অসমগ্রদশমদিনা-

আশ্বযুজী ত্রয়োদশী পৌর্ণমাস্যন্তমাসেন প্রৌষ্ঠপদ্যামতীতায়ামিতি শঙ্খবচনাৎ মঘাসু তর্পয়েদিতি শেষঃ। প্রাবৃড়ৃতুরত্র মাসচতুষ্টয়ং ত্র্যৃতুসংবৎসরমতেন। যথা মনুঃ। গ্রৈষ্মহৈমন্তিকান্ মাসানষ্টৌ ভিক্ষুর্বিচংক্রমেৎ। দয়ার্থং সর্ব্বভূতানাং বর্ষাস্বেকত্র সংবসেৎ॥ মহাভারতে। চতুরো বার্ষিকান্মাসান্ যো মাংসং পরিবর্জ্জয়েৎ। চত্বারি ভদ্রাণ্যাপ্নোতি কীর্ত্তিমায়ুর্যশো বলম্॥ প্রেতান্ বিকরণভাগিনঃ কীর্ত্তয়ন্তো মানুষ্য আয়ান্তীতি বিশেষঃ। সূত্র-

---

ধিকনবমদিনোপরি ইত্যর্থপর্য্যবসানাৎ সপাদত্রয়োবিংশতিদিনপর্য্যন্তমিতি বিংশতিদণ্ডাধিকত্রয়োদশদিনপর্য্যন্তেনৈব হস্তপাদচতুষ্টয়ভোগপূর্ত্তের্মাসপ্রথমদিনাবধি ত্রয়োবিংশতিদিনপর্য্যন্তমিত্যর্থঃ। ক্বচিৎ তু ত্রয়োদশদিনপর্য্যন্তমিতি পাঠঃ। স তু সমীচীনঃ প্রথমদিনাবধীত্যনপেক্ষণাৎ। পাদশব্দোঽত্র কিঞ্চিদধিকপাদপরঃ বিংশতিদণ্ডাত্মকতৃতীয়ভাগাধিকত্রয়োদশদিনপর্য্যন্তমেবার্কস্যৈকনক্ষত্রভোগাৎ॥ ৫৮॥

পৌর্ণমাস্যন্তমাসেনেতি. তথাচ একৈব ত্রয়োদশী গৌণচান্দ্রেণাশ্বযুজী মুখ্যচান্দ্রেণ ভাদ্রী তথৈব ব্রহ্মপুরাণশঙ্খবচনয়োঃ সামঞ্জস্যাদিতি ভাবঃ। ননু ঋতুব্যবস্থা সৌরেণৈব অনেকেষাং মুনীনাং তত্রৈব সঙ্কেতাৎ। যথা সূর্য্যসিদ্ধান্তে। ভানোর্ম্মকরসংক্রান্তেঃ ষণ্মাসাস্তূত্তরায়ণম্। কর্কটাদেস্তথৈব স্যাৎ ষণ্মাসাদ্দক্ষিণায়নম্। দ্বিরাশিনাথা ঋতবস্ত এব শিশিরাদয়ঃ। তথা বিষ্ণুপুরাণে। দ্বৌ মাসাবর্কজাবৃতুরিতি। তথা। মৃগাদিরাশিদ্বয়ভানুভোগাৎ ষড়ৃতবঃ স্যুঃ শিশিরো বসন্তঃ। গ্রীষ্মশ্চ বর্ষা চ শরচ্চ তদ্বদ্ধেমন্তনামা কথিতশ্চ ষষ্ঠঃ॥ ইতি। অতএব মুখ্যচান্দ্রমাসদ্বয়েন ঋতুব্যবস্থা ইতি যৎ সময়প্রকাশকারেণোক্তং তৎ মুনিবচনান্যনালোচ্য ক্বাচিৎকলাক্ষণিকপ্রয়োগদর্শনাৎ ভ্রান্ত্যৈবেতি তৎ কথং কন্যার্কে প্রাবৃড়ৃতুরিতি আশঙ্কায়াং সমাধত্তে প্রাবৃড়ৃতুরত্রেতি। মাসচতুষ্টয়কাত্র সৌরশ্রাবণাদিমাসচতুষ্টয়ম্। কন্যাং গতে সবিতরি পিতৃরাজা-

বিধিনা স্বগৃহ্যোক্তবিধানেন মন্ত্রবিধিনেতি বা পাঠঃ। ভিক্ষামাত্রেণ যঃ প্রাণান্ যো বা সংবর্দ্ধয়েদ্দেহমিত্যর্থবাদৈরাশ্বযুজ্যাং মঘাত্রয়োদশ্যাং শ্রাদ্ধস্যাবশ্যকত্বং দর্শিতম্। কুঞ্জরচ্ছায়যোগে তু ফলাতিশয়ঃ। তত্র কল্পতরুঃ। কুঞ্জরচ্ছায়যোগবৎ মঘাযোগেঽপি ফলাতিশয়ার্থ এব বিষ্ণুমনুভ্যাং কেবলত্রয়োদশীবিধানাৎ। যথা বিষ্ণুঃ। অপি জায়েত সোঽস্মাকং কুলে কশ্চিন্নরোত্তমঃ। প্রাবৃট্কালেঽসিতে পক্ষে ত্রয়োদশ্যাং সমাহিতঃ॥ মধুপ্লু-

নুশাসনাৎ। তাবৎ প্রেতপুরী শূন্যা যাবদ্বৃশ্চিকদর্শনম্॥ তথা। ততো বৃশ্চিক আয়াতে নিরাশাঃ পিতরো নৃপ। পুনঃ স্বভবনং যান্তি শাপং দত্ত্বা সুদারুণম্॥ ইত্যাদিবচনৈর্বৃশ্চিকদর্শনপর্য্যন্তমেব বিসর্জ্জনস্য প্রাপ্তেঃ; তথাচ যম্যন্তে নিয়ম্যন্তে পাপিনোঽত্রেতি যমালয়ঃ কারাগারঃ। তস্মাৎ প্রাবৃড়ৃতৌ যমঃ পিতৄন্ প্রেতাংশ্চ মানুষ্যে মনুষ্যলোকে আগন্তুং বিসর্জ্জয়তীতি বচনার্থঃ। বিকিরণভাগিন ইতি তানাহ মনুঃ। অসংস্কৃতপ্রমীতানাং যোগিনাং কুলযোষিতাম্। উৎস্পষ্টং ভাগধেয়ং স্যাদ্দর্ভেষু বিকিরশ্চ যঃ ইতি। এতেন প্রেতান্ অকৃতসপিণ্ডীকারণান্ ইতি ব্যাখ্যায় তেষামপি অপুত্রা যে মৃতাঃ কেচিৎ স্ত্রিয়ো বা পুরুষাশ্চ যে। তেষামপি চ দেয়ং স্যাদেকোদ্দিষ্টং ন পার্ব্বণম্॥ ইতি বচনাৎ মঘাত্রয়োদশ্যাং একোদ্দিষ্টবিধিনা শ্রাদ্ধং কার্য্যমিতি নারায়ণোপাধ্যায়মতং নিরস্তম্। মঘাশ্রাদ্ধস্য পার্ব্বণপ্রকরণাম্নাতস্য পার্ব্বণরূপত্বাৎ উক্তবচনস্য চামাবাস্যাদিমৃতয়োরপুত্রয়োঃ কৃতসপিণ্ডীকরণয়োরেব স্ত্রীপুরুষয়োঃ পার্ব্বণপ্রসক্ত্যা তন্নিরাসেনৈকোদ্দিষ্টবিধায়কতয়া অগ্রে ব্যবস্থাপনীয়ত্বাৎ স্বগৃহ্যোক্তবিধানেনেতি যস্মাৎ পিতরঃ পায়সাদিকং কাঙ্ক্ষন্ত আয়ান্তি তস্মাৎ তান্ মঘাযুক্তত্রয়োদশ্যাং স্বগৃহ্যোক্তবিধানেন পায়সমধ্বাদিভির্দ্রব্যৈঃ তর্পয়েদিতি শ্রাদ্ধবিধিঃ। ননু তর্হি শ্রাদ্ধং তেনাপি কর্ত্তব্যমিতি পুনরুক্তং

তেন যঃ শ্রাদ্ধং পায়সেন সমাচরেৎ। কার্ত্তিকং সকলং বাপি প্রাক্‌ছায়ে কুঞ্জরস্য চ॥ কার্ত্তিকবিধিরয়ং কন্যাগতশ্রাদ্ধ এব কন্যায়ামকরণে সতীতি বক্ষ্যতি। কার্ত্তিকং সকলং কৃষ্ণপক্ষমিত্যর্থঃ। অন্যথা কন্যাগতশ্রাদ্ধপ্রাপ্তকৃষ্ণপক্ষবাধঃ স্যাৎ॥ ৫৯॥

প্রাক্‌ছায়ে প্রাচ্যাং দিশি গতায়াং হস্তিচ্ছায়ায়ামিত্যর্থঃ। মনুঃ। অপি নঃ স্বকুলে জায়াৎ যো নো দদ্যাৎ ত্রয়োদশীম্। পায়সং মধুসর্পির্ভ্যাং প্রাক্‌ছায়ে কুঞ্জরস্য চ॥ ন চ বাচ্যং মাঘীপ্রৌষ্ঠপদ্যূর্দ্ধং কৃষ্ণত্রয়োদশীত্যে-

অত আহ ভিক্ষামাত্রেণেতি পূর্ব্বার্দ্ধোক্তগ্রাসমাত্রভিক্ষয়া যঃ কেবলং প্রাণান্ ধারয়তীত্যর্থঃ। আবশ্যকত্বং দর্শিতমিতি তথাচাবশ্যকর্ত্তব্যত্বপ্রদর্শনার্থং শ্রাদ্ধবিধিরনুবাদ ইতি ভাবঃ। কেবলত্রয়োদশীবিধানাদিত্যত্রায়ং কল্পতরোরভিপ্রায়ঃ। মঘাযুক্তত্রয়োদশ্যাং শ্রাদ্ধং কর্ত্তব্যমিতি বিধিঃ। তত্র মনুবিষ্ণুভ্যাং কেবলত্রয়োদশীবিধানাৎ তদর্থবাদবলেন তদেব শ্রাদ্ধমনূদ্য পায়সাদেদ্রব্যকরণকত্বং কেবলত্রয়োদশ্যধিকরণকত্বঞ্চেতি গুণদ্বয়বিধিরেব কল্পতে অঙ্গবিধিরূপলাঘবাৎ ন তু শ্রাদ্ধান্তরবিধিঃ স্বতন্ত্রবিধিত্বগৌরবাদিতি। কার্ত্তিকবিধিরয়মিতি কন্যায়ামকরণপক্ষে কন্যাগত এব শ্রাদ্ধেঽয়ং কার্ত্তিকবিধির্ন শ্রাদ্ধান্তরবিধিরিত্যর্থঃ। অন্যথেতি যাবচ্চ কন্যাতুলয়োঃ ক্রমাদাস্তে দিবাকর ইতি বচনব্যাখ্যাবসরঃ কন্যায়াং শ্রাদ্ধাশক্তৌ তৎপ্রাপ্তশ্রাদ্ধস্যৈব তুলায়াং কর্ত্তব্যত্বেন বক্ষ্যমাণত্বাৎ। কন্যাশ্রাদ্ধপ্রাপ্তকৃষ্ণপক্ষস্য তুলায়াং করণপক্ষে বাধঃ স্যাদিত্যর্থঃ॥ ৫৯॥

প্রাচ্যাং দিশি গতায়ামিতি তথাচাপরাহ্ণপ্রাপ্তিরিতি ভাবঃ। কল্পতরুরেব স্বোক্তব্যাখ্যানে নারায়ণোপাধ্যায়দত্তদূষণমুপন্যস্য নিরস্যতি

তদ্বিহিতং শ্রাদ্ধমনূদ্য যদ্যনেন কেবলত্রয়োদশী বিধী- য়তে তদা। কালদ্রব্যোভয়লক্ষণগুণদ্বয়বিধানেন বাক্য- ভেদঃ স্যাৎ অতএবোপসদ্ভিশ্চরিত্বা মাসমগ্নিহোত্রং জুহো- তীতি বিশিষ্টকর্ম্মান্তরবিধিরুক্তঃ। অতস্ত্রয়োদশীমনূদ্য তৎকালীনশ্রাদ্ধে দ্রব্যমাত্রবিধিরিতি। এবমপি দ্রব্য- কুঞ্জরচ্ছায়দেশলক্ষণগুণদ্বয়বিধির্দুষ্পরিহরঃ। কিঞ্চৈবমু-

ন চেতি বাচ্যমিত্যস্য দ্রব্যমাত্রবিধিরিত্যনেনাগ্রিমেণান্বয়ঃ। ন চ মাঘী- প্রৌষ্ঠপদ্যূর্দ্ধ কৃষ্ণত্রয়োদশী চেতি বিষ্ণুবচনব্যাখ্যানাবসরে মাঘীপৌর্ণ- মাসীতি কল্পতরুণা ব্যাখ্যাতম্। তথাচ তন্মতে মঘাযুক্তত্রয়োদশী- শ্রাদ্ধস্য এতদ্বচনেনাভিহিতত্বাভাবাৎ কথং তচ্ছ্রাদ্ধানুবাদেন কেবল- ত্রয়োদশী বিধীয়তে ইতি তন্মতমনুবদসীতি বাচ্যং রূঢ্যাঃ শীঘ্রোপস্থা- পকত্বমিত্যভিপ্রায়েণৈব মাঘীত্যস্য তেন পৌর্ণমাসীপরত্বব্যাখ্যানাৎ প্রৌষ্ঠপদ্যূর্দ্ধ কৃষ্ণত্রয়োদশী চেত্যস্য তু প্রৌষ্ঠপদ্যামতীতায়াং মঘাযুক্তাং ত্রয়োদশীমিত্যাদিবক্ষ্যমাণনানাবচনৈকবাক্যতয়া মঘাযুক্তত্রয়োদশীপর- ত্বস্য তেনাপ্যবশ্যমভ্যুপেয়ত্বাৎ। তথাচ প্রৌষ্ঠপদ্যূর্দ্ধকৃষ্ণত্রয়োশীত্য- নেন মঘাযুক্তত্রয়োদশ্যাং স্বয়ং বিহিতং শ্রাদ্ধং পুনর্ব্বিধানা- সম্ভবাদনূদ্য যদ্যনেন বচনেন বিষ্ণুনৈব প্রাগুক্তমঘাযোগস্য ফলাতি- শয়ার্থত্বসূচনায় মঘানিরপেক্ষকেবলত্রয়োদশীকালরূপমঙ্গং বিধীয়তে তদা কেবলত্রয়োদশীকালমধুপ্লুতপায়সদ্রব্যরূপাঙ্গদ্বয়বিধানেন বাক্যভেদঃ স্যাদিত্যর্থঃ। অতএব বাক্যভেদাদেব। যদি যাবজ্জীবমগ্নিহোত্রং জুহোতীতি শ্রুতিপ্রাপ্তাগ্নিহোত্রমনূদ্য উপসদ্ভিশ্চরিত্বা মাসমগ্নি- হোত্রং জুহোতীতি শ্রুত্যা তত্রৈবাগ্নিহোত্রে উপসদ্যাগত্রয়ানন্তর্য্যং মাসৈকসাধ্যত্বঞ্চেতি গুণদ্বয়ং বিধীয়তে তদা গুণভেদাদ্বাক্যভেদঃ স্যাৎ বিধেয়য়োঃ পরস্পরাকাঙ্ক্ষাবিরহেণৈকবাক্যত্বাসম্ভবাৎ। তদুক্তং জৈমিনিনা। গুণানাঞ্চ পরার্থত্বাদসম্বন্ধঃ সমত্বাৎ স্যাৎ ইত্যত্র উপ-

পসন্তিশ্চরিত্বেতিবৎ কালদ্রব্যোভয়গুণবিশিষ্টশ্রাদ্ধবিধৌ তৎপ্রাপ্তং শ্রাদ্ধমনূদ্য মাঘীপ্রৌষ্ঠপদ্যূর্দ্ধমিত্যনেন ত্রয়োদশীবিশেষণত্বেন নক্ষত্রমাত্রগুণবিধিঃ ফলাতিশয়ার্থং ভবিষ্যতি ॥ ৬০ ॥

---

সন্তিশ্চরিত্বেতি শ্রুতেরুক্তগুণদ্বয়বিশিষ্টায়নাখ্যকর্ম্মান্তরবিধিরেবোক্ত ইত্যর্থঃ। অত্র চাগ্নিহোত্রপদং গৌণং যাবজ্জীবাগ্নিহোত্রস্যেতিকর্ত্তব্যতা-প্রাপ্ত্যর্থং এতদুক্তত্বঞ্চ প্রাগেব কৌণ্ডপায়িনাময়ন ইবাগ্নিহোত্রশব্দ ইতি পঙ্‌ক্তিব্যাখ্যানাবসরে বিবেচিতমিতি নেহ পুনর্ব্বিবেচিতমিতি। অতো বাক্যভেদভয়াৎ ত্রয়োদশীমনূদ্যেতি মাঘীপ্রৌষ্ঠপদ্যূর্দ্ধমিত্যনেন প্রাপ্তাং মঘাযুক্তত্রয়োদশীং ত্রয়োদশ্যাং সমাহিত ইত্যনেনানূদ্য তৎকালীনপ্রাপ্ত-শ্রাদ্ধে পায়সদ্রব্যমাত্রবিধির্ন তু কেবলত্রয়োদশীবিধিরপি মঘাযোগস্য ফলাতিশয়ার্থ ইতি বাচ্যং ন চেত্যর্থঃ। দূষয়তি এবমপীতি কেবলপায়স-দ্রব্যবিধাবপি প্রাক্‌ছায়ে কুঞ্জরস্য চেতি উক্তকুঞ্জরচ্ছায়াদেশরূপগুণ-মাদায় গুণদ্বয়বিধির্দুষ্পরিহর ইতি বাক্যভেদ আবশ্যক এবেত্যর্থঃ। নন্ন বাক্যভেদত্বমেব দোষ ইতি ময়া নোচ্যতে কিন্তু সম্ভবত্যেকবাক্যত্বে বাক্যভেদো ন যুজ্যতে ইত্যুক্তন্যায়প্রাপ্তলাঘবমেব। তথাচ ছায়ায়াং কুঞ্জরস্য চ তথা হস্তিচ্ছায়াসু কিঞ্চিবৎ কর্ণব্যজনবীজিতমিত্যাদিনানা-বচনৈকবাক্যতয়া সর্ব্বস্মিন্নেব শ্রাদ্ধে কুঞ্জরচ্ছায়াদেশলক্ষণগুণবিধি-র্ভবন্মতেঽপি পৃথগাবশ্যক ইতি তমাদায় ভবন্মতে বিধিত্রয়ং অস্মন্মতে তু বিধিদ্বয়মাত্রমিতি লাঘবমক্ষুণ্ণমেব ইত্যত আহ কিঞ্চেতি। উপসন্তি-শ্চরিত্বেতিবদিতি। যথা উপসন্তিশ্চরিত্বেতি শ্রুতেরুক্তগুণদ্বয়বিশিষ্টকর্ম্মা-ন্তরবিধিস্তথা ত্রয়োদশ্যাং সমাহিত ইত্যাদি মনুবিষ্ণুবচনমপি কেবল-ত্রয়োদশীকালপায়সদ্রব্যোভয়লক্ষণগুণদ্বয়বিশিষ্টশ্রাদ্ধবিধিরিত্যেতদ্বিধি-প্রাপ্তং শ্রাদ্ধমনূদ্য মাঘীপ্রৌষ্ঠপদ্যূর্দ্ধমিত্যনেন বিষ্ণুবচনান্তরেণ ত্রয়ো-দশীবিশেষণত্বেন কেবলমঘানক্ষত্ররূপগুণবিধিঃ ফলাতিশয়ার্থো ভবিষ্য-তীত্যর্থঃ। এবঞ্চ সতি ন বাক্যভেদঃ সিদ্ধঞ্চ নক্ষত্রস্য গুণফলত্বমিতি

বিধিপদঞ্চোভয়ত্র কল্পনীয়ম্ অরুণৈকহায়নীবাক্যে-ষ্বারুণ্যৈকহায়নীত্বলক্ষণগুণদ্বয়বিশিষ্টক্রয়বিধৌ তৎপ্রাপ্ত-ক্রয়োদ্দেশেন বাসসা ক্রীণাতীতি বাক্যে বাসোলক্ষণ-গুণবিধিবৎ। তন্ন এতয়োর্মনুবিষ্ণুবচনয়োঃ পিতৃগাথা-

---

ভাবঃ। ন চ তথাপি প্রোষ্ঠপদ্যূর্দ্ধকাললক্ষণগুণমাদায় বাক্যভেদপ্রসঙ্গ ইতি বাচ্যং প্রোষ্ঠপদ্যূর্দ্ধত্ববিশেষণবিশিষ্টনক্ষত্রলক্ষণগুণস্যৈকস্যৈব বিধানাৎ ॥ ৬০ ॥

নন্থ ত্রয়োদশ্যাং সমাহিত ইত্যাদিবচনং পিতৃগাথাত্বেনার্থবাদ এব ন বিধিস্তৎ কথং অস্য কালদ্রব্যোভয়গুণবিশিষ্টশ্রাদ্ধবিধিত্বং ব্রূষে ইত্যত আহ বিধিপদঞ্চেতি। উভয়ত্র উভয়মতে কল্পনীয়মিতি। যথা পিতৃগাথাত্বান্যথানুপপত্ত্যা গুণদ্বয়বিশিষ্টশ্রাদ্ধবিধিঃ অস্মন্মতে কল্পনীয়-স্তথা ভবন্মতেঽপি মাঘীপ্রোষ্ঠপদ্যূর্দ্ধমিত্যর্থবাদানুপপত্ত্যা বিধিঃ কল্প-নীয়ঃ। নহি তত্র মঘাযুক্তত্রয়োদশ্যাং শ্রাদ্ধং কুর্য্যাদিতি বিধিশ্রুতিরস্তীতি তুল্যমিত্যর্থঃ। এতেন বিধিকল্পনাগৌরবং পরিহৃতং তথাচ কল্পনীয় এব গুণদ্বয়বিশিষ্টবিধির্ময়া উক্তঃ ন তু পিতৃগাথা এব বিধিরিত্যুক্ত-মিতি ভাবঃ। নন্থ কালদ্রব্যোভয়বিশিষ্টবিধৌ নক্ষত্রমাত্রগুণবিধিরি-ত্যুক্তং তথাচ গুণদ্বয়বিশিষ্টবিধৌ গুণান্তরবিধিঃ ক্বচিৎ দৃষ্ট ইতি তৎ দর্শয়তি অরুণৈকহায়নীবাক্যে ইতি অরুণয়া একহায়ন্যা গবা সোমং ক্রীণাতীতি শ্রুতিবাক্যং এষ চ আরুণ্যৈকহায়নীত্বলক্ষণগুণদ্বয়বিশিষ্টক্রয়-বিধিঃ তৎপ্রাপ্তে চ ক্রয়ে বাসসা সোমং ক্রীণাতীতি শ্রুত্যন্তরেণ বাসোলক্ষণগুণো বিধীতে তদ্বদিত্যর্থঃ। ন চ বাসসা সোমং ক্রীণা-তীতি ন গুণবিধিঃ কিন্তু অরুণৈকহায়নী গৌর্বৈকল্পিকবাসোবিধিরে-বেতি বাচ্যং অষ্টদোষাৎ গোবাসসোরতুল্যশিষ্টত্বেন চ ইচ্ছাবিকল্পা-সম্ভবাৎ সমর্থাসমর্থভেদেন ব্যবস্থিতবিকল্পাভ্যুপগমে তু অধিকারি-ভেদেন সমর্থো গবা ক্রীণাতি অসমর্থো বাসসা ক্রীণাতি ইতি স্বতন্ত্র-বিধিদ্বয়কল্পনাগৌরবাৎ ততশ্চ একস্য প্রধানবিধিত্বং অপরস্য গুণ-

ত্বেনার্থবাদরূপত্বাৎ সর্ব্বশব্দানাঞ্চ কার্য্যবোধকত্বব্যুৎ-
পত্তেরর্থবাদানাং বিধ্যেকবাক্যতয়া কার্য্যবোধকত্বমিত্যু-
ক্তমর্থবাদাধিকরণে॥ ৬১॥

বিধিত্বমেব বাচ্যং লাঘবাৎ তত্র চ বাসসা সোমং ক্রীণাতীতি বাক্য-
প্রাপ্তক্রয়ে যদ্যরুণৈকহায়নীবাক্যং গুণবিধিঃ স্যাৎ তদা আরুণ্যৈ-
কহায়নীত্বলক্ষণভেদেন বাক্যভেদঃ স্যাৎ তস্মাদরুণৈকহায়নীবাক্য-
প্রাপ্তগুণদ্বয়বিশিষ্টক্রয়মনূদ্য তত্রৈব ক্রয়ে বাসসা সোমং ক্রীণা-
তীতি বাসোলক্ষণগুণবিধিরিতি কল্পতরুমতং দূষয়তি তন্নেতি এতয়ো-
রিতি অপি জায়েত সোঽস্মাকমিতি অপি নঃ স্বকুলে জায়াদিত্যেতয়ো-
রিত্যর্থঃ। অর্থবাদরূপত্বাদিতি তথাচ স্বতোঽবোধকত্বাদপ্রামাণ্য-
মিতি ভাবঃ। নমু বিধিবাক্যেম্বিবার্থবাদেম্বপি আকাঙ্ক্ষাঘটিতসামগ্রী-
তৌল্যাৎ কথমবোধকত্বমত আহ সর্ব্বশব্দানামিতি কার্য্যবোধকত্ব-
ব্যুৎপত্তেরিতি কার্য্যবোধকবিধিসমভিব্যাহারেণৈব ব্যুৎপত্তিগ্রহাদি-
ত্যর্থঃ। ব্যুৎপত্তিঃ শক্তিঃ। অত্রায়মর্থঃ সর্ব্বেষামেব শব্দানাং ব্যবহার-
দর্শনেনৈব প্রথমং শক্তিগ্রহঃ ব্যবহারশ্চ গবানয়নাদিরূপো গামানয়ে-
ত্যাদিপ্রবর্ত্তকবিধিবাক্যানন্তরমেব ইতি তত্রৈব শক্তিগ্রহঃ ন তু
কেবলার্থবাদেষু তেষাং বিধ্যসমভিব্যাহৃতত্বেন ব্যবহারাপ্রয়োজকত্বাৎ।
ন চ নায়ং নিয়মঃ কোষাদিনাপি শক্তিগ্রহাদিতি বাচ্যং কোষাদীনামপি
পরম্পরয়া ব্যবহারাধীনশক্তিগ্রহসাপেক্ষত্বাৎ। ব্যবহারাধীনশক্তি-
গ্রহে দ্বয়ং ক্রমঃ। প্রযোজকবৃদ্ধেন গামানয়েতি প্রযুক্তে তৎ শ্রুত্বা
প্রযোজ্যবৃদ্ধো গামানয়তি তদ্দর্শী চ ব্যুৎপিৎসুরেবমনুমিনোতি অয়ং
গামানয়েতি বাক্যাৎ গবানয়নগোচরজ্ঞানবান্ তদ্বাক্যশ্রবণানন্তরং
গবানয়নবত্ত্বাৎ ইত্যনন্তরঞ্চ গামানয়েতি বাক্যস্য গবানয়নগোচর-
জ্ঞানজনকত্বং তৎসম্বন্ধং বিনা অনুপপন্নং ইতি তস্যানুপপত্তিরবতরতি
এষৈব চানুপপত্তিলক্ষণার্থাপত্তিঃ কারণীভূতা এতয়া চ গামানয়েতি
বাক্যং গবানয়নসম্বন্ধবদিত্যর্থাপত্তিজ্ঞানং অখণ্ডবাক্যস্যৈবাখণ্ড-
বাক্যার্থে শক্তিসম্বন্ধেন পরিচ্ছিনত্তি। ভট্টমতে অর্থাপত্তেঃ স্বতন্ত্রপ্রমাণ-

তত্র ক্লৃপ্তবিধিশেষত্বে সম্ভবতি কল্প্যবিধিশেষত্বম-ন্যায্যং অতঃ ক্লৃপ্তবিধ্যনুরূপৈব স্তুতিরনেন কার্য্যা বিধৌ চ যথাযোগঃ শ্রূয়তে। যথা মনুঃ। যৎকিঞ্চিন্মধুনা মিশ্রং প্রদদ্যাৎ তু ত্রয়োদশীম্। তদপ্যক্ষয়মেব স্যাৎ বর্ষাসু

স্বাৎ নৈয়ায়িকানাং মতে অনুমানমিতি বিশেষঃ। পশ্চাচ্চ গামানয়াশ্ব-মানয় ইত্যাদিপদপরিবৃত্তিরূপাবাপোদ্বাপেনান্বয়ব্যতিরেকাৎ গোপদস্য গবিধাতোশ্চ আনয়নে পদপদার্থবিষয়াং শক্তিং সোঽবধারয়তি ইতি। তদুক্তং ভট্টপাদৈঃ। শব্দবৃদ্ধাভিধেয়াংশ্চ প্রত্যক্ষেণাত্র পশ্যতি। শ্রোতুশ্চ প্রতিপন্নত্বমনুমানেন চেষ্টয়া। অন্যথানুপপত্ত্যা তু বোধেৎ শক্তিদ্বয়াত্মিকাম্। অর্থাপত্ত্যাববুধ্যন্তে সম্বন্ধং ত্রিঃপ্রমাণকমিতি। অস্যার্থঃ। শব্দো গামানয়েত্যাদি বাক্যং বৃদ্ধৌ ব্যুৎপন্নৌ প্রযোজ্য-প্রযোজকরূপৌ। অভিধেয়ো গবানয়নাদিরূপঃ। এতৎসর্ব্বং প্রত্যক্ষেণ ইন্দ্রিয়েণ পশ্যতি জানাতি ব্যুৎপিৎসুরিতি শেষঃ। শ্রোতুঃ প্রযোজ্যস্য প্রতিপন্নত্বং তদ্বাক্যাৎ তদর্থগোচরজ্ঞানবত্ত্বং চেষ্টয়া গবানয়নাদিরূপয়া অনুমানেন জানাতি অনন্তরং অন্যথানুপপত্ত্যা উক্তরূপয়া দ্বয়াত্মিকাং শব্দার্থোভয়নিরূপ্যাং শক্তিং সম্বন্ধত্বেন বোধেৎ জানাতি। অত্র বুধি-র্ভৌবাদিকঃ পরস্মৈপদী তদনন্তরঞ্চ অর্থাপত্ত্যা আবাপোদ্বাপেন ত্রিঃ-প্রমাণকং প্রত্যক্ষানুমানার্থাপত্তিরূপপ্রমাণত্রয়গম্যং সম্বন্ধং শক্তিরূপং অববুধ্যন্তে ব্যুৎপিৎসব ইতি শেষঃ। অত্র বুধিরাত্মনেপদী দৈবা-দিক ইতি। নন্বু তর্হি অর্থবাদানাং কিমপেক্ষয়া বোধকত্বেন প্রামাণ্যং অত আহ অর্থবাদানামিতি বিধ্যেকবাক্যতয়েতি তথাচ বিধিসাপেক্ষ-মেবামীষাং প্রামাণ্যমিতি ভাবঃ॥ ৬১॥

নন্বুক্তমনুবিষ্ণুবচনয়োরপি ত্রয়োদশ্যাং পায়সেন শ্রাদ্ধং কুর্য্যা-দিতি কেবলত্রয়োদশীঘটিতবিধিং কল্পয়িত্বা তদেকবাক্যতয়া প্রামাণ্যং স্যাদত আহ তত্রেতি কল্প্যবিধিক্লৃপ্তবিধ্যোর্মধ্যে ক্লৃপ্তবিধিশেষত্বে ক্লৃপ্তবিধ্যেকবাক্যত্বে সম্ভবতি কল্প্যবিধিশেষত্বং তদেকবাক্যত্বমন্যায্য-

চ মঘাসু চ ॥ শঙ্খঃ। প্রৌষ্ঠপদ্যামতীতায়াং মঘাযুক্তাং ত্রয়োদশীম্। প্রাপ্য শ্রাদ্ধং হি কর্ত্তব্যং মধুনা পায়সেন চ ॥ ব্রহ্মপুরাণে। শ্রাদ্ধং তেনাপি কর্ত্তব্যং তৈস্তৈর্দ্রব্যৈঃ সুসঞ্চিতৈঃ। ত্রয়োদশ্যাং প্রযত্নেন বর্ষাসু চ মঘাসু চ ॥ যাজ্ঞবল্ক্যঃ। যদ্দদাতি গয়াস্থশ্চ সর্ব্বমানন্ত্যমিষ্যতে। তথা বর্ষাত্রয়োদশ্যাং মঘাসু চ বিশেষতঃ ॥ কুঞ্জরচ্ছায়যোগস্ত্বেকেন মুনিনা পৃথগুপাদানাৎ ফলাতিশয়ার্থঃ। কিঞ্চ মনুবচনে ত্রয়োদশীমাত্রশ্রবণাৎ প্রাবৃট্কালেঽপি ফলাতিশয়ার্থঃ স্যাৎ। তথা বিষ্ণুবচনে। প্রাবৃণ্মাত্রশ্রুতেঃ প্রৌষ্ঠপদ্যনন্তরিতত্বমপি ফলাতিশয়ার্থং স্যাৎ। অপিচ। পিতা পিতামহশ্চৈব তথৈব প্রপিতামহঃ। উপাসতে সুতং জাতং শকুন্তা ইব পিপ্পলম্ ॥ মধুমাংসৈশ্চ শাকৈশ্চ পয়সা পায়সেন চ। এষ নো দাস্যতি শ্রাদ্ধং বর্ষাসু চ মঘাসু চ ॥ ইতি বশিষ্ঠবচনাৎ। মঘামাত্র এব শ্রাদ্ধং স্যাৎ তস্মান্নানা-

মিত্যর্থঃ। তথা সতি বিধিকল্পনাগৌরবাপত্তেরিতি ভাবঃ। বিধ্যেকবাক্যত্বঞ্চ তেন সহ একতাৎপর্য্যকত্বং তচ্চ স্তুত্যর্থবাদানাং তত্তাৎপর্য্যবিষয়ীভূতপ্রবৃত্তিপরত্বাৎ নিন্দার্থবাদানাঞ্চ নিষেধবিধিতাৎপর্য্যবিষয়ীভূতনিবৃত্তিপরত্বাৎ অস্ত্যেবেতি বোধ্যম্। কৢপ্তবিধ্যনুরূপৈবেতি মঘাযুক্তায়াং ত্রয়োদশ্যাং শ্রাদ্ধং কুর্য্যাদিতি কৢপ্তবিধিঃ তদনুরূপৈব তৎপ্রতিপাদ্যং যৎ শ্রাদ্ধং তৎপ্রবৃত্তিবিরোধী বিত্তব্যয়ায়াসসাধ্যত্বজ্ঞানাধীনস্তদ্গোচরো যো দ্বেষস্তন্নিবৃত্তিফলিকৈব স্তুতিঃ। প্রশস্তত্বেন তৎপ্রতিপত্তিরনেনার্থবাদেন কার্য্যা উৎপাদ্যেত্যর্থঃ। তথাচোক্তং প্ররোচনা চাঙ্গতয়োপযুজ্যতে ইতি। অস্যার্থঃ প্ররোচনা স্তুত্যর্থবাদঃ অঙ্গতয়া অবসীদ্বি-

মুনিবচনৈকবাক্যতয়া প্রোষ্ঠপদ্যনন্তরিতত্রয়োদশ্যাং মঘা-যুক্তায়াং শ্রাদ্ধং তথা মহাভারতাদিবচনেষু অর্থবাদরূ-পেষু বহুষু মঘাযোগঃ শ্রূয়তে তদ্বলাচ্চ বিধিঃ কল্প্যমানো মঘাযুক্তায়াং ত্রয়োদশ্যাং শ্রাদ্ধমিত্যেক এব সর্ব্বানুগতঃ কল্পনীয়ঃ। ইতরথা তু ত্রয়োদশ্যাং শ্রাদ্ধমিত্যেকো বিধিঃ অপরশ্চ মঘাযোগে ফলাতিশয়ার্থমিতি কল্পনাগৌরবং স্যাৎ। যথা মহাভারতে। অপি নঃ স্বকুলে জায়াৎ যো নো দদ্যাত্ত্রয়োদশীম্। মঘাসু সর্পিষা যুক্তং পায়সং

বিশক্ত্যভস্তকতয়া বহুবিত্তরূপায়াসসাধ্যত্বেন যাগাদৌ বলবদ্দ্বেষবশাৎ পুরুষপ্রবৃত্তিমুৎপাদয়িতুমসমর্থা যা বিধিশক্তিস্তদ্দ্বেষনিবৃত্তিরূপসহকারি-সম্পাদকতয়া যাগাদিপ্রবৃত্তাবুপযুজ্যতে ইতি। কৢপ্তবিধৌ মঘাযুক্তত্বে প্রমাণমাহ যথা মনুরিত্যাদি। যৎকিঞ্চিদিতি বর্ষামঘাশব্দৌ নিত্যবহু-বচনান্তৌ বর্ষাসু মঘাসু চ ত্রয়োদশীং প্রাপ্য মধুমিশ্রং যৎকিঞ্চিৎ দদ্যাদিতি বিধিঃ। অত্র হেতুরক্ষয়মেব স্যাদিতি যতোঽত্র যৎ-কিঞ্চিৎবস্তু মধুমিশ্রং দীয়তে তদক্ষয়মেবাতো দদ্যাদিত্যর্থঃ। ননু অশ্বযুক্কৃষ্ণপক্ষে তু শ্রাদ্ধং কুর্য্যাদ্দিনে দিনে ইতি সামান্যবিধিপ্রাপ্ত এব তৎপক্ষীয়ত্রয়োদশীশ্রাদ্ধে মঘাগুণবিধিরেব ইদং বচনং লাঘ-বাদিতি চেন্ন মঘাপায়সগুণদ্বয়বিধৌ বাক্যভেদাপত্তেঃ। বচনান্তর-প্রাপ্তপায়সস্যাপি ভবন্মতে তত্রৈব শ্রাদ্ধে গুণত্বেনাভ্যুপেয়ত্বাৎ বক্ষ্য-মাণশঙ্খবচনে প্রোষ্ঠপদ্যামতীতায়ামিত্যস্য বৈয়র্থ্যাপাতাচ্চ তস্মা-ন্মঘাযুক্তত্রয়োদশ্যাং শ্রাদ্ধান্তরবিধিরেবায়মিতি। যচ্চ ত্রয়োদশী নভ-স্যায়া কৃষ্ণা তস্যাং সমর্চ্চয়েৎ। পিতৄন্ পায়সদানেন মধুনা সর্পিষা তথা॥ ইতি সংবৎসরপ্রদীপধৃতবচনং তদমূলং সমূলত্বেঽপি মঘাত্রয়োদশীপর-মেব ত্রয়োদশীপদং অন্যথা এতদ্বচনবলাৎ কেবলত্রয়োদশীশ্রাদ্ধং প্রাপ্ত-মিতি তদনুবাদেন মঘাযোগস্যাপি গুণফলত্বেনাভ্যুপেয়তয়া ত্রয়োদশ্যাং

দক্ষিণায়নে ॥ অজেন সর্ব্বলোহেন মঘাসু চ যতব্রতঃ। হস্তিচ্ছায়াসু বিধিবৎ কর্ণব্যজনবীজিতম্ ॥ দক্ষিণায়নে বৃত্তে বর্ষাস্বিত্যর্থঃ। সর্ব্বলোহেন সর্ব্বতোলোহিতেন ছাগেনানন্ত্যমিতি বচনাৎ। যথা দেবলঃ। আনন্ত্যায় ভবেদ্দত্তং খড়গং মাংসং দিনক্ষয়ে। মহাশকলিনো মৎস্যা ছাগো বা সর্ব্বলোহিতঃ ॥ পুনর্ম্মঘাগ্রহণং স্তুত্যর্থং হস্তিচ্ছায়াস্বিতি দেশপরম্ ॥ ৬২ ॥

---

শ্রাদ্ধং কুর্য্যাৎ মঘাযোগে বিশেষেণেতি কল্পনাগৌরবং স্যাৎ যদ্দদাতীতি যদ্যপ্যয়মর্থবাদ এব ন বিধিঃ যৎপদসমভিব্যাহৃতত্বাৎ যথা যস্যোভয়ং হবিরর্ত্তি মৃচ্ছেদিত্যাদি তথাপি অনেনার্থবাদবলেন কল্পনীয়োঽপি মঘাযুক্তত্রয়োদশীঘটিত এবার্থবাদানাং সমানবিষয়কলিঙ্গত্বাদিতি হৃদয়ম্। এতেন মঘানক্ষত্রে পৃথক্‌শ্রাদ্ধং ত্রয়োদশ্যাঞ্চ পৃথক্‌শ্রাদ্ধং তয়োর্যোগে কুঞ্জরচ্ছায়যোগে চ পৃথক্ পৃথগিতি বাচস্পতিমিশ্রাদ্যুক্তং নিরস্তং বিধৌ মঘাযোগশ্রবণাৎ বিশিষ্টস্যৈব নিমিত্তত্বাৎ কেবলত্রয়োদশ্যাদৌ শ্রাদ্ধে প্রমাণাভাবাৎ। কেবলত্রয়োদশ্যাদ্যর্থবাদানাং ক্লৃপ্তবিধেরেব স্তুতিরূপত্বাৎ নানাবিধিকল্পনাগৌরবাচ্চেতি। অত্র পায়সস্য পাকসাধ্যত্বাৎ মঘাশ্রাদ্ধে শূদ্রস্য নাধিকার ইতি কেচিৎ তন্ন পায়সস্য প্রশস্তত্বাৎ অনিষিদ্ধদ্রব্যান্তরেণাপি তচ্ছ্রাদ্ধবিধানাৎ। অতএব যৎকিঞ্চিন্মধুনা মিশ্রমিতি মনুনা যৎকিঞ্চিদিতি সামান্যেনাভিহিতমিতি তথা পিতরং স্পৃহয়ন্ত্যন্নমষ্টকাসু মঘাসু চেতি অন্নমাত্রমুক্তম্। কুঞ্জরচ্ছায়যোগস্ত ন মঘাত্রয়োদশীবিশেষণং কিন্তু ফলাতিশয়ার্থং গুণ এবেতি সহেতুকমাহ কুঞ্জরচ্ছায়যোগস্ত্বিতি। ন একেনেতি একস্মিন্নেব পূর্ব্বলিখিতব্রহ্মপুরাণে কুঞ্জরচ্ছায়যোগঃ পৃথগুক্তঃ। অনন্তরঞ্চ মঘাত্রয়োদশীশ্রাদ্ধমভিহিতং ন তু মঘাত্রয়োদশীবিশেষণত্বেন কুঞ্জরচ্ছায় উক্ত ইতি ভাবঃ। অতএব যোগো মঘাত্রয়োদশ্যামিত্যত্র মঘাগ্রহণমিতি প্রাগেব বিবৃতমিতি। অন্যে তু অপি নঃ স্বকুলে জায়াৎ যো নো দদ্যাত্রয়োদশীম্। মঘাসু সর্পিষা যুক্তং

পরমান্নেন যো দদ্যাৎ পিতৄণামৌর্দ্ধদেহিকম্।
গজচ্ছায়াস্তু পূর্ব্বস্যাং কুরুতে দক্ষিণামুখঃ॥ ইতি মহা-

পায়সং দক্ষিণায়নে। ইতি মহাভারতে মঘাত্রয়োদশ্যাং শ্রাদ্ধমুক্ত্বা অজেন সর্ব্বলোহেন মঘাসু চ যতব্রত ইতি তত্রৈব পুনর্ম্মঘাপদস্য বৈয়র্থ্যাপত্তিভিয়া। কুঞ্জরচ্ছায়পরত্বেন কুঞ্জরচ্ছায়যোগস্য শ্রাদ্ধাধিকরণত্বেন পৃথগভিধানাৎ গুণত্বং অতএব বক্ষ্যতি পুনর্ম্মঘাগ্রহণং স্তুত্যর্থমিতি অন্যথা বিশিষ্টবিধিত্বেন মঘাযোগস্য প্রাশস্ত্যানুপপত্তেরিত্যাহুঃ। অত্র প্রতিবন্ধিমাহ কিঞ্চেতি মনুবচনে ইতি অপি নঃ স্বকুলে জায়াদিত্যত্র ইত্যর্থঃ। মহাশল্কিন ইতি বৃহন্মৎস্যা ইতি প্রাঞ্চঃ। অন্যে তু এক-শঙ্কোঽর্দ্ধচন্দ্রশ্চ ললাটে খড়্গসংযুতঃ। শুক্লবর্ণশ্চ যো মৎস্যো মহাশল্কঃ স উচ্যতে ইতি পুলস্ত্যনাম্না বচনং পঠিত্বা তদুক্তমৎস্য এব মহাশল্কীত্যাহুঃ। পুনর্ম্মঘাগ্রহণং স্তুত্যর্থমিতি পুনরুক্তস্য মঘাপদস্য বৈয়র্থ্যাপত্ত্যা কুঞ্জরচ্ছায়পরত্বেন তস্য প্রাশস্ত্যার্থমিত্যর্থঃ॥ ৬২॥

পরমান্নেনেতি। যঃ পরমান্নেনৌর্দ্ধদেহিকং শ্রাদ্ধং দদ্যাৎ করোতি স পূর্ব্বস্যাং গতায়াং অর্থাদপরাহ্ণকালীনায়াং গজচ্ছায়ায়ামেব কুরুতে গজচ্ছায়াকৃতশ্রাদ্ধস্য যৎ ফলং তল্লভতে ইত্যর্থঃ। অত্র পূর্ব্বস্যামিত্যনেন দেশলাভঃ। কর্ণব্যজনেতি কালপরত্বে তস্য কর্ণব্যজনবীজিতত্ববাধাদিতি ভাবঃ। মতান্তরমাহ কালপ্রকরণেতি আম্নানাদভিধানাৎ অর্থবাদ ইতি তথাচ তদবিবক্ষিতমিতি ভাবঃ। প্রকরণাদ্বাক্যস্যেতি। অত্র জৈমিনিসূত্রং শ্রুতিলিঙ্গবাক্যপ্রকরণস্থানসমাখ্যানাং সমবায়ে পারদৌর্ব্বল্যমর্থবিপ্রকর্ষাদিতি। শ্রুত্যাদিন্যায়ানামেকবিষয়ে প্রসক্তৌ পরপরন্যায়স্য দৌর্ব্বল্যং পূর্ব্বপূর্ব্বন্যায়াপেক্ষয়া বিলম্বেনার্থোপস্থাপকত্বাদিতি ব্যাক্যার্থঃ। শ্রুত্যাদয়ো বিবৃতা ভাষ্যকৃতা। যথা। শ্রুতির্দ্বিতীয়া ক্ষমতা চ লিঙ্গং বাক্যং পদান্যেব চ সংহতানি। সা প্রক্রিয়া যা কথমিত্যপেক্ষা স্থানং ক্রমো যোগবলং সমাখ্যা॥ ইতি। অস্যার্থঃ কারকবিভক্তিরূপা দ্বিতীয়া শ্রুতিঃ এতয়া কর্ম্মগতং ক্রিয়াজন্যফলশালিত্বরূপং কর্ম্মত্বং

ভারতবচনাৎ প্রাক্ছায়ে কুঞ্জরস্য চেতি মনুবিষ্ণু-

---

পদান্তরাপেক্ষাং বিনৈব বোধ্যতে। অতএব তস্য বলবত্ত্বং মাসম-
ধীতে ইত্যাদাবুপপদবিভক্তীনামন্তর্ভাবিতপদসাপেক্ষত্বাদ্বিলম্বেনার্থবোধ-
কত্বাৎ ন বলবত্ত্বমতস্তদ্বারণায় কারকবিভক্তিরূপেতি এতচ্চ দ্বিতীয়া-
পদং কারকবিভক্তিমাত্রোপলক্ষণং সর্ব্বাসামেব কারকবিভক্তীনাং
প্রকৃত্যর্থান্বিতস্বার্থবোধনেঽন্যানপেক্ষত্বস্য তুল্যত্বাদিতি বেদান্ত-
টীকায়াং বাচস্পতিমিশ্রাঃ। যথা ব্রীহীন্ বহন্তীত্যাদৌ দ্বিতীয়াশ্রুত্যা
ব্রীহীনামবঘাতক্রিয়াজন্যবৈতুষ্যরূপফলশালিত্বং বোধ্যতে। ক্ষমতা অর্থ-
সামর্থ্যং যথা বর্হির্দেবসদনং দামীতি মন্ত্রস্য বিনিয়োগবিশেষাপ্রাপ্তা-
বপি দাপ লবণে ইতি ধাতোর্দামীত্যস্য সিদ্ধত্বাৎ বর্হিশ্চেদনপ্রকাশক-
ত্বেনার্থসামর্থ্যাৎ তত্রৈব বিনিয়োগোঽবগম্যতে। পরস্পরান্বিতক্রিয়া-
কারকার্থানি পদানি বাক্যম্। যথা শ্বেতমালভেত অরুণয়া একহায়ন্যা
সোমং ক্রীণাতি ইত্যাদৌ বাক্যবলেন শ্বেতালভনস্যারুণাদিগুণবিশিষ্ট-
গবাদেশ্চ যাগে বিনিয়োগাবগমঃ। প্রক্রিয়া প্রকরণং কথমিত্যপেক্ষা
উৎপত্তিবিধিনা প্রধানকর্ম্মবোধনানন্তরং অঙ্গাভিধানপ্রযোজিকা কেন
প্রকারেণ ইদং কর্ত্তব্যমিত্যাকাঙ্ক্ষা যথা ইডো যজতি সমিধো যজতি
ইত্যাদ্যুক্তানাং প্রযাজাহুতিপঞ্চকানাং দর্শপৌর্ণমাসপ্রকরণপঠিতানাং
প্রকরণবলাদ্দর্শপৌর্ণমাসাঙ্গত্বপ্রতীতিঃ। স্থানং সমানদেশত্বং সান্নিধ্য-
মিতি যাবৎ যথা দৃশদি তণ্ডুলানাবপতি ধান্যমসীতি তত এব বর্হিষঃ
প্রাদেশমাত্রে পবিত্রে কুরুতে পবিত্রেস্থো বৈষ্ণব্যাবিত্যাদৌ সান্নিধ্যবলাৎ
তণ্ডুলাবপনপবিত্রকরণাদৌ ধান্যমসীতি পবিত্রেস্থ ইত্যাদিমন্ত্রাণাং
বিনিযোগাবগতিঃ। অথবা ক্রমো যথাসংখ্যক্রমঃ স যথা কাংস্য-
বানস্পত্যমার্ত্তিকৈরভিচারব্রহ্মবর্চ্চঃপ্রতিষ্ঠাকামা যজন্তীত্যত্র যথাসংখ্য-
ক্রমেণ কাংস্যাদিকরণকযাগানাং অভিচারাদিকামেচ্ছান্বয়ো গম্যতে।
সমাখ্যা যোগবলং যথা হৌত্রমাচরতি ঔদ্গাত্রমাচরতি ইত্যাদৌ
হোতুরিদং হৌত্রং হোমঃ উদ্গাতুরিদং ঔদ্গাত্রং গানমিত্যাদের্যোগ-
বলাৎ অবগতিরিতি। একবিষয়ে প্রসক্তৌ লিঙ্গাৎ শ্রুতের্ব্বলবত্ত্বং যথা

বচনাৎ কর্ণব্যঞ্জনবীজিতমিত্যভিধানাচ্চ। কালপ্রকরণাম্নাতাৎ কালপরমিদং কর্ণব্যঞ্জনবীজিতম্নিতি ত্বর্থবাদ

ঐন্দ্র্যা ঋচা গার্হপত্যমুপতিষ্ঠেত ইতি অত্র হি গার্হপত্যোঽগ্নিঃ তদ্গা-তঞ্চ উপস্থানক্রিয়াজন্যপ্রীতিরূপফলাশ্রয়ত্বং দ্বিতীয়য়া সাক্ষাদ্বোধিতম্। তথাচ তস্য দেবতাত্বং শ্রৌতং ঐন্দ্র্যা ইত্যনেন চ ইন্দ্রপ্রকাশিকায়া ঋচঃ করণত্বং বোধিতং তথাচ বিরোধঃ নহ্যন্যপ্রকাশকমন্ত্রেণান্য-স্যোপস্থানং বিহিতং তেনৈকত্র লক্ষণাবশ্যকী। তত্র গার্হপত্য-পদেন ইন্দ্রলক্ষণা তদ্দেবতাত্বস্য শ্রৌতত্বাৎ লিঙ্গে ন তু দেবতাত্বং বিলম্ববোধ্যং ইদমুপস্থানমিন্দ্রদেবতাকং ইন্দ্রপ্রকাশকমন্ত্রকরণকত্বাদিত্য-নুমানদ্বারকত্বাৎ অত ইন্দ্রপদ এব গার্হপত্যে লক্ষণেতি। এবং পায়সেন দধ্না জুহোতীত্যত্র পায়সেন পয়ঃপ্রকাশকমন্ত্রেণ পয়ঃ পৃথিব্যা-মিত্যাদিনা দধ্না জুহোতীত্যর্থঃ। অত্রাপি দধিনিষ্ঠং হবনকরণকত্বং শ্রৌতং মন্ত্রলিঙ্গেন তু পয়োনিষ্ঠং তৎকরণত্বমিদং হবনং পয়ঃকরণকং পয়ঃ-প্রকাশকমন্ত্রকরণকত্বাৎ ইত্যমনুমানেন বোধনীয়ং ইতি বিলম্ববোধকত্বাৎ দুর্ব্বলম্। তেন মন্ত্রস্থপয়ঃপদ এব দধিলক্ষণেতি। লিঙ্গস্য বাক্যাদ্ব-বলবত্ত্বম্। যথা আনন্তে সদনং কৃণোমি ঘৃতস্য ধারয়া সুসেধং কল্প-য়ামি। তস্মিনসীদামৃতে প্রতিতিষ্ঠ ব্রীহীণাং মেদঃ সুমনস্যমান ইতি মন্ত্রস্তাবৎ কুশাস্তরণপুরোডাশাসাদনরূপদ্বিতীয়প্রকরণে উক্তঃ। অত্র কল্পয়াম্যন্তপূর্ব্বাংশেন কুশাস্তরণরূপসদনস্য প্রকাশকঃ। এবং কল্পয়া-ম্যন্তমনুক্ত্বা তস্মিন্নিত্যুক্তে তস্মিন্ কস্মিন্নিত্যাকাঙ্ক্ষোদয়াৎ সমুদায়-মন্ত্রস্যৈব পুরোডাশাসাদনরূপৈকপ্রয়োজনেনৈক্যাচ্চ মিলিত্বা একং বাক্যম্। তথাচোক্তং জৈমিনিনা। অর্থৈক্যাদেকং বাক্যং সাকাঙ্ক্ষ-ঞ্চেদ্বিভাগে স্যাদিতি। অস্যার্থঃ। অর্থৈক্যাৎ প্রয়োজনৈক্যাৎ একং বাক্যং যদি বিভাগে বিচ্ছিদ্যপঠনে সাকাঙ্ক্ষং স্যাদিতি। তথাচাত্র অর্থসামর্থ্যাৎ পূর্ব্বাংশস্য কল্পয়াম্যন্তস্য সদনে পরাংশস্য তস্মিন্নিত্যাদেঃ সাদনে বিনিয়োগঃ কিংবা একবাক্যতাবলাৎ উভয়ত্রৈব সমুদায়মন্ত্রবিনি-য়োগ ইতি বিরোধেঽর্থসামর্থ্যং বলবৎ। সদনসাদনরূপার্থয়োঃ প্রাগন্ন-

ইতি হলায়ুধবচনং দুর্ব্বলমেব প্রকরণাদ্বাক্যস্য বলবত্ত্বাৎ

গতত্বেন তদধীনয়োঃ স্বস্বনিষ্ঠপূর্ব্বাপরার্দ্ধভাগবিনিয়োগয়োরপি প্রাক্ প্রতিপত্তেঃ। একবাক্যতাবগম্যস্য তু একপ্রয়োজনকত্বাদিজ্ঞানসাপেক্ষ্যত্বেন বিলম্বিতত্বাৎ তদধীনস্যোভয়ত্র সমুদায়মন্ত্রবিনিয়োগস্যাপি বিলম্বেনাবগমাৎ। অতঃ কল্পয়াম্যন্তস্য সদনে তস্মিন্নিত্যস্য চ সাদনে বিনিয়োগ ইতি। বাক্যপ্রকরণয়োর্বিরোধে বাক্যং বলীয়ঃ। যথা জ্যোতিষ্টোমপ্রকরণে শ্রূয়তে। তিস্রঃ সান্নায্যস্য উপসদো দ্বাদশাহীনস্যেতি। অত্র উপসৎ সতিলব্রীহিচরুঃ সান্নায্যো জ্যোতিষ্টোমবিশেষঃ। এবঞ্চাত্র জ্যোতিষ্টোমপ্রকরণীয়ত্বেনাহীনপদস্য ন হীনোঽহীন ইতি যোগার্থেন সান্নায্যবিশেষণত্বেনায়াতি। ন চাহীনপদস্য সান্নায্যবিশেষণত্বে তত্রোপসত্রয়বিধানেন দ্বাদশতদ্বিধানবিরোধ ইতি বাচ্যং মিলিত্বা পঞ্চদশোপসদ্বিধানসম্ভবাৎ। তথা বাক্যে ন চাহীনপদস্য রূঢ্যা জ্যোতিষ্টোমবিকৃতীভূতস্য যাগবিশেষস্য উপস্থাপনাৎ তত্রৈব দ্বাদশোপসদঙ্গত্বাবগম ইতি বিরোধে বাক্যং বলীয়ঃ। রূঢ়েঃ শীঘ্রোপস্থাপকত্বেন তদ্বাক্যাৎ শীঘ্রমেব বিকৃতিযাগবিশেষস্য তদ্গতদ্বাদশোপসদঙ্গকত্বস্য চ প্রতিপত্তেঃ। ন তু প্রকরণানুরোধাদ্যোগার্থস্যাদরঃ। প্রকরণস্যাহীনপদং সান্নায্যপরং তৎসমানবিভক্তিকতয়া তৎপ্রকরণনির্দ্দিষ্টত্বাৎ ইত্যনুমানদ্বারকত্বেন নানাপদশক্তিজ্ঞানসাপেক্ষত্বেন চ যোগার্থোপস্থিতের্বিলম্বিতত্বাৎ অন্যপ্রকরণমধ্যেঽপি প্রসঙ্গাদন্যনিরূপণস্য শাস্ত্রদৃষ্টত্বাচ্চ। প্রকরণস্থানয়োর্বিরোধে প্রকরণং বলীয়ঃ। যথা রাজসূয়প্রকরণেঽভিষেচনীয়াখ্যঃ কশ্চিদ্‌যাগবিশেষঃ তদঙ্গতয়া উক্তঃ। তৎসন্নিধৌ চ শৌনঃশেফং শৃণোতি অক্ষৈঃ দীব্যতি ইতি শ্রূয়তে। শৌনঃশেফং শুনঃশেফমুনেশ্চরিতং পুরাণোক্তং অত্র শৌনঃশেফচরিতশ্রবণং অক্ষৈর্দেবনঞ্চেতি দ্বয়ং সান্নিধ্যরূপক্রমবলাৎ অভিষেচনস্যাঙ্গং কিংবা প্রকরণবলেন রাজসূয়াঙ্গমিতি বিরোধঃ ন চ উভয়থাপি রাজসূয়ে তয়োঃ কর্ত্তব্যত্বাদ্বিচারোঽয়মফল ইতি বাচ্যং এতয়োরভিষেচনীয়াঙ্গত্বে স্বতন্ত্রা-

উপউক্তনিতম্বেষু ছায়ায়াং কুঞ্জরস্থ চ। ইতি বিষ্ণুধর্ম্মো-
ত্তরবচনে দেশপ্রকরণাম্নানাচ্চ ॥ ৬৩ ॥

ভিষেচনীয়ানুষ্ঠানেঽপি তদাপত্তেঃ। অথ প্রকরণং বলবৎ শৌনঃ-শেকাদিবিধেরঙ্গবিধিতয়া অঙ্গাকাঙ্ক্ষারূপপ্রকরণোত্থাপিতত্বেন যত্রৈব তেষামাকাঙ্ক্ষা তত্রৈব তেষামন্বয়াৎ অন্বয়াকাঙ্ক্ষা চ রাজসূয় এব অতস্ত-স্যৈবাঙ্গমেতদ্দ্বয়ং অভিষেচনীয়ে তু তদানীং নাঙ্গাকাঙ্ক্ষা তস্য স্বত-ন্ত্রেণ কর্ত্তব্যতাবিষয়ে জ্যোতিষ্টোমবিধিনা কর্ত্তব্যতাবোধকবাক্যান্তরেণৈব তদঙ্গানাং প্রাপ্তত্বাদিত্যভিষেচনীয়সন্নিধৌ তদভিধানন্তু তদানন্তর্য্যার্থ-মেবেতি। স্থানসমাখ্যয়োর্ব্বিরোধে স্থানং বলবৎ। যথা কুত্রচিদ্যাগে বহূন্ মন্ত্রানুক্ত্বা এতৎ সর্ব্বং পৌরোডাশিকমিত্যুক্তং তন্মন্ত্রজাতমধ্যে চ শুন্ধধ্বং দৈব্যায় কর্ম্মণে ইতি মন্ত্রোঽপি পঠিতঃ তথা সান্নায্যযাগে শ্রূয়তে সান্নায্যায় গ্রহান্ গৃহ্ণাতি শুন্ধধ্বং দৈবায় কর্ম্মণে ইতি সান্না-য্যেন জুহোতীতি। অত্র সান্নায্যং হবির্বিশেষঃ। গ্রহঃ পাত্রং গৃহ্যতে-ঽনেন ইতি ব্যুৎপত্তেঃ। অত্র শুন্ধধ্বমিতি মন্ত্রলিঙ্গাৎ শুন্ধধ্বমিতি মন্ত্রঃ পাত্রক্ষালনরূপতচ্ছোধনে বিনিযুক্তঃ। তথা চ সান্নিধ্যরূপস্থানবলাৎ কিং সান্নায্যপাত্রশোধনে বিনিযুক্তঃ কিংবা পৌরডাশিকমন্ত্রজাতমধ্যে পাঠাৎ যোগবলেন পুরোডাশপাত্রক্ষালনে বিনিযুক্তঃ যোগার্থশ্চ পুরোডাশস্যেদং পৌরোডাশিকং পাত্রং তৎসম্বন্ধিতয়া পুনরণপ্রত্যয়েন মন্ত্রঃ পৌরো-ডাশিক ইতি অত্র বিরোধে স্থানং বলবৎ। সান্নায্যপাত্রস্য ব্যবহিতং উপস্থিতত্বাৎ তৎপাত্রক্ষালন এব সান্নিধ্যবলেন ঝটিতি মন্ত্রান্বয়াৎ যোগ-বলাচ্চ পুরোডাশপাত্রোপস্থিতেবিলম্বিতত্বাৎ। তথাহি আদৌ স্থানান্ত-রীয়পৌরোডাশিকপদানুসন্ধানং ততঃ পৃথক্ তদবয়বশক্তীনামুপস্থিতিরন-ন্তরং যোগমহিম্না পুরোড়াশপাত্রোপস্থিতিরিতি তদেব দুর্ব্বলমিতি। এবঞ্চ পুরোডাশপাত্রক্ষালনং তদিতরপৌরোডাশিকমন্ত্রৈরেব তন্মন্ত্রজাতমধ্যে শুন্ধধ্বমিতি মন্ত্রস্য পাঠস্তু সান্নায্যশূন্যযাগান্তরীয়পুরোডাশপাত্রক্ষালনা-য়েতি। এবং স্থিতে প্রকৃতেঽপি হস্তিচ্ছায়াসু বিধিবৎ কর্ণধ্যজনবীজিত-মিত্যত্র হস্তিচ্ছায়াকালপ্রকণাম্নাতত্বেঽপি ন কালপরতা প্রকরণাপেক্ষয়া

পিণ্ডদানঞ্চাত্র জ্যেষ্ঠপুত্রিণা ন কার্য্যম্। যথা কন্যাগতাপরপক্ষাধিকারে দেবীপুরাণে। কন্যাস্থে তু রবাবীষে

---

কর্ণব্যজনবীজিতমিতি বাক্যস্য বলবত্ত্বাৎ। অত্র বাক্যস্য বলবত্ত্বঞ্চ কর্ণব্যজনবীজিতত্বস্য কালেন বাধিতত্বেন অন্যথানুপপদ্যমানত্বাৎ শীঘ্রপ্রত্যয়কত্বাচ্চ। প্রকরণস্য তু ইদং পদং কালপরং কালপরতত্তৎপদসমভিব্যাহারেণ নির্দ্দিষ্টত্বাৎ ইত্যনুমানদ্বারকতয়া বিলম্বেন বোধকত্বেন দুর্ব্বলত্বাৎ অতো দেশপরতৈবেতি ভাবঃ॥ ৬৩॥

* পিণ্ডদানঞ্চাত্রেতি অত্র মঘাত্রয়োদশীনিমিত্তকশ্রাদ্ধে ন তু তত্রৈব ক্রিয়মাণে পক্ষশ্রাদ্ধান্তর্গতশ্রাদ্ধে। কন্যাগতেতি কন্যাসমাপ্যেত্যর্থঃ। তেন কন্যাসমাপ্যাপরপক্ষত্বস্যাশ্বযুক্কৃষ্ণপক্ষব্যভিচারাৎ অশ্বযুক্কৃষ্ণপক্ষাধিকারে ইত্যর্থঃ। ঈষে পৌর্ণমাস্যন্তাশ্বিনে তত্রৈব মঘাত্রয়োদশীসম্ভবাৎ ন তু মুখ্যাশ্বিনপরত্বং সৌরাশ্বিনপরত্বং বা ঈষশব্দস্য বৈয়র্থ্যাৎ তেনাশ্বযুক্কৃষ্ণপক্ষশ্রাদ্ধস্য কন্যাসম্বন্ধে প্রাশস্ত্যার্থং কন্যাসংস্থে রবাবীষে ইত্যভিহিতম্। কদাচিৎ সিংহসম্বন্ধিন্যর্কেঽপি তৎশ্রাদ্ধসম্ভবাৎ কন্যাসম্বন্ধনিয়মাভাবাৎ। অতএব দেবীপুরাণে এব। কন্যায়াং কৃষ্ণপক্ষে তু পূজয়িত্বার্দ্রভেদি বা। নবম্যাং বোধয়েদ্দেবীং মহাবিভববিস্তরৈরিতি দেবীবোধনে কন্যায়ামিতি প্রাশস্ত্যার্থমেবাভিহিতং কদাচিৎ সিংহসম্বন্ধিনবম্যামপি তৎসম্ভবাৎ নিয়মাসম্ভবাদিতি পূজনীয়াঃ পিতর ইতি শেষঃ। তত্রাপীতি অপির্ভিন্নক্রমে তথাচ তত্রাশ্বিনকৃষ্ণপক্ষমধ্যে পিতৃদৈবতে ঋক্ষেঽপি পূজনীয়া ইতি পূর্ব্বেণান্বয়ঃ। তেন শঙ্খাদিবচনৈকবাক্যতয়া তৎপ্রাপ্তমঘাত্রয়োদশীশ্রাদ্ধমনেনাপি পৃথগভিহিতম্। অন্যথা যথাশ্রুতেঽপি শব্দবৈয়র্থ্যাপত্তেঃ। পিণ্ডবর্জ্জনমপি মঘাত্রয়োদশীনিমিত্তকশ্রাদ্ধ এব ন তু পক্ষশ্রাদ্ধে অন্যথা তদ্বর্জ্জনস্য মঘাকালীনশ্রাদ্ধমাত্রপরত্বে তত্র সাংবৎসরিকাদাবপি তদ্বর্জ্জনাপত্তেঃ। অতএব এতদেকবাক্যতয়া মঘায়াং পিণ্ডদানেন জ্যেষ্ঠঃ পুত্রো বিনশ্যতীত্যাদাবপি নিমিত্তসপ্তম্যেবেতি ভোজঙ্গী পঞ্চমীতি অত্র ভৌজঙ্গীং তিথিমাসাদ্য ইত্যনেনাপরপক্ষীয়ঃ

পূজনীয়া যথাবিধি। ভৌজঙ্গীং তিথিমাসাদ্য যাবচ্চন্দ্রার্ক-সঙ্গমম্॥ তত্রাপি মহতী পূজা কর্ত্তব্যা পিতৃদৈবতে।

ষষ্ঠ্যাদিকল্প এবোক্তঃ বক্ষ্যমাণেন ত্রিভাগহীনং পক্ষং বেতি ব্রহ্মপুরাণৈক-বাক্যত্বাৎ পঞ্চম্যাদিকল্পান্তরকল্পনায়াং শ্রুত্যন্তরকল্পনাগৌরবাপত্তেঃ পঞ্চম্যুপাদানঞ্চ তৎকল্পনীয়পূজাঙ্গভূতপূর্ব্বদিবসীয়ামিষাদিবর্জ্জনান্বয়ার্থং এতেন পঞ্চম্যাদিষমাবাস্যান্তেষু মহতী পূজা কর্ত্তব্যা তত্রৈব পক্ষ-শ্রাদ্ধে যস্যাং কস্যাঞ্চিত্তিথৌ মঘানক্ষত্রে সতি পিণ্ডদানং বিবর্জ্জয়েদিতি মৈথিলমতমপাস্তং পঞ্চম্যাদিকল্পান্তরকল্পনাগৌরবাৎ। কিঞ্চ পিণ্ড-দাননিষেধোঽয়ং ভবতা পক্ষশ্রাদ্ধ এব বাচ্যঃ প্রস্তুতত্বাৎ অন্যথা সাংবৎ-সরিকে পিণ্ডদাননিষেধাপত্তেঃ। তথাচ পক্ষশ্রাদ্ধাৎ পৃথগ্‌ভূতমঘাত্রয়ো-দশীশ্রাদ্ধে পিণ্ডদানস্য দুর্নিবারাপত্তেঃ। পিণ্ডদাননিষেধকবচনান্তর-স্যাপ্যেতদেকবাক্যতয়া পক্ষশ্রাদ্ধপরত্বাৎ জ্যেষ্ঠপুত্ত্রীতি বিদ্যমানার্থক-মত্বপাজ্জ্যেষ্ঠপুত্ত্রসত্ত্ব এব পিণ্ডদাননিষেধোঽতোঽন্যৈঃ পিণ্ডদানং কর্ত্তব্যমেব অন্যথা জ্যেষ্ঠপুত্ত্রীতি বিশেষণবৈয়র্থ্যাপত্তেঃ অতএব মঘায়াং পিণ্ডদানেন জ্যেষ্ঠপুত্ত্রো বিনশ্যতীতি নিন্দার্থবাদেঽপি জ্যেষ্ঠপুত্ত্র এব ইত্যভিহিতম্। জ্যেষ্ঠশ্চাত্র সর্ব্বপুত্ত্রাপেক্ষয়া বোধ্যো জ্যেষ্ঠপদাদুপস্থিতে-রেব প্রাথমিকত্বাৎ তদয়ং ব্যবস্থানিষ্কর্ষঃ। মঘাত্রয়োদশী পক্ষশ্রাদ্ধাৎ পৃথক্‌-শ্রাদ্ধনিমিত্তং তত্রৈব মঘাত্রয়োদশীশ্রাদ্ধে কুঞ্জরচ্ছায়াযোগে গুণঃ ন তু নিমিত্তান্তরম্। এবঞ্চ যদা পূর্ব্বদিনেঽপরাহ্ণে মঘাত্রয়োদশী পরদিনে চ কুঞ্জরচ্ছায়াযোগঃ তদা পূর্ব্বদিন এব মঘাত্রয়োদশীশ্রাদ্ধং পরদিনে কুঞ্জর-চ্ছায়যোগোঽকিঞ্চিৎকর এব। যদা তু পূর্ব্বদিনেঽপরাহ্ণে কেবলত্রয়ো-দশীলাভঃ পরদিনে চ পূর্ব্বাহ্ণে মঘাত্রয়োদশী তদা পূর্ব্বদিনে পক্ষশ্রাদ্ধং পরদিনে মঘাত্রয়োদশীশ্রাদ্ধং রাত্র্যাদিপর্য্যুদস্তেতরস্যৈব শ্রাদ্ধকাল-ত্বাৎ। যদা পুনরেকস্মিন্নেব দিনে পূর্ব্বাহ্ণে মহাযোগোঽপরাহ্ণে চ কেবলত্রয়োদশী তদা পূর্ব্বাহ্ণে মঘাত্রয়োদশীশ্রাদ্ধং অপরাহ্ণে চ পক্ষ-শ্রাদ্ধম্। যদা ত্বপরাহ্ণে এব মঘাত্রয়োদশীলাভস্তদা মঘাত্রয়োদশীশ্রাদ্ধ-

ঋক্ষে পিণ্ডপ্রদানন্তু জ্যেষ্ঠপুত্রী বিবর্জ্জয়েৎ॥ ভৌজঙ্গী পঞ্চমী। চন্দ্রার্কসঙ্গমোঽমাবাস্যা॥ ৬৪॥

অথ কন্যাগতাপরপক্ষঃ। ব্রহ্মপুরাণে। অশ্বযুক্কৃষ্ণ-পক্ষে তু শ্রাদ্ধং কুর্য্যাদ্দিনে দিনে। ত্রিভাগহীনং পক্ষং বা ত্রিভাগন্ত্বর্দ্ধমেব বা॥ ন সন্তি পিতরশ্চেতি কৃত্বা মনসি যো নরঃ। শ্রাদ্ধং ন কুরুতে তত্র তস্য রক্তং পিবন্তি তে॥

---

মেব কার্য্যং প্রসঙ্গাৎ সপিণ্ডকপক্ষশ্রাদ্ধসিদ্ধিঃ। উভয়দিনাপরাহ্নে ত্রয়োদশীলাভে পূর্ব্বদিন এব শ্রাদ্ধং তেনৈব পক্ষশ্রাদ্ধসিদ্ধিঃ। ত্রয়োদশ্যাং মঘাযোগালাভে মঘাশ্রাদ্ধং নাস্ত্যেবেতি। কল্পতরুস্তু কেবল-ত্রয়োদশ্যামেব পক্ষশ্রাদ্ধাৎ পৃথক্শ্রাদ্ধং কুঞ্জরচ্ছায়বৎ তত্র মঘাযোগোঽপি গুণ ইত্যাহ। মৈথিলাস্তু কেবলমঘা কেবলত্রয়োদশী মঘাযুক্তত্রয়োদশী কুঞ্জরচ্ছায়যোগশ্চ ইতি চত্বারি পৃথক্শ্রদ্ধে নিমিত্তানি কিন্তু পক্ষশ্রাদ্ধ-দিনে সকলসম্পত্তৌ পক্ষশ্রাদ্ধেনৈকেনৈব সর্ব্বেষাং সিদ্ধিঃ। যদা চাপ-রাহ্নে কেবলত্রয়োদশী তস্মিন্নেব দিনে পরদিনে বা মঘাযোগঃ কুঞ্জর-চ্ছায়যোগো বা তদা পক্ষশ্রাদ্ধং মঘাদিনিমিত্তেন শ্রাদ্ধঞ্চ পৃথক্কর্ত্তব্যং একদা পক্ষশ্রাদ্ধমঘাশ্রাদ্ধযোঃ কর্ত্তব্যত্বে সপিণ্ডকপক্ষশ্রাদ্ধেনৈব অপিণ্ড-কমঘাশ্রাদ্ধসিদ্ধিরিত্যাহুঃ। অন্যে তু পক্ষশ্রাদ্ধমঘাত্রয়োদশীশ্রাদ্ধয়োর্ন তন্ত্রতা সমানাঙ্গয়োরেব তন্ত্রতান্যায়বিষয়ত্বাৎ এতয়োশ্চ পিণ্ডতদভাবা-ঙ্গকত্বেনাসমানাঙ্গকত্বাৎ পরন্তু সপিণ্ডকং পক্ষশ্রাদ্ধমপিণ্ডকং মঘা-ত্রয়োদশীশ্রাদ্ধঞ্চ দ্বয়মেব পৃথক্ কর্ত্তব্যমিত্যাহুঃ। মঘাত্রয়োদশীং বিবিচ্য প্রসঙ্গাৎ তৎপক্ষীয়ং শ্রাদ্ধান্তরং বিবেচয়তি॥ ৬৪॥

অথেতি কন্যাগতাপরপক্ষঃ কন্যাসমাপ্যাপরপক্ষঃ অশ্বযুক্কৃষ্ণপক্ষ ইতি যাবৎ। পক্ষশ্রাদ্ধার্থেতি পক্ষং ব্যাপ্য শ্রাদ্ধেত্যর্থঃ। তেনেতি ন চ কৃষ্ণপক্ষে দশম্যাদৌ বর্জ্জয়িত্বা চতুর্দ্দশীমিতি বচনাৎ চতুর্দ্দশীবর্জ্জনেন কথং পঞ্চদশশ্রাদ্ধানীতি বাচ্যং সামান্যকৃষ্ণপক্ষশ্রাদ্ধপ্রকরণ এব চতু-র্দ্দশীবর্জ্জনস্যোক্তত্বেন তত্রৈব তদ্বর্জ্জনাৎ অশ্বযুক্কৃষ্ণপক্ষশ্রাদ্ধস্য তু

যাবচ্চ কন্যাতুলয়োঃ ক্রমাদাস্তে দিবাকরঃ। তাবৎ শ্রাদ্ধস্য কালঃ স্যাৎ শূন্যং প্রেতপুরং তদা ॥ দিনে দিনে ইতি বীপ্সা পক্ষশ্রাদ্ধার্থা। তেন পঞ্চদশ শ্রাদ্ধানি দর্শিতানি। নন্বু তিথিহ্রাসাদেকস্মিন্ পক্ষে চতুর্দ্দশত্বাদহ্নাং চতুর্দ্দশ শ্রাদ্ধানি প্রাপ্নুবন্তি এবং তিথিবৃদ্ধাবহ্ন-র্বৃদ্ধৌ ষোড়শ স্যুঃ ন পঞ্চদশতিথ্যাত্মকত্বাচ্চান্দ্রপক্ষস্য। দিনে দিনে ইতি পঞ্চদশতিথিম্বিত্যর্থঃ। তথা চৈকস্মিন্ দিনে শ্রাদ্ধযোগ্যতিথিদ্বয়লাভে শ্রাদ্ধদ্বয়ং অহোরাত্রবৃদ্ধৌ চ ন শ্রাদ্ধবৃদ্ধিঃ ॥ ৬৫ ॥

প্রকরণভেদেন ভিন্নতয়া তত্র বর্জ্জনাযোগাৎ অন্যথা চতুর্দ্দশ্যাং সংক্রান্ত্যাদিশ্রাদ্ধমপি ন স্যাৎ। এতচ্চ শস্ত্রহতচতুর্দ্দশীপ্রকরণে গ্রন্থকৃতা স্বয়মেব বক্ষ্যতে। অতএব ব্রহ্মপুরাণে। পয়োমূলফলৈঃ শাকৈঃ কৃষ্ণপক্ষে চ সর্ব্বদা। পরাধীনঃ প্রবাসী বা নির্ধনো বাপি মানবঃ। মনসা ভাবশুদ্ধেন শ্রাদ্ধে দদ্যাৎ তিলোদকম্। ন সন্তি পিতরশ্চেতি কৃত্বা মনসি যো নরঃ। ন তর্পয়তি তান্ ভক্ত্যা তদ্দেহাদ্রুধিরঞ্চ তে। পিবন্তি সর্ব্বনাশঞ্চ কুর্ব্বন্তশ্চ পদে পদে। ইতি নিন্দার্থবাদেন সামান্যকৃষ্ণপক্ষশ্রাদ্ধস্য নিত্যত্বমুক্ত্বা পুনস্তত্রৈবাশ্বযুক্কৃষ্ণপক্ষে তু শ্রাদ্ধং কুর্য্যাদ্দিনে দিনে ইত্যাদিনাহশ্বযুক্কৃষ্ণপক্ষশ্রাদ্ধং পৃথঙ্ নিত্যতয়াভিহিতম্। যচ্চ মৈথিলৈরুক্তং আশ্বিনচতুর্দ্দশ্যাং সামান্যত এব শস্ত্রহতস্য চ শ্রাদ্ধপ্রাপ্তৌ আহবেষু বিপন্নানাং জলাগ্নিভৃগুপাতিনাম্। চতুর্দ্দশ্যাং ভবেৎ পূজা অমাবস্যাঞ্চ কামিকীতি দেবীপুরাণেন যৎ পুনরাশ্বিনাপরপক্ষে শস্ত্রহতস্য শ্রাদ্ধবিধানং তদাশ্বিনচতুর্দ্দশ্যাং শস্ত্রহতানামেব শ্রাদ্ধং শস্ত্রহতানামিতি পরিসংখ্যার্থং অন্যথা বৈয়র্থ্যাদিতি। তথা অশক্ত্যা পক্ষাদিকল্পানামকরণে আশ্বিনচতুর্দ্দশ্যাং শস্ত্রহতপিত্রাদিশ্রাদ্ধমবশ্যং কর্ত্তব্যমিতি নিয়মসম্ভবে দোষত্রয়দুষ্টায়াঃ

তথাচ বিষ্ণুধর্ম্মোত্তরপ্রথমকাণ্ডম্। তিথিনৈকেন দিবসশ্চান্দ্রমানে প্রকীর্ত্তিতঃ। অহোরাত্রেণ চৈকেন সাবনো দিবসঃ স্মৃতঃ ॥ ত্রিভাগহীনং পক্ষং বেতি ষষ্ঠ্যাদিকল্প উক্তঃ। ত্রিভাগমিত্যেকাদশ্যাদিকল্প উক্তঃ। অর্দ্ধমেবেতি ত্রয়োদশ্যাদিকল্প উক্তঃ। ন ত্বর্দ্ধমিতি ব্যাখ্যানং কল্পতরূক্তং যুক্তং উত্তরোত্তরলঘুকালোপদেশাৎ সন্নিধানাচ্চ ত্রিভাগার্দ্ধপ্রতীতেঃ। ত্রিভাগহীনত্রিভাগপদয়োরপি পঞ্চম্যাদিদশম্যাদিবিবেচনং কল্পতরূক্তম-

পরিসংখ্যায়া অন্যায্যত্বাৎ। বস্তুতোঽন্যত্র শস্ত্রহতশ্রাদ্ধস্য প্রাশস্ত্যাৎ তত্র কাম্যত্বং আশ্বিনে তু নিত্যবিধিরতএবামাবাস্যাক্ত কামিকীত্যুক্তমিতি। ন কিঞ্চিদেতৎ। দিনপদস্যাহোরাত্রপরত্বাভিপ্রায়েণাশঙ্কতে নন্বিতি। প্রাপ্নুবন্তি ভবন্তি ॥ ৬৫ ॥

নন্বু দিনপদস্যাহোরাত্রবাচিতয়া তিথিপরত্বে ন লক্ষণাপ্রসঙ্গ ইত্যাশঙ্ক্যাহ যথা বিষ্ণুধর্ম্মোত্তরেতি। তিথিনৈকেনেতি। অত্র মিশ্রাঃ তিথিনৈকেনেতি দিবস ইতি তিথিপদেন দিবসো গ্রাহ্য ইতি স্যাৎ ন তু দিবসপদেন তিথির্গ্রাহ্যা ইতি তথাশ্রবণাৎ তস্মাদ্দিনে দিন ইত্যত্র দিনপদস্য ন তিথিপরত্বং তদা চাশ্বযুক্‌কৃষ্ণপক্ষসম্বন্ধিষু সর্ব্বেষু এব দিনেষু বচনান্তরসিদ্ধচতুর্দ্দশীভিন্নেষু শ্রাদ্ধং কুর্য্যাদিতি বিধিঃ পর্য্যবস্যতীত্যাহুঃ তন্ন ন হি তিথিপদেন দিবসো গ্রাহ্য ইতি তস্যার্থঃ তিথিপদস্য স্বপরত্বে ন লক্ষণাপ্রসঙ্গাৎ একপদবৈয়র্থ্যাচ্চ কিন্তু তিথিনেতি অভেদে তৃতীয়া ধান্যেন ধনবানিতিবৎ। তথাচ চান্দ্রমাসাদিগণনে একতিথ্যাত্মকো দিবসো গ্রাহ্যঃ ন ত্বহোরাত্রাত্মকো ইতি বচনার্থঃ। তেন তিথের্দিবসাত্মকত্বে সিদ্ধে দিবসপদবাচ্যত্বং তৎপর্য্যায়দিনপদবাচ্যত্বমপি সিদ্ধমেবেতি। এতেন দিবসদিনপদয়োর্ভেদাৎ দিবসপদস্য কথঞ্চিত্তিথিবোধকতা ভবতু ন তু দিনপদ-

যুক্তমেব। পক্ষাপেক্ষয়া পঞ্চম্যাদেস্ত্রিভাগহীনাদিপদার্থত্বানুপপত্তেরমুখ্যত্বাৎ গোতমোক্তপঞ্চম্যাদিকল্পস্য সামান্যোপক্রমাৎ নাশ্বযুক্‌পরত্বম্। অতএব বিষ্ণুধর্ম্মোত্তরপ্রথমকাণ্ডম্। উত্তরাদয়নাচ্ছ্রাদ্ধে শ্রেষ্ঠং স্যাদ্দক্ষিণায়নম্। চাতুর্ম্মাস্যঞ্চ তত্রাপি প্রসুপ্তে কেশবে হিতম্॥ প্রৌষ্ঠপদ্যাঃ পরঃ পক্ষস্তত্রাপি চ বিশেষতঃ। পঞ্চম্যূর্দ্ধঞ্চ তত্রাপি দশম্যূর্দ্ধমতোঽপ্যতি॥ মঘাযুক্তা চ তত্রাপি শস্তা রাজংস্ত্রয়োদশী। তত্রাক্ষয়ং ভবেচ্ছ্রাদ্ধং মধুনা পায়সেন চ॥ সর্ব্বস্বেনাপি কর্ত্তব্যং শ্রাদ্ধমত্র নরাধিপ। পরান্নভোজী ত্বপচঃ শ্রাদ্ধমত্র তু কারয়েৎ॥ পঞ্চম্যূর্দ্ধং দশম্যূর্দ্ধমতো-

---

স্যাপীত্যপি পরত্বম্। তিথেঃ শশাঙ্কং দিনমিত্যাদিনা তিথের্দিনপদবাচ্যত্বাবগমাচ্চ। অন্যথা দিনপদস্য অহঃপরত্বেঽন্বষ্টশ্রাদ্ধবৎ অহরহঃক্রিয়মাণতয়া নিত্যশ্রাদ্ধং সদৈব স্যাৎ অর্ঘ্যপিণ্ডবিবর্জ্জিতং ইত্যনেনার্ঘ্যাদিবাধঃ স্যাদিতি। অতএব পঞ্চম্যূর্দ্ধঞ্চ তত্রাপি দশম্যূর্দ্ধমতোঽপ্যতীতি বিষ্ণুধর্ম্মোত্তরে তিথিমাদায় কল্পব্যবস্থা উক্তেতি। সন্নিধানাচ্চেতি। অত্র মিশ্রাঃ পক্ষস্য ভাগিত্বেন প্রক্রান্তত্বাৎ ত্রিভাগমিত্যস্যান্বয়ার্থং ষষ্ঠ্যন্তেনোপস্থিতত্বাৎ পক্ষস্যৈবার্দ্ধং প্রতীয়তে অন্যথা ত্রিভাগমিত্যপি ত্রিভাগহীনপক্ষস্যৈব স্যাদিত্যাহুঃ তন্ন উত্তরোত্তরলঘুকালোপদেশেন ত্রিভাগস্যৈবার্দ্ধত্বপ্রতীতেস্তথাহি তন্মতে শক্তঃ পক্ষং কুর্য্যাৎ তত্রাশক্তস্ত্রিভাগহীনং পক্ষং কুর্য্যাৎ তত্রাপ্যশক্তঃ তৃতীয়ভাগং ত্রিভাগেঽপ্যশক্তস্তদর্দ্ধং কুর্য্যাদিতি বাক্যার্থে ত্রিভাগস্যৈবার্দ্ধং প্রতীয়তে ন তু পক্ষস্যার্দ্ধং তস্য ত্রিভাগাপেক্ষয়া গুরুত্বাৎ এবং পূর্ব্বপূর্ব্বকল্পস্য প্রাশস্ত্যকল্পেঽপি অন্যথার্দ্ধস্য গুরুত্বেন তদপেক্ষয়া ত্রিভাগস্য প্রাশস্ত্যাসম্ভবাৎ অতএবার্দ্ধমেবেতি বাকারেণ ত্রিভাগাপেক্ষয়াঽর্দ্ধস্যাপকৃষ্টত্বং প্রতিপাদিতমিতি অমুখ্যত্বাদিতি পক্ষপদসমভিব্যাহৃতত্রিভাগহীনপদস্য

প্যতীত্যনেন ষষ্ঠ্যাদ্যেকাদশ্যাদিকল্পাবুক্তৌ। ন সন্তীত্য-করণে প্রত্যবায়দর্শনং নিত্যত্বদর্শনার্থম্ ॥ ৬৬ ॥

তত্র চ পক্ষশ্রাদ্ধাদিকল্পানাং বিষমশিষ্টত্বেনেচ্ছা-বিকল্পাসম্ভবাৎ একা দেয়া তিস্রো দেয়াঃ ষড্‌দেয়া ইতি-বৎ ফলভূমা কল্পনীয়ঃ। এতেষামেব কল্পানাং দর্শিতত্বাৎ

তিথিপঞ্চকহীন এব মুখ্যত্বেন তিথিচতুষ্কহীনপরতায়া মুখ্যত্বাদিত্যর্থঃ। গোতমোক্তেতি পঞ্চমীপ্রভৃতি বাপরপক্ষস্যেতি গোতমোক্তেত্যর্থঃ। সামান্যোপক্রমস্যেতি সামান্যকৃষ্ণপক্ষশ্রাদ্ধং পৃথক্ অশ্বযুক্কৃষ্ণ-পক্ষশ্রাদ্ধঞ্চ পৃথগিতি প্রাগেব বিবৃতম্। তথাচ সামান্যকৃষ্ণপক্ষশ্রাদ্ধ এব পঞ্চম্যাদিকল্পো গোতমেনোক্তো ন তু অশ্বযুক্কৃষ্ণপক্ষশ্রাদ্ধ ইতি নাস্য তৎপরত্বমিত্যর্থঃ। ভৌজঙ্গীং তিথিমাসাদ্যেতি বচনস্তূক্ত্বা নির্দ্দেশাৎ পঞ্চম্যনন্তরতিথিবোধকত্বেন ষষ্ঠ্যাদিকল্পপরমেব লাঘবাদিতি প্রাগেবাভিহিতম্ ॥ ৬৬ ॥

বিষমশিষ্টত্বেনেতি গুরুলঘুপক্ষয়োস্তুল্যফলত্বেন গুরুপক্ষে সর্ব্ব-দৈব পুরুষাপ্রবৃত্তেস্তদ্বিধেরননুষ্ঠানলক্ষণাপ্রামাণ্যাপত্তেরিতি ভাবঃ। তদুক্তং ভাষ্যকৃতা আরাচ্চেন্মধু বিন্দেত কিমর্থং পর্ব্বতং ব্রজেদিতি। একা দেয়েতি একা দেয়া তিস্রো দেয়াঃ যড্‌দেয়াঃ দ্বাদশ দেয়াঃ শতং দেয়ং সহস্রং দেয়ং অপরিমিতং দেয়মিত্যনেন যাগে একধেন্বাদিনানাদক্ষিণা বিহিতা তত্রৈকধেনুদানেনৈব কর্ম্মাঙ্গদক্ষিণাসিদ্ধৌ বিষমশিষ্টত্বেন ইচ্ছা-বিকল্পাযোগাৎ অধিকদানে যথা ফলভূমা কল্প্যতে তথা প্রকৃতেঽপি পিতৃ-প্রীত্যাদিফলাপেক্ষয়া ফলভূমা কল্পনীয় ইত্যর্থঃ। কল্পতরুমিশ্রাদয়স্তু নিত্যশ্রাদ্ধে ফলাভাবেন ফলভূম্নোঽসম্ভবাৎ শক্তিতারতম্যেন পক্ষাদি-কল্পব্যবস্থামাহুঃ তন্ন নিত্যত্বেঽপি সন্ধ্যাবন্দনাদিবৎ আনুষঙ্গিকফল-সত্ত্বেন তদ্ভূমসম্ভবাৎ অস্মন্মতে তু পক্ষাদিকল্পানাং কাম্যত্বেন তৎ-সত্ত্বে বাধকাভাবাচ্চ উত্তরকল্পকরণেঽভাবস্যাবচ্ছেদকত্বকল্পনে গৌরবাচ্চ ন চ তর্হি পূর্ব্বপূর্ব্বকল্পাকরণেঽপি ন প্রত্যবায়ঃ স্যাদিতি বাচ্যং ইষ্ট-

আশ্বিনে একস্মিন্নপি দিনে শ্রাদ্ধং কর্ত্তব্যমিতি পক্ষশ্চিন্তনীয়ঃ। সামান্যমাসবিহিতন্তু স্যাদেব। অত্র সংশয়ঃ প্রোষ্ঠপদ্যূর্দ্ধং যঃ কৃষ্ণপক্ষঃ স পৌর্ণমাস্যন্তমাসব্যবস্থয়া-

ত্বাৎ কিন্তু সর্ব্বাবরস্যার্দ্ধকল্পস্যৈব নিত্যত্বং তদকরণ এব প্রত্যবায় ইতি ভ্রমঃ। অতএব আরব্ধপক্ষাদিকল্পনে পুরুষেণ দৈবাৎ তদনিষ্পত্তাবপি অর্দ্ধমবশ্যং কর্ত্তব্যমিতি। এতেষামেবেতি এতেনারব্ধপক্ষাদিকল্পে কদাচিদ্বিঘ্নে তৎপরদিবসাভ্যন্তরশ্রাদ্ধং কর্ত্তব্যং কিন্তু কল্পান্তরেণৈবেতি প্রতিপাদিতম্। মিশ্রাস্তু আরব্ধপক্ষশ্রাদ্ধে কদাচিৎ বিঘ্নে সতি পক্ষশ্রাদ্ধানিষ্পত্তাবন্যেঽপি কল্পা ন কার্য্যাঃ। বিকল্পবশাদেকতরস্যৈব কর্ত্তব্যত্বনিশ্চয়াৎ অন্যনিরাসেনৈব পুরুষপ্রবৃত্তেরিত্যাহুঃ। তদসৎ উভয়োর্যুগপদুপস্থিতত্বাদিচ্ছাবিকল্প এবান্যনিরাসাৎ। ইহ তু ব্যবস্থিতবিকল্পে ব্যবস্থাবশেন উভয়োর্যুগপদুপস্থিত্যভাবাৎ অন্যনিরাসাভাবাৎ অত একস্মিন্ কল্পে বিঘ্নে সতি কল্পান্তরং কর্ত্তব্যমেব অন্যথা তচ্ছ্রাদ্ধস্য নিত্যতয়া তদ্বিলোপে প্রত্যবায়াপত্তেঃ। মুখ্যকালাবব্ধাদ্য শ্রাদ্ধাদৌ বিঘ্নে কালান্তরে তৎকরণবিলয়াপত্তেশ্চেতি। সামান্যমাসবিহিতন্ত্বিতি কৃষ্ণপক্ষত্বপুরস্কারেণ প্রতিমাসবিহিতপার্ব্বণস্যাপি নিত্যত্বেনাবশ্যকত্বাদিতি ভাবঃ। অশ্বযুক্কৃষ্ণপক্ষীয়ান্যতমকল্পকরণে তু ন তস্য পৃথক্করণং প্রসঙ্গসিদ্ধত্বাদিতি বোধ্যম্। ননু সামান্যবিশেষন্যায়াৎ বিশেষবিষয়াশ্বযুক্কৃষ্ণপক্ষং পরিহৃত্যৈব কৃষ্ণপক্ষে শ্রাদ্ধং কুর্য্যাদিতি সামান্যবিধিঃ প্রবর্ত্তিতুমর্হতীতি বাচস্পতিমিশ্রোক্তং সাধীয় ইতি চেন্ন যত্র হি সামান্যবিশেষয়োরেকত্র প্রবৃত্তির্ন ঘটতে তত্রৈব সামান্যস্য বিশেষেতরপরত্বং অঘটনবীজঞ্চ ক্বচিৎ বিশেষবিধিবৈয়র্থ্যাৎ। যথা অয়নে বিষুবে চৈব সংক্রান্ত্যাং গ্রহণেষু চ। ইত্যত্র সামান্যসংক্রান্তিবিধের্বিশেষবিষয়েঽয়নাদৌ প্রবৃত্তৌ বিশেষস্যায়নাদিবিধের্বৈয়র্থ্যং ক্বচিচ্চ সামান্যস্য বাধঃ। যথা যজ্জুহোতি তদাহবনীয়ে ইতি সামান্যবিধেঃ পদে জুহোতীত্যাদিবিশেষবিধিবিষয়ে বাধ ইতি সামান্যস্য

ইশ্বযুক্‌কৃষ্ণপক্ষো ভবতি স যদা কন্যোপক্রমঃ কন্যাসমাপ্যশ্চ তদা পক্ষশ্রাদ্ধমবিবাদমেব ॥ ৬৭ ॥

---

বিশেষেতরপরত্বং ক্বচিচ্চ বিশেষস্য বাধঃ। যথা শ্রাদ্ধে জন্মদিনে চৈব ন কুর্য্যাত্তিলতর্পণমিতি শ্রাদ্ধদিনে তিলতর্পণনিষেধকসামান্যবিধের্নীলষণ্ডবিমোক্ষেণ অমাবাস্যাং তিলোদকৈরিতি বিশেষবিধিবিষয়ে প্রবৃত্তে বিশেষস্য বাধ ইতি সামান্যস্য নিষেধবিধেস্তদিতরপরত্বং ক্বচিচ্চ সামান্যস্যাকাঙ্ক্ষাবিরহঃ। আহারোপকরণাকাঙ্ক্ষায়ামুক্তয়োর্ব্রাহ্মণেভ্যো দধি দীয়তাং তক্রং কৌণ্ডিন্যায়েতি সামান্যবিশেষবিধ্যোঃ শীঘ্রপ্রবৃত্তবিশেষতক্রবিধিনা কৌণ্ডিন্যে তদাকাঙ্ক্ষায়া নিবৃত্তত্বাৎ দধিসামান্যবিধেস্তত্রাকাঙ্ক্ষেতি সামান্যবিধেঃ কৌণ্ডিন্যেতরপরত্বং প্রকৃতে চ সামান্যকৃষ্ণপক্ষাশ্বযুক্‌কৃষ্ণপক্ষবিধ্যোরেকত্র প্রবৃত্তৌ ন কস্যচিদ্বৈয়র্থ্যং ন বা কস্যাপি বাধো ন বাকাঙ্ক্ষাবিরহ ইতি কথং সামান্যস্য বিশেষেতরপরত্বং অন্যথা পৌষাদিমাসত্রয়েঽষ্টকাবিশেষবিধিদর্শনাৎ কৃষ্ণপক্ষসামান্যবিধেস্তদিতরপরতা স্যাৎ যথাত্রয়োদশীবিশেষদর্শনাচ্চ অশ্বযুক্‌কৃষ্ণপক্ষবিধেরপি তদিতরপরতা স্যাদিতি ভাবঃ। অতএব অমাবাস্যায়াং পিতৃভ্যো দদ্যাদিতি সামান্যবিধিপ্রাপ্তামাবাস্যামশ্বযুক্‌কৃষ্ণপক্ষবিধিপ্রবৃত্তাবমাবাস্যেতরতিথাবপ্রাপ্তপ্রাপকত্বাৎ অমাবাস্যায়াঞ্চ প্রাপ্তপ্রাপকত্বাৎ বিধ্যনুবাদবৈয়র্থ্যং স্যাৎ অতঃ সামান্যামাবাস্যাবিধেরশ্বযুক্‌কৃষ্ণপক্ষাতিরিক্তবিষয়ত্বং তথা কৃষ্ণপক্ষে যস্যাং কস্যাঞ্চিত্তিথৌ শ্রাদ্ধং কর্ত্তব্যমিতি সামান্যবিধেরপি অশ্বযুক্‌কৃষ্ণপক্ষেতরপরত্বমিত্যপি তদুক্তং পরাস্তম্। অমাবাস্যায়াং পিতৃভ্যো দদ্যাদিত্যস্য সামান্যবিধিপ্রাপ্তকৃষ্ণপক্ষশ্রাদ্ধস্যৈব প্রাশস্ত্যবোধকত্বেন স্বতন্ত্রশ্রাদ্ধবিধায়কত্বাভাবাৎ। অতএব গোতমেনোক্তং কৃষ্ণপক্ষে যদহঃ সম্পদ্যতেঽমাবাস্যায়ান্তু বিশেষেণেতি পূর্ব্বোক্তযুক্ত্যাশ্বযুক্‌কৃষ্ণপক্ষে নিত্যস্য সামান্যকৃষ্ণপক্ষশ্রাদ্ধাৎ পৃথক্ শ্রাদ্ধস্যৈব বিধায়কত্বেন বিধ্যনুবাদাপ্রসক্তেশ্চেতি সুধীভির্বিভাবনীয়মিতি সংক্ষেপঃ ॥ ৬৭ ॥

যদা সিংহোপক্রমঃ কন্যাসমাপ্যশ্চ সমস্ত এব বা সিংহসমাপ্যস্তদা কীদৃশঃ শাস্ত্রার্থঃ। অত্র জিকনপ্রভৃতয়ঃ ব্রহ্মপুরাণাদিবচনৈরেবাত্র ব্যবস্থামাহুঃ। যথা ব্রহ্মপুরাণম্। যাবচ্চ কন্যাতুলয়োঃ ক্রমাদাস্তে দিবাকরঃ। তাবচ্ছ্রাদ্ধস্য কালঃ স্যাৎ শূন্যং প্রেতপুরং তদা॥ তথা ভবিষ্যপুরাণম্। কন্যাগতে সবিতরি পিতৃরাজানুশাসনাৎ। তাবৎ প্রেতপুরী শূন্যা যাবদ্ বৃশ্চিকদর্শনম্॥ ততো বৃশ্চিক আয়াতে নিরাশাঃ পিতরো নৃপ। পুনঃ স্বভবনং যান্তি শাপং দত্ত্বা সুদারুণম্॥ হংসে বর্ষাসু কন্যাস্থে শাকেনাপি গৃহে বসন্। পঞ্চম্যা উভয়ে দদ্যাদুভয়োর্ব্বংশয়োঋ ণম্॥ সূর্য্যে কন্যাস্থিতে শ্রাদ্ধং যো ন কুর্য্যাদ্গৃহাশ্রমী। কুতস্তস্য ধনং পুত্রাঃ পিতৃনিঃশ্বাসপীড়নাৎ॥ হংসে সূর্য্যে। ঋণমিব ঋণং পিতৃমাতৃকুলস্যেদম্ অবশ্যং পরিশোধ্যমিত্যর্থঃ। এবমাদিবচনৈঃ কন্যাসম্বন্ধেনৈব শ্রাদ্ধপ্রতিপাদনাৎ এতস্যাপি বচনস্য তদেকবাক্যতয়া সৌরাশ্বিনপরত্বং সৌরপরত্বে লক্ষণা স্যাদিতি চেন্ন পৌর্ণমাস্যন্তেঽপি তথাত্বাৎ। ততঃ সিংহোপক্রমে কৃষ্ণপক্ষে কন্যাসম্বন্ধিন্যেব ভাগে শ্রাদ্ধং স্যাৎ ন সিংহসম্বন্ধিনি। অতঃ পক্ষশ্রাদ্ধং তত্র নিবর্ত্তত এব।

সংশয়ং বিবৃণোতি সিংহোপক্রম ইতি। তদা কীদৃশ ইতি। তথাচ আষাঢ়ীতঃ পঞ্চমপক্ষশ্রাদ্ধং কন্যাসম্বন্ধপুরস্কারেণ তন্নিরপেক্ষেণৈবেতি সংশয় ইতি ভাবঃ। এতস্যাপীতি অশ্বযুক্কৃষ্ণপক্ষে ত্বিত্যাদিবচনস্যেত্যর্থঃ। তদেকবাক্যতয়া উক্তব্রহ্মপুরাণাদিবচনৈকবাক্যতয়া তথাত্বা-

ত্রিভাগহীনমিত্যাদয়ঃ পক্ষাস্তত্র যথাসম্ভবং যোজনীয়াঃ কন্যাসম্বন্ধিন্যপরপক্ষে শ্রাদ্ধবিধানাৎ উপক্রমে সিংহ-সম্বন্ধেঽপি পক্ষস্য কন্যাসম্বন্ধোঽস্ত্যেবেতি চেৎ নৈকস্য পক্ষাবয়বিনঃ পঞ্চদশতিথ্যাত্মকস্যাভাবাৎ। অতএব পঞ্চদশব্রাহ্মণসমুদায়স্য মধ্যে একস্য পুরুষোত্তমস্পর্শেন সর্ব্বেষাং পুণ্যভাগিতা এতন্মূলমেবেদং বচনম্। কৃত্তিকা-দিভরণ্যন্তং বারা বা রবিসপ্তকাঃ। নৈতে সংযোগমাত্রেণ পুনন্তি সকলাং তিথিম্॥ একস্য তিথ্যবয়বিনোঽভাবাদি-ত্যর্থঃ। ইতরথা তু পূর্ব্বদিনে রাত্রৌ চতুর্থীভৌমবার-যোগে বুধবারেঽপি ভৌমবারযুক্তচতুর্থীবিহিতস্নানদানা-দ্যাপত্তেঃ। যদা সমস্ত এবাপরপক্ষঃ সিংহার্কে নিপততি তদা তং পক্ষং বিহায় কন্যাগতাপরপক্ষ এব শ্রাদ্ধম্॥৬৮॥

নন্বেবং পঞ্চমপক্ষবিরোধঃ। তথা কার্ষ্ণাজিনঃ। শক্রধ্বজনিপাতাঙ্কো যঃ স্যাৎ পক্ষস্তু পঞ্চমঃ। স বিজ্ঞেয়োঽপরঃ পক্ষঃ শ্রাদ্ধং তত্র বিধীয়তে॥ পুত্রমায়ুর্ধনং ধান্য-

---

দিতি অশ্বযুক্পদস্য মুখ্যচান্দ্রাশ্বিন এব শক্তত্বেন সৌরাশ্বিনে পৌর্ণমাস্যন্তাশ্বিনে বা লক্ষণায়া অবিশিষ্টত্বাদিতি ভাবঃ। জিকনমতএবাশঙ্ক্য দূষয়তি কন্যাসম্বন্ধিনীতি। একস্য পক্ষাবয়বিন ইতি তিথেশ্চন্দ্রক্রিয়া-কূটরূপত্বেন তদ্ঘটিতপক্ষস্যাপি তথাত্বাদিতি ভাবঃ। যদা সমস্ত এবেতি অপরপক্ষীয়শ্রাদ্ধকালযোগ্যসমস্ত এবেত্যর্থঃ। পক্ষং বিহায়েতি। তথাচ কন্যাং গতাপরপক্ষ এব শ্রাদ্ধং তত্র চাষাঢ্যাঃ পঞ্চমত্বং নাপেক্ষিতমিতি ভাবঃ॥ ৬৮॥

জিকন এব পুনরাশঙ্ক্যতে নন্বিতি শক্রধ্বজনিপাতঙ্ক ইতি ভাদ্র-শুক্লদ্বাদশ্যাং শক্রধ্বজোত্থানং তদুত্তরচতুর্থ্যাং শক্রধ্বজনিপাতঃ।

মারোগ্যং ভূমিমেব চ। প্রাপ্নোতি পঞ্চমে দত্ত্বা শ্রাদ্ধং কামাংস্তথাপরান্॥ এতানেব হি হিংসন্তি পঞ্চমং যো ব্যতিক্রমেৎ। তস্মান্নাতিক্রমেদ্ধীমান্ পঞ্চমে পৈতৃকং বিধিম্॥ তথা জাতূকর্ণঃ। আষাঢ়ীমবধিং কৃত্বা যঃ স্যাৎ পক্ষস্তু পঞ্চমঃ। তত্র শ্রাদ্ধং প্রকুর্ব্বীত কন্যাঙ্গচ্ছতু বা ন বা॥ জাবালঃ। আগতেঽপি রবৌ কন্যাং শ্রাদ্ধং কুর্ব্বীত যত্নতঃ। আষাঢ্যাঃ পঞ্চমঃ পক্ষঃ প্রশস্তঃ পিতৃকর্ম্মসু॥ উচ্যতে। এতেষাং বচনানাং ভোজদেবপ্রভৃতিভিরলিখিতত্বাদমূলত্বং সমূলত্বেঽপি নিত্যত্বে প্রমাণাভাবাৎ প্রত্যুত পুত্রাদিফলসম্বন্ধাবগমাৎ কাম্যং তদ্ভবিষ্যতি। কন্যাগতস্য চ নিত্যত্বং প্রাগেব দর্শিতম্। ন চ কাম্যাধিকারনিত্যাধিকারয়োরেকশাস্ত্রার্থত্বং যাবজ্জীবাধিকরণবিরোধাৎ। যদি ফলার্থিতয়া কন্যাসম্বন্ধরহিত এব শ্রাদ্ধং কৃতং তথাপি কন্যায়ামবশ্যং তৎ কর্ত্তব্যম্। বস্তুতস্তু শ্রাদ্ধভেদে বিধিগৌরবাপত্তেঃ কন্যাগতশ্রাদ্ধ এব ফলার্থিতয়া পঞ্চমপক্ষাখ্যগুণফলবিধিঃ তদা তু কেবলপঞ্চমপক্ষে শ্রাদ্ধমসঙ্গতমেব। কন্যাঙ্গচ্ছতু বা ন বেতি পঞ্চমপক্ষস্তুত্যর্থং ন তু কন্যাসম্বন্ধাভাবেঽপি শ্রাদ্ধবিধানপরম্। প্রাপ্তে কন্যাগতশ্রাদ্ধে গুণফলবিধিত্বাত্তদসঙ্গতং ব্রহ্মপুরাণে পৌর্ণমাস্যন্তমাসেন সমস্ততিথিকৃত্যাভিধানাৎ অশ্বযুক্শব্দস্যাপি পৌর্ণমাস্যন্তপরত্বান্ন সৌরাশ্বিনপরত্বম্। আশ্বযুজ্যাঞ্চ কৃষ্ণায়াং ত্রয়োদশ্যামিতি ব্রহ্মপুরাণ এবাশ্বযুক্শব্দস্য

---

তথাচ বরাহঃ। দ্বাদশ্যান্তু সিতে পক্ষে মাসি ভাদ্রপদে তথা। শক্রমু-

পৌর্ণমাস্যন্তপরত্বাবধারণাচ্চ। পৌর্ণমাস্যন্তাশ্বিন এব চ মঘাযুক্তা ত্রয়োদশী ভবতি ন দর্শান্তে লক্ষণা চ সৌরেঽপ্য-বিশিষ্টা। অতএব ন মুখ্যত্বাদ্দর্শান্তপরতাপি ক্লৃপ্তত্বাৎপ-র্য্যানুপপত্ত্যা লক্ষণয়া ধান্যমস্যধিকরণে দর্শিতত্বাৎ। ইদন্তূ-চ্যতে উক্তযুক্তেঃ পৌর্ণমাস্যন্তাশ্বিনপরত্বে কন্যানিরপেক্ষ এব পৌর্ণমাস্যন্তাশ্বিনপঞ্চমপক্ষে পক্ষশ্রাদ্ধাদিকল্পা নিত্য-তয়া অবগম্যন্তে ন কন্যাবিশিষ্টে নিরপেক্ষশ্রুতেঃ। অত-

---

থাপরেদ্রাজা বিশ্বশ্রবণবাসরে। ভবণ্যন্তপদে রাত্রৌ চতুর্থ্যান্তু বিসর্জ্জ-য়েদিতি। জিকন এব সমাধত্তে উচ্যত ইতি ননু এতানেব হি হিংসন্তীতি নিত্যত্বে প্রমাণমস্তীত্যাশঙ্ক্যাহ ন চেতি কাম্যাধিকারঃ। কামনানিত্যা-ধিকারো যাবজ্জীবনং তয়োরেকশাস্ত্রার্থত্বমেকবিধিবোধ্যত্বং সম্ভবতীতি ন চ নহীত্যর্থঃ। অসম্ভবে হেতুমাহ যাবজ্জীবাধিকরণবিরোধাদিতি। অয়ং ভাবঃ যাবজ্জীবমগ্নিহোত্রং জুহোতীত্যেকা শ্রুতিঃ অপরা চ স্বর্গকামো-ঽগ্নিহোত্রং জুহুয়াদিতি। অত্র পূর্ব্বপক্ষঃ যাবজ্জীবাগ্নিহোত্র এব স্বর্গকামবা-ক্যেনাধিকারিমাত্রং বিধীয়তে ন তু সাধিকারাগ্নিহোত্রান্তরবিধিঃ গৌরবাৎ। উক্তঞ্চ ধর্ম্মিকল্পনাতো হি ধর্ম্মকল্পনা লঘীয়সীতি সিদ্ধান্তস্তু তর্হি যাবজ্জীব-কর্ত্তব্যতৈব ন স্যাৎ কামনারূপাধিকারস্যানিয়তত্বাৎ অনির্মোক্ষপ্রসঙ্গা-দিত্যপরে তথাহি নিত্যাগ্নিহোত্রাকরণে প্রত্যবায়োৎপত্ত্যা মোক্ষপ্রতিবন্ধঃ করণে চ পুণ্যোৎপত্তেরিত্যুভয়থৈবানির্মোক্ষত্বমিতি তদ্বদত্রাপি। যদি পক্ষশ্রাদ্ধস্য নিত্যত্বং কাম্যত্বঞ্চ স্যাৎ তদা নিয়তকর্ত্তব্যতা ন স্যাৎ অনি-র্মোক্ষত্বং বা স্যাদিতি ততশ্চাত্র পুত্রমায়ুরিত্যাদিনা কাম্যত্বে নির্ণীতে এতান্যেব হি হিংসন্তীতি বচনস্য কাম্যাধিকাম্যাধিকারান্তরিকতয়াপ্যুপ-পত্তের্ন নিত্যত্ববোধকত্বমিতি ভাবঃ। একাদশিনস্তু একত্র নিত্যত্বং কাম্যত্বঞ্চ বিধিনা বোধয়িতুমেব ন শক্যতে। তথাহি বিধিপ্রত্যয়েন কার্য্যত্বেনাপূর্ব্ব-মেবোচ্যতে তৎ তু কাম্যে ফলজনকাশিরস্কাপূর্ব্বমেব তস্যৈব ফলং প্রতি-

এব ন গুণফলবিধিঃ। অতঃ কন্যাসম্বন্ধানুভেদেনৈব প্রৌষ্ঠপদ্যূর্দ্ধং পঞ্চমপক্ষে পক্ষশ্রাদ্ধাদিকং দর্শয়তি বিষ্ণুধর্ম্মোত্তরপ্রথমকাণ্ডে। উত্তরাদয়নাচ্ছ্রাদ্ধে শ্রেষ্ঠং স্যাদ্দক্ষিণায়নম্। চাতুর্ম্মাস্যঞ্চ তত্রাপি প্রসুপ্তে কেশবে হিতম্॥ প্রৌষ্ঠপদ্যাঃ পরঃ পক্ষস্তত্রাপি চ বিশেষতঃ। পঞ্চম্যূর্দ্ধঞ্চ তত্রাপি দশম্যূর্দ্ধং ততোঽপ্যতি॥ মঘাযুক্তা চ তত্রাপি শস্তা রাজংস্ত্রয়োদশী। তত্রাক্ষয়ং ভবেচ্ছ্রাদ্ধং মধুনা পায়সেন তু॥ সর্ব্বস্বেনাপি কর্ত্তব্যং শ্রাদ্ধমত্র নরাধিপ। পরান্নভোজী শ্বপচঃ শ্রাদ্ধমত্র তু কারয়েৎ॥ যানি চ কন্যাবিষয়াণি তানি চ কন্যাগতপঞ্চমপক্ষানপেক্ষ্য শ্রাদ্ধান্তরবিধায়কান্যেব। কন্যাপঞ্চমপক্ষসমুচ্চয়ে তু কন্যাগতস্যাপি শ্রাদ্ধস্য নিত্যত্বেনাবগম্য-

সাক্ষাৎসাধ্যত্বাৎ নিত্যে তু ফলাভাবাৎ পণ্ডাপূর্ব্বমেব বাচ্যং ন চৈকয়া লিঙা একদাঽপূর্ব্বদ্বয়ং বোধয়িতুং শক্যতে সকৃদুচ্চরিতঃ শব্দঃ সকৃদর্থং গময়তীতি ন্যায়বিরোধাৎ যত্র সন্ধ্যাবন্দনাদৌ নিত্যত্বং ব্রহ্মলোকাবাপ্তিশ্চ ফলং শ্রূয়তে তত্রাগ্নিহোত্রবৎ কর্ম্মদ্বয়মেবাঙ্গীক্রিয়তে ইত্যাহুঃ। নন্বু এতান্যেব হি হিংসন্তীতি নিত্যত্বে নির্ণীতে পুত্রমায়ুরিত্যাদ্যানুষঙ্গিকফলমস্তু নিত্যে সন্ধ্যাবন্দনে ব্রহ্মলোকাবাপ্তিবদিত্যাশঙ্ক্যাহ বস্তুতস্তু ইতি গুণফলবিধিরিতি ন চ তথাপি যাবজ্জীবাধিকরণবিরোধঃ সংবলিতাধিকার এব তথাত্বাৎ গুণফলস্য তু আনুষঙ্গিকতয়া তত্র কামনায়া অধিকারিত্ববিরহাৎ কামনাং বিনৈব তস্য জায়মানত্বাৎ আনুষঙ্গিকফলস্য ভোগানন্তরমেব মোক্ষাভ্যুপগমান্নানির্মোক্ষপ্রসঙ্গ ইত্যাশয়ঃ। বস্তুতো যত্র কর্ম্মণি নিত্যত্বং কাম্যত্বঞ্চ শাস্ত্রাদবগম্যতে তৎ নিত্যং কাম্যঞ্চেতি দ্বিবিধমেবাভ্যুপেয়তে এবঞ্চ সন্ধ্যাবন্দনমপি নিত্যং কাম্যঞ্চেতি দ্বিবিধং তত্র কামিনা কাম্যসন্ধ্যাবন্দনে কৃতে নিত্যস্য প্রসঙ্গসিদ্ধত্বেন ন পৃথক্‌করণং অকামানাঞ্চ নিত্যমাত্রানুষ্ঠায়িনাং মোক্ষসম্ভবান্নানি-

মানস্য তন্ত্রাদেব সিদ্ধের্ন পৃথক্করণম্। যদা ন কন্যাসমুচ্চয়স্তদা কন্যায়ামপি নিত্যত্বাৎ কর্ত্তব্যমেব পরন্তু পক্ষশ্রাদ্ধাদিকল্পেষু প্রমাণাভাবাৎ। সকৃৎ কৃতে কৃতঃ শাস্ত্রার্থ ইতি ন্যায়াৎ সকৃদেব শ্রাদ্ধং কর্ত্তব্যম্। অধিমাসপাতে চ তত্র শ্রাদ্ধং ন কর্ত্তব্যম্। যথা লঘুহারীতঃ। সপিণ্ডীকরণাদূর্দ্ধং যৎকিঞ্চিচ্ছ্রাদ্ধিকং ভবেৎ। ইষ্টং বাপ্যথবা পূর্ত্তং তন্ন কুর্য্যাৎ মলিম্লুচে॥ এবমধিমাসপাতেনাপাটবাদিনা চ

---

মেৌক্ষাপত্তিরিতীয়ং রীতিঃ সতীতি প্রতীমঃ। জিকনমতং দূষয়তি তদসঙ্গতমিতি ব্রহ্মপুরাণ ইতি অত্র সংবৎসরকৃত্যাভিধানে প্রথমতঃ কৃষ্ণপক্ষ এব কৃত্যমুক্তং পশ্চাৎ শুক্লপক্ষকৃত্যমতো গৌণচান্দ্র এব প্রতীয়তে। এবঞ্চ প্রকরণবলাদশ্বযুক্শব্দস্যাপি গৌণাশ্বিনপরত্বাৎ প্রকরণাবরুদ্ধত্বেন কন্যাগত ইত্যাদিবচনৈকবাক্যতায়া হ্যযোগাচ্চ ন সৌরাশ্বিনপরত্বমিতি ভাবঃ। সাহচর্য্যেণাপি তথেত্যাহ অশ্বযুজ্যামিতি। অত্র পৌর্ণমাস্যন্তপরত্বে প্রমাণমাহ পৌর্ণমাস্যন্তাশ্বিন ইতি ন দর্শান্ত ইতি দর্শান্তাশ্বিনামাবাস্যায়াস্তুলাসম্বন্ধিত্বেন তৎপূর্ব্বকৃষ্ণত্রয়োদশ্যাং মঘাযোগে তদমাবাস্যায়াং চন্দ্রস্য সিংহে কন্যায়াং বাস্থিতৌ অমাবাস্যায়াং সূর্য্যাচন্দ্রমসোরেকরাশ্যবস্থাননিয়মভঙ্গপ্রসঙ্গাদিতি ভাবঃ। বস্তুতঃ প্রোষ্ঠপদ্যাঃ পরঃ পক্ষস্তত্রাপি চ বিশেষতঃ। পঞ্চমূর্দ্ধঞ্চ তত্রাপি দশমূর্দ্ধমতোঽপ্যতি॥ ইতি প্রাগুক্তবচনে প্রোষ্ঠপদ্যাঃ পরত্বেন স্ফুটমেবাশ্বযুক্কৃষ্ণপক্ষস্য পৌর্ণমাস্যন্তাশ্বিনসম্বন্ধিত্বমিতি বোধ্যম্। তর্হি লক্ষণা স্যাদত্রাহ লক্ষণা চেতি সৌরাশ্বিনপরত্বেঽপি লক্ষণায়া অবিশিষ্টত্বাদিত্যর্থঃ। অতএব উক্তক্রমেণাশ্বযুক্শব্দস্য পৌর্ণমাস্যন্তপরত্বনির্ণয়াদেব ধান্যমস্যধিকরণ ইতিদৃশদি তণ্ডুলানাবপতি ইতি প্রথমপ্রবৃত্তবিধিবাক্যস্য তণ্ডুলপরত্বানুপপত্ত্যা উত্তরভাবি ধান্যমসি ধিনুহি ইতি মন্ত্রস্থধান্যপদে তণ্ডুললক্ষণায়াস্তদধিকরণপ্রতিপাদিতত্বাদিত্যর্থঃ। ইদানীং স্বমতমাহ ইদন্ত্বিতি নিরপেক্ষশ্রুতেরিতি উক্তপঞ্চমপক্ষবিধায়কবচনেষু কন্যাসম্বন্ধাশ্রুতেরিত্যর্থঃ। অতএব

তত্র শ্রাদ্ধাকরণে তুলায়াং কর্ত্তব্যতামাহ ব্রহ্মপুরাণে। যাবচ্চ কন্যাতুলয়োঃ ক্রমাদাস্তে দিবাকরঃ। তাবচ্ছ্রাদ্ধস্য কালঃ স্যাৎ শূন্যং প্রেতপুরং তদা॥ তত্র কন্যাতুলয়োর্দ্দিবাকরাবস্থিতেঃ ক্রমাদেব প্রাপ্তত্বাৎ ক্রমাৎ শ্রাদ্ধস্য কালঃ স্যাদিত্যন্বয়ো মুখ্যকল্পানুকল্পাভাবেনেত্যর্থঃ। যাবচ্চেতি সকলকৃষ্ণপক্ষব্যাপ্ত্যবগতেঃ তুলাকৃষ্ণপক্ষে যস্যাং কন্যাক্ষিত্তিথৌ শ্রাদ্ধং কার্য্যম্। অতএব কার্ত্তিকং সকলং বাপীতি বিষ্ণুবচনং কৃষ্ণপক্ষপরমেব। অমাবাস্যায়ামতিপ্রাশস্ত্যমাহ ভবিষ্যপুরাণে। যেয়ং দীপান্বিতা রাজন্ খ্যাতা পঞ্চদশী।

---

কন্যাং গচ্ছতু বা ন বেতি কন্যাসম্বন্ধস্যানাস্থোক্তা। অতএব নিরপেক্ষশ্রুতেরেব অতএব গুণফলবিধিত্বাভাবাদেব কন্যাসম্বন্ধানুদ্দেশেনৈব কন্যাসম্বন্ধানুল্লেখেনৈব শ্রাদ্ধান্তরবিধায়কান্যেবেতি বস্তুতস্তু নিরপেক্ষশ্রুতাবপি পৃথক্শ্রুতিকল্পনাভিয়া পঞ্চমপক্ষীয়শ্রাদ্ধে কন্যাসম্বন্ধেন গুণবিধিরেব ন্যায্যঃ যথা নিরপেক্ষশ্রুতেষ্বপ্যমাবাস্যাদিশ্রাদ্ধেষু শ্রুত্যন্তরকল্পনাভিয়া পুষ্করেষ্বক্ষয়ং শ্রাদ্ধমিত্যাদিবচনং পুষ্করাদিদেশাখ্যগুণফলবিধিঃ। কিঞ্চ কন্যাং গচ্ছতু বা ন বেতি আগতেঽপি রবৌ কন্যামিত্যনেন চ স্পষ্টমেব পঞ্চমপক্ষে কন্যাসম্বন্ধে গুণফলবিধিরুক্তঃ। অস্মাদেব বচনদ্বয়াচ্চ কন্যাসম্বন্ধিশ্রাদ্ধে পঞ্চমপক্ষাখ্যগুণফলবিধিঃ পঞ্চমপক্ষশ্রাদ্ধবিধায়কবচনমিতি বৈপরীত্যাশঙ্কা নিরস্তা। ন চ পৃথক্ প্রত্যবায়ঃ শ্রুতেঃ পৃথগ্বিধিরিতি বাচ্যং পুরাণভেদেন প্রত্যবায়স্য পৃথগুক্তেরৌচিত্যাৎ ন তু পৃথক্শ্রাদ্ধবিধিঃ। ন চ কন্যাং গতে রবাবীষে পূজনীয়া যথাবিধি। ভোজঙ্গীং তিথিমাসাদ্য যাবচ্চন্দ্রার্কসঙ্গমমিতি বিষ্ণুধর্ম্মোত্তরবচনস্য পঞ্চম্যাদিশ্রাদ্ধবিধায়কস্য কা গতিরিতি বাচ্যং আসাদ্যেতি শ্রবণাৎ পঞ্চম্যনন্তরতিথিষু ষষ্ঠ্যাদিকল্পস্যৈবোক্তত্বেন বিরোধাভাবাৎ। অতএব ভবিষ্যপুরাণে। হংসে বর্ষাসু কন্যাস্থে শাকেনাপি গৃহে বসন্। পঞ্চম্যা উত্তরে দদ্যাদুভয়োর্ব্বংশয়োর্ঋণমিত্যনেন পঞ্চম্যা

ভুবি। তস্যাং দদ্যান্ন চেদ্দত্তং পিতৃণাং বৈ মহালয়ে॥ মহালয়ে কন্যাগতাপরপক্ষে। ন চ পঞ্চদশীপূর্ণিমা গ্রাহ্যা একোঽথবা দীপবরশ্চ দেয় ইত্যাদিনা আদিপুরাণে তত্রৈব দীপদানবিধানাদিতি ব্যাখ্যানং যুক্তম্। সংশয়ে পিতৃকর্ম্মণি প্রশস্ততয়ামাবাস্যাগ্রহণস্য যুক্তত্বাদঙ্গভূতকৃষ্ণপক্ষস্য বাধাপত্তেশ্চ। খ্যাতেত্যনন্বয়শ্চ স্যাৎ নানাস্থানেষু দীপদানেনামাবাস্যায়া এব খ্যাতত্বাৎ তথা তামধিকৃত্য ব্রহ্মপুরাণে॥ দীপমালাশ্চ কর্ত্তব্যাঃ শক্ত্যা দেবগৃহেষু চ। রথ্যাপণশ্মশানেষু নদীপর্ব্বতসানুষ্বিতি অমাবাস্যাপরত্বে প্রতিমাসপার্ব্বণশ্রাদ্ধপ্রাপ্তত্বাৎ বিধির্ন স্যাদিতি চেৎ ন প্রতিমাসপার্ব্বণাদেস্তস্য প্রকরণভেদেন ভেদাৎ অনুষ্ঠানবিশেষানাবহত্বান্ন বিধিরিতি চেৎ এবং কন্যায়ামপি বিধির্ন স্যাৎ অশক্তপক্ষেঽবশ্যমনুষ্ঠানার্থং বিধিঃ। অত এবানেন বিধিনা শ্রাদ্ধং ত্রিরব্দস্যেহ নির্ব্বপেৎ। কন্যাকুম্ভবৃষস্থেঽর্কে কৃষ্ণপক্ষে চ সর্ব্বদেতি। মৎস্যপুরাণমিতি চেৎ প্রকৃতেঽপি তুল্যং কিঞ্চ

---

উত্তরেঽভিহিতম্। ইত্থঞ্চ যাবচ্চ কন্যাতুলয়োরিতি বচনে কন্যাদিবাকরস্থিত্যাশ্বিনকৃষ্ণপক্ষ এবোপলক্ষ্যতে তুলাদিবাকরস্থিত্যা চ কার্ত্তিককৃষ্ণপক্ষঃ ততশ্চাশ্বিনকৃষ্ণপক্ষেঽশক্তঃ কার্ত্তিককৃষ্ণপক্ষে সকৃৎকরণবিধিঃ কল্পব্যবস্থায়াং প্রমাণাভাবাৎ সকলকল্পাশক্তৌ কার্ত্তিকবিধানাচ্চ অতএবাসৌবামাবাস্যায়ামিতি প্রাশস্ত্যং যেয়ং দীপান্বিতেত্যাদি ভবিষ্যপুরাণেনাভিহিতমিতি সুধীভির্ভাবনীয়ম্। অত্র বক্ষ্যমাণসূর্য্যসিদ্ধান্তবিহিতকন্যাসম্বন্ধিষোড়শশ্রাদ্ধান্যেব ভবিষ্যপুরাণাদিবচনেনাভিধীয়ন্তে ন শ্রাদ্ধান্তরং গৌরবাদিতি বর্দ্ধমানোপাধ্যায়শ্রীদত্তোপাধ্যায়মিশ্রাদিভিরভিহিতম্। তদসৎ সূর্য্যসিদ্ধান্তবিহিতশ্রাদ্ধে কল্পানুক্তেঃ কন্যা-

ভবিষ্যে। যদি তদপ্রাপ্তং তদা বিধৌ কো বিরোধঃ অথ প্রাপ্তং তদৈকেন মুনিনা সামান্যপ্রাপ্তস্য পিতৃপ্রীত্যতিশয়ার্থং বিধানং ভবিষ্যতি। কিঞ্চ কার্ত্তিকপৌর্ণমাস্যামপি শ্রাদ্ধস্য প্রাপ্তত্বাৎ। যথা যমঃ। আষাঢ্যামথ কার্ত্তিক্যাং মাঘ্যাং ত্রীন্ পঞ্চ বা দ্বিজান্। তর্পয়েৎ পিতৃপূর্ব্বঞ্চ তদস্যাক্ষয়মুচ্যতে॥ তস্মাদমাবাস্যৈব গ্রাহ্যা ন পূর্ণিমা। কন্যায়াং ষোড়শস্থ দিনেষু শ্রাদ্ধমুক্তং ব্রহ্মপুরাণে। কন্যাঙ্গতে সবিতরি যান্যহানি তু ষোড়শ। ক্রতুভিস্তানি তুল্যানি তেষু দত্তমথাক্ষয়ম্॥ কাম্য-মিদং নিত্যত্বে প্রমাণাভাবাৎ ফলশ্রুতেশ্চ। যথা ব্রহ্ম-পুরাণে। দিব্যভৌমান্তরীক্ষাণি স্থাবরাণি চরাণি চ। পিণ্ড-মিচ্ছন্তি পিতরঃ কন্যারাশিগতে রবৌ॥ কন্যাঙ্গতে সবি-

শেষে ষোড়শদিনকল্পকালবিধেশ্চ কৃষ্ণপক্ষানৈয়ত্যাচ্চেতি দিক্। মুখ্য-কল্পানুকল্পভাবেনেতি স্বতন্ত্রশ্রাদ্ধদ্বয়কল্পনে গৌরবাদিতি ভাবঃ। যস্যাং কস্যাঞ্চিদিতি ন তু যেয়ং দীপান্বিতেতি বচনৈকবাক্যতয়ামাবাস্যামাত্র ইত্যর্থঃ। অতএবেতি এতদ্বচনৈকবাক্যতাবলাদেবেত্যর্থঃ। অন্যথা সকলমাসপরত্বে বিধিগৌরবাপত্তেঃ। প্রাবৃট্কালেঽসিতে পক্ষে ত্রয়োদশ্যাং সমাহিত ইতি পূর্ব্ববচনে কৃষ্ণপক্ষপ্রকরণাচ্চেতি ভাবঃ। অমাবাস্যায়া-মতিপ্রাশস্ত্যমাহেতি ইত্থঞ্চ কন্যানুকল্পত্বং তুলাকৃষ্ণপক্ষস্যোক্তমিতি তুলা-মাবাস্যায়ামেবেতি প্রাশস্ত্যং ন তু মুখ্যচান্দ্রামাবাস্যায়ামিতি প্রতিপন্নং প্রাচাং শ্রাদ্ধাচারোঽপি তত্রৈবেতি। মহালয় ইতি। মহস্য উৎসবস্য আলয়ঃ কন্যাগতাপরপক্ষঃ অর্থাৎ পিতৃণামিত্যর্থঃ। ন তু মহান্ লয়ঃ ক্ষয়ো যত্রেতি ব্যুৎপত্ত্যা চন্দ্রস্যাত্যন্তক্ষয়সম্বন্ধিত্বেনামাবাস্যোচ্যতে ইতি প্রাচী-নমতমাদরণীয়ং তৎপুরুষাপেক্ষয়া বহুব্রীহের্জঘন্যত্বাৎ। অঙ্গভূতেতি নচে-দত্তঃ মহালয় ইত্যনেন মহালয়শ্রাদ্ধস্যানুকল্পবিধিরুক্তঃ মহালয়স্তু কৃষ্ণ-

তরি যান্যহানি তু ষোড়শ। ক্রতুভিস্তানি তুল্যানি দেবো নারায়ণোঽব্রবীৎ॥ রাজসূয়াশ্বমেধাভ্যাং যদীচ্ছেৎ সদৃশং ফলম্। অপ্যম্বুশাকমূলাদ্যৈঃ পিতৄন্ কন্যাগতেঽর্চ্চয়েৎ॥ ষোড়শদিনানি দর্শিতানি সূর্য্যসিদ্ধান্তেন। তুলাদিষড়শীত্যংশে ষড়শীতি মুখং দিনম্। তচ্চতুষ্টয়মেব স্যাদ্দ্বিস্বভাবেষু রাশিষু॥ ষড্বিংশে ধনুষো ভাগে দ্বাবিংশেঽনিমিষস্য চ। মিথুনাষ্টাদশে ভাগে কন্যায়াশ্চ চতুর্দ্দশে॥ অত ঊর্দ্ধন্তু কন্যায়া যান্যহানি তু ষোড়শ। ক্রতুভিস্তানি তুল্যানি পিতৃভ্যো দত্তমক্ষয়ম্॥ এতেন কন্যাশেষে

পক্ষ এবেতি কৃষ্ণপক্ষস্য তত্রাঙ্গত্বমেবেত্যর্থঃ। এতস্যেতি দীপান্বিতাশ্রাদ্ধস্যেত্যর্থঃ। ন বিধিরিতি ন পৃথগ্বিধিরিত্যর্থঃ। এবং কন্যারামপীতি তত্রাপি কৃষ্ণপক্ষত্বপুরস্কারেণ প্রাপ্তশ্রাদ্ধাদনুষ্ঠানবিশেষানাবহত্বাদিত্যর্থঃ। তদপ্রাপ্তমিতি সামান্যকৃষ্ণপক্ষশ্রাদ্ধমপ্রাপ্তমিত্যর্থঃ। কিঞ্চেতি এতচ্চ প্রতিবন্ধিপ্রদর্শনমাপাততো মুনিভেদেন শ্রাদ্ধবিধানস্যৌচিত্যাৎ কিন্তু প্রাগুক্তমেব সমাধানং সমীচীনমিতি বোধ্যং নিত্যত্বে প্রমাণাভাবাদিতি তদভাবস্য প্রত্যবায়হেতুত্বকল্পনে গৌরবং কাম্যত্বে তু তস্য স্বর্গহেতুত্বকল্পনা লঘীয়সীতি কাম্যত্বমেব ন্যায্যম্। ননু তর্হি ন কলঞ্জং ভক্ষয়েদিত্যত্রাপি নিষেধবিধৌ লাঘবেন কথং কাম্যত্বং কল্প্যতে ইতি চেন্ন তত্র কলঞ্জভক্ষণাভাবস্য স্বর্গহেতুত্বকল্পনাপেক্ষয়া কলঞ্জভক্ষণস্য প্রত্যবায়হেতুত্বকল্পনায়া এব লাঘবাদিতি। অন্যে তু নিত্যপ্রকরণপাঠান্নিত্যত্বং নিষেধস্যেত্যাহুঃ। ষড়শীতিমুখং দিনমিতি ষড়শীতিমুখসংজ্ঞকং দিনমিত্যর্থঃ। একস্মিন্নব্দে ষষ্ঠ্যধিকশতত্রয়মংশকা ভবন্তি তত্র তুলাসংক্রমণমারভ্য ষড়শীতিগণনয়া চতুষ্টয়মাপূর্য্য কন্যাষোড়শাংশাঃ শুক্লকৃষ্ণসাধারণা অবশিষ্যন্তে দ্বিস্বভাবেষু দ্ব্যাত্মকেষু ষড়শতীনাং পূরণদিনান্যাহ ষড়্বিংশ ইতি তদয়ং ব্যবস্থানিষ্কর্ষঃ। অশ্বযুক্কৃষ্ণপক্ষে ত্রয়োদশ্যাদিকল্পেন শ্রাদ্ধমাবশ্যকং ততোঽধি-

শুক্লকৃষ্ণসাধারণানি ষোড়শদিনানি শ্রাদ্ধকালঃ। অনিমিষো মীনঃ পৌর্ণমাস্যাদ্যমাবাস্যাপর্য্যন্তং ষোড়শদিনেষু শ্রাদ্ধমিতি প্রাচামাচারোঽপি নিষ্প্রমাণকঃ॥ ৬৯॥

অথ শস্ত্রহতচতুর্দ্দশী। বিষ্ণুঃ। যুদ্ধহতানাং শ্রাদ্ধকর্ম্মণি চতুর্দ্দশী প্রশস্তা। যুদ্ধহতানামেবেতি ন নিয়মার্থম্। ব্রহ্মপুরাণে। প্রায়ানশনশস্ত্রাগ্নিবিষোদ্বন্ধিনাং তথা। চতুর্দ্দশ্যাস্তু কর্ত্তব্যং তৃপ্ত্যর্থমিতি নিশ্চয়ঃ॥ প্রায়ো মহাপথগমনম্। বায়ুপুরাণে। যুবানস্তু গৃহে যস্য মৃতাস্তেষান্তু দাপয়েৎ। শস্ত্রেণ চ হতা যে বৈ তেষাং দদ্যাচ্চতুর্দ্দশীম্॥ যুবান এব পিত্রাদয়ো মৃতা ইত্যর্থঃ॥ মরীচিঃ। বিষশস্ত্রশ্বাপদাহিতির্য্যগ্‌ব্রাহ্মণঘাতিনাম্। চতু-

কাধিকফলার্থিভিরেকাদশ্যাদিষষ্ঠ্যাদিপ্রতিপদাদয়ঃ কল্পাঃ করণীয়াঃ। অত্র শ্রাদ্ধে চতুর্দ্দশীবর্জ্জনং নাস্তি কিন্তু সামান্যকৃষ্ণপক্ষ এব তদ্বর্জ্জনং অশ্বযুক্‌কৃষ্ণপক্ষেঽপি সামান্যকৃষ্ণপক্ষবিহিতং সকৃৎশ্রাদ্ধং কর্ত্তব্যং অশ্বযুক্‌কৃষ্ণপক্ষীয়চতুষ্টয়ান্যতমকল্পকরণে তু প্রসঙ্গসিদ্ধত্বান্ন তস্য পৃথক্করণম্। এবং কন্যাগতাপরপক্ষেঽপি পৃথক্‌শ্রাদ্ধং নিত্যং অশ্বযুক্‌কৃষ্ণপক্ষস্য কন্যাসম্বন্ধে তু তদীয়শ্রাদ্ধেনৈবাস্য প্রসঙ্গসিদ্ধেন পৃথক্করণং অন্যথা তু পৃথক্ কার্য্যং মলমাসাদিনা কন্যায়াং তদকরণে তুলাকৃষ্ণপক্ষে তৎ কার্য্যং তুলামাবস্যায়াং তস্যাতিপ্রাশস্ত্যম্। এবং শুক্লকৃষ্ণপক্ষসাধারণেষু কন্যাশেষষোড়শদিনেষু শ্রাদ্ধং কাম্যমিতি॥ ৬৯॥

ইদানীং কৃষ্ণপক্ষপ্রসঙ্গাৎ শস্ত্রহতানাং চতুর্দ্দশীশ্রাদ্ধং বিবেচয়তি অথ শস্ত্রহতানামিতি ন নিয়মবিধিরিতি দোষত্রয়দুষ্টত্বান্ন পরিসংখ্যারূপনিয়মবিধিঃ কিন্তু কৃষ্ণপক্ষচতুর্দ্দশীবর্জ্জনস্য প্রতিপ্রসববিধিরিত্যর্থঃ। প্রায়েতি প্রায়াদিপদেন তৎকৃতমরণমুচ্যতে তদ্বতামিত্যর্থঃ। যুবানস্ত্বিতি

র্দশ্যাং ক্রিয়া কার্য্যা অন্যেষান্তু বিগর্হিতা॥ ব্রাহ্মণকৃতো ঘাতোঽন্যাস্তীতি ব্রাহ্মণঘাতী তেষাং যে চ বৈ ব্রাহ্মণৈর্হতা ইতি ব্রহ্মপুরাণবচনান্ন তু কৃতব্রাহ্মণঘাতস্য পতিতত্বাৎ। অন্যেষামশস্ত্রহতাদীনাং এতচ্চ শস্ত্রহতশ্রাদ্ধং বিষ্ণ্বাদিভিঃ সামান্যপ্রকরণলিখনাৎ সকলকৃষ্ণপক্ষসাধারণং পিত্রাদীনামেব পার্ব্বণবিধিপ্রকরণাৎ পার্ব্বণবিধিনা কার্য্যম্। সপিণ্ডীকরণাদূর্দ্ধং যত্র যত্র প্রদীয়তে। তত্র তত্র ত্রয়ং কুর্য্যাদ্বর্জ্জয়িত্বা মৃতাহনীতি শঙ্খবচনাচ্চ। নন্বন্যেষান্তু বিগর্হিতেতি শ্রবণাৎ কথং ত্রৈপুরুষিকঃ পার্ব্বণবিধিঃ ন যস্য পুরুষাস্ত্রয় এব শস্ত্রহতাস্তস্য ত্রৈপুরুষিকবিধিরুপপদ্যতে। এবং যস্য দ্বৌ শস্ত্রহতাবেকো বা তেনাপি দ্বৈপুরুষিকৈকপুরুষিকমেব পার্ব্বণং কর্ত্তব্যম্। যথা মনুঃ। পিতা যস্য তু বৃত্তঃ স্যাৎ জীবেদ্বাপি পিতামহঃ। পিতুঃ স্বনাম সংকীর্ত্ত্য কীর্ত্তয়েৎ প্রপিতামহম্॥ তথা হারীতঃ। পিতামহেঽপি জীবে বৈ পিতর্য্যেব সমাপয়েৎ।

যো ত্রিংশা আয়ুবান ইতি বচনাৎ ত্রিংশদ্বর্ষপর্য্যন্তং যুবত্বমিতি শ্রাদ্ধকল্পঃ। গৃহ ইতি সম্বন্ধিমাত্রোপলক্ষণং অন্যথাঽসম্বন্ধিনেঽপি স্বগৃহমরণে শ্রাদ্ধাপত্তেঃ। অতএবাহ যুবান এব পিত্রাদয় ইতি আদিশব্দাৎ পিতামহাদিগ্রহণম্। বিষশস্ত্রেতি শ্বাপদা ব্যাঘ্রাদয়ঃ। তির্য্যঞ্চঃ কুম্ভীরাদয়ঃ। যথা দেবীপুরাণে। পক্ষিনক্রমৃগৈর্গে তু শৃঙ্গিদংষ্ট্রিনখৈর্হতাঃ। পতিতানশনপ্রায়ৈর্ব্বজ্রাগ্নিবিষবন্ধনৈঃ। মৃতা জলপ্রবেশেন তে বৈ শস্ত্রহতাঃ স্মৃতাঃ। ব্রাহ্মণঘাতস্ত শাপকৃত এব ন তু শস্ত্রকৃতঃ তস্য শস্ত্রগ্রহণেন গ্রহণাদিতি। ব্রাহ্মণকৃতঘাত ইতি তথাচ বিষাদিব্রাহ্মণপর্য্যন্তানাং দুষ্কৃতত্বানন্তরং প্রত্যেকং ঘাতান্বয়স্তস্মাচ্চেনপ্রত্যয়েন বিষাদিকৃতঘাতবতামিতি বচনার্থঃ। উক্তার্থে

নত্বেকোদ্দিষ্টমত্র শ্রূয়তে। যথা শঙ্খঃ। সপিণ্ডীকরণাদূৰ্দ্ধং মৃতে কৃষ্ণচতুৰ্দ্দশীষু। প্রতিসংবৎসরাদন্যদেকোদ্দিষ্টং ন কারয়েৎ॥ যমঃ। সপিণ্ডীকরণাদূৰ্দ্ধং যৎ পিতৃভ্যঃ প্রদীয়তে। একোদ্দিষ্টবিধানেন প্রদেয়ং শস্ত্রঘাতিনে॥ ভবিষ্যপুরাণে। সমত্বমাগতস্যাপি পিতুঃ শস্ত্রহতস্য চ। চতুৰ্দ্দশ্যাস্তু কৰ্ত্তব্যমেকোদ্দিষ্টং ন পাৰ্ব্বণম্॥ চতুৰ্দ্দশ্যাস্তু যৎ শ্রাদ্ধং সপিণ্ডীকরণে কৃতে। একোদ্দিষ্টবিধানেন প্রদেয়ং শস্ত্রঘাতিনে॥ উচ্যতে এষাং বচনানামমূলত্বাৎ সমূলত্বেঽপি পাৰ্ব্বণাশক্তবিষয়াণ্যেতানি বিষ্ণ্বাদিবচনেষু পাৰ্ব্বণাবগতেঃ। ভ্রাত্রাদীনাস্তু শস্ত্রহতানামেকোদ্দিষ্টবিধিনা কাৰ্য্যম্। অপুত্ৰা যে মৃতাঃ কেচিৎ স্ত্রিয়ো বা পুরুষাশ্চ যে। তেষামপি চ দেয়ং স্যাদেকোদ্দিষ্টং ন পাৰ্ব্বণম্॥ ইত্যাপস্তম্ববচনেন পাৰ্ব্বণনিষেধাৎ। তচ্চ ন সকলকৃষ্ণপক্ষসাধারণং বিষ্ণ্বাদিবচনে শ্রাদ্ধশব্দস্য পাৰ্ব্বণপরত্বোক্তেঃ। কিন্ত্বাশ্বিনমাসীয়কৃষ্ণপক্ষবিষয়ম্। ব্রহ্মপুরাণে। প্রায়ানশনেত্যাদিনা সকলকৃষ্ণপক্ষসাধারণং শ্রাদ্ধমভিধায়াশ্বিনে তর্পণীয়াশ্চতুৰ্দ্দশ্যাং লুপ্তপিণ্ডোদকক্রিয়া ইতি পুনরভিধানং তচ্ছস্ত্রহতভ্রাত্রাদিবিষয়ম্। অত-

---

প্রমাণমাহ যে চেতি ইদঞ্চ ন সমীচীনমুক্তম্ এতস্য শ্রাদ্ধনিষেধকত্বাৎ মরীচিবচনস্য চ শ্রাদ্ধবিধায়কত্বেন তয়োরেকবাক্যত্বাসম্ভবাৎ কিন্তু বিষাদিসাহচৰ্য্যমেবোক্তার্থে প্রমাণমিতি বোধ্যং ন তু কৃতব্রাহ্মণঘাত ইতি নিনিপ্রত্যয়স্য বিষাদিভিরনম্বয়দোষোঽপাত্র দ্রষ্টব্য ইতি ব্রহ্মপুরাণে তৃপ্ত্যর্থমিত্যভিধানাৎ কাম্যশ্রাদ্ধমিদমিতি মৈথিলমতং নিরাকরোতি এতচ্চেতি

এব তত্রৈবামাবস্যায়াং পিতরঃ পূজ্যা নান্দীমুখা অপীতি বৃদ্ধপ্রপিতামহাদীনামপি শ্রাদ্ধং দর্শিতম্। ইয়ঞ্চ চতুর্দ্দশ্যামশস্ত্রহতশ্রাদ্ধনিন্দাশ্বিনমাসীয়-পক্ষশ্রাদ্ধাদিকল্পব্যতিরিক্তসামান্যকৃষ্ণপক্ষবিহিতশ্রাদ্ধবিষয়া কাম্যশ্রাদ্ধবিষয়া চ। সামান্যকৃষ্ণপক্ষবিহিতশ্রাদ্ধপ্রকরণভেদেন শ্রাদ্ধকর্ম্মভেদাৎ সামান্যবিষয়ন্যায়াৎ। ইতরথা চতুর্দ্দশ্যাং সংক্রান্তিশ্রাদ্ধেঽশস্ত্রহতনিন্দা স্যাৎ। অতএব কৃষ্ণপক্ষে দশম্যাদৌ বর্জ্জয়িত্বা চতুর্দ্দশীমিতি মনুবচনেঽপি চতুর্দ্দশীবর্জ্জনং পক্ষশ্রাদ্ধাদিব্যতিরিক্তশ্রাদ্ধবিষয়ম্। ননু শস্ত্রাদিহতানাং শ্রাদ্ধনিষেধঃ শ্রূয়তে। যথা ছাগলেয়ঃ।

---

তথাচ কৃষ্ণপক্ষপ্রাপ্তনিত্যশ্রাদ্ধমনূদ্য শস্ত্রহতানাং তৎপ্রাশস্ত্যং ব্রহ্মপুরাণোক্তম্ অন্যথা শস্ত্রহতোদ্দেশেন শ্রাদ্ধান্তরবিধাবশস্ত্রহতানাং বিধানাভাবাদেবাপ্রশক্তেরন্যেষান্তু বিগর্হিতেতি নিন্দামুপপত্তেঃ। অতএব সামান্যকৃষ্ণপক্ষচতুর্দ্দশীবর্জ্জনে শস্ত্রহতপ্রতিপ্রসব এবেতি স্বতঃসিদ্ধং নিত্যং পার্ব্বণশ্রাদ্ধঞ্চেদমিতি। পিত্রাদীনামেব ন তু ভ্রাত্রাদীনাম্। অত্র হেতুমাহ পার্ব্বণবিধিপ্রকরণাদিতি প্রতিপ্রসূততয়া পার্ব্বণবিধিবোধ্যত্বাদিত্যর্থঃ। ভ্রাত্রাদীনাং সামান্যকৃষ্ণপক্ষপার্ব্বণস্য বিষ্ণ্বাদিভিরনুক্তেশ্চৈবকারার্থে হেতুরূহ্যঃ। ভ্রাত্রাদীনাং শস্ত্রহতানাস্তু আশ্বিনকৃষ্ণচতুর্দ্দশীমাত্রে কাম্যমেকোদ্দিষ্টশ্রাদ্ধমগ্রে বক্ষ্যতে। ননু কৃষ্ণপক্ষশ্রাদ্ধস্য পার্ব্বণবিধিকত্বে প্রমাণান্তরমপ্যাহ সপিণ্ডীকরণাদূর্দ্ধমিতি। ত্রৈপুরুষিকপার্ব্বণমাহ পিত্রেতি এতচ্চ যথাশ্রুতবাক্যানুরোধাদুক্তং জীবৎপিতৃকশ্রাদ্ধপ্রকরণে এতদ্বচনব্যাখ্যানাবসরে বৃদ্ধপ্রপিতামহকীর্ত্তনমপি জ্ঞেয়মিতি স্বয়মেব বক্ষ্যমাণত্বাৎ। বস্তুতস্তু দ্বৈপুরুষিকপার্ব্বণে পিতুস্তস্য চ বৃত্তস্য জীবেচ্চ প্রপিতামহ ইতি ছন্দোগপরিশিষ্টবচনমেব প্রমাণমিতি বোধ্যম্। ঐকপুরুষিকপার্ব্বণে প্রমাণমাহ হারীত

শস্ত্রবিপ্রহতানাঞ্চ শৃঙ্গিদংষ্ট্রিনরীসৃপৈঃ। আত্মনস্ত্যাগিনাঞ্চৈব শ্রাদ্ধমেষাং ন কারয়েৎ॥ সত্যং বুদ্ধিপূর্ব্বকমৃতানামেব প্রমাদমৃতানাঞ্চ শ্রাদ্ধাদিকমাহাঙ্গিরাঃ। অথ কশ্চিৎ প্রমাদেন ম্রিয়তেঽগ্নিবিষাদিভিঃ। অশৌচং তস্য কর্ত্তব্যং কর্ত্তব্যা চোদকক্রিয়া॥ অবুদ্ধিপূর্ব্বকমপি শৃঙ্গ্যাদিভিঃ ক্রীড়াং কুর্ব্বতাং মৃতানাং ন কর্ত্তব্যম্। যথা ব্রহ্মপুরাণে। শৃঙ্গিদংষ্ট্রিনখিব্যালবিষবহ্নিস্ত্রিয়া-

---

ইতি এতেনোৎসর্গবিধির্বিশেষবচনেন বাধ্যত ইত্যুক্তং যৎ পিতৃভ্য ইতি যেভ্যঃ পিতৃভ্যো দীয়তে তেষাং মধ্যে শস্ত্রঘাতিনে শস্ত্রঘাতবিহিতশ্রাদ্ধোদ্দিষ্টায় একোদ্দিষ্টবিধিনা দেয়মিত্যর্থঃ। অত্র পিতৃভ্য ইত্যুপাদানাৎ ভ্রাত্রাদিবিষয়ত্বাশঙ্কাপি বচনস্য নিরস্তা পার্ব্বণাবগতেরিতি প্রাগুক্তপ্রতিপ্রসবাদিত্যর্থঃ। ভ্রাত্রাদীনাস্থিতি বক্ষ্যমাণ ব্রহ্মপুরাণবচনাদাশ্বিনচতুর্দ্দশ্যাং প্রাপ্তশ্রাদ্ধং ভ্রাত্রাদীনামেকোদ্দিষ্টবিধিনা কার্য্যমিত্যর্থঃ। অপুত্রা ইতি যদ্যপ্যেতদ্বচনং সাংবৎসরিকশ্রাদ্ধবিষয়ে বক্ষ্যতে তথাপ্যপুত্রাণাং যদ্যৎ শ্রাদ্ধং প্রাপ্তং তৎ তদেবাস্য বিষয় ইতি তথোক্তম্। ন স্বপুত্রশস্ত্রহতানাং চতুর্দ্দশীশ্রাদ্ধস্য একোদ্দিষ্টবিধিকত্বমুক্তং তৎ শ্রাদ্ধং কিং সকলকৃষ্ণপক্ষসাধারণমুত কাচিৎকং বা তত্রাহ তচ্চেতি শস্ত্রহতভ্রাত্রাদ্যেকোদ্দিষ্টঞ্চেত্যর্থঃ। তচ্ছ্রাদ্ধে তস্যাশ্বিনমাসীয়কৃষ্ণপক্ষমাত্রকর্ত্তব্যত্বে চ প্রমাণমাহ ব্রহ্মপুরাণ ইতি লুপ্তপিণ্ডোদকক্রিয়াঃ বিষশস্ত্রাদিহতা অপতিতাঃ পতিতানাং তন্নিষেধাৎ তৎতুল্যমরণাত্তথা ব্যপদেশ ইতি বক্ষ্যতে। অতএব লুপ্তপিণ্ডোদকপ্রসঙ্গাদেব তত্রৈব আশ্বিন এব বৃদ্ধপ্রপিতামহাদীনামপি লুপ্তপিণ্ডোদকত্বাদিতি ভাবঃ। কেচিৎ তু শস্ত্রহতানাং চতুর্দ্দশ্যাং পৃথক্‌শ্রাদ্ধবিধিরেব ন তু কৃষ্ণপক্ষে দশম্যাদৌ বর্জ্জয়িত্বা চতুর্দ্দশীমিতি মন্বুনা চতুর্দ্দশ্যাং বর্জ্জিতস্য কৃষ্ণপক্ষবিহিতশ্রাদ্ধস্য প্রতিপ্রসবঃ প্রকরণভেদাৎ অষ্টকাদিবৎ ভ্রাত্রাদীনামেকোদ্দিষ্টবিধানাচ্চ তস্য চ তত্র তত্র ত্রয়ং কুর্য্যাদিত্যনেন পিত্রাদ্যংশে পার্ব্বণত্বম্। অপুত্রা

জলৈঃ। আদরাৎ পরিহর্ত্তব্যঃ কুর্ব্বন্ ক্রীড়াং মৃতস্তু যঃ॥ পরিহর্ত্তব্যঃ শ্রাদ্ধাদৌ। শাস্ত্রানুগত্যা বুদ্ধিপূর্ব্বক-মৃতানামপি কর্ত্তব্যম্। যথা বৃদ্ধগার্গ্যঃ। বৃদ্ধঃ শৌচ-স্মৃতেলু্প্তঃ প্রত্যাখ্যাতভিষক্‌ক্রিয়ঃ। আত্মানং ঘাত-য়েদ্‌যস্তু ভৃগ্বগ্ন্যনশনাম্বুভিঃ॥ তস্য ত্রিরাত্রমশৌচং দ্বিতীয়ে ত্বস্থিসঞ্চয়ঃ। তৃতীয়ে তূদকং কৃত্বা চতুর্থে শ্রাদ্ধ-মিষ্যতে॥ এবং ক্রীড়াব্যতিরেকেণ বুদ্ধিপূর্ব্বমৃতাঃ

যে মৃতাঃ কেচিৎ স্ত্রিয়ো বা ইত্যনেন চ ভ্রাত্রাদ্যংশে একোদ্দিষ্টত্বমিতি বদন্তি। শ্রীদত্তস্তু রোগব্যতিরিক্তমরণমনুগমং কৃত্বা অনুমৃতায়া অবগ্রহ-মৃতায়াশ্চ শস্ত্রহতত্বং সম্পাদ্য তাসামপি চতুর্দ্দশ্যাং কার্য্যমিত্যাহ। ন চ ন যোষিদ্ভ্যঃ পৃথগ্দদ্যাদিত্যনেন নিষেধ ইতি বাচ্যং এতস্যৈকোদ্দিষ্ট-সপিণ্ডনাতিরিক্তশ্রাদ্ধবিষয়ত্বাৎ। অতএব অন্বষ্টকা তথা মাতৃশ্রাদ্ধকৈন মৃতাহনি। একোদ্দিষ্টং তথা ত্যক্ত্বা ত্রিষু নান্যৎ পৃথগ্‌ভবেদিত্যনেনাপি ন নিষেধঃ। অত্র মৃতাহনীত্যস্যোপলক্ষণত্বাৎ অন্যথা একাদশাহাদিশ্রাদ্ধ-মপি ন স্যাদিতি। বস্তুতো যুনোঽপি মৃতস্য প্রাগুক্তবায়ুপুরাণেন চতুর্দ্দশীশ্রাদ্ধবিধানাদ্রোগব্যতিরিক্তমরণং তদ্ব্যাবৃত্তয়া নানুগমকং সম্ভবতীতি বোধ্যম্। ইয়ঞ্চেতি অন্যেষান্তু বিগর্হিতেত্যনেনোক্তেত্যর্থঃ। কাম্যবিষয়েতি কাম্যং তিথিশ্রাদ্ধমপি চতুর্দ্দশ্যাং শস্ত্রহতানামেব নাশস্ত্র-হতানামিত্যর্থঃ। তথাচ চতুর্দ্দশতিথিষু চতুর্দ্দশফলান্যুক্ত্বা যাজ্ঞবল্ক্যঃ। প্রতিপৎপ্রভৃতিষ্বেতান্ বর্জ্জয়িত্বা চতুর্দ্দশীম্। শস্ত্রেণ তু হতা যে বৈ তেভ্য-স্তত্র তু দীয়ত ইতি। তথাচ কৃষ্ণপক্ষত্বসামান্যপুরস্কারেণ প্রতিমাসবি-হিতং যৎ শ্রাদ্ধং যচ্চ কাম্যতিথিশ্রাদ্ধং তদুভয়ত্রৈব নিন্দা ন শ্রাদ্ধা-ন্তরে ইত্যর্থঃ। অতএবেতি প্রকরণভেদাদেবেত্যর্থঃ। ন কেবলং অন্যেষাং বিগর্হিতা ইতি নিন্দা কিন্তু মনূক্তচতুর্দ্দশীবর্জ্জনমপি পক্ষশ্রাদ্ধব্যতিরিক্তবিষয়মিত্যর্থঃ। অতএবোক্তং দিনে দিনে ইতি

শাস্ত্রানুমত্যা চ বুদ্ধিপূর্ব্বমৃতা অপি শ্রাদ্ধার্হাঃ কথং লুপ্তপিণ্ডোদকত্বমিতি চেৎ গৌণমিতি ক্রমঃ বুদ্ধিপূর্ব্বমৃতে পিণ্ডোদকক্রিয়ালোপাদিতি ॥ ৭০ ॥

অথাষ্টকাঃ। বায়ুপুরাণে। পিত্র্যদানায় মূলে স্যুরষ্টকাস্তিস্র এব চ। কৃষ্ণপক্ষে বরিষ্ঠা হি পূর্ব্বা চৈন্দ্রী বিভাব্যতে ॥ প্রাজাপত্যা দ্বিতীয়া স্যাৎ তৃতীয়া বৈশ্বদেবিকী। আদ্যা পূপৈঃ সদা কার্য্যা মাংসৈরন্যা ভবেৎ

---

বীপ্সা পঞ্চদশশ্রাদ্ধার্থা ইতি। বুদ্ধিপূর্ব্বকমৃতানামিতি শ্রাদ্ধনিষেধ ইতি পূর্ব্বোক্তেনান্বয়ঃ। ন কর্ত্তব্যমিতি শ্রাদ্ধমিতি শেষঃ। এবং ক্রীড়াব্যতিরেকেণেতি তথাচ যে শৃঙ্গ্যাদিভিঃ ক্রীড়ন্তো মৃতাঃ যে চাবৈধবুদ্ধিপূর্ব্বকমরণশালিনস্তেষামেব শ্রাদ্ধং ন কার্য্যমিত্যর্থঃ। তদয়ং ব্যবস্থানিষ্কর্ষঃ। শস্ত্রহতপিত্রাদীনাং তৃপ্ত্যর্থং দ্বাদশমাসেষেব কৃষ্ণচতুর্দ্দশ্যাং পার্ব্বণবিধিনা শ্রাদ্ধং কার্য্যং ভ্রাত্রাদীনান্তু শস্ত্রহতানাং আশ্বিনকৃষ্ণপক্ষচতুর্দ্দশীমাত্রে একোদ্দিষ্টবিধিনা শ্রাদ্ধং কার্য্যম্। আশ্বিনামাবাস্যায়ামেব চ বৃদ্ধপ্রপিতামহাদীনামপি পার্ব্বণশ্রাদ্ধং কার্য্যম্। যে শৃঙ্গ্যাদিভিঃ ক্রীড়ন্তো মৃতা যে চাবৈধবুদ্ধিপূর্ব্বকমৃতাস্তে শ্রাদ্ধানর্হা ইত্যর্থঃ ॥ ৭০ ॥

ইদানীং কৃষ্ণপক্ষপ্রসঙ্গাদষ্টকাং নিরূপয়তি অথেতি। তিস্র এব ইত্যেবকারেণ চতুর্থ্যষ্টকায়া নিত্যত্বব্যুদাসঃ। ন চ বর্ষাসু মেধ্যশাকৈশ্চ চতুর্থ্যামেব সর্ব্বদেতি। বক্ষ্যমাণব্রহ্মপুরাণবচনে সর্ব্বদেতি শ্রবণাৎ তস্যা অপি নিত্যত্বমিতি বাচ্যং তৎকরণপক্ষে শাকস্যাবশ্যকত্বার্থং সর্ব্বদেত্যুপাদানাৎ অন্যথা তিস্র ইত্যনুপপত্তেঃ। অতএব বিষ্ণুনাপি নিত্যকালগণনায়াং তিস্রোঽষ্টকাস্তিস্রোঽন্বষ্টকা ইত্যুক্তম্। অতএব চ যা চাপ্যন্যা চতুর্থী স্যাদিতি তস্যাঃ পৃথগভিধানমিতি। বিশেষতঃ বিশেষফলায়েতি এতেনাপি তস্যাঃ কাম্যত্বম্। আসু ইতি তিসৃষ্বিত্যর্থঃ। চতুর্থ্যাঃ ফলমাহ ক্ষিপ্রমিতি পর্ব্বকালেষু অমাবাস্যাষ্টকাদিষু তিথিকালেষু দেবতা-

সদা। শাকৈঃ কার্য্যা তৃতীয়া স্যাদেষ দ্রব্যগতো বিধিঃ। অন্বষ্টকা পিতৃণাঞ্চ নিত্যমেব বিধীয়তে। যা চাপ্যন্যা চতুর্থী স্যাত্তাঞ্চ কুর্য্যাদ্বিশেষতঃ। আশু শ্রাদ্ধং দ্বিজঃ কুর্য্যাৎ সর্ব্বস্বেনাপি নিত্যশঃ। ক্ষিপ্রং প্রাপ্নোতি শ্রেয়াংসি পরত্রেহ চ মোদতে॥ পিতরঃ পর্ব্বকালেষু তিথিকালেষু দেবতাঃ। সর্ব্বে গৃহস্থমায়ান্তি নিপানমিব ধেনবঃ॥ যস্য তে প্রতিগচ্ছেয়ুরষ্টকাস্বপ্যপূজিতাঃ। মোঘাস্তস্য ভবন্ত্যাশাঃ পরত্রেহ চ নিত্যশঃ॥ মূলে আদৌ প্রধানস্থান ইতি যাবৎ অমাবস্যা হি প্রধানশ্রাদ্ধ-কালস্তস্মিন্ স্থানে তৎতুল্যা ইত্যর্থঃ। অতএব বিষ্ণুধর্ম্মো-ত্তরে অমাবাস্যা শ্রাদ্ধকাল ইত্যভিধায়। আগ্রহায়ণ্যামতী-তায়াং কৃষ্ণাস্তিস্রোঽষ্টকাস্তথা। তথা তদ্রূপা ইত্যর্থঃ। এতাশ্চাগ্রহায়ণ্যা ঊর্দ্ধম্। আগ্রহায়ণ্যা ঊর্দ্ধং তিস্রো-ঽষ্টকা ইতি বচনাৎ। যৎ তু ব্রহ্মপুরাণবচনম্। ব্রহ্ম-লোকে তপস্তপ্ত্বা পিতরো লেভিরে বরম্। পৌষে কৃষ্ণাষ্টকায়ান্তু শাকৈঃ সন্তর্পয়েৎ পিতৄন্॥ তথা ছন্দোগ-

---

পূজানমিত্তীভূততত্তত্তিথিষু। আগ্রহায়ণ্যা ঊর্দ্ধমিত্যনেন অস্যা মুখ্যা-গ্রহায়ণীত্বসিদ্ধৌ ব্রহ্মপুরাণবিরোধমাশঙ্কতে যত্ত্বিতি। পৌষে কৃষ্ণাষ্ট-কায়ামিতি। তথাচ মুখ্যাগ্রহায়ণী কথং মুখ্যপৌষীতি বিরোধঃ। সমাধত্তে তদিতি পৌর্ণমাস্যন্তমাসেনেতি তথাচৈকাষ্টকা মুখ্যচান্দ্রেণাগ্রহায়ণী গৌণচান্দ্রেণ পৌষীতি ন বিরোধঃ। যত্ন্যবেতি নিপাতনসমুদায়ো যদী-ত্যর্থঃ। অন্নতরসম্ভারঃ প্রাগুক্তগোমাংসাহরণাক্ষমঃ স্যাদিত্যর্থঃ। ছাগো-ঽনাদেশে পশুরিতি। তথাচ তৈষ্যা ঊর্দ্ধমষ্টম্যাং গৌরিতি উক্ত্বা অপি বা পশুনৈব কুর্ব্বীতেতি সামান্যতঃ পশুর্গোভিলেনোক্তঃ স ছাগ এব বিশে-

পরিশিষ্টম্। শাকস্তু ফাল্গুনাষ্টম্যাং স্বয়ং পত্ন্যথবা পচেৎ। বাস্তুশাকাদিহোমশ্চ কার্য্যঃ পূপাষ্টকাবৃতা॥ তৎ তু পৌর্ণমাস্যন্তমাসেন। বরিষ্ঠা শ্রেষ্ঠা ঐন্দ্রী ইন্দ্র-দেবতাকযাগসম্বন্ধাৎ এবং প্রাজাপত্যা বৈশ্বদেবী চ। মাংসৈঃ পশোরিতি শেষঃ। যদ্যপ্যল্পতরসম্ভারঃ স্যাদপি পশুনৈব কুর্ব্বীতেতি অষ্টকায়াং গোভিলদর্শনাৎ। পশুরপি ছাগ এব ছাগোঽনাদেশে পশুরিতি গৃহ্যান্তরবচনাৎ। ছাগাভাবে স্থালীপাকঃ। অপি বা স্থালীপাকং কুর্ব্বীতেতি গোভিলবচনাৎ। তথা ছন্দোগপরিশিষ্টম্। স্থালীপাকং পশুস্থানে কুর্য্যাৎ যদ্যানুকল্পিকম্। শ্রপয়েত্তং সবৎসায়া-স্তরুণ্যা গোঃ পয়স্যনু॥ অন্বষ্টকেতি। আন্বষ্টক্যং মধ্যমায়ামিতি গোভিলগোতমৌ। বার্কশণ্ডিস্তু সর্ব্বাসু কৌৎসো মেনেঽষ্টকাসু চ। ইতি ছন্দোগপরিশিষ্টবচনাৎ মধ্যমায়ামেবান্বষ্টকাযাগস্য গোভিলসম্মতত্বাৎ তৎ-সমানতন্ত্রত্বাৎ অন্বষ্টকাশ্রাদ্ধমপি গোভিলীয়ানাং তত্রৈব ইতি। চতুর্থী স্যাদিতি বর্ষাসু জ্ঞেয়া। বর্ষাসু মেধ্যশাকৈস্তু চতুর্থ্যামেব সর্ব্বদেতি। ব্রহ্মপুরাণবচনাৎ বর্ষাস্বপি প্রোষ্ঠ-পাদ্যূর্দ্ধম্। প্রোষ্ঠপদ্যামতীতায়ামষ্টকাত্বং ভবিষ্যতি। বর-দানশ্রবণাৎ। যৎ তু চতুরষ্টকা হৈমন্তাস্তাঃ সর্ব্বাঃ সমাং-সাশ্চিকীর্ষেদিতি কৌৎস ইতি গোভিলবচনাৎ ত্র্যতুসংবৎ-

---

যানাদেশাদিত্যর্থঃ। অতএব মধ্যমায়াং গৌরিতি পারস্করদর্শনাৎ অনাদেশ এব নাস্তীতি পূর্ব্বপক্ষো নিরস্তঃ। কলৌ গবালম্ভননিষেধাৎ অনাদেশসম্ভবাচ্চ। সবৎসায়া ইতি যদ্যপি বিবৎসায়াঃ পয়সো ভক্ষ-

সরব্যবস্থায়া হেমন্তশিশিরয়োশ্চতস্রোঽষ্টকাঃ প্রতীয়ন্তে তচ্ছাখ্যন্তরীয়ং ত্র্যষ্টকাপক্ষস্য গোভিলসম্মতত্বাৎ। যথা গোভিলঃ। ত্র্যষ্টক ইত্যৌদ্গাতৃমাতৃমালিঃ তথা গোতম-বার্কষণ্ডী অতএব সৌনকসূত্রম্। হেমন্তশিশিরয়োস্ত্রয়া-ণামপরপক্ষাণামষ্টমীষ্বষ্টকাঃ ॥ ৭১ ॥

নন্বেবং বর্ষাস্বষ্টকাবিধিবিরোধঃ। ন তস্য শ্রাদ্ধবিষয়-ত্বাৎ অষ্টকাপক্ষস্যেষ্টিবিষয়ত্বাদবিরোধঃ। ব্রহ্মপুরাণে। ঐন্দ্র্যান্তু প্রথমায়ান্তু শাকৈঃ সন্তর্পয়েৎ পিতৃন্। প্রাজা-পত্যাং দ্বিতীয়ায়াং মাংসৈঃ শুদ্ধৈশ্চ তর্পয়েৎ॥ বৈশ্ব-দেব্যাং তৃতীয়ায়ামপূপৈশ্চ যথাক্রমম্। বর্ষাসু মেধ্য-শাকৈস্তু চতুর্থ্যামেব সর্ব্বদা॥ অত্র শাকাদিবিকল্পঃ শাখিভেদাদ্ব্যবস্থিতঃ। তত্র গোভিলীয়পারস্করীয়য়োঃ

---

ণানর্হত্বং তথাপি ক্রত্বর্থং সবৎসাবিশেষণম্। অন্বিতি ওদনচরোঃ পশ্চা-দিত্যর্থঃ। আন্বষ্টক্যমিতি অন্বষ্টকা বিহিতযাগমিত্যর্থঃ। অত্র শ্রীদত্তঃ অন্ব-ষ্টকাপদেন অষ্টকাপরদিনমেব বিবক্ষিতং ন তু নবমীতিথিঃ। আন্বষ্ট-ক্যমিতি গোতমসূত্রে শ্বঃপদাৎ পরদিনমাত্রপ্রতীতেরিত্যাহ তন্ন তিথি-প্রকরণাৎ অষ্টকায়া অনু পশ্চাত্তিথিরন্বষ্টকেতি ব্যুৎপত্তেশ্চ। অতএব তিস্রোঽন্বষ্টকা ইতি স্ত্রীলিঙ্গনির্দ্দেশঃ দিনমাত্রপরত্বেঽন্বষ্টকমিত্যেব ব্রূয়াৎ। গোতমবচনেন চ তৎপরদিনে প্রায়েণ নবমীসম্বন্ধাৎ শ্ব ইত্যুক্তম্। অতএব শ্ব আন্বষ্টক্যং পরশ্বো বেতি গোভিলেনোক্তম্। অপরাহ্ণবিহি-তস্যাষ্টকাশ্রাদ্ধস্য তৃতীয়দিনেঽপি কদাচিৎ অন্বষ্টকাবিহিতপূর্ব্বাহ্ণে নবমীলাভাদিতি। মধ্যমায়ামিতি মধ্যমাষ্টকাপরতিথাবেবেত্যর্থঃ গোভি-লগোতমৌ চার্কষণ্ডিশ্চাহুরিতি শেষঃ। সর্ব্বাসু তিসৃষ্বন্বষ্টকাসু তৎপর-তিথিষ্বিত্যর্থঃ ॥ ৭১ ॥

নন্বিতি তথাচ চতুরষ্টকাবিধিবৎ গোভিলবিরোধাৎ বর্ষাষ্টকাবিধি-

স্বগৃহ্যতুল্যত্বাৎ বায়ুপুরাণোক্ত এব ক্রমঃ। অষ্টকাশ্রাদ্ধে তু শূদ্রাদীনামপ্যধিকারঃ। তথা মৎস্যপুরাণে। অমাবাস্যাষ্টকা কৃষ্ণপক্ষপঞ্চদশীষু চ। ইত্যষ্টকাশ্রাদ্ধমভিধায়োক্তম্। এতচ্চানুপনীতোঽপি কুর্য্যাৎ সর্ব্বেষু পর্ব্বসু। শ্রাদ্ধং সাধারণং নাম সর্ব্বকামফলপ্রদম্॥ ভার্য্যাবিরহিতোঽপ্যেতৎ প্রবাসস্থোঽপি নিত্যশঃ। শূদ্রোঽপ্যমন্ত্রবৎ কুর্য্যাদনেন বিধিনা বুধঃ॥ অত্রৈতচ্ছব্দাৎ প্রকৃতসর্ব্বশ্রাদ্ধপ্রতীতেঃ। অন্বষ্টকাশ্রাদ্ধঞ্চ মাতৃপূর্ব্বকং কর্ত্তব্যম্। যথা ব্রহ্মপুরাণে। অষ্টকাসু চ কর্ত্তব্যং শ্রাদ্ধং হৈমন্তিকীষু বৈ। অন্বষ্টকাসু ক্রমশো মাতৃপূর্ব্বং তদিষ্যতে॥ বিষ্ণুঃ। অন্বষ্টকাস্বষ্টকাবদ্ধুত্বা মাত্রে পিতামহ্যৈ প্রপিতামহ্যৈ পূর্ব্ববদ্ব্রাহ্মণান্ ভোজয়িত্বেত্যাদি। মাতৃশ্রাদ্ধং ছন্দোগৈর্ন কর্ত্তব্যং মাতামহাদিশ্রাদ্ধঞ্চ। ন যোষিদ্ভ্যঃ পৃথগ্দদ্যাদবসানদিনাদৃতে। তথা। কর্ষূসমন্বিতং মুক্ত্বা তথাদ্যং শ্রাদ্ধষোড়শম্। প্রত্যাব্দিকঞ্চ শেষেষু পিণ্ডাঃ স্যুঃ ষড়িতি স্থিতিরিতি। ছন্দোগপরিশিষ্টবিরোধাদিতি। কর্ষূসমন্বিতং অন্বষ্টকাশ্রাদ্ধম্॥ ৭২॥

---

রপি শাখ্যন্তরীয়োঽস্ত্বিত্যর্থঃ। তস্য বর্ষাষ্টকাবিধেঃ। স্বগৃহ্যতুল্যত্বাদিতি গোভিলপারস্করাভ্যাং মধ্যমায়াং মাংসস্য ছন্দোগপরিশিষ্টেনাপ্যুত্তরস্যাং শাকস্য বায়ুপুরাণ এবাভিধানাদিতি ভাবঃ। অন্বষ্টকাস্বষ্টকাবদ্ধুত্বা মাত্রে পিতামহ্যৈ ইত্যাদিবিষ্ণুবচনে হোমানন্তরং শ্রাদ্ধবিধানাৎ অষ্টকাশ্রাদ্ধেঽপি সাগ্নেরেবাধিকার ইতি কস্যচিন্মতং তৎ নিরাচষ্টেঽষ্টকাশ্রাদ্ধে ত্বিতি। কর্ষূসমন্বিতমিতি অন্বষ্টকাশ্রাদ্ধমাত্রোপলক্ষণম্। তেন নিরগ্নীনাং তেষাং কর্ষ্বভাবেঽপি মাতামহশ্রাদ্ধনিষেধ ইতি সম্প্রদায়ঃ॥ ৭২॥

অথানাবশ্যকশ্রাদ্ধকালাঃ। তত্র মন্বন্তরাদয়ো ব্রহ্মপুরাণে। এতেষামভ্যুপগমাম্মনুর্ম্মন্বন্তরেশ্বরঃ। মন্বন্তরাদৌ শ্রাদ্ধানি প্রাবর্ত্তয়ত সর্ব্বতঃ॥ এতেষাং পিতৃণামিত্যর্থঃ। মৎস্যপুরাণে। তথা মন্বন্তরাদৌ চ শ্রাদ্ধং দেয়ং বিজানতা। অশ্বযুক্শুক্লনবমী দ্বাদশী কার্ত্তিকী তথা॥ তৃতীয়া চৈত্রমাসস্য তথা ভাদ্রপদস্য চ। ফাল্গুনস্যাপ্যমাবাস্যা পৌষস্যৈকাদশী তথা॥ আষাঢ়স্যাপি দশমী তথা মাঘস্য সপ্তমী। শ্রাবণে চাষ্টমী কৃষ্ণা তথাষাঢ়ী চ পূর্ণিমা॥ কার্ত্তিকী ফাল্গুনী চৈত্রী জ্যৈষ্ঠী পঞ্চদশী সিতা। মন্বন্তরাদয়স্ত্বেতা দত্তস্যাক্ষয়কারিকাঃ॥ অমাবাস্যাষ্টমীব্যতিরিক্তা দ্বাদশতিথয়ঃ শুক্লাঃ প্রতিপত্তব্যাঃ। পুনঃ পুনস্তথোপাদানাৎ উপক্রমোপসংহারয়োঃ শুক্লত্বকীর্ত্তনাচ্চ। এতচ্চ নিত্যত্বে প্রমাণাভাবাৎ কাম্যং আর্থবাদিকী অক্ষয়তৃপ্তিঃ ফলম্॥ ৭৩॥

প্রসঙ্গান্মন্বন্তরাদীনাং কাম্যশ্রাদ্ধকালত্বং নিরূপয়তি অথানাবশ্যকেতি। অভ্যুপগমাৎ বরপ্রার্থনাতঃ। মন্বন্তরাদৌ ত্বিতি অত্র বিধিবাক্যে মন্বন্তরাদাবিতি শ্রবণাৎ মন্বন্তরাদিত্বেনৈব সর্ব্বত্রাভিলাপে নির্দ্দেশঃ ন তু মন্বন্তরাত্বেনেতি বোধ্যম্। অত্র তৃতীয়া চৈত্রমাসস্যেতি পাঠঃ মধ্যে তৃতীয়া চেতি বচনান্তরৈকবাক্যত্বাৎ ফাল্গুনামাবাস্যা শ্রাবণকৃষ্ণাষ্টমী গৌণচান্দ্রেণ ব্রহ্মপুরাণীয়ত্বাদিতি স্মার্ত্তাঃ। নব্যাস্তু এতৎসমভিব্যাহৃতাসু বক্ষ্যমাণাসু যুগাদ্যাসু গ্রন্থকৃতা বিশিষ্য পৌর্ণমাস্যন্তমাসাভিধানাৎ এতাসু চ তথানভিধানাৎ মুখ্যচান্দ্রেণৈব মন্বন্তরাদয়ো গ্রন্থকর্ত্তুরভিপ্রায়বিষয়া ইত্যাহুঃ॥ ৭৩॥

অথ যুগাদ্যাঃ। ব্রহ্মপুরাণে। যুগাদ্যেষু যুগান্তেষু শ্রাদ্ধমক্ষয়মুচ্যতে। বৈশাখে শুক্লপক্ষে তু তৃতীয়ায়াং কৃতং যুগম্॥ কার্ত্তিকে শুক্লপক্ষে তু ত্রেতাথ নবমেঽহনি। অথ ভাদ্রপদে কৃষ্ণত্রয়োদশ্যান্তু দ্বাপরম্। মাঘস্য পৌর্ণমাস্যান্তু ঘোরং কলিযুগং স্মৃতম্॥ তথা। সূর্য্যস্য সিংহসংক্রান্ত্যামন্তঃ কৃতযুগস্য তু। তথা বৃশ্চিকসংক্রান্ত্যামন্তস্ত্রেতাযুগস্য তু। জ্ঞেয়শ্চ বৃষসংক্রান্ত্যাং দ্বাপরান্তশ্চ সংজ্ঞয়া। তথা কুম্ভস্য সংক্রান্ত্যামন্তঃ কলিযুগস্য চ॥ অত্র বৈশাখাদয়ঃ পৌর্ণমাস্যন্তা গ্রাহ্যাঃ। ব্রহ্মপুরাণে তথৈব তিথিকৃত্যাভিধানাৎ। কিঞ্চ কার্ত্তিকে শুক্লপক্ষে তু ত্রেতাথ নবমেঽহনীত্যত্র দর্শান্তে কার্ত্তিকে নবমেঽহনীত্যনেনৈব শুক্লপক্ষপ্রাপ্তৌ শুক্লপক্ষপদানর্থক্যপ্রসঙ্গাৎ। যুগান্তেষু সৌরমাসগ্রহণং রাশ্যবচ্ছেদেন বিধানাৎ। নন্বমাবাস্যাযুগাদিরিত্যুক্তং বিষ্ণুপুরাণে। বৈশাখমাসস্য তু যা তৃতীয়া নবম্যসৌ কার্ত্তিকশুক্লপক্ষে। নভস্য মাসস্য তমিস্রপক্ষে ত্রয়োদশী পঞ্চদশী চ মাঘে॥ ত্রেতাযুগাদ্যাঃ কথিতাঃ পুরাণৈরনন্তপুণ্যাস্তিথয়শ্চতস্রঃ। পানীয়মপ্যত্র তিলৈর্ব্বিমিশ্রং দদ্যাৎ পিতৃভ্যঃ প্রয়তো মনুষ্যঃ। শ্রাদ্ধং কৃতং তেন সমাঃ সহস্রং রহস্যমেতৎ

অথ যুগাদ্যা ইতি। অক্ষয়ফলকথনাৎ কাম্যমিদম্। যুগান্তমাহ সূর্য্যস্যেত্যাদি। পৌর্ণমাস্যন্তা ইতি। বিচারফলন্তু ভাদ্রত্রয়োদশীমাত্রপরং তস্যা দর্শান্তে পৌর্ণমাস্যন্তভাদ্রভেদেন ভিন্নত্বাৎ। অন্যাসান্তু শুক্লপক্ষমাত্রীয়ত্বেনোভয়থৈবৈক্যাৎ। শুক্লপক্ষপদানর্থক্যাদিতি বচনস্য পৌর্ণমাস্য-

পিতরো বদন্তি ॥ অত্র চকারেণ তমিশ্রপক্ষানুষঙ্গাৎ পঞ্চদশ্যমাবাস্যা প্রতীয়তে ন ব্রহ্মপুরাণে বিরোধেনা-নুষঙ্গাযোগাৎ। ননু দ্বে শুক্লে দ্বে চ বৈ কৃষ্ণে যুগাদ্যে পরিকীর্ত্তিতে। শুক্লে পূর্ব্বাহ্ণিকে জ্ঞেয়ে কৃষ্ণে চৈবাপরা-হ্ণিকে ॥ ইতি পঠন্তি তেন বিরোধঃ ন এতস্যানাকরত্বাৎ সাকরত্বেঽপি কল্পভেদেন ব্যবস্থিতো বিকল্পঃ। তথা নবম্যাং শুক্লপক্ষস্য কার্ত্তিকে নিরগাৎ কৃতম্। ত্রেতাসি-ততৃতীয়ায়াং বৈশাখে সমপদ্যত ॥ দর্শে তু মাঘমাসস্য প্রবৃত্তং দ্বাপরং যুগম্। কলিঃ কৃষ্ণত্রয়োদশ্যাং নভস্যে মাসি নির্গতঃ ॥ ইত্যপি বচনং অমূলং সমূলত্বেঽপি কল্প-ভেদেন বোদ্ধব্যং তথাপি চ শ্রাদ্ধং পৌর্ণমাস্যামেব ব্রহ্ম-পুরাণে তস্যা যুগাদিত্বাৎ। অত্র কৃষ্ণপক্ষে ত্রয়োদশ্যাং শ্রাদ্ধং যঃ কুরুতে নরঃ। পঞ্চত্বং তস্য জানীয়াজ্জ্যেষ্ঠ-পুত্রস্য নিশ্চিতম্ ॥ ত্রয়োদশ্যান্তু বৈ শ্রাদ্ধং ন কুর্য্যাৎ পুত্রবান্ গৃহী। নেষ্যতে চোপবাসশ্চ কৈশ্চিদপ্যয়ন-দ্বয়ে ॥ ইতি বচনদ্বয়েন গৃহিণা পুত্রিণা যুগাদৌ ত্রয়ো-দশ্যাং শ্রাদ্ধং ন কর্ত্তব্যমিতি কশ্চিৎ তন্ন অনাকরত্বাদে-তয়োঃ সাকরত্বেঽপি ত্রয়োদশে বহুপুত্রো বহুমিত্রো দর্শ-নীয়াপত্যো যুবমারিণশ্চ ভবন্তীত্যাপস্তম্ববচনৈকবাক্য-

ন্তমাসাভিপ্রায়কত্বে তু তস্য কৃষ্ণাদিত্বেন কৃষ্ণপক্ষীয়নবমীব্যাবর্ত্তকতয়া শুক্লপক্ষপদসার্থকং নান্যথা ইতি ভাবঃ। ব্রহ্মপুরাণে তস্যা এবেতি ব্রহ্মপুরাণস্য শ্বেতবরাহকল্পীয়ধর্ম্মশাস্ত্রত্বাৎ অস্য চ বরাহকল্পত্বাদিতি ভাবঃ। অত্র নব্যাঃ দ্বে শুক্লে দ্বে তথা কৃষ্ণে ইতি বিষ্ণুধর্ম্মোত্তরবচনাৎ

তয়া ত্রয়োদশ্যুপরুদ্ধকাম্যতিথিশ্রাদ্ধবিষয়ং তৎ ভবিষ্যতি ইদঞ্চ নিত্যত্বে প্রমাণাভাবাৎ কাম্যম্ আর্থবাদিকী পিতৃতৃপ্তিঃ ফলম্ ॥ ৭৪ ॥

অথ সংক্রান্ত্যাদি। বিষ্ণুঃ। আদিত্যসংক্রমণং বিষুবদ্বয়ং বিশেষেণায়নদ্বয়ং ব্যতীপাতো জন্মর্ক্ষমভ্যুদয়ঞ্চ। এতাংস্তু শ্রাদ্ধকালান্ বৈ কাম্যানাহ প্রজাপতিঃ। শ্রাদ্ধমেতেষু যদ্দত্তং তদানন্ত্যায় কল্পতে ॥ অভ্যুদয়ং বিবাহাদি আনন্ত্যায় অনন্তপিতৃপ্রীতয়ে পিতৃপ্রীতিরেবার্থবাদিকী ফলং রাত্রিসত্রন্যায়াৎ ন ত্বন্যৎ স্বর্গাদিকল্প্যম্।

---

ত্রয়োদশ্যাং ভাদ্রপদে মাঘে চন্দ্রক্ষয়েঽহনীত্যাদিপুরাণাৎ দর্শে তু মাঘমাসস্য ত্রয়োদশ্যাং নভস্যকে ইত্যাদিত্যপুরাণবচনাচ্চ অমাবাস্যাপ্রতীতেস্তদেকবাক্যতয়া বিষ্ণুপুরাণে কৃষ্ণপক্ষানুষঙ্গস্য ন্যায্যত্বাৎ অন্যথানুষঙ্গসূচকচকারস্য বৈয়র্থ্যাৎ ব্রহ্মপুরাণে মাঘে তু পঞ্চদশ্যাস্ত্বিতি পাশ্চাত্যপাঠাচ্চ অমাবাস্যৈব মাঘস্য যুগাদ্যা যুক্তেতি প্রাহুঃ

সংক্রান্তিশ্রাদ্ধং নিরূপয়তি অথ সংক্রান্ত্যাদীত্যাদি। অভ্যুদয়ং বিবাহাদিরিতি যদ্যপি। অষ্টকাস্বভ্যুদয়ঃ তীর্থপাত্রোপপত্তয়ঃ। পিতৃণামতিরেকোঽয়ং মাসিকান্নাদ্ধ্রুবঃ স্মৃত ইতি। পূর্ব্বোপন্যস্তহারীতবাক্যেনাস্য নিত্যত্বমুক্তং তথাপীহ বিবাহপদেনাধিবেদনমেবোক্তং তত্র চ শ্রাদ্ধং কাম্যং ন চ দ্বিতীয়াদিবিবাহে শ্রাদ্ধমেব নাস্তি সংস্কারকর্ম্মণ্যেব তদ্বিধানাদিতি বাচ্যং অসংস্কারকেঽপানেনৈব শ্রাদ্ধবিধানাৎ সংস্কারকবিবাহশ্রাদ্ধন্তু নিত্যমিতি তস্মাদ্বিশেষঃ। অতএব বিবাহপ্রকরণে বক্ষ্যতে বিবাহাবৃত্তৌ শ্রাদ্ধাবৃত্তিরিতি। আদিপদেনাত্র পুত্রজন্মাভিধীয়তে তত্র কাম্যশ্রাদ্ধস্য সত্ত্বাৎ। নৈমিত্তিকং তথাচান্যৎ পুত্রজন্মাক্ষয়াদিকম্। নিত্যং নৈমিত্তিকং জ্ঞেয়ং পর্ব্বশ্রাদ্ধাদি পণ্ডিতৈরিতি। মার্কণ্ডেয়পুরাণে নৈমিত্তিকত্ব-

অত্র বদন্তি। অয়নদ্বিতয়ে শ্রাদ্ধং বিষুবদ্দ্বিতয়ে তথা। সংক্রান্তিষু চ সর্ব্বাসু পিণ্ডনির্ব্বাপনাদৃতে॥ বৈশাখস্য তৃতীয়ায়াং নবম্যাং কার্ত্তিকস্য চ। শ্রাদ্ধং কার্য্যঞ্চ শুক্লয়াং সংক্রান্তিবিধিনা নরৈঃ॥ ইতি পঠিতমৎস্যপুরাণবচনাভ্যাং সংক্রান্তৌ যুগাদৌ চ পিণ্ডনিষেধ ইতি সংক্রান্তিবিধিনা পিণ্ডদানেতরবিধিনা তদসৎ এতয়োরনাকরত্বাৎ সাকরত্বেঽপি। ততঃ প্রভৃতি সংক্রান্তাবুপরাগাদিপর্ব্বসু। ত্রিপিণ্ডমাচরেৎ শ্রাদ্ধমেকোদ্দিষ্টং মৃতাহনি॥ ইতি মৎস্যপুরাণবচনাদ্বিকল্প এব পিণ্ডদানবিধিনিষেধয়োঃ ষোড়শীগ্রহণাগ্রহণবৎ তত্র দানে ফলভূমা কল্পনীয়ঃ॥ ৭৫॥

মাত্রাভিধানেন কাম্যত্বপ্রতিপাদনাৎ এবং জলাশয়প্রতিষ্ঠাদ্যঙ্গভূতমপি শ্রাদ্ধং কাম্যত্বেনাদিপদগ্রাহ্যং বোধ্যম্। কেচিৎ তু বিবাহাদ্যঙ্গভূতবৃদ্ধিশ্রাদ্ধস্য নিত্যকর্ম্মাঙ্গত্বেনাকরণে কর্ম্মবৈগুণ্যপ্রসঙ্গান্নিত্যমেব। বিষ্ণুবচনে চাভ্যুদয়পদং পুত্রজন্মপরমেবেত্যাহুঃ। রাত্রিসত্রন্যায়াদিতি যথা প্রতিতিষ্ঠন্তীহ বৈ য এতা রাত্রীরুপযন্তীত্যর্থবাদবলেন প্রতিষ্ঠাকামঃ রাত্রিসত্রেণ যজেত ইত্যেব বিধিঃ কল্প্যতে ইত্যর্থঃ। ন ত্বন্যদিতি বিশ্বজিন্ন্যায়েন স্বর্গাদিফলং কল্প্যং কল্পয়িতুং যুক্তং ন ত্বন্যদিত্যর্থঃ। অনুপস্থিততৎকল্পনে গৌরবাদিতি শেষঃ। বিশ্বজিন্ন্যায়স্য চ ফলাশ্রুতিবিষয়ে কাম্য এব প্রবৃত্তেরিতি ভাবঃ। ষোড়শিগ্রহণাগ্রহণবদিতি অতিরাত্রে ষোড়শিনং গৃহ্লাতি নাতিরাত্রে ষোড়শিনং গৃহ্লাতীত্যত্র তুল্যবলবিরোধাৎ যথা বিকল্পস্তদ্বদিত্যর্থঃ। বস্তুতস্তু ততঃ প্রভৃতি পিতরঃ পিণ্ডসংজ্ঞাস্তু লেভিরে ইতি মৎস্যপুরাণাৎ পিণ্ডপদস্য পিতৃবাচকতয়া মৎস্যপুরাণীয়বচনং ত্রিপিণ্ডমাচরেদিত্যস্য ত্রৈপুরুষিকশ্রাদ্ধবিধায়কত্বমেব ন

অথ কাম্যতিথিশ্রাদ্ধকালাঃ। আপস্তম্বঃ। প্রথমেঽহনি ক্রিয়মাণে স্ত্রীপ্রায়মপত্যং জায়তে দ্বিতীয়ে স্তেনাঃ তৃতীয়ে ব্রহ্মবর্চ্চস্বিনঃ চতুর্থে ক্ষুদ্রপশুমান্ পঞ্চমে পুমান্ বহ্বপত্যো ন চানপত্যঃ প্রমীয়তে ষষ্ঠেঽধ্বনীনো দ্যূতশীলশ্চ সপ্তমে কৃষিসিদ্ধিঃ অষ্টমে পুষ্টিঃ নবমে একখুরাঃ দশমে ব্যবহারসিদ্ধিঃ একাদশে কৃষ্ণায়সং ত্রপুসীসকং দ্বাদশে পশুমান্ ত্রয়োদশে বহুপুত্রো বহুমিত্রো দর্শনীয়াপত্যো যুবমারিণশ্চ ভবন্তি চতুর্দ্দশে আয়ুধের্দ্ধিঃ পঞ্চদশে পুষ্টিশ্চ। স্ত্রীপ্রায়ং অপত্যং জায়তে কন্যাবহুলম্। স্তেনাশ্চৌরাঃ। ব্রহ্মবর্চ্চস্বিনঃ সুতা ইতি শেষঃ। একখুরা অশ্বাদয়ঃ। কৃষ্ণায়সং লোহং। ত্রপু রঙ্গম্। যুবমারিণশ্চ পুত্রা ভবন্তীতি শেষঃ প্রাগুৎপন্না এব পুত্রা যুবানো ম্রিয়ন্তে শ্রাদ্ধোৎপন্না বা অযুবমারিণ ইতি পাঠেঽকারকল্পনাপত্তেঃ। ব্যক্তমাহ কাত্যায়নঃ। জ্ঞাতিশ্রৈষ্ঠ্যং ত্রয়োদশ্যাং যুবানস্তত্র ম্রিয়ন্তে। তথা মহাভারতে। জ্ঞাতীনান্তু ভবেৎ শ্রেষ্ঠঃ কুর্ব্বন্ শ্রাদ্ধং ত্রয়োদশীম্। অবশ্যন্তু যুবানোঽস্য প্রমীয়ন্তে নরা গৃহে॥ অতস্তেন্যযুবমারিত্বাদ্যপত্যদোষসহিষ্ণোরপত্যমাত্রার্থিনঃ। তথা মুন্যন্তরোক্ত-

তু পিণ্ডদানবিধায়কত্বং সংক্রান্তিষু চ সর্ব্বাস্বিত্যুক্তবচনবিরোধাৎ অতোঽপিণ্ডকমেব ত্রৈপুরুষিকশ্রাদ্ধমিতি ভাব্যম্ ॥ ৭৫ ॥

অথ কাম্যেতি। ক্ষুদ্রপশুরজমেষাদিঃ পুমাংসো জায়ন্তে ইতি শেষঃ। কর্ত্তা চ বহ্বপত্যঃ বহুপুত্রাদিসন্ততিশ্চ স্যাদিতি শেষঃ। ন চানপত্য ইত্যনেন পুত্রপৌত্রাদীনাং চিরায়ুষ্ট্বমুক্তম্। আয়ুধর্নাদ্ধিরায়ুধাধীনা রাজ্যাদিসম্পত্তিরিত্যর্থঃ। অত্র শস্ত্রহতানামেব শ্রাদ্ধং নাশস্ত্র-

ফলকামস্যাপি দ্বিতীয়ায়াং ত্রয়োদশ্যাঞ্চাধিকার ইতি কল্পতরুঃ। অপত্যগতনিন্দামুখেনাপত্যার্থিনোঽধিকার-নিষেধাৎ মুন্যন্তরোক্তফলকামস্যৈবাধিকার ইতি হলায়ুধঃ ॥ ৭৬ ॥

অথ শ্রাদ্ধবেলাঃ। ব্রহ্মপুরাণে। পূর্ব্বাহ্নে মাতৃকং শ্রাদ্ধমপরাহ্ণে তু পৈতৃকম্। একোদ্দিষ্টন্তু মধ্যাহ্নে প্রাতর্ব্বৃদ্ধিনিমিত্তকম্॥ মাতৃকমিত্যন্বষ্টকাশ্রাদ্ধম্। যথা শঙ্খঃ। পিত্রাদিত্রয়পত্নীষু ভোজ্যা মাতৃঃ প্রতি দ্বিজাঃ। স্ত্রীণামেব তু তদ্যস্মান্মাতৃশ্রাদ্ধমিহোচ্যতে ॥ অপরাহ্ণে

---

হতানামিতি প্রাগেবাভিহিতম্। অকারকল্পনাপত্তেরিতি অযুবমারিণ ইতি পাঠকল্পনমসদিতি শেষঃ। ব্যক্তমাহেতি যুবমারিণ ইতি পাঠং ব্যক্তমাহেত্যর্থঃ। যুবমারিত্বাদীত্যাদিপদাৎ স্ত্রীপ্রায়গ্রহণম্ ॥ ৭৬ ॥

শ্রাদ্ধবেলামাহ অথেতি। পূর্ব্বাহ্ণ ইতি। যদ্যপি পূর্ব্বাহ্ণপদং দিনার্দ্ধাদিষু প্রযুক্তং তথাপি মধ্যাহ্নাদিপদসমভিব্যাহারাৎ সঙ্গবপরমত্র অতএব ঘটিকাত্রয়োপরি ষড়্ঘটিকাপর্য্যন্তমিতি বক্ষ্যতে। বস্তুতঃ প্রাতর্ম-ধ্যাহ্নাদিকালে প্রাতর্ম্মধ্যাহ্নাদিপদবৎ পূর্ব্বাহ্ণপদং ন সঙ্গবে পারিভাষিকং কিন্তু পূর্ব্বাহ্নো বৈ দেবানাং মধ্যন্দিনং মনুষ্যাণাং অপরাহ্ণঃ পিতৃণামিতি শ্রুতিবলাৎ ত্রিধাবিভক্তদিনপ্রাথমিকতৃতীয়ভাগ এব শক্তং তৎপরমেবাত্র পূর্ব্বাহ্ণপদং অন্যথা সমভিব্যাহারবলেন সঙ্গবপরত্বে লক্ষণাপ্রসঙ্গাৎ ন চ প্রাতর্ব্বৃদ্ধিনিমিত্তকমিতি পৃথগুপাদানাদ্বিরোধ ইতি বাচ্যং শ্রাদ্ধভেদেন প্রাতঃকালস্য বৃদ্ধিশ্রাদ্ধনিমিত্তত্বে পূর্ব্বাহ্ণস্য সামান্যস্য মাতৃকশ্রাদ্ধনিমি-ত্তত্বে বিরোধাভাবাদিতি বিভাবনীয়ম্। মাতৃকং মাতৃপ্রধানকমিত্যর্থঃ। মাতৃকমিতীতি। যদ্যপি বৃদ্ধিশ্রাদ্ধস্যাপি মাতৃকত্বং বক্ষ্যতে তথাপ্যত্র তস্য পৃথগভিধানাৎ অন্বষ্টকাপরমেব মাতৃকপদমিতি ভাবঃ। পিত্রাদিত্রয়পত্নী-ষ্বিতি দ্বিতীয়ার্থে সপ্তমী পিত্রাদিত্রয়পত্নীর্ম্মাতৃপ্রভৃতীরিত্যর্থঃ। অপ-

তু পৈতৃকমিতি কৃষ্ণপক্ষপার্ব্বণবিষয়ম্। যথা বিষ্ণুঃ। শুক্লপক্ষস্য পূর্ব্বাহ্ণে কৃষ্ণপক্ষস্যাপরাহ্ণে বিপ্রানাচান্তানুপবেশয়েৎ। বায়ুপুরাণে। শুক্লপক্ষস্য পূর্ব্বাহ্ণে শ্রাদ্ধং কুর্য্যাদ্বিচক্ষণঃ। কৃষ্ণপক্ষেঽপরাহ্ণে তু রৌহিণন্তু ন লঙ্ঘয়েৎ॥ শুক্লপক্ষাদিবিহিতং যুগাদ্যাদিশ্রাদ্ধং পূর্ব্বাহ্ণে কর্ত্তব্যম্। পূর্ব্বাহ্ণস্যোত্তরাবধিমপরাহ্ণস্য পূর্ব্বাবধিমাহ রৌহিণমিতি। রৌহিণং নবমঘটিকা রোহিণীনক্ষত্রমুহূর্ত্ত-

---

রাহ্ণে তু পৈতৃকমিত্যত্র পিতৃপদং মৃতস্বোপাধিনা প্রেতোঽপ্যুচ্যতে। পিত্র্যে তু দ্বিগুণা দর্ভাঃ। পিত্র্যমানিধনাৎ কার্য্যং পৈতৃকে দক্ষিণামুখ ইতি পারস্করদেবলবচনবৎ। এবঞ্চ সপিণ্ডীকরণমপ্যপরাহ্ণ ইতি সিদ্ধম্। কৃষ্ণপক্ষপার্ব্বণেতি। যদ্যপি পৈতৃকপদং সামান্যং তথাপ্যত্র একোদ্দিষ্টস্য পৃথক্কালাভিধানাৎ শুক্লপক্ষপার্ব্বণস্য চ বক্ষ্যমাণবিশেষবচনাবরুদ্ধত্বাৎ কৃষ্ণপক্ষপার্ব্বণবিষয়মিত্যুক্তম্। শুক্লপক্ষস্য পূর্ব্বাহ্ণ ইতি। ন চাত্র যৌগিকং পূর্ব্বাহ্ণাপরাহ্ণপদং দ্বিধাবিভক্তপরমিতি বাচ্যং ব্রহ্মপুরাণে প্রাতঃপদসমভিব্যাহারেণ পারিভাষিকাপরাহ্ণগ্রহণাৎ তদেকবাক্যতয়া শ্রাদ্ধমাত্র এব পরিভাষাদার্ঢ্যেন চ পঞ্চধাবিভক্তাপরাহ্ণপরত্বে নির্ণীতে তৎসমভিব্যাহারেণ পূর্ব্বাহ্ণপদস্যাপি সঙ্গবপরত্বাবধারণাৎ। শুক্লপক্ষবিহিতমিতি শুক্লপক্ষক্রিয়মাণমিত্যর্থঃ। শুক্লপক্ষক্রিয়মাণসপিণ্ডনসাংবৎসরিকয়োর্ব্বাধিতয়োঃ কৃষ্ণপক্ষেঽপি একাদশ্যাদৌ ক্রিয়মাণত্বান্নিরাসঃ। চূড়ামণিস্তু যত্রাঙ্গবিধিবাক্যে শুক্লপক্ষশ্রুতিস্তদেব শুক্লপক্ষবিহিত মিত্যাহ। স্মার্ত্তাস্তু শুক্লপক্ষস্যেতি ষষ্ঠ্যা অঙ্গাঙ্গীভাবসম্বন্ধোঽর্থঃ তস্য চ শ্রাদ্ধেঽন্বয়ঃ। তথাচ শুক্লপক্ষস্য শ্রাদ্ধং শুক্লপক্ষত্বপুরস্কারেণ অঙ্গবিধিবিহিতং শ্রাদ্ধং পূর্ব্বাহ্ণে কর্ত্তব্যমিত্যভিপ্রায়ঃ। কেচিৎ তু শুক্লপক্ষত্বপুরস্কারেণ প্রাধানবিধিবিহিতং ইত্যাহুঃ। তদসৎ যুগাদ্যাদিশ্রাদ্ধানামপি যুগাদ্যাত্বপুরস্কারেণৈব বিহিতত্বেন শুক্লপক্ষত্বপুরস্কারেণাবিহিততয়া প্রকৃতগ্রন্থস্যৈবাসঙ্গত্যাপত্তেঃ। সাগ্নিকর্ত্তব্যশুক্লপক্ষীয়সাংবৎসরিক-

ত্বাৎ তন্ন লঙ্ঘয়েৎ। অতএব শুক্লপক্ষে নবমঘটিকোপরি কৃষ্ণপক্ষে নবমঘটিকায়াঃ প্রাক্ শ্রাদ্ধং ন কর্ত্তব্যম্। যচ্চৈ-কোদ্দিষ্টপরতয়া রৌহিণন্তু ন লঙ্ঘয়েদিতি ব্যাখ্যানং তৎ পার্ব্বণপ্রকরণাপরিচয়েন। এতেন কৃষ্ণপক্ষেঽষ্টম-ঘটিকোপরি মুহূর্ত্তচতুষ্টয়ং পার্ব্বণকালঃ। নবমঘটিকোপরি অপরাহ্লে প্রাশস্ত্যং শুক্লপক্ষে ঘটিকাত্রয়োপরি ষড্ঘটিকা-

শ্রাদ্ধে পক্ষপুরস্কারেণ বিধিনাভাবাৎ কালব্যবস্থানধ্যবসায়াপত্তেশ্চ। ন চাত্র সাংবৎসরিকে পার্ব্বণধর্ম্মাতিদেশাৎ অপরাহ্লপ্রাপ্তিরিতি বাচ্যং শ্রাবণ্যাদিশ্রাদ্ধানামপি পার্ব্বণত্বাৎ তদতিদেশেন পূর্ব্বাহ্লস্যাপি প্রাপ্তেরভিগমাৎ। ননু পার্ব্বণশব্দস্যামাবাস্যাপার্ব্বণে রূঢ়িবলাৎ শীঘ্রোপস্থিতিকত্বেন অমাবাস্যাপার্ব্বণস্যৈবাতিদেশো ন শ্রাবণ্যাদি-পার্ব্বণস্য। অতএব সাগ্নিকাদিক্রিয়মাণবিকৃতপার্ব্বণেঽমাবাস্যাপার্ব্বণ-স্যৈবাতিদেশো ন তু পূপাদিদ্রব্যকাষ্টকাপার্ব্বণস্যেতি চেন্ন প্রকৃতি-ধর্ম্মস্যৈব বিকৃতাবতিদেশাৎ। তথাচোক্তম্। প্রকৃতাৎ কর্ম্মণো যস্মাত্তৎ-সমানেষু কর্ম্মসু। ধর্ম্মোঽতিদিশ্যতে যেন সোঽতিদেশ উদাহৃতঃ॥ ইতি। কালস্য তু প্রকৃতিধর্ম্মত্বাভাবেনাতিদেশাপ্রশক্ততা। অতএব সপিণ্ডী-করণং কুর্য্যাৎ অপরাহ্লে তু পূর্ব্ববদিত্যাদিগরুড়পুরাণাদিবচনে পূর্ব্ববদিতি পার্ব্বণধর্ম্মানতিদিশ্যাপরাহ্লে ত্বিতি কালঃ পৃথগভিহিত ইতি সুধীভি-র্ভাব্যম্। সপিণ্ডীকরণে তু সপিণ্ডীকরণং বক্ষ্যে পূর্ণেঽব্দে তৎক্ষয়াহনি। সপিণ্ডীকরণং কুর্য্যাদপরাহ্লে তু পূর্ব্ববৎ॥ ইতি গরুড়পুরাণবচনাদেব কালব্যবস্থা। সংক্রান্তিশ্রাদ্ধে তু পুণ্যকাল এব বিশেষঃ। তীর্থশ্রাদ্ধে তু। তীর্থে দ্রব্যোপপত্তৌ চ ন কালমবধারয়েদিতি বচনাত্তীর্থপ্রাপ্ত্য-ন্তরবিহিতকাল এব নিয়তঃ। নিত্যশ্রাদ্ধে তু। পঞ্চমে চ তথা ভাগে সংবিভাগো যথার্হতঃ। পিতৃদেবমনুষ্যাণাং কীটানাঞ্চোপদিশ্যতে॥ ইতি দক্ষোক্তেঃ পঞ্চমযামার্দ্ধরূপকাল এব আদরণীয় ইতি। পূর্ব্বাহ্ল-স্যোত্তরাবধিমিতি অশক্তৌ পূর্ব্বাহ্লশ্রাদ্ধস্যোত্তরাবধিমপরাহ্লশ্রাদ্ধস্য

পর্য্যন্তং শ্রাদ্ধকালঃ। প্রথমঘটিকাত্রয়মধ্যে প্রাশস্ত্যম্। নন্তু। ঊর্দ্ধং মুহূর্ত্তাৎ কুতপাৎ যন্মুহূর্ত্তচতুষ্টয়ম্। মুহূর্ত্তপঞ্চকং বাপি স্বধাভবনমিষ্যতে॥ ইতি ব্রহ্মপুরাণবচনাৎ॥ ৭৭ ॥

কুতপস্যাষ্টমঘটিকায়া অপি শ্রাদ্ধকালত্বমুক্তম্। ন চ কুতপাদূর্দ্ধং মুহূর্ত্তপঞ্চকমিতি ব্যাখ্যানং যুক্তম্। অপরাহ্নে তু সম্প্রাপ্তেঽভিজিদ্রৌহিণোদয়ে। যদত্র দীয়তে জন্তো-

পূর্ব্বাবধিমিত্যর্থঃ। ন চ সান্নিধ্যাৎ কৃষ্ণপক্ষ এব রৌহিণন্তু ন লঙ্ঘয়েদিত্যস্যান্বয়ো ন তু শুক্লপক্ষ ইতি বাচ্যম্। মুখ্যকালাশক্তৌ কিং স্যাদিত্যাকাঙ্ক্ষায়াং উভয়ত্রৈব তৌল্যেন তন্নিরাসকতয়া উভয়ত্রৈব তদন্বয়স্য ন্যায্যত্বাৎ। নবমঘটিকেতি। ঘটিকা মুহূর্ত্তপর্য্যায়ঃ। প্রথমঘটিকাত্রয়মধ্যে ইতি। তত্রৈব প্রাথমিকঘটিকাত্রয়মধ্যে সঙ্গবাখ্যে ইত্যর্থঃ। অতএব পূর্ব্বাহ্নপদস্য মুখ্যত্বাদিতি ভাবঃ। মধ্যাহ্নরূপঘটিকাত্রয়স্যৈব রৌহিণন্তু ন লঙ্ঘয়েদিতি নিষেধস্বরসলভ্যত্বাৎ অপ্রাশস্ত্যং হারীতেন দশমাদিমুহূর্ত্তানাং নিষেধাচ্চ। তথাচ হারীতঃ। মধ্যাহ্নসময়ে ক্ষীণে ক্ষীণশোভে দিবাকরে। আসুরং তদ্ভবেৎ শ্রাদ্ধং পিতৃণাং নোপতিষ্ঠতে॥ গৌণকালমপ্যাহ স এব। পূর্ব্বমর্দ্ধাঙ্গুলচ্ছায়ামুহূর্ত্তং রৌহিণং স্মৃতম্। তস্মাৎ শ্রাদ্ধাহ্নিকে দদ্যাৎ রৌহিণন্তু ন লঙ্ঘয়েৎ॥ তস্মাদিতি ল্যবলোপে পঞ্চমী তং প্রাপ্য ইত্যর্থঃ। নিন্দামাহ স এব। রৌহিণং লঙ্ঘয়েদ্যস্তু ভ্রমাদজ্ঞানতোঽপি বা। আসুরং তদ্ভবেৎ শ্রাদ্ধং পিতৃণাং নোপতিষ্ঠতে॥ অত্র শ্রাদ্ধপদং শুক্লপক্ষশ্রাদ্ধপরং ন তু একোদ্দিষ্টশ্রাদ্ধপরং তৎপরত্বে একোদ্দিষ্টবিধিকত্বেনাহ্নিকস্য প্রাপ্তৌ আহ্নিকগ্রহণং নিরর্থকং স্যাৎ। একাহে দ্বাদশাথবা ইত্যপি বাধিতং স্যাৎ কৃষ্ণপক্ষবিহিতপার্ব্বণে দশমমুহূর্ত্তং প্রশস্তং শুক্লপক্ষশ্রাদ্ধং তত্র নিষিদ্ধমিতি তাৎপর্য্যম্॥ ৭৭॥

অষ্টমঘটিকায়া ইতি। তথাচ কুতপাদিতি ল্যব্‌লোপে পঞ্চমী তেন মুহূর্ত্তচতুষ্টয়পক্ষে কুতপমর্য্যাদাশ্রয়ণেন কুতপমবধীকৃত্য মুহূর্ত্তপঞ্চকপক্ষেঽভিবিধ্যাশ্রয়ণেন কুতপমভিব্যাপ্যেতি যথাযোগ্যমন্বয়ঃ। বস্তুত

স্তদক্ষয়মুদাহৃতম্ ॥ ইতি মৎস্যপুরাণবিরোধাৎ। অভিজিদ-ষ্টমঘটিকা অতঃ সপ্তমমুহূর্ত্তোপরি মুহূর্ত্তপঞ্চকং শ্রাদ্ধকাল ইতি। অতএব পার্ব্বণপ্রকরণে কুতপপ্রশংসামাহ ব্রহ্মপুরাণম্। যতিস্ত্রিদণ্ডঃ করুণা রাজতং পাত্রমেব চ। দৌহিত্রং কুতপঃ কালঃ ছাগঃ কৃষ্ণাজিনং তথা ॥ অন্যথা তদপ্রস্তুতং স্যাৎ সত্যং মুহূর্ত্তচতুষ্টয়পক্ষাদপকৃষ্টোঽয়ং কুতপাদিমুহূর্ত্তপঞ্চকপক্ষ ইতি ন বিরোধঃ। রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীতেত্যাদিবাক্যেষু পর্য্যুদাসবিধৌ রাত্রিসন্ধ্যাদীত-রামাবাস্যাদিকালস্যাত্যন্তাপকৃষ্টবিষয়ত্বম্। যে তু মন্যন্তে পূর্ব্বাহ্ণো বৈ দেবানাং মধ্যন্দিনং মনুষ্যাণামপরাহ্ণঃ পিতৃ-ণামিতি শ্রুতেঃ। পক্ষান্তে নির্ব্বপেত্তেভ্যো হ্যপরাহ্ণে চ ধর্ম্মবিৎ। ইতি যমবচনাদপরাহ্ণে চ পৈতৃকমিতি ব্রহ্মপুরাণ-বচনাচ্চ অপরাহ্ণো মুখ্যঃ কল্পঃ কুতপাদূর্দ্ধং মুহূর্ত্তচতুষ্টয়-মনুকল্পঃ মুহূর্ত্তপঞ্চকমাপৎকল্পঃ নিষিদ্ধেতরকল্পশ্চ

কুতপাদূর্দ্ধমিতি মুহূর্ত্তপঞ্চকমিত্যত্র নান্বেতি অনুষঙ্গকল্পনে প্রমাণা-ভাবাৎ। পঞ্চমে কুতপলাভস্তু অভিজিদ্রৌহিণোদয়ে। ইতি বচনৈক-বাক্যতয়েতি বোধ্যম্। উপাধ্যায়মতমাশঙ্ক্য নিষেধয়তি নচেতি। মৎস্য-পুরাণবচনবিরোধাদিতি পার্ব্বণপ্রকরণস্থমৎস্যপুরাণবচনৈকবাক্যতয়া মুহূর্ত্তপঞ্চকমিত্যস্য কুতপমাদায়ৈব সিদ্ধেস্তদ্বিরোধাদিত্যর্থঃ। ইদমুপ-লক্ষণং বচনস্যান্যথাগতিসম্ভবে পর্য্যুদস্তসায়াহ্নমুহূর্ত্তস্যান্যায্যত্বাদি-ত্যপি বোধ্যম্। তথাচ কুতপস্যাপি শ্রাদ্ধকালতয়া প্রাপ্তেঃ কৃষ্ণপক্ষে নবমঘটিকায়াঃ প্রাক্ শ্রাদ্ধং ন কর্ত্তব্যমিতি ভবদুক্তের্বিরোধ ইত্যাশ-ঙ্কার্থঃ। পূর্ব্বপক্ষমুপসংহরতি অত ইতি। করুণা শ্রদ্ধা দৌহিত্রং খড়্গমাংসমিত্যেকে। বস্তুতঃ। অমাবাস্যাং গতে সোমে যা চ খাদতি

মুখ্য-কল্পানু-কল্পাপৎকল্প-ব্যতিরিক্তোঽত্যন্তাপৎ-কল্প ইতি। তথাচ। প্রভুঃ প্রথমকল্পস্য যোঽনুকল্পেন বর্ত্ততে। ন সাম্পরায়িকং তস্য দুর্ম্মতের্ব্বিদ্যতে ফলম্॥ ইতি গৃহ্য-পরিশিষ্টবচনান্মুখ্যভূতাপরাহ্ণলাভে শক্তস্যান্যত্র ফলং নাস্ত্যেবেতি বিশেষঃ। তদশোভনং মুখ্যকল্পানুকল্পত্বে প্রমাণাভাবাৎ ফলাতিশয়ানতিশয়াভ্যামেব ব্যবস্থাসম্ভ-বাৎ। কিঞ্চ সামান্যপ্রাপ্তস্য বিশেষতো বিধানমতিশয়ার্থ-মেব দৃশ্যতে। যথা বিষ্ণুঃ। আদিত্যসংক্রমণং বিষুবদ্বয়মি-ত্যাদি। কিঞ্চ নানামুনিবচনেষু প্রাশস্ত্যশ্রবণাৎ পূর্ব্বো-ক্তবচনান্যপি সংশয়ে প্রাশস্ত্যপরাণ্যেব। যথা মনুঃ। যথা চৈবাপরঃ পক্ষঃ পূর্ব্বপক্ষাদ্বিশিষ্যতে। তথা শ্রাদ্ধস্য পূর্ব্বা-হ্ণাদপরাহ্ণো বিশিষ্যতে॥ শাতাতপঃ। দর্শে শ্রাদ্ধন্তু যৎ

---

রৌহিণম্। তুহিতা সা সমাখ্যাতা দৌহিত্রং তদ্ভবং স্মৃতম্॥ ইতি বচনাৎ রৌহিণং মতবিশেষঃ। অন্যথা কুতপস্য শ্রাদ্ধকালত্বাভাবে পার্ব্বণপ্রক-রণে তদপ্রশস্তত্বং স্যাদিত্যর্থঃ। সত্যমিতি। তথাচ রৌহিণন্তু ন লঙ্ঘয়ে-দিতি নিষেধঃ রৌহিণান্তকালাৎ কুতপান্তপূর্ব্বকালস্যাপ্রাশস্ত্যপর ইতি ভাবঃ। শ্রীদত্তোপাধ্যায়াস্তু ঊর্দ্ধপদস্যাবৃত্ত্যা কুতপাদূর্দ্ধং পরস্মিন্ মুহূর্ত্ত-চতুষ্টয়ং কুতপাদূর্দ্ধং পূর্ব্বস্মিন্ মুহূর্ত্তপঞ্চকং কাল ইতি ঊর্দ্ধপদেন পূর্ব্বাপরকালানুচ্যেতে। মুহূর্ত্তপঞ্চকং বাপীত্যত্র মুহূর্ত্তপঞ্চকঞ্চেবেতি পাঠমপি স্বীকুর্ব্বন্ত চকারাৎ কুতপলাভঃ। এতেন পঞ্চদশমুহূর্ত্তাত্মক-দিনস্য দশমুহূর্ত্তং শ্রাদ্ধকালঃ অচিরোদিতমুহূর্ত্তদ্বয়ং সায়াহ্নমুহূর্ত্ত-ত্রয়ঞ্চ শ্রাদ্ধে পর্য্যুদস্তমেবেত্যাহুঃ। তন্ন রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত রাহোরন্যত্র দর্শনাৎ। সূর্য্যোদয়মুহূর্ত্তে চ সন্ধ্যয়োরুভয়োস্তথা॥ ইতি শাতাতপবচনবলাৎ সূর্য্যোদয়সম্বন্ধ্যেকমুহূর্ত্তস্যৈব নিষেধেন তদেক-বাক্যতয়া সূর্য্যে চৈবাচিরোদিতে ইত্যস্যাপি সূর্য্যোদয়সম্বন্ধ্যেকমুহূর্ত্ত-

প্রোক্তং পার্ব্বণং তৎ প্রকীর্ত্তিতম্। অপরাহ্লে পিতৃণান্তু তত্র দানং প্রশস্যতে॥ আপস্তম্বঃ। মাসি মাস্যপরপক্ষস্যাপরাহ্লঃ শ্রেয়ানিতি তদা চাপরাহ্লসম্ভবেঽপ্যন্যত্র ফলমস্ত্যেব। কিন্তু ন তথা প্রকৃষ্টং তস্মাৎ ফলপ্রকর্ষতারতম্যার্থমুত্তরোত্তরলঘুকালোৎকর্ষঃ॥ ৭৮॥

নন্বু রাত্র্যাদীতরামাবাস্যাকালসামান্যপ্রতিপাদকং বচনমপরাহ্লবিশেষপরমস্তু সর্ব্বত্র সামান্যবচনস্য বিশেষদর্শনাৎ বিশেষপরত্বং দৃষ্টম্। যথা। ঔরসক্ষেত্রজৌ পুত্রৌ বিধিনা পার্ব্বণেন তু। প্রত্যব্দমিতরে কুর্য্যুরেকো-

পরত্বেনাচিরোদিতমুহূর্ত্তদ্বয়স্যাপর্য্যুদাসাৎ। বস্তুতস্তু সন্ধ্যা হি দণ্ডদ্বয়ং তস্যাশ্চৈকো দণ্ডো রাত্রেরপরশ্চ দিনস্য তস্য চ সন্ধ্যাত্বেনৈব পৃথঙ্নিষেধাৎ তমপহায়ৈবাচিরোদিতমুহূর্ত্ত একো নিষিধ্যতে। অন্যথা উভয়মতেঽপি বচনয়োর্বিধ্যনুবাদাপত্তেরিতি ভাব্যম্। নারায়ণোপাধ্যায়মতং দূষয়ন্তি অন্যে ত্বিতি। মুহূর্ত্তপঞ্চকমিতি কুতপমাদায়েত্যর্থঃ। ন তু সায়াহ্নসম্বন্ধৈকমুহূর্ত্তমাদায় মুহূর্ত্তপঞ্চকমিত্যর্থঃ। এতচ্চ নিষিদ্ধেতর ইত্যভিধানাল্লব্ধম্। এতচ্চ স্বমতাবষ্টম্ভেন উক্তং উপাধ্যায়েন তু সায়াহ্নমুহূর্ত্তমাদায় মুহূর্ত্তপঞ্চকস্যোক্তত্বাদিতি বোধ্যম্। নন্বু ফলাতিশয়ানতিশয়াভ্যাং কালব্যবস্থা মুখ্যকল্পানুকল্পক্রমেণ বা ইত্যত্র বিনিগমনাবিরহ ইত্যত আহ কিন্ত্বিতি। নন্বু বিষ্ণুবচনে বিশেষেণায়নদ্বয়মিত্যভিধানাৎ তথৈবাস্তু ইহ তু তথার্থত্বে প্রমাণং নাস্তীত্যত আহ কিন্ত্বিতি। পূর্ব্বোক্তবচনানি অপরাহ্লঃ পিতৃণামিত্যাদীনি একবাক্যতাবলাদিতি শেষঃ। লঘুকালোৎকর্ষ ইতি নিষিদ্ধেতরকালাৎ কুতপাদিকালস্য তস্মাচ্চ রৌহিণ্যাদিকালস্য ততোঽপ্যপরাহ্লকালস্যোৎকর্ষ ইত্যর্থঃ॥ ৭৮॥

নন্বিত্যাদি। পর্য্যুদস্তেতরামাবাস্যায়াং পিতৃভ্যো দদ্যাদিতি সামান্যবচনং অপরাহ্লঃ পিতৃণামিত্যাদি অপরাহ্লরূপবিশেষবিধায়কবিশেষ-

দ্দিষ্টং স্থতা দশ॥ ইতি জাবালবচনম্। যত্র যত্র প্রদাতব্যং সপিণ্ডীকরণাৎ পরম্। পার্ব্বণেন বিধানেন দেয়মগ্নিমতা সদা॥ ইতি মৎস্যপুরাণবচনাৎ সাগ্নিকৌরসক্ষেত্রজপুত্র-পরমিতি বক্ষ্যতে ন তত্র মুনিভেদাভেদস্তু একমুনিপক্ষেঽপি তথাত্বে সামান্যবচনবৈয়র্থ্যাপত্তেঃ। ইহ তু একেনৈব মুনিনা রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত ইত্যভিধায়াপরাহ্ণো বিশিষ্যত ইত্যুক্তং এবং মধ্যাহ্নাদিবিধিরপি প্রাশস্ত্যপর এব। নম্নু মধ্যাহ্নাদিবিধিবিরোধাৎ রাত্রৌ শ্রাদ্ধং ন কুর্ব্বী-তেতি তীর্থশ্রাদ্ধবিষয়মস্তু নামাবাস্যাপার্ব্বণৈকোদ্দিষ্ট-বিষয়ম্। ন প্রাশস্ত্যপরতয়াপ্যুপপত্তৌ প্রকরণবাধস্যা-ন্যায্যত্বাৎ উভয়ত্র মধ্যাহ্নাপ্রাপ্তৌ শ্রাদ্ধলোপাপত্তেশ্চ। তথা সতি প্রতিসংবৎসরমিতি বীপ্সার্থবাধঃ প্রাতঃকালাদি-বিভাগ উক্তো মৎস্যপুরাণে। প্রাতঃকালো মুহূর্ত্তাংস্ত্রীন্ সঙ্গবস্তাবদেব তু। মধ্যাহ্নস্ত্রিমুহূর্ত্তঃ স্যাদপরাহ্ণস্ততঃ পরম্॥ সায়াহ্নস্ত্রিমুহূর্ত্তঃ স্যাৎ শ্রাদ্ধং তত্র ন কারয়েৎ। রাক্ষসী নাম সা বেলা গর্হিতা সর্ব্বকর্ম্মসু॥ অহ্নো মুহূর্ত্তা বিখ্যাতা

---

বচনদর্শনাদ্বিশেষপরমস্ত্বিত্যর্থঃ। এতদেব দৃষ্টান্তেন দৃঢ়য়তি সর্ব্বত্রে-ত্যাদি। যথেতি। যদ্যপি অগ্নিমত্ত্বং নৌরসক্ষেত্রজত্ববিশেষো ধর্ম্মঃ তদু-ভয়েতরপুত্রাণামপি সাগ্নিত্বসম্ভবাৎ তথাপি একবাক্যতায়ামসতি বাধকে লাঘবমেব বীজং তচ্চ তত্রৈব প্রকৃতেঽপ্যস্তীতি তাৎপর্য্যম্। সমাধত্তে নেতি তথাত্বে সামান্যবচনস্য বিশেষপরত্বে বৈয়র্থ্যং দর্শয়তি ইহ ত্বিতি। একে-নৈবেতি। একেনৈব মুনিনা রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীতেত্যনেন রাত্রিসন্ধ্যো-পসামান্যকালমভিধায়াপরাহ্ণো বিশিষ্যতে ইত্যুক্তমিত্যর্থঃ। তেনাত্রা-প্যেকবাক্যত্বাভ্যুপগমে রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত ইতি সামান্যবিধির্ব্যর্থ এব

দশ পঞ্চ চ সর্ব্বদা। তত্রাষ্টমো মুহূর্ত্তো যঃ স কালঃ কুতপঃ স্মৃতঃ॥ মধ্যাহ্নে সর্ব্বদা যস্মান্মন্দীভবতি ভাস্করঃ। তস্মাদনন্তফলদস্তত্রারম্ভো বিশিষ্যতে॥ রাক্ষসীতি নিন্দার্থম্। সর্ব্বকর্ম্মসু স্নানাদিষ্বপি অনাপদীত্যর্থঃ। সোঽয়ং শ্রাদ্ধবিষয়ে পঞ্চধা দিনবিভাগ উক্তঃ। মধ্যাহ্ন ইতি। অহ্নো মধ্যং মধ্যাহ্নঃ অষ্টমঘটিকেত্যর্থঃ। তত্র যস্মান্মন্দীভবতি ভাস্করঃ স্থিরীভবতি ভাস্করঃ। অতএব সূর্য্যং প্রতি যমদগ্নিবাক্যম্। মধ্যাহ্নেষু নিমেষং হি স্থাস্যসি ত্বং দিবাকর। তত্র ভেৎস্যামি সূর্য্য ত্বাং নাত্র কার্য্যা বিচারণা॥ অতস্তত্র কুতপে আরম্ভো বিশিষ্যতে॥ ৭৯॥

স্যাদিতি ভাবঃ। তথাচাত্র সামান্যবচনবৈয়র্থ্যমেব বাধকং অতো নৈকবাক্যত্বসম্ভবঃ কিন্তু বিশেষবচনং প্রাশস্ত্যপরমেবেতি ভাবঃ। এবমিতি: একস্মিন্ বচনেঽপরাহ্নস্য প্রাশস্ত্যপরত্বে নির্ণীতে একোদ্দিষ্টন্তু মধ্যাহ্নে ইত্যাদিমধ্যাহ্নবিধিরপি প্রাশস্ত্যপর এবেত্যর্থঃ। ননু মধ্যাহ্নাদীতি। আদিপদাৎ অপরাহ্নে তু পৈতৃকমিত্যাদিবিধিগ্রহণম্। তীর্থশ্রাদ্ধেতি। তীর্থে দ্রব্যোপপত্তৌ চ ন কালমবধারয়েৎ। ইতি সামান্যশাস্ত্রপ্রাপ্ততীর্থশ্রাদ্ধবিষয়মস্তু তত্র বিশেষবিধিবিরহেণ তদ্বিরোধাভাবাদিত্যর্থঃ। প্রকরণেতি। অমাবাস্যাপার্ব্বণপ্রকরণোক্তস্য রাত্র্যাদিনিষেধস্যেতি শেষঃ। উভয়ত্র উভয়দিনে। পূর্ব্বাহ্নে মাতৃকং শ্রাদ্ধমিত্যাদিনা তত্তৎকালে শ্রাদ্ধোক্তেস্তত্তৎকালাকাঙ্ক্ষায়ামাহ প্রাতঃকালাদীতি সঙ্গবঃ পূর্ব্বাহ্নাপরনামা। অনাপদীতি। আপদি তত্র স্নানাদি কর্ত্তব্যমেব যথা বৃহন্নারদীয়ে। নিত্যোদিতানি কর্ম্মাণি স্বকালে ন কৃতানি চেৎ। সর্ব্বর্ষ্যাঃ প্রথমে যামে তানি কুর্য্যাদতন্দ্রিতঃ॥ ইতি। সোঽয়মিতি সায়াহ্ননিন্দৈব সর্ব্বকর্ম্মসু ন তু প্রাতঃকালাদিবিভাগোঽপি সর্ব্বকর্ম্মসু তথা অনভিধানাৎ কিন্তু শ্রাদ্ধবিষয় এব তেন প্রাতঃস্নানাদৌ ন রাত্রিমুহূর্ত্তবিধিরিতি ভাবঃ। একোদ্দিষ্টপ্রশস্তত্রিমুহূর্ত্তাত্মকমধ্যাহ্নমধ্যে কুতপস্যাতিপ্রাশস্ত্যমাহ

অথ শ্রাদ্ধনিষেধঃ। মহাভারতে। নক্ষত্রে ন চ কুর্ব্বীত যস্মিন্ জাতো ভবেন্নরঃ। ন প্রোষ্ঠপদয়োঃ কার্য্যং তথাগ্নেয়ে চ ভারত॥ দারুণেষু চ সর্ব্বেষু প্রত্যরৌ চ বিবর্জ্জয়েৎ। জ্যোতিষে। যানি প্রোক্তানি তানি সর্ব্বাণি বর্জ্জয়েৎ॥ প্রোষ্ঠপদা পূর্ব্বভাদ্রপদা দ্বিনক্ষত্রত্বাদ্দ্বিবচনম্। আগ্নেয়ং কৃত্তিকা। দারুণমুক্তং জ্যোতিষে। দারুণঞ্চোরগং রৌদ্রমৈন্দ্রং নৈঋর্তমেব চ। উগ্রনক্ষত্রপরতয়া ব্যাখ্যানমসঙ্গতং। নক্ষত্রাণি তথৈবাত্র দারুণোগ্রাণি বর্জ্জয়েদিতি বিষ্ণুধর্ম্মোত্তরবচনে ভেদেনোপাদানাৎ। জ্যোতিষে যানি প্রোক্তানি নিষিদ্ধতয়া ভরণ্যাদীনি। তথা। নন্দায়াং ভার্গবদিনে ত্রয়োদশ্যাং ত্রিজন্মনি। অত্র শ্রাদ্ধং ন কুর্ব্বীত পুত্রদারধনক্ষয়াৎ॥ এতচ্চ ব্রীহিযবপাকাদিনিমিত্তসাবকাশশ্রাদ্ধবিষয়ম্। মনুঃ। রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত রাক্ষসী কীর্ত্তিতা হি সা। সন্ধ্যয়োরুভয়োশ্চৈব

---

মধ্যাহ্নে সর্ব্বদেতি অনন্তফলদ ইতি মন্দে সবিতর্য্যক্ষয়ং ভবতীতি শ্রুতিরত্র মূলম্। অতএব তত্র ভাস্কররশ্মিরীভাবাদেব॥ ৭১॥

অথ শ্রাদ্ধনিষেধঃ। প্রত্যরৌ পঞ্চমতারাত্রয়ে দারুণমিতি ঔরংগমশ্লেষা রৌদ্রমার্দ্রা ঐন্দ্রং জ্যেষ্ঠা নৈঋর্তং মূলা উগ্রনক্ষত্রাণি চ পূর্ব্বাত্রয়ঞ্চ ভরণী মঘা চোগ্রগণঃ স্মৃত ইতি জ্যোতির্ব্বচনোক্তানি। ভরণ্যাদিনীত্যাদিপদাদুগ্রগণপরিগ্রহঃ। ত্রিজন্মনীতি। জন্মসম্পদ্বিপৎক্ষেমঃ প্রত্যরিঃ সাধকো বধঃ। মিত্রং পরমমিত্রঞ্চ জন্মভাচ্চ পুনঃ পুনঃ॥ ইত্যুক্তদিশা সপ্তবিংশতিনক্ষত্রাণাং ত্রিরাবৃত্ত্যা গণনয়া সিদ্ধে জন্মনক্ষত্রত্রয় ইত্যর্থঃ। এতচ্চেতি আদিপদাৎ যুগাদ্যাদিশ্রাদ্ধপরিগ্রহঃ। সাবকাশশ্রাদ্ধবিষয়মিদং নিরবকাশশ্রাদ্ধবিষয়ত্বে তচ্ছ্রাদ্ধবাধাপত্তেরিতি ভাবঃ। যস্য শ্রাদ্ধস্য যদ্দিনাকরণেঽপ্রত্যবায়াস্তভাবদেব শ্রাদ্ধং সাবকাশম্। অত্র

সূর্য্যে চৈবাচিরোদিতে ॥ রাক্ষসীতি নিন্দার্থম্। অচিরোদিতে দিবসস্যাদ্যঘটিকায়াম্। বিষ্ণুঃ। সন্ধ্যারাত্র্যোর্ন কর্ত্তব্যং শ্রাদ্ধং খলু বিচক্ষণৈঃ। তয়োরপি চ কর্ত্তব্যং যদি স্যাদ্রাহুদর্শনম্ ॥ রাহুদর্শনদত্তং হি শ্রাদ্ধমাচন্দ্রতারকম্। গুণবৎ সর্ব্বকামীয়ং পিতৃণামুপতিষ্ঠতে। আচন্দ্রতারকং যত্র উপতিষ্ঠতে অতো রাত্রাবপি কার্য্যমিত্যর্থঃ। সর্ব্বকামীয়ং সর্ব্বকামায় হিতম্। যমঃ। স্নানং দানং তপঃ শ্রাদ্ধমনন্তং রাহুদর্শনে। আসুরী রাত্রিরন্যত্র তস্মাত্তাং পরিবর্জ্জয়েৎ ॥ রাহুদর্শনেঽনন্তফলং যতোঽতোঽন্যত্রাসুরী রাত্রিরিত্যর্থঃ। স্নানদানাদীনামপ্যন্যত্র রাত্রৌ নিষেধে প্রতিপ্রসবমাহ দেবলঃ। রাহুদর্শনসংক্রান্তিবিবাহাত্যয়বৃদ্ধিষু। স্নানদানাদিকং কুর্য্যুর্নিশি কাম্যব্রতেষু চ ॥ আদিশব্দঃ শ্রাদ্ধাদিপরঃ। অতো রাত্রৌ রবি-

---

কেচিৎ উপনয়নাদ্যঙ্গভূতবৃদ্ধিশ্রাদ্ধমপি নন্দাদৌ ন কার্য্যং অঙ্গিনাং সাবকাশত্বেন অঙ্গানামপি সাবকাশত্বাৎ। ন চ প্রধানপ্রবৃত্তৌ তদঙ্গস্যাবশ্যকত্বাৎ নিরবকাশত্বমিতি বাচ্যং প্রধানপ্রবৃত্তেরাবশ্যকত্বাভাবাৎ সাঙ্গপ্রধানস্যৈবানুষ্ঠেয়ত্বেনাঙ্গবাধেঽঙ্গিনোঽপ্রবৃত্তেঃ। যথা কাম্যশ্রাদ্ধে বস্ত্রাদ্যঙ্গবাধে তস্মিন্ দিনে প্রধানাপ্রবৃত্তিঃ। যত্র তু বিশেষবচনাৎ নন্দাদৌ প্রবৃত্তির্নিয়তা। যথা। কুর্য্যাৎ পুংসবনং সুযোগকরণে নন্দে সভদ্রে তিথাবিতি। তথাচ সিতেন্দুজীবদিবসেঽন্নপ্রাশনমিতি তত্র প্রধানপ্রবৃত্তেরাবশ্যকত্বেনাঙ্গস্যাপি আবশ্যকতয়া নিরবকাশং বৃদ্ধিশ্রাদ্ধং কর্ত্তব্যমেব বচনাদিত্যাহুঃ। তদসৎ নিরবকাশোপনয়নাদ্যর্থবৃদ্ধিশ্রাদ্ধস্য নন্দাদাবপি কর্ত্তব্যত্বাৎ সামান্যতো নিষেধাভিধানস্যানুচিতত্বাৎ কিন্তু প্রধানস্য যত্র সাবকাশত্বং তত্র তদঙ্গবৃদ্ধিশ্রাদ্ধস্য নন্দাদৌ নিষেধঃ। যত্র তু প্রধানস্য নিরবকাশত্বং তত্রাঙ্গস্যাপি নিরবকাশতয়া

সংক্রমণে স্নানদানশ্রাদ্ধাদীনি কর্ত্তব্যানি। রাত্রৌ বিবাহে যদা প্রাতঃকালে বৃদ্ধিশ্রাদ্ধং ন কৃতং তদা রাত্রাবপি কার্য্যম্। এতেনাসম্ভবে দিবসস্য ভাগান্তরেঽপি বৃদ্ধিশ্রাদ্ধমবগম্যতে। অত্যয়ে মরণে রাত্রৌ স্নানতর্পণপিণ্ডদানাদিকং কর্ত্তব্যম্। বৃদ্ধৌ পুত্ত্রজন্মনি স্নানমঙ্গাশৌচাপগমার্থং দানং সহিরণ্যতিলপাত্রদানং হারীতাদ্যুক্তং বৃদ্ধিশ্রাদ্ধঞ্চ কর্ত্তব্যম্। অত্র কেচিৎ বৃদ্ধিশ্রাদ্ধং পুত্ত্রজন্মানন্তরং ন কর্ত্তব্যং শৌচস্যাধিকারিবিশেষণত্বাৎ ॥ ৮০ ॥

নন্দাদৌ কর্ত্তব্যতৈবেতি স্থিতিঃ। অতএব নান্দীমুখে বিবাহে চ যুগাদাবয়নে তথা। গ্রহণে চ ন দুষ্যন্তি তিথিবারাস্ত্রিজন্মনি ॥ ইতি রাজমার্ত্তণ্ডেন নিরবকাশবিবাহনিমিত্তকনান্দীমুখশ্রাদ্ধ এব তিথ্যাদীনামদোষত্বমুক্তম্। আদ্যঘটিকায়ামিতি। প্রথমমুহূর্ত ইত্যর্থঃ। অত্র মুহূর্ত্তত্রয়মেব নিষিদ্ধমিতি কুল্লূকভট্টঃ। তন্ন প্রাতর্বৃদ্ধিনিমিত্তকমিত্যনেন প্রাতর্বৃদ্ধিবিধানবিরোধাৎ। সায়াহ্নসম্বন্ধিমুহূর্ত্তত্রয়নিষেধবৎ প্রাতঃসম্বন্ধিমুহূর্ত্তত্রয়স্যৈব নিষেধপ্রশক্তৌ প্রাতর্বৃদ্ধিবিধানেন কর্ম্মযোগ্য একমুহূর্ত্তপরিত্যাগাৎ প্রাথমিকমুহূর্ত্তদ্বয়ং নিষিদ্ধমিতি মিশ্রাঃ। অত্রাচিরোদিতে শ্রাদ্ধস্যৈব নিষেধো ন তু স্নানদেবার্চ্চনাদাবশ্রুতত্বাদিতি বোধ্যম্। গুণবৎ প্রকৃষ্টম্। স্নানদানাদীনামিতি। রাহুদর্শনাদন্যত্রাপি সংক্রান্ত্যাদৌ স্নানদানাদীনাং সামান্যতো রাত্রিপর্য্যুদাসে দেবলবচনাৎ প্রতিপ্রসব ইত্যর্থঃ। রাত্রৌ রবিসংক্রমণে ইতি। রাত্রিরবিসংক্রান্তিসম্বন্ধিরাত্রিপ্রবিষ্টপুণ্যকাল ইত্যর্থঃ. দিবাশেষভাগে বিষুবাদিসংক্রান্তৌ তদনন্তরং মানার্দ্ধাদীনাং পুণ্যকালত্বাৎ। এতেনেতি। যদি রাত্রাবপি বৃদ্ধিশ্রাদ্ধং দিবাভাগান্তরেঽপি সুতরামিতি ভাবঃ। হারলতাকারমতং দূষয়িতুমুপন্যস্যতি অত্র কেচিদিতি। শৌচস্যেতি। তেন পুত্ত্রজননানন্তরমেবাশৌচং ন তু নাড়ীচ্ছেদাৎপরত ইতি তন্মতম্ ॥ ৮০ ॥

কিন্তু জাতেষ্টিবদশৌচব্যপগম এব। জাতকর্ম্মাদিকন্তু সংস্কারপুণ্যার্থান্ কুর্ব্বন্তি প্রাঙ্ নাড্যাশ্ছেদনাদিতি হারীতবচনাদনন্তরক্ষণ এব কর্ত্তব্যম্। অতঃ পুত্ত্রজন্মনি ন রাত্রৌ বৃদ্ধিশ্রাদ্ধম্। এতদ্বচনাদ্ভবিষ্যতীতি চেন্ন এতস্য যথাসম্ভবসম্বন্ধাৎ। তন্ন জাতকর্ম্মসমকালবিধানাৎ। যথা মার্কণ্ডেয়পুরাণে। নৈমিত্তিকমথো বক্ষ্যে শ্রাদ্ধমভ্যুদয়ার্থকম্ পুত্ত্রজন্মনি তৎ কার্য্যং জাতকর্ম্ম সমং নরৈঃ॥ তথা ব্রহ্মপুরাণে। দেবাশ্চ পিতরশ্চৈব পুত্ত্রে জাতে দ্বিজন্মনাম্॥ আয়ান্তি যস্মাত্তদহঃ পুণ্যং ষষ্ঠঞ্চ সর্ব্বদা॥ তত্র দদ্যাৎ সুবর্ণঞ্চ ভূমিং গাং তুরগং রথম্। ইত্যভিধায়। জাতশ্রাদ্ধে

জাতেষ্টিবদিতি। সাগ্নিনা জাতেষ্টির্যথা শৌচাপগমে ক্রিয়তে তদ্বদিত্যর্থঃ। সংস্কারং জাতকর্ম্ম। পুণ্যার্থান্ গোহিরণ্যাদিদানানি। এতদ্বচনাদেবেতি। রাহুদর্শনসংক্রান্তীত্যুক্তবচনাদেবেত্যর্থঃ। যথাসম্ভবেতি। স্নানদানাদীনাং তদানীং বিহিতত্বেন সম্ভবিতয়া তদ্বিষয়মাদায়ৈব পর্য্যবসিতত্বাৎ শ্রাদ্ধস্য তু তাদৃশবচনাভাবাদশৌচে ন প্রতিপ্রসব ইতি ভাবঃ। সমত্বস্যাবশ্যকত্বেনাপি ধর্ম্মেণ সম্ভবাৎ ন সমকালত্বলাভোঽত আহ তথা ব্রহ্মপুরাণ ইতি। তথাচ পিতৃণামাগমনাৎ তদ্দিনে শ্রাদ্ধলাভ ইতি ভাবঃ। ষষ্ঠদিনস্য পুণ্যত্বঞ্চ ন শ্রাদ্ধার্থং কিন্তু ষষ্ঠ্যাদিদেবতাপূজার্থমেব। ষষ্ঠেঽহ্নি রাত্রিযাগস্তু জন্মদানাস্তু কারয়েৎ। তাসাং বলিনিমিত্তার্থং শুদ্ধির্জন্মনি কীর্ত্তিতা। ইত্যেকবাক্যত্বাৎ। সর্ব্বদা গ্রহণঞ্চাশৌচান্তরপাতেঽপি জাতকর্ম্মাদৌ শুদ্ধিবিধানার্থম্। অতএব মিতাক্ষরায়াং স্মৃতিঃ। অশৌচে তু সমুৎপন্নে পুত্ত্রজন্ম যদা ভবেৎ। কর্ত্তুস্তাৎকালিকী শুদ্ধিঃ পূর্ব্বাশৌচাদ্বিশুধ্যতীতি। তেনান্যাশৌচমধ্যেঽপি জাতকর্ম্মষষ্ঠীপূজে কর্ত্তব্যে। অত্রাপীতি। তথাচ তদহর্জাতশ্রাদ্ধে পক্বান্নং ন দদ্যাদিতি

ন দদ্যাৎ তু পক্কান্নং ব্রাহ্মণেষ্বপীতি। অত্রাপি তদহরিতি সম্বন্ধাৎ পক্কান্ননিষেধানুপপত্তেশ্চ। তথা বিষ্ণুধর্ম্মোত্তরে। অচ্ছিন্ননাড্যাং কর্ত্তব্যং শ্রাদ্ধং বৈ পুত্রজন্মনি। অশৌচাপগমে কার্য্যমথবাপি নরাধিপ॥ ন চাস্য পূর্ব্বপক্ষোত্তরভাবেন ব্যবস্থা পূর্ব্বার্দ্ধবৈয়র্থ্যাপত্তেঃ। সার্থকত্বে সম্ভবতি বৈয়র্থ্যস্যান্যায্যত্বাৎ। তস্মাদ্বিকল্প এব শক্তাশক্তভেদেন যুক্তঃ। তাবৎকালং স্তন্যাদানে পুত্রনাশপ্রসঙ্গাৎ। সাঙ্গবৃদ্ধিশ্রাদ্ধং কর্ত্তুমশক্যতে ইতি চেৎ কিঞ্চিদঙ্গবিকল-

বাক্যার্থ ইত্যর্থঃ। পক্কান্ননিষেধ ইতি। যদি ন তদহঃশ্রাদ্ধপ্রাপ্তিস্তদা ন পক্কান্ননিষেধ ইতি ভাবঃ। ননু তদহরিত্যনুষঙ্গে প্রমাণাভাবঃ। বচনবলাৎ অশৌচোত্তরক্রিয়মাণজাতশ্রাদ্ধে পক্কান্ননিষেধো ভবিষ্যতীত্যতঃ প্রমাণান্তরমাহ তথেতি। ন চাস্যেতি। সিদ্ধবস্তুবিষয়কসংশয়াপনোদনায় হি প্রশ্নসম্ভবঃ। বিধৌ তু প্রকৃতে কালবিশিষ্টবিধ্যাদিবলাদেব কালাদিগোচরসংশয়ানুৎপত্তেঃ পূর্ব্বপক্ষোঽনুপপন্ন ইতি ভাবঃ। সার্থকত্বং দর্শয়িতি তস্মাদিতি। তাবৎকালমিতি। কৃন্তনানাং স্তনপ্রপিধত্তে ইতি শ্রুত্যা নাড়ীচ্ছেদাৎ প্রাক্ স্তন্যপাননিষেধাদিতি ভাবঃ। আশঙ্কতে নিত্যে হীতি। অত্রায়ং ভাবঃ। কাম্যে তাবৎফলার্থমেব পুরুষঃ প্রবর্ত্ততে। অনন্তরভাবি চ ফলং চিরাতীতকর্ম্মণা ন জনয়িতুং শক্যতে। অতোঽপূর্ব্বনামা ব্যাপারঃ কল্প্যতে। স চ ব্যাপারঃ সাক্ষাদেব ফলজনকঃ ফলশিরস্কাপূর্ব্বমিত্যুচ্যতে। স এব কাম্যে বিধিপ্রত্যয়বাচ্যঃ সর্ব্বাঙ্গসম্পন্নঞ্চ কর্ম্ম তৎসাধকং তত্তদঙ্গবিধিবৈয়র্থ্যাপত্তিভয়াদেব তথাকল্পনাৎ। নিত্যে তু বিধৌ ন ফলশিরস্কাপূর্ব্বং বাচ্যং ফলাভাবাত্তদসম্ভবাৎ কিন্তু পিণ্ডপ্রধানাপূর্ব্বমাত্রং তত্র চ প্রধানকর্ম্মমাত্রং কারণং অঙ্গানাং চ তত্রাপি ফলার্থত্বাৎ সাঙ্গানাং নিত্যকর্ম্মণাং সততানুষ্ঠানস্যাবশ্যকতয়া সততানুষ্ঠানবোধকবিধিবলাদেব তথাকল্পনাৎ। অতএব নিত্যকর্ম্মণি অঙ্গমেব নাস্তীতি কর্কো-

মেব ভবিষ্যতি। নিত্যে হি কিঞ্চিদঙ্গহানির্ন কাম্যে অভ্যুদয়শ্রাদ্ধে চ যুক্তা ইতি চেন্ন বিশেষবচনাদ্ভবিষ্যতি। কো বিরোধঃ। অতঃ সিদ্ধং রাত্রৌ বৃদ্ধিশ্রাদ্ধমিতি। অয়ঞ্চ ষষ্ঠীনাড্যবচ্ছিন্নামাবাস্যাবিধিপূর্ব্বকো রাত্র্যাদিনিষেধঃ পর্য্যুদাসঃ সর্ব্বত্র সামান্যশাস্ত্রপ্রাপ্তনিষেধস্য পর্য্যুদাসত্বাৎ॥ ৮১॥

অথ পর্য্যুদাসঃ। ননু নঞো নিষেধে মুখ্যত্বাৎ পর্য্যুদাসপক্ষে লক্ষণাপত্তিঃ। ন চাত্র লক্ষণাবীজমস্তি। উচ্যতে। নিষেধো বিধাতুং ন শক্যতে সামান্যশাস্ত্রপ্রাপ্ত্যু-

---

পাধ্যায়া বদন্তি সাঙ্গস্য নিত্যস্যাপি কাম্যত্বমিতি তেষামভিপ্রায়াৎ। এবং স্থিতে ইহ বৃদ্ধিশ্রাদ্ধে কাম্যে কথমর্ঘ্যগন্ধাদ্যঙ্গবৈকল্যে কর্ম্মসিদ্ধিরিতি। বিশেষবচনাদিতি। অচ্ছিন্ননাড্যাং কর্ত্তব্যমিতি বিশেষবচনাদিত্যর্থঃ। নাড়ীচ্ছেদাৎ প্রাক্ সাঙ্গপ্রধানাচরণে তাবৎপর্য্যন্তং স্তন্যাদানে পুত্রনাশপ্রসঙ্গাদেব তথাকল্পনাদিতি ভাবঃ। অত ইতি। পুত্রোৎপত্ত্যাদিনিমিত্তং শ্রাদ্ধং রাত্রাবপি সিদ্ধমিত্যর্থঃ। অয়ঞ্চেতি। রাত্র্যাদিনিষেধঃ রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীতেতি বিধিঃ রাত্র্যাদিপর্য্যুদাসপর ইত্যর্থঃ। যথাশ্রুতন্তু ন সঙ্গচ্ছতে নিষেধস্য পর্য্যুদাসত্বাসম্ভবাৎ। অতিরাত্রে ষোড়শিনং গৃহ্লাতীতি বিশেষশাস্ত্রোপজীবিনো নাতিরাত্রে ষোড়শিনং গৃহ্লাতীত্যাদেঃ পর্য্যুদাসত্বাসম্ভবাদাহ সামান্যশাস্ত্রেতি। সামান্যশাস্ত্রস্য তদিতরপরত্বসম্ভবেন পর্য্যুদাস এব নিষেধপক্ষে বিধ্যন্তরকল্পনাগৌরবাৎ বিশেষশাস্ত্রস্য তু তদিতরবিষয়াসম্ভবাৎ বিকল্প এবেতি ভাবঃ॥ ৮১॥

অথ পর্য্যুদাস ইতি। নিষেধে মুখ্যত্বাদিতি। ঘটো নাস্তীত্যাদাবভাবপ্রতীতেরেবৌৎসর্গিকত্বাদিতি ভাবঃ। লক্ষণাপত্তেরিতি ঘটঃ পটো ন ইত্যত্রৈব নঞোঽন্যোন্যাভাববতি প্রবৃত্তত্বান্ন লক্ষণাপত্তেরিত্যর্থঃ। তদ্বীজমনুসন্ধেয়মিতি শেষঃ। লক্ষণাপত্তিরিতি ক্বচিৎ পাঠঃ। তৎপাঠপক্ষে

পজীব্য স হি নিষেধবিধির্বক্তব্যঃ। ইতরথাঽবিধানাদেব নিষেধপ্রাপ্তেঃ অপ্রাপ্তপ্রাপকত্বরূপং বিধিত্বঞ্চ ন স্যাৎ তদা চোপজীব্য বাধাপত্তেরেব বিধিনাসম্ভবঃ। নান্তরীক্ষে-ঽগ্নিশ্চেতব্য ইতিবদনুবাদ এব ভবিষ্যতীতি চেন্ন বিধিত্বে সম্ভবতি অনুবাদাযোগাৎ। অতো বিধিত্বানুপপত্তিরেব

---

দোষ ইতি শেষঃ। তথাচ রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীতেত্যত্র নঞো মুখ্যার্থত্বে ক্রিয়ান্বয়িতয়া রাত্রৌ শ্রাদ্ধকরণাভাবোঽবগম্যতে। পর্য্যুদাসপক্ষে তু নঞো রাত্র্যন্বিতস্য তদন্যোন্যাভাববতি দিবাভাগে প্রবৃত্তত্বাৎ লক্ষণৈ-বেত্যর্থঃ। বীজসত্ত্বে লক্ষণা ন দোষায় ইত্যত্রাহ ন চেতি। লক্ষণাবীজমাহ উচ্যতে ইতি। ন শক্যতে ইতি। রাত্রৌ শ্রাদ্ধপ্রাপ্তিং বিনা শ্রাদ্ধনিষেধো ন তত্র বিধাতুং শক্যতে। প্রসক্তং হি প্রতিষিধ্যতে ইতি ন্যায়াদি-ত্যর্থঃ। প্রাপ্তিশ্চ সামান্যশাস্ত্রাদেব ইত্যাহ সামান্যশাস্ত্রেতি। অমা-বাস্যায়ামিত্যাদিনা দিবারাত্রিসাধারণেন ধর্ম্মেণামাবাস্যাদিবিষয়কসামান্য-শাস্ত্রেণেত্যর্থঃ। ননু প্রসক্তস্যৈব প্রতিষেধ ইতি নিয়মে প্রমাণা-ভাবঃ। অন্যথা জলহ্রদে বহ্নির্নাস্তীত্যাদিনিষেধার্থমপি জলহ্রদাদৌ বহ্নিপ্রসক্তিরপেক্ষণীয়া স্যাৎ তথাচ প্রাপ্তিং বিনাপি নিষেধঃ স্যাৎ অত আহ ইতরথেতি। সামান্যশাস্ত্রস্য দিবামাত্রপরত্বমেব প্রাপ্তিং বিনৈব চ রাত্রৌ শ্রাদ্ধনিষেধ এবঞ্চেৎ তদেত্যর্থঃ। অবিধানাদেব বিধানাভাবা-দেব বিধিত্বং নিষেধবাক্যস্যেত্যর্থঃ। তথাচ লৌকিকনিষেধে যথা তথাস্তু বৈদিকনিষেধস্য তু বিধিত্বানুপপত্তেরবশ্যং প্রাপ্তিরপেক্ষণীয়েতি ভাবঃ। তদা চেতি। সামান্যশাস্ত্রোপজীবিত্বে চ সতীত্যর্থঃ। ন চ রাগপ্রাপ্তস্যৈব শ্রাদ্ধস্য রাত্রৌ নিষেধ ইতি বাচ্যং প্রকরণবাধাৎ কষ্টকর্ম্মণি শ্রাদ্ধাদৌ কষ্টং কর্ম্মেতি ন্যায়েন বিনা শাস্ত্রং রাগাসম্ভবাচ্চ। বিধানাসম্ভবঃ নিষেধ-বিধ্যসম্ভবঃ। তথাচ উপজীব্য বাধাপত্তিরেব লক্ষণাবীজমিতি ভাবঃ। ইতরথেত্যাদি প্রতিবন্দিমঙ্গীকৃত্যাহ নান্তরীক্ষ ইতি মুখ্যানুরোধাৎ অনু-বাদকতৈব যুক্তেত্যাশয়ঃ। বিধিত্বে সম্ভবতীতি পর্য্যুদাসেন ইতি শেষঃ।

লক্ষণাবীজম্। সঙ্কোচোঽয়ং সামান্যশাস্ত্রস্য ন বাধ ইতি। অতএবাজ্যাবেক্ষণাদ্যঙ্গবাধভিয়া স্বর্গকামপদস্যান্ধবধিরেতরস্বর্গকামপরত্বে সঙ্কোচ উক্ত ইতি চেন্ন নিষেধবিধৌ সামান্যশাস্ত্রসঙ্কোচে বাধস্যাবশ্যকত্বাৎ। তথাহি অমা-

অনুবাদকত্বে বাক্যবৈয়র্থ্যাপাতাৎ লক্ষণৈব যুক্তেবেতি ভাবঃ। উপসংহরতি অত ইতি। যত উপজীব্যবাধাপত্তের্ন নিষেধবিধিত্বসম্ভবঃ পর্য্যুদাসবিধিশ্চ বিনা লক্ষণাং ন সম্ভবতি অত ইত্যর্থঃ। নিষেধবাদী উপজীব্যাবাধং পরিহরতি সঙ্কোচোঽয়মিতি। প্রাক্ প্রতিপন্নজ্ঞানস্য বিরোধিজ্ঞানং বাধঃ যথা। শুক্তৌ প্রতিপন্নস্য রজতজ্ঞানস্য নেদং রজতমিতি জ্ঞানং বাধঃ। প্রকৃতে চ সামান্যশাস্ত্রপ্রাপ্তস্যামাবাস্যাশ্রাদ্ধজ্ঞানস্য রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত ইত্যনেন ন বাধঃ। এতদ্বাক্যার্থজ্ঞানস্য রাত্রিত্বেন তন্নিষেধাবগাহিতয়া সমানপ্রকারকত্বাভাবাৎ কিন্তু সামান্যশাস্ত্রস্যৈকদেশপরতয়া সঙ্কোচ এবেত্যর্থঃ। অত্র দৃষ্টান্তমাহ অতএবেতি। যথা স্বর্গকামোঽগ্নিষ্টোমেন যজেতেতি প্রধানবিধিমুপজীব্য প্রবৃত্তেনাঙ্গবিধিনা যজমানেক্ষিতং হবির্জুহোতি যজমানঃ পঠতি ইত্যাদিনাবেক্ষণপঠনাদ্যঙ্গবাধভিয়া উপজীব্যবিধৌ স্বর্গকামপদস্য অন্ধবধিরেতরস্বর্গকামপরতয়া সঙ্কোচঃ ন তু বাধঃ স্বর্গকামোঽগ্নিষ্টোমেন যজেত ইতি বিধিবাক্যার্থবোধস্য যজমানেক্ষিতং হবির্জুহোতীত্যাদ্যঙ্গবাক্যার্থবোধানাঞ্চ ভিন্নবিষয়তয়া বিরোধিত্বাভাবাৎ তথা প্রকৃতেঽপীত্যর্থঃ। দূষয়তি চেন্নেতি। নিষেধবিধৌ নিষেধবিধিনিমিত্তং সামান্যশাস্ত্রস্য সঙ্কোচে সতি সামান্যশাস্ত্রজনিতপ্রাক্তনজ্ঞানবাধস্যাবশ্যকত্বাদিত্যর্থঃ। তদেব বিবৃণোতি তথাহীতি। অমাবাস্যাশাস্ত্রজন্যজ্ঞানং হি ত্রিবিধং সম্ভবতি। অমাবাস্যাত্বেন কদাচিৎ রাত্রিমাত্রাবগাহি দিবারাত্র্যুভয়াবগাহি দিবামাত্রাবগাহি চ। তত্রাদ্যয়োর্নিষেধবিধিজন্যরাত্রিশ্রাদ্ধনিষেধজ্ঞানং বাধ এব। ইয়ান্ পরো বিশেষঃ। যৎ রাত্রিমাত্রাবগাহিনঃ সামান্যত এব বাধঃ। দিবারাত্র্যুভয়াবগাহিনশ্চ রাত্রিভাগেঽংশতো বাধ

বাস্যাশাস্ত্রস্য রাত্রিমাত্রপরত্বং দিবারাত্রিপরত্বং বোপ-
জীব্য নিষেধবিধৌ রাত্রিজ্ঞানস্য বাধ এব ॥ ৮২ ॥

দিবামাত্রপরত্বঞ্চ নোপজীব্যং বিধিত্ববিরোধাৎ। অতএব
দিবারাত্র্যুল্লেখরহিতং ন সামান্যজ্ঞানমুপজীব্যং রাত্রি-
পরত্বসম্ভাবনয়ৈব অপ্রাপ্তত্বেন বিধিত্বসম্ভবাৎ। স্বর্গকাম-

ইত্যাহ অমাবাস্যাশাস্ত্রস্যেতি। তজ্জন্যজ্ঞানস্যেত্যর্থঃ। রাত্রিমাত্রপরত্বং রাত্রিমাত্রাবগাহিত্বং দিবারাত্রিপরত্বং দিবারাত্র্যুভয়াবগাহিত্বং তাদৃশাবগাহি জ্ঞানমুপজীব্যেত্যর্থঃ। বাধ এবেতি। বাধশ্চাত্র পূর্ব্বজ্ঞানস্য যত্র যদবগাহিত্বং উত্তরজ্ঞানস্য তত্র তদভাবাবগাহিতয়া ন তু সমানপ্রকারতাপি নিবিষ্টা প্রকৃতে তদসম্ভবাৎ অন্যথা সঙ্কোচোঽপি ন স্যাৎ তস্য বাধমূলকত্বাৎ ॥ ৮২ ॥

নন্বু দিবামাত্রাবগাহিসামান্যজ্ঞানস্যৈব উপজীব্যত্বং ভবতু তদা চ ন বাধ ইত্যত্রাহ দিবাপরত্বঞ্চেতি। দিবামাত্রাবগাহি জ্ঞানঞ্চেত্যর্থঃ। বিধিত্ববিরোধাদিতি। নিষেধবাক্যস্য বিধিত্ববিরোধাদিত্যর্থঃ। তথাহি সামান্যশাস্ত্রজন্যজ্ঞানস্য দিবামাত্রাবগাহিত্বে সামান্যশাস্ত্রমপি দিবামাত্রপরমেব বাচ্যং তথাচ রাত্রৌ শ্রাদ্ধস্য প্রাপকত্বাভাবাদেব তদভাবস্য সিদ্ধতয়া নিষেধশাস্ত্রস্যাপ্রাপ্তপ্রাপকত্বরূপং বিধিত্বং ন স্যাদিতি দিবামাত্রাবগাহিজ্ঞানস্য উপজীব্যত্বাভাবে দিবামাত্রপরসামান্যশাস্ত্রমপি নোপজীব্যং স্যাদিত্যাহ অতএবেতি। অতএব দিবামাত্রাবগাহিজ্ঞানস্যোপজীব্যত্বাভাবাদেব। দিবারাত্র্যুল্লেখরহিতং দিবারাত্র্যুভয়াবিষয়কং দিবামাত্রপরং সামান্যজ্ঞানং সামান্যেন রূপেণ জ্ঞানং যস্মাদিতি ব্যুৎপত্ত্যা সামান্যশাস্ত্রমপি নোপজীব্যমিত্যর্থঃ। উপজীব্যত্বাভাবং স্পষ্টয়তি রাত্রিপরত্বেতি। সামান্যশাস্ত্রস্য রাত্রিপরত্বেন যা সম্ভাবনা রাত্রৌ শ্রাদ্ধজ্ঞানং তেনৈব ন তু দিবাশ্রাদ্ধজ্ঞানেন অপ্রাপ্তত্বেন রাত্রৌ শ্রাদ্ধনিষেধস্যাপ্রাপ্তত্বেন নিষেধশাস্ত্রস্য বিধিত্বসম্ভবাদিত্যর্থঃ। তথাচ সামান্যশাস্ত্রস্য স্বজন্যজ্ঞানদ্বারা নিষেধোপজীব্যত্বং ন তু সাক্ষাৎ

পদস্য তু সামান্যাধিকারিপরত্বমুপজীব্য অঙ্গবিধৌ ন বাধঃ অথোপজীব্যত্বান্ন নিমিত্তং বিধিরপবাধত ইতি ন্যায়াৎ গ্রহণাগ্রহণবদ্বিকল্পো ভবিষ্যতি। ন চ বিকল্পপরিহারার্থং ক্বাপি লক্ষণা দৃষ্টা। যজতিষু যে যজামহং কুর্য্যান্নানুযাজেম্বিত্যত্র বিকল্পপরিহারার্থং লক্ষণা দৃষ্টেতি চেন্ন

দিবামাত্রাবগাহিজ্ঞানস্য চ উপজীব্যত্বাভাবে দিবামাত্রপরসামান্যশাস্ত্রস্যাপি ন তদ্বারোপজীব্যত্বমিতি ভাবঃ। কেচিৎ তু তর্হি দিবারাত্র্যুল্লেখরহিতামাবাস্যাসামান্যজ্ঞানমুপজীব্যং বাচ্যমিত্যত্রাহ অতএবেতি। নিষেধস্য বিধিত্ববিরোধাদেবেত্যর্থঃ। বিরোধং স্পষ্টয়তি রাত্রিপরত্বসম্ভাবনয়েতি। শ্রাদ্ধবিধৌ যদ্যমাবাস্যায়া রাত্রিপরত্বসম্ভাবনা স্যাৎ তদৈব তত্র শ্রাদ্ধপ্রাপ্ত্যা নিষেধস্যাপ্রাপ্তত্বেন বিধিত্বং সম্ভবতি। অতঃ সম্ভাবিতস্য উপজীব্যরাত্রিজ্ঞানস্য বাধ এবেতি ব্যাচক্রুঃ। তদসৎ দিবারাত্র্যুল্লেখরহিতমমাবাস্যাজ্ঞানমিত্যস্যাসম্ভবদুক্তিকত্বাৎ দিবারাত্রিভিন্নামাবাস্যাবিরহাৎ। যদি চ দিবাত্বরাত্রিত্বাদ্যবচ্ছিন্নবিষয়তাশূন্যমমাবাস্যাত্বেনামাবাস্যাজ্ঞানমুচ্যতে তদা তস্য রাত্র্যবগাহিত্বয়া উপজীব্যত্বমেবেতি কথং তস্যানুপজীব্যত্বোক্তিরিতি। দৃষ্টান্তে তু নৈবমিত্যাহ স্বর্গকামপদস্যেতি। সামান্যাধিকারিপরত্বং স্বর্গকামাধিকারিকপ্রধানবিধিমুপজীব্য প্রবৃত্তে অঙ্গবিধৌ ন বাধঃ প্রধানবিধ্যঙ্গবিধিবাক্যার্থবোধয়োর্ভিন্নবিষয়তয়া বিরোধাৎ কিন্ত্বন্ধাদীনামাজ্যাবেক্ষণাদ্যঙ্গাসম্ভবাৎ স্বর্গকামপদস্যান্ধাদিভিন্নস্বর্গকামপরত্বমনুমীয়তে ইতি সঙ্কোচ এব প্রধানবিধেরিত্যর্থঃ। অথেতি। বিধির্নিমিত্তং স্বপ্রবৃত্তিহেতুভূতং বিধ্যন্তরং ন বাধতে উপজীব্যত্বাৎ। উপজীব্যবাধে উপজীবকস্যাপি স্বর্গস্য তন্মূলকত্বেন বাধপ্রসঙ্গাদিতি ন্যায়েনামাবাস্যাশাস্ত্রস্য উপজীব্যত্বেন বোধিতত্বাৎ নিষেধস্যাপ্যনন্যথাসিদ্ধত্বেন দ্বয়োস্তুল্যবলতয়া রাত্রৌ শ্রাদ্ধং কুর্য্যান্ন কুর্য্যাদিতি বিকল্পো ভবিষ্যতি। যথা অতিরাত্রে ষোড়শিনং গৃহ্লাতি নাতিরাত্রে ষোড়শিনং গৃহ্লাতি ইত্যেতয়োঃ ষোড়শিগ্রহণাগ্রহণয়োর্বিকল্প

তত্র সম্ভূয় সমুচ্চারণাদেকবাক্যত্বাবগমে বাক্যভেদভয়াদেব লক্ষণায়া উক্তত্বাৎ গঙ্গাঘোষাদৌ তথা দৃষ্টত্বাৎ তদসৎ ॥ ৮৩ ॥

সামান্যবিশেষবচনয়োর্ব্বিকল্পাদর্শনাৎ। অতএব গোতমঃ। তুল্যবলবিরোধে বিকল্পঃ। অন্যথা রাগপ্রাপ্ত-

---

ইত্যর্থঃ। ষোড়শী চ সোমকপাত্রবিশেষঃ। নন্বু বিকল্পপক্ষেঽপ্যংশতো বাধস্যাবশ্যকত্বাল্লক্ষণৈবোচিতেত্যত আহ ন চেতি। ন হীত্যর্থঃ। তথা সতি বিকল্পোচ্ছেদাপত্তেরিতি ভাবঃ। আশঙ্কতে যজতিম্বিতি। যজতিষু যে যজামহং কুর্য্যান্নানুযাজেম্বিতি শ্রুতিঃ। অস্যাশ্চায়মর্থঃ। যজত্যাখ্যযাগেষু যে যজামহমন্ত্রকবণকহোমঃ কার্য্যঃ। নানুযাজাখ্যযজতিবিশেষেম্বিতি। অত্র বিধিনিষেধয়োর্বিকল্পপ্রশক্তৌ তৎপরিহারায় অনুযাজেতরস্মিন্ লক্ষণা দৃষ্টেত্যর্থঃ। সম্ভূয় সমুচ্চারণাৎ সন্নিহিতপাঠাৎ তথাচাত্র প্রকরণাবগতৈকবাক্যতাবলেন বাক্যভেদভয়াদেব লক্ষণা ন তু বিকল্পপরিহারায় ইত্যর্থঃ। বাক্যভেদভয়েন লক্ষণায়াং দৃষ্টান্তমাহ গঙ্গাঘোষাদাবিতি। গঙ্গায়াং মৎস্যাস্তীরে ঘোষ ইত্যতো মুখ্যত্বসম্ভবেঽপি বাক্যভেদভয়াৎ লক্ষণায়া দৃষ্টত্বাদিত্যর্থঃ। প্রকৃতে তু সম্ভূয়সমুচ্চারণাভাবাৎ বাক্যভেদস্যাবশ্যকত্বাৎ ন তত্ত্বয়া লক্ষণেতি কিন্তু বিকল্প এব যুক্ত ইতি ভাবঃ ॥ ৮৩ ॥

প্রকৃতে বিকল্প এব ন ভবতি কিং তস্য সংযুক্তাযুক্তত্ববিচারেণ ইত্যাশয়েনাহ সামান্যেতি। বিকল্পাদর্শনাৎ অতুল্যবলত্বেন বিকল্পাসম্ভবাৎ সামান্যবিশেষবিধিনিষেধয়োঃ। অন্যত্র চরিতার্থত্বেন দুর্ব্বলতয়া নিষেধবিধেরেবানন্যথাসিদ্ধত্বেন বলবত্ত্বাদিতি ভাবঃ। নন্বু সামান্যশাস্ত্রস্যাপ্যুপজীব্যত্বেন তুল্যবলত্বমেব ইত্যত আহ অন্যথেতি। উপজীব্যস্যাপি বলবত্ত্বাঙ্গীকারে ইত্যর্থঃ। উপজীব্যশাস্ত্রস্যৈব বলবত্ত্বং ন রাগস্যেত্যুক্তাবপি দোষমাহ কিঞ্চেতি। প্রকৃতৌ দর্শপৌর্ণমাসবিহিতয়োরাঘারাজ্যভাগয়োর্বিকৃতাবপি পশুযাগে প্রকৃতিবদ্বিকৃতিরিত্যতিদেশেন

নিষেধেঽপি বিকল্পঃ স্যাৎ। কিঞ্চ ন তৌ পশৌ করোতীতি অতিদেশপ্রাপ্তাজ্যভাগদ্বয়নিষেধে বিকল্পঃ কথং ন স্যাৎ। কিঞ্চ ব্রীহিকার্য্যে নীবারবিধৌ ব্রীহিপ্রাপ্ত্যুপজীবিত্বাৎ ব্রীহিনীবারয়োর্বিকল্পঃ স্যাৎ। অথোচ্যতে। এব-

প্রাপ্তয়োর্ন তৌ পশৌ করোতীত্যনেন তৌ আঘারাজ্যভাগৌ পশুযাগে ন করোতীত্যর্থকেন নিষেধে বিকল্পঃ স্যাৎ দ্বয়োরপ্যতিদেশনিষেধবিধ্যোঃ শাস্ত্রত্বেন তুল্যবলত্বাদিত্যর্থঃ। বস্তুতো ন তত্র বিকল্পঃ কিন্তু নিষেধাদতিদেশস্য বাধ এব সামান্যাতিদেশস্যান্যত্র চরিতার্থত্বেন দুর্ব্বলত্বাৎ বিশেষনিষেধস্য চানন্যথাসিদ্ধত্বেন বলবত্ত্বাদিতি ভাবঃ। প্রতিবন্ধ্যন্তরমাহ ব্রীহিপ্রাপ্ত্যুপজীব্যত্বাদিতি। নীবারবিধিনা ব্রীহিবাধার্থং ব্রাহিপ্রাপ্তেরপেক্ষণাৎ অতএব শরময়বর্হির্ভবতীতি বৈকৃতবিশেষোপদেশেনাতিদেশপ্রাপ্তপ্রকৃতিধর্ম্মস্য কুশময়বর্হির্বাধ ইত্যুক্তং অন্যথা বিশেষবিধ্যতিদেশপ্রাপ্তয়োর্ব্রীহিকরণকনীবারকরণকপুরোডাশয়োঃ সমুচ্চয়াপত্তেরিতি ভাবঃ। বস্তুতো নাত্রাপি বিকল্পঃ কিন্তু উক্তযুক্ত্যাঽতিদেশস্য প্রাপ্তে ব্রীহিভিঃ পুরোডাশং কুর্ব্বীতেতি প্রকৃতৌ শ্রূয়তে বিকৃতৌ যাগবিশেষে সামান্যতোঽতিদেশাৎ প্রাপ্তে ব্রীহিকরণকপুরোডাশে নীবারৈঃ পুরোডাশং কুর্ব্বীতেতি বিকৃতিগতবিশেষাভিধানেন ব্রীহিস্থানে নীবারবিধানাৎ ব্রীহিনিবারযোর্বিকল্পঃ স্যাদিত্যথঃ। বাধ এবেতি ভাবঃ। এবঞ্চ উপজীব্যত্বান্ন নিমিত্তং বিধিরপবাধতে ইতি ন্যায়াৎ দ্বয়োরপি বিধিনিষেধয়োর্নিরবকাশস্থলে ষোড়শিগ্রহণাগ্রহণাদাবেতি হৃদয়ম্। অতো ন বিকল্পঃ নিষেধবিধৌ চোপজীব্য বাধাপত্তেঃ। পর্য্যুদাসলক্ষণৈব ইতি স্থিতম্। নিষেধবাদী পুনরাহ অথেতি। যথা ন কলঞ্জং ভক্ষয়েদিত্যনেন কলঞ্জভক্ষণে রাগস্য সর্ব্বদা বাধঃ রাগস্য শাস্ত্রাপেক্ষয়া দুর্ব্বলত্বাৎ। যথা চ ন তৌ পশৌ করোতীতি বিশেষবিধিনাঽনন্যথাসিদ্ধত্বেন বলীয়সা অতিদেশস্য সর্ব্বদা বাধঃ তস্যাঙ্গান্তরে চরিতার্থত্বেন দুর্ব্বলত্বাৎ। তথা সামান্যশাস্ত্রস্য দিবাভাগমাদায় অন্যথাসিদ্ধত্বেন দুর্ব্বলতয়া

মতিদেশবৎ রাগাচ্চান্যথাসিদ্ধত্বেন দুর্ব্বলত্বাৎ সামান্য-শাস্ত্রস্য নিষেধবিধিনানন্যথাসিদ্ধত্বেন বলীয়সা বাধ এব ভবতু ন লক্ষণা ন বা বিকল্পঃ ॥ ৮৪ ॥

অতএব নাপ্রামাণ্যং তদ্বদেবৈকদেশপ্রামাণ্যাৎ। নিমিত্তবাধোঽপি তদ্বদেবাঙ্গীকরণীয়ঃ। গ্রহণাগ্রহণয়োস্তু

নিষেধবিধিনাঽনন্যথাসিদ্ধেন বলীয়সা বাধ এব ভবতু ন লক্ষণা মুখ্যত্বে বাধকাভাবাৎ ন বিকল্পোঽতুল্যবলত্বাদিত্যর্থঃ। নম্বেবং সামান্যশাস্ত্রস্য বাধিতত্বেনাপ্রামাণ্যপ্রসঙ্গ ইত্যত আহ অতএবেতি। অন্যথাসিদ্ধত্বা-দেবেত্যর্থঃ। অন্যথাসিদ্ধত্বং দর্শয়তি তদ্বদেবেতি। অতিদেশবদেবে-ত্যর্থঃ। একদেশেতি। দিবাভাগ ইত্যর্থঃ। তথাচ যথা ন তৌ পশৌ করোতীতি বিশেষবিধিনা অতিদেশস্য পশুযাগে বাধেঽপি যাগান্তরে প্রামাণ্যাৎ প্রামাণ্যং তথা নিষেধবিধিনা রাত্রৌ সামান্যশাস্ত্রস্য বাধেঽপি দিবাভাগে প্রামাণ্যাৎ প্রামাণ্যমিত্যর্থঃ। নম্বেবং উপজীব্য বাধা-পত্তিরত আহ নিমিত্তবাধোঽপীতি। তদ্বদেব রাগাতিদেশবদেবাঙ্গী-করণীয় ইতি। তথাচ নিষেধস্য উপজীব্যবাধকত্বস্বাভাব্যান্নায়ং দোষ ইতি ভাবঃ। নম্বেবং সর্ব্বত্রৈবংক্রমেণ নিষেধেন বিধের্বাধে বিক-ল্পোচ্ছেদ ইত্যত আহ গ্রহণাগ্রহণয়োস্ত্বিতি। ষোড়শিগ্রহণাগ্রহণয়ো-রিত্যর্থঃ। বিশেষবচনত্বাদিতি। অনন্যথাসিদ্ধত্বেনেতি শেষঃ। তথাচ সামান্যবিধেরেব বিশেষনিষেধেন সর্ব্বদা বাধঃ অংশান্তরে প্রামাণ্য-সম্ভবাৎ। বিধের্নিষেধবিষয়াতিরিক্তবিষয়ত্বাভাবে তু সর্ব্বদা তদ্বাধে তদপ্রামাণ্যাপত্ত্যা পক্ষতো বাধ এব তেন ন বিকল্পোচ্ছেদ ইত্যর্থঃ ॥৮৪॥

বলীয়সা নিমিত্তবাধে লৌকিকং দৃষ্টান্তমাহ অতএবেতি। বলীয়সা নিমিত্তবাধস্যেষ্টত্বাদেবেত্যর্থঃ। নেদং রজতমিতি জ্ঞানেনেতি। অত্র জ্ঞানপদং জ্ঞায়তেঽনেনেতি করণব্যুৎপত্ত্যা জ্ঞাপকশব্দপরং তথাচ শুক্তৌ ইদং রজতমিতি ভ্রান্তিজ্ঞাপনানন্তরং তন্মূলকেন বিশেষ-দর্শনবশাৎ জায়মানেন নেদং রজতমিতি শব্দেন অন্যথাসিদ্ধত্বেন

দ্বয়োরেব বিশেষবচনত্বাৎ পক্ষতো বাধঃ। অতএবেদং রজতমিতি ভ্রান্তিজ্ঞানং নিমিত্তভূতমপি নেদং রজতমিতি জ্ঞানেন বাধ্যতে। বাধশ্চ জ্ঞানস্য সংসর্গবিষয়ত্বাভাবঃ। পূর্ব্বজ্ঞানস্য সংসর্গাবিষয়ত্বে কথমপ্রাপ্তপ্রাপকত্বং বিধিত্বম্। তদ্ধি তদ্বাধতে যদ্বাধেন স্বয়মবাধিতং ভবতীতি চেন্ন তদ্বিধি-

বলীয়সা স্বনিমিত্তভূতমপি ভ্রান্তিজ্ঞানং বাধ্যতে স্বজন্যেন নেদং রজতমিতি জ্ঞানরূপেণ বাধেন বাধিতং ক্রিয়তে যথেত্যর্থঃ। কেচিৎ তু শুক্তৌ ইদং রজতমিতি জ্ঞানমুপজীব্যোৎপন্নেন নেদং রজতমিতি জ্ঞানেন প্রমাণসিদ্ধত্বেন বলীয়সা নিমিত্তভূতমপি পূর্ব্বজ্ঞানং যথা বাধ্যতে ইত্যর্থ ইত্যাহুঃ। তদসৎ জ্ঞানপদস্য জ্ঞানার্থকত্বে তাদৃশজ্ঞানস্যৈব বাধরূপতয়া তৃতীয়ার্থানন্বয়াপত্তেঃ। নন্নু সামান্যজ্ঞানস্যামাবাস্যাত্বেন রাত্রৌ শ্রাদ্ধাবগাহিনঃ কথং রাত্রিত্বেন শ্রাদ্ধাভাবাবগাহি নিষেধজ্ঞানং বাধঃ ভিন্নপ্রকরণাৎ অত আহ বাধশ্চেতি। চো হেতৌ জ্ঞানস্য নিষেধজ্ঞানস্য সংসর্গবিষয়ত্বাভাবঃ নঞো ব্যত্যাসেন সংসর্গাভাববিষয়কত্বং তথাচ যতো নিষেধজ্ঞানস্য রাত্রৌ শ্রাদ্ধসংসর্গাভাববিষয়কত্বং অতো নিষেধজ্ঞানং সামান্যজ্ঞানস্য বাধ ইত্যর্থঃ তেন যজ্জ্ঞানং যত্র যদবগাহি তত্র তদভাবাবগাহি জ্ঞানমেব তদ্বাধো ন তু সমানপ্রকারতাপি তত্রাপেক্ষণীয়েতি ভাবঃ। নন্নু সামান্যজ্ঞানং ন রাত্রৌ শ্রাদ্ধসংসর্গাবগাহি তথাত্বে সামান্যশাস্ত্রস্য তদংশেঽপ্রামাণ্যাপত্তেঃ। তথাচ রাত্রৌ শ্রাদ্ধস্য প্রাপকাভাবাদেব নিষেধস্য স্বতঃসিদ্ধতয়া নিষেধবিধির্নাপ্রাপ্তপ্রাপকত্বরূপবিধিত্বসম্ভব ইত্যাশঙ্কতে পূর্ব্বজ্ঞানস্যেতি। সামান্যজ্ঞানস্যেত্যর্থঃ। সংসর্গবিষয়ত্বে বিধেরপ্রামাণ্যাপত্তিভিয়া রাত্রৌ শ্রাদ্ধসংসর্গবিষয়ত্বাভাবে বিধিত্বং নিষেধস্যেতি শেষঃ। এবং স্থিতে সামান্যজ্ঞানস্য বাধোঽপি দুর্ঘট ইত্যাহ তদ্ধীতি। তদেবেত্যর্থঃ। যদ্বাধেন যদ্বাধেনৈব প্রকৃতে তু সামান্যজ্ঞানস্য রাত্রৌ শ্রাদ্ধসংসর্গানবগাহিতয়া নিষেধেন তদ্বাধাসম্ভবাৎ তদবাধেনৈব নিষেধজ্ঞানমবাধিতং ভবৎ

ত্বমনপেক্ষ্যাপ্রাপ্তেঃ। উচ্যতে। নিমিত্তস্যৈবোপজীব্যত্বেন বলবত্ত্বাৎ পর্য্যুদাসেনাপ্যুপপত্তেঃ। অন্যথাসিদ্ধেশ্চোভয়ত্র সমানত্বাৎ। অতো নিমিত্তবিরোধাদেব নৈমিত্তিকমুখ্যার্থনিষেধবিধানুপপত্তেঃ পর্য্যুদাসলক্ষণা যুক্তা ॥ ৮৫ ॥

কথং তদ্বাধ ইত্যর্থঃ। কেচিৎ তু প্রকৃতস্থলে বাধ এব ন ঘটতে ইত্যাশঙ্কতে বাধশ্চেতি। প্রাগুৎপন্নজ্ঞানস্য ধর্ম্মিণি সংসর্গবিষয়ত্বস্য উত্তরজ্ঞানেন নিরাসো বাধ ইতি তল্লক্ষণং ততশ্চ প্রকৃতে অমাবাস্যাশাস্ত্রে প্রাগুৎপন্নস্য রাত্রিজ্ঞানস্য সংসর্গাবিষয়ত্বে কথং নিষেধস্যাপ্রাপ্তপ্রাপকত্বং বিধিত্বং রাত্রৌ শ্রাদ্ধবিধানাভাবেন নিষেধস্য স্বতঃসিদ্ধত্বাৎ তদ্বিধানাসম্ভবাৎ অতো বাধো ন ঘটত এব। এতদেব বিবৃণোতি তদ্ধীতি। উপজীব্যরাত্রিজ্ঞানবাধে স্বস্যাপি বিধিত্বং ব্যাহতং ভবেদিত্যর্থঃ ইতি ব্যাচক্রুঃ। তদ্বিধিত্বমিতি। নিষেধস্য বিধিত্বমনপেক্ষ্য নিষেধবিধিং বিনাঽপ্রাপ্তেঃ রাত্রৌ শ্রাদ্ধাভাবস্যাপ্রাপ্তেস্তেনায়মর্থঃ। যদি নিষেধবিধির্ন স্যাৎ তদা বাধকাভাবাৎ সামান্যজ্ঞানং রাত্রাবপি শ্রাদ্ধসংসর্গাবগাহি ভবেৎ। তথাচ সতি রাত্রৌ শ্রাদ্ধাভাবোঽপ্রাপ্ত এবেতি তৎপ্রাপকনিষেধো বিধিরেব নিষেধবিধ্যধীনবাধবলাদেব সামান্যজ্ঞানস্য রাত্রৌ শ্রাদ্ধসংসর্গাবগাহিত্বাভাবসিদ্ধ্যা তত্র শ্রাদ্ধাভাবপ্রাপ্তেরিতি। ইত্থঞ্চ নিষেধদর্শনাৎ প্রাক্ বিশেষতাৎপর্য্যগ্রহাভাবাৎ সামান্যশাস্ত্রজনিতং যদ্দিবারাত্রিসাধারণীয়ামাবাস্যাত্বেন রাত্রৌ শ্রাদ্ধজ্ঞানং তদ্ভ্রমরূপমেব ন বৈদিকব্যবহারাঙ্গং তদিত্যভিপ্রায়ঃ। এতাবতাপি রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীতেতি নিষেধবিধিরেব তস্য চানন্যথাসিদ্ধত্বেন বলবত্ত্বাদুপজীব্য সামান্যশাস্ত্রস্য বাধ ইতি স্থিতে পূর্ব্বপক্ষে সিদ্ধান্তয়তি উচ্যতে ইতি। ননু নিষেধেন নিমিত্তং বাধ্যত এবান্যথা নিষেধ এব উচ্ছিদ্যেত সর্ব্বত্রোপজীব্যবাধস্য দুষ্পরীহারত্বাৎ। অতো নোপজীব্যত্বেন বলবত্ত্বম্। কিঞ্চ সামান্যশাস্ত্রং সাবকাশতয়া দিবা চাপি চরিতার্থত্বেন দুর্ব্বলত্বং নিষেধবিধিঃ পুনরন্যথাসিদ্ধত্বেন বলবান্ সাবকাশনিরব-

অগত্যা হি রাগাতিদেশয়োর্বাধঃ পর্য্যুদাসাসম্ভ-বাৎ পর্য্যুদস্তেতরপ্রতিপাদকবচনান্তরাভাবাৎ। অতএব নাতিরাত্রবাক্যে ন পর্য্যুদাসবিধিঃ। অতএব দীক্ষিতো ন দদাতি অহরহর্দদ্যাদিতি দীক্ষিতেতরপরত্বং যজতিষু

---

কাশয়োর্নিরবকাশবিধির্বলবানিতি ন্যায়াৎ। অতঃ সামান্যশাস্ত্রস্য নিষেধেন বাধ এব যুক্ত ইত্যত আহ পর্য্যুদাসত্বেনাপীতি। যথা সামান্য-শাস্ত্রং দিবাংশমাদায়ান্যথাসিদ্ধং তথা রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীত ইতি নিষেধশাস্ত্রমপি পর্য্যুদাসেনাপ্যুপপত্তেরন্যথাসিদ্ধম্। অতোঽন্যথা-সিদ্ধয়োভয়ত্র সমানত্বান্নিমিত্তবিধেরুপজীব্যত্বেন তদ্বিরোধাদেব নৈমিত্তিকস্য নিষেধস্য মুখ্যার্থপরত্বস্যান্যায্যতয়া পর্য্যুদাসলক্ষণৈব যুক্তেত্যর্থঃ॥ ৮৫॥

নন্থ যদ্যুপজীব্য বাধপরীহারায় লক্ষণা যুক্তা তৎ কথং রাগাতিদেশস্থলে উপজীব্যবাধমঙ্গীকরোষি তত্রাপি লক্ষণৈবাস্তু। অত আহাগত্যেতি। গত্য-ভাবে হেতুমাহ পর্য্যুদাসাসম্ভবাদিতি। অসম্ভবে হেতুমাহ পর্য্যুদস্তেত-রেতি পর্য্যুদস্তেতরপ্রতিপাদকস্য সামান্যবিধেরভাবাদিত্যর্থঃ। তথা-চায়মর্থঃ। রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীতেত্যত্র পর্য্যুদাসাশ্রয়ণেঽমাবাস্যাং পিতৃভ্যো দদ্যাদিতি সামান্যশাস্ত্রোক্তামাবাস্যায়াং রাত্রীতরত্ববিশেষণম-প্রাপ্তং নিষেধবাক্যেন জ্ঞাপ্যতে ন তু পৃথগ্বিধিঃ কিন্তু রাত্রিভিন্নায়মমাবা-স্যায়াং শ্রাদ্ধং কুর্য্যাদিত্যেক এব বিধিঃ পর্য্যবস্যতি। প্রকৃতে চ তথা ন সম্ভবতি রাগস্থলে সামান্যশাস্ত্রস্যৈবাভাবাৎ। কুত্র তদিতরত্ববিশেষণং ন তৌ পশৌ করোতীতি অতিদেশবিষয়ে তু পর্য্যুদাসপক্ষে তদুভয়েতরৎ পশৌ করোতীত্যেবংরূপো বা পশুযাগেতরএতৌ করোতীত্যেবংরূপো বা পর্য্যুদাসো বাচ্যঃ প্রকারান্তরস্যাসম্ভবাৎ। উভয়থৈব হি ন বিধিত্বসম্ভবঃ। আদ্যে পশুযাগে তদুভয়েতরস্য প্রকৃতিবিকৃতিন্যায়েন প্রাপ্তত্বাৎ তদু-ভয়োরপি পশুযাগে করণপ্রসঙ্গাচ্চ। দ্বিতীয়ে চ পশুযাগেতরত্র তদু-

যে যজামহং কুর্য্যান্নানুযাজেম্বিতি। অনুযাজেতরযজতি-পরত্বম্। অতএব উপাত্রবপন্তি ন বৈশ্বদেবে উত্তরবেদি-মুপকিরন্তি ন শুনাসীর্য্য ইতি। বৈশ্বদেবশুনাসীর্য্যেতরপর্ব্ব-

ভয়করণস্যাঙ্গবিধিতোঽহতিদেশবলেন বা প্রাপ্তত্বাৎ উক্ত ক্রমেণ পশুযাগে তদুভয়করণপ্রসঙ্গাচ্চ ইতি পর্য্যুদাসাসম্ভবাৎ অগত্যা তত্র নিষেধবিধে-রাবশ্যকত্বেন রাগাতিদেশয়োর্বাধ এবেতি। ননু তথাপি রাত্রৌ শ্রাদ্ধং ন কুর্ব্বীতেতি নিষেধবিধিরেব যুক্তঃ। অন্যথা পর্য্যুদাসেন সামান্যশাস্ত্রেণ একবাক্যতাভ্যুপগমে একক্রিয়াবৈয়র্থ্যাপত্তিরিতি বাচ্যম্। যথা চৈত্রঃ পচতীত্যত্র তিঙসুবেকবচনয়োরেকত্বপ্রতিপাদকয়োর্যথা চ করোতীত্যত্র ধাতুতিঙোঃ কৃতিপ্রতিপাদকয়োঃ সম্ভেদেনান্যতরবৈয়র্থ্যং তথা প্রকৃতে-ঽপি সম্ভবাৎ। অতএব পর্য্যুদস্তেতরপ্রতিপাদকসামান্যবিধ্যভাবাদেব নাতিরাত্রবাক্যে নাতিরাত্রে ষোড়শিনং গৃহ্লাতীতি বাক্যে ন পর্য্যুদাসঃ কিন্তু নিষেধেন বিকল্প এবেত্যর্থঃ। অতএবেতি। পর্য্যুদাসেন গতিসম্ভবে নিমিত্তবাধস্যান্যায্যত্বাদেব অহরহর্দদ্যাদিতি সামান্যবিধাবাখ্যাতোপস্থিত-কর্ত্তরি দীক্ষিতো ন দদাতীত্যত্র দীক্ষিতেতরপরতামাত্রং সর্ব্বত্র নিমিত্ত-বিরোধাদেব সিদ্ধমিত্যগ্রিমেণান্বয়ঃ ন তু নিষেধবিধিত্বমিত্যর্থঃ। উপেতি। অত্র বৈশ্বদেববরুণপ্রঘাসশাকমেধশুনাসীর্য্যাখ্যাশ্চত্বারো যাগাশ্চতুর্মা-সসাধ্যাঃ পর্ব্বসংজ্ঞকাঃ। তানুপক্রম্য শ্রুতিঃ উপাত্রবপন্তি ন বৈশ্বদেবে উত্তরবেদিমুপকিরন্তি ন শুনাসীর্য্যে উরু বা এতৌ যজ্ঞস্য যদ্বরুণপ্রঘাসঃ শাকমেধশ্চেতি দ্বয়োঃ প্রণয়ন্তীতি শ্রুতেশ্চায়মর্থঃ। অত্র পর্ব্বাখ্যযাগে উত্তরবেদিমগ্নিপ্রণয়নস্যোপযোগিপাত্রবিশেষং উপবপন্তি নির্ম্মান্তি ন বৈশ্বদেবে ন শুনাসীর্য্যে উত্তরবেদিং উপকিরন্তি কুর্ব্বন্তি বরুণপ্রঘাসঃ শাকমেধশ্চৈতৌ যজ্ঞস্য যজ্ঞানাং মধ্যে উরূ মহান্তাবিতি অত্র উত্তরবেদি-বিধায়কসামান্যবিধিপ্রাপ্তপর্ব্বাখ্যযাগে ন বৈশ্বদেবে ন শুনাসীর্য্যে ইত্যে-তয়োর্বৈশ্বদেবশুনাসীর্য্যেতরপরত্বং ন তু নিষেধবিধিত্বং নিমিত্তবিরোধা-দেব সিদ্ধমিত্যর্থঃ। যদি তু নঞো নিষেধে মুখ্যত্বান্নিষেধবিধিঃ স্যাৎ

দ্বয়পরত্বং সর্ব্বত্র নিমিত্তবিরোধাদেবেতি সিদ্ধম্। অন্যে তু বিকল্পপক্ষে সকৃদুচ্চরিতস্য সামান্যশাস্ত্রস্য নিত্যানিত্যবিধানে বৈষম্যাপত্তিরিতি বদন্তি ॥ ৮৬ ॥

অথ মলমাসঃ। গৃহ্যপরিশিষ্টম্। মলিম্লুচস্তু মাসো বৈ মলিনঃ পাপসম্ভবঃ। গর্হিতঃ পিতৃদেবেভ্যঃ

তদা সর্ব্বত্রোপজীব্যস্য সামান্যবিধের্ব্বাধঃ স্যাৎ। অতঃ পর্য্যুদাসলক্ষণৈব ইতি সিদ্ধান্তিতমিতি। ইত্থঞ্চ ন্যায়প্রাপ্তমেবার্থং শ্রুতিরনুবদিতি দ্বয়োঃ প্রণয়ন্তীতি। দ্বয়োর্ব্বরুণপ্রঘাসশাকমেধয়োরুত্তরবেদিং প্রণয়ন্তি ইত্যেতস্যার্থঃ। এতৎ সর্ব্বং দ্বয়োঃ প্রণয়ন্তীত্যধিকরণবিচারে বিবৃতম্। অন্যে ত্বিতি। বিকল্পপক্ষে রাত্রৌ শ্রাদ্ধং কুর্য্যান্ন কুর্য্যাদিতি বিকল্পপক্ষে সামান্যশাস্ত্রস্য দিবা নিত্যং কুর্য্যাৎ রাত্রৌ কুর্য্যান্ন কুর্য্যাদিতি বাক্যভেদাদ্বিধিবৈষম্যাপত্তিরতো ন বিকল্পঃ কিন্তু পর্য্যুদাস এবেতি বদন্তীত্যর্থঃ। অত্র পূর্ব্বোক্তযুক্ত্যা সামান্যবিশেষয়োর্ব্বিকল্পস্যৈবাসম্ভবাৎ কুতো বিধিবৈষম্যপ্রসক্তিরিত্যস্বরসো বদন্তীত্যনেন সূচিতঃ। বস্তুতস্তু সামান্যবিধের্যদি দিবা রাত্রাবপি তাৎপর্য্যমস্তি তদা বচনশতস্যাপি বিধেস্তাৎপর্য্যবাধাক্ষমত্বাদ্বিকল্পে সিদ্ধে বিধিবৈষম্যং সিদ্ধমেব স্যাৎ। নাস্তি চেৎ তদা রাত্রৌ শ্রাদ্ধস্য প্রাপকাভাবাদেবাভাবস্য প্রাপ্ততয়া নিষেধস্য বিধিত্বাসম্ভবাৎ সামান্যবিধেস্তাৎপর্য্যগ্রাহকমাত্রতয়া পর্য্যুদাস এবেতি তত্ত্বম্ ॥ ৮৬ ॥

অথ মলমাসঃ। ষষ্টিভাগং ষষ্টিতমভাগং একমহশ্ছেদমেকতিথ্যাকর্ষণং এতচ্চ প্রায়িকং গতের্মন্দত্বামন্দত্বাভ্যাং অহ্নঃ কিঞ্চিদধিকস্য কিঞ্চিন্ন্যূনস্য চাকর্ষণদর্শনাৎ। অতএব বিষ্ণুধর্ম্মোত্তরে। সৌরসংবৎসরস্যান্তে মানেন শশিজেন তু। একাদশাতিরিচ্যন্তে দিনানি ভৃগুনন্দন ॥ ইত্যনেন কিঞ্চিন্ন্যূন তিথ্যাকর্ষণবিষয়ে একাদশতিথিবৃদ্ধিরুক্তেতি। অর্দ্ধতৃতীয়ানামিতি। অর্দ্ধং তৃতীয়ং যেষামিতি ব্যুৎপত্ত্যা মাসষট্কাধিকাব্দদ্বয়ানন্তরমিত্যর্থঃ। বহুবচনন্তু মলমাসানেকত্বাপেক্ষয়েতি। ঔচিত্য-

সর্ব্বকর্ম্মসু তং ত্যজেৎ॥ মলিনঃ সকলকালমলত্বাৎ। তথাচোক্তম্। মলং বদন্তি কালস্য মাসং কালবিদোঽধিকম্। পাপসম্ভব ইতি নিন্দার্থম্। সর্ব্বকর্ম্মসু মলমাসবিহিতেতরদৈবপিত্র্যকর্ম্মসু। মলমাসবীজঞ্চ জ্যোতিঃশাস্ত্রে উক্তম্। দিবসস্য হরত্যর্কঃ ষষ্টিভাগ-

প্রাপ্তমিতি। ইদং মাসষট্কাধিকাব্দদ্বয়ানন্তরং মলমাসাভিধানম্। ন্যূনাধিকদর্শনাদিতি। তিথিবৃদ্ধাবধিকদণ্ডতিথীনাং বাহুল্যে দণ্ডৈকাদধিককালস্যাকর্ষণাদুক্তকালান্ন্যূনকালেন তিথিহ্রাসে স্বল্পদণ্ডতিথীনাং বাহুল্যে দণ্ডৈকাদল্পতরভাগাকর্ষণাদুক্তকালাদধিককালেন মলমাসদর্শনাদিত্যর্থঃ। মাধবাদিষট্ক ইতি। মাধবাদিষু ষট্কেষু মাসি দর্শদ্বয়ং যদেত্যাদিবচনৈকবাক্যতয়া গ্রীষ্মপদস্যাজহৎস্বার্থলক্ষণয়া মাধবাদিষট্কপরত্বমিতি ভাবঃ। গ্রীষ্মে জনয়তঃ পূর্ব্বমিতি। অনাদৌ সংসারে পূর্ব্বাপরব্যবস্থায়া দুর্ল্লভত্বাৎ। অন্যথা ব্যাচষ্টে পূর্ব্বত্রিকপতিতমিতি। বৈশাখাদিত্রিকপতিতমিত্যর্থঃ। উত্তরত্রিকপতিতং শ্রাবণাদিত্রিকপতিতম্। পঞ্চাব্দান্তে ইতি। স্বরূপকথনমাত্রমব্যাবর্ত্তকত্বাদিতি বোধ্যম্। ইদঞ্চ মাধবাদিষট্কে মলমাসাভিধানং প্রায়িকং তুলাদিষট্কেঽপি মলমাসদর্শনাৎ চতুর্ব্বিংশত্যধিকচতুর্দ্দশশতশকাব্দে চৈত্রস্য মলমাসতয়া বৃত্তত্বাৎ তথা সপ্তনবত্যধিকত্রয়োদশশতশকাব্দে ফাল্গুনস্য ত্রিচত্বারিংশদধিকচতুর্দ্দশশতশকাব্দে কার্ত্তিকস্য মলমাসতয়া বৃত্তত্বাচ্চ। অতএব। প্রায়সো ন শুভঃ সৌম্যো জ্যৈষ্ঠশ্চাষাঢ়কস্তথা। মধ্যমৌ চৈত্রবৈশাখৌ অধিকোঽন্যঃ সুভিক্ষকৃৎ॥ ইতি শাণ্ডিল্যবচনম্। সৌম্যো মার্গশীর্ষঃ। অধিকো মলমাসঃ। অতএব চ। দশানাং ফাল্গুনাদীনাং প্রায়োমাঘস্য চ ক্বচিৎ। নপুংসকত্বং ভবতি ন পৌষস্য কদাচন॥ ইতি কাশ্যপবচনমপি। নপুংসকত্বং মলমাসত্বম্। অতএব কার্ত্তিকাদাবসংক্রান্তমাসো ভানুলঙ্ঘিত এব ন মলমাস ইত্যুপাধ্যায়মতমপাস্তম্। অত্রেদং

ষ্মৃতৌ ততঃ। করোত্যেকমহশ্ছেদং তথৈবৈকঞ্চ চন্দ্রমাঃ॥ এবমর্দ্ধতৃতীয়ানামব্দানামধিমাসকম্। গ্রীষ্মে জনয়তঃ পূর্ব্বং পঞ্চাব্দান্তে তু পশ্চিমম্॥ অস্যার্থঃ। দিবসস্য তিথেঃ ষষ্টিভাগং দণ্ডমেকং রবিঃ প্রতিদিনমাকর্ষতি। এতেন ঋতৌ মাসদ্বয়াত্মকে ষষ্ট্যহোরাত্রৈঃ ষষ্টিনাড্যা-

বিচার্য্যতে। রবিণা লঙ্ঘিতো মাসশ্চান্দ্রঃ খ্যাতো মলিম্লুচঃ। ইত্যাদি-বচনাৎ রবিসংক্রান্তিশূন্যচান্দ্রমাসো মলমাস ইতি তল্লক্ষণং নির্ণীয়তে। তত্র যদা আশ্বিনোঽসংক্রান্তো মাসস্তৎপরেষু তুলাদিষু ত্রিষু মধ্যে কদাচিৎ সূর্য্যস্য শীঘ্রগত্যা একস্মিন্নেব চান্দ্রমাসে সংক্রান্তিদ্বয়ে সতি স মাসঃ ক্ষয়াখ্যো ভূতঃ। ততশ্চ সূর্য্যস্য পুনর্ম্মন্দগত্যা চৈত্রাদাব-সংক্রান্তমাসান্তরং তদা ভবতি। তথাচোক্তম্। অসংক্রান্তো হি যো মাসঃ কদাচিত্তিথিবৃদ্ধিতঃ। কালান্তরাৎ সমায়াতি স নপুংসক ইষ্যতে॥ তথাচ জ্যোতিষম্। অসংক্রান্তমাসোঽধিমাসঃ স্ফুটঃ স্যাদ্দ্বিসংক্রান্তমাসঃ ক্ষয়াখ্যঃ কদাচিৎ। ক্ষয়ঃ কার্ত্তিকাদিত্রয়ে নান্যদা স্যাত্তদা বর্ষমধ্যেঽধি-মাসদ্বয়ং স্যাদিতি। এবঞ্চ একস্মিন্নব্দে যদা দ্বাবসংক্রান্তমাসৌ তদা কিং দ্বাবেব মলমাসৌ কিংবৈকঃ। তত্র পূর্ব্বঃ পরো বা ইতি সংশয়ঃ। অত্র কেচিৎ মাধবাদিষু ষট্‌কেষু ইত্যাদিবচনাৎ মাধবাদিষট্‌কপতিতস্যৈব মলমাসত্বং ন তু তুলাদিষট্‌কপতিতস্যেত্যাহুঃ। তদসঙ্গতং মাধবাদিষু ট্‌কেষ্বিতি বচনস্য প্রায়িকাভিপ্রায়কত্বাৎ। অন্যথা তুলাদিষট্‌কমধ্য এব অসংক্রান্তমাসদ্বয়পাতে কা গতিঃ একস্যাপি মাধবাদিষট্‌কপতিতত্বা-ভাবাৎ। কিঞ্চ যদা আশ্বিনোঽসংক্রান্তঃ ধন্বুষি ক্ষয়াখ্যস্তৎপরঞ্চ তস্মিন্নেবাব্দে মেষে পুনরসংক্রান্তস্তদা কিং স্যাৎ দ্বয়োরেব মাধবাদি-ষট্‌কপতিতত্বাৎ ন চ দিবসস্য হরত্যর্ক ইত্যুক্তনিমিত্তত্বেন ক্রমসঙ্কিত-ত্বাৎ। তত্র পূর্ব্বস্যৈব মলমাসত্বং ন পরস্যেতি বাচ্যং কার্য্যোৎপত্ত্যন্য-থানুপপত্ত্যা পরস্যাপি শাস্ত্রগম্যনিমিত্তস্যাবশ্যমন্বেষণীয়ত্বাৎ। অন্যে তু দ্বাবেব মলমাসৌ প্রাগুক্তলক্ষণাক্রান্তত্বাৎ কিন্তু পূর্ব্বস্য মলমাসত্বেঽপি

কর্ষণাত্তিথিরেকাকৃষ্যতে সূর্য্যেণ এবং চন্দ্রেণাপি তেন প্রত্যহন্তু দিনদ্বয়াকর্ষণাৎ বর্ষেণ দ্বাদশদিনানি লভ্যন্তে এবং সার্দ্ধবৎসরদ্বয়েনাধিমাসো নিষ্পাদ্যতে। গণনক্রমাদৌ-চিত্যপ্রাপ্তমিদং তিথিবৃদ্ধিহ্রাসাদিনা ন্যূনাধিকত্বদর্শনাৎ। ইদঞ্চ নিয়তং একস্মাদধিমাসাদারভ্য তৃতীয়বৎসরে মল-

বচনাৎ মলমাসনিষেধাবিষয়ত্বাৎ পরস্যৈব তন্নিষেধবিষয়ত্বম্। অতএব পরস্যৈব মলমাসত্বপুরস্কারেণ নিষেধানাং বিষয়ত্বার্থং মুনিবচনানি। যথা কালমাধবীয়ে জাবালিঃ। একস্মিন্নেব বর্ষে তু দ্বৌ মাসাবধিমাসকৌ। প্রকৃতস্তত্র পূর্ব্বঃ স্যাদধিমাসস্তথাপরঃ॥ তথা সত্যব্রতঃ। মাসদ্বয়েঽপি সংক্রান্তির্ন চ স্যাদংশুমালিনঃ। প্রকৃতস্তত্র পূর্ব্বঃ স্যাদধিমাসস্তথো-ত্তরঃ॥ তথা ভীমপরাক্রমে। একস্মিন্নেব বর্ষে লক্ষ্যৌ তন্মাসয়োরুভয়োঃ। তস্মিন্নপরোঽধিমাসঃ স্ফুটগত্যা ভবতি চার্কেন্দ্বোঃ॥ শাতাতপঃ। ত্রয়ো-দশস্ক শ্রুতিরাহ সাম্যং চতুর্দ্দশ ক্বাপি ন দৃষ্টপূর্ব্বঃ। একত্র মাসদ্বিতয়ং যদি স্যাদ্বর্ষেঽধিকস্তত্র পরোঽধিমাসঃ॥ ইত্যাদি। অতএব চ। অধি-মাসে দিনপাতে ধনুষি রবৌ ভানুলঙ্ঘিতে মাসি। চক্রিণি সুপ্তে কুর্য্যান্নো মাঙ্গল্যং বিবাহঞ্চ॥ ইত্যনেন দ্বাবসংক্রান্তমাসৌ অধিমাস-ভানুলঙ্ঘিতভেদেনোপাদায় ভানুলঙ্ঘিতে মাঙ্গল্যানি নিষিধ্য শ্রাদ্ধাদীনাং তত্র কর্ত্তব্যতোক্তা মলমাসে তু বচনান্তরাৎ শ্রাদ্ধাদীনামপি নিষেধ এব। যৎ তু। কার্ত্তিকাদিষু মাসেষু যদি স্যাতাং মলিম্লুচৌ। সর্ব্বকর্ম্মহরঃ প্রোক্তঃ পূর্ব্বস্তত্র মলিম্লুচঃ॥ ইতি বচনং পঠন্তি তৎ পারিজাতাদ্য-লিখিতত্বান্নির্ম্মূলমেব। বিশারদস্তত্রাপি পরস্তত্র মলিম্লুচঃ ইত্যেব পাঠ-মাহ। অতএব ভানুলঙ্ঘিতে মলমাসত্বপুরস্কারেণ নিষেধবিষয়ত্বাভাবাৎ। চূড়াং মৌঞ্জীবন্ধনঞ্চ অগ্ন্যাধেয়ং মহালয়ম্। রাজাভিষেকং কাম্যঞ্চ ন কুর্য্যাদ্ভানুলঙ্ঘিতে॥ চূড়াং মৌঞ্জীবন্ধনঞ্চ অগ্ন্যাধেয়ং মহালয়ম্। রাজা-ভিষেকং কাম্যঞ্চ মলমাসে বিবর্জ্জয়েৎ॥ ইতি কাঠকগৃহ্যেণ তত্র চূড়াদীনাং নিষেধঃ পৃথগুক্তঃ। ন চ উক্তবচনানাং পূর্ব্বস্য মলমাসত্বাভাববোধকত্বমেব

মাসো ভবতীতি। গ্রীষ্মে মাধবাদিষট্‌কে পূর্ব্বং পূর্ব্বত্রিক-পতিতং পঞ্চাব্দান্তে তু পশ্চিমমুত্তরত্রিকপতিতং অধি-মাসং জনয়তঃ চন্দ্রার্কৌ ॥ ৮৭ ॥

অত্র কো মাসশব্দার্থঃ চান্দ্রঃ সৌরো বা চান্দ্র এব

---

ন তু বিশেষতো ভানুলঙ্ঘিতানিষিদ্ধানাং মলমাসত্বপুরস্কারেণ নিষিদ্ধ-কর্ম্মণাং তত্র কর্ত্তব্যতাপরত্বমিতি বাচ্যম্। শাস্ত্রপ্রাপ্তমলমাসাভাবস্য বচনশতেনাপ্যন্যথা বোধয়িতুমশক্যত্বাদিতি সমাদধিরে। স্মার্ত্তাস্তু একাব্দীয়াবসংক্রান্তমাসৌ দ্বৌ ন মলমাসৌ কিন্ত্বেকো মলমাসঃ পরশ্চ ভানুলঙ্ঘিতঃ। তত্র একস্য মাধবাদিষট্‌কপতিতত্বে দ্বিতীয়স্য চ তুলাদিষট্‌কপতিতত্বে মাধবাদিষট্‌কপতিতস্যৈব মলমাসত্বং মাধবাদিষু ষট্‌কেষু ইত্যাদিবচনাৎ। তুলাদিষট্‌কপতিতস্তু ভানু-লঙ্ঘিতঃ ঔৎসর্গিককালাতিক্রমেণ ঔৎপাতিকত্বাৎ। যদা তু কন্যায়া-মেকোঽপরশ্চ তদুত্তরং মেষস্থরবৌ তত্র মেষস্থরবাবেব মলমাসো ন কন্যাস্থে। ধটকন্যাগতে সূর্য্যে বৃশ্চিকে বাথ ধন্বিনি। মকরে বাথ কুম্ভে বা নাধিমাসং বিদুর্বুধাঃ॥ ইতি জ্যোতিঃসিদ্ধান্তবচনেনাস্মিন্নেব বিষয়ে কন্যায়াং মলমাসনিষেধাৎ পরস্য মলিম্লুচত্ববোধকানাং উক্তজাবা-ল্যাদিবচনানামপ্যেতদ্বিষয়ত্বাচ্চ। যদা পুনস্তুলাদিষট্‌ক এব দ্বয়োঃ সন্নিপাতস্তদা পূর্ব্বো মলমাসঃ ন পরঃ। কার্ত্তিকাদিষু মাসেষু যদি স্যাতাং মলিম্লুচৌ। সর্ব্বকার্য্যাহরঃ প্রোক্তঃ পূর্ব্বস্তত্র মলিম্লুচঃ॥ ইতি জ্যোতিঃ-পরাশরবচনাৎ। অতএব ভানুলঙ্ঘিতমলমাসয়োর্ভেদাৎ উক্তকাঠক-গৃহ্যবচনাভ্যাং চূড়ামণৌ তয়োঃ পৃথক্ নিষেধ উক্তঃ। ন চৈবং মলমাস-লক্ষণস্য ভানুলঙ্ঘিতেঽতিব্যাপ্তিঃ মলমাসসাম্যত্বেন শাস্ত্রাগম্যত্বে সতীতি তত্র বিশেষণীয়ত্বাৎ। পরস্তত্র মলিম্লুচঃ পূর্ব্বস্তত্র মলিম্লুচ ইত্যাদিলিখিতবচনৈঃ পূর্ব্বস্য পরস্য বা ভানুলঙ্ঘিতরূপস্য যথাযোগং মলমাসান্যত্বাবগমাদিতি ব্যাচক্রুঃ॥ ৮৭ ॥

অত্রেতি। নিরূপণীয়ে মলমাসে ইত্যর্থঃ। মাসশব্দার্থনিরূপণে সত্যেব

বা কীদৃশঃ অত্র কো বা মলমাস ইত্যাহ লঘুহারীতঃ। ইন্দ্রাগ্নী যত্র হূয়েতে মাসাদিঃ স প্রকীর্ত্তিতঃ। অগ্নীষোমৌ স্মৃতৌ মধ্যে সমাপ্তৌ পিতৃসোমকৌ॥ তমতিক্রম্য তু রবির্যদা গচ্ছেৎ কথঞ্চন। আদ্যো মলিম্লুচো জ্ঞেয়ো দ্বিতীয়ঃ প্রকৃতঃ স্মৃতঃ॥ তস্মিংস্তু প্রকৃতে মাসি কুর্য্যাৎ শ্রাদ্ধং যথাবিধি। তথৈবাভ্যুদয়ং কার্য্যং নিত্যমেকং হি সর্ব্বদা॥ শুক্লপ্রতিপদি ইন্দ্রাগ্নিযাগঃ কৃষ্ণপ্রতিপদি অগ্নীষোমযাগঃ। এতৌ দর্শপৌর্ণমাসান্তর্গতৌ পিতৃবিশিষ্টসোমদৈবতোঽগ্নৌকরণহোমঃ। পিণ্ডপিতৃযজ্ঞাঙ্গভূতো দর্শে বিহিতঃ মাসাদিঃ সমাপ্তাবিতি কীর্ত্তনাৎ। শুক্লপ্রতিপদাদিদর্শান্তো মাসশব্দার্থঃ চান্দ্রোঽপ্যয়মেবেতি দর্শিতম্। তথাচ ব্রহ্মসিদ্ধান্তঃ। চান্দ্রঃ শুক্লাদিদর্শান্তঃ সাবনস্ত্রিংশতা দিনৈঃ। একরাশৌ রবির্যাবৎকালং মাসঃ স ভাস্করঃ॥ শুক্লাদিঃ শুক্লপ্রতিপদাদিরিত্যর্থঃ পক্ষবাচিত্বাৎ শুক্লশব্দস্য। যৎ তু জ্যোতিষম্। দর্শাদ্দর্শান্তশ্চান্দ্রস্ত্রিংশদ্দিবসস্তু সাবনো মাসঃ। রবি-

উদ্ঘাটিতমলমাসনিরূপণসত্ত্ববাদাদৌ মাসশব্দার্থনিরূপণার্থং পৃচ্ছতি কো মাসশব্দার্থ ইতি। চান্দ্রঃ সৌরো বেতি। সাবননাক্ষত্রয়োরপ্যুপলক্ষণম্। চান্দ্র এব বেতি প্রশ্নান্তরং চান্দ্রপদবাচ্যঃ কীদৃশঃ দর্শান্তঃ পৌর্ণমাস্যন্তো বেত্যর্থঃ। কো বা মলমাস ইতি। চাপরঃ প্রশ্নঃ। তত্র হারীতবচনমুত্তরয়তি হারীত ইতি ব্যাচষ্টে শুক্লপ্রতিপদীতি। ইন্দ্রাগ্নিযাগ ইন্দ্রদেবতাকোঽগ্নিদেবতাকশ্চ দ্বিবিধোদর্শাখ্যযাগঃ। অগ্নিষোমেতি। অগ্নীষোমোভয়দেবতাকঃ পৌর্ণমাসাখ্যযাগ ইত্যর্থঃ। শুক্লপ্রতিপদাদীতি। উক্তবচনস্য আপ্তবাক্যবিধয়া শক্তিগ্রাহকত্বাৎ। শুক্লপ্রতিপদাদিদর্শান্তো মাসশব্দশক্য

সংক্রান্তিচিহ্নঃ সৌরোঽপি নিগদ্যতে তজ্জ্ঞৈঃ॥ তত্র দর্শাদিত্যবধৌ পঞ্চমী তেন শুক্লপ্রতিপদাদিরেব তিথিপ্রচয়ো লভ্যতে। অত্র বদন্তি। অমাবাস্যাপরিচ্ছিন্নং রবিসংক্রান্তিবর্জ্জিতম্। মলমাসং বিজানীয়াৎ গর্হিতং সর্ব্বকর্ম্মসু। তস্যার্কো দর্শকশ্চৈকরাশৌ দর্শদ্বয়াতিগঃ॥ ইতি। অমাবাস্যাদ্বয়ং যত্র রবিসংক্রান্তিবর্জ্জিতম্। মলমাসঃ স বিজ্ঞেয়ো বিষ্ণুঃ স্বপিতি কর্কটে॥ ইতি জ্যোতিঃশাস্ত্রদর্শনাৎ। দর্শাদিশ্চান্দ্রঃ দর্শাদিত্বে হি তল্লঙ্ঘনে মলমাসো ভবতি॥ ৮৮॥

অন্যথা প্রতিপল্লঙ্ঘনমেবোচ্যতে। কিঞ্চামাবাস্যায়ামমাবাস্যয়া যজেত ইতি শ্রুত্যা দর্শস্য দর্শযাগাঙ্গতয়া

ইত্যর্থঃ। তমতিক্রম্যেত্যস্য রবিণা লঙ্ঘিতো মাসশ্চান্দ্রঃ খ্যাতো মলিম্লুচ ইত্যাদিবচনৈকবাক্যতয়া শুক্লপ্রতিপদাদেরেব চান্দ্রপ্রতিপাদকত্বাদিতি ভাবঃ। এতেন প্রাথমিকপ্রশ্নস্যোত্তরং সিদ্ধম্। দ্বিতীয়প্রশ্নে উত্তরমাহ চান্দ্রোঽপ্যয়মেব ইতি। চান্দ্রশব্দশক্যোঽপ্যয়মেব দর্শান্ত এবেত্যর্থঃ। অত্র সিদ্ধান্তমপি প্রমাণয়তি তথাচেতি। দর্শিতমিতি হারীতেনেতি শেষঃ। পক্ষবাচিত্বাদিতি। পক্ষৌ পূর্ব্বাপরৌ শুক্লকৃষ্ণৌ মাসস্তু তাবুভৌ ইত্যমরোক্তেঃ। শুক্লপ্রতিপদাদিদর্শান্তশ্চান্দ্র ইত্যুক্তার্থে জ্যোতির্ব্বচনবিরোধং নিরসিতুং তদ্বচনমুত্থাপয়তি যত্ত্বিতি। অবধৌ মর্য্যাদারূপেণ ন ত্বভিবিধিরূপে তেন পঞ্চম্যা মর্য্যাদার্থকত্বেন তিথিপ্রচয়শ্চান্দ্রো লভ্যতে ইত্যর্থঃ। আপাটলিপুত্রাদ্বৃষ্টো দেব ইত্যাদৌ মর্য্যাদাবিষয়ে যথা পাটলিপুত্রেণ সহ ন বৃষ্ট্যন্বয়ঃ তথেহাপি পঞ্চম্যা মর্য্যাদার্থকত্বেন পূর্ব্বদর্শং বিহায়ৈব চান্দ্রপদার্থান্বয়ঃ ইতি ভাবঃ॥ ৮৮॥

অন্যথেতি। প্রতিপদাদিদর্শান্তলঙ্ঘনমেবোচ্যতে ন তু দর্শদ্বয়ঘটিততিথিপ্রচয়োল্লঙ্ঘনমিত্যর্থঃ। মাসস্য দর্শাদিত্বে হারীতবচনবিরোধমপি

বিধানাৎ। ইন্দ্রাগ্নী যত্র হূয়েতে ইতি লঘুহারীতবচনাদপি দর্শাদিত্বমেবাবগম্যতে ন শুক্লপ্রতিপদাদিত্বং তচ্চিন্ত্যং দর্শাদিত্বে দর্শান্তাদিত্বে বা মাসস্য দর্শান্তেন তৎসমাপ্তৌ অপরস্য তদাদিত্বাভাবাদমাসত্বপ্রসঙ্গঃ। ততঃ পরং দর্শাদের্দর্শান্তাদের্বা মাসস্য দর্শান্তেন সমাপ্তাবপরস্য তদাদিত্বাভাবাদমাসত্বপ্রসঙ্গে বৎসরেণ চ ষণ্ণাং মাসানাং লোপঃ স্যাৎ। ততশ্চামাবাস্যাদ্বয়ং যত্র রবি-

---

পরিহরতি কিঞ্চেতি। দর্শাদিত্বমবগম্যতে চান্দ্রমাসস্যেতি শেষঃ। দূষয়তি তচ্চিন্ত্যমিতি। দর্শান্তাদিত্বে ইতি। ইত্থঞ্চ। মিথুনস্থো যদা ভানুরমাবাস্যাদ্বয়ং স্পৃশেৎ। দ্বিরাষাঢ়ঃ স বিজ্ঞেয়ো বিষ্ণুঃ স্বপিতি কর্কটে॥ ইত্যনেন একরাশিস্থস্য রবেঃ পূর্ব্বামাবাস্যান্তক্ষণস্পর্শেনাপি মলমাসাভিধানাৎ তদেকবাক্যতয়া উক্তবচনদ্বয়ে দর্শপদস্য দর্শান্তপরত্বেন দর্শান্তক্ষণাদিদর্শান্তো মাস ইতি প্রতিবাদ্যভিপ্রায়সম্ভাবনয়োক্তম্। রাকারোহনাস্থায়াং উভয়থৈব বক্ষ্যমাণদোষস্য স্থিরত্বাৎ। অমাসত্বপ্রসঙ্গ ইতি। অত্র ইষ্টাপত্তৌ তন্মাসবিহিতকর্ম্মলোপঃ স্যাদিতি ভাবঃ। লোপঃ স্যাদিতি। একস্য দর্শস্য দর্শান্তস্য পূর্ব্বাপরমাসদ্বয়ঘটকত্বাভ্যুপগমে তু তদানীং জাতস্য মৃতস্য বা কর্ম্মণি পূর্ব্বাপরমাসয়োরুল্লেখেহনধ্যবসায় ইতি ভাবঃ। ইদমুপলক্ষণম্। অনাদৌ সংসারে একস্য দর্শস্য কিং পূর্ব্বমাসান্তত্বং কিংবা পরমাসাদিত্বমিত্যত্র নিয়ামকাভাবেন পূর্ব্বাপরমাসয়োরেকতরমাসস্য মাসত্বামাসত্বে বিনিগমকাভাবাৎ কুত্রাপি মাসত্বনির্ণয়াভাবাৎ তন্মাসবিহিতকর্ম্মসামান্যলোপোহপি দ্রষ্টব্যঃ। এবং দ্বাদশ মাসাঃ সংবৎসর ইতি শ্রুতিবিরোধোহপি চ দ্রষ্টব্যঃ। প্রতিপন্নস্যানমেবোচ্যত ইত্যুক্তবিরোধং নিরস্যতি ততশ্চেতি। ষণ্মাসলোপাপত্তিদোষাচ্চেত্যর্থঃ। লক্ষ্যত ইতি। যদ্যপি নেয়ং লক্ষণা সামান্যশব্দস্য বিশেষপরত্বাৎ। ন চ বিশেষপ্রকারকত্বলাভায় লক্ষণেতি বাচ্যং প্রকৃতে

সংক্রান্তিবর্জ্জিতম্। ইত্যত্রামাবাস্থাপদেন তদন্তো লক্ষ্যতে সংক্রান্তিশব্দেন চ ক্রিয়াভিধীয়তে প্রথমামাবাস্থান্তপ্রাক্-ক্ষণ এব সংক্রমণে প্রতিপদাদেলঙ্ঘনং সম্ভবতি। তথাহি দর্শান্তপ্রাক্ক্ষণে সংক্রমণং দর্শান্তক্ষণে চ রাশ্যন্তরসং-যোগঃ অপরক্ষণে চ প্রতিপদারম্ভে প্রতিপদাদের্মাসস্য ক্রোড়ীকৃতস্য একরাশ্যবস্থিতেন রবিণা লঙ্ঘনং ভবতি দর্শান্তক্ষণে চ ক্রিয়োৎপত্তৌ নৈষা প্রক্রিয়া সম্ভবতি।

---

বিশেষপ্রকারকত্বস্যানুপযুক্তত্বাৎ অমাবাস্যাত্বসামান্যরূপেণাপি অন্তক্ষণ-প্রাপ্ত্যা উদ্দেশ্যসিদ্ধেঃ। তথাপি লক্ষধাতোর্জ্ঞানবাচিতয়া লক্ষ্যতে প্রত্যায্যতে ইত্যর্থঃ। অতএব প্রাক্কোঽপি লক্ষ্যতে সঙ্কোচ্যতে ইতি। তদ্বীজঞ্চ যন্মাসস্যোপাপত্তিরেব ইতি প্রাহুঃ। কেচিৎ তু তিথীনামেব প্রতিপদাদিশব্দবাচ্যতিথাবেবামাবাস্যাপদশক্তের্ব্বিধিনিষেধয়োঃ সর্ব্বত্র তথাপ্রয়োগাচ্চ তিথাবেবামাবাস্যাপদং মুখ্যং তদন্তক্ষণে তু লক্ষণৈব ইত্যাহুঃ। তদসৎ অমাবাস্যায়াস্তত্তৎক্রিয়াকূটপরতয়ান্তক্ষণরূপক্রিয়া-য়ামপি অমাবাস্যাপদস্য মুখ্যত্বেন লক্ষণানুপপত্তেঃ। ক্রিয়াভিধীয়তে ইতি ন তূত্তররাশিসংযোগরূপং ফলমিত্যর্থঃ। ততঃ কিমিত্যত্রাহ অমাবাস্যা-ন্তেতি। সংক্রমণে রবিক্রিয়ায়াং লঙ্ঘনমেব স্পষ্টয়তি তথাহীতি। রাশ্য-ন্তরসংযোগ উৎপদ্যত ইতি শেষঃ। এতচ্চ ক্রিয়োৎপত্ত্যনন্তরক্ষণ এব উত্তরসংযোগ ইতি মতেনাভিহিতম্। অন্যথা প্রথমং ক্রিয়া ততো বিভাগঃ ততো বিভাগাৎ পূর্ব্বসংযোগনাশস্তত উত্তরসংযোগস্ততঃ ক্রিয়ানাশঃ ইতি ক্ষণচতুষ্টয়াবস্থায়িক্রিয়াবাদিমতে অমাবাস্যান্তপ্রাক্ক্ষণে সংক্রমণেঽপি প্রতিপদ্দ্বিতীয়ক্ষণ এব রাশ্যন্তরসংযোগোৎপত্ত্যা মাস-লঙ্ঘনাসম্ভবাদসঙ্গতেঃ। লঙ্ঘনং ভবতীতি মাসমধ্যে রাশ্যন্তরসংযোগা-ভাবরূপং লঙ্ঘনং ভবতীত্যর্থঃ। নৈষা প্রক্রিয়া ইতি দর্শান্তক্ষণে ক্রিয়োৎপত্তৌ তন্মাসীয়প্রতিপদাদ্যক্ষণে এব রাশ্যন্তরসংযোগাদুক্তলঙ্ঘ-

দর্শান্তক্ষণে রবিসংক্রান্তৌ মলমাসো ন স্যাদিতি চেৎ সত্যং তস্মাৎ প্রাগেবেতি ক্রমঃ ॥ ৮৯ ॥

অতঃ প্রতিপদাদিত্বেঽপি দর্শদ্বয়স্য রবিসংক্রান্তি-বর্জ্জিতত্বমুপপন্নং ভবতি। অমাবাস্যায়ামমাবাস্যয়েতি বাক্যং যাগারম্ভমাত্রার্থং যাগস্তু প্রতিপদ্যেবাপরস্মিন্ দিনে। তথাচ শ্রুতিঃ। দ্বে হ বৈ পৌর্ণমাস্যৌ দ্বেঽমা-বাস্যে তস্মাৎ প্রতিপদ্যুপবসন্নেব যজেতাপরেদ্যুরিতি। কিঞ্চ ইন্দ্রাগ্নী যত্র হূয়েতে ইত্যনেন যদি দর্শো বিধী-য়তে তদা তস্যৈবান্তত্বাৎ সমাপ্তৌ পিতৃসোমকাবিত্য-নর্থকং স্যাৎ। স এবাদিরন্তশ্চেতি ব্রুয়াৎ। শুক্লপ্রতিপৎ-পরত্বে তু যুজ্যত এব। ন চ পর্ব্বণো যশ্চতুর্থাংশ আদ্যাঃ প্রতিপদস্ত্রয়ঃ। যাগকালঃ স বিজ্ঞেয়ঃ প্রাতর্যুক্তো মনীষিভিঃ ॥ ইতি বৌধায়নবচনাৎ। পর্ব্বতুরীয়াংশস্যাপি যাগকালত্বাৎ কথং শুক্লপ্রতিপদাদিত্বনিয়ম ইতি বাচ্যং

নাসম্ভবাদিতি ভাবঃ। অন্তক্ষণে রবিক্রিয়ায়াং সত্যাং তৎপরমাসো মলমাসো ন স্যাদিতি পৃচ্ছতি দর্শান্তক্ষণ ইতি। সত্যমিত্যভ্যুপগমে ন স্যাদেবেত্যর্থঃ। তস্মাদন্তক্ষণাৎ প্রাক্ক্ষণ এব রবিসংক্রান্তৌ মলমাস ইতি ক্রম ইত্যর্থঃ ॥ ৮৯ ॥

উপসংহরতি অত ইতি। উক্তযুক্তেরিত্যর্থঃ। দর্শদ্বয়স্য দর্শান্ত-ক্ষণদ্বয়স্য রবিসংক্রান্তিবর্জ্জিতত্বং রবিসংক্রান্তিবর্জ্জিতত্বকথনমুপপন্নমুপ-যুক্তং ভবতি মলমাসত্বোপযোগিলঙ্ঘননির্ব্বাহকত্বাৎ ন তু মাসস্য দর্শা-দিত্বার্থং বচনং ষণ্মাসলোপাপত্তিরূপবাধকস্য জাগরূকত্বাৎ। মাসস্য প্রতিপদাদিত্বপ্রতিপাদকহারীতাদিবচনবিরোধাচ্চেতি ভাবঃ। নন্বমাবাস্যাদ্বয়ং যত্র ইতি বাক্যেন যত্র মাসেঽমাবাস্যাদ্বয়ং ইত্যন্বয়েন

পর্ব্বণোঽংশে তুরীয়ে তু কার্য্যা ইষ্টির্দ্বিজাতিভিঃ। দ্বিতীয়া-সহিতাং যস্মাদ্দূষয়ন্ত্যাশ্বলায়নাঃ ॥ ইতি লঘুহারীতেন দ্বিতীয়াবেধনিন্দায়াঃ পর্ব্বতুরীয়াংশে বিধৌ হেতুত্বেনোপন্যাসাৎ। দূষয়ন্ত্যাশ্বলায়না ইত্যুক্তত্বাৎ ঋগ্বেদিবিষয়ত্বং বৌধায়নবচনস্য ছন্দোগপরিশিষ্টকৃতা চ বেধে চ যাগস্যাভ্যুপগমাৎ। যথা। পক্ষাদাবেব কুর্ব্বীত সদা পক্ষাদিকং চরুম্। পূর্ব্বাহ্ন এব কুর্ব্বন্তি বিদ্ধেঽপ্যন্যে মনীষিণঃ॥ পর্ব্বতুরীয়াংশব্যাবৃত্ত্যর্থমেবকারঃ সদাশব্দোপাদানঞ্চ তদা ঋগ্বেদিনাং ঐন্দ্রাগ্নিযাগাঙ্গতিথেরনিয়তত্বাৎ ছন্দোগানাং চ প্রতিপদো নিয়তত্বাৎ। সৈব লঘুহারীতবচনে গৃহ্যতে। অতঃ সিদ্ধং শুক্লপ্রতিপদাদিদর্শান্তো মাসশ্চান্দ্রঃ স এব মলমাসো ন সৌরঃ ইত্যাহ তমতি-

---

একস্মিন্ মাসেঽমাবাস্যাদ্বয়বোধনাৎ। অমাবাস্যাদিরেব মাসো ন প্রতিপদাদিরিতি চেন্ন যত্র কাল ইতি তদর্থত্বাৎ ন তু যত্র মাসে ইতি। অথবা উপলক্ষণবিশেষণভাবেন পূর্ব্বাপরামাবাস্যাদ্বয়ং রবিসংক্রান্তিবর্জ্জিতমিতি পরিচায়কতয়া যত্র মাসে স মলমাস ইতি বচনার্থঃ। অন্যথা প্রাগুক্তদোষাপত্তিরিতি। অত্র স্মার্ত্তাঃ সংক্রান্তিপদমত্র ক্রিয়াপরং উত্তরসংযোগরূপফলপরঞ্চ তেন পূর্ব্বাপরামাবাস্যয়োর্যথাক্রমং ক্রিয়োত্তরসংযোগবর্জ্জিতত্বে মলমাসঃ। তথাচোত্তরামাবাস্যান্তক্ষণে ক্রিয়োৎপত্তাবপি মলমাসো ভবত্যেব। অন্যথা গ্রন্থকৃন্মতে যদৈকমলমাসাবধিতৃতীয়াব্দেঽমাবাস্যান্তক্ষণে ক্রিয়োৎপত্তৌ পূর্ব্বমাসস্য পরমাসস্য চ রবিলঙ্ঘিতত্বাভাবেন মলমাসত্বাভাবে তৃতীয়াব্দে মলমাসপাতনিয়মভঙ্গাপত্তেরিত্যাহুঃ। অমাবাস্যায়াং অমাবাস্যয়া যজেত ইতি শ্রুতিবিরোধমুদ্ধরতি অমাবাস্যায়ামিতি। দ্বে হেতি। হৈব প্রসিদ্ধাবিতি সম্প্রদায়ঃ। দ্বে পৌর্ণমাস্যৌ পৌর্ণমাসীপ্রতিপদৌ দ্বেঽমাবাস্যেঽমাবাস্যা-

ক্রমেত্যেতি। প্রকৃত ইতি কর্ম্মাঙ্গত্বাৎ। অতএব জ্যোতিষম্। রবিণা লঙ্ঘিতো মাসশ্চান্দ্রঃ খ্যাতো মলিম্লুচঃ। তত্র যদ্বিহিতং কর্ম্ম উত্তরে মাসি কারয়েৎ॥ তস্মিংস্তু প্রকৃত ইতি। শ্রাদ্ধমমাবাস্যাপার্ব্বণনবান্নাপরপক্ষাদ্যভ্যুদয়বিবাহাদিশ্রাদ্ধাভ্যুদয়ৌ মলমাসে ন কর্ত্তব্যৌ। পরিসংখ্যাবিধেঃ ফলমিদমিত্যত্র তাৎপর্য্যং প্রকৃতে মাসি করণস্য তত্তদ্বিধিবাক্যৈরেব প্রাপ্তত্বাৎ। নিত্যমহরহঃক্রিয়মাণং সন্ধ্যাস্নানপঞ্চযজ্ঞাদি। সর্ব্বদা মলমাসে প্রকৃতেঽপি কর্ত্তব্যং ন ত্বাবশ্যকত্বেন পার্ব্বণাদিকমপি একপদেন নিত্যনৈমিত্তিকাখ্যপার্ব্বণব্যবচ্ছেদাৎ। যথা মার্কণ্ডেয়পুরাণম্। নিত্যং নৈমিত্তিকঞ্চৈব নিত্যনৈমিত্তিকং

---

প্রতিপদৌ তস্মাৎ পূর্ব্বেদ্যুরুপবসন্ অগ্ন্যাধানরূপযাগারম্ভং কুর্ব্বন্ পরেদ্যুঃ প্রতিপদি যজেতেত্যর্থঃ। কৃতেঽগ্ন্যাধানে দেবা যজমানস্য সমীপমুপবসন্তি ইত্যনেন উপবসন্নিত্যতোঽগ্ন্যাধানপ্রাপ্তেঃ। শুক্লপ্রতিপৎপরত্বেতি। ইন্দ্রাগ্নীত্যস্য ইতি শেষঃ। দূষয়ন্ত্যাশ্বলায়না ইত্যুক্তত্বাদিতি। অনেন বেধনিন্দায়া ঋগ্বেদিবিষয়ত্বপ্রতিপাদনাৎ তেষামেব যাগে পর্ব্বতুরীয়াংশবিধিরিত্যর্থঃ। অন্যেষামপি সামান্যতো বেধনিন্দাভ্যুপগমে বাধকমাহ ছন্দোগেতি। অন্যে ঋগ্বেদিভিন্নাঃ। নমু তথাপি পর্ব্বপ্রতিপদোর্দ্ব য়োরেব বেধযাগকালত্বসিদ্ধেরিন্দ্রাগ্নী যত্র ইত্যনেন পর্ব্বপ্রতিপদ্বা গৃহ্যতে ইত্যত্র কিং বিনিগমকমিত্যত আহ তদা চেতি। অনিয়তত্বাদিতি। ঋগ্বেদিনামপি দ্বিতীয়াবেধাভাবে প্রতিপদ্যেব যাগাভ্যুপগমাদন্যথা বেধনিন্দায়া হেতুত্বোপন্যাসবৈয়র্থ্যাৎ। অতঃ পর্ব্বকালস্যানিয়তত্বাদিত্যর্থঃ। নিয়তত্বাদিতি। তথাচ প্রতিপদো যাগনিয়তত্বমেব বিনিগমকমিতি ভাবঃ। স এবেতি। রবিলঙ্ঘিতঃ স এব চান্দ্র এব মলমাস ইত্যর্থঃ। এতেন কো বা মলমাস ইতি চরমপ্রশ্নস্যোত্তরমভিহিতম্।

তথা। গৃহস্থস্য চ যৎ কর্ম্ম তন্নিশাময় পুত্রক ॥ পঞ্চযজ্ঞাশ্রিতং নিত্যং যদেতৎ কথিতং তব। নৈমিত্তিকমথৈবান্যৎ পুত্রজন্মক্রিয়াদিকম্। নিত্যনৈমিত্তিকং জ্ঞেয়ং পর্ব্বশ্রাদ্ধাদি পণ্ডিতৈঃ ॥ উপক্রমোক্তনিত্যপরিভাষাদার্ঢ্যাৎ ॥ ৯০ ॥

লঘুহারীতেনৈবাহরহঃশ্রাদ্ধ এব নিত্যশব্দস্য প্রযুক্তত্বাৎ। যথা। নিত্যশ্রাদ্ধমদৈবং স্যাদর্ঘপিণ্ডবিবর্জ্জিতমিতি

কর্ম্মাঙ্গত্বে প্রমাণমাহ অতএবেতি। একপদেনেতি। একং কেবলং নিত্যং ন তু মিশ্রিতং নিত্যনৈমিত্তিকমিত্যর্থঃ। ননু একপদং ন নিত্যবিশেষণং কিন্তু ক্রিয়াবিশেষণং অতো নিত্যমাবশ্যকং কেবলং কুর্য্যাদিত্যর্থে প্রাপ্তে আবশ্যকত্বাৎ পার্ব্বণস্যাপি প্রতিপ্রসবোঽস্ত্বিত্যত আহ উপক্রমোক্তেতি। উপক্রমোক্তা অহন্যহনি যচ্ছ্রাদ্ধং তন্নিত্যমিতি কীর্ত্তিতমিত্যনেন প্রাগুপদর্শিতা যা পরিভাষা অহরহঃক্রিয়মাণে শ্রাদ্ধে নিত্যপদপরিভাষা তস্যা দার্ঢ্যাৎ বলবত্ত্বাৎ তথাচ পারিভাষিকার্থস্য শীঘ্রোপস্থিতিকত্বেনাসতি বাধকে তস্যৈব গ্রাহ্যত্বাদিতি ভাবঃ। অতো নাত্র নিত্যপদমাবশ্যকপরং যেন পার্ব্বণপ্রতিপ্রসবঃ স্যাদিতি তাৎপর্য্যম্ ॥ ৯০ ॥

হারীতেনৈবেতি। হারীতেনাপীত্যর্থঃ। নিত্যশব্দস্যেতি। তথাচ বক্ষ্যমাণহারীতবচনে নিত্যশব্দস্যাহরহঃক্রিয়মাণপরত্বে নিশ্চিতে প্রকৃতেঽপি হারীতবচনে নিত্যপদস্যাহরহঃক্রিয়মাণশ্রাদ্ধপরতায়া ন্যায্যত্বমিতি ভাবঃ। কেচিৎ তু পরিভাষাবাক্যমেবাহ লঘুহারীতেনৈবেতি। তদসৎ নিত্যশ্রাদ্ধমদৈবং স্যাদিতি বচনস্যাতিদেশপ্রাপ্তার্ঘাদিনিষেধকমাত্রতয়া পরিভাষাবাক্যত্বাভাবাৎ বাধকমপ্যাহ অন্যথেতি। নিত্যশব্দস্যাবশ্যকমাত্রপরত্বে ইত্যর্থঃ। অপরপক্ষাদীনামপীতি। আশ্বিনাপরপক্ষশ্রাদ্ধাদীনামপ্যাবশ্যকত্বাদিতি ভাবঃ। অতএবেতি। নিত্যপদেন পারিভাষিকনিত্যগ্রহণাদেবেত্যর্থঃ। যদ্যপি নিত্যশ্রাদ্ধ এব নিত্যভাষা

অন্যথা অপরপক্ষাদীনামপ্যনুষ্ঠানাপত্তেশ্চ। অতএব কাম্য-মপ্যহরহঃক্রিয়মাণং গোহিরণ্যাদিদানং কর্ত্তব্যম্। অতএব জ্যোতিষম্ পক্ষদ্বয়েঽপি সংক্রান্তির্যদি ন স্যাৎ সিতাসিতে। তদা তন্মাসবিহিতমুত্তরে মাসি কারয়েৎ॥ রবিণা লঙ্ঘিতো মাসশ্চান্দ্রঃ খ্যাতো মলিম্লুচঃ। তত্র যদ্বিহিতং

---

ই গ্যক্তগোহিরণ্যাদিদানস্য তত্র কর্ত্তব্যতায়াং কুতস্তং প্রমাণং তথাপি নিরবকাশত্বমেব নিত্যশ্রাদ্ধস্য মলমাসকর্ত্তব্যতায়াং বীজং তচ্চ অহরহঃক্রিয়মাণদানাদাববিশিষ্টমিতি ভাবঃ। তথাচ নিরবকাশস্য মলমাসে কর্ত্তব্যতামাহ কালমাধবীয়ধৃতকাঠকগৃহ্যম্। অনন্যগতিকাং নিত্যাং কুর্য্যান্নৈমিত্তিকীং ক্রিয়াম্। ইতি। অনন্যগতিকামসম্ভবৎ-কালান্তরাম্। তথা ভীমপরাক্রমবচনম্। অধিমাসকে বিবাহং যাত্রাং চূড়াং তথোপনয়নাদি। কুর্য্যান্ন সাবকাশং মাঙ্গল্যং ন তু বিশেষেজ্যাম্॥ অত্র সাবকাশনিষেধান্নিরবকাশস্য প্রাপ্তিঃ। তথা গৃহ্যপরিশিষ্টম্। মলং বদন্তি কালস্য মাসং কালবিদোঽধিকম্। নেহেতাত্র বিশেষেজ্যাং অন্যত্রাবশ্যকাদ্বিধেঃ॥ বিশেষেজ্যাং সম্ভবৎকালান্তরাম্। এতদেব বিবৃণোতি অন্যত্রাবশ্যকাদিতি। অতএবেতি। যত এবাশ্বিনাপরপক্ষশ্রাদ্ধা-দীনাং ন প্রতিপ্রসবঃ অতস্তন্মাসবিহিতকৃত্যস্যোত্তরমাসবিধানমিত্যর্থঃ। অত্রৈকে আশ্বিনত্বাদিপুরস্কারেণ বিহিতস্যৈব কর্ম্মণ উত্তরাশ্বিনাদৌ বিধানাৎ পার্ব্বণস্য প্রতিমাসকর্ত্তব্যত্বোপদেশেন তথাবিধত্বাভাবাদুত্তর-মাসকর্ত্তব্যত্বপ্রাপকাভাবেন নিরবকাশত্বেন একাদশ্যুপবাসবৎ মলমাসে-ঽপি কর্ত্তব্যত্বমেব ইত্যাহুঃ। এতচ্চাগ্রেঽমাবাস্যাশ্রাদ্ধনিরূপণ-প্রসঙ্গে দূষণীয়ম্। উত্তরে মাসীতি। দর্শান্তমাসবিহিতং যৎ কর্ম্ম তদুত্তরে মাসি কারয়েদিত্যর্থঃ। পৌর্ণমাস্যন্তমাসবিহিতন্তু পক্ষভেদেন ভিন্নয়োঃ পূর্ব্বাপরমাসয়োঃ কার্য্যম্। তথাচ প্রচেতাঃ। মলমাসাশ্রিতং কর্ম্ম কৃষ্ণপক্ষোদিতঞ্চ যৎ। তৎ কর্ত্তব্যং পূর্ব্বমাসে শুক্লপক্ষোদিতং

**কর্ম্ম উত্তরে মাসি কারয়েৎ॥ অভ্যুদয়ং বিবিনক্তি জ্যোতিঃপরাশরঃ। অগ্ন্যাধেয়ং প্রতিষ্ঠাঞ্চ যজ্ঞদানব্রতানি চ। দেবব্রতবৃষোৎসর্গচূড়াকরণমেখলাঃ। মাঙ্গল্যমভিষেকঞ্চ মলমাসে বিবর্জ্জয়েৎ॥ ৯১॥**

**দানঞ্চাত্র মহাদানম্। যদাহ। বাপীকূপতড়াগাদি-**

পরে॥ অগ্ন্যাধেয়মিতি। যাগঃ সম্ভবৎকালান্তরোঽগ্নিষ্টোমাদিঃ। কারীর্য্যাদিকং ত্বৎসম্ভবৎকালান্তরং কর্ত্তব্যমেব। ব্রতং রম্ভাতৃতীয়াদি। দেবব্রতং নিয়মপূর্ব্বকবেদাধ্যয়নম্। বৃষোৎসর্গ একাদশাহবিহিতেতরঃ কার্ত্তিকাদৌ বিহিতঃ। তথাচ স্মৃতিঃ। অশৌচান্তে তু কর্ত্তব্যং বৃষোৎসর্গাদিকং সুতৈঃ। মলমাসাদিদোষস্তু ন গ্রাহ্যস্তত্র কশ্চন॥ ইতি। মৈথিলাস্ত্বেতদ্বচনাদর্শিনঃ কাম্যত্বাদেকাদশাহীয়বৃষোৎসর্গোঽপি মলমাসে ন কর্ত্তব্য ইত্যাহুঃ। তদসৎ উক্তবচনবিরোধাৎ নিরবকাশকাম্যত্বাৎ শান্ত্যাদিবৎ মলমাসেঽপি তৎকর্ত্তব্যত্বাচ্চ। যুক্তঞ্চৈতৎ। তথাহি সপিণ্ডীকরণাদূর্দ্ধং যৎ কিঞ্চিৎ শ্রাদ্ধিকং ভবেৎ। ইষ্টং বাপ্যথবা পূর্ত্তং তন্ন কুর্য্যান্মলিম্লুচে॥ ইত্যনেন সপিণ্ডীকরণাদূর্দ্ধং ইষ্টাপূর্ত্তাদিকর্ম্মণ্যেব মলমাসে নিষেধোক্ত্যা সপিণ্ডীকরণপ্রাক্কর্ত্তব্যৈকাদশাহবৃষোৎসর্গাদের্ম্মলমাসে নিষেধাভাবাৎ। নৈমিত্তিকানি কাম্যানি নিপতন্তি যথা যথা। তথা তথৈব কার্য্যাণি ন কালস্তু বিধীয়তে॥ ইত্যনেন নৈমিত্তিকস্য কাম্যকর্ম্মণঃ সর্ব্বকালকর্ত্তব্যতোপদেশেন মরণনিমিত্তিককাম্যত্বেনৈতস্যাপি মলমাসে কর্ত্তব্যতোক্তেশ্চেতি সংক্ষেপঃ। মাঙ্গল্যং নামকরণান্নপ্রাশনাদি মুখ্যকালাতিক্রমে ক্রিয়মাণং অতিপাতে তু কর্ত্তব্যং প্রশস্তে মাসি পুণ্যদে ইত্যেকবাক্যত্বাৎ। মুখ্যকালে তু নিরবকাশত্বাৎ মলমাসেঽপি কর্ত্তব্যমেব ইতি উক্তবচনেনাপি অতিপাত এব প্রশস্তমাসকর্ত্তব্যতোক্তেশ্চ॥ ৯১॥

দানঞ্চাত্রেতি। বচনৈকবাক্যত্বাদিতি ভাবঃ। তর্হি কৃষ্ণাজিনচণক-

প্রতিষ্ঠাং যজ্ঞকর্ম্ম চ। ন কুর্য্যান্মলমাসে তু মহাদান-ব্রতানি চ॥ মহাদানং ষোড়শ তুলাপুরুষাদি ব্রতস্যারম্ভ এব নিষিদ্ধঃ। যথা কাশ্যপঃ। ঋক্ষৈকমন্দিরগতৌ যদি জীবভানূ শুক্রোঽস্তগঃ সুরবরৈকগুরুশ্চ সিংহে। নারভ্যতে ব্রত-বিবাহগৃহপ্রতিষ্ঠাক্ষৌরাদিকর্ম্মগমনাগমনঞ্চ ধীরৈঃ॥ অত্র কালাশৌচে ব্রতাদ্যারম্ভনিষেধদর্শনাৎ মলমাসেঽপি তথা। আরব্ধং ব্রতং মলমাসেঽপি কার্য্যং প্রতিষ্ঠা তু ন কার্য্যা। যথা রম্ভাতৃতীয়াব্রতে শিবরহস্যে। মাসে মলিম্লুচেঽপ্যেবং যজেদ্গৌরীং সশঙ্করাম্। কিন্তু নোদ্যাপনং কার্য্য-মিত্যাহ ভগবান্ শিবঃ॥ যত্র ব্রতে দ্বাদশসু মাসেষু মাসবিশেষোল্লেখেন কর্ম্মবিশেষ উক্তস্তন্মলমাসে ন কার্য্য-মিত্যুক্তম্। বাশিষ্ঠলিঙ্গপুরাণে। প্রারব্ধে তু ব্রতে

তিলধেন্বাদিদানানাং কর্ত্তব্যত্বপ্রসঙ্গ ইতি বাচ্যম্। স চাধিমাসকঃ প্রোক্তঃ কাম্যকর্ম্মসু গর্হিতঃ। ইতি বিষ্ণুধর্ম্মেণ সাবকাশকাম্যসামান্য-স্যৈব নিষেধাৎ। ন চৈবং তথাবিধদানমাত্রনিষেধে মহাদান-নিষেধোক্তির্নিস্ফলেতি চেন্ন মুমুক্ষুক্রিয়মাণস্যানভিসংহিতফলস্যাপি মহাদানস্য নিষেধেন সফলত্বাৎ। অনভিসংহিতফলকসুবর্ণাদিদানং মুমুক্ষুণা মলমাসাদাবপি কর্ত্তব্যমেব কাম্যন্তু সুবর্ণাদিদানং মলমাসে ন কর্ত্তব্যং উক্তবিষ্ণুধর্ম্মোত্তরবচনাদেব। অতএব কৃত্যচিন্তামণিগঙ্গা-বাক্যাবল্যোঃ। ভার্গবাস্তে তু বৈ সিংহে গুর্ব্বাদিত্যে মলিম্লুচে। ত্যজে-দ্দানং মহাদানং ব্রতং দেববিলোকনম্॥ ইত্যনেন কাম্যসুবর্ণাদিদান-মহাদানয়োরেব নিষেধ উক্তঃ। কর্কোপাধ্যায়া অপ্যেবমাহুঃ। মহা-দানমিতি। মহাদানশব্দস্তুলাপুরুষাদিষোড়শসু রূঢ়ো নানার্থঃ যামদগ্ন্যা-দিষু রামশব্দবৎ। অনুগমকধর্ম্মাভাবাদিতি প্রাঞ্চঃ। স্মার্ত্তাস্তু সূক্তজপা-

পশ্চাৎ সংপ্রাপ্তে মলমাসকে। পূর্ব্বমানেন তং ত্যক্ত্বা কার্য্যং দ্বাদশমাসিকম্॥ পূর্ব্বমানেন মলিম্লুচশূন্যাব্দমানেন মলিম্লুচং ত্যক্ত্বেত্যর্থঃ। দ্বাদশমাসিকং দ্বাদশমাসেষু কার্য্যং ন মলমাস ইত্যর্থঃ। ঋষ্যশৃঙ্গঃ। অবষট্কারহোমশ্চ পর্ব্ব চাগ্রয়ণং তথা। মলমাসে তু কর্ত্তব্যং কাম্যা ইষ্টির্বিবর্জ্জয়েৎ॥ অবষট্কারহোমো নিত্যহোমঃ। পর্ব্ব দর্শপৌর্ণমাসযাগঃ ন পার্ব্বণশ্রাদ্ধমিষ্টিসাহচর্য্যাদাগ্রয়ণং নবশস্যেষ্টিঃ। এতদুভয়মহরহঃক্রিয়মাণমপি বচনাৎ কর্ত্তব্যম্। সামান্যতঃ শ্রাদ্ধনিষেধে উক্তে সপিণ্ডীকরণান্তস্য প্রতিপ্রসবমাহ লঘুহারীতঃ।

ঙ্কদানত্বং ষোড়শানামনুগমকধর্ম্মোঽস্তীতি তদ্রূপেণ মহাদানপদস্য ষোড়শস্বেকৈব শক্তিরতো ন নানার্থতা ইত্যাহুঃ। তানি চ স্মৃত্যুক্তানি। যথা। আদ্যন্তু সর্ব্বদানানাং তুলাপুরুষসংজ্ঞিতম্। হিরণ্যগর্ভদানঞ্চ ব্রহ্মাণ্ডং তদনন্তরম্॥ কল্পপাদপদানঞ্চ গোসহস্রঞ্চ পঞ্চমম্। হিরণ্যকামধেনুশ্চ হিরণ্যাশ্বস্তথৈব চ॥ হিরণ্যাশ্বরথস্তদ্বদ্ধেমহস্তিরথস্তথা। পঞ্চলাঙ্গলকস্তদ্বদ্ধরাদানং তথৈব চ॥ দ্বাদশং বিষ্ণুচক্রঞ্চ তদ্বৎ কল্পলতাত্মকম্। সপ্তসাগরদানঞ্চ রত্নধেনুস্তথৈব চ। মহাভূতঘটস্তদ্বৎ ষোড়শঃ পরিকীর্ত্তিতঃ॥ ইতি। ঋক্ষৈকেতি মন্দিরং রাশিঃ মধ্যপঠিতস্য চৈকশব্দস্য কাকাক্ষিগোলকন্যায়াৎ উভয়ত্রান্বয়ঃ। তথাচ একনক্ষত্রগতৌ একরাশিগতৌ চ যদি গুরুসূর্য্যাবিত্যর্থঃ। এষ এব গুর্ব্বাদিত্যযোগঃ। গমনং তীর্থযাত্রাদি আগমনং নবগৃহপ্রবেশঃ। কালাশৌচে কালাশুদ্ধৌ মলমাসেঽপীতি। উক্তগুর্ব্বাদিত্যপ্রভৃতীনাং পৃথগন্তর্ভাবেন নানাশ্রুতিকল্পনে গৌরবাৎ লাঘবেন সময়াশুদ্ধৌ ব্রতারম্ভং ন কুর্য্যাদিত্যেকস্যা এব শ্রুতেঃ কল্পনীয়তয়া মলমাসেঽপি তন্নিষেধ-

প্রত্যব্দং দ্বাদশে মাসি কার্য্যা প্রেতক্রিয়া দ্বিজৈঃ। কচি-
ত্ত্রয়োদশেঽপি স্যাদাদ্যং মুক্ত্বা তু বৎসরম্॥ চক্রবৎ
পরিবর্ত্তেত সূর্য্যঃ কালবশাদ্‌যতঃ। অতঃ সাংবৎসরং
শ্রাদ্ধং কর্ত্তব্যং মাসচিহ্নিতম্॥ মাসচিহ্নন্তু কর্ত্তব্যং
পৌষমাঘাদ্যমেব হি। যতস্তত্র বিধানেন মাসঃ স পরি-
কীর্ত্তিতঃ॥ অসংক্রান্তেঽপি কর্ত্তব্যমাব্দিকং প্রথমং
দ্বিজৈঃ। তথৈব মাসিকং পূর্ব্বং সপিণ্ডীকরণং তথা॥
গর্ভে বার্দ্ধুষিকৃত্যে চ মৃতানাং পিণ্ডকর্ম্মসু। সপিণ্ডী-
করণে চৈব নাধিমাসং বিদুর্বুধাঃ॥ সপিণ্ডীকরণাদূর্দ্ধং
যৎকিঞ্চিৎ শ্রাদ্ধিকং ভবেৎ। ইষ্টং বাপ্যথবা পূর্ত্তং

প্রাপ্তিরিতি ভাবঃ। উদ্‌যাপনং প্রতিষ্ঠা। মাসবিশেষোল্লেখেন
ইতি। তেন সৌরং অর্কাগ্রং শুচি গোময়ং সুমরিচমিত্যাদিনা মাঘাদি-
দ্বাদশমাসেষু অর্কাগ্রাদিদ্বাদশতত্তদ্দ্রব্যেতরভোজননিবৃত্তিরূপং ব্রতং
অন্যদ্বা মাসবিশেষচিহ্নিতং তথাবিধং ব্রতং মলমাসে ন কর্ত্তব্যং কিন্তু
উত্তরস্মিন্নেব প্রকৃতে মাসি তৎ কার্য্যং তত্র যদ্বিহিতং কর্ম্ম উত্তরে মাসি
কারয়েদিতি সামান্যেনাভিধানাৎ। বিশেষপ্রমাণমপ্যাহ বশিষ্ঠ
ইতি। বৈশাখাদৌ মলমাসে দ্বির্ব্বৈশাখাদিত্বেন সকৃৎ কৃতে কৃতঃ শাস্ত্রার্থ
ইতি ন্যায়েন সকৃদেব কর্ত্তব্যতায়াং মলমাসস্যাশুদ্ধত্বেন তৎ বিহায়
প্রকৃতমাস্যেব তৎ কর্ম্ম কর্ত্তুমুচিতং ইতি যুক্তিসিদ্ধোঽয়মর্থঃ। যত্র তু
ব্রতেন বৎসরং কর্ত্তব্যমিতি এতাবন্মাত্রং শ্রূয়তে তন্মলমাসেঽপি কর্ত্তব্যং
ত্রয়োদশমাসাঃ সংবৎসর ইতি। ইতি শ্রুত্যা তত্র সংবৎসরস্য
ত্রয়োদশমাসাত্মকত্বপ্রতিপাদনাৎ এবং যদ্ব্রতং মাসি মাসি কর্ত্তব্যতয়োক্তং
তদপি মলমাসে কর্ত্তব্যং তস্যাপি মাসত্বাদিতি। প্রত্যব্দমিতি পিণ্ডক্রিয়া
সাংবৎসরিকশ্রাদ্ধং কচিন্মলমাসযুতাব্দে আদ্যং বৎসরং মুক্ত্বা ত্রয়োদশে
কার্য্যং আদ্যসাংবৎসরিকন্তু দ্বাদশমাস্যেব মলমাসেঽপি কার্য্যমিত্যর্থঃ।

তন্ন কুর্য্যান্মলিম্লুচে॥ প্রত্যাব্দিকী যা পিণ্ডক্রিয়া সা দ্বাদশে মাসি কর্ত্তব্যেত্যুৎসর্গঃ। ক্বচিন্মলমাসে পতিতে ত্রয়োদশে মাসি কর্ত্তব্যা। আদ্যং সাংবৎসরিকং দ্বাদশ এব মলমাসেঽপি॥ ৯২॥

ননু মলমাসে ত্রয়োদশেঽপি শ্রাদ্ধমাহ বিষ্ণুঃ। সংবৎসরাভ্যন্তরে যদ্যধিমাসকো ভবেত্তদা মাসিকার্থে দিনমেকং বর্দ্ধয়েৎ॥ তথা বিষ্ণুধর্ম্মোত্তরে। সংবৎসরস্য মধ্যে তু যদি স্যাদধিমাসকঃ। তদা ত্রয়োদশে মাসি কার্য্যা প্রেতস্য বার্ষিকী॥ অতো বিকল্পঃ স্যাৎ ন এতয়োর্ম-

তত্র সাংবৎসরিকশ্রাদ্ধে বিধানেন শাস্ত্রেণ স মাঘাদিনামচিহ্নিতশ্চান্দ্র-মাসঃ গ্রাহ্যতয়া পরিকীর্ত্তিত ইত্যর্থঃ। আদ্যং মুক্ত্বেতি যদুক্তং তদেব স্পষ্টয়তি অসংক্রান্তেঽপীতি। আব্দিকিং সাংবৎসরিকং প্রথমং ন তু দ্বিতীয়াদিসাংবৎসরিকমপি মলমাসে কার্য্যং কিন্তু প্রকৃত এব ত্রয়ো-দশে মাসি কার্য্যমিত্যর্থঃ। তেন প্রথমাব্দিকং সপিণ্ডীকরণরূপং মল-মাসে কার্য্যমিত্যুক্তম্। সপিণ্ডীকরণং তথেতি। ইদন্তু পতিতসপিণ্ডন-পরং অতো ন পৌনরুক্ত্যমিতি সম্প্রদায়ঃ। অন্যে তু সপিণ্ডীকরণ-মিতি পঞ্চম্যর্থে প্রথমা। তেন সপিণ্ডীকরণাৎ পূর্ব্বমাসিকং প্রেত-মাসিকং মলমাসেঽপি কার্য্যমিতি বাক্যার্থ ইতি ব্যাচক্রুঃ॥ ৯২॥

শ্রাদ্ধমাহ সাংবৎসরিকশ্রাদ্ধমাহ। বিষ্ণুনাপি সপিণ্ডনাপকর্ষে দ্বাদশ-দিনেষু দ্বাদশমাসিকাপকর্ষমুক্ত্বা মলমাসযুতাব্দে ত্রয়োদশমাসিকাপ-কর্ষবিধানাৎ সপিণ্ডনানন্তরবিহিতস্য সাংবৎসরিকস্য সপিণ্ডীকরণস্যৈবা সাংবৎসরিকরূপস্য মলমাসাব্দে ত্রয়োদশমাস এব কর্ত্তব্যত্বপ্রতিপাদনা-দিতি ভাবঃ। মধ্যাধিমাসবিষয়ত্বাদিতি। একাদশমাসাভ্যন্তরাধিমাস-বিষয়ত্বাদিত্যর্থঃ। সামান্যবিষয়ত্বাদিতি। আদ্যং মুক্ত্বা তু বৎসরমিত্য-নেনাদ্যবৎসরসামান্যে দ্বাদশমাসবিধানাৎ সামান্যবিশেষয়োরতুল্য-

ধ্যশ্রুতের্মধ্যাধিমাসবিষয়ত্বাৎ হারীতবচনস্য চ সামান্য-বিষয়ত্বাৎ বিষমশিষ্টত্বেন বিকল্পাযোগাৎ। হেতুরত্র মধ্যাধিমাসে দ্বাদশে মাসি প্রথমাব্দিকং ন সম্ভবতি মৃতাহাপ্রাপ্তেঃ এবমাদাবপি। অতো হারীতবচনমন্ত্যাধিমাস-বিষয়ম্। ন ত্বমাবাস্যাশ্রাদ্ধবিষয়ত্বম্। বিষ্ণুবচনস্য ইতি ব্যাখ্যানং যুক্তং বিষ্ণুনা প্রেতশ্রাদ্ধপ্রকরণে পাঠাৎ। যদা চ মধ্যেঽধিমাসস্তদা ত্রয়োদশমাসিকশ্রাদ্ধানি কর্ত্ত-ব্যানি। যথা বিষ্ণুধর্ম্মোত্তরে। মধ্যে চেদধিমাসঃ স্যাৎ কুর্য্যাদপ্যধিকং ততঃ। অথবা দ্বাদশাহেন সর্ব্বমেতৎ সমাচরেৎ॥ তথাচ সত্যব্রতঃ। সংবৎসরস্য মধ্যে তু

শ্লিষ্টত্বেন বিকল্পাযোগাৎ মধ্যাধিমাসান্যেতরবিষয়ত্বং হারীতবচনস্যেতি ভাবঃ। মৃতাহাপ্রাপ্তেরিতি। মৃতমাসসম্বন্ধি মৃততিথেরেব প্রত্যাব্দিক-বিধের্ম্মধ্যাধিমাসে তস্য দ্বিত্বেন দ্বয়োরেকনামকয়োর্দ্বির্গণনে একাদশ-মাসস্যৈব দ্বাদশপূরণতয়া তত্র মৃততিথের্মৃতমাসসম্বন্ধিত্বাসম্ভবান্ন তাহা-প্রাপ্তেরিত্যর্থঃ। তেন তত্র ত্রয়োদশমাসস্যৈব মৃতমাসত্বসম্ভবাৎ তত্রৈব সাংবৎসরিকং এবং সপিণ্ডীকরণমপি তত্রৈব। সপিণ্ডীকরণং বক্ষ্যে পূর্ণেঽব্দে তৎক্ষয়েঽহনি। ইতি গরুড়পুরাণাৎ। এবমাদাবপীতি। মলমাসমৃতস্যাপি ত্রয়োদশে মাসি সাংবৎসরিকং কার্য্যং তত্রাপ্যুক্ত-ক্রমেণ দ্বাদশমাসে মৃতমাসাঙ্কিতমৃততিথ্যপ্রাপ্তেরিতি ভাবঃ। অত ইতি। আদ্যং মুক্তেতি হারীতবচনং অন্ত্যাধিমাসবিষয়মিত্যর্থঃ। মাস-দ্বয়স্য একনামকত্বাদন্ত্যাধিমাসস্য মৃতমাসত্বাৎ প্রকৃতমাসলাভেঽপি বচনাৎ তত্রৈব প্রত্যাব্দিকমিতি ভাবঃ। অন্ত্যাধিমাসে তত্রৈব প্রথমাব্দিকং ব্যবস্থাপ্য প্রসঙ্গাৎ প্রেতমাসিকস্যাপি মলমাসিকস্যাপি মল-মাসকর্ত্তব্যতাং ব্যবস্থাপয়তি যদা চেতি। অথবেতি। অনেনৈকাহেঽপকর্ষ উক্ত ইতি সম্প্রদায়ঃ। বস্তুতো দ্বাদশাহেন বা কুর্য্যাদেকাহে দ্বাদশাথবা

যদি স্যাদধিমাসকঃ। তদা ত্রয়োদশে শ্রাদ্ধং কার্য্যং তদধিকং ভবেৎ ॥ নন্থ সৌরমাসবিশেষচিহ্নিতে মৃতাহে শ্রাদ্ধং সৌরস্য চ মাসস্য রাশিবিশেষাবচ্ছিন্নসূর্য্যবিশেষিতত্বাৎ ত্রয়োদশে মাসি মৃতাহ এব শ্রাদ্ধং ন কৃতং ভবেৎ তত্রাহ। চক্রবৎ পরিবর্ত্তেত সূর্য্য ইতি রাশিচক্রে চক্রবৎ পরিভ্রমন্ সূর্য্যো গতের্ম্মন্দত্বামন্দত্বাভ্যাং কদাচিদেকরাশিগতভোগসমাপ্তাবপি মৃততিথিং ন স্পৃশতি তিথিদ্বয়ং বা স্পৃশতি যদা ন স্পৃশতি তদা শ্রাদ্ধলোপঃ যদা চোভয়ং স্পৃশতি তদা সংশয়ঃ স্যাৎ। অতঃ সৌরমাসচিহ্নিতং শ্রাদ্ধং ন কর্ত্তব্যং কিন্তু চান্দ্রমাসচিহ্নিতং কর্ত্তব্যম্। চান্দ্রমাসস্যাপ্যনেকত্বাৎ তচ্চিহ্নমাহ মাসচিহ্নমিত্যাদি।

ইত্যেকবাক্যতয়া দ্বাদশদিনানি অপকর্ষকাল এব অনেনোক্তঃ। চক্রবৎ পরিবর্ত্তেতেতি গ্রন্থমবতারয়িতুমাশঙ্কতে নন্বিতি। সৌরমাসেতি। যস্মিন্ রাশিগতে ভানৌ বিপত্তিং যান্তি মানবাঃ। তেষাং তত্রৈব কর্ত্তব্যা পিণ্ডদানোদকক্রিয়া ॥ ইতি সত্যব্রতবচনাদিতি শেষঃ। মৃতাহ এব সৌরমাসীয়মৃতাহ এব। ন স্পৃশতীতি গতেরমন্দত্বপক্ষে দ্বয়ং বা স্পৃশতীতি মন্দত্বপক্ষে। চান্দ্রমাসস্যাপি অনেকত্বাদিতি মাসারম্ভকপ্রতিপদাদের্ভিন্নত্বাদিতি ভাবঃ। পৌষাদিপদানাং সৌরেঽপি প্রয়োগাচ্চান্দ্রতল্লাভার্থমাহ পৌষাদিপদেতি। মেষগেতি। তথাচ মেষসংক্রান্ত্যধিকরণচান্দ্রমাসত্বং চৈত্রলক্ষণং তচ্চৈত্রমিতি চৈত্র এব চৈত্রং স্বার্থেঽন্ দেবতাদিশব্দে তাপ্রত্যয়বৎ। দূষয়তি এতচ্চেতি। মলমাসাব্যাপকমিতি। তস্য রবিলঙ্ঘিতত্বেন কস্যা অপি সংক্রান্তেরধিকরণত্বাভাবাদিতি ভাবঃ। নম্বধিমাসোঽনামকত্বাদমাস এব ইতি ন তত্রাব্যাপ্তিঃ। বৎসরান্তর্গতঃ পাপো যজ্ঞানাং ফলনাশকৃৎ। নৈঋ্ঁতৈর্যাতুধানাদ্যৈঃ সমাক্রান্তো বিনামকঃ ॥

পৌষমাঘাদিনামাঙ্কিতমিত্যর্থঃ। পৌষাদিপদপ্রবৃত্তিনিমিত্ত-ঞ্চাহ ব্রহ্মগুপ্তঃ। মেষগরবিসংক্রান্তির্যত্র শশিমাসে ভবতি তচ্চৈত্রং বৈশাখাদ্যাশ্চৈবং বৃষাদিসংক্রান্তিযোগেন। এতচ্চাধিমাসাব্যাপকং তত্রাপি দ্বিরাষাঢ়ঃ স বিজ্ঞেয় ইত্যাদাবাষাঢ়াদিপদপ্রয়োগাৎ। তস্মাদন্যদেবা-ধিমাসব্যাপকং প্রবৃত্তিনিমিত্তং বদন্তি ॥ ৯২ ॥

মীনস্থরবিপ্রারব্ধশুক্লপ্রতিপদাদিদর্শান্তশ্চান্দ্রশ্চৈত্র

ইত্যুক্তেরিত্যাশঙ্ক্যাহ তত্রাপীতি। ন চ দ্বিরাষাঢাদিপদপ্রয়োগো গৌণ এবেতি বাচ্যং যুগপদ্বৃত্তিদ্বয়বিরোধাৎ মিথুনস্থরবিপ্রারব্ধশুক্ল প্রতিপদা-দিদর্শান্তত্বরূপৈকলক্ষ্যতাবচ্ছেদকপুরস্কারেণাজহৎস্বার্থলক্ষণয়া তৎসমর্থ-নেঽপি মলমাসমৃতস্য সাংবৎসরিকসপিণ্ডনযোঃ করণমনুপপন্নং স্যাৎ মাসবিশেষচিহ্নিতমৃতাহে তয়োর্বিধানাৎ মলমাসেঽপি সাংবৎসরিক-সাপিণ্ডনাদিবিরোধশ্চ স্যাৎ। তথা। পক্ষদ্বয়েঽপি সংক্রান্তির্যদি ন স্যাৎ সিতাসিতে। তদা তন্মাসবিহিতমুত্তরে মাসি কারয়েদিত্যনেন বৈশাখত্বাদিপুরস্কারেণ বিহিতকর্ম্মণামুত্তরবৈশাখাদিকর্ত্তব্যত্বাভিধানাৎ মলিম্লুচস্য বৈশাখাদিসংজ্ঞাভিধানানুপপত্তিশ্চ স্যাৎ অতঃ সোঽপি বৈশাখাদিসংজ্ঞক এবেতি। তথাচোক্তম্। একসংজ্ঞৌ যদা মাসৌ স্যাতাং সংবৎসরে ক্বচিৎ। তত্রাদ্যে পিতৃকার্য্যাণি দেবকার্য্যাণি চোত্তরে॥ ইতি। আদ্যে মলমাসে পিতৃকার্য্যাণি সপিণ্ডীকরণান্ত-প্রেতকার্য্যাণি মলমাসমৃতসাংবৎসরিকপুত্রজন্মাদিনিমিত্তকাভ্যুদয়শ্রাদ্ধানি চ। ততশ্চ উক্তবচনে বিনামক ইত্যস্য মলিম্লুচাদিবিরুদ্ধনামক ইত্যর্থঃ। বিনামকৈরিতি তৃতীয়ান্ত এব কালমাধবীয়ে পাঠঃ ॥ ৯৩ ॥

মীনস্থেতি। এতচ্চ লক্ষণং ক্ষয়মাসাব্যাপকং তথাহি। অসংক্রান্তমা-সোঽধিমাসঃ স্ফুটঃ স্যাদ্দ্বিসংক্রান্তমাসঃ ক্ষয়াখ্যঃ কদাচিৎ। ক্ষয়ঃ কার্ত্তিকাদিত্রয়ে নান্যতঃ স্যাত্তদা বর্ষমধ্যেঽধিমাসদ্বয়ং স্যাদিত্যনেন

ইত্যাদি। ন চ নক্ষত্রেণ যুক্তঃ কালঃ সাস্মিন্ পৌর্ণমাসীতি

ক্ষয়মাসস্য দ্বিসংক্রান্তত্বাৎ তত্র প্রতিপদাদেরারম্ভকাভাবাৎ এবমেতল্লক্ষণাদয়ে ক্ষয়মাসযুতাব্দে মাসলোপোঽপি স্যাৎ। যথা প্রতিপদি ধনুঃসংক্রান্তিরমাবাস্যায়াঞ্চ মকরসংক্রান্তিস্তত্র ক্ষয়মাসস্য বৃশ্চিকরব্যারব্ধত্বেন মার্গশীর্ষত্বাৎ পরস্য চ মাসস্য মকরস্থরব্যারব্ধত্বেন মাঘত্বাৎ ধনুঃস্থরবিপ্রারব্ধমাসাভাবাৎ পৌষলোপ ইতি। তথাচ সতি তদ্বর্ষমধ্যে তন্মাসবিহিততিথিকৃত্যসাংবৎসরিকশ্রাদ্ধাদীনাং লোপে প্রতিবর্ষং তৎকর্ত্তব্যতাবোধকবিধিবিরোধশ্চ স্যাৎ। তস্মাদেতৎ পরমতং অতএব বদন্তীত্যুক্তং কিন্তু ব্রহ্মগুপ্তলক্ষণমেব সাধীয়ো গ্রন্থকৃদভিপ্রেতমিতি মন্তব্যম্। তত্র ক্ষয়মাসস্য মাসদ্বয়াত্মকতয়া মাসদ্বিতয়বিহিতকর্ম্মণাং তত্র কর্ত্তব্যত্বেন তন্মাসস্য তদ্বিহিতকর্ম্মণাঞ্চ লোপাভাবাৎ উক্তদোষানবকাশাৎ। তথাচ হিমাদ্রিকালমাধবীয়য়োর্জ্যোতিষমিতি কৃত্বা লিখিতম্। মাসদ্বয়াশ্রিতং কর্ম্ম ক্ষয়মাসে তু তৎ স্মৃতম্। ইতি। অত্র চ ক্ষয়মাসে জননে মরণে বা মাসবিশেষপরিগ্রহার্থমাহ হেমাদ্রিকালমাধবীয়য়োর্জ্যোতিষম্। তিথ্যর্দ্ধে প্রথমে পূর্ব্বে দ্বিতীয়ার্দ্ধে তথোত্তরঃ। মাসাবিতি বুধৈশ্চিন্ত্যৌ ক্ষয়মাসস্য মধ্যগৌ॥ ইতি। তেন ক্ষয়মাসীয়তিথীনাং পূর্ব্বার্দ্ধে জননমরণয়োঃ পূর্ব্বমাসস্য উত্তরার্দ্ধে জননমরণয়োরুত্তরমাসস্য পরিগ্রহঃ। ন চ মলমাসস্য লক্ষণাক্রান্তত্বাভাবাৎ অমাসত্বে পূর্ব্বোক্ততত্তদ্দোষাপত্তিরিতি বাচ্যম্। দ্বিরাষাঢ়ঃ স বিজ্ঞেয়ো বিষ্ণুঃ স্বপিতি কর্কটে। ইত্যনেন তত্র গৌণাষাঢ়াদিপদপ্রয়োগেনাষাঢ়াদিবিহিতকর্ম্মণাং অসতি বাধকে কর্ত্তব্যত্বাতিদেশাৎ কস্যাপি দোষস্যাভাবাদিতি সুধীভির্ব্বিভাবনীয়ম্। স্মার্ত্তাস্তু ক্ষয়মাসস্য ন মাসদ্বয়াত্মকতা কিন্তু পূর্ব্বমাস এব সঃ। তথাচ যত্র প্রতিপদি ধনুঃসংক্রান্তিঃ অমাবাস্যায়াং মকরসংক্রান্তিস্তত্র ক্ষয়মাসস্য বৃশ্চিকস্থরব্যারব্ধত্বেন মার্গশীর্ষত্বমেব ন পৌষত্বমপি। মীনাদিস্থো রবির্যেষামারম্ভপ্রথমক্ষণে। ভবেত্তেঽব্দে চান্দ্রমাসাশ্চৈত্রাদ্যা দ্বাদশ স্মৃতাঃ॥ ইতি ব্যাসোক্তেঃ। ততশ্চ পরমাসস্য মকরস্থরব্যারব্ধ-

পাণিনিস্মরণাৎ। চিত্রানক্ষত্রযুক্তা পৌর্ণমাস্যস্মিন্নিতি

---

ত্বেঽপি ন মাঘত্বং কিন্তু পূর্ব্বরাশিস্থরব্যারম্ভযোগ্যতয়া পৌষত্বমেব এবং তত্রাব্দে উক্তযোগ্যতয়োত্তরোত্তরমাসানাং মাঘাদিত্বং তেন মাঘাদি-বিহিততত্তৎকর্ম্মণামুত্তরোত্তরমাসকর্ত্তব্যতা। এতচ্চ সোঽনায়তন ইতি কাঠকশ্রুতিবলাৎ কল্প্যতে। তথাহি স মলমাসোঽনায়তনঃ অপ্রতিনিয়তস্থানকঃ কদাচিদ্বৈশাখোত্তরং কদাচিচ্চ জ্যৈষ্ঠাষাঢ়াদ্যুত্তর-মপি তৎসম্ভবাদিতি শ্রুত্যর্থঃ। তেন মলমাসস্য বিশিষ্যাপ্রতিনি-য়তস্থানত্বাভিধানাৎ তদিতরমাসানাং প্রতিনিয়তস্থানত্বং প্রতিপন্নম্। প্রতিনিয়তস্থানত্বঞ্চ পৌষস্য মার্গশীর্ষোত্তরত্বং মাঘাদেশ্চ পৌষাদ্যুত্তরত্ব-মিতি। এতচ্চ স্বরূপযোগ্যতাশ্রয়ণং বিনা ন নির্ব্বহতীতি অন্যথা ক্ষয়মাসস্য মাসদ্বয়াত্মকত্বে উক্তবিষয়ে পৌষস্য মার্গশীর্ষোত্তরত্বাভাবাৎ উক্তশ্রুতিবিরোধাপত্তেঃ। ক্ষয়মাসমৃতস্য শ্রাদ্ধাদৌ পূর্ব্বপরমাসয়ো-রন্যতরপরিগ্রহেঽনধ্যবসায়াপত্তেশ্চ। ন চ তিথ্যর্দ্ধে প্রথমে পূর্ব্ব ইত্যাদ্যুক্তবচনাৎ তিথিপূর্ব্বাপরার্দ্ধমরণভেদেন পূর্ব্বাপরান্যতরমাস-পরিগ্রহ ইতি বাচ্যং এতদ্বচনস্য দাক্ষিণাত্যসংগ্রহকর্ত্তৃপ্রণীতত্বেন মুনি-প্রণীতত্বাভাবাদপ্রামাণ্যাৎ। ধনুঃস্থরবিপ্রারব্ধমাসাভাবাৎ পৌষলোপা-ভ্যুপগমে চ পূর্ব্বাব্দপৌষমৃতস্য প্রত্যাব্দিকশ্রাদ্ধলোপাপত্তেঃ। তচ্ছ্রা-দ্ধস্য মৃতমাসীয়মৃততিথিকর্ত্তব্যত্বোপদেশাৎ। এবঞ্চ সতি প্রতিবর্ষ-তৎকর্ত্তব্যতাবোধকবিধিবিরোধশ্চ স্যাদিতি। এবং কার্ত্তিকাদিক্ষয়-পক্ষেঽপি উক্তস্বরূপযোগ্যতাবলম্বনেন উত্তরোত্তরমাসানাং কার্ত্তিকাদিত্ব-মিতি। এবং যত্রাব্দে আশ্বিনতদুত্তরবৈশাখসংক্রান্তৌ কার্ত্তিকশ্চ দ্বিসংক্রান্তস্তত্রাশ্বিনো ভানুলঙ্ঘিতো ন মলমাসঃ। ঘটকন্যাগতে সূর্য্যে বৃশ্চিকে বাথ ধন্বিনি। মকরে বা তথা কুম্ভে নাধিমাসং বিদুর্বুধাঃ॥ ইতি কন্যায়াং মলমাসনিষেধস্য এতদ্বিষয়ত্বাৎ কিন্তু বৈশাখ এব মল-মাসঃ কার্ত্তিকশ্চ ক্ষয়ঃ তদা চ ভানুলঙ্ঘিত এক এবাশ্বিনঃ ন তু মল-মাসবৎ তস্য ক্রমিকমাসদ্বয়রূপতা। ত্রয়োদশাখ্যং শ্রুতিরাহ মাসং চতুর্দশঃ ক্বাপি ন দৃষ্টপূর্ব্বঃ। একত্র মাসদ্বিতয়ং যদি স্যাৎ বর্ষেঽধিকং

ব্যুৎপত্ত্যা যৌগিকত্বং চৈত্রাদিশব্দানাং নক্ষত্রযোগস্য ব্যভি-চারাৎ ॥ ৯৪ ॥

উক্তঞ্চ জ্যোতিষে। অন্ত্যোপান্ত্যৌ ত্রিভৌ জ্ঞেয়ৌ ফাল্গুনশ্চ ত্রিভো মতঃ। শেষা মাসা দ্বিভা জ্ঞেয়াঃ কৃত্তিকা-

তত্র পরোঽধিমাসঃ॥ ইত্যনেন বর্ষে চতুর্দ্দশমাসনিষেধাৎ। এবং সত্যত্র ক্ষয়মাসস্য কন্যাস্থরব্যারব্ধত্বেঽপি কার্ত্তিত্বমেব তচ্চ যোগ্যতা-বলম্বনেনৈব সমর্থনীয়মিত্যাহুঃ। ন চেতি। নক্ষত্রেণ যুক্তকাল ইতি। প্রথমসূত্রেণ চিত্রানক্ষত্রযুক্তঃ কালোঽত্রেতি ব্যুৎপত্ত্যা চিত্রাপদোত্তরমণ্-প্রত্যয়েন চৈত্রীপদেন পূর্ণিমা লব্ধা। সাস্মিন্ পৌর্ণমাসীতি দ্বিতীয়সূত্রেণ চ চৈত্রীপদাৎ পুনরণ্‌প্রত্যয়েন চৈত্রপদাৎ চান্দ্রচৈত্রো মাসো লব্ধ ইতি চৈত্রপদস্য তত্র যৌগিকত্বং এবং বৈশাখাদিপদানামপি বিশাখা-নক্ষত্রযোগাৎ বৈশাখাদৌ যৌগিকত্বমিত্যর্থঃ॥ ৯৪ ॥

ব্যভিচারং দর্শয়তি উক্তঞ্চেতি। অন্ত্যোপান্ত্যাবিতি। কৃত্তিকাদি-ব্যবস্থয়া ইত্যভিধানাৎ অন্ত্যোপান্ত্যাবাশ্বিনভাদ্রৌ পৌর্ণমাস্যাং ত্রিভৌ নক্ষত্রত্রয়যুক্তৌ ফাল্গুনশ্চ পৌর্ণমাস্যাং ত্রিভঃ তচ্ছেষাঃ কার্ত্তিকাদয়ো নব মাসাঃ পৌর্ণমাস্যাং দ্বিভাঃ কৃত্তিকারোহিণ্যাদিরূপদ্বিনক্ষত্রযুক্তা ইত্যর্থঃ। ন চ কৃত্তিকাপদেন কৃত্তিকারোহিণ্যোরন্যতরদুপলক্ষ্যতে এবমন্যেষ্বপি মাসেষ্বিতি বাচ্যং অন্যতরযোগস্যাপি ব্যভিচারাৎ বচনস্য প্রায়িকত্বাৎ। তথাচ ব্রহ্মপুরাণে। আগ্নেয়ন্তু যদা ঋক্ষং কার্ত্তিক্যাং ভবতি ক্বচিৎ। মহতী সা তিথিঃ প্রোক্তা স্নানদানেষু চোত্তমা॥ যদা যাম্যন্তু ভবতি ঋক্ষং তস্যাং তিথৌ ক্বচিৎ। তিথিঃ সাপি মহাপুণ্যা মুনিভিঃ পরিকীর্ত্তিতা॥ প্রাজাপত্যং যদা ঋক্ষং তিথৌ স্যাত্ত্যাং নরাধিপ। সা মহাকার্ত্তিকী প্রোক্তা দেবানামপি দুর্লভা॥ ইতি। আগ্নেয়ং কৃত্তিকা যাম্যং ভরণী প্রাজাপত্যং রোহিণী অতঃ কার্ত্তিক্যাং ভরণীযোগেঽপি কার্ত্তিকত্বং প্রত্যুত ভবন্মতে আশ্বিনত্বমেব তস্য স্যাদিতি। ন চ যথাঽপচত্যপি সূপকারে যদা কদাচিৎ পাককৃতি-

দিব্যবস্থয়া॥ ইত্যলং বহুনা। প্রকৃতমনুসরামঃ। চান্দ্রমাসাঙ্কিতত্বে হেত্বন্তরমাহ। যতস্তত্র বিধানেন ইতি।

---

যোগরূপযোগ্যতায়া পাচকপদপ্রয়োগতয়া যদাকদাচিত্তন্নক্ষত্রযোগরূপযোগ্যতয়া কার্ত্তিকাদিপদপ্রয়োগ ইতি বাচ্যং পাচকাদিপদৈকব্যক্তেরভাবাৎ প্রতিমাসীয়পৌর্ণমাসীব্যক্তীনাং ভেদাৎ যস্যাং ব্যক্তৌ নক্ষত্রালাভস্তস্যাং কদাচিদপি তন্নক্ষত্রযোগরূপায়া যোগ্যতায়া অসম্ভবাৎ। নব্যাস্তু সা বৈশাখস্যামাবাস্যায়া রোহিণ্যা সম্বধ্যতে ইতি শ্রুত্যা চান্দ্রবৈশাখাদীনাং বৃষাদিস্থরবিসংযোগিত্বপ্রতিপাদনাৎ তদনুসারেণ মলমাসসাধারণমেবং লক্ষণং ক্রিয়তে। মেষগরবিসংক্রান্তিরহিতসসংক্রান্তমাসাদিতরো মীনস্থরবিসংযোগী শশিমাসশ্চৈত্র ইতি। মীনস্থরবিসংযোগী শশিমাস এতাবন্মাত্রোক্তৌ ফাল্গুনেঽতিব্যাপ্তিরত ইতরান্তম্। ফাল্গুন স্তু মেষগরবিসংক্রান্তিরহিতঃ সন্ সসংক্রান্ত এব ন তদিতর ইতি তদ্ব্যাবৃত্তিঃ। সসংক্রান্তপদানুপাদানে মলমাসচৈত্রাব্যাপ্তিঃ তস্য মেষগরবিসংক্রান্তিবিহিতত্বেন তদিতরত্বাভাবাৎ। অতঃ সসংক্রান্তেতি ভেদপ্রতিযোগিকোটৌ নিবেশিতম্। মলমাসস্য চ সসংক্রান্তত্বাভাবাদেব বিশিষ্টেতরত্বমক্ষুণ্ণমিতি। মীনস্থরবিসংযোগীত্যনুপাদানে মলমাসসামান্যস্যৈব চৈত্রত্বাপত্তিরতস্তদুপাদানম্। শশিমাস ইত্যনুপাদানে সৌরসাবনাদাবতিব্যাপ্তিরিতি তদুপাদানম্। এবং বৃষগরবিসংক্রান্তিরহিতঃ সসংক্রান্তমাসেতরো মেষস্থরবিসংযোগী শশিমাসো বৈশাখ ইত্যাদিক্রমেণ বৈশাখাদিমাসানাং লক্ষণং বোধ্যম্। ইত্থঞ্চ একস্যাপি ক্ষয়মাসস্য উভয়ার্কসঞ্চারেণোভয়লক্ষণব্যাপ্ত্যা উভয়মাসত্বং সিদ্ধম্। তথাহি যত্র প্রতিপদি ধনুঃসংক্রান্তিরমাবাস্যায়াঞ্চ মকরসংক্রান্তিস্তত্র ক্ষয়মাসস্য ধনুর্গরবিসংক্রান্তিসহিতত্বেন তদ্রহিতত্বাভাবাৎ ধনুর্গরবিসংক্রান্তিরহিতঃ সময়ঃ সসংক্রান্তস্তদিতরত্বাৎ বৃশ্চিকধনুঃস্থরবিসংযোগিত্বাচ্চ মার্গশীর্ষলক্ষণব্যাপ্তিঃ। এবং তন্মাসস্য মকরগরবিসংক্রান্তিসহিতত্বেন তদ্রহিতত্বাভাবাৎ ইতরান্তরসত্ত্বেন ধনুঃস্থরবিসংযোগিত্বেন চ পৌষলক্ষণব্যাপ্তিরপীতি এবং ক্ষয়মাসান্তরেঽপি বোধ্যম্। ক্ষয়মাসমরণে তু। তিথ্যর্দ্ধে

বিধানেন শাস্ত্রেণ স চান্দ্রো মাসঃ প্রকীর্ত্তিতঃ ॥ ৯৫ ॥

তচ্চ ইন্দ্রাগ্নী যত্র হূয়েতে ইত্যাদ্যুক্তমেবান্যদপি পঠন্তি। যথা পিতামহঃ। আব্দিকে পিতৃকৃত্যে চ মাসশ্চান্দ্রমসঃ স্মৃতঃ। বিবাহাদৌ স্মৃতঃ সৌরো যজ্ঞাদৌ সাবনো মতঃ ॥ পারস্করঃ। বিবাহোৎসবযজ্ঞেষু সৌরো মাসঃ প্রশস্যতে। পার্ব্বণে ত্বষ্টকাশ্রাদ্ধে চান্দ্রমিষ্টং তথাব্দিকে ॥ নন্থু সৌরাঙ্কিতং শ্রাদ্ধমাহ সত্যব্রতঃ। যস্মিন্ রাশিগতে সূর্য্যে বিপত্তিং যান্তি মানবাঃ। তেষাং

প্রথমে পূর্ব্বো দ্বিতীয়ার্দ্ধে তথোত্তরঃ। মাসাবিতি বুধৈশ্চিন্ত্যৌ ক্ষয়-মাসস্য মধ্যগৌ ॥ ইতি বচনেন তিথিপূর্ব্বাপরার্দ্ধভেদেন মরণে পূর্ব্বা-পরমাসয়োরেকতরপরিগ্রহঃ। ন চৈতদ্বচনস্যানাকরত্বশঙ্কা কালমাধ-বীয়াদিষু পাশ্চাত্যস্মৃতিষু লিখিতত্বাৎ। এবং চৈত্রাদিপদার্থে নির্ণীতে চৈত্রপৌর্ণমাস্যন্তত্রিংশত্তিথিপ্রচয়ো গৌণশ্চৈত্রঃ। তথা বৈশাখ-পৌর্ণমাস্যন্তত্রিংশত্তিথিপ্রচয়ো গৌণবৈশাখ ইত্যাদিক্রমেণ গৌণ-চৈত্রাদিমাসানাং লক্ষণানি বেদিতব্যানীতি প্রোচুঃ। হেত্বন্তরমাহেতি। চক্রবৎ পরিবর্ত্তেতেতি। হেতোরেকস্য প্রাগুক্তত্বাদিতি ভাবঃ ॥ ৯৫ ॥

তচ্চেতি। শাস্ত্রঞ্চেত্যর্থঃ। ইদঞ্চ ন সম্যক্ দ্বয়োরেব বচনয়োর্ল ঘু-হারীতোক্তত্বেন স্বোক্তার্থে স্ববাক্যান্তরস্য প্রমাণত্বপ্রদর্শনানৌচিত্যাৎ কিন্তু বিধানেন সা বৈশাখস্যামাবাস্যা যা রোহিণ্যা সম্বধ্যতে। ইতি শ্রুত্যেত্যর্থঃ। অনয়া হি শ্রুত্যা বৃষস্থরবিসম্বন্ধিন্যা অমাবাস্যায়া বৈশাখীয়ত্বপ্রতিপাদনেন চান্দ্রবৈশাখ এব বৈশাখপদস্য শক্তের্গ্রাহিত-ত্বাৎ অমাবাস্যায়াং সূর্য্যাচন্দ্রমসোরেকরাশ্যবস্থাননিয়মেনামাবাস্যায়াং রোহিণীযোগে বৃষে সূর্য্যাবস্থানস্যাবশ্যম্ভাবাৎ। সৌরবৈশাখে তু রবে-র্মেষস্থত্বেন তদসম্ভবাদিতি। বিবাহাদাবিত্যাদিপদাৎ চূড়াকরণাদীনাং পরিগ্রহঃ। উদগয়নে আপূর্য্যমাণে পক্ষে কল্যাণে নক্ষত্রে চূড়োপ-নয়নগোদানবিবাহা ইতি। গোভিলেন সৌরমাসঘটিতোত্তরায়ণে চূড়া-

তত্রৈব কর্ত্তব্যা পিণ্ডদানোদকক্রিয়া ॥ নৈতস্যামূলত্বাৎ সমূলত্বেঽপি প্রথমাব্দে দ্বাদশে মাসি অধিমাসপাতে একনামত্বান্মাসদ্বয়স্য কিং দ্বাদশে শ্রাদ্ধং ত্রয়োদশে বেতি সন্দেহে বচনমিদম্। এবম্। বর্ষে বর্ষে তু যচ্ছ্রাদ্ধং মাতাপিত্রোর্ম্মৃতাহনি। মলমাসেঽপি কর্ত্তব্যং ব্যাঘ্রস্য বচনং যথা ॥ ইতি ব্যাঘ্রবচনমপ্যমূলং সমূলত্বেঽপি নিশ্চিতমূললঘুহারীতবচনস্বরসাদেতাদৃশী ব্যাখ্যা। বর্ষে বর্ষে ত্বিতি। প্রত্যাব্দিকমিত্যর্থঃ ॥ ৯৬ ॥

তচ্চ প্রথমং প্রত্যাব্দিকং শ্রাদ্ধং মলমাসেঽপি কার্য্যমেব

দীনাং বিধানাৎ। যজ্ঞপদং বৎসরাদিসাধ্যযজ্ঞপরম্। তত্র বৎসরগণনা ত্রিংশদ্দিনাত্মকসাবনমাসেনেত্যর্থঃ। আদিপদাৎ লৌকিকব্যবহারকর্ম্মণাং ঋণাদীনাং গ্রহণম্। সত্রাণ্যুপাস্যান্যথ সাবনেন লৌক্যঞ্চ যৎ স্যাদ্ব্যবহারকর্ম। ইতি বচনাৎ। উৎসবঃ পুংসবনাদিঃ। যজ্ঞঃ শরদ্বিহিতাগ্রয়ণেষ্টিঃ। চাতুর্ম্মাস্যযাগাশ্চত্বারঃ শাকমেধাদয়ঃ। চান্দ্রমিষ্টমিতি। চান্দ্রপদং গৌণমুখ্যোভয়চান্দ্রপরম্। তেন পাব্বণেঽষ্টকাশ্রাদ্ধে চ। পয়োমূলফলৈঃ শাকৈঃ কৃষ্ণপক্ষে চ সর্ব্বদা। ইত্যাদ্যুক্তব্রহ্মপুরাণীয়তিথিকৃত্যত্বাৎ গৌণচান্দ্রমিষ্টম্। যতস্তত্র বিধানেন ইত্যুক্তহারীতৈকবাক্যতয়া চ প্রত্যাব্দিকে মুখ্যচান্দ্রমিষ্টমিত্যর্থঃ। এতেনাষ্টকাদিসাহচর্য্যাৎ আব্দিকেঽপি গৌণচান্দ্রমিষ্টমিতি নিরস্তম্। বলবদুক্তহারীতবচনেন সাহচর্য্যস্যাপ্রয়োজকীকৃতত্বাৎ। অন্যথা হ্যধিমাসে ত্রয়োদশমাস্যেব বার্ষিকস্য নির্ণীতত্বাৎ। তত্র কৃষ্ণপক্ষমরণে দ্বাদশে মাসি বার্ষিকং শুক্লপক্ষমরণে চ পূর্ব্বমাসমৃতত্বাৎ ত্রয়োদশমাসীতি বৈষম্যং স্যাৎ। নন্বিতি। শ্রাদ্ধং প্রত্যাব্দিকম্। হারীতবচনস্বরসাদিতি। আদ্যং মুক্ত্বা তু বৎসরমিতি হারীতেনাত্ত্যাধিমাসপাতে দ্বাদশে মাসি মলমাস এব প্রথমাব্দিকবিধানাদিতি ভাবঃ ॥ ৯৬ ॥

প্রত্যাব্দিকবিশেষ এব প্রকৃতে বিবক্ষিত ইত্যাহ তচ্চেতি। প্রথমং

দ্বিতীয়াদিপ্রত্যাব্দিকং মলমাসে পতিতে প্রকৃতে মাসি কর্ত্তব্যমেব ন ত্বমাবাস্যাশ্রাদ্ধবন্নিবর্ত্তত ইত্যর্থঃ। অতশ্চান্দ্রমাসাঙ্কিতত্বাৎ শ্রাদ্ধস্যাধিমাসপাতে একনামত্বান্মাসদ্বয়স্য ত্রয়োদশে প্রকৃতে মৃতাহে কৃতং ভবত্যেবেতি সিদ্ধম্। প্রথমাব্দিকং দ্বাদশে মাসি কর্ত্তব্যমিত্যুক্তং যৎ তদন্ত্যাধিমাসবিষয়ত্বং ন মধ্যাধিমাসবিষয়মিতি স্পষ্টয়তি অসংক্রান্তেঽপীতি। অসংক্রান্তে রবৌ মলমাস ইত্যর্থস্তথৈবাসংক্রান্ত এব রবৌ সপিণ্ডীকরণাৎ পূর্ব্বং মাসিকং কর্ত্তব্যম্। পূর্ব্বপদং সপিণ্ডনোত্তরপার্ব্বণাখ্যমাসিকশ্রাদ্ধনিষেধার্থম্। গর্ভে গর্ভকৃত্যে পুংসবনাদৌ বার্দ্ধুষিকৃত্যে বৈশ্যানাং গোভিলাদ্যুক্তে। পিণ্ডকর্ম্ম প্রেতপিণ্ডদানম্। পুনঃ সপিণ্ডীকরণগ্রহণং অপকৃষ্টসপিণ্ডীকরণার্থম্। শ্রাদ্ধমেব শ্রাদ্ধিকং স্বার্থে ঠক্। যৎকিঞ্চিদিত্যনেন পার্ব্বণাদিসকলশ্রাদ্ধনিষেধঃ। নিত্যমেকং হি সর্ব্বদেত্যনেন নিত্য-

প্রত্যাব্দিকং সপিণ্ডীকরণমিত্যর্থঃ। ননু সপিণ্ডীকরণস্য কথং প্রত্যাব্দিকত্বং ন হি সপিণ্ডীকরণং প্রতিবর্ষং ক্রিয়তে। ন চ প্রত্যাব্দিকপরতৈবাস্ত্বিতি বাচ্যং প্রতিসাংবৎসরিকস্য মলমাসকর্ত্তব্যত্বাভাবাৎ। তস্মিংস্তু প্রকৃতে মাসি কুর্য্যাৎ শ্রাদ্ধং যথাবিধি। ইত্যাদ্যুক্তেরিতি চেন্ন। প্রতিসংবৎসরং কুর্য্যান্মৃতাহনি তু সর্ব্বদা। তথা প্রত্যব্দং দ্বাদশে মাসীতি তথা প্রত্যব্দমিতরে কুর্য্যুরিতি তথা প্রতিসংবৎসরঞ্চৈব ইত্যাদিনানাবচনৈঃ প্রতিসংবৎসরং শ্রাদ্ধং কুর্য্যাদিতি বিধিঃ। তৎ প্রাপ্তঞ্চ প্রথমবর্ষীয়শ্রাদ্ধমনূদ্য পূর্ণে সংবৎসরে ইত্যাদিনা সপিণ্ডীকরণেতিকর্ত্তব্যতা বিধীয়তে এবং তৎপ্রাপ্তদ্বিতীয়াদিবর্ষশ্রাদ্ধান্যনূদ্য তত্র তত্র ত্রয়ং কুর্য্যাদ্বর্জ্জয়িত্বা মৃতাহনীত্যনেনৈকোদ্দিষ্টেতিকর্ত্তব্যতা বিধীয়তে। এবং তত্রৈব

শ্রাদ্ধমাত্রস্য প্রতিপ্রসবঃ। ইষ্টং যাগদানাদি তদপি নিত্যং কর্ত্তব্যমিত্যুক্তম্। পূর্ত্তং বাপী কূপতড়াগাদি। বাশব্দোঽগ্ন্যাধেয়মিত্যাদি জ্যোতিঃপরাশরোক্তকর্ম্মনিষেধার্থঃ। ঋষ্যশৃঙ্গঃ। সংবৎসরাতিরেকো বৈ মাসো যশ্চ ত্রয়োদশঃ। তস্মাত্ত্রয়োদশং শ্রাদ্ধং ন কুর্য্যান্নোপতিষ্ঠতে॥ এতচ্চ প্রথমেঽব্দে দ্বাদশে মাসি অধিমাসপাতে লঘুহারীতসমানবিষয়ম্। ন তু পার্ব্বণনিষেধার্থমিদং কৃতৈকদ্বিকত্রিকমাত্রপার্ব্বণপুরুষভেদেন ত্রয়োদশত্বানুপপত্তেঃ। ন বা মধ্যাধিমাসমাসিকবিষয়ং তত্র ত্রয়োদশে মাসি মাসিকার্থং দিনমেকং বর্দ্ধয়েদিতি বিষ্ণুবচনবিরোধাদিতি। মধ্যেঽধিমাসাক্রান্তে নিষেধো ভবিষ্যতীতি চেন্ন তস্য ত্রয়োদশত্বানুপপত্তেঃ। পণপূরণাদিবস্তুবিস্যতীতি চেন্ন। তদা ত্রয়োদশে

শ্রাদ্ধেঽমাবাস্যাপ্রেতপক্ষমরণনিমিত্তেন সাগ্নিকৌরসক্ষেত্রজকর্তৃকত্বেন বা পার্ব্বণেতিকর্ত্তব্যতাভিধীয়তে ইতি সপিণ্ডনস্যাপি প্রতিসাংবৎসরিকত্বাৎ ন তু সপিণ্ডনস্য শ্রাদ্ধান্তরত্বমিতি সুধীভির্ব্বিভাবনীয়ম্। স্পষ্টয়তি। আদ্যং মুক্ত্বা তু বৎসরমিতি সামান্যেনোক্তং যত্তন্মধ্যাধিমাসনিষেধেন অন্ত্যাধিমাসবিষয়তয়া স্পষ্টয়তি। অসংক্রান্তেঽপীত্যনেনেত্যর্থঃ। পুনরিতি। পূর্ব্বার্দ্ধে সপিণ্ডীকরণস্য মলমাসকর্ত্তব্যত্বোপদেশাৎ পুনরিত্যর্থঃ। স্বার্থে ঠগিতি অত্র শ্রাদ্ধিকং শ্রাদ্ধার্হং বিবাহাদীতি সময়প্রকাশকৃৎ। ন বেতি মধ্যাধিমাসাব্দে ত্রয়োদশমাসিকং ন কর্ত্তব্যমিত্যর্থোঽপি নেত্যর্থঃ। মধ্যেঽধিমাসাক্রান্তে ইতি পূর্ব্বং ন বেত্যনেন মধ্যেঽধিমাসে সর্ব্বান্তিমমাত্রত্রয়োদশশ্রাদ্ধনিষেধঃ। অতএব ত্রয়োদশে মাসীতি দিনমেকং বর্দ্ধয়েদিত্যাদি সিদ্ধান্তিতম্। ইহ তু দিনমেকং বর্দ্ধয়েদিতি বচনাৎ ত্রয়োদশে মাসি শ্রাদ্ধমস্তু কিন্তু যত্রাব্দে মধ্যাধিমাসো যস্মিন্মাসে তস্মিন্নেব শ্রাদ্ধনিষেধঃ ইত্যাশঙ্কয়োর্দ্বয়োঃ পৃথগর্থঃ।

শ্রাদ্ধং কার্য্যং তদধিকং ভবেৎ। তথৈব মাসিকং পূর্ব্বমিত্যাদিবচনবিরোধাচ্চ ॥ ৯৭ ॥

বৃহস্পতিঃ। নিত্যনৈমিত্তিকে কুর্য্যাৎ প্রযতঃ সন্ মলিম্লুচে। তীর্থস্নানং গজচ্ছায়াং প্রেতশ্রাদ্ধং তথৈব চ ॥ নিত্যমত্রাহরহঃকর্ত্তব্যস্নানশ্রাদ্ধহোমাদি ন ত্বাবশ্যকত্বেন পার্ব্বণমপি উপক্রমোক্তনিত্যপরিভাষাস্বরসাৎ নৈমিত্তিকসহচরিতস্য নিত্যশব্দস্য তথা ব্যুৎপত্তেঃ গজচ্ছায়াপ্রেত-

---

পণপূরণাদীতি। পুরাণস্য ষোড়শাংশঃ পণঃ তত্র যথা সর্ব্বেষামেব পণানাং ষোড়শত্বং তথাত্রাপি সর্ব্বেষামেব মাসিকানাং ত্রয়োদশত্বং ভবিষ্যতীত্যর্থঃ। যদ্যপি যত্রাদ্যন্তাদিক্রমো নাস্তি তত্রৈব পণপূরণাদিন্যায়ঃ। ইহ তু প্রথমদ্বিতীয়াদিমাসিকক্রমোক্তেঃ অন্তিমস্যৈব ত্রয়োদশত্বপ্রাপ্ত্যা ন তদবসরস্তথাপি তুষ্যতু দুর্জ্জন ইতি ন্যায়েন তমপাঙ্গীকৃত্য সিদ্ধান্তয়তি তদেতি। অধিকমিতি। মধ্যে শ্রাদ্ধাকরণে দ্বাদশমাসাদধিকমাসানুপপত্তেরিতি ভাবঃ। তথৈবেতি। সর্ব্বেষামেব প্রেতমাসিকানাং মলমাসে প্রাপ্তিপ্রসবাদিত্যর্থঃ ॥ ৯৭ ॥

উপক্রমোক্তেতি। পূর্ব্বং ব্যাখ্যাতমেতৎ। ননু নিত্যপদস্যাহরহঃশ্রাদ্ধে পরিভাষা ভবিষ্যপুরাণেনোক্তাপত্তৌ বৃহস্পতেঃ কঃ স্বরস ইত্যত আহ নৈমিত্তিকেতি। বিশ্বামিত্রেণ নিত্যং নৈমিত্তিকং কাম্যং বৃদ্ধিশ্রাদ্ধং সপিণ্ডনমিত্যাদিনা দ্বাদশবিধশ্রাদ্ধগণনে নিত্যপদস্যাহরহঃশ্রাদ্ধপরতয়া দৃষ্টত্বাদ্ব্যুৎপত্তেরিত্যর্থঃ। নিত্যপদবৈয়র্থ্যমেব চ ব্যুৎপত্তিবীজং আবশ্যকপরত্বে নৈমিত্তিকত্বেনৈব গতার্থত্বাৎ। ন চ নৈমিত্তিকপদমেব কাম্যনৈমিত্তিকপরতয়া সংকোচ্যমিতি বাচ্যং নিত্যপদস্য পারিভাষিকার্থপরত্বেনৈব উপপত্তৌ সংকোচস্যান্যায্যত্বাৎ। অন্যথা নিত্যপদস্যাবশ্যকপরতামুপবর্ণ্য বৈয়র্থ্যভিয়া নৈমিত্তিকপদসংকোচে প্রক্ষালনাদ্ধি পঙ্কস্য ইতি ন্যায়ে বিষয়তাপাতাৎ। প্রতিবন্ধিমাহ

শ্রাদ্ধয়োঃ পৃথগুপাদানবৈয়র্থ্যাচ্চ। কিঞ্চ বৃহস্পতি-নৈবোপক্রমেঽহরহঃক্রিয়মাণস্য নিত্যস্যোক্তত্বাৎ। যথা। নিত্যং নৈমিত্তিকং কাম্যং বৃদ্ধিশ্রাদ্ধং তথৈব চ। পার্ব্বণঞ্চেতি মনুনা শ্রাদ্ধং পঞ্চবিধং স্মৃতম্॥ নৈমিত্তিকং পারিভাষিকমপি একোদ্দিষ্টং ন গ্রাহ্যং প্রেতশ্রাদ্ধস্য পৃথগুপাদানবৈয়র্থ্যাৎ কিন্ত্বভ্যুদয়ম্। যথা মার্কণ্ডেয়-পুরাণে। নৈমিত্তিকমথো বক্ষ্যে শ্রাদ্ধমভ্যুদয়ার্থকম্। তথা চন্দ্রসূর্য্যোপরাগাদিনিমিত্তং শ্রাদ্ধাদি তথা অপাট-বাদিনিমিত্তং শান্তিকর্ম্মাদি গ্রাহ্যম্। তথা দক্ষঃ। নৈমিত্তিকানি কাম্যানি নিপতন্তি যথা যথা। তথা তথৈব কার্য্যাণি ন কালস্তু বিধীয়তে॥ নৈমিত্তিকানি কাম্যানি

---

গজচ্ছায়েতি। গজচ্ছায়া উপরাগশ্রাদ্ধম্। তথাচ বৃহস্পতিঃ। সৈংহি-কেয়ো যদা ভানুং গ্রসতে পর্ব্বসন্ধিষু। গজচ্ছায়া তু সা প্রোক্তা পিতৃণাং দত্তমক্ষয়ম্॥ ইতি। প্রেতশ্রাদ্ধং প্রেতৈকোদ্দিষ্টশ্রাদ্ধং তয়ো-রপি আবশ্যকত্বাদিতি ভাবঃ। নিত্যপদস্য পারিভাষিকার্থপরতায়াং বৃহস্পতেরপি স্বরসং দর্শয়তি কিঞ্চেতি। পারিভাষিকমপীতি। একো-দ্দিষ্টস্তু যচ্ছ্রাদ্ধং তন্নৈমিত্তিকমুচ্যতে ইত্যনেনেতি শেষঃ। কিন্ত্বিতি। অভ্যুদয়ং পুত্রজন্মনিমিত্তকশ্রাদ্ধম্। ননু শান্তিকর্ম্মণাং মলমাসে নিষেধ-প্রসঙ্গ ইত্যত আহ যথেতি। গ্রাহ্যমিতি। বচনস্থনৈমিত্তিকপদেনেতি শেষঃ। নিত্যনৈমিত্তিকয়োর্দ্বয়োরেব নৈমিত্তিকপদার্থত্বাদিতি ভাবঃ। অত্র মুন্যন্তরসংবাদমপ্যাহ তথেতি। নৈমিত্তিকানি কাম্যানি নৈমিত্তিকরূপাণি কাম্যানীত্যর্থঃ। প্রায়শ্চিত্তাদীতি। আদিনা শান্তিকর্ম্মকারীর্য্যাদীনাং সংগ্রহঃ। দেবতাদর্শনেঽপীতি। অত্রায়ং ভাবঃ। শুচঃ স্যুর্নষ্টভা-র্গবে ইত্যস্যার্থবাদত্বেন বিধিঃ কল্পনীয়ঃ স চ ত্যজেদিত্যুত্তরবাক্যশ্রুত-ত্বাৎ মলমাসাদাবনাবৃত্তং অনাদিদেবতাদর্শনং ত্যজেদিত্যেবংরূপঃ

প্রায়শ্চিত্তাদীনি। তীর্থস্নানমপি আবৃত্তম্। যথা জ্যোতিষম্। অনাদিদেবতাং দৃষ্ট্বা শুচঃ স্যুর্নষ্টভার্গবে। মলমাসেঽপ্যনাবৃত্তং তীর্থস্নানং বিবর্জ্জয়েৎ॥ অনাবৃত্তং দেবতাদর্শনেঽপি সম্বধ্যতে। তথা জ্যোতিঃপরাশরঃ। বালে বা যদি বা বৃদ্ধে শুক্রে চাস্তমুপাগতে। মলমাস ইবৈতানি বর্জ্জয়েদ্দেবদর্শনম্॥ মলমাস ইবেত্যনাবৃত্তমিত্যর্থঃ। অত্র মলমাসেঽমাবাস্যায়াং পার্ব্বণং কর্ত্তব্যমিতি কেচিৎ॥ ৯৮॥

তদযুক্তং সর্ব্বকর্ম্মসু তং ত্যজেদিতি সপিণ্ডীকরণাদূর্দ্ধমিতি নিষেধাৎ নিত্যত্বেন প্রতিপ্রসবস্য পূর্ব্বং নিরস্তত্বাৎ।

---

অর্থবাদে অনাবৃত্তং তীর্থস্নানমপীতি দ্বিতীয়বাক্যস্থাপিকারেণানাবৃত্তমিত্যস্যানুষঙ্গেণ দৃষ্ট্বেতি ক্রিয়াবিশেষণতয়া দর্শনেঽনাবৃত্তত্বাবগমাৎ তৎকল্পনীয়বিধাবপি দর্শনেঽনাবৃত্তত্বসম্বন্ধ ইতি। উক্তার্থে প্রমাণমাহ যথেতি। মলমাস ইবেতি। বর্জ্জয়েদ্দেবদর্শনমিত্যনেনৈব সিদ্ধৌ যন্মলমাস ইবেতি কৃতং তদেবং বোধয়তি প্রাগুক্তবচনেঽনাদিদেবতাং দৃষ্ট্বেত্যত্র দেবতাদর্শনেঽনাবৃত্তত্বসম্বন্ধোঽস্তীতি যথেত্যনেন মলমাসে যথাঽনাবৃত্তং দেবদর্শনং ত্যজেৎ তথাবিধদেবদর্শনং শুক্রবাল্যাদাবপি ত্যজেদিত্যর্থলাভাৎ। শুক্রস্য বাল্যাদিকন্তু। পক্ষং বৃদ্ধস্তু পূর্ব্বেণ দশাহং পশ্চিমেন তু। প্রত্যগ্বালো দশাহানি পূর্ব্বেণ তু দিনত্রয়ম্॥ ইত্যাদি জ্যোতিরুক্তম্। বচনার্থস্তু প্রকরণাৎ শুক্রঃ পূর্ব্বেণ পূর্ব্বদিশ্যস্তমেষ্যন্ অস্তাৎ প্রাক্ পক্ষং বৃদ্ধঃ। পশ্চিমেন তু পশ্চিমায়াং দিশি ত্বস্তমেষ্যন্ প্রাক্ দশাহং বৃদ্ধঃ দশাহানি প্রত্যক্ পশ্চিমদিশি অস্তানন্তরং বালঃ। পূর্ব্বদিশি তু দিনত্রয়ং বাল ইতি॥ ৯৮॥

ননু যদি সর্ব্বকর্ম্মস্বেব নিষেধস্তদা প্রেতশ্রাদ্ধেঽপি স স্যাদিত্যাহ সপিণ্ডীকরণাদূর্দ্ধমিতীতি। তেন সপিণ্ডীকরণাদূর্দ্ধং সর্ব্বকর্ম্মস্বেব মল-

ন চ সাবকাশশ্রাদ্ধবিষয়োঽয়ং নিষেধঃ প্রমাণাভাবাৎ। মলং বদন্তি কালস্য মাসং কালবিদোঽধিকম্। নেহেতাত্র বিশেষেজ্যামন্ত্রাবশ্যকাদ্বিধেঃ॥ ইতি গৃহ্যপরিশিষ্টবচনাদিতি চেন্ন। এতস্যামূলত্বাৎ সমূলত্বেঽপ্যাবশ্যকপদস্য নিরবকাশবচনত্বাভাবাৎ। কিঞ্চ। ষষ্ট্যা তু দিবসৈর্ম্মাসঃ কথিতো বাদরায়ণৈরিতি মাসৈক্যেন পার্ব্বণস্যাপি সকৃদ্বিধানেন সাবকাশত্বাৎ সকৃৎকৃতে কৃতঃ শাস্ত্রার্থ ইতি ন্যায়াৎ প্রথমসাংবৎসরিকবৎ অন্যথা প্রকৃতে মাসি মৃতাহলাভাৎ দ্বিতীয়সাংবৎসরিকপ্রসঙ্গঃ। কিঞ্চ

---

মাসে নিষেধ ইতি স্ফুটমুক্তম্। তদা চৈকাদশাহীয়বৃষোৎসর্গো মলমাসেঽপি কর্ত্তব্য ইত্যায়াতি। নিরস্তত্বাদিতি। বচনস্থনিত্যপদস্যাহরহঃক্রিয়মাণার্থকতয়া প্রাগ্ব্যবস্থাপিতত্বাদিতি ভাবঃ। ন চ সাবকাশেতি। তথাচামাবাস্যাপার্ব্বণস্য নিরবকাশত্বান্ন নিষেধ ইতি ভাবঃ। মানাভাবাদিতি। নিরবকাশস্য মলমাসকর্ত্তব্যতায়াং প্রমাণসত্ত্ব এব নিষেধস্য সাবকাশবিষয়তয়া সঙ্কোচসম্ভবঃ। বস্তুতস্তু তত্রৈব প্রমাণাভাবাদিত্যর্থঃ। ননু সময়প্রকাশকালমাধবীয়াদিগ্রন্থেষু ধৃতত্বান্নামূলত্বমিত্যত আহ সমূলত্বেঽপীতি। ননু যদন্যস্মিন্ দিনে কর্ত্তুং ন শক্যতে তদেবাবশ্যকং তচ্চ নিরবকাশমেব। কিঞ্চ অধিমাসকে বিবাহং যাত্রাং চূড়াং তথোপনয়নাদি কুর্য্যান্ন সাবকাশং মাঙ্গল্যং ন তু বিশেষেজ্যামিতি। ভীমপরাক্রমবচনেন সাবকাশনিষেধান্নিরবকাশস্য কর্ত্তব্যতায়াং তদেব প্রমাণমস্তীত্যত আহ কিঞ্চেতি। প্রথমসাংবৎসরিকবদিতি। আদ্যং মুক্ত্বা তু বৎসরমিতি অসংক্রান্তেঽপি কর্ত্তব্যমিত্যাদিবচনাদস্ত্যাধিমাসে কৃতং প্রত্যাব্দিকং পুনঃ প্রকৃতে মাসি যথোক্তন্যায়ান্ন ক্রিয়তে ইত্যর্থঃ। অন্যথেতি। একস্মিন্ ষষ্টিদিবসাত্মকে মাসি সকৃৎকৃত ইতি ন্যায়াভাবে প্রকৃতে মাসি পুনঃ প্রত্যাব্দিকশ্রাদ্ধপ্রসঙ্গঃ প্রকৃতমাসস্য প্রথমাব্দীয়-

সন্ধ্যাপঞ্চমহাযজ্ঞাদীনাং নিরবকাশত্বেন নিষেধাবিষয়ত্বে নিত্যত্বেন প্রতিপ্রসববিধির্নি স্যাৎ॥ ৯৯॥

কিঞ্চ। রবিণা লঙ্ঘিতো মাসশ্চান্দ্রঃ খ্যাতো মলিম্লুচঃ। তত্র যদ্বিহিতং কর্ম্ম উত্তরে মাসি কার-

ত্বাদিত্যর্থঃ। ননু শুক্লপ্রতিপদাদিদর্শান্তশ্চান্দ্রমাস ইতি নিশ্চিতমতঃ ষষ্টিতিথিভির্ম্মাসদ্বয়মেব অতএব তস্মিংস্তু প্রকৃতে মাসীতি দ্বিতীয়ত্রিংশত্তিথৌ মাসপদপ্রয়োগঃ ষষ্ট্যা তু দিবসৈরিতি বচনন্তু দ্বয়োরেকনামত্বাভিপ্রায়েণ তেন প্রতিসাংবৎসরিকস্য চৈত্রাদিমাসবিশেষপুরস্কারেণ বিহিতত্বাৎ মলমাসে চৈত্রাদিকৃতশ্রাদ্ধেনৈকশাস্ত্রার্থসিদ্ধেস্তত্রৈব সকৃৎকৃতে কৃতঃ শাস্ত্রার্থ ইতি ন্যায়াবতারঃ। পার্ব্বণস্য তু ন চৈত্রাদিমাসবিশেষপুরস্কারেণ বিধানং কিন্তু প্রতিমাসি কর্ত্তব্যত্বেন তদ্বিধানমিতি প্রতিমাসপ্রাপ্তপার্ব্বণস্য মাসান্তরেঽপ্রাপ্তত্বান্ন তত্র তন্ন্যায়াবসর ইত্যতো নিরবকাশং পার্ব্বণং মলমাসে কর্ত্তব্যমেব ইত্যত আহ কিঞ্চেতি॥ ৯৯॥

ননু সন্ধ্যাপঞ্চমহাযজ্ঞাদীনামেকেন মুনিনা নিরবকাশত্বেন অপরেণ চ নিত্যত্বেন প্রতিপ্রসব ইতি মুনিভেদাৎ কো বিরোধ ইত্যত আহ কিঞ্চেতি। উৎকর্ষেতি। বিহিতকালাদুত্তরকালকর্ত্তব্যতা উৎকর্ষঃ। তন্ত্রাদিতি। তত্র যদ্বিহিতং কর্ম্ম উত্তরে মাসি কারয়েদিত্যনেন পূর্ব্বমাসবিহিতপার্ব্বণস্যাপ্যুত্তরমাসস্যৈব বিহিতকালতয়া কালভেদাভাবাৎ তন্ত্রেণৈব মাসদ্বয়ীয়পার্ব্বণদ্বয়সম্ভবাদিত্যর্থঃ। যৎকিঞ্চিদেতদিতি। তুচ্ছমিত্যর্থঃ। বস্তুতস্তু তত্র যদ্বিহিতং কর্ম্ম উত্তরে মাসি ইতি বচনেন বৈশাখাদিমাসবিশেষপুরস্কারেণ বিহিতানাং এককর্ম্মণামুত্তরমাসকর্ত্তব্যতোপদিশ্যতে ন তু সামান্যমাসবিহিতানাং কর্ম্মণাং তথাত্বে পঞ্চমহাযজ্ঞাদীনাং একাদশ্যুপবাসাদীনাঞ্চ উত্তরমাসকর্ত্তব্যতা স্যাৎ। তস্মান্মলমাসেঽপি পার্ব্বণং কর্ত্তব্যমেবেতি সময়প্রকাশাদয়ঃ। উক্তসাবকাশত্বযুক্তেরকিঞ্চিৎকরত্বেঽপি তথৈব মাসিকং পূর্ব্বমিতি প্রাগুক্তবচনে সপিণ্ডীকরণাৎ পূর্ব্বমাসিকস্য প্রেতমাসিকস্য বিধানেনোত্তরমাসিকপার্ব্বণশ্রাদ্ধস্য নিষে-

য়েৎ॥ ইত্যনেনোৎকর্ষবিধানাদস্যাপি সাবকাশত্বাত্তস্রাদেব প্রকৃতে মাসি শ্রাদ্ধদ্বয়ানুষ্ঠানসম্ভবাৎ। তস্মাৎ যৎকিঞ্চি-দেতৎ অপাটবাদ্যশৌচাভ্যামপি পতিতমেকোদ্দিষ্টমে-কাদশ্যামশৌচান্তে চ মলমাসপাতে ন কর্ত্তব্যং কিন্তু মলমাসাব্যাপ্তকৃষ্ণৈকাদশ্যামেবেতি॥ ১০০॥

ধোঽন্যথা পূর্ব্বপদবৈয়র্থ্যাপত্তেরিতি তু তত্ত্বম্। নমু। শ্রাদ্ধবিঘ্নে সমুৎপন্নে মৃতাহাবিদিতে তথা। একাদশ্যাং প্রকুর্ব্বীত কৃষ্ণপক্ষে বিশেষতঃ॥ দেয়ে পিতৃণাং শ্রাদ্ধে তু অশৌচং জায়তে যদি। তদশৌচব্যতীতে তু তেষাং শ্রাদ্ধং বিধীয়তে॥ শুচীভূতেন দাতব্যং যা তিথিঃ প্রতি-পদ্যতে। সা তিথিস্তস্য কর্ত্তব্যা ন ত্বন্যা বৈ কদাচন॥ ইত্যাভ্যাং বচনাভ্যাং অপাটবত্বাদিনা পতিতশ্রাদ্ধস্য কৃষ্ণৈকাদশ্যাং বিহিতত্বাৎ অশৌচপতিতস্য শ্রাদ্ধস্য চাশৌচান্ততিথৌ বিধানাৎ নিরবকাশত্বেন তয়োরেকদ্দিষ্টয়োর্ম্মলমাসে কর্ত্তব্যতা স্যাৎ ইত্যাশঙ্কামপনয়তি অপাট-বেতি। ন কর্ত্তব্যমিতি। অত্রায়ং ভাবঃ। যৎকিঞ্চিচ্ছ্রাদ্ধিকং ভবেদিত্যনেন সাবকাশশ্রাদ্ধনিষেধাৎ বিঘ্নাশৌচাভ্যাং পতিতস্য চ পুনঃ ক্ষতাদিনেব মলমাসাখ্যবিঘ্নেনাপ্যেকাদশ্যন্তরে কর্ত্তব্যতয়া সাবকাশত্বাৎ নিষেধঃ। ন চাপাটবাদিনাপি পতিতশ্রাদ্ধে কৃষ্ণৈকাদশীসামান্যস্যৈব বিহিতত্বাৎ সাবকাশত্বেঽপি অশৌচপতিতস্য ন ত্বন্যা বৈ কদাচন ইতি তিথ্যন্তরে নিষেধান্নিরবকাশত্বমিতি বাচ্যং ন ত্বন্যেতি নিষেধস্য স্বেচ্ছয়া কৃষ্ণৈকা-দশ্যপেক্ষাবিষয়ত্বাৎ অন্যথা তত্তিথাবতিশয়রোগাদিনা তৎকরণাসামর্থ্যে কৃষ্ণৈকাদশ্যামপি পুনস্তদকরণে প্রতিবর্ষকর্ত্তব্যতাব্যাঘাতঃ স্যাৎ। যা তিথিঃ প্রতিপদ্যতে ইত্যনেনাশৌচান্তবিহিতশ্রাদ্ধযোগ্যতিথেরেব গ্রহ-ণাচ্চ। যোগ্যতা চ নিষেদ্ধেতরকালমেব তেন রাত্র্যাদিবৎ মলমাস-স্যাপি নিষিদ্ধত্বেন তন্মাসোত্তরতিথাবেব তদুভয়শ্রাদ্ধং ন চাশৌচান্ত-দিনে সঙ্গবসমাপ্যতিথাবেব শ্রাদ্ধং স্যাদুক্তযুক্তেরিতি বাচ্যং অশৌ-চান্তাব্যবহিতপ্রশস্তকালোপলক্ষিতনিষিদ্ধেতরতিথিত্বেনৈব যোগ্যত্বাৎ।

অথামাবাস্যা। মনুঃ। পিতৃযজ্ঞন্তু নির্ব্বর্ত্ত্য বিপ্রশ্চন্দ্রক্ষয়েঽগ্নিমান্। পিণ্ডান্বাহার্য্যকং শ্রাদ্ধং কুর্য্যান্মাসানুমাসিকম্॥ চন্দ্রক্ষয়েঽমাবাস্যায়াম্। এতেনামাবাস্যায়াং প্রতিমাসং পিণ্ডান্বাহার্য্যকসংজ্ঞকং শ্রাদ্ধং সাগ্নিনা পিণ্ডপিতৃযজ্ঞানন্তরং কর্ত্তব্যম্। ননু পিতৃযজ্ঞপদং তর্পণপরমস্তু। পিতৃযজ্ঞন্তু নির্ব্বর্ত্ত্য তর্পণাখ্যন্তু যোঽগ্নিমান্। পিণ্ডান্বাহার্য্যকং শ্রাদ্ধং কুর্য্যাদিন্দুক্ষয়ে সদা॥ ইতি মৎস্যপুরাণবচনাৎ ন স্নানোত্তরভাবিতত্বাৎ শ্রাদ্ধস্য তর্পণা-

---

শুচীভূতেন দাতব্যং যা তিথিঃ প্রতিপদ্যতে। ইত্যনেন দাতব্যং দানার্হং মধ্যাহ্নাদিকালং প্রাপ্য যা তিথিঃ প্রতিপদ্যতে ইত্যুক্তত্বাৎ অন্যথা দাতব্যমিত্যস্যালগ্নকত্বাপত্তেরিতি॥১০০॥

অথামাবাস্যা ইতি। শ্রাদ্ধকালত্বেন নিরূপ্যতে ইতি শেষঃ। চন্দ্রক্ষয়েঽমাবাস্যায়ামিতি। তথাচ চন্দ্রস্য ক্ষয়ো যত্র তিথাবিতি বহুব্রীহিণা তিথিশ্চ দ্বিলিঙ্গঃ‘তিথির্নৈকেন দিবস ইতি সা তিথিস্তদহোরাত্রমিত্যাদ্যুক্তেঃ। ন তু চন্দ্রস্য ক্ষয় ইতি তৎপুরুষঃ। তথা সতি চন্দ্রক্ষয়স্য শ্রাদ্ধনিমিত্তত্বে প্রাপ্তে যত্র পূর্ব্বদিবসীয়াপরাহ্নব্যাপকশ্চতুর্দ্দশীসপ্তমযামঃ পরদিবসীয়াপরাহ্নে চামাবাস্যায়াঃ ক্ষীয়মাণত্বেন তদষ্টমযামশ্চ তদোভয়ত্রাপি চন্দ্রক্ষয়ালাভাৎ শ্রাদ্ধলোপে প্রতিমাসকর্ত্তব্যবিধিবিরোধশ্চ স্যাৎ। চন্দ্রক্ষয়স্য চতুর্দ্দশ্যষ্টমযামাবধি অমাবাস্যাসপ্তমযামপর্য্যন্তত্বেন বক্ষ্যমাণত্বাৎ। অতএবামাবাস্যায়াং পিতৃভ্যো দদ্যাদিতি শ্রুতিঃ। স্মৃতিরপি অমাবাস্যাষ্টকাবৃদ্ধিরিত্যাদি। অতএব চ ক্ষীণে রাজনি শস্যত ইতি ছন্দোগপরিশিষ্টকৃতা চন্দ্রক্ষয়স্য প্রাশস্ত্যমাত্রমুক্তম্। এবাঞ্চামাবাস্যাচন্দ্রক্ষয়য়োর্ব্বিধিদ্বয়কল্পনাপি নিরস্তা। এতেন সাগ্নিনিরগ্নিসাধারণং শ্রাদ্ধনিমিত্তমমাবাস্যা ইত্যুক্তম্। পিণ্ডপিতৃযজ্ঞানন্তরং পিণ্ডপিতৃযজ্ঞানন্তরমেব তর্পণপরমিতি ন তু পিণ্ডপিতৃযজ্ঞপরমিতি শেষঃ। স্নানোত্তরেতি। স্নাতোঽধিকারী ভবতি দৈবে পৈত্র্যে চ কর্ম্মণি।

নন্তর্য্যার্থপ্রাপ্তত্বেন বিধাতুমযোগ্যত্বাৎ। অতো বিধায়কত্বানুরোধেন পিণ্ডপিতৃযজ্ঞপরতা। মৎস্যপুরাণবচনে তু পিতৃতর্পণানন্তর্য্যানুবাদস্তর্পণপার্ব্বণয়োর্ম্মধ্যে পিতৃযজ্ঞাখ্যনিত্যশ্রাদ্ধব্যুদাসার্থঃ। ন চ মৎস্যপুরাণে বলিদানবচ্চ শ্রাদ্ধোত্তরকর্ম্মণি নিত্যশ্রাদ্ধং বিহিতম্। পিণ্ডান্বাহার্য্যকসমাখ্যাবিবেচনব্যাজেনাপি পিণ্ডপিতৃযজ্ঞানন্তর্য্যমাহ মনুঃ। পিণ্ডানাং মাসিকং শ্রাদ্ধমন্বাহার্য্যং বিদুর্বুধাঃ। তদামিষেণ কর্ত্তব্যং প্রশস্তেন প্রযত্নতঃ॥ যতো মাসিকং শ্রাদ্ধং পিণ্ডানাং পিণ্ডপিতৃযজ্ঞানামনু আদ্রিয়তে অতঃ পিণ্ডান্বাহার্য্যকং বিদুঃ॥ ১০১॥

তথা। অস্নাত্বা নাচরেৎ কর্ম্ম জপহোমাদি কঞ্চন। ইত্যাদিনা বৈদিককর্ম্মসামান্য এব স্নানস্যাধিকারত্বাদিতি ভাবঃ। ন চৈতদেকবাক্যতয়া মনুবচনেঽপি পিতৃযজ্ঞপদস্য তর্পণপরতয়া পরিসংখ্যৈবাস্তু অন্যথা শ্রুত্যন্তরকল্পনাপত্তেরিতি বাচ্যং পিণ্ডপিতৃযজ্ঞমভিধায় তচ্ছ্রাদ্ধমিতরদন্বাহার্য্যমমাবাস্যায়ামাসীনমিতি গোভিলে পাঠক্রমদর্শনাৎ পার্ব্বণে পিণ্ডপিতৃযজ্ঞানন্তর্য্যকল্পনাবশ্যকত্বে তদেকবাক্যতয়া বিধিদ্বয়সম্ভবে দোষত্রয়দুষ্টপরিসংখ্যাশ্রয়ণস্যান্যায্যত্বাৎ। নন্ন। ততস্তু বৈশ্বদেবাখ্যাং কুর্য্যান্নিত্যক্রিয়াং বুধঃ। ইতি বিষ্ণুপুরাণে নিত্যশ্রাদ্ধস্য পার্ব্বণানন্তরং বিহিতত্বাৎ। মৎস্যপুরাণে পরিসংখ্যা বৃথা ইত্যত আহ ন চেতি। ন হীত্যর্থঃ। তথাচ বিষ্ণুপুরাণে তথোক্তাবপি। বৈশ্বদেবং প্রকুর্ব্বীত নৈত্যিকং নিত্যমেব চ। ইতি। মৎস্যপুরাণে নিত্যশ্রাদ্ধস্য বলিকর্ম্ম যথা পার্ব্বণানন্তরং বিহিতং তথা ন নিত্যশ্রাদ্ধং বিহিতং অতো ন পরিসংখ্যা বৃথেতি ভাবঃ। সমাখ্যাবিবেচনং সংজ্ঞাব্যুৎপত্তিঃ। অত ইতি। তথাচ সমাখ্যাবিবেচনপ্রাপ্তং পিণ্ডপিতৃযজ্ঞানন্তর্য্যং মনুনা পুনর্ব্বিধাতুমযুক্তমিতি পূর্ব্বপক্ষঃ॥ ১০১॥

মৎস্যপুরাণে ত্বন্যথান্বয়ো দর্শিতঃ। যস্মাদন্বাহৃতা মাত্রা ভক্ষয়ন্তি দ্বিজাতয়ঃ। অন্বাহার্য্যকমিত্যুক্তং তস্মা-চ্চন্দ্রক্ষয়ে সতি॥ অন্বাহৃতা পিণ্ডেভ্যো মাত্রা ভাগঃ। বহ্বৃচানাং ব্রাহ্মণভোজনাৎ প্রাক্ পিণ্ডদানপিণ্ডমাত্রা-ভক্ষণং ব্রাহ্মণানামুক্তং মনুনা। যথা। পিণ্ডেভ্যস্ত্বল্পিকাং মাত্রাং সমাদায়ানুপূর্ব্বশঃ। তানেব বিপ্রানাসীনান্ বিধিবৎ পূর্ব্বমাশয়েৎ॥ অথবা। ততঃ প্রভৃতি পিতরঃ পিণ্ড-সংজ্ঞাং প্রলেভিরে। ইতি মৎস্যপুরাণবচনাৎ। পিণ্ডানাং পিতৃণাং মাসিকং শ্রাদ্ধমন্বাহর্য্যং মাসৈকতৃপ্তিজনকম্। অতঃ পিণ্ডান্বাহার্য্যকম্। ছন্দোগপরিশিষ্টং কাত্যায়নঃ। পিণ্ডান্বাহার্য্যকং শ্রাদ্ধং ক্ষীণে রাজনি শস্যতে। বাসরস্য তৃতীয়াংশে নাতিসন্ধ্যাসমীপতঃ॥ রাজনি চন্দ্রে। তৃতী-য়াংশে ত্রিধাবিভক্তদিনতৃতীয়ভাগে দশমমুহূর্ত্তাদূর্দ্ধমিতি যাবৎ। অতএব শ্রুতিঃ। পূর্ব্বাহ্নো বৈ দেবানাং মধ্যন্দিনং মনুষ্যাণাং অপরাহ্নঃ পিতৃণামিতি। নাতি-সন্ধ্যাসমীপত ইতি সন্ধ্যাসমীপমুহূর্ত্তং একং আপদ্যাপি

সিদ্ধান্তমাহ মৎস্যপুরাণে ত্বিতি। নন্বু তথাপি মনুনা সমাখ্যাবিবেচ-নেন স্বয়ং প্রতিপাদিতস্য পিণ্ডপিতৃষজ্ঞানন্তর্য্যস্য পুনর্ব্বিধানমসম্ভাব্যেব ইত্যত আহ অথবেতি। পিণ্ডানাং পিতৃণামিতি। তথাচ পিতৃণাং মাসিকশ্রাদ্ধে অন্বাহার্য্যপদং রূঢ়মেব অতো ন প্রাগুক্তরীত্যা যোগ-বলেন পিণ্ডপিতৃষজ্ঞানন্তর্য্যলাভস্তেন মনোস্তদ্বিধানং নাযুক্তমিতি ভাবঃ। এবঞ্চ সতি নিরগ্নিপক্ষেঽপি সংজ্ঞাসমাবেশাৎ পিণ্ডান্বাহার্য্যকং শ্রাদ্ধং ক্ষীণে রাজনি শস্যতে ইতি পরিশিষ্টোক্তা চন্দ্রক্ষয়ব্যবস্থা সাগ্নিনিরগ্নি-সাধারণীতি বেদিতব্যম্। দশমমুহূর্ত্তাদূর্দ্ধমিতি। ন চ বাসরস্য তৃতী-

বর্জ্জনীয়মিত্যর্থঃ। যদ্যপি সায়াহ্নস্ত্রিমুহূর্ত্তঃ স্যাৎ শ্রাদ্ধং তত্র ন কারয়েৎ। ইতি মৎস্যপুরাণে সন্ধ্যাসন্নিহিতমুহূর্ত্তত্রয়ং নিষিদ্ধং তথাপ্যাপৎকালে মুহূর্ত্তদ্বয়ং নিষিদ্ধমপ্যনুজ্ঞাতমতিশব্দস্বরসাৎ ত্রিমুহূর্ত্তাপি কর্ত্তব্যা ইতি বক্ষ্যমাণলঘুহারীতবচনাচ্চ। দর্শদ্বৈধে কথং শ্রাদ্ধমিতি তত্রাহ স এব। যদা চতুর্দ্দশীযামং তুরীয়মনুপূরয়েৎ। অমাবাস্যা ক্ষীয়মাণা তদৈব শ্রাদ্ধমিষ্যতে॥ যদুক্তং যদহস্ত্বেব দর্শনং নৈতি চন্দ্রমাঃ। তৎক্ষয়াপেক্ষয়া জ্ঞেয়ং ক্ষীণে রাজনি চেত্যপি॥ যচ্চোক্তং দৃশ্যমানেঽপি তচ্চতুর্দ্দশ্যপেক্ষয়া। অমাবাস্যাং প্রতীক্ষেত তদন্তে বাপি নির্ব্বপেৎ॥ অষ্টমেঽংশে চতুর্দ্দশ্যাঃ ক্ষীণো ভবতি চন্দ্রমাঃ। অমাবাস্যাষ্টমাংশে তু ততঃ কিল ভবেদণুঃ॥ আগ্রহায়ণ্যমাবাস্যা তথা জ্যৈষ্ঠস্য যা ভবেৎ। বিশেষমাভ্যাং ব্রুবতে চন্দ্রচারবিদো জনাঃ॥ অত্রেন্দুরাদ্যে প্রহরেঽবতিষ্ঠতে চতুর্থভাগোণকলাবশিষ্টঃ। তদন্ত এব ক্ষয়মেতি কৃৎস্নমেবং জ্যোতিশ্চক্রবিদো বদন্তি॥ যস্মিন্নব্দে দ্বাদশৈকশ্চ যব্যস্তস্মিংস্তৃতীয়য়া পরিদৃশ্যো নোপজায়তে।

রাংশে ইত্যনেন দশমমুহূর্ত্তত্যাগস্য পিণ্ডপিতৃযজ্ঞার্থত্বাবগমাৎ সাগ্নিপরত্বমেব বচনস্যেতি কেনচিদুক্তং যুক্তমিতি বাচ্যং অপরাহ্ণে তু পৈতৃকমিত্যনেন দশমমুহূর্ত্তস্য শ্রাদ্ধকালত্বোক্তেঃ। প্রকৃতে তত্ত্যাগস্য একাদশদ্বাদশমুহূর্ত্তাপেক্ষয়া তদপ্রাশস্ত্যজ্ঞাপনার্থত্বাৎ। আপদ্যপীতি দ্রব্যসম্পত্তিরূপাদ্যাপদীত্যর্থঃ। অতিশব্দেতি। অন্যথা তদ্বৈয়র্থ্যাদিতি ভাবঃ। ইমমেবার্থং বচনান্তরেণ স্পষ্টং দর্শয়তি ত্রিমুহূর্ত্তাপীতি।

এবং চারং চন্দ্রমসো বিদিত্বা ক্ষীণে তস্মিন্নপরাহ্ণে চ দদ্যাৎ॥ সংমিশ্রা যা চতুর্দ্দশ্যামমাবাস্যা ভবেৎ কচিৎ। খর্ব্বিতাং তাং বিদুঃ কেচিদ্গতাধ্বমিতি চাপরে॥ বর্দ্ধমানামমাবাস্যাং লক্ষয়েদপরেহহনি। যামাংস্ত্রীনধিকান্ বাপি পিতৃযজ্ঞস্ততো ভবেৎ॥ পক্ষাদাবেব কুর্ব্বীত সদা পক্ষাদিকং চরুম্। পূর্ব্বাহ্ণ এব কুর্ব্বন্তি বিদ্ধেহপ্যন্যে মনীষিণঃ॥ যদা চতুর্দ্দশীযামমিতি তিথিদ্বৈধে পরদিনে তিথিঃ প্রকারত্রিতয়ান্যতমপ্রকারো ভবতি ক্ষীণা স্তম্ভিতা বর্দ্ধিতা চ তত্র ক্ষীণামাবাস্যাবিষয়মিদম্। যদা পূর্ব্বচতুর্দ্দশীদিনস্য চতুর্থং প্রহরং অমাবাস্যা পূরয়েৎ প্রহরত্রয়ব্যাপিনী চতুর্দ্দশী ভবতীত্যর্থঃ অপরদিনে পূর্ব্বতিথ্যপেক্ষয়া ক্ষীয়মাণা ভবতি তদা পূর্ব্বদিন এবামাবাস্যাবেলায়াং শ্রাদ্ধম্॥ ১০২॥

যদ্যপি ত্রিমুহূর্ত্তায়াঃ কর্ত্তব্যত্বং বহ্বৃচানামেব তথাপ্যেতদ্বচনাৎ সায়াহ্ণসম্বন্ধিমুহূর্ত্তদ্বয়স্য শ্রাদ্ধার্হত্বে সিদ্ধেহতিশব্দবৈয়র্থ্যাপত্ত্যা অন্যেষামপ্যাপদি তথা কল্প্যতে ইতি ভাবঃ। দর্শদ্বৈধ ইতি। উভয়দিনে শ্রাদ্ধযোগ্যামাবাস্যালাভে কদা শ্রাদ্ধমিত্যাকাঙ্ক্ষায়াং স এব কাত্যায়ন এব ব্যবস্থামাহ ইত্যর্থঃ। বচনানি ক্রমেণ ব্যাচষ্টে যদা চতুর্দ্দশীযামমিত্যাদি। প্রকারত্রিতয়ং বিবৃণোতি ক্ষীণেত্যাদি। পূর্ব্বদিনে দিবাভাগে যাবৎকালব্যাপিনী চতুর্দ্দশী পরদিনে তন্ন্যূনকালব্যাপিন্যমাবাস্যা ক্ষীণা তৎতুল্যকালব্যাপিনী অমাবাস্যা স্তম্ভিতা তদধিককালব্যাপিনী বর্দ্ধমানেত্যর্থঃ। তত্র প্রকারত্রয়মধ্যে ইদং যদা চতুর্দ্দশীযামমিতি বচনম্। অত্র চতুর্থং প্রহরমিতি প্রহরত্রিতয়ব্যাপিনীতি চ দ্বয়ং কিঞ্চিন্ন্যূনাধিককালমপি উপলক্ষয়তি তেন উভয়দিনে

এতচ্চোভয়ত্র তৃতীয়াংশলাভে ন তু ক্ষীয়মাণেত্যস্য তৃতীয়াংশাব্যাপিনীতি ব্যাখ্যানং যুক্তং বাসরস্য তৃতীয়াংশ ইত্যনেনৈব প্রাপ্তত্বাৎ বৈয়র্থ্যাপত্তেঃ। অত্র হেতুমাহ। যচ্চোক্তং যদহস্ত্বেব চন্দ্রমা ন দৃশ্যতে তামমাবাস্যাং কুর্ব্বীতেতি যদ্গোভিলসূত্রং তৎক্ষয়াভিপ্রায়েণ জ্ঞেয়ং যস্মিন্নহনি চন্দ্রক্ষয়ো ভবতীতি তস্য সূত্রস্যার্থঃ। কুতঃ ক্ষয়লক্ষণেতি চেন্ন যদহশ্চন্দ্রমা ন দৃশ্যেত তামমাবাস্যামিতি পূর্ব্বসূত্রেণ সহ পুনরুক্তিরেব লক্ষণাবীজমিতি

বিহিতকাললাভ এব তাৎপর্য্যম্। অতএব বক্ষ্যতি অনুপূরয়েদিতি। অপরাহ্ণপ্রাপ্ত্যুপলক্ষণার্থমিত্যাদি॥ ১০২॥

এতচ্চেতি। ক্ষীণায়াং পূর্ব্বদিনে শ্রাদ্ধবিধানঞ্চেত্যর্থঃ। পূর্ব্বাপরয়োরেকদিনমাত্রে বিহিতামাবাস্যালাভে তু ক্ষীণাদিভেদমনাদৃত্য পূর্ব্বদিনে পরদিনে বা শ্রাদ্ধস্য নির্ব্বিবাদঃ। তত্র বাসরস্য তৃতীয়াংশ ইত্যনেন দ্বৈধানুদয়াৎ দ্বৈধবিষয় এব ক্ষীণাদিভেদেন ব্যবস্থাপকবচনপ্রবৃত্তেঃ। যত্র চোভয়দিন এব শ্রাদ্ধযোগ্যামাবাস্যা ন লভ্যতে তত্র সাগ্নেঃ চন্দ্রক্ষয়ানুরোধেন চতুর্দ্দশ্যন্তযামে পূর্ব্বদিনে শ্রাদ্ধস্যামাবাস্যাং প্রতীক্ষেত ইত্যনেন বক্ষ্যমাণত্বাৎ নিরগ্ন্যাদেঃ কুহূর্ম্মতেত্যনেন নিরগ্ন্যনুপনীতশূদ্রাণাং পরদিনে শ্রাদ্ধবিধানাচ্চ দ্বৈধানুদয়াদেতদ্বচনাবসরাদিতি ভাবঃ। যদ্যপি পূর্ব্বদিনে চতুর্দ্দশ্যাঃ কিঞ্চিদধিকপ্রহরত্রয়ব্যাপিত্বে তদ্দিনে মুহূর্ত্তানূ্যনশ্রাদ্ধযোগ্যামাবাস্যালাভঃ কিঞ্চিন্ন্যূনপ্রহরত্রয়ব্যাপিত্বে চ অমাবাস্যায়াঃ ক্ষীয়মাণত্বেন পরদিনে সুতরাং ন শ্রাদ্ধযোগ্যামাবাস্যালাভঃ। প্রহরত্রয়মাত্রব্যাপিত্বেঽপি পরদিনে ক্ষীয়মাণাবাস্যায়াং শ্রাদ্ধযোগ্যকালো ন লভ্যত এবেতি। ক্ষীয়মাণামাবাস্যাবিষয়ে উভয়দিনে শ্রাদ্ধযোগ্যামাবাস্যালাভো দুর্ঘটঃ। তথাপি দক্ষিণায়নোত্তরদিবাহ্রাসাত্তদনুসারেণ পূর্ব্বদিবসীয়মুহূর্ত্তাপেক্ষয়া পর-

তত্রৈব ব্যাখ্যাতম্। অস্মাভিরপি ক্ষীণে রাজনীত্যুক্তং চন্দ্রক্ষয়শ্চতুর্দ্দশ্যষ্টমযামাৎ প্রভৃতি অমাবাস্যাসপ্তমযামং যাবদিতি বক্ষ্যতি। অতশ্চন্দ্রক্ষয়ানুরোধাৎ পূর্ব্বদিনে শ্রাদ্ধমিতি তাৎপর্য্যার্থঃ। যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেতেতি শ্রুতিবিরোধং আশঙ্ক্য পরিহৃতম্। ইতি কল্পতরুব্যাখ্যানমযুক্তং দুর্ব্বলস্মৃতিবিরোধেন বলবত্যাং শ্রুতৌ ক্ষয়লক্ষণায়া অযোগাৎ। অন্যথা বিরোধাধিকরণসিদ্ধান্তেঽপি ঔডুম্বরী সর্ব্বা বেষ্টয়িতব্যেতি স্মৃতিবিরোধাৎ ঔডুম্বরীং স্পৃষ্ট্বা উদ্গায়েতেতি শ্রুতাবুপস্পর্শলক্ষণা

দিবসীয়মুহূর্ত্তস্য কিঞ্চিন্ন্যূনত্বেন পূর্ব্বদিবসীয়মুহূর্ত্তব্যাপিন্যমাবাস্যায়াঃ পরদিবসীয়তথাবিধবিহিতমুহূর্ত্তপর্য্যন্তস্থায়িত্বেঽপি ক্ষীয়মাণত্বাৎ। তত্রোভয়দিনে শ্রাদ্ধযোগ্যাপরাহ্নমুহূর্ত্তলাভ ইতি বোধ্যম্। ন চ তথাপি প্রহরতুরীয়ভাগস্যৈব মুহূর্ত্ততয়া পূর্ব্বদিনে চতুর্দ্দশ্যাং কিঞ্চদধিকপ্রহরত্রয়ব্যাপিত্বে কথং তদ্দিনে শ্রাদ্ধযোগ্যামাবাস্যামুহূর্ত্তলাভ ইতি বাচ্যং ষষ্টিদণ্ডাত্মিকাহোরাত্রাষ্টমভাগস্যৈব সর্ব্বত্র প্রহরপদার্থত্বাৎ মুহূর্ত্তস্য চাহ্নঃ পঞ্চদশভাগৈকভাগরূপত্বাৎ পৌষাদৌ চতুর্দ্দশ্যাং তুরীয়প্রহরস্য কিঞ্চিদংশব্যপনেঽপি তদানীন্তনমুহূর্ত্তস্য পাদোনদণ্ডদ্বয়াদিরূপস্য শ্রাদ্ধযোগ্যস্যামাবাস্যায়ামপি ব্যাপনসম্ভবাৎ। নারায়ণোপাধ্যায়মতমুত্থাপ্য দূষয়তি ন ত্বিতি। প্রাপ্তত্বাদিতি। পরদিনে শ্রাদ্ধার্হবাসরতৃতীয়াংশালাভেন পূর্ব্বদিনে তত্র শ্রাদ্ধস্য সুতরাং প্রাপ্তত্বাৎ। যদা চতুর্দ্দশীযামমিতি বচনস্য বৈয়র্থ্যাপত্তেরিত্যর্থঃ। ন চ ভবদ্ব্যাখ্যানেঽপি বচনবৈয়র্থ্যাদেব পরদিনে চন্দ্রক্ষয়ালাভেন চন্দ্রক্ষয়ে শ্রাদ্ধবিধায়কত্বেন ক্ষীণে রাজনি শস্যতে ইতি পূর্ব্ববচনেনৈব পূর্ব্বদিনে শ্রাদ্ধপ্রাপ্তিরিতি বাচ্যং এতদ্বচনাভাবে পূর্ব্ববচনোক্তচন্দ্রক্ষয়প্রাশস্ত্যং কিং ক্ষীয়মাণবিষয়ং কিংবা স্তম্ভিতাবিষয়মিত্যনির্ণয়ঃ স্যাৎ। এবং সংমিশ্রা যা

স্যাৎ। তস্মান্নৈতাদৃশী প্রত্যক্ষশ্রুতিরস্তি। অনুমীয়মানা চেৎ স্মৃত্যনুগুণৈবানুমেয়েতি। নন্নু তেনৈব সূত্রেণ সিনীবালীত্বেন পূর্ব্বদিনে দৃশ্যমানেঽপি চন্দ্রমসি ক্ষয়পুরস্কারেণ শ্রাদ্ধস্য উক্তত্বাৎ দৃশ্যমানেঽপ্যেকদেতি সূত্রমনর্থকমিত্যত আহ যচ্চোক্তং দৃশ্যমানেঽপীতি। পূর্ব্বসূত্রমমাবাস্যাপদোপাদানাচ্চন্দ্রক্ষয়ে সত্যমমাবাস্যা-

চতুর্দ্দশ্যা ইত্যাগামি বচনমপি কিং ক্ষীয়মাণবিষয়ং কিংবা স্তম্ভিতাবিষয়মিত্যপি সংশয়ঃ স্যাৎ। সতি তস্মিন্ বচনে চন্দ্রক্ষয়স্য ক্ষীয়মাণবিষয়ত্বসিদ্ধেঃ। সংমিশ্রেতি বচনং পরিশেষাৎ স্তম্ভিতায়ামেবোপতিষ্ঠতে। এতচ্চাগ্রে সংমিশ্রেতি বচনব্যাখ্যাবসরে গ্রন্থকৃদেব বক্ষ্যতি। অত্রেতি। ক্ষীণাবিষয়ে পূর্ব্বদিনে শ্রাদ্ধস্য কর্ত্তব্যত্বে গোভিলাদ্যুক্তং চন্দ্রক্ষয়রূপং হেতুমাহেত্যর্থঃ। পূর্ব্বসূত্রেণেতি। পূর্ব্বসূত্রং বর্দ্ধমানাবিষয়ে পরদিনে শ্রাদ্ধবিধায়কং মুখ্যমেব উত্তরসূত্রস্তু পৌনরুক্ত্যাৎ লাক্ষণিকমিত্যর্থঃ। অত্রৈব গোভিলটীকায়ামেব। অস্মাভিরিতি বহুবচনং হঠাদায়াতং ময়া কাত্যায়নেন ক্ষীণে রাজনীতি যদুক্তং তদপি ক্ষয়াভিপ্রায়কমিত্যর্থঃ। বস্তুতঃ চো হেতৌ যতো গোভিলেন চন্দ্রক্ষয়ে শ্রাদ্ধমুক্তমতো ময়াপি তথোক্তমিত্যর্থঃ। অন্যথৈতদ্ব্যুক্তিবৈয়র্থ্যাপাতাৎ ক্ষীণে রাজনীতি বচনেনৈব তদর্থসিদ্ধেরিতি বোধ্যম্। শ্রুতিবিরোধমিতি। শ্রুত্যা পরদিবসীয়ামাবাস্যায়াং শ্রাদ্ধোক্তেরুক্তপূর্ব্বদিনশ্রাদ্ধবিরোধমিত্যর্থঃ। দুর্ব্বলেতি। উপজীব্যজাতীয়ত্বাৎ ইতরানপেক্ষপ্রামাণ্যাচ্চ বলবত্ত্বং শ্রুতেঃ উপজীবকজাতীয়ত্বেন ইতরং সাপেক্ষপ্রামাণ্যকতয়া চ স্মৃতের্দুর্ব্বলত্বমিতি। অন্যথেতি। স্মৃতিবিরোধেন শ্রুতৌ লক্ষণাভ্যুপগমে ইত্যর্থঃ। বিরোধাধিকরণেতি। অত্র হি সর্ব্বা ঔড়ম্বরী বেষ্টয়িতব্যা ইতি স্মৃতিঃ। ঔড়ম্বরীং স্পৃষ্ট্বা উদ্গায়তি ইতি শ্রুতিঃ। ঔড়ম্বরী তাম্রময়ী জুহূঃ অত্র স্মৃতিপ্রাপ্তসর্ব্বা-

বিষয়ম্। ইদং পুনরিত্থংভূতচতুর্দ্দশীবিষয়ং ইতি নানর্থকত্বং তদা চ বিকল্প ইত্যাহ। অমাবাস্যাং প্রতীক্ষেত শ্রাদ্ধার্থং তদন্তে চতুর্দ্দশ্যন্তে বা নির্ব্বপেৎ যদামাবাস্যাকালঃ শ্রাদ্ধযোগ্যো ন লভ্যতে তদা চন্দ্রক্ষয়ানুরোধাচ্চতুর্দ্দশ্যন্ত এব শ্রাদ্ধমিত্যর্থঃ। অষ্টমেঽংশে চতুর্দ্দশ্যা ইতি ক্ষীণো ভবতি চতুর্থভাগোণকালাবশিষ্টতা চ ক্ষৈণ্যং বক্ষ্যমাণবচনাৎ অমাবাস্যাষ্টমে ভাগেঽনুরূপচন্দ্রোৎপত্ত্য-

বয়বাবচ্ছেদেন বেষ্টনে স্পর্শাসম্ভবাদুপস্পর্শে শ্রুতের্লক্ষণা স্যাৎ। অতো বলবৎশ্রুতিবিরোধেন দুর্ব্বলস্মৃতৌ সর্ব্বপদে সঙ্কোচ ইতি সিদ্ধান্তঃ। তত্রাপি ভবন্মতে তুল্যন্যায়াৎ স্মৃতের্মুখ্যত্বায় শ্রুতাবেব উপস্পর্শলক্ষণা স্যাদিত্যর্থঃ তথাচ তৎসিদ্ধান্তবিরোধ ইতি ভাবঃ। তর্হি উক্তশ্রুতিবিরোধো ভবন্মতে কথং পরিহরণীয়ঃ অত আহ তস্মাদিতি। এতাদৃশী যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত ইত্যেবংরূপা। অনুমীয়মানা যদা চতুর্দ্দশীযামমিতি স্মৃতিলিঙ্গেনেতি শেষঃ। স্মৃত্যনুগুণৈবেতি। যদা চতুর্দ্দশীযামমিত্যুক্তস্মৃতিসমানার্থৈব ন তু অসমানার্থা যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত ইত্যেবংরূপা। তথা সত্যুভয়স্মৃত্যনুমিতশ্রুতিদ্বয়োর্বিরোধে বিকল্পকল্পনা স্যাদিতি ভাবঃ। অতএব জৈমিনিসিদ্ধান্তসূত্রম্। বিরোধে ত্বনপেক্ষঃ স্যাদসতি হ্যনুমানমিতি। অস্যার্থঃ শ্রুতি স্মৃত্যোর্বিরোধেঽনপেক্ষপ্রমাণভাবং যত্তদেব প্রমাণং স্যাৎ তেন শ্রুতের্বলবত্ত্বং স্মৃতের্মূলশ্রুতিসাপেক্ষপ্রমাণভাবতয়া দুর্ব্বলত্বাৎ বিরোধেঽসতি স্বসমানার্থশ্রুত্যনুমানমিতি। তেন বিরোধাসত্ত্ব এব স্বসমানশ্রুত্যনুমানং বিরোধসত্ত্বে তু বিরোধিস্মৃত্যাদিনানার্থকশ্রুত্যনুমানমেব ইত্যুক্তম্। যদি পুনরেতাদৃশী প্রত্যক্ষশ্রুতিরস্তীতি সশপথং ব্রূষে তদা গোভিলসূত্রাদ্বর্দ্ধমানাবিষয়তয়ৈব বর্ণনীয়েতি। নানুপপত্তিরিত্যভিসন্ধিঃ। তেনৈবেতি। যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত ইত্যুক্তসূত্রেণৈবেত্যর্থঃ। সূত্রমনর্থকমিতি। দ্বয়োরেব সূত্রয়োর্গোভিলীয়ত্বাদিতি ভাবঃ। যচ্চোক্ত-

ভিধানাৎ। সপ্তমে যামে নিঃশেষচন্দ্রক্ষয়োঽবগম্যতে। নন্বু কোঽয়ং ক্ষয়ঃ সূক্ষ্মতা বিনাশো বা ॥ ১০৩॥

নাদ্যঃ অমাবাস্যাসপ্তমে যামে তদভাবাৎ। ন দ্বিতীয়ঃ পূর্ব্বযামেষ্বব্যাপ্তেঃ। তুরীয়োনকলাবশিষ্টতা বিনাশশ্চ দ্বয়মেব ক্ষয়শব্দার্থ ইতি চেন্ন অনুগতৈকরূপাভাবাৎ অমাবাস্যাষ্টমে ভাগেঽপি অনুরূপত্বাচ্চন্দ্রমসঃ ক্ষয়াপত্তেশ্চ। ইষ্যত এবেতি চেন্নৈবং অমাবাস্যায়াং চন্দ্রক্ষয়ব্যভিচারাভাবে ক্ষয়স্য বিশেষণত্বং প্রমত্তগীতং স্যাৎ। যথা গোভিলঃ। যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত তামমাবাস্যাং কুর্ব্বীত। তথা মার্কণ্ডেয়পুরাণম্। কার্য্যং শ্রাদ্ধমমাবাস্যাং মাসি মাস্যুডুপক্ষয়ে। উচ্যতে। অন্ত্য-

মিতি। দৃশ্যমানেঽপ্যেকদেতি। যদ্গোভিলেনোক্তং তচ্চতুর্দ্দশ্যাং শ্রাদ্ধায়েত্যর্থঃ। অমাবাস্যাপদোপাদানাদিতি। তেনৈব ন বৈপরীত্যমিতি ভাবঃ। ইত্থংভূতেতি। উভয়দিনাপরাহ্নাসম্বন্ধিদর্শপূর্ব্ববর্ত্তিত্বে সতি চন্দ্রক্ষয়বিশিষ্টচতুর্দ্দশীবিষয়মিত্যর্থঃ। বিকল্প ঐচ্ছিকঃ যদামাবাস্যাকাল এব যদিত্যস্য তাৎপর্য্যার্থবর্ণনমিদং তদেত্যাদি চ দৃশ্যমানেঽপীত্যস্যার্থঃ। তথাচ ব্যবস্থিতবিকল্প ইতি ভাবঃ। সূক্ষ্মতা দ্ব্যণুকাদিরূপতা॥ ১০৩॥

নাদ্য ইতি। তত্র চন্দ্রস্য কৃৎস্নশঃ ক্ষয়েণ সূক্ষ্মত্বাসম্ভবাদিতি ভাবঃ। ক্ষয়স্য বিশেষণত্বমিতি। অব্যাবর্ত্তকত্বেন প্রমত্তগীতং স্যাদিত্যর্থঃ। ক্ষয়স্য বিশেষণত্বে প্রমাণমাহ যথেতি। যদহস্ত্বেব চন্দ্রমা ন দৃশ্যেত তামমাবাস্যাং কুর্ব্বীতেতি সূত্রে তু পূর্ব্বার্দ্ধস্য ক্ষয়পরতয়োত্তরার্দ্ধগততৎপদেন চন্দ্রক্ষয়বিশিষ্টামাবাস্যাপ্রতিপাদনাদিতি ভাব্যম্। বস্তুতশ্চন্দ্রক্ষয়ো ন বিশেষণং কিন্তু চন্দ্রক্ষয়স্য প্রাশস্ত্যমেব ক্ষীণে রাজনি শস্যতে ইত্যুক্তেঃ। অতএব বর্দ্ধমানাবিষয়ে পরদিনেঽমাবাস্যাষ্টম-

কলায়া অবয়ববিনাশোঽপত্তিরেব ক্ষয়ঃ। সা চ সূক্ষ্মতায়াং বিনাশেঽপ্যস্তীতি ন বিরোধঃ। বিশেষমাহ আগ্রহায়ণ্যমাবাস্যেতি। চন্দ্রচারবিদো জ্যোতির্ব্বিদঃ। চন্দ্রগতিবৈলক্ষণ্যাদ্বৈলক্ষণ্যমিত্যর্থঃ। চতুর্থভাগোণকলাবশিষ্টঃ। ক্ষীণঃ মাসান্তরে চতুর্দ্দশ্যষ্টমযামে ক্ষৈণ্যমেতয়োরমাবাস্যাপ্রথমযাম ইতি বিশেষঃ। তদন্ত এব অমাবাস্যান্তযাম এব। কৃৎস্নং ক্ষয়মেতি যতঃ অতস্তয়োরমাবাস্যাষ্টমভাগ এব। অপরদিনেঽপরাহ্ণলাভে জ্ঞেয়ম্। যদ্যপি পূর্ব্বদিনেঽপ্যমাবাস্যাপ্রথমযামে চন্দ্রক্ষয়ো লভ্যতে তথাপ্যপরদিনে এব কৃৎস্নক্ষয়ানুরোধাদিত্যর্থঃ। অত্রাপি বিশেষঃ। যস্মিন্নব্দে দ্বাদশৈকশ্চ যব্যস্ত্রয়োদশমাসা ইত্যর্থঃ। তেন মলমাসপাতে কলাভাগত্রয়াবশিষ্টত্বমমাবাস্যাপ্রথমযামে যদুক্তং তন্ন ভবতীতি তাৎপর্য্যম্। উভ-

যামে চন্দ্রক্ষয়াভাবেঽপি শ্রাদ্ধম্। অন্ত্যকালায়া ইতি। নাশস্যানন্তত্বাৎ তৎপরাসু সর্ব্বাসু তিথিষু ক্ষয়াতিপ্রসঙ্গবারণায় উৎপত্তীতি। সূক্ষ্মতায়াং সূক্ষ্মতাদশায়াম্। বিনাশে বিনাশদশায়াম্। আগ্রহায়ণীতি। অত্র পৌর্ণমাস্যস্তজ্যৈষ্ঠাগ্রহায়ণয়োগ্রহণমিতি নারায়ণোপাধ্যায়াঃ। যুক্তঞ্চৈতৎ কৃষ্ণপক্ষপার্ব্বণস্য ব্রহ্মপুরাণোক্ততিথিকৃত্যত্বেন তত্র তথাবিধমাসস্যৈব নির্দ্দেশ্যত্বাৎ। অত্রেন্দুরিতি বচনে অনয়োর্মাসয়োরিত্যর্থঃ। তস্মিংস্তৃতীয়য়েতি। তস্মিন্ মলমাসযুতাব্দে জ্যৈষ্ঠাগ্রহায়ণামাবাস্যয়োঃ প্রথমপ্রহরে চন্দ্রস্তৃতীয়মাত্রয়া ভাগেন পরিদৃশ্যো নোপজায়েত চতুর্থভাগোণকলাবশিষ্টো ন ভবতি কিন্তু মাসান্তরবৎ চতুর্দ্দশ্যষ্টমযামে চতুর্থভাগোণকলাবশিষ্টত্বাদমাবাস্যাপ্রথমযামে তদধিকক্ষীণত্বমাপ্নোতি। অতো মলমাসযুতাব্দে মাসান্তরবৎ অনয়োরপি ব্যব-

য়ত্রাপ্যপরাহ্লুলাভে স্তম্ভিতায়াং ব্যবস্থামাহ স এব। সংমিশ্রেতি। বৃদ্ধিহ্রাসশূন্যা সতী যা চতুর্দ্দশ্যা সংমিশ্রা-মাবাস্যা তাং খর্ব্বিতাং নীচাং নিন্দিতাং কেচিদাহুঃ। অপরে তামেবোপেধ্বং উপগচ্ছতেতি মন্যন্তে। অস্যা ব্যবস্থা শাখিভেদেনেত্যাহ লঘুহারীতঃ। ত্রিমুহূর্ত্তাপি কর্ত্তব্যা পূর্ব্বা দর্শা চ বহ্বৃচৈঃ। কুহূরধ্বর্য্যুভিঃ কার্য্যা যথেষ্টং সামগীতিভিঃ॥ বহ্বৃচৈঃ পূর্ব্বদিনেঽমাবাস্যা-মুহূর্ত্তত্রয়ব্যাপিন্যপি কার্য্যা। যজুর্ব্বেদিভিরপরদিনে সাম-গীতিভিশ্ছন্দোগৈর্যথেষ্টমনিয়মেন ইত্যর্থঃ। যথেষ্টং সাম-গীতিভিরিত্যভিধানাৎ। স্তম্ভিতাবিষয়মিদং ক্ষীয়মাণবর্দ্ধ-মানপক্ষয়োঃ পরিশিষ্টকৃতা ব্যবস্থাপিতত্বাৎ। উভয়ত্রা-পরাহ্লালাভেঽপীয়ং ব্যবস্থা॥ ১০৪॥

---

স্থেতি ভাবঃ। ত্রিমুহূর্ত্তাপীতি। নিষিদ্ধমপি সায়াহ্নমুহূর্ত্তদ্বয়মুক্তবিষয়ে বহ্বৃচৈর্গ্রাহ্যমিত্যর্থঃ। দর্শেত্যার্ষং স্ত্রীলিঙ্গম্। ইত্যভিধানাদিতি লঘুহারীতবচনং স্তম্ভিতাবিষয়মেব অন্যথা ক্ষীণাস্তম্ভিতয়োঃ পূর্ব্বাপরৈ-কদিনমাত্রগ্রহণস্য সামগাদীনাং সর্ব্বেষামেব কাত্যায়নেনোক্তত্বাৎ তেন সহ বিরোধঃ স্যাৎ তথাচৈতদেকবাক্যতয়া সংমিশ্রা যেতি কাত্যায়ন-বচনমপি স্তম্ভিতাবিষয়মিত্যর্থঃ। ইদমুপলক্ষণং ক্ষীণাবর্দ্ধমানাবিষয়ত্বে তদু-ভয়বিষয়কপূর্ব্বোত্তরকাত্যায়নবিরোধাদপি মধ্যস্থিতমিদং কাত্যায়নবচনং স্তম্ভিতাবিষয়মিত্যাহ ক্ষীয়মাণেতি। উভয়াপরাহ্লালাভেঽপীয়মিতি। যদা পূর্ব্বদিনে নিষিদ্ধকালমাত্রেঽমাবাস্যা পরদিনে চ তৃতীয়াংশে নাস্তি তদাপি ত্রিমুহূর্ত্তেতি বচনাৎ স্তম্ভিতাবৎ ব্যবস্থেত্যর্থঃ। ন চোক্তবিষয়ে চতুর্দ্দশ্যন্তযাম এব পূর্ব্বদিনে শ্রাদ্ধোক্তেবিরোধ ইতি বাচ্যং তস্য চন্দ্র-ক্ষয়ানুরোধিসাগ্নিমাত্রপরত্বাৎ। অন্যে তু উভয়ত্রাপরাহ্লুলাভেঽপীয়ং ব্যব-স্থেতি পাঠমভ্যুপেত্য ন কেবলমুভয়ত্র তৃতীয়াংশলাভে কিন্তু ভয়ত্রাপ-

বর্দ্ধমানামাহ বর্দ্ধমানামিতি। পূর্ব্বদিনে তুরীয়ং যামং পূরয়িত্বা অপরদিনে পূর্ব্বতিথ্যপেক্ষয়া বর্দ্ধমানামিত্যর্থঃ। ন তু ক্ষীয়মাণাপেক্ষয়া ক্ষীয়মাণত্বস্য পূর্ব্বতিথ্যপেক্ষিতত্বে বর্দ্ধমানত্বস্যাপি তথৈব ন্যায্যত্বাৎ। অতঃ প্রহরত্রয়মধিকং বা যদা বর্দ্ধমানামমাবাস্যাং লক্ষয়েত্তদা পরদিন এব শ্রাদ্ধং চন্দ্রক্ষয়ালাভেঽপি বচনাদেব এতদপ্যুভয়ত্রাপরাহ্লাভে বোদ্ধব্যম্। নন্বু পূর্ব্বদিনে তুরীয়ং যামং পূরয়িত্বাঽপরদিনে প্রহরত্রয়ং যাবদবতিষ্ঠমানা কথং বর্দ্ধমানা স্যাৎ সত্যং তুরীয়মনুপূরয়েদিতি অপরাহ্লে প্রাপ্ত্যুপলক্ষণার্থং ইতরথা দণ্ডাধিকদণ্ডো ন তুরীয়যামপূরণে কীদৃশী শাস্ত্রার্থব্যবস্থা স্যাৎ তদা চ পূর্ব্বদিনে দণ্ডাধিকতুরীয়প্রহরব্যাপিন্যমাবাস্যা পরদিনে প্রহর-

রাহ্লাভেঽপীয়ং লঘুহারীতোক্তা ব্যবস্থেত্যর্থঃ। অয়মর্থঃ। প্রাগুক্তবচনাৎ ক্ষীয়মাণাপক্ষে ক্ষীণে রাজনি বাসরতৃতীয়াংশবিধেঃ স্তম্ভিতায়ামপ্যুভয়ত্রাপরাহ্লসংশয়ে ত্রিমুহূর্ত্তেতি বচনাদ্ব্যবস্থেতি ব্যাচক্রুঃ॥ ১০৪॥

বর্দ্ধমানামাহেতি। বর্দ্ধমানাপক্ষে শ্রাদ্ধস্য ব্যবস্থামাহেত্যর্থঃ। নারায়ণোপাধ্যায়মতং দূষয়তি ন ত্বিতি। ক্ষীয়মাণা তৃতীয়াংশাব্যাপিনীতি ব্যাখ্যায় তদপেক্ষয়া বর্দ্ধমানা তৃতীয়াংশব্যাপিনীতি তেন ব্যাখ্যাতং তন্ন ত্বিত্যর্থঃ। ক্ষীয়াণত্বস্যেতি। প্রাগুক্তযুক্ত্যা পূর্ব্বতিথ্যপেক্ষয়া ক্ষীয়মাণত্বে বর্দ্ধমানত্বস্যাপি পূর্ব্বতিথ্যপেক্ষয়ান্যায্যত্বাদিত্যর্থঃ। এতদপীতি। একদিনমাত্রে তল্লাভে তু সংশয়াভাবাৎ তত্র বর্দ্ধমানত্বস্যাপ্রয়োজকত্বাদিতি ভাবঃ। নন্বিতি। পূর্ব্বদিনে তুরীয়যামাপূরণে তদ্দিনে শ্রাদ্ধযোগ্যমুহূর্ত্তলাভ এব ন স্যাদিতি ভাবঃ। দণ্ডোনেতি। কিঞ্চিদূনেত্যর্থঃ। অন্যথা দণ্ডোনত্বে শ্রাদ্ধার্হমুহূর্ত্তাব্যাপনাদসঙ্গতেঃ।

ত্রেয়মবতিষ্ঠমানা কথং ন বর্দ্ধমানা স্যাৎ। নন্বু বর্দ্ধমানামাবাস্যাপক্ষে প্রাতঃকালবিহিতস্য পক্ষাদিচরোর্ন তস্মিন্ দিনেঽমাবাস্যাপ্রাতঃকালানুষ্ঠানং পক্ষাদয়োঽভিযষ্টব্যা ইতি গোভিলবিরোধাৎ। নাপ্যপরদিনে দ্বিতীয়াবিদ্ধত্বাৎ দ্বিতীয়াবেধে। এষা বৈ সুমনা নামেষ্টিরিতি। তৈত্তিরীয়শ্রুতৌ নিন্দাগ্রহণাল্লোপ এব পক্ষাদিচরোঃ স্যাদিত্যাহ পক্ষাদাবেব কুর্ব্বীতেতি। অপরদিনে প্রতিপদ্যেব বিদ্ধায়ামপি কর্ত্তব্য ইত্যর্থঃ। বেধনিন্দা চ বহ্বৃচবিষয়েতি বক্ষ্যতে। প্রসঙ্গাদিদমাহ লঘুহারীতঃ। পার্ব্বণেঽংশে তুরীয়ে তু কার্য্যা ইষ্টির্দ্বিজাতিভিঃ। দ্বিতীয়াসহিতাং যস্মাদ্দূষয়ন্ত্যাশ্বলায়নাঃ॥ ইতি বহ্বৃচবিষয়শ্চেদং দূষয়ন্ত্যাশ্বলায়না ইত্যভিধানাৎ ছন্দোগপরিশিষ্টকৃতা চ বেধ এব ইষ্টেরুক্তত্বাৎ। অত এব বৌধায়নঃ। পর্ব্বণো যস্তুরীয়াংশ আদ্যাঃ প্রতিপদস্ত্রয়ঃ। যাগকালঃ স বিজ্ঞেয়ঃ প্রাতর্যুক্তো মনীষিভিঃ॥ ইতি। প্রসঙ্গাদ্দৈবকৃত্যতিথিব্যবস্থামাহ লঘুহারীতঃ। মধ্যাহ্নব্যাপিনী যা তু পূর্ব্বা

পক্ষাদয়ঃ প্রতিপদঃ যাগস্য প্রাতর্ব্বিহিতত্বেন তদ্দিনে সময়ান্তরে তৎকরণপ্রশক্তির্নিরস্তৈবেতি ভাবঃ। প্রসঙ্গাদিদমিতি। শ্রাদ্ধপ্রকরণে যাগকালব্যবস্থা মুনিনা প্রসঙ্গাদুক্তেত্যর্থঃ। পর্ব্বণোঽংশ ইতি। তথাচ পূর্ব্বদিন এবামাবাস্যাংশে তুরীয়ে ন তু পরদিনে দ্বিতীয়াবিদ্ধায়ামিতি পূর্ব্বপক্ষঃ। উক্তত্বাদিতি। পক্ষাদাবেব কুর্ব্বীত ইত্যুক্তবচনেনেত্যর্থঃ। অতএবেতি। বৌধায়নস্যাপি বহ্বৃচানুষ্ঠানবহুত্বাদিত্যর্থঃ। প্রসঙ্গাদিতি। দৈবকৃত্যতিথিসংশয়ে ইত্যর্থঃ। মধ্যাহ্নব্যাপিনীতি ইদঞ্চ মধ্যাহ্নবিহিতৈকভক্তব্রতাদিদৈবকৃত্যবিষয়ম্। মধ্যাহ্নব্যাপিনী

বা যদি বা পরা। তস্যাং কর্ম্ম প্রকুর্ব্বীত ক্ষয়বৃদ্ধী ন কারণম্॥ উভয়ত্র মধ্যাহ্নলাভে ব্যবস্থোক্তা বিষ্ণুধর্ম্মোত্তরে। নক্ষত্রং দেবদেবেশ তিথিশ্চার্দ্ধবিনির্গতাম্। দৃষ্টোপবাসঃ কর্ত্তব্যঃ কথং শঙ্কর জানতা॥ শঙ্কর উবাচ। সা তিথিস্তদহোরাত্রং যস্যামভ্যুদিতো রবিঃ। তয়া কর্ম্মাণি কুর্ব্বীত হ্রাসবৃদ্ধী ন কারণম্॥ সা তিথিস্তদহোরাত্রং যস্যামস্তমিতো রবিঃ। তয়া কর্ম্মাণি কুর্ব্বীত হ্রাসবৃদ্ধী ন কারণম্॥ শুক্লপক্ষে তিথিগ্রাহ্যা যস্যামভ্যুদিতো রবিঃ। কৃষ্ণপক্ষে তিথিগ্রাহ্যা যস্যামস্তমিতো রবিঃ॥ এতচ্চ যুগ্মবচনাব্যাপ্তদশম্যাদিতিথিবিষয়মিতি

---

গ্রাহ্যা। একভক্তব্রতে তিথিরিতি বৌধায়নৈকবাক্যত্বাৎ ন তু পূর্ব্বাহ্নবিহিতদেবকৃত্যপরম্। তত্র দিনদ্বয়ে পূর্ব্বাহ্নলাভাৎ পূর্ব্বদিনে মধ্যাহ্নলাভেঽপি পক্ষভেদেনৈব ব্যবস্থেতি। পুনস্তথৈব সংশয়াদাহ শুক্লপক্ষে তিথিরিতি। এতচ্চেতি। পক্ষভেদেন ব্যবস্থাপকোক্তবচনঞ্চেত্যর্থঃ। যুগ্মেতি। যুগ্মাগ্নিকৃতভূতানীত্যাদিনিগমবচনেনেত্যর্থঃ। দশম্যাদীতি। উভয়পক্ষদশমীত্রয়োদশীকৃষ্ণচতুর্দ্দশীবিষয়মিত্যর্থঃ। বিষ্ণুধর্ম্মোত্তরবচনস্য তিথিসামান্যবিষয়কস্য সামান্যবিশেষন্যায়েন যুগ্মবিশেষেতরপরত্বাদিতি ভাবঃ। অন্যথা তিথিসামান্যপরত্বে। শুক্লপক্ষেতি। শুক্লপক্ষবিহিতযুগাদ্যাদিশ্রাদ্ধে একোদ্দিষ্টে চ উভয়ত্র পূর্ব্বাহ্নমধ্যাহ্নলাভে পক্ষভেদেন ব্যবস্থা ইত্যর্থঃ। মধ্যাহ্নসম্বন্ধাবিশেষাদিতি। একভক্তাদিদেবকৃত্যে একোদ্দিষ্টে চ মধ্যাহ্নবিহিতত্বসাম্যাদিত্যর্থঃ। তেন মধ্যাহ্নবিহিতপিতৃকৃত্যমপি হারীতবচনবিষয়ম্। শুক্লপক্ষপার্ব্বণে তু শুক্লপক্ষস্য পূর্ব্বাহ্নে শ্রাদ্ধং কুর্য্যাদ্বিচক্ষণ ইত্যনেন পূর্ব্বাহ্ন এব কাল ইতি। রৌহিণন্তু ন লঙ্ঘয়েদিত্যনেন শুক্লপক্ষপার্ব্বণেঽপি মধ্যাহ্নঃ কাল ইতি কেচিৎ। এবঞ্চাত্রাপরাহ্ণিকেতরপিতৃকৃত্যস্যাপি

তিথিবিবেকে দর্শিতম্। বিস্তরভয়ান্নেহ প্রস্তূয়তে অন্যথা যুগ্মবচনবিরোধাৎ। শুক্লপক্ষবিহিতপার্ব্বণৈকোদ্দিষ্টয়োরপি এতাদৃশী ব্যবস্থা মধ্যাহ্নসম্বন্ধাবিশেষাৎ। অমাবাস্যাব্যতিরিক্তকৃষ্ণপক্ষতিথিপার্ব্বণতিথিদ্বৈধে গৃহ্যপরিশিষ্টবচনম্। যয়াস্তং সবিতা যাতি পিতরস্তামুপাসতে। তিথিন্তেভ্যোঽপরাহ্লো হি স্বয়ং দত্তঃ স্বয়ম্ভুবা॥ এতচ্চ নৈকোদ্দিষ্টশুক্লপক্ষপার্ব্বণবিষয়ম্। অপরাহ্লো হি দত্ত ইতি হেতুবন্নিগদাৎ॥ ১০৫॥

অথ প্রতিমাসপার্ব্বণাশক্তস্য কর্ত্তব্যম্। পার্ব্বণশ্রাদ্ধমভিধায়াহ মনুঃ। অনেন বিধিনা শ্রাদ্ধং ত্রিরব্দস্যেহ নির্ব্বপেৎ। হেমন্তগ্রীষ্মবর্ষাসু পাঞ্চযাজ্ঞিকমন্বহম্॥ অয়ঞ্চ সাগ্নিনিরগ্নিসাধারণঃ পক্ষঃ নিরগ্নিবিষয়ত্বে প্রমাণাভাবাৎ। সংবৎসরমধ্যে যদত্র পার্ব্বণং বিহিতং তদ্-

পক্ষভেদবচনবিষয়ত্বে দ্বিতীয়াদিকযুগ্মানাং পূজ্যতা নিয়মাদিষু ইতি নিগমবচনে দ্বিতীয়াদিপদাৎ অপরাহ্লিকেতরপিতৃকৃত্যসংগ্রহঃ। ন চোভয়ত্রবিহিতকালপ্রাপ্তৌ পূর্ব্বদিন এব সর্ব্বকর্ম্মানুষ্ঠানং যুক্তমিতি বাচ্যং বলবদ্বচনস্য বিষয়ে দুর্ব্বলন্যায়াপ্রবৃত্তেঃ। অতএবোক্তং বাচনিকেঽর্থে ন্যায়ানবতার ইতি। অমাবাস্যাব্যতিরিক্তেতি। তস্যাস্তু ক্ষীয়মাণত্বাদিভেদেন পূর্ব্বত্র পরত্র বা ব্যবস্থেতি ভাবঃ। হেতুমন্নিগদেতি। এতদ্বচনেন কল্পনীয়েঽপরাহ্লে পিতৃভ্যো দদ্যাদিতি বিধৌ পিতৃকৃত্যে আপরাহ্লিক এবাপরাহ্লস্য নিমিত্তত্বং শ্রুতং ন তু পূর্ব্বাহ্লমধ্যাহ্লবিহিতেঽপীতি ভাবঃ॥ ২০৫॥

অথ প্রতিমাসপার্ব্বণাশক্তস্য কর্ত্তব্যম্। হেমন্তগ্রীষ্মবর্ষাস্বিতি। ঋতুবৎসৎসরাভিপ্রায়েণ তেন কুম্ভবৃষকন্যাস্বিত্যর্থঃ। কন্যাকুম্ভবৃষস্থেঽর্কে ইত্যেকবাক্যত্বাদিতি বক্ষ্যতে। নিরগ্নিবিষয়ত্বে নিরগ্নি-

দ্রব্যাসম্ভবাদেনি মিত্তত্বাদ্দর্শান্তরেঽনাবশ্যং পঞ্চযজ্ঞান্তর্গতং যচ্ছ্রাদ্ধং তৎ প্রত্যহমুদকাদিনাপি কার্য্যম্। হেমন্তগ্রীষ্মবর্ষাস্বিতি যদুক্তং তৎ কন্যাকুম্ভবৃষস্থেঽর্ক ইতি দর্শয়তি মৎস্যপুরাণে। অনেন বিধিনা শ্রাদ্ধং ত্রিরব্দস্যেহ নির্ব্বপেৎ। কন্যাকুম্ভবৃষস্থেঽর্কে কৃষ্ণপক্ষেষু সর্ব্বদা॥ কৃষ্ণপক্ষেম্বিতি অমাবাস্যায়ামেবেতি। সাগ্নির্নিরগ্নিস্তিথ্যন্তরেঽপীত্যাহ মনুঃ। ন পৈত্র্যযজ্ঞিয়ো হোমো লৌকিকাগ্নৌ বিধীয়তে। ন দর্শেন বিনা শ্রাদ্ধমাহিতাগ্নের্দ্বিজন্মনঃ॥ যস্মাৎ পিণ্ডপিতৃযজ্ঞাঙ্গভূতোঽগ্নৌকরণহোমো ন লৌকিকাগ্নৌ বিধীয়তে কিন্তু দক্ষিণাগ্নৌ স চ দর্শ এব বিদ্যতে দর্শ এব তদুদ্ধরণস্য বিহিতত্বাৎ। অতস্তদঙ্গবাধভিয়া ন দর্শেন বিনা আহিতাগ্নেঃ শ্রৌতাগ্নিমতঃ শ্রাদ্ধমেতৎ প্রতিমাসবিহিতপার্ব্বণাখ্যমস্তীতি অগত্যা হ্যষ্টকাদৌ যথা কথঞ্চিদ্বিপ্রপাণ্যাদৌ অগ্নৌকরণহোমঃ। যচ্চ ন দর্শেন বিনেত্যত্র দর্শপদেন পার্ব্বণবিধির্লক্ষ্যতে তেন দর্শেন বিনা পার্ব্বণবিধিনা বিনা নাহি-

মাত্রবিষয়ত্বে। বচনলভ্যার্থমাহ সংবৎসরস্য মধ্যে ইতি। অনাবশ্যকত্বমিতি। উক্তশ্রাদ্ধত্রয়মেব পরং তস্যাবশ্যকমিতি ভাবঃ। বিপ্রপাণ্যাদাবিতি। অগ্ন্যভাবে তু বিপ্রস্য পাণাবেব জলেঽপি বা ইত্যুক্তেরিত্যর্থঃ। বাক্যভেদাপত্তেরিতি। অস্মদ্ব্যাখ্যায়াস্তু ন পৈত্র্যযজ্ঞিয় ইতি পূর্ব্বার্দ্ধস্য পরার্দ্ধে হেতুতয়া ন বাক্যভেদ ইতি ভাবঃ। দ্বিঃ কন্যাতুলয়োঃ চতুঃ কুম্ভবৃষকন্যাতুলাসু দিনে দিনে পিতৃপ্রীত্যতিশয়ার্থং সর্ব্বেষ্বেবাপরপক্ষাহঃসু ক্রিয়মাণে পিতৄন্ প্রীণাতি ইত্যাপস্তম্বোক্তেঃ। আহিতাগ্নেরিতি। আহিতাগ্নেরিত্যাদি পূর্ব্বশ্রুতেরিত্যন্তং নিগমসূত্রম্।

তাগ্নেঃ শ্রাদ্ধমিতি হলায়ুধব্যাখ্যানমসঙ্গতং লক্ষণাহেত্বভাবাৎ পূর্ব্বার্দ্ধেন সহানন্বয়াৎ বাক্যভেদাপত্তেশ্চ। তস্মাদুক্তমেব ব্যাখ্যানং পার্ব্বণত্রয়াশক্তেন দ্বিঃ সকৃদ্বা কর্ত্তব্যমিত্যাহ দেবলঃ। অনেন বিধিনা শ্রাদ্ধং কুর্য্যাৎ সংবৎসরং সকৃৎ। দ্বিশ্চতুর্ব্বা যথাশক্তি মাসে মাসে দিনে দিনে॥ সকৃৎকরণপক্ষস্তু কন্যায়ামতিপ্রশস্তত্বাৎ পার্ব্বণশ্রাদ্ধাশক্তসাহিতাগ্নেঃ পিণ্ডদানমাত্রং নিরগ্নিনা ব্রাহ্মণভোজনমাত্রং কর্ত্তব্যমিত্যাহ নিগমঃ। আহিতাগ্নেঃ পিত্রর্চ্চনং পিণ্ডৈরেব ব্রাহ্মণান্ ভোজয়েদিতি পূর্ত্তশ্রুতেঃ। পূর্ত্তমন্নদানম্। অশক্তনিরগ্নিবিষয়ে পার্ব্বণশ্রাদ্ধমভিধায়াহ বিষ্ণুপুরাণম্। অন্নেন বা যথাশক্তি কালেঽস্মিন্ ভক্তিনম্রধীঃ। ভোজয়িষ্যতি বিপ্রাগ্র্যান্ তন্মাত্রবিভবো নরঃ॥ অসমর্থোঽন্নদানস্য ধান্যমানং স্বশক্তিতঃ। প্রদাস্যতি দ্বিজাগ্রেভ্যঃ স্বল্পাং বা পিতৃদক্ষিণাম্॥ অত্রাপ্যসামর্থ্যযুক্তঃ করাগ্রাগ্রস্থিতাংস্তিলান্। প্রণিপত্য দ্বিজা-

অস্যার্থঃ। আহিতাগ্নেঃ শ্রৌতাগ্নিমতঃ পিণ্ডৈরেব পিণ্ডপিতৃযজ্ঞসম্বন্ধিপিণ্ডৈরেব পিত্রর্চ্চনং পার্ব্বণশ্রাদ্ধন্ত্বাহিতাগ্নের্নাবশ্যকং যতো ব্রাহ্মণান্ ভোজয়েদিতি পার্ব্বণবিধায়কবাক্যম্। পূর্ত্তশ্রুতিঃ ব্রাহ্মণভোজনদানবিধায়িকা শ্রুতিরতো দানাকরণে ন কদাচিৎ ক্ষতিঃ কিন্তু পিণ্ডপিতৃযজ্ঞ এব আহিতাগ্নিনা কার্য্য ইতি। পূর্ব্বশ্রুতেরিতি পূর্ব্বপদং ব্যাচষ্টে পূর্ত্তমন্নদানমিতি। অশক্তনিরগ্নিবিষয়ে দ্বিঃ সকৃদ্বেত্যাদ্যুক্তাশক্তনিরগ্নিবিষয়ে গবাহ্নিকং গোদ্দিনভক্ষ্যম্। কক্ষমূলেতি। ঊর্দ্ধবাহুযুগ ইত্যর্থঃ। সূর্য্যাদিলোকপালানাং শ্রাব্যত্বেনেত্যর্থঃ। ধনং দক্ষিণার্হরজতাদি। শ্রাদ্ধোপযোগ্যং শ্রাদ্ধোপযুক্তবস্ত্রগন্ধাদি। অস্মাকং সমৃদ্ধিশ্যেতীতি।

গ্রায় কস্মৈচিন্নৃপ দাস্যতি॥ তিলৈঃ সপ্তাষ্টভির্বাপি সমবেতান্ জলাঞ্জলীন্। ভক্তিনম্রঃ সমুদ্দিশ্য ভুব্যস্মাকং প্রদাস্যতি॥ যতঃ কুতশ্চিৎ সম্প্রাপ্য গোভ্যো বাপি গবাহ্নিকম্। অভাবে প্রীণয়ন্নস্মান্ শ্রদ্ধাযুক্তঃ প্রদাস্যতি॥ সর্ব্বাভাবে নতাঙ্গত্বাৎ কক্ষমূলপ্রদর্শকঃ। সূর্য্যাদিলোকপালানামিদমুচ্চৈঃ পঠিষ্যতি॥ ন মেঽস্তি বিত্তং ন ধনং ন চান্যৎ শ্রাদ্ধোপযোগ্যং স্বপিতৄন্নতোঽস্মি। তৃপ্যন্তু ভক্ত্যা পিতরো ময়ৈতৌ ভুজৌ কৃতৌ বর্ত্মনি মারুতস্য॥ অত্রান্নাদ্যুৎসর্গঃ পিত্রুদ্দেশেন কর্ত্তব্যঃ ন ব্রাহ্মণসম্প্রদানকঃ অস্মাকং সমুদ্দিশ্যেতি বচনাৎ। পিতৃদক্ষিণামিতি পিতৃকর্ম্মবিহিতাং রজতাদিদক্ষিণামেকোদ্দিষ্টাশক্তৌ একাদশ্যাং শ্রাদ্ধমিতি বক্ষ্যতি॥ ১০৬॥

তেন মধ্যপঠিতস্যৈতস্য ব্রাহ্মণভোজনাদৌ সর্ব্বত্রান্বয়ঃ। পঞ্চম্যন্তত্রয়ং পিত্রুদ্দেশেন কর্ত্তব্য ইত্যত্র হেতু। এতেনাগৌকরণাদীতিকর্ত্তব্যতাপূর্ব্বকং শ্রাদ্ধো ক্তাভিলোপেনৈবান্নোৎসর্গঃ কার্য্য ইতি সিদ্ধম্। যুক্তঞ্চৈতৎ নিত্যকর্ম্মণঃ সাঙ্গানুষ্ঠানাশক্তাবপি কেবলপ্রধানস্যাবশ্যানুষ্ঠেয়ত্বাৎ। অতএবোক্তং নিত্যে হি কিঞ্চিদঙ্গহানির্ন কাম্যে ইতি। অশক্তবিষয়ে যদুক্তং ব্রাহ্মণভোজনাদিকং তদাবশ্যকে পার্ব্বণাদাবেব ন ত্বেকোদ্দিষ্ট ইত্যাহ একোদ্দিষ্টাশক্তৌ ত্বিতি। তথাচাতিযত্নেনাপি দ্রব্যাদিকং সম্পাদ্য মৃততিথাবেকাদশ্যাং বা একোদ্দিষ্টমেব কর্ত্তব্যং ন তু তত্রোক্তানুকল্পবিধিরিতি ভাবঃ। একোদ্দিষ্টপদঞ্চাত্র মৃততিথিজ্ঞানসাপেক্ষশ্রাদ্ধপরং তেন বিকৃতপার্ব্বণসংগ্রহঃ। মৃততিথিকর্ত্তব্যেতি বিহায় মৃততিথিজ্ঞানসাপেক্ষেতিকরণাচ্চ আদ্যষাণ্মাসিকশ্রাদ্ধানাং নাসংগ্রহঃ॥ ১০৬॥

অথ পংক্তিপাবনাঃ। তত্র মনুঃ। অপাংক্ত্যোপহতা পংক্তিঃ পঠ্যতে যৈর্দ্বিজোত্তমৈঃ। তন্নিবোধত কার্ৎস্ন্যেন দ্বিজাগ্র্যান্ পংক্তিপাবনান্॥ অগ্র্যাঃ সর্ব্বেষু বেদেষু সর্ব্বপ্রবচনেষু চ। শ্রোত্রিয়ান্বয়জাশ্চৈব বিজ্ঞেয়াঃ পংক্তিপাবনাঃ॥ ত্রিণাচিকেতঃ পঞ্চাগ্নিস্ত্রিসুপর্ণঃ ষড়ঙ্গবিৎ। ব্রহ্মদেয়াত্মসন্তানো জ্যেষ্ঠঃ সামগ এব চ॥ বেদার্থবিৎ প্রবক্তা চ ব্রহ্মচারী সহস্রদঃ। শতায়ুশ্চেতি বিজ্ঞেয়া ব্রাহ্মণাঃ পংক্তিপাবনাঃ॥ অগ্র্যা বেদপারগেষু যে করতলামলকবদ্বেদং পশ্যন্তি। প্রোচ্যতে এভির্ব্বেদার্থ ইতি। প্রবচনান্যঙ্গানি। ত্রিণাচিকেতোঽধ্বর্য্যুবেদভাগঃ তদাগতপুরুষোঽপি। বেদার্থবিদ্বিনাপ্যঙ্গম্। প্রবক্তা প্রকৃষ্টাধ্যাপকঃ। সহস্রদো বহুদ ইতি গোবিন্দরাজঃ গোসহস্রদ ইত্যর্থঃ। শঙ্খঃ। ব্রহ্মদেয়াত্মসন্তানো ব্রহ্মদেয়াপ্রদায়কঃ। ব্রহ্মদেয়াপতিশ্চৈব ব্রাহ্মণাঃ

শ্রাদ্ধাঙ্গতয়া নিমন্ত্রণং নিরূপয়তি অথ নিমন্ত্রণমিতি। পূর্ব্বেদ্যুঃ শ্রাদ্ধকর্ম্মণঃ। অপরেদ্যুঃ তৎপরদিনে শ্রাদ্ধদিনে বিপ্রান্নিমন্ত্রয়ীতেত্যর্থঃ। ন ব্রীহিযববদিতি। নৈচ্ছিক ইত্যর্থঃ। অষ্টদোষগ্রাসাদিতি হেতুরাশয়স্থঃ। অষ্টদোষাশ্চোক্তাঃ। প্রমাণত্বাপ্রমাণত্বপরিত্যাগপ্রকল্পনা। তদুজ্জীবনহানাভ্যাং বিকল্পে অষ্টদোষতা॥ তথাহি ব্রীহিভির্যজেত যবৈর্যজেত ইত্যত্র ব্রীহিপ্রয়োগে প্রতীতযবপ্রামাণ্যপরিত্যাগঃ অপ্রতীতযবাপ্রামাণ্যপ্রকল্পনা। প্রয়োগান্তরে যবেষু উপাদীয়মানেষু পরিত্যক্তযবপ্রামাণ্যোজ্জীবনং স্বীকৃতযবাপ্রামাণ্যহানিরিতি চত্বারো দোষাঃ। এবং যবপ্রয়োগে ব্রীহিবিধেরপি চত্বার ইত্যষ্টৌ দোষাঃ। নিশ্চিত্যেতি। নিশ্চয়ে সতি নিরামিষভোজনাদীনামঙ্গত্বম্। অতএব পূর্ব্বদিনে কৃতনিরামিষভোজ-

পংক্তিপাবনাঃ ॥ বিষ্ণুঃ। অথ পংক্তিপাবনাঃ বেদাঙ্গস্যাপ্যেকস্য পারগঃ পুরাণেতিহাসপারগো ধর্ম্মশাস্ত্রস্যৈকস্য পারগঃ তীর্থপূতো যজ্ঞপূতস্তপঃপূতঃ সত্যপূতো মন্ত্রপূতশ্চ গায়ত্রীজপানিরতো জামাতা দৌহিত্রশ্চেতি। পাত্রং বিশেষেণ যোগিনঃ। মৎস্যপুরাণে। যশ্চ প্রকুরুতে বাচং যশ্চ মীমাংসতেঽধ্বরম্। সামস্বরবিধিজ্ঞশ্চ পংক্তিপাবনপাবনাঃ॥ অষ্টবর্ষা তু যা দত্তা শ্রুতিশীলসমন্বিতে। সা গৌরী তৎসুতো গৌরঃ পংক্তিপাবন এব সঃ॥ বায়ুপুরাণে। যতিস্তু সর্ব্বাগ্রপ্রাণাং সর্ব্বেষামগ্রভুগ্‌ভবেৎ। ইতিহাসপঞ্চবেদান্ যঃ পঠেদ্ধি দ্বিজোত্তমঃ॥ অনন্তরং তথা যোগী নিযোক্তব্যো বিজানতা। ত্রিবেদোঽনন্তরং তস্য দ্বিবেদস্তদনন্তরম্। একবেদস্ততঃ পশ্চাৎ বেদাধ্যায়ী ততঃপরম্॥ যতিরিতি ত্রিদণ্ডৈকদণ্ডয়োরেব গ্রহণম্। অভাবে ধ্যানভিক্ষূণাং ভোজয়েদ্‌ব্রহ্মচারিণম্। শিখিভ্যো ধাতুরক্তেভ্যস্ত্রিদণ্ডেভ্যঃ

নেন পুংসা পরদিনে তীর্থপ্রাপ্ত্যা গ্রহোপরাগনিমিত্তেন বা শ্রাদ্ধং কর্ত্তব্যমেব। পরদিনে তীর্থপ্রাপ্ত্যাদিসন্দেহেন শ্বঃ কর্ত্তাস্মীতি নিশ্চয়বিরহাৎ সতি তু তথা নিশ্চয়ে নিরামিষভোজনমঙ্গমেবেতি। নিশ্চয়ো যদ্যপি ভাবিনি দুঃশক্যঃ তথাপি উৎকটকোটিকসম্ভাবনৈব অত্র নিশ্চয়পদেন বিবক্ষিতা। অসম্ভবে ইতি। তথাচ পূর্ব্বদিনাসম্ভব এব পরদিনে তদিতি। ব্যবস্থিত এব বিকল্প ইতি ভাবঃ। অত্র দাতেত্যভিধানাদন্যদ্বারা নিমন্ত্রণং ন কার্য্যম্। যৎ তু সাধুভিঃ সন্নিমন্ত্রয়েদিতি বচনাৎ স্বয়মশক্তৌ সজাতীয়দ্বারা নিমন্ত্রয়েদিতি শ্রীদত্তেনোক্তং তদ্বচনপূর্ব্বাপরমনালোচ্যৈব।

প্রদাপয়েৎ॥ ইতি বক্ষ্যমাণবচনাৎ। তথা যোগীতি যথা যতেরনন্তরমিতিহাসপঞ্চমবেদপাঠকঃ। তথা যোগী গৃহস্থ এব যোগযুক্তঃ। ব্রাহ্মণোপবেশনক্রমোঽয়মুক্তো ব্রহ্মপুরাণে। ষড়ঙ্গবিদ্ধ্যানযোগী যজ্ঞতন্ত্রজ্ঞ এব চ। অযাচিতাশী বিপ্রো বা শ্রাদ্ধকল্পবিদেব বা॥ অষ্টাদশানাং বিদ্যানামেকস্যাপি চ পারগঃ। বায়ুপুরাণে। গৃহস্থানাং সহস্রেণ বানপ্রস্থশতেন চ॥ ব্রহ্মচারিসহস্রেণ একযোগী বিশিষ্যতে॥ যমঃ। অলাভে ধ্যানভিক্ষূণাং ভোজয়েদ্‌ব্রহ্মচারিণম্‌। তদভাবেঽপ্যুদাসীনং গৃহস্থমপি ভোজয়েৎ॥ ধ্যানভিক্ষুঃ ধ্যানপ্রধানো ভিক্ষুঃ একদণ্ডঃ। উদাসীনমসম্বন্ধিনামিতি মুখ্যঃ কল্পঃ। অনুকল্পমাহ মনুঃ। এষ বৈ প্রথমঃ কল্পঃ প্রদানে হব্যকব্যয়োঃ। অনুকল্পস্ত্বয়ং জ্ঞেয়ঃ সদা সদ্ভিরনুষ্ঠিতঃ॥

তথাহি কূর্ম্মপুরাণে। গোময়েনোদকৈর্ভূমিং শোধয়িত্বা সমাহিতঃ। উপবেশ্য দ্বিজানগ্র্যান্‌ সাধুভিঃ সন্নিমন্ত্রয়েৎ॥ ইতি। অত্র সাধুভিস্সূনৃতর্বচনৈরিত্যর্থঃ। ব্রাহ্মণোপবেশনানন্তরং নিমন্ত্রণাসম্ভবাৎ। অজ্ঞাতীনিতি। অত্র গুণবদসপিণ্ডাভাবে সপিণ্ডমপি গুণবন্তং ভোজয়েৎ। তথাচ গুণবদুদাসীনমভিধায় বৌধায়নঃ। তদভাবে এবংবিধং সপিণ্ডমপি ভোজয়েৎ ভোজনীয়শ্চায়ং সপিণ্ডঃ পুরুষত্রয়াদূর্দ্ধতনঃ ভোজয়েদূর্দ্ধং ত্রিভ্যো গুণবন্তং সপিণ্ডমপীতি গোভিলোক্তেঃ। অসমানার্ষান্‌ অসমান প্রবরান্‌ এতচ্চাজ্ঞাতিত্বং সমানপ্রবরত্বঞ্চ শ্রাদ্ধকর্ত্তুঃ নিমন্ত্রয়েদিত্যাখ্যাতেন তস্যৈবোপস্থিতিঃ ন তু শ্রাদ্ধভোক্তুঃ অনুপস্থিতেঃ অতএব শ্রাদ্ধভোক্তৃকর্ত্রোর্দ্বয়োরেবাজ্ঞাতিত্বাদিকমিতি প্রাচীনব্যখ্যানমসৎ। পরদিনামন্ত্রণে-

মাতামহং মাতুলঞ্চ স্বস্ত্রীয়ং শ্বশুরং গুরুম্। দৌহিত্রং বিট্পতিং বন্ধুমৃত্বিক্যাজ্যৌ চ ভোজয়েৎ॥ এষ গুণবদসম্বন্ধিব্রাহ্মণভোজনলক্ষণঃ। বিট্পতির্জামাতা। বশিষ্ঠঃ। শিষ্যান্ গুণবতো ভোজয়েৎ। অভাবে শিষ্যান্ ভোজয়েদিতি প্রক্রম্য দেবলঃ। অজ্ঞাতীনসমানার্ষান-যুগ্মানাত্মশক্তিতঃ। গুণবতোহন্যস্যাভাবে গুণবন্তং ভোজ-য়েৎ সপিণ্ডমপি ভোজয়েৎ ইত্যাহ বৌধায়নঃ। তদভাবে রহস্যবিদৃচো যজুংষি সামানীতি শ্রাদ্ধস্য মহিমা তস্মা-দেবংবিধং সপিণ্ডমপ্যাশয়েৎ। রহস্যমুপনিষৎ। এবংবিধং বেদবিদম্। আপস্তম্বঃ। ভোজয়েদ্‌ব্রাহ্মণান্ ব্রহ্মবিদো যোনিগোত্রান্তেবাস্যসম্বন্ধান্ গুণহান্যা তু পরেষাং সমু-দিতাঃ সৌন্দর্য্যা ভোজয়িতব্যাঃ। যোন্যসম্বন্ধান্ গোত্রা-সম্বন্ধানিত্যর্থঃ। এষু গুণবত্ত্বাভাবে গুণসম্পূর্ণঃ সপিণ্ডো ভোজয়িতব্যঃ। এতৎপুরুষত্রয়াদূর্দ্ধং ভোজয়েৎ ঊর্দ্ধং ত্রিভ্যো গুণবন্তমিতি গোতমবচনাৎ। অথ বর্জ্যাঃ। মনুঃ। ন শ্রাদ্ধং ভোজয়েন্মিত্রং ধনৈঃ কার্য্যোহস্য সংগ্রহঃ। নারিং ন মিত্রং যং বিদ্যাত্তং শ্রাদ্ধং ভোজয়েদ্দ্বিজম্॥ যঃ সঙ্গতানি কুরুতে মোহাৎ শ্রাদ্ধে ন মানবঃ। স স্বর্গাৎ চ্যবতে লোকাৎ শ্রাদ্ধামিত্রো দ্বিজাধমঃ॥ কামং শ্রাদ্ধেহর্চ্চয়েন্মিত্রং নাভিরূপমপি ত্বরিম্। দ্বিষতা হি হবির্ভুক্তং ভবতি প্রেত্য নিষ্ফলম্। মিত্রমরিঞ্চ পূর্ব্ব-

হপীতি। পরদিননিমন্ত্রণপক্ষেহপীত্যর্থঃ। তথাচ নিরামিষসকৃদ্ভোজনং প্রকরণাৎ শ্রাদ্ধাঙ্গমেব ন তু সান্নিধ্যান্নিমন্ত্রণাঙ্গং সান্নিধ্যাপেক্ষয়া প্রকরণস্য

সিদ্ধম্। ধনৈর্ধনান্তরৈঃ সংগ্রহোঽবিচ্ছেদঃ। সঙ্গতং মিত্রভাবম্। স্বর্গাৎ কর্ম্মান্তরার্জ্জিতাৎ। কামমিতি গুণবদ্‌ব্রাহ্মণাভাবে সগুণং মিত্রং ভোজয়েৎ ন যোগ্যমপি রিপুম্। গুণবন্মিত্রপ্রসবার্থমিদম্। ব্রাহ্মণো হ্যনধীয়ানস্তৃণাগ্নিরিব শাম্যতি। তস্মৈ হব্যং ন দাতব্যং ন হি ভস্মনি হূয়তে॥ অবিদ্বন্নিষেধার্থমিদম্। নিন্দামাহ। যাবতো গ্রসতে পিণ্ডান্ হব্যকব্যেষ্বমন্ত্রবিৎ। তাবতো গ্রসতে প্রেত্য দীপ্তান্ শূলান্ পয়োগুড়ান্॥ প্রেত্য গ্রসতে প্রস্তুতঃ শ্রাদ্ধকর্ত্তা। বিশিষ্ঠঃ। বিদ্বদ্ভ্যো জ্যান্যবিদ্বাংসো যেষু রাষ্ট্রেষু ভুঞ্জতে। তান্যনাবৃষ্টিমৃচ্ছন্তি মহদ্বা জায়তে ভয়ম্॥ তানি রাষ্ট্রাণি। ঋচ্ছন্তি প্রাপ্নুবন্তি। ইচ্ছন্তীতি পাঠে তানি অন্নানি ইতি সম্বন্ধঃ। অথ নিমন্ত্রণম্। তত্র মনুঃ। পূর্ব্বেদ্যুরপরেদ্যুর্বা শ্রাদ্ধকর্ম্মণ্যুপস্থিতে। নিমন্ত্রয়ীত ত্র্যবরান্ সম্যগ্বিপ্রান্ যথোদিতান্॥ ত্রয়োঽবরা নিকৃষ্টকোটির্যেষাং তান্ পূর্ব্বদিনাপরদিনয়োর্ব্রীহিযববৎ তুল্যবলবদ্বিকল্পা ইত্যাহ দেবলঃ।

বলবত্ত্বাদিতি ভাবঃ। অত্র স্মার্ত্তাঃ অবান্তরপ্রকরণাৎ সন্নিধানাচ্চ একভক্তাদিকং নিমন্ত্রণাঙ্গমেব। অতএব পবিত্রচ্ছেদনতিলপ্রক্ষেপাদীনার্ঘমাঙ্গং ন তু প্রকরণবলেন শ্রাদ্ধাঙ্গং প্রকরণমাত্রাৎ সান্নিধ্যপ্রকরণোভয়োর্ব্বলবত্ত্বাৎ। অতো নিরামিষসকৃদ্ভক্তাদিনিয়মবিশিষ্টপূর্ব্বদিবসীয়নিমন্ত্রণাশক্তৌ তন্নিমন্ত্রণমনূদ্য পরেদ্যুর্বা ইতি পরেদ্যুরূপকালমাত্রবিধিঃ ন ত্বসম্ভবে পরেদ্যুর্বিশিষ্টনিমন্ত্রণান্তরবিধিঃ স্বতন্ত্রবিধৌ কল্পনাগৌরবাৎ। এবঞ্চ সতি সিদ্ধমেব পরদিননিমন্ত্রণেঽপি একভক্তাদিকমঙ্গং কালভেদেঽপি নিমন্ত্রণভেদাভাবাৎ। অতএব পরদিনে নিমন্ত্রণেঽপি সম্বদ্ধ্যতে

শ্বঃ কর্ত্তাস্মীতি নিশ্চিত্য দাতা বিপ্রান্নিমন্ত্রয়েৎ। নিরামিষং সকৃদ্ভুক্ত্বা সর্ব্বস্বপ্তজনে গৃহে ॥ অসম্ভবে পরেদ্যুর্ব্বা ব্রাহ্মণাংস্তান্ নিমন্ত্রয়েৎ। অজ্ঞাতীনসমানার্ষানযুগ্মানাত্মশক্তিতঃ ॥ নিরামিষং সকৃদ্ভুক্ত্বা ইত্যপরদিনেঽপি সম্বধ্যতে। তথা মার্কণ্ডেয়পুরাণে। নিমন্ত্রয়ীত পূর্ব্বেদ্যুঃ পূর্ব্বোক্তান্ দ্বিজসত্তমান্। অপ্রাপ্তৌ তদ্দিনে বাপি হিত্বা যোষিৎপ্রসঙ্গিনম্ ॥ ১০৭ ॥

ইত্যুক্তং ন তু শ্রাদ্ধে ইত্যুক্তমিত্যাহুঃ। বস্তুতো নিমন্ত্রণং শ্রাদ্ধাঙ্গমেব শ্রাদ্ধপ্রকরণাৎ শ্রাদ্ধং কথং স্যাদিতি আকাঙ্ক্ষয়ৈব সর্ব্বেষাং নিরামিষভোজননিমন্ত্রণানামুত্থানাৎ। ন ত্বন্তরা নিমন্ত্রণেতিকর্ত্তব্যতাকাঙ্ক্ষয়া নিরামিষভোজনবিধ্যুত্থানং প্রমাণাভাবাৎ। অতো নিমন্ত্রণপ্রকরণাভাব এব সান্নিধ্যমাত্রস্য চ প্রকরণাপেক্ষয়া দুর্ব্বলত্বাৎ। অতএব রাজসূয়ে সর্ব্বেষামেব যাগানামঙ্গত্বেন রাজসূয়প্রকরণোক্তস্যাভিষেচনীয়াখ্যযাগবিশেষস্য সন্নিধৌ পঠিতানামপি অক্ষৈর্দীব্যতি শৌনঃশেফং শৃণোতীত্যাদ্যুক্তানাং অক্ষক্রীড়াশৌনঃশেফচরিতশ্রবণাদীনাং রাজসূয়াঙ্গত্বমেব ন তু সান্নিধ্যাদভিষেচনীয়াঙ্গত্বং ক্ত্বাপদস্য চাঙ্গত্বাবোধকত্বাৎ অন্যথা ত্রিবৃতাসূত্রেণ যূপং পরিচীয়াগ্নীষোমীয়ং পশুমুপাকরোতীত্যত্রাপি যূপপরিচয়নস্য তদ্বেষ্টনরূপস্য পশূপাকরণাঙ্গতাপত্তেঃ। অতঃ ক্ত্বাপদং ক্রমমাত্রপরমেবেহেতি। অতএব ব্রহ্মপুরাণে। মৃতাহাদথ পূর্ব্বেদ্যুঃ স্নাত্বা চৈকাশনো ভবেৎ। অধঃশায়ী ব্রহ্মচারী বিপ্রান্মান্যান্ নিমন্ত্রয়েৎ॥ ইত্যনেন দ্বয়োরেব স্বাতন্ত্র্যেণ শ্রাদ্ধাঙ্গতৈব প্রতিপাদিতেতি এবঞ্চ অপাত্রকশ্রাদ্ধেঽপি পূর্ব্বস্মিন্ দিনে নিরামিষসকৃদ্ভোজনং নিষিদ্ধমিতি সুধীভির্ব্বিভাবনীয়ম্। অত্র চ নিরামিষভোজনং ন বিধীয়তে ভোজনস্য রাগপ্রাপ্তত্বাৎ নাপি নিরামিষং ভুঞ্জীতৈবেতি নিয়মবিধিঃ দ্বাদশ্যাদৌ শ্রাদ্ধে একাদশ্যাদাবপি নিরামিষভোজনপ্রসঙ্গাৎ তদানী-

যমঃ। যোনিক্রিয়াবরোধাদ্যৈগু´ণৈর্যুক্তানলোলু-পান্। প্রার্থয়েত প্রদোষান্তে ভুক্ত্বান্নং শয়িতান্ দ্বিজান্। সর্ব্বায়াসবিনির্মুক্তৈঃ কামক্রোধবিবর্জ্জিতৈঃ। ভবিতব্যং ভবদ্ভির্নঃ শ্বোভূতে শ্রাদ্ধকর্ম্মণি॥ তে তং তথেত্যবিঘ্নেন যাতি চেৎ রজনী সুখম্। যথাশ্রুতং প্রতীক্ষেরন্ শ্রাদ্ধ-কালমতন্দ্রিতাঃ॥ প্রার্থয়েত নিমন্ত্রণপূর্ব্বকং নিয়মমর্থয়ে-দিত্যর্থঃ। তন্নিয়মমাহ সর্ব্বায়াসেতি। তে ব্রাহ্মণাঃ তং নিমন্ত্রয়িতারং তথেত্যূচুরিতি শেষঃ। তদহরিতি তদহরা-মন্ত্রণপক্ষে চ নাস্য মন্ত্রস্য পাঠঃ অসমবেতার্থত্বাৎ শ্বঃপদস্য। ন চ শ্বঃপদস্থানেঽদ্যপদোহঃ কার্য্যঃ ব্রীহিমন্ত্রে

আমিষভোজনে নিষেধানুপপত্তেশ্চ কিন্তু পরিসংখ্যৈবেয়ম্। তেন নিরামিষেতরন্ন ভুঞ্জীত ইতি বিধৌ উপবাসপরদিনেঽপি শ্রাদ্ধে নাঙ্গ-বৈগুণ্যমিতি বোধ্যম্। হিত্বা যোষিৎপ্রসঙ্গিনমিতি। প্রসঙ্গশ্চাষ্টধা দক্ষোক্তাঃ। যথা। স্মরণং কীর্ত্তনং কেলিঃ প্রেক্ষণং গুহ্যভাষণম্। সঙ্কল্পোঽধ্যবসায়শ্চ ক্রিয়ানিষ্পত্তিরেব চ॥ ইত্যত্র স্মরণাদীনাং দুষ্প-রিহরত্বাৎ ক্রিয়ানিষ্পত্তিরূপপ্রসঙ্গিনো নিষেধ ইতি॥ ১০৭॥

যোনিক্রিয়েতি। যোনিগুণো বিশুদ্ধমাতৃপিতৃপরম্পরাকত্বম্। ক্রিয়া-গুণঃ নিত্যনৈমিত্তিককর্ম্মশালিত্বম্। অবরোধো জ্ঞানগুণঃ। অলোলু-পান্ অলুব্ধান্। প্রদোষান্তে প্রথমপ্রহরান্তে ইতি সম্প্রদায়ঃ। শ্রীদত্ত-মতং নিরাকরোতি ন চেতি। প্রকৃতিভূতে যাগবিশেষে ব্রীহিচরুঃ তত্র চ ব্রীহিপদবিশিষ্টো মন্ত্রঃ তদ্বিকৃতিযাগে চ নৈবারশ্চরুর্ভবতীতি নীবা-রবিধৌ মন্ত্রে ব্রীহিপদস্থানে নীবারপদোহবদিত্যর্থঃ। অন্যথোপপত্তেরিতি পূর্ব্বদিননিমন্ত্রণে মন্ত্রস্য চরিতার্থত্বেন তদহর্নিমন্ত্রণে অক্রোধনৈরিতি মন্ত্রান্তরসত্ত্বাচ্চ তন্মন্ত্রপাঠাভাবেনাপ্যুপপত্তেরিত্যর্থঃ। অযোগাদিতি। যদি প্রকৃতাবূহশ্চ কর্ত্তব্যঃ স্যাত্তদা মন্ত্র এবান্যথাকর্ত্তুমুচিতং স্যাদতঃ প্রকৃতি-

ব্রীহিপদস্থানে নীবারপদোহবদিতি বাচ্যং অন্যথোপপত্তেঃ প্রকৃতাবূহকল্পনাযোগাৎ ব্রীহিমন্ত্রস্যেব যবে। অতএব কাত্যায়নঃ। ন প্রকৃতাবপূর্ব্বত্বাদূহ ইত্যর্থঃ বচনাচ্চ কচিৎ প্রকৃতাবপ্যূহঃ। যথা ছন্দোগপরিশিষ্টম্। মাতামহানামপ্যেবং শ্রাদ্ধং কুর্য্যাদ্বিচক্ষণঃ। মন্ত্রোহেন যথান্যায়ং শেষাণাং মন্ত্রবর্জ্জিতম্। ইতি। কিঞ্চ। অক্রোধনৈঃ শৌচপরৈঃ সততং ব্রহ্মচারিভিঃ। ভবিতব্যং ভবদ্ভিশ্চ ময়া চ শ্রাদ্ধকর্ম্মণি॥ ইতি মৎস্যপুরাণোক্তসমবেতার্থমন্ত্রসদ্ভাবেনোহকল্পনাহন্যায্যেতি নাপ্যসমবেতার্থমন্ত্রপাঠো যুক্তঃ। অতএব অস্মাত্ত্বমভিজাতোহসীতি মন্ত্রস্য লিঙ্গাৎ সাগ্নিপ্রকাশকস্য নিরগ্নিবিষয়ে নিবৃত্তিঃ। কিন্তু কৃত্বা তু দুষ্কৃতং কর্ম্ম ইতি বরাহপুরা-

মধিকৃতৈত্যেব তন্মন্ত্রস্যোক্তত্বাৎ শ্রুতমন্ত্রস্যৈব তত্র বিনিয়োগো ন তূহ ইতি ভাবঃ। ব্রীহিমন্ত্রস্যেবেতি। যথা প্রকৃতৌ ব্রীহিযবয়োর্বিকল্পেন বিহিতয়োর্ব্রীহিপদবন্মন্ত্রস্য ব্রীহিপক্ষে চরিতার্থত্বেন যবে তন্মন্ত্রবাধ এব ন তূহ ইত্যর্থঃ। যবে সংস্কারসিদ্ধিস্তু যবপদবন্মন্ত্রান্তরাদেবেতি। অতএব প্রকৃতাবূহাযোগাদেব ন প্রকৃতাবপূর্ব্বত্বাদিতি সূত্রং তত্র চ প্রক্রান্তস্যোহ ইত্যস্যান্বয় ইত্যাহ উহ ইত্যর্থ ইতি। অস্য হি যথার্থমূহশ্চোদিতে ইতি পূর্ব্বসূত্রম্। এতৎ কর্কোপাধ্যায়েন ব্যাখ্যাতং যথা যথার্থং প্রকাশয়তি তথা তথা উহেত চোদিতে। বিকৃতিদ্রব্যাদাবিতি অপূর্ব্বত্বাদন্যত্রাপ্রাপ্তত্বাৎ। তথাচ প্রকৃতাবেব তন্মন্ত্রস্য শাস্ত্রতঃ প্রাপ্ত্যা শ্রুতমন্ত্রস্যৈব নিয়োগো ন তূহেন বিকৃতৌ তু ব্রীহ্যাদিস্থানে নীবারাদিবিধৌ অতিদেশাৎ মন্ত্রে প্রাপ্তেঽনন্যগত্যা উহো যুজ্যত এবেতি ভাবঃ। অন্যে তু প্রকৃতাবূহো নাস্তি অপূর্ব্বত্বাৎ। নহি প্রকৃতেরন্যা প্রকৃতিরস্তি যদ্বিক্রিয়েত বিকৃতৌ

ণীয়মন্ত্রস্যৈব পাঠঃ। অতো ব্যবস্থিতবিকল্পোঽয়ং পূর্ব্ব-দিনে সর্ব্বায়াস ইতি তদহরক্রোধনৈরিতি। মৎস্যপুরাণে। দক্ষিণং জানুমালভ্য ত্বং ময়াত্র নিমন্ত্রিতঃ। এবং নিমন্ত্র্য নিয়মান্ শ্রাবয়েৎ পৈতৃকান্ বুধঃ॥ অত্র কেচিদস্মাদ্ব-চনাৎ শ্বঃকর্ত্তব্যে শ্রাদ্ধে ত্বং ময়াত্র নিমন্ত্রিত ইতি নিমন্ত্রণ-বাক্যং বর্ণয়ন্তি। তদসঙ্গতং নিমন্ত্রিত ইত্যেতস্যাতীত-নিমন্ত্রণপ্রকাশকত্বাৎ নিমন্ত্রণস্য বর্ত্তমানত্বাৎ বর্ত্তমানক্তস্য বুদ্ধ্যর্থাদিধাতুবিশেষনিয়তত্বাৎ অসমবেতার্থত্বেনাদৃষ্টার্থত্বা-পত্তেঃ। হুং ফড়াদিবৎ অদৃষ্টার্থতৈব কুতো ন ভবতীতি চেৎ ন নিমন্ত্রণবাধাপত্তেঃ। অনুমতিফলকঃ কর্ম্মকরণার্থং বোধনভেদো নিমন্ত্রণং যতঃ কিঞ্চন্নিমন্ত্রিতোঽস্মীত্যনু-

তু প্রভৃতিসম্ভবাৎ উহ ইতি ব্যাচখ্যুঃ। কথং তর্হি মাতামহাদিশ্রাদ্ধে প্রকৃতিভূতে শুন্ধন্তাং পিতর ইত্যাদিমন্ত্রে পিত্রাদিপদস্থানে মাতামহাদি-পদোহ ইত্যত্রাহ বচনাত্ত্বিতি। নন্‌ পূর্ব্বাপরদিননিমন্ত্রণয়োর্মুখ্যকল্পানু-কল্পাভাব এব অতএবোক্তমসম্ভবে পরেদ্যুর্ব্বেতি। তথাচ সতি অনুকল্পস্য মুখ্যকল্পবিকৃতিত্বাদূহো যুক্ত এবেত্যত আহ কিঞ্চেতি। সমবেতার্থকমন্ত্রেতি। ব্রাহ্মণনিয়মশ্রাবণরূপ প্রয়োজনস্য তেনৈব জাতত্বান্নিয়মশ্রাবণমন্ত্রয়োশ্চ বিনিয়োগবৈকল্পিকত্বস্য বক্ষ্যমাণত্বাচ্চেতি ভাবঃ। নিবৃত্তিরিতি। অস্মাৎ পুরুষাৎ ত্বং জাতোঽসীত্যর্থকমন্ত্রস্য নিরগ্নিবিষয়ে বিরোধাদিতি ভাবঃ। জান্বমিতি ছান্দসঃ পুংলিঙ্গঃ। বর্ত্তমানার্থক্তস্যেতি। বুদ্ধ্যর্থাদিধাতুসম ভিব্যাহারেণৈব ক্তস্য বর্ত্তমানার্থকতয়া প্রকৃতে তদ্ভাবাদতীতত্বস্য চ প্রকৃতেঽসমবেতত্বেনেত্যর্থঃ। ন চাদিকর্ম্মণি ক্ত ইতি বাচ্যং নিমন্ত্রণারম্ভস্যা বিবক্ষিতত্বাৎ। নিমন্ত্রণরূপপদার্থবিবেচনেন বাধং বিবৃণোতি অনুমতীতি বোধনং জ্ঞাপনং জ্ঞানানুকূলশব্দপ্রয়োগঃ। এতন্মাত্রোক্তৌ রাজাদৌ পরাপরাধাদিজ্ঞাপনেঽতিব্যাপ্তিরত আহ কর্ম্মকরণার্থমিতি। বৈদিক

মতিরপি বাধ্যেত। তথা বিষ্ণুমিত্রপুত্রায় তুভ্যং যজ্ঞদত্তপুত্রী সম্প্রদত্তেতি বহ্বৃচগৃহ্যপরিশিষ্টবচনাৎ কন্যাসম্প্রদানবাক্যমপি তথা স্যাৎ দৃষ্টার্থত্বাৎ। পুংবচসাং ক্তপ্রয়োগাবিবক্ষায়াঃ প্রকৃতেঽপি তুল্যত্বাৎ। তস্মাৎ শ্রাদ্ধং কর্ত্তুং ত্বামহং নিমন্ত্রয়ে ইতি লড়ন্ত এব প্রয়োগো যুক্তঃ ॥ ১০৮ ॥

অতএব বিকৃতাবেকোদ্দিষ্টে বিপ্র ত্বামহং নিমন্ত্রয়ে ইতি বরাহপুরাণে। অন্যে ত্বামহমামন্ত্রয়ে ইতি বদন্তি। তদযুক্তং নিমন্ত্রণামন্ত্রণয়োর্ভেদাৎ বিধিনিমন্ত্রণামন্ত্রণাধীষ্টেত্যাদিসূত্রে। যত্র প্রত্যাখ্যানে প্রত্যবায়স্তন্নিমন্ত্রণং যত্র কামাচারস্তদামন্ত্রণমিতি ভেদস্য নিরুক্তত্বাৎ। শ্রাদ্ধে চ অনিন্দ্যেনাপামন্ত্রিতো নাতিক্রমেদিতি। ইতি কাত্যায়ন-

কর্ম্মকরণার্থমিত্যর্থঃ। এবমপি ইদং কর্ম্ম কর্ত্তব্যমিতি মিত্রস্থানে নিবেদনেঽতিব্যাপ্তিরত উক্তমনুমতিফলক ইতি। তথাপি তীর্থস্নানায়ানুমতিগ্রহণার্থং পিত্রাদিস্থানে নিবেদনেঽতিব্যাপ্তিরতো ভেদ ইতি। ভেদো বিশেষঃ। যত্রানুমত্যতিক্রমেঽনুমন্তুঃ প্রত্যবায়স্তাদৃশঃ। তথাচ কাত্যায়নঃ। অনিন্দ্যেনোপামন্ত্রিতো নাতিক্রামেদিতি। ইত্থঞ্চ উক্তবাক্যস্য বোধকত্বাভাবেঽনুমতেরভাবান্নিমন্ত্রণবাধ ইত্যর্থঃ। নিমন্ত্রণবাধমুক্ত্বা তৎফলস্যানুমতেরপি বাধমাহ কিঞ্চেতি। নিমন্ত্রণবাধতৎকার্য্যস্যানুমতেঃ সুতরাং বাধাদিত্যর্থঃ। প্রতিবন্ধ্যা দূষয়তি তথেতি। তথা স্যাৎ সম্প্রদত্তা ইত্যেবংরূপা স্যাৎ ॥ ১০৮ ॥

অতএবেতি। তথাচ বিকৃতৌ লড়ন্তপ্রয়োগে প্রকৃতাবপি তথৈব যুক্তমিতি ভাবঃ। অন্যে অনিরুদ্ধভট্টাঃ। মনুকাত্যায়নবচনে উপামন্ত্রণাতিক্রম এব নিষিদ্ধস্তৎ কথং নিমন্ত্রণাতিক্রমে প্রত্যবায়ং ব্রূষে অত্রাহাপিচেতি।

বচনে প্রত্যবায়শ্রবণাৎ নিমন্ত্রণমেব কিন্তু ক্তপ্রত্যয়স্যাসমবেতার্থত্বে তাবন্মাত্রস্য হানির্যুক্তা ন তু প্রকৃতেরপি। অপিচ মন্বাদিবচনেষু বহুষু নিমন্ত্রণাবগতের্যদল্পীয়সাং মুনীনাং আমন্ত্রণপ্রয়োগঃ স গৌণঃ। যৎ তু জন্মশরীরলক্ষণগুণোপেতান্ ব্রাহ্মণানুপামন্ত্রয়েৎ শ্বোঽদ্যেতি বা শ্রাদ্ধমাচরিষ্যে ইতি শঙ্খলিখিতবচনাৎ শ্রাদ্ধং যুষ্মাস্বহমাচরিষ্যে ইতি নিমন্ত্রণবাক্যং তদনুজ্ঞাগ্রহণরূপং পূর্ব্বদিনে নিমন্ত্রণাসম্ভবে নিবেদনং কর্ত্তব্যম্। তথা পূর্ব্বদিননিমন্ত্রণে তদহর্নিমন্ত্রণে বা শ্রাদ্ধদিনে নিমন্ত্রণানন্তরমনুজ্ঞাগ্রহণলক্ষণং নিমন্ত্রণং কর্ত্তব্যমিত্যাহাপস্তম্বঃ। পূর্ব্বেদ্যুর্নিবেদনমপরেদ্যুর্দ্বিতীয়ং তৃতীয়মামন্ত্রণং নিবেদনং শ্বো ময়া শ্রাদ্ধং কর্ত্তব্যং তত্র ভবন্তো নিমন্ত্রণীয়া ইতি ব্রাহ্মণবোধনলক্ষণং দ্বিতীয়মামন্ত্রণং মৎস্যপুরাণোক্তং তৃতীয়ং শঙ্খলিখিতোক্তং অনুজ্ঞাগ্রহণলক্ষণং দ্বিত্বত্রিত্বে

---

মন্বাদিবচনেষু পূর্ব্বেদ্যুরপরেদ্যুরিত্যাদিমন্বাদ্যুক্তবিধিবাক্যেষু। আমন্ত্রণপ্রয়োগঃ অর্থবাদবাক্যেষু আমন্ত্রণপদপ্রয়োগঃ স নিমন্ত্রণে গৌণ ইত্যর্থঃ। জন্মশরীরেতি। জন্মলক্ষণং বিশুদ্ধমাতাপিতৃকত্বং শরীরলক্ষণং ব্যঙ্গত্বাদিদোষহীনত্বং তদ্রূপগুণোপেতান্ ব্রাহ্মণান্ শ্বোঽদ্য বা শ্রাদ্ধমাচরিষ্যে ইতি বাক্যেনামন্ত্রয়েদিত্যর্থঃ। প্রতিনিমন্ত্রণবাক্যং যৎ তদনুজ্ঞাগ্রহণরূপং নিমন্ত্রণানন্তরং শ্রাদ্ধকালে শ্রাদ্ধানুজ্ঞা গৃহ্যতে যেন তদ্রূপং তদিত্যাহ পূর্ব্বদিননিমন্ত্রণে ইতি। ন অস্থানুজ্ঞাগ্রহণস্য শ্রাদ্ধকালাকর্ত্তব্যতয়া শ্বোঽদ্য বেত্যত্র শ্বঃপদার্থাসঙ্গতিরিতি বাচ্যং অদ্য শ্বো বেত্যস্যানুজ্ঞাগ্রহণবাক্যষট্কং স্যাৎ শ্বোনিমন্ত্রণপক্ষে অদ্যনিমন্ত্রণপক্ষে চেতি তদর্থাৎ। অত্র প্রমাণমাহ আপস্তম্ব ইতি। তৃতীয়মামন্ত্রণমিত্যন্তং সূত্রং ব্যাচষ্টে নিবেদনমিতি। নিবেদনঞ্চ স্বয়-

বোধনাপেক্ষয়া। অতএব ব্রহ্মপুরাণে। উপবেশ্য জপেদ্ধীমান্ গায়ত্রীং তদনুজ্ঞয়া। অনুজ্ঞাসামর্থ্যাত্তদ্‌গ্রহণলক্ষণং প্রশ্নবাক্যমপ্যাক্ষিপ্তম্। তথা মৎস্যপুরাণম্। আসনেষু তু ক্লৃপ্তেষু দর্ভবৎসু বিধানতঃ। উপস্পৃষ্টোদকান্ বিপ্রানুপবেশ্যানুমন্ত্রয়েৎ॥ নিমন্ত্রণঞ্চ দৈবাদিক্রমেণ কার্য্যম্। যথা মনুঃ। তেষামারক্ষ ভূতং হি দৈবং পূর্ব্বং নিযোজয়েৎ। রক্ষাংসি হি বিলুম্পন্তি শ্রাদ্ধমারক্ষ বর্জ্জিতম্॥ দৈবাদ্যন্তং তদীহেত পিত্র্যাদ্যন্তং ন তদ্ভবেৎ। পিত্র্যাদ্যন্তং ত্বীহমানঃ ক্ষিপ্রং নশ্যতি সান্বয়ঃ॥ দেবলঃ। যত্র যৎ ক্রিয়তে কর্ম্ম পৈতৃকে ব্রাহ্মণান্ প্রতি। তৎ সর্ব্বং তত্র কর্ত্তব্যং বৈশ্বদৈবেত্য পূর্ব্বকম্॥ শাতাতপঃ। সদৈবং ভোজয়েৎ শ্রাদ্ধং তৎপূর্ব্বঞ্চ প্রবর্ত্তয়েৎ। অন্যথা ত্ববলুম্পন্তি সদৈবাসুররাক্ষসাঃ॥ বিষ্ণুধর্ম্মোত্তরপ্রথমকাণ্ডম্। বৈশ্বদেবোপবি-

মশক্তাবন্যদ্বারাপি। যোষিৎপ্রসঙ্গবারণার্থং কার্য্যং নিমন্ত্রণ এব শ্বঃকর্ত্তব্যতানিয়মাদিতি বোধ্যম্। ভিন্নবিষয়তয়া দ্বিতীয়ত্বতৃতীয়ত্বমুপপন্নং কথমত আহ দ্বিস্ত্রিস্তে ইতি। বোধনাপেক্ষয়া নিবেদনাপেক্ষয়া। অনুজ্ঞাগ্রহণে প্রমাণান্তরমপ্যাহাতএবেতি। তদনুজ্ঞয়া বস্তুতস্তেভদ্বচনং গায়ত্রীজপানুজ্ঞাপরমেব। এতদ্বচনাৎ পূর্ব্বমেব। উভৌ হস্তৌ সমৌ কৃত্বা সর্ব্বান্ পৃচ্ছেদ্দ্বিজোত্তমান্। শ্রাদ্ধং করিষ্যে ইত্যেবং ভক্তিনম্রঃ সমাহিতঃ॥ কুরুষ্বেতি স তৈরুক্তো দদ্যাদ্দর্ভাসনং ততঃ। ইতি শ্রাদ্ধানুজ্ঞাগ্রহণস্য পৃথগভিহিতত্বাদিতি। প্রশ্নবাক্যং স্পষ্টমেব মৎস্যপুরাণোক্তং দর্শয়তি। তথা মৎস্যপুরাণমিতি। দক্ষিণং জানুমালভ্য ইত্যাদিনিয়মশ্রবণাত্তৎ নিমন্ত্রণমুক্ত্বা যদাসনেষ্বিতি বচনে বিপ্রাননু-

ষ্ঠানাং চরমং হস্তধাবনম্। বিসর্জ্জনঞ্চ নির্দ্দিষ্টং তেষু রক্ষা যতঃ স্মৃতাঃ। সর্ব্বমন্ত্যং তু কর্ত্তব্যমাদৌ তেষাং নরাধিপ॥ হস্তধাবনমাচমনম্। এতেনাচমনবিসর্জ্জনে পিতৃপূর্ব্বে দর্শিতে। অত্র প্রাঞ্চঃ। আপাদসেচনাৎ পূর্ব্বং দৈবং কুর্য্যাৎ দ্বিজন্মসু। ইতি বিষ্ণুপুরাণবচনাৎ। আপাদসেচনাদিতি বিশেষণস্বরসাৎ। পাদপ্রক্ষালনাদাবেব দৈবাদিত্বমিচ্ছন্তি ন নিমন্ত্রণাদৌ তথা পূর্ব্বলিখিতানেকবচনস্বরসাৎ দক্ষিণায়া অপি দৈবাদিত্বমিচ্ছন্তি। তদসঙ্গতং পূর্ব্বলিখিতবচনস্বরসাৎ নিমন্ত্রণাদৌ দৈবাদিত্বপ্রতীতেঃ। আপাদসেচনাদিত্যেতস্য স্বাযোগব্যবচ্ছেদার্থত্বাৎ অন্যযোগব্যবচ্ছেদকত্বস্বরসানুরোধেন নানাবচনার্থ াধাপত্তেরযুক্তত্বাৎ। দক্ষিণা চ পিতৃপূর্ব্বিকমেব দৈবান্তমিতি। মনুবচনেঽন্তত্বেন দক্ষিণায়াঃ পরিগ্রহাৎ। ন চ বিসর্জ্জনমেবান্তঃ দক্ষিণায়া এব সর্ব্বকর্ম্মান্তসাধারণত্বাৎ॥ ১০৯॥

মন্ত্রয়েদিতি পুনরভিধানং তদনুজ্ঞাগ্রহণায় প্রশ্নপরমেবেতি ভাবঃ। দৈবাদ্যন্তমিতি। দৈবমাদাবন্তে চ যস্য তাদৃশং তচ্ছ্রাদ্ধমীহেত ইত্যর্থঃ। আপাদসেচনাদিতি। আপাদপ্রক্ষালনাদিত্যর্থঃ। ন নিমন্ত্রণাদাবিতি। আদিনা নিয়মশ্রাবণপরিগ্রহঃ। উপবেশনার্থপাদপ্রক্ষালনাৎ প্রাগেব নিমন্ত্রণাদেঃ কর্ত্তব্যত্বাদিতি ভাবঃ। পূর্ব্বলিখিতানেকেতি। মনুদেবলাদ্যুক্তানেকবচনস্বরসাদিত্যর্থঃ। ননু স্বাযোগব্যবচ্ছেদকত্বে আপাদসেচনাদিতি ব্যর্থমেব স্যাৎ অতঃ প্রাচামেব বচনব্যাখ্যা সমীচীনেতি। প্রদক্ষিণোপবীতেন দৈবান্ বিপ্রান্নিমন্ত্রয়েৎ। পিত্র্যান্নিমন্ত্রয়েৎ পাদৌ ক্ষালয়িত্বা বিধানতঃ॥ ইতি গরুড়পুরাণৈকবাক্যতয়া আপাদসেচনাৎ পূর্ব্বমিতি বচনস্যাপি নিমন্ত্রণাৎ প্রাক্‌কর্ত্তব্যপাদপ্রক্ষালনপরত্বমিত্য-

অন্যথা প্রদক্ষিণীকরণপিণ্ডপ্রতিপত্ত্যাদীনামেবান্ততা স্যাৎ ন বিসর্জ্জনস্য। অতএব ছন্দোগপরিশিষ্টম্। ব্রাহ্মণে দক্ষিণা দেয়া যত্র যা পরিকীর্ত্তিতা। কর্ম্মান্তেঽনুচ্যমানায়াং পূর্ণপাত্রাদিকা ভবেৎ॥ নিমন্ত্রণঞ্চ কুশময়ব্রাহ্মণপক্ষে নিবর্ত্ততে। অনুমতিপ্রকাশকলক্ষণস্য দ্বারস্য বাধিতত্বাৎ ব্রীহিমন্ত্র ইব যবে এবং নিয়মশ্রাবণমপি অনুজ্ঞাগ্রহণলক্ষণঞ্চ নিমন্ত্রণং কর্ত্তব্যমেব ব্রাহ্মণান্তরাদপি তৎসম্ভবাৎ। ননু কুশময়ব্রাহ্মণপক্ষে ন যুক্তঃ প্রমাণা-

ভিপ্রায়াৎ। সর্ব্বকর্ম্মান্তসাধারণত্বাদিতি। তথাচ কর্ম্মান্তরে সর্ব্বত্র দক্ষিণায়া অন্তত্বদর্শনাৎ শ্রাদ্ধেঽপি তথৈব যুক্তমিতি ভাবঃ। দক্ষিণায়া অন্তত্বঞ্চ বাচনিকমেব ন তু যৌগিকং দক্ষিণানন্তরমপি প্রদক্ষিণীকরণাদ্যঙ্গানাং সত্ত্বাৎ॥ ১০৯॥

অন্যথা যৌগিকান্তত্বস্য বিবক্ষিতত্বে পিণ্ডপ্রতিপত্ত্যাদীনামেব ইত্যেবকারেণ বিসর্জ্জনব্যবচ্ছেদঃ। দক্ষিণায়া অন্তত্বস্য বাচনিকত্বং দর্শয়তি অতএবেতি। পূর্ণপাত্রাদিকেতি। অষ্টমুষ্টির্ভবেৎ কুঞ্চিঃ কুঞ্চয়োঽষ্টৌ চ পুষ্কলম্। পুষ্কলানি চ চত্বারি পূর্ণপাত্রং প্রচক্ষতে॥ ইত্যুক্তং পাত্রং বোধ্যম্। বস্তুতঃ শ্রাদ্ধে দক্ষিণায়া বিসর্জ্জনস্য চান্তত্বশ্রুতের্ম্মনুবচনস্থান্তপদেন দ্বয়োরেব গ্রহণম্। তথাচ ভানুভট্টলিখিতানি বিষ্ণুপুরাণবচনানি। পিতৃভ্যঃ প্রথমং ভক্ত্যা তন্মনস্কো নরেশ্বর। সুস্বধেত্যাশিষা যুক্তাং দদ্যাদ্ভক্ত্যা চ দক্ষিণাম্॥ দত্বা চ দক্ষিণাং তেভ্যো বাচয়েৎ বৈশ্বদেবিকান্। প্রীয়ন্তামিতি যে বিশ্বেদেবাস্তেন প্রতীরয়ন্॥ তথেতি চোক্তে তৈর্বিপ্রৈঃ প্রার্থনীয়াস্তথাশিষঃ। পশ্চাদ্বিসর্জ্জয়েদ্দেবান্ পূর্ব্বং পিত্র্যান্মহামতে॥ ইতি। দত্বা চ দক্ষিণাস্তেভ্য ইত্যস্য বিশ্বদেবদ্বিজেভ্যো দক্ষিণাং দত্ত্বেত্যর্থঃ। অন্যথা দদ্যাৎ ভক্ত্যা চ দক্ষিণামিত্যস্য বৈয়র্থ্যাপত্তেঃ। এবঞ্চ ভোজনানন্তরব্রাহ্মণাচমনে দক্ষিণাদানে

ভাবাৎ এবংভূতব্রাহ্মণাভাবে শ্রাদ্ধস্য লোপ এব প্রাপ্নোতি। তন্ন ব্রাহ্মণাভাবেঽপি শ্রাদ্ধদর্শনাৎ। যথা বশিষ্ঠঃ। যদ্যেকং ভোজয়েৎ শ্রাদ্ধে দৈবং তত্র কথং ভবেৎ। অন্নং পাত্রে সমুদ্ধৃত্য সর্ব্বস্য প্রকৃতস্য চ॥ দেবতায়তনে কৃত্বা ততঃ শ্রাদ্ধং প্রবর্ত্তয়েৎ। তদন্নং প্রক্ষিপেদগ্নৌ দদ্যাদ্বা ব্রহ্মচারিণে॥ দেবতায়তনে বৈশ্বদেবস্থানে। তথা শঙ্খঃ। ভোজয়েদথবাপ্যেকং ব্রাহ্মণং পঙ্‌ক্তিপাবনম্। দৈবে কৃত্বা তু নৈবেদ্যং পশ্চাত্তস্য তু নির্ব্বপেৎ॥ এতয়োশ্চ ব্রাহ্মণপ্রতিনিধিমুপাদায় শ্রাদ্ধসিদ্ধিরিতি স্বরসোঽবসীয়তে। মুখ্যালাভে প্রতিনিধিঃ শাস্ত্রার্থ ইতি

বিসর্জ্জনে চ পিতৃপূর্ব্বকতা অন্যত্র সর্ব্বত্র দেবপূর্ব্বকতেতি সিদ্ধম্। নিমন্ত্রণকেতি। অনুমতিফলকবোধনং নিমন্ত্রণমুক্তং কুশময়ব্রাহ্মণস্যানুমত্যসম্ভবেন তত্র নিমন্ত্রণস্যৈবাসম্ভবদুক্তিকত্বাদিতি ভাবঃ। হেত্বন্তরমপ্যাহ অনুমতিপ্রকাশকেতি। দ্বারস্য নিমন্ত্রিতোঽস্মীতি প্রত্যুত্তররূপস্য ন চ বোধনমপি বাধিতং তৎ কথং দ্বারবাধমাত্রমুক্তমিতি বাচ্যম্। বোধনং হি বোধনানুকূলব্যাপারঃ। আনুকূল্যঞ্চ স্বরূপযোগ্যত্বং তস্য চ তাদৃশশব্দপ্রয়োগে সত্বাৎ। ন চ তর্হি অনুমতিফলকত্বমপি তথৈব নানুপপন্নমিতি বাচ্যং অনুমত্যুপহিতনিমন্ত্রণব্যবহারাৎ তত্র ফলোপধানস্যৈব নিবেশ্যত্বাৎ অনুমতিপ্রকাশলক্ষণং দ্বারং যস্যেতি বহুব্রীহিণা নিমন্ত্রণবোধস্যৈব পঙ্‌ক্ত্যর্থত্বাৎ। ব্রীহিমন্ত্রস্যৈব যবে ইতি। ব্রীহিনিষ্ঠসংস্কারফলকস্য ব্রীহিপ্রকাশকমন্ত্রস্য যথা যবে বাধ ইত্যর্থঃ। নিমন্ত্রণে চ নিমন্ত্রিতোঽস্মীতি শ্রাদ্ধপ্রতিগ্রহাঙ্গীকারোঽন্যস্যাসম্ভবতীতি ভাবঃ। এবং নিয়মশ্রাবণমপি ইতি নিবর্ত্তত ইতি পূর্ব্বেণান্বয়ঃ নিরর্থকত্বাদিতি ভাবঃ। ইদমুপলক্ষণং তৃপ্তাঃ স্ম ইত্যাদিপ্রত্যুত্তরবাধাৎ। তৃপ্তাঃ স্থেত্যাদিপ্রশ্ননিবৃত্তিরপি দ্রষ্টব্যা। অনুজ্ঞালক্ষণং

প্রতিনিধ্যধিকরণে দর্শিতত্বাৎ ছন্দোগপরিশিষ্টকৃতা দর্শিতত্বাচ্চ। যথা। যথোক্তবস্তুসম্পত্তৌ গ্রাহ্যং তদনুকারি যৎ। যবানামিব গোধূমা ব্রীহীণামিব শালয়ঃ ॥ ১১০ ॥

ব্রাহ্মণপ্রতিনিধির্দর্ভবটুর্দৃষ্টঃ। যথা গোভিলঃ। যদ্যুবা উভয়ং চিকীর্ষেদ্ধোত্রং ব্রহ্মত্বঞ্চ তেনৈব কল্পেন ছত্রমুত্তরাসঙ্গং বোদককমণ্ডলুং বা দর্ভবটুং বা ব্রহ্মাসনে নিধায়েতি। তথা কুশময়ীং প্রতিকৃতিমাহ পৈঠীনসিঃ। কুশময়ীং প্রতিকৃতিং তীর্থবারিণি মজ্জয়েৎ। মজ্জয়েৎ তু যমুদ্দিশ্য অষ্টভাগং লভেত সঃ ॥ তথা উপাকর্ম্মণি ছন্দোগপরিশিষ্টম্। কৌশানৃষীন্ স্থলস্থান্ গন্ধমাল্যধূপা-

---

শ্রাদ্ধং করিষ্যে ইত্যেবংরূপং অনুজ্ঞাস্বরূপং তৎসম্ভবাৎ কুরুষ্বেত্যাকার-প্রত্যুত্তরসম্ভবাৎ। স্বরসোঽবগীয়তে ইতি যদুক্তং তদেব দর্শয়তি মুখ্যালাভে ইতি। স্বরসবীজন্তেদমত্র অঙ্গভূতব্রাহ্মণাভাবে শ্রাদ্ধলোপে প্রাপ্তে তন্নিরাসেন বশিষ্ঠাদিভিঃ শ্রাদ্ধং বিহিতং তচ্চ বিনা প্রতিনিধিং ন ঘটত ইতি অতঃ প্রতিনিধিলাভঃ ॥ ১১০ ॥

নন্বু তদনুকারি যদিত্যনেন সদৃশস্যৈব প্রতিনিধিত্বেনোপাদান-মুক্তং দর্ভবটুকস্য চ ব্রাহ্মণসাদৃশ্যাভাবাৎ কথং তৎপ্রতিনিধিত্বমত আহ ব্রাহ্মণপ্রতিনিধিশ্চেতি। যদ্যুবেতি। যদ্যর্থকো নিপাতনসমুদায় ইতি। তথাচ সাদৃশ্যাভাবেঽপি বাচনিকমেব দর্ভবটৌ ব্রাহ্মণপ্রতি-নিধিত্বমিতি ভাবঃ। নন্বু বচনাৎ তত্র তথৈব শ্রাদ্ধে তু বচনাভাবাৎ কথং ব্রাহ্মণপ্রতিনিধির্দর্ভবটুঃ স্যাদিত্যাহ। অতোঽত্রাপ্যাকাঙ্ক্ষ-য়েতি। বশিষ্ঠাদিভির্ব্রাহ্মণং বিনাপি শ্রাদ্ধমুক্তং তৎ কথং সিধ্যতি ব্রাহ্মণরূপাঙ্গাভাবাদিত্যাকাঙ্ক্ষায়াং একত্র দৃষ্টন্যায়েন শ্রাদ্ধেঽপি তৎ-সিদ্ধিরিত্যর্থঃ। বচনমপ্যত্র প্রমাণয়তি অতএবেতি। তুল্যন্যায়া-

দিভিঃ সৎকৃত্যেতি অতোঽত্রাপ্যাকাঙ্ক্ষায়াং ব্রাহ্মণপ্রতিনিধিদর্ভপুত্রকসিদ্ধিঃ। অতএব শ্রাদ্ধে সত্যব্রতঃ। নিধায়াথ দর্ভচয়মাসনেষু সমাহিতঃ। প্রৈষানুপ্রৈষসংযুক্তং বিধানং প্রতিপাদয়েৎ॥ ন চাস্যানাকরত্বাশঙ্কা বশিষ্ঠশঙ্খাভ্যামেতদর্থস্য স্বহস্তিতত্বাৎ। প্রৈষানুপ্রৈষসংযুক্তমিতি বিশেষণাৎ দর্ভব্রাহ্মণপক্ষে নিমন্ত্রণাদেঃ প্রৈষানুপ্রৈষসংযোগাভাবান্নিবৃত্তিঃ। অতএব হোমে দর্ভময়-

দেবেত্যর্থঃ। প্রৈষানুপ্রৈষেতি। প্রশ্নবাক্যং প্রৈষঃ উত্তরবাক্যঞ্চানুপ্রৈষঃ। তদুভয়সংযুক্তং যোগ্যপ্রশ্নোত্তরকং নতু বাধিততদুত্তরকমিত্যর্থঃ। নিবৃত্তিরিতি। প্রত্যুত্তরস্য চেতনৈকসাধ্যত্বাৎ দর্ভব্রাহ্মণপক্ষে তন্নিবৃত্তিরিত্যর্থঃ। এতচ্চ কুশময়ব্রাহ্মণকরণং নিত্যে পার্ব্বণশ্রাদ্ধাদাবেব ন তু কাম্যেঽঙ্গহানাবপি নিত্যস্য কর্ত্তব্যতায়াঃ সর্ব্বাঙ্গোপেতস্যৈব চ কাম্যস্য ফলহেতুতায়াশ্চ সর্ব্বশক্ত্যধিকরণে দর্শিতত্বাৎ। প্রতিনিধৌ চাঙ্গহানেরাবশ্যকত্বাৎ। ন চ কুশাভাবে কাশস্যৈবাঙ্গত্বং অতো নাঙ্গহানিরিতি বাচ্যং বিকল্পাপত্তেঃ একাভাবসহকৃতাপরকরণতায়া এব বৈকল্পিকত্বাৎ। ন চায়ং ব্যবস্থিতবিকল্পঃ তত্রাপি দোষষট্কসত্ত্বাৎ। তস্মাৎ নিত্যকর্ম্মাকরণে প্রত্যবায়োঽতো নিত্যস্য কথং কুশাভাবেঽনুষ্ঠানমিত্যাকাঙ্ক্ষায়ামেব কুশাভাবে কাশৈরিতি প্রতিনিধিবিধ্যুত্থানম্। তথাচ কাশস্য নিত্যনির্ব্বাহকতামাত্রং ন তু কাম্যসাধনমপীত্যতঃ কাশাদিপ্রতিনিধ্যুপাদানে কাশৈঃ কর্ম্ম কুর্য্যাদিতি বিধিপ্রাপ্তসামান্যাঙ্গস্য কুশস্য বাধাদঙ্গহানিরেব ইতি। অতএব প্রতিনিধাবঙ্গহানিরাবশ্যকীতি সিদ্ধান্তোঽপি সঙ্গচ্ছতে ইতি। শক্তাশক্তবিষয়ে তু শক্তঃ সর্ব্বোপকরণৈঃ শ্রাদ্ধং কুর্য্যাদশক্তঃ পয়োমূলফলাদিভিরিত্যাদৌ নাঙ্গহানিরধিকারিভেদাদিতি। ন চ সপবিত্রেষু হস্তেষ্বিতি পারস্করবচনাদব্রাহ্মণকশ্রাদ্ধেঽর্ঘবাধোঽস্ত্বিতি বাচ্যং পিত্রুদ্দেশেন হি অর্ঘদানং দ্বিজকরস্তু উত্তরপ্রতিপত্ত্যপেক্ষয়া প্রক্ষেপাধারমাত্রং অতো দ্বিজাভাবে তৎপ্রতি-

ব্রহ্মপক্ষে দৃষ্টত্বাভাবাদ্বরণনিবৃত্তিঃ। নম্বেবং ব্রাহ্মণানত্যর্থত্বাদ্দক্ষিণায়াঃ কুশময়ব্রাহ্মণপক্ষে তদভাবাদ্বাধঃ স্যাৎ। অতএব সত্রে যে যজমানাস্তে ঋত্বিজ ইতি। ঋত্বিক্‌কার্য্যে যজমানবিধৌ আনতিলক্ষণস্য দৃষ্টস্যাভাবাদ্দক্ষিণাবাধ উক্তঃ। তন্ন অদৃষ্টার্থায়া অপি দক্ষিণায়াঃ শ্রুতত্বাৎ। যথা বৃহস্পতিঃ। তস্মাৎ পণং কাকিণীং বা ফলং পুষ্পমথাপি বা। প্রদদ্যাদ্দক্ষিণাং যজ্ঞে তয়া স সফলো ভবেৎ॥ পুষ্পাদীনামানত্যর্থত্বাভাবাৎ। অতএব স্বয়ং কর্ত্তৃকপক্ষে-

নিধীভূতদর্ভবটোরেব গন্ধাদীনামিবার্ঘপ্রতিপত্ত্যাধারত্বসম্ভবাৎ। ন চ তথাপি ব্রাহ্মণস্য মুখেঽমৃতে ইতি মন্ত্রলিঙ্গাৎ। ব্রাহ্মণাভাবে পাত্রালম্ভনবাধোঽস্ত্বিতি বাচ্যং। হুতশেষং প্রদদ্যাৎ তু ভাজনেষু সমাহিতঃ। ইতি বচনেন পাত্রে হুতশেষার্পণবিধানাৎ হুতশেষং দত্ত্বা পাত্রমালভ্য জপতি ইত্যুক্তেঃ পাত্রস্যৈব হুতশেষাধারত্বপ্রাপ্ত্যা তদুপপত্তয়ে পৃথিবীতে পাত্রমিতি মন্ত্রে মুখপদে মুখতুল্যপাত্রে লক্ষণা যতো দৃষ্টা চ দৃশদি তণ্ডুলানাবপতি ধান্যমসীত্যত্র তণ্ডুলানাবপতীতি বাক্যাবধৃততণ্ডুলপরত্বানুপপত্ত্যা ধান্যমসীতি মন্ত্রে ধান্যপদে তণ্ডুললক্ষণেতি। আনতিঃ সন্তোষঃ। তদভাবাদিতি দক্ষিণা আনত্যর্থা নত্বদৃষ্টার্থা লভ্যমানে তু দৃষ্টার্থে নাদৃষ্টপরিকল্পনমিতি ভট্টবাক্যাদিত্যাশয়ঃ। অত্র চানতিরেব দৃষ্টার্থঃ। দক্ষিণাবাধ উক্ত ইত্যানতিদ্বারৈব দক্ষিণায়া যাগাদ্যুপকারকত্বাৎ দ্বারবাধে দক্ষিণায়া বাধঃ। কৃষ্ণলে বৈতুষ্যরূপদ্বারবাধাৎ যথাবঘাতবাধ ইত্যর্থঃ। অন্যশ্চেদিতি। ব্রহ্মেতরশ্চেদিত্যর্থঃ। উভয়ং হৌত্রং ব্রহ্মত্বঞ্চ স্বয়ং যজমান এব উভয়ং কুর্য্যাচ্চেত্যর্থঃ। সত্রেঽপীতি। তথাচ দক্ষিণায়া অদৃষ্টদ্বারৈব যাগাদ্যুপকারকত্বং নানতিদ্বারা তস্যা আশুবিনাশিত্বেন তত্রাপ্যদৃষ্টস্যাবশ্যমভ্যুপেয়ত্বাৎ। অন্যথা শ্রাদ্ধাদৌ প্রদক্ষিণীকরণানুব্রজনাদিশেষভোজনান্তচরমাঙ্গকূটানন্তরপরমাপূর্ব্বস্যোৎপত্ত্যা তৎপূর্ব্ব-

হদৃষ্টার্থাং দক্ষিণামাহ ছন্দোগপরিশিষ্টম্। বিদধ্যাদ্ধোত্র-মন্যশ্চেদ্দক্ষিণার্দ্ধহরো ভবেৎ। স্বয়ঞ্চেদুভয়ং কুর্য্যাদন্যস্মৈ প্রতিপাদয়েৎ॥ সত্রেঽপ্যতিদেশাগতদৃষ্টার্থদক্ষিণায়া বাধো নাদৃষ্টার্থায়া দক্ষিণায়া ইতি॥ ১১১॥

অথ ব্রাহ্মণসংখ্যা। যাজ্ঞবল্ক্যঃ। দৈবে যুগ্মান্ যথাশক্তি পিত্রেঽযুগ্মাংস্তথৈব চ। পরিষ্কৃতে শুচৌ দেশে দক্ষিণাপ্লবনে তথা॥ দ্বৌ দৈবে প্রাক্ ত্রয়ঃ পিত্রে উদগেকৈকমেব বা। মাতামহানামপ্যেবং তন্ত্রং বা বৈশ্বদেবিকম্॥ পরিষ্কৃতে সর্ব্বত আবৃতে। প্রাক্ প্রাঙ্মুখঃ। উদগুদঙ্মুখঃ। একৈকমেব বেতি। একং দৈবে পিত্রাদি

ক্ষণে চানতিলক্ষণাঙ্গাভাবাদনুপপত্তেঃ। ন চানতেঃ ধারাবাহিকত্বেন তদানীমপ্যানতিরস্তীতি বাচ্যং তস্যা অপ্যন্তরা ঋত্বিক্‌মরণাদাবব্যাপ্তেরগতেঃ। অতএবাঙ্গানাং অঙ্গাপূর্ব্বদ্বারৈব প্রধানোপকারকত্বমিতি সিদ্ধান্তঃ। এবঞ্চ দক্ষিণাদানস্য যদানতিলক্ষণফলমুক্তং তদানুষঙ্গিকমেবেতি বোধ্যম্। এতেন। বিনা মাংসেন মধুনা বিনা দক্ষিণয়াশিষা। সফলন্তু ভবেচ্ছ্রাদ্ধং যতিষু শ্রাদ্ধভোজিষু॥ ইত্যত্র দক্ষিণানিষেধো যতিস্তুতিপর এব সর্ব্বত্র দক্ষিণায়া আবশ্যকত্বাদিতি প্রতিপন্নং॥ ১১১॥

অথ ব্রাহ্মণসংখ্যেতি। দক্ষিণাপ্লবনে দক্ষিণাদিঙ্‌নীচে। মাতামহানামপ্যেবমিতি। এতেন মাতামহশ্রাদ্ধস্যাপি পিতৃপার্ব্বণবিকৃতিত্বমতো মাতামহপক্ষে লেপভুজামসম্ভবেঽপি নিরুদ্দেশ্যকমেব প্রকৃতিবৎ বিকৃতিরিতি ন্যায়প্রাপ্তত্বাৎ পিণ্ডাস্তরণকুশমূলে করমার্জ্জনং কার্য্যম্। বিকল্পার্থ ইতি। ভোজ্যানাং ভোক্তৄণাং বা সম্ভবাসম্ভবভেদেন ব্যবস্থিতবিকল্পার্থ ইত্যর্থঃ। ন্যায়সিদ্ধারামপীতি। ন্যায়শ্চাত্র কর্তৃত্বভেদাদিরূপবাধকাভাবে সতি লাঘবমেব। ফলভূমেতি। বিষমশিষ্টত্বেন ইচ্ছাবিকল্পা-

ত্রিকে চৈকম্। তন্ত্রং বেতি। বাশব্দো বিকল্পার্থো নাব-ধারণার্থঃ। মাতামহানামপ্যেবং দৈবপূর্ব্বং শ্রাদ্ধং কুর্য্যাদিতি গোভিলসূত্রাৎ। ন্যায়সিদ্ধায়ামপি তন্ত্রতায়ামাবৃত্তির্ব্বিকল্পেন। আবৃত্তিপক্ষে চ ফলভূমা পরিকল্পনীয়ঃ। তথা গোতমঃ। নবাবরান্ ভোজয়েদযুজো বা যথোৎসাহম্। নবাবরা নিকৃষ্টা কোটির্যেষাং তান্। পিত্রাদীনাং ত্রয়াণামেকৈকং প্রতি ত্রীন্ ত্রীনিত্যর্থঃ। অতএবাশ্বলায়নঃ। ত্রীংস্ত্রীন্ নবেতি বক্ষ্যতি। অযুজো বা সপ্ত পঞ্চ ত্রীন্ বা ন তু নবাধিকান্ তেষামবরগ্রহণেনৈব গ্রহণাৎ। আশ্বলায়ন গৃহ্যং। একৈকমেকৈকস্য দ্বৌ দ্বৌ ত্রীংস্ত্রীন্ বা বৃদ্ধৌ ফলভূয়স্ত্বং ন ত্বেবৈকং সর্ব্বেষাং পিণ্ডৈর্ব্যাখ্যাতং কামমনাদ্যে। একৈকস্য পিত্রাদেরেকৈকং দ্বৌ দ্বৌ দেবে বীপ্সা তন্ত্রত্বাভাবপক্ষে একৈকস্য পিত্রাদেস্ত্রীংস্ত্রীন্ বা পক্ষঃ অস্মিন্ পক্ষে ফলে বিশেষঃ। কল্পতরৌ তু দ্বৌ দ্বাবিত্যাভ্যুদয়িকশ্রাদ্ধবিষয়ং ব্যাখ্যাতম্। অথাতঃ পার্ব্বণশ্রাদ্ধে কাম্যে বা আভ্যুদয়িক ইত্যনেনাভ্যুদয়স্যাপ্যুপসংক্রান্তত্বাৎ। ন ত্বেবৈকং সর্ব্বেষাং ত্রয়াণাং পিত্রাদীনাং পিণ্ডৈর্ব্যাখ্যাতমিতি। যথা ত্রয়াণামেকঃ পিণ্ডো ন ভবতি তথা ব্রাহ্মণোঽপি কামং যথেষ্টং একমপি বা সর্ব্বেষাং কুর্য্যাৎ।

---

সম্ভবাৎ তথাত্বে আবৃত্তিং বিনাপি শ্রাদ্ধসিদ্ধেরাবৃত্তেরননুষ্ঠানলক্ষণাপ্রামাণ্যপ্রসঙ্গাৎ। সমর্থাসমর্থভেদেন ব্যবস্থিতবিকল্পেঽপি অধিকারিভেদাদিকল্পনাগৌরবাৎ ফলভূমৈবাত্রেতি ভাবঃ। ত্রীংস্ত্রীনিত্যর্থ ইত্যাদ্যর্থঃ। তেনৈকাদশত্রয়োদশাদিব্রাহ্মণোপবেশনেনোক্তব্যবস্থাসঙ্গতিঃ।

অনাদ্যে সপিণ্ডীকরণব্যতিরিক্তে আদিঃ সপিণ্ডীকরণমিত্যাশ্বলায়নেন তস্যাদ্যত্বাভিধানাৎ। অদনীয়াভাবো বাহ্নাদ্যশব্দার্থঃ। তদাপি সকলগুণযুক্তো নির্দ্দোষ এবৈকঃ কর্ত্তব্য ইত্যাহ বশিষ্ঠঃ। অপি বা ভোজয়েদেকং ব্রাহ্মণং বেদপারগম্। শ্রুতশীলোপপন্নঞ্চ সর্ব্বালক্ষণবর্জ্জিতম্॥ যদ্যেকং ভোজয়েচ্ছ্রাদ্ধে দৈবং তত্র কথম্ভবেৎ। অন্নং পাত্রে সমুদ্ধৃত্য সর্ব্বস্য প্রকৃতস্য চ॥ দেবতায়তনে কৃত্বা ততঃ শ্রাদ্ধং প্রবর্ত্তয়েৎ। প্রাস্যেদগ্নৌ তদন্নন্তু দদ্যাদ্বা ব্রহ্মচারিণে॥ কৃত্বা নিবেদনমিতি শেষঃ। তথা শঙ্খঃ। ভোজয়েদথবাপ্যেকং ব্রাহ্মণং পঙ্‌ক্তিপাবনম্। দৈবে কৃত্বা তু নৈবেদ্যং পশ্চাত্তস্য তু নির্ব্বপেৎ॥ বৃহস্পতিঃ। যদ্যেকং ভোজয়েচ্ছ্রাদ্ধে স্বল্পত্বাৎ প্রকৃতস্য তু। স্তোকং স্তোকং সমুদ্ধৃত্য তেভ্যো হ্যন্নং নিবেদয়েৎ॥ প্রকৃতস্য শ্রাদ্ধোচিতদ্রব্যস্য স্তোকং স্তোকং সমুদ্ধৃত্য একস্মিন্নেব পাত্রে পিত্রাদিভ্যো বিভজ্য দদ্যাৎ বিভজ্যান্নং সঙ্কল্পয়েদিত্যর্থঃ। মনুঃ। দ্বৌ দৈবে পিতৃকৃত্যে ত্রীনেকৈকমুভয়ত্র বা। ভোজয়েৎ সুসমৃদ্ধোঽপি ন প্রসজ্যেত বিস্তরে॥ একৈকমিতি দৈবপিত্রাদিদ্বিকত্রিকাপেক্ষয়া। উভয়ত্র দৈবে পিত্র্যে চ ন মাতামহাপেক্ষয়োভয়ত্বং তেষামপ্রকৃতত্বাৎ। অতএব একৈকমিতি পিতৃপিতামহপ্রপিতামহাপেক্ষয়া জ্ঞেয়ং পিত্রা-

---

আভ্যুদয়িকপরতায়াং পার্ব্বণপ্রকরণবিরোধমাশঙ্ক্যাহ অথাত ইতি।
সর্ব্বস্য প্রকৃতস্যেতি। সর্ব্বস্য শ্রাদ্ধীয়দ্রব্যস্য কিঞ্চিৎ কিঞ্চিদুদ্ধৃত্যেত্যর্থঃ।

দীনাং সন্নিধানাৎ। ন ত্বেকমিতি। পিত্রাদিত্রয়াপেক্ষয়া ন ত্বেবৈকং সর্ব্বেষামিতি আশ্বলায়নগৃহ্যবিরোধাদিতি মেধাতিথিব্যাখ্যানমপাস্তম্ উভয়শব্দাৎ পূর্ব্বোক্তদৈবপিতৃকৃত্যপ্রতীতেঃ। কিঞ্চাশ্বালায়নগৃহ্য এব কামমনূদ্য ইত্যনেন একব্রাহ্মণোপবেশনপক্ষাভিধানাৎ। অপিচ শঙ্খবশিষ্ঠবৃহস্পতিভিরত্যন্তাশক্তৌ পিতৃপিতামহপ্রপিতামহাপেক্ষয়ৈব একব্রাহ্মণোপবেশনপক্ষাভিধানাৎ। তথা। দ্বৌ দৈবে পিতৃকৃত্যে ত্রীনেকৈকমুভয়ত্র বা ইত্যভিধায়। উরঃস্থাঃ পিতরস্তস্য বামপার্শ্বে পিতামহাঃ। প্রপিতামহা দক্ষিণতঃ পৃষ্ঠতঃ পিণ্ডভক্ষকাঃ॥ ইতি বৌধায়নেনৈকব্রাহ্মণ এব পিত্রাদিত্রিকাধিষ্ঠানস্যোক্তত্বাৎ। পিণ্ডভক্ষকাঃ পিণ্ডলেপভাগিনঃ। তথা ব্রহ্মপুরাণম্। দেশকালধনাভাবাদেকৈকমুভয়ত্র বা। শেষান্ বিত্তানুসারেণ ভোজয়েদন্যবেশ্মনি॥ যস্মাদ্‌ব্রাহ্মণবাহুল্যাদ্দোষো বহুতরো ভবেৎ। শ্রাদ্ধনাশো মৌননাশঃ শ্রাদ্ধতন্ত্রস্য বিস্মৃতিঃ॥ উচ্ছিষ্টোচ্ছিষ্টসংস্পর্শো নিন্দাদাত্রন্নভোক্তৃষু। বিতণ্ডয়া পরীবাদো জল্পাস্তেষু পৃথগ্বিধাঃ॥ অত্র সংক্ষেপার্থঃ। যুগ্মান্ যথাশক্তীত্যনেন চতুঃষড়িত্যাদয়ঃ পক্ষাঃ সূচিতাঃ। তথাহযুগ্মান্ যথাশক্তি ইত্যনেন পঞ্চ সপ্ত নব ইত্যাদয়ঃ। অতএব পৈঠীনসিঃ।

প্রাস্যেদিতি। তথাচ দেবশ্রাদ্ধমপাত্রকমেব কৃত্বাহগ্ন্যাদৌ তদন্নস্যোত্তরাপ্রতিপত্তিঃ কার্য্যেত্যর্থঃ। পিত্রাদিত্রিকেতি পিত্রাদিত্রিষু একং ব্রাহ্মণমিত্যর্থঃ। মেধাতিথিমতং দূষয়তি অতএবেতি। পিত্রিতি পিত্রাদি-

শ্বঃ শ্রাদ্ধং করিষ্যামীতি সঙ্কল্প্য ব্রাহ্মণান্ সপ্ত পঞ্চ নব বা শ্রোত্রীয়ান্নিমন্ত্রয়েদিত্যাদি পঞ্চোপবেশনপক্ষে পিতরি ত্রয়ো ব্রাহ্মণাঃ পিতামহপ্রপিতামহয়োরেকৈকঃ সপ্তপক্ষে পিতৃমাতামহয়োস্ত্রয়স্ত্রয়ঃ প্রপিতামহস্যৈকঃ নবপক্ষে একৈকস্মিন্ ত্রয়স্ত্রয়ঃ। এতচ্চ শক্তেন ফলভূমার্থিনা কর্ত্তব্যম্। অতএব বৃদ্ধৌ ফলভূয়স্ত্বমুক্তম্। দ্বৌ দৈবে ত্রয়ঃ পিত্র্যে ইতি শক্তমাত্রবিষয়ম্। একৈকমিত্যশক্তবিষয়ম্। অতএব দেশকালধনাভাবাদেকৈকমুভয়ত্র বা। ইতি ব্রহ্মপুরাণম্। একব্রাহ্মণপক্ষস্ত্বত্যন্তাশক্তবিষয়ঃ। নন্থু ভোজয়েৎ সুসমৃদ্ধোঽপি ন প্রসজ্যেত বিস্তরে। ইতি মনুবচনেন। তস্মাদ্‌ব্রাহ্মণবাহুল্যাদ্দোষো বহুতরে ভবেৎ। ইতি ব্রহ্মপুরাণবচনেন চাত্যন্তশক্তপক্ষেঽপি বহুতরব্রাহ্মণোপবেশনপক্ষস্য নিষিদ্ধত্বাৎ কথং পঞ্চ সপ্ত নবাধিকাদ্যুপবেশনপক্ষঃ উচ্যতে। সৎক্রিয়াং দেশকালৌ চ শৌচং ব্রাহ্মণসম্পদঃ। পঞ্চৈতান্ বিস্তরো হন্তি তস্মান্নেহেত বিস্তরম্॥ ইতি মনুবচনে যস্মাদ্‌ব্রাহ্মণবাহুল্যাদিতি ব্রহ্মপুরাণবচনে চ সৎকারাদ্যসম্ভবহেতুত্বেনাভিধানাদ্বহুতরসৎকারাদিশক্তবিষয়ং গোতমবচনমিতি ন কিঞ্চিদনুপপন্নম্॥ ১১২॥

---

ত্রয়াণাং একং একং প্রতি একং একং ব্রাহ্মণমিত্যর্থঃ। ন ত্বেকমিতীতি। একং দৈবে পিত্রাদিত্রয়েষ্বেকমিতি নেত্যর্থঃ। তস্যেতি। তস্য পিতৃপক্ষীয়ৈকব্রাহ্মণস্য ন কিঞ্চিদনুপপন্নমিতি। তদসৎ ক্রিয়াদিসমর্থাসমর্থভেদেন বিস্তরবিধিনিষেধয়োর্ভিন্নবিষয়ত্বাদিতি ভাবঃ॥১১২॥

অথ মাতামহব্রাহ্মণোপবেশনম্। অত্র জিকনঃ। দৌহিত্রো দ্বিবিধঃ পুত্রিকাপুত্রোঽপুত্রিকাপুত্রশ্চ। পুত্রিকাপুত্রোঽপি দ্বিবিধঃ মাতামহপক্ষমাত্রস্বধাকরঃ পক্ষদ্বয়স্বধাকরশ্চ। যথা যমঃ। কুর্য্যান্মাতামহশ্রাদ্ধং নিয়মাৎ পুত্রিকাসুতঃ। উভয়োরর্থসম্বন্ধঃ স কুর্য্যাদু-ভয়োরপি॥ অপুত্রিকাপুত্রোঽপি দ্বিবিধঃ ঋক্থহরোঽনৃক্থহরশ্চ। এবঞ্চত্বারো দৌহিত্রা ভবন্তি। তত্রোভয়োঃ পুত্রিকাপুত্রয়োঃ ঋক্থহরস্য চ পুত্রিকাপুত্রস্য নিয়তঃ পিণ্ডদানাধিকারঃ। ঋক্থাগ্রাহিণোঽপুত্রিকা-পুত্রস্য ত্বনিয়মঃ। যথা মনুঃ। অকৃতা বা কৃতা বাপি যং বিন্দেৎ সদৃশাৎ সুতম্। পৌত্রী মাতামহস্তেন দদ্যাৎ পিণ্ডং হরেদ্ধনম্॥ অকৃতেত্যপুত্রিকা কৃতা পুত্রিকা তথা। দৌহিত্রো হ্যখিলং ঋক্থমপুত্রস্য পিতুর্হরেৎ। স এব দদ্যাদ্দ্বৌ পিণ্ডৌ পিত্রে মাতামহায় চ॥ অত্র ধনগ্রহণপিণ্ডদানয়োঃ সামানাধিকরণ্যমবগম্যতে। অত্র মধ্যপঠিতস্যৈবকারস্যোভয়ত্র সম্বন্ধাৎ স এব দদ্যাদেবে-

অথ মাতামহব্রাহ্মণোপবেশনম্। উভয়োরপীতি। অত্রাপি নিয়-মাদিত্যস্যানুষঙ্গেণান্বয়ঃ। অপুত্রস্য পিতুরিতি। পিতুর্মাতামহস্যেত্যর্থঃ। সামানাধিকরণ্যমিতি। উক্তবচনে একস্মিন্নেব দৌহিত্রে পিণ্ডদানধন-হরণয়োরন্বয়াদিত্যর্থঃ। মধ্যপঠিতস্যেতি। স এব দদ্যাৎ দ্বৌ পিণ্ডৌ ইত্যত্রেত্যর্থঃ। স এবেত্যেবকারেণ ঋক্থাগ্রাহিণোঽপুত্রিকাপুত্রস্য পিণ্ডদাননিয়মব্যবচ্ছেদঃ। দদ্যাদেবেত্যনেন চ ঋক্থগ্রাহিণস্তথাবিধস্য পিণ্ডদাননিয়মঃ। উক্তগোভিলাদিবচনানাং পুত্রিকাপুত্রবিষয়ত্বশঙ্কাম-পনয়তি ন চ মাতামহাদিবর্গস্যেতি। মনুবচনদ্বয়স্থিতি। অকৃতা বা কৃতা

ত্যন্বয়ঃ। অতো ধনহার্য্যবশ্যং দদ্যাদিতি নিয়মাদন্যস্যা-নিয়মঃ। কিঞ্চ সর্ব্বেষাং নিয়তাধিকারে পুত্রিকাকরণ-মনর্থকং স্যাত্তদসঙ্গতম্। অকৃতেত্যস্যাপুত্রিকাপরত্বে পৌত্রী মাতামহ ইত্যনন্বয়াপত্তেঃ। পুত্রত্বে হি পুত্রিকা-য়াস্তৎপুত্রেণ মাতামহঃ পৌত্রীভবতি অতোঽকৃতাঽবাক্-কৃতাঽভিসন্ধিকৃতেতি যাবৎ। অতএব গোতমঃ। অভি-সন্ধিমাত্রাৎ পুত্রিকেত্যেকেষাম্। অতো মনুবচনদ্বয়ং প্রক-রণাৎ পুত্রিকাপুত্রমাত্রবিষয়ং তদধিকারজ্ঞাপকম্। অন্য-দেবাপুত্রিকাপুত্রাধিকারজ্ঞাপকমনুসরণীয়ম্। তচ্চ মাতা-মহানাঞ্চৈবং দৈবপূর্ব্বং শ্রাদ্ধং কুর্ব্বীত ইতি। গোভিল-সূত্রম্। তথা পিতৃমাতামহানাঞ্চ ভোজয়েচ্চাপ্যুদঙ্মুখা-নিতি বিষ্ণুপুরাণবচনম্। মাতামহানামপ্যেবমিতি যাজ্ঞ-বল্ক্যবচনম্। তথা। পিতৃন্মাতামহাংশ্চৈব শ্রাদ্ধে যত্নেন তর্পয়েৎ। শ্রাদ্ধহীনো হি পশুতামাপ্নোতি মনুরব্রবীৎ॥ পিতরো যত্র পূজ্যন্তে তত্র মাতামহা ধ্রুবম্। অবিশে-ষেণ কর্ত্তব্যং বিশেষান্নরকং ব্রজেৎ॥ ইতি বৃদ্ধযাজ্ঞ-

---

বাপীতি। মনুবচনদ্বয়স্থিত্যর্থঃ। এতদর্থস্যাত ইত্যাদিনা প্রাক্প্রতি-পাদিতত্বেঽপ্যুপসংহারো দার্ঢ্যার্থঃ। নমু বচনদ্বয়স্য পুত্রিকাপুত্রপরত্বে ঋক্থগ্রাহিণস্তস্য শ্রাদ্ধানিয়মপ্রসঙ্গঃ। স এব দদ্যাদিত্যনেন ঋক্থ-গ্রাহিণ এব তন্নিয়মনাদিত্যত আহ কিঞ্চেতি। দৌহিত্র ইতি। উক্ত বচনাদেকত্র দ্বয়মিতি ন্যায়েন পিণ্ডদাতৃধনগ্রাহিত্বয়োর্দৌহিত্রেঽন্বয়োঽব-গম্যতে ন তু ধনহারিত্বাবচ্ছেদেন পিণ্ডদাতৃত্বাবয় ইত্যর্থঃ। নবেতি। আখ্যাতাদিপদানাং হেতুত্বাবোধকত্বাদিতি ভাবঃ। নমু। অকৃত্বা প্রেত-কার্য্যাণি প্রেতস্য ধনহারকঃ। বর্ণানাং যদ্বধে প্রোক্তং তদ্ব্রতং

যজ্ঞ্যনাম্না পঠিতং বচনম্। পিতৃভ্যঃ স্বধোচ্যতাং পিতামহেভ্যঃ স্বধোচ্যতাং প্রপিতামহেভ্যঃ স্বধোচ্যতাং মাতামহেভ্যঃ স্বধোচ্যতাম্ ইত্যাদিকাত্যায়নবচনম্। অত্র হি পিত্রাদিমাতামহাদিবর্গদ্বয়স্য শ্রাদ্ধমবগম্যতে। ন চ মাতামহাদিবর্গস্য শ্রাদ্ধে পুত্রিকাপুত্রস্যাধিকারঃ সম্ভবতি। মাতুঃ প্রথমতঃ পিণ্ডং নির্ব্বপেৎ পুত্রিকাসুতঃ। দ্বিতীয়ন্তু পিতুস্তস্যাস্তৃতীয়ন্তু পিতুঃ পিতুঃ॥ ইতি মনুবচনবিরোধাৎ তস্মাদেতানি বচনানি অপুত্রিকাপুত্রাধিকারপ্রতিপাদকানি। ন চৈতেষু ধনহারিত্বেন বিশেষঃ শ্রূয়তে। অতো দ্বয়োরেবাপুত্রিকাপুত্রদৌহিত্রয়োর্নিয়তাধিকারঃ মনুবচনদ্বয়ন্তু পুত্রিকাপুত্রমাত্রাধিকারে প্রমাণং প্রকরণাৎ। কিঞ্চ দৌহিত্রো ধনং হরেৎ পিণ্ডঞ্চ দদ্যাদিত্যবগম্যতে। ন তু যো ধনহারী স পিণ্ডং দদ্যাৎ ন বা ধনগ্রহণস্য পিণ্ডদানে হেতুত্বমবগম্যতে। কিঞ্চ

নিয়তঞ্চরেৎ॥ ইতি বচনাদ্ধনগ্রহণস্য পিণ্ডদানহেতুত্বাবগতিরস্তি বা ইত্যত আহ কিঞ্চেতি। সন্দেহে পিণ্ডদানসন্দেহে। অত্র তু পুত্রিকাপুত্রকরণং তৎপুত্রেণ পিণ্ডদানার্থমেবেতি কুতঃ সন্দেহ ইতি ভাবঃ। ননু দৌহিত্রো হ্যখিলং ঋক্‌থমিতি বচনস্য পুত্রিকাপুত্রবিষয়ত্বে তৎপদেন ঋক্‌থগ্রাহিপুত্রিকাপুত্রস্য পরামর্শাদেবকারেণ ঋক্‌থাগ্রাহিপুত্রিকাপুত্রব্যাবৃত্তিঃ স্যাদত আহ স এবেতি। তথাচ তচ্ছব্দেন দৌহিত্রমাত্রস্য পরামর্শো ন তু ধনহারিত্ববিশিষ্টস্য অতো দৌহিত্রাতিরিক্তস্যৈব ব্যাবৃত্ত্যা নোক্তদোষ ইতি ভাবঃ। নিয়মার্থ ইতি। তেনৈবকারেণাপুত্রিকাপুত্ররূপস্য দৌহিত্রস্য ব্যাবৃত্তিঃ। অতএবেতি। মাতুঃ প্রথমতঃ পিণ্ডং নির্ব্বপেৎ পুত্রিকাসুতঃ। দ্বিতীয়ঞ্চ পিতুস্তস্য তৃতীয়ঞ্চ পিতুঃ পিতুঃ॥ ইতি মনুনা

পিণ্ডদাতৃত্বসন্দেহে ধনহারিত্বং প্রয়োজকমুক্তম্ অন্যথা ধনগ্রাহিণঃ পুত্রস্য পিণ্ডদাতৃত্বং ন স্যাৎ। স এব ইত্যেবকারঃ পুত্রিকাপুত্রস্য পরিপাটীবিশেষবিশিষ্টপিণ্ডদানাধিকারনিয়মার্থঃ। অতএব তদনন্তরং মাতুঃ প্রথমতঃ পিণ্ডমিতি মনুনোক্তম্। এবকারস্য চ পরসম্বন্ধে প্রমাণং নাস্তি পূর্ব্বেণৈব সম্বন্ধদর্শনাৎ। কিঞ্চ দৌহিত্রস্য চতুর্থস্য পিণ্ডত্রয়দাতৃত্বে ষট্‌সংখ্যানিয়মঃ স্মৃতিবিরোধঃ। যথা ছন্দোগপরিশিষ্টে কাত্যায়নঃ। কর্ষূসমন্বিতং মুক্ত্বা তথাদ্যং শ্রাদ্ধষোড়শম্। প্রত্যাব্দিকঞ্চ শেষেষু পিণ্ডাঃ স্যুঃ ষড়িতি স্থিতিঃ॥ তথা বৃদ্ধিশ্রাদ্ধে। ষড়্‌ভ্যঃ পিতৃভ্যস্তদনুশ্রাদ্ধদানমুপক্রমেৎ। অত্র ষট্‌সংখ্যান্যূনাধিকব্যবচ্ছেদিকাঙ্গমবগম্যতে। তথা শাতাতপঃ। মাতৄণামগ্রতঃ কুর্য্যাৎ পিতৄণাং তদনন্তরম্। ততো মাতামহানাঞ্চ বৃদ্ধৌ শ্রাদ্ধত্রয়ং ভবেৎ॥ ইত্যত্র মাতামহান্তর্ভাবাৎ ত্রিত্বমবগম্যতে। ন চাত্র ধনহারিত্বেন বিশেষঃ

মাতৃমাতামহপ্রমাতামহত্রিতয়দৈবতশ্রাদ্ধস্য পরিপাটীবিশেষবিশিষ্টস্যাভিহিতত্বাদিতি ভাবঃ। ন চৈতদ্বচনস্য পুত্রিকাপুত্রবিষয়ত্বে পিতৃপক্ষে-পিণ্ডশ্রুতিবিরোধ ইতি বাচ্যম্। তত্রোভয়পক্ষস্বধাকরপুত্রিকাপুত্রবিষয়ত্বাৎ। তথাচ স এব পরিপাটীবিশেষবিশিষ্টং মাতামহপ্রমাতামহপ্রভৃতিত্রিকদৈবতং পিণ্ডত্রয়ং দদ্যাৎ পিত্রাদিত্রিকায় চ পিণ্ডত্রয়ং দদ্যাৎ অর্থাৎ প্রকৃতপার্ব্বণবিধিনা ইতি তদ্বচনার্থপর্য্যবসানমিতি। প্রমাণং নাস্তীতি। যেন চ তদ্বলাৎ ঋক্‌থাগ্রাহিণোঽপুত্রিকাপুত্রস্য পিণ্ডদাননিয়মাপ্রশক্তিঃ স্যাদিতি ভাবঃ। পূর্ব্বেণেতি। তথাচ জনিতান্বয়বোধত্বেন নিরা-

শ্রূয়তে। পুত্রিকাকরণঞ্চ মৃতে মাতামহে জীবত্যপি পিতরি পার্ব্বণাধিকারার্থমিতি ন কিঞ্চিদনুপপন্নম্। অত-শ্চতুর্ণামেব দৌহিত্রাণাং নিয়তোঽধিকারঃ নিয়তঞ্চ মাতামহব্রাহ্মণোপবেশনম্॥ ১১৩॥

অথ দর্ভাঃ। হারীতঃ। শ্বোভূতে শ্রাদ্ধকর্ম্মণি দক্ষিণাং দিশং গত্বা দক্ষিণপ্রণতান্ কুশানাহরেৎ। ব্রহ্ম-পুরাণে। হরিতা বৈ সপিঞ্জলাঃ পুষ্টাঃ স্নিগ্ধাঃ সমা-হিতাঃ। গোকর্ণমাত্রাশ্চ কুশাঃ সকৃচ্ছিন্নাঃ সমূলকাঃ॥ পিতৃতীর্থেন দেয়াঃ স্যুর্দূর্ব্বা শ্যামাক এব চ। কাশাঃ কুশা বল্বজাশ্চ তথান্যে তীক্ষ্ণরোমশাঃ॥ মৌঞ্জাশ্চ শাদ্ব-লশ্চৈব ষড়্দর্ভাঃ পরিকীর্ত্তিতাঃ। শ্রাদ্ধে বর্জ্যাঃ প্রযত্নেন উলপাঃ সগবেধুকাঃ॥ সপিঞ্জলাঃ সাগ্রাঃ। স্নিগ্ধাঃ অকর্কশাঃ। পুষ্টাঃ ন সূক্ষ্মাঃ। সমাহিতা নির্দ্দোষাঃ। গোকর্ণমাত্রা বিততাঙ্গুষ্ঠানামিকাপরিমাণাঃ। তীক্ষ্ণ-

---

কাঙ্ক্ষত্বমিতি ভাবঃ। ননু মধ্যপঠিতস্য উভয়ত্রান্বয়ে কাকাক্ষিগোলক-ন্যায় এব প্রমাণমস্তি অতএব ন নিরাকাঙ্ক্ষত্বমপি কথমন্যথা কাকাক্ষি-গোলকন্যায়েনান্বয়বোধোদাহরণসম্ভব ইতি অত আহ কিঞ্চেতি। কিঞ্চ সর্ব্বেষামিত্যাদিনা উক্তপুত্রিকাকরণবৈয়র্থ্যমুদ্ধরতি পুত্রিকাকরণঞ্চেতি। অপুত্রিকাপুত্রস্য তু মাতামহশ্রাদ্ধস্য পিতৃশ্রাদ্ধাধীনপ্রবৃত্তিকতয়া স্বতো-ঽনুষ্ঠানাপ্রয়োজকতয়া জীবতি পিতরি পিতৃশ্রাদ্ধনিবৃত্ত্যা নিবৃত্তিরেবেতি ভাবঃ॥ ১১৩॥

অথ দর্ভাঃ। শ্বোভূতে নিমন্ত্রণদিনাৎ শ্বঃ শ্রাদ্ধদিনে সতীত্যর্থঃ। ষড়্দর্ভা ইতি। ষণ্ণাং দর্ভত্বকীর্ত্তনাৎ যত্র দর্ভশব্দশ্রুতিস্তত্র ষড়ন্যতমগ্রহ-ণম্। যথা। দর্ভাঃ পবিত্রমিত্যুক্তং অতঃ শ্রাদ্ধাদিকর্ম্মণি ইত্যত্র দর্ভপদেন

রোমশা ইতি বল্বজানাং বিশেষণম্। গোভিলেন তদিতরবল্বজনিষেধাৎ। মুঞ্জঃ শরঃ তদুদ্ভবং মৌঞ্জম্। শাদ্বলমিতি দূর্ব্বাদীনাং সর্ব্বেষাং বিশেষণম্। গোভিলেন তদিতরশরনিষেধঃ। দূর্ব্বাদিষু দর্ভশব্দো গৌণঃ তৎকার্য্যকরত্বজ্ঞাপনার্থঃ। কুশকার্য্যকরত্বাদেব হরিতাদিতর্দ্ধর্ম্মপ্রাপ্তৌ যৎ শাদ্বলগ্রহণং তৎ সমূলত্বাদিধর্ম্মনিয়মার্থম্। উলপস্তৃণভেদঃ। গবেধুকা গবেড়ুরিতি প্রসিদ্ধা। প্রতিনিধিত্বেন প্রাপ্তস্য নিষেধোহয়ম্। ছন্দোগপরিশিষ্টম্। হরিতা যজ্ঞিয়া দর্ভাঃ পীতকাঃ পাকযজ্ঞিকাঃ। সমূলাঃ পিতৃদৈবত্যাঃ কল্মাষা বৈশ্বদেবিকাঃ॥ পাকযজ্ঞা দেবযজ্ঞাদয়ঃ। কল্মাষঃ কৃষ্ণপাণ্ডুরঃ। পিতৃদৈবত্যে মূলস্য নিয়মাদন্যত্র মূলানিয়মঃ। সমূলে বিশেষমাহ গোভিলঃ। বর্হির্ল্লুপমূললূনাঃ পিতৃভ্যস্তেষামলাভে শূকবর্ণামেব গ্রহণম্। যত্র তু কুশবিধানং তত্র কুশাভাবে কাশদূর্ব্বয়োরন্যতরস্য তদন্যতরাভাবে শ্যামাকাদীনামিতি বক্ষ্যতে। প্রতিনিধিত্বেন প্রাপ্তস্যেতি বক্ষ্যমাণসর্ব্বতৃণানীতি গোভিলবচনাদিতি শেষঃ। তদ্ভবমিতি তস্মাৎ ভবং দলমিত্যর্থঃ। অতএব গোভিলোক্তশরনিষেধঃ কাণ্ডপরঃ। কুশোত্তরাঃ কুশশ্রেষ্ঠাঃ লম্বা বর্জ্জ্যা ইত্যনেন উক্তপরিমাণা ন্যূনপরিমাণকুশানামুপাদানং সূচিতম্। দর্ভাঃ কৃষ্ণাজিনমিতি হবিরত্র ঘৃতম্। অত্র মৈথিলাঃ। মাসে নভস্যমাবাস্যা তস্যাং দর্ভচয়ো মতঃ। অযাতযামাস্তে দর্ভা বিনিযোজ্যাঃ পুনঃ পুনঃ॥ ইতি মরীচিবচনাৎ শ্রাবণামাবাস্যোৎপাটিতকুশানামেবাযাতযামত্বমূচুঃ। তন্ন দর্ভাঃ কৃষ্ণাজিনং মন্ত্রা ইতি সামান্যাভিধানাৎ। অতএব মরীচিনা শ্বোভূতে শ্রাদ্ধকর্ম্মণীত্যাদিনা শ্রাদ্ধদিনে প্রাতঃ কুশাহরণমুক্তা তেষামেবাস্তরণসম্বন্ধিনাং

তৃণশরশীর্য্যবল্বজযুতবললশুণ্ঠবর্জ্জং সর্ব্বতৃণানি। মূলসমীপে লূনাঃ কুশা বর্হিসংজ্ঞকাঃ। তদপি মূলস্থ নোর্দ্ধদেশে কিন্ত্বধোভাগে। সমূলস্তু ভবেদ্দর্ভঃ পিতৄণাং শ্রাদ্ধকর্ম্মণি। মূলেন লোকান্ জয়তি শক্রস্য চ মহাত্মনঃ॥ ইতি যমবচনাৎ সমূলত্বপ্রতীতেঃ। শূকতৃণং শূকযুক্ততৃণং ধান্যাদি। শরশীর্য্যযুতবল্বজবললশুণ্ঠাস্তৃণজাতিভেদাস্তত্তৎদেশপ্রসিদ্ধাঃ। বায়ুপুরাণে। রত্নিপ্রমাণাঃ শস্তা বৈ পিতৃতীর্থেন সংস্কৃতাঃ। উপমূলে তথা লূনাঃ প্রস্তরার্থে কুশোত্তমাঃ॥ তথা। গুন্দ্রাঃ শ্রাদ্ধে ক্ষীরকুশা বল্বজা গন্ধকী তথা। বীরণাশ্চোলপাশ্চৈব লম্বা বর্জ্যাশ্চ নিত্যশঃ॥ সংস্কৃতাঃ সংস্পৃষ্টাঃ। প্রস্তরোঽত্র পিণ্ডপ্রস্তরঃ। গুন্দ্রা মুস্তকঃ। ক্ষীরকুশাঃ প্রত্যগ্রজাতাঃ কুশাঃ। গন্ধকী গন্ধতৃণানি। লম্বা উক্তপ্রমাণাদধিকাঃ কুশা এব দীর্ঘাঃ। গৃহ্যপরিশিষ্টম্। দর্ভাঃ কৃষ্ণাজিনং

---

বর্জ্জ্যত্বাভিধানেন তদন্যেষামযাতযামত্বং প্রতিপাদিতম্। ন চ সর্ব্বেষামযাতযামত্বে মরীচিবচনং ব্যর্থমিতি বাচ্যম্। কদাচিন্নাহরেদ্বিদ্বান্ প্রসুপ্তে কেশবে কুশান্। অভাবে তু সমুদ্ধৃত্য পরেঽহনি বিবর্জ্জয়েৎ॥ তথা। বার্ষিকাংশ্চতুরো মাসান্নাহরেৎ কুশমৃত্তিকাঃ। আদদীত ত্বভাবে তু সদ্যো যস্যোপযোজনম্॥ ইতি বচনাভ্যাং শয়নাহৃতকুশানামেকরাত্রোপযোগবিধানাদন্যদিনে তেষাং বর্জ্জনমভিহিতম্। তদপবাদার্থত্বাৎ মরীচিবচনস্যার্থবত্ত্বাৎ। উপলক্ষণে তৃতীয়েতি তথাচ বিণ্মূত্রোৎসর্গে ন তেষাং করণত্বং নাপেক্ষিতং ইতি ভাবঃ। অজীর্ণানীতি কর্ম্মানর্হতাপ্রয়োজকদোষশূন্যানীত্যর্থঃ। পিণ্ডার্থং যে স্তৃতা ইতি তেন বিকিরার্থাস্তৃতানাং ন ত্যাগঃ। চিতাবিতি জাতা ইতি শেষঃ। যজ্ঞভূমিষু অবিকৃতযজ্ঞভূমিষু। স্তরণমত্র যজ্ঞার্থপরিস্তরণং পিণ্ডার্থাস্তরণস্য পিণ্ডার্থং যে

মন্ত্রা ব্রাহ্মণা হবিরগ্নয়ঃ। অযাতযামান্যেতানি নিযো-জ্যানি পুনঃ পুনঃ॥ অযাতযামান্যজীর্ণানি। ছন্দোগপরি-শিষ্টম্। পিণ্ডার্থং যে স্তৃতা দর্ভাস্তর্পণার্থং তথৈব চ। ধৃতৈঃ কৃতে তু বিণ্মূত্রে ত্যাগস্তেষাং বিধীয়তে॥ ধৃতৈ-রুপলক্ষণে তৃতীয়া ধৃতৈঃ কুশৈরুপলক্ষিতেন পুংসা কৃতে বিণ্মূত্রে ইত্যর্থঃ। হারীতঃ। পথি দর্ভাশ্চিতৌ দর্ভা যে দর্ভা যজ্ঞভূমিষু। স্তরণাসনপিণ্ডেষু ষট্ কুশান্ পরি-বর্জ্জয়েৎ॥ পিণ্ডার্থং যে স্তৃতা দর্ভা যৈঃ কৃতং পিতৃ-তর্পণম্। মূত্রোচ্ছিষ্টপ্রলেপে চ ত্যাগস্তেষাং বিধীয়তে॥ ১১৪॥

নীবীমধ্যে চ যে দর্ভা ব্রহ্মসূত্রে চ যে ধৃতাঃ। পবিত্রাংস্তান্ বিজানীয়াদ্যথা কায়স্তথা কুশাঃ॥ পিতৃ-তর্পণমিতি বিশেষণাৎ দেবতাদ্যর্থকৃততর্পণেন পিতৃণাং

---

স্তৃতা ইতি পৃথগভিধানাৎ। পিণ্ডকুশাঃ পিণ্ডদানোপিযোগিনো দ্বিগুণ-ভুগ্নমোটকরূপাঃ তেন প্রতি পিণ্ডং ভুগ্নকুশত্যাগঃ। যৈঃ কৃতমিতি। দেবেভ্যশ্চ ঋষিভ্যশ্চ পিতৃভ্যশ্চ যথাক্রমম্। ইত্যনেন বিহিতপিতৃতর্পণং যৈঃ কুশৈঃ সমাপিতং তাংস্ত্যজেৎ। নিষ্ঠাবলাৎ সমাপনলাভাৎ। ন চ তর্পণানন্তরং তৎকালে হস্তধৃতানামপি কুশানাং ত্যাগঃ স্যাৎ। যৈরিতি সাধনতমে তৃতীয়া। সাধনপ্রকর্ষঃ অসাধরণ্যাদেব তচ্চ পিণ্ডে ভুগ্নকুশানামেব ন তু হস্তধৃতানাং তেষাং কর্ম্মান্তরসাধারণ্যাদিত্যর্থঃ। অতএব পিণ্ডার্থাস্তৃতদর্ভাণামেকপিণ্ডদানানন্তরং ন ত্যাগঃ মূলমধ্যা-গ্রদেশবিধানাৎ। ন চ কুশান্তরেঽপি তথাত্বসম্ভবঃ আজানিকব্যবহার-বিরোধাৎ॥ ১১৪॥

নীবীমধ্যে ইতি। মেখলাত্বেন ব্রহ্মচারিণা যে ধৃতা ইত্যর্থঃ। ব্রহ্মসূত্রে চেতি। যজ্ঞোপবীতং কুরুতে সূত্রং বস্ত্রং বাপি বা কুশরজ্জুমেব

তর্পণং কর্ত্তব্যমেব। মূত্রোচ্ছিষ্টপ্রলেপে সতীত্যর্থঃ। ধৃতৈঃ কৃতে চেত্যস্যাপবাদঃ। নীবীমধ্যে তু যে দর্ভা ইতি। বিষ্ণুঃ। কুশাভাবে কুশস্থানে কাশং দূর্ব্বাঞ্চ দদ্যাৎ। বায়ুপুরাণে। অঞ্জনাভ্যঞ্জনং গন্ধঃ সূত্রপ্রণয়নং তথা। কাশৈঃ পুনর্ভবৈঃ কার্য্যমশ্বমেধফলং লভেৎ ॥ বিষ্ণুধর্ম্মোত্তরে। পিণ্ডনির্ব্বাপণং কার্য্যং কুশাভাবে বিচক্ষণৈঃ। কাশেষু রাজন্ দূর্ব্বাসু পবিত্রে পরমে মতে ॥ কাশদূর্ব্বয়োঃ প্রতিনিধিত্বেন প্রাপ্তয়োঃ নিয়মবিধিরিয়ম্। যদি সোমং ন বিন্দেত পূতিকামভিশৃণুয়াদিতিবৎ। নন্থু নাত্র প্রতিনিধ্যধিকরণন্যায়েন তৎপ্রাপ্তিঃ। যত্র বিহিতদ্রব্যব্যক্তীনামবঘাতাদিনা বিনাশেঽবয়বপর্য্যন্তঃ শাস্ত্রার্থস্তত্রাবয়বানাং প্রতিনিধীভূতব্যক্ত্যন্তরেঽপি প্রত্যভিজ্ঞানমস্তীতি প্রতিনিধ্যধিকরণসিদ্ধান্তযুক্তিঃ। ন চাত্র ব্যক্তের্ব্বিনাশঃ নাপি যথোক্তবস্তুসম্পত্তৌ গ্রাহ্যং তদনুকারি যৎ। ইত্যাদিচ্ছন্দোগপরিশিষ্টবচনাৎ প্রাপ্তিঃ। তস্যাপি কল্পনালাঘবেন প্রতিনিধ্যধিকরণমূলত্বাৎ। উচ্যতে। কাণ্ডমূলপর্ণপুষ্পফলপ্ররোহরসগন্ধাদিনা সাদৃ-

---

বেতি উপবীতপ্রতিনিধিতয়া দ্বিতীয়বস্ত্রপ্রতিনিধিতয়া বা যে ধৃতা ইত্যর্থঃ। অঞ্জনাভ্যঞ্জনেতি ঋগ্বেদিবিষয়ম্। পুনর্ভবৈর্নবীনৈর্ন তু পুরাতনৈরিত্যর্থঃ। অশ্বমেধফলমিতি স্তুতিঃ বল্বজাদ্যপেক্ষয়া প্রকর্ষার্থম্। কাশদূর্ব্বয়োরিতি। কুশাভাবে কুশস্থানে কাশং দূর্ব্বাং বা দদ্যাদিত্যনেন সামান্যতঃ প্রতিনিধিত্বেন প্রাপ্তয়োর্বংপিণ্ডে তয়োঃ পুনরভিধানং তন্নিয়মার্থমেব সিদ্ধে সত্যারম্ভো নিয়মার্থ ইতি ন্যায়াৎ। নিয়মশ্চ কুশাভাবে পিণ্ডনির্ব্বাপনং কাশদূর্ব্বয়োরন্যতরস্মিন্নেব কার্য্যং ন শ্যামাকাদিপ্রবৃত্তিঃ। যথা।

শ্যেন প্রতিনিধিং কুর্য্যাদিতি পৈঠীনসিবচনাৎ প্রাপ্তিঃ। ন চাস্যাপি ন্যায়মূলতা রসগন্ধাদিনাপি সাদৃশ্যেন প্রতিনিধি-বোধনাৎ। অতোঽনেন বচনেনাবয়বপর্য্যন্তাভাবে যথা-কথঞ্চিৎ সাদৃশ্যেন প্রতিনিধিরুক্তঃ। অতএব মৈত্রায়-ণীয়পরিশিষ্টম্। দক্ষিণাভাবে মূলং ভক্ষ্যাণাং দক্ষিণাং দদাতীতি প্রতিনিধিনিয়মঃ। নন্বু কথমত্র নিয়মঃ সর্ব্ব-তৃণানীতি গোভিলবিরোধাৎ। ন এতয়োর্ব্বিশেষোপাদা-নাৎ প্রতিনিধৌ মুখ্যকল্পার্থোঽয়ং নিয়মঃ। প্রতিনিধি-ষ্বপি মুখ্যকল্পানুকল্পন্যায়ো দৃষ্টঃ। যথা মৈত্রায়ণীয়-পরিশিষ্টম্। দর্ভাস্তরণার্থে কাশঃ প্রতিনিধিঃ তদভাবে পর্ব্ববতীভিঃ কাণ্ডবতীভিরোষধীভিঃ স্তরণার্থান্ কুর্ব্ব-

সোমাভাবে ন্যায়প্রাপ্তায়াঃ পূতিকায়াঃ পুনরভিধানং নিয়মার্থমিত্যর্থঃ। ব্রীহিভির্যজেতেত্যত্র ব্রীহীণাং যাগকরণত্বং প্রতিপন্নং তচ্চ ন সম্ভবতি। অবঘাতাদিনা ব্রীহিবিনাশাৎ অতো ব্রীহিপদে ব্রীহ্যবয়বলক্ষণা তেন ব্রীহ্য-বয়বৈর্যজেত ইতি বিধিপর্য্যবসানম্। তত্র চাবয়বাঃ কেচন ব্রীহিমাত্রা-রম্ভকাঃ। কেচন তদুভয়ারম্ভকাঃ। তত্র ব্রীহিমাত্রারম্ভকাঃ মুখ্যাঃ তদর্থমেব ব্রীহিপদোপাদানাৎ। তদভাবে চোভয়ারম্ভকাণাং প্রতি-নিধিত্বেন গ্রহণং তত্র চ প্রতিনিধ্যধিকরণসিদ্ধান্তসিদ্ধা যুক্তিঃ। শাল্য-বয়বেষু ব্রীহ্যবয়বাভেদপ্রত্যভিজ্ঞানম্। এবমন্যত্রাপি যত্র যস্যাভেদ-প্রত্যভিজ্ঞানং তদভাবে তস্যৈবোপাদানমিতি প্রকৃতে চ ন কুশব্যক্তি-বিনাশঃ নাপি তদভেদপ্রত্যভিজ্ঞানম্। কাশাদিরিতি। কথং ন্যায়-সিদ্ধং তৎপ্রতিনিধিত্বমিত্যাশঙ্কতে নন্বু যত্রেতি। নন্বু মা ভবতু নৈয়ায়িকং প্রতিনিধিত্বং বাচনিকমেব তত্তবিষ্যতীত্যাশঙ্কা নিরস্যতি নাপীতি। তস্যাপীতি। দৃষ্টমূলত্বসম্ভবেঽদৃষ্টকল্পনায়া অন্যায্যত্বা-দিতি ভাবঃ। অতএবোক্তং তদনুকারি যদিতি। নন্বিতি। কুশা-

স্তীতি। এতচ্চ প্রতিনিধীনাং কাশাদীনামুপাদানং ন কাম্যশ্রাদ্ধবিষয়ম্। প্রতিনিধৌ হি কিঞ্চিদঙ্গবিকলমনুষ্ঠানং তচ্চ কাম্যে সর্ব্বশক্ত্যধিকরণে নিরস্তমিতি ॥১১৫॥

অথ শ্রাদ্ধদেবতাঃ। বৃহস্পতিঃ। ক্রতুর্দ্দক্ষো বসুঃ সত্যঃ কালঃ কামস্তথৈব চ। ধুরিশ্চ লোচনশ্চৈব তথৈব চ পুরোরবাঃ। মাদ্রবাশ্চ দশৈবেতে বিশ্বেদেবাঃ প্রকীর্ত্তিতাঃ॥ ইষ্টিশ্রাদ্ধে ক্রতুর্দ্দক্ষঃ সত্যো নান্দীমুখে বসুঃ। নৈমিত্তিকে কালকামৌ কাম্যে চ ধুরিলোচনৌ॥ পুরোরবা মাদ্রবাশ্চ পার্ব্বণে সমুদাহৃতৌ। উৎপত্তিং নাম চৈতেষাং ন বিদুর্যে দ্বিজাতয়ঃ॥ অয়মুচ্চারণীয়স্তৈঃ শ্লোকঃ শ্রদ্ধাসমন্বিতৈঃ। আগচ্ছন্তু মহাভাগা বিশ্বে-

ভাবে কাশদূর্ব্বয়োরন্যতরস্মিন্নেবেতি নিয়মঃ। কথং গোভিলেন কুশাভাবে সর্ব্বতৃণানীত্যনেনানিষিদ্ধতৃণসামান্যস্যৈব প্রতিনিধিত্ববিধানাৎ তদ্বিরোধাদিত্যর্থঃ। মুখ্যকল্পার্থ ইতি। তথাচ কাশদূর্ব্বয়োরন্যতরসত্ত্বেনান্যতৃণগ্রহণং কিন্তু তয়োরভাব এব ইত্যর্থঃ। স্তরণার্থান স্তরণরূপানর্থান্ কার্য্যানিত্যর্থঃ। অত্র কুশস্থানে কাশাদিবিধানাৎ কাশাদিদানেনাপি পবিত্রকরণং সিদ্ধম্। অতএব পবিত্রেস্থো বৈষ্ণব্যাবিতি মন্ত্রোঽপি তত্র সঙ্গচ্ছতে। অন্যথা কৌশমাত্রস্য পবিত্রে ইতি মন্ত্রলিঙ্গবিরোধঃ স্যাৎ। অতএব চানন্তর্গর্ভিণং সাগ্রং কৌশং দ্বিদলমেব চ। ইতি ছন্দোগপরিশিষ্টবচনে কুশপদেন কুশকার্য্যকারিত্বেনাজহৎস্বার্থলক্ষণয়া কুশতৎপ্রতিনিধিকাশাদ্যুভয়পরত্বম্। এতচ্চেতি। এতত্তত্ত্বং প্রাগেবাভিহিতম্ ॥ ১১৫ ॥

অথ শ্রাদ্ধদেবতাঃ। ক্রতুর্দ্দক্ষ ইতি। অত্র এতৌ দ্বাবেতদ্বো হৃন্নমিত্যুক্ত্বা বিশ্বেদেবাংশ্চ সংযজেদিতি ব্রহ্মপুরাণবচনে দ্বিশব্দাৎ। বিশ্বেদেবাঃ ক্রতুদক্ষৌ সর্ব্বাস্বিষ্টিষু বিশ্রুতাঃ। নিত্যং নান্দীমুখে শ্রাদ্ধে

দে বা বরপ্রদাঃ ॥ যে যত্র বিহিতাঃ শ্রাদ্ধে সাবধানা ভবন্তু তে। ইষ্টিশ্রাদ্ধং ইচ্ছাশ্রাদ্ধং রুচিশ্রাদ্ধমিত্যর্থঃ। নৈমিত্তিকমেকোদ্দিষ্টম্। ননু নাত্র বিশ্বেদেবা ইতি বিশ্বে দেবতানিষেধাৎ কথং কালকাময়োর্দ্দৈবতাত্বম্। অত্র কল্পতরুঃ। সাংবৎসরিকং যদা সাগ্ন্যাদিনা পার্ব্বণবিধিনা ক্রিয়তে তত্র বিশ্বেদেবানাং সম্ভব ইতি তদসঙ্গতম্। ত্রৈপুরুষিকত্বেন তস্যৈকোদ্দিষ্টত্বাভাবাৎ। উচ্যতে। নবশ্রাদ্ধং দশাহানি নবমিশ্রন্তু ষড়্তূন্। অতঃ পরং পুরাণং বৈ ত্রিবিধং শ্রাদ্ধমিষ্যতে ॥ যস্মিন্নবে পুরাণে বা বিশ্বেদেবা ন লেভিরে। আসুরং তদ্ভবেৎ শ্রাদ্ধং বৃষলং মন্ত্রবর্জ্জিতম্ ॥ ইত্যাশ্বলায়নগৃহ্যপরিশিষ্টবচনাৎ দশাহমধ্যে ক্রিয়মাণে শ্রাদ্ধে নবশ্রাদ্ধসংজ্ঞকে দ্বাদশমাসিকশ্রাদ্ধে চ নবমিশ্রসংজ্ঞকে একোদ্দিষ্টে বিশ্বেদেবানাং সম্ভবাৎ।

---

বসুনত্যো চ পৈতৃকে ॥ ইত্যাদিষু দ্বিবচনশ্রুতেশ্চ তেষাং সাহিত্যেন দেবতাত্বম্। অতএব ধুরিশ্চ লোচনশ্চেতি চকারেণ দ্বন্দ্বসমানার্থকেন তয়োঃ সাহিত্যং প্রতিপাদিতম্। পুরোরবা মাদ্রবাশ্চ ইতি পুরো রুয়তে স্থাপ্যতে ইতি। পুরোরবঃশব্দোঽপি অসুন্‌প্রত্যয়ান্তঃ সান্তঃ ওকারযুক্তঃ। যৎ তু পুরোরবসমাদ্রবসমিতি শব্দবচনং তৎ উচ্চৈঃশ্রবসসংজ্ঞং তদিতিবৎ বেদিতব্যং অত্র গৌড়মতে ওকারমধ্যতা। মৈথিলাস্তু ষষ্ঠস্বরমধ্যতাং বদন্তি। এবং মাদ্রবঃশব্দোঽপি সান্তঃ। অস্মাদেব ব[illegible]াৎ অত্র মৈথিলাঃ। বিশ্বেদেবাঃ শৃণুতেমমিত্যাদি বিশ্বেদেবাঃ আগত ইত্যাদিশ্রুতিষু এতদ্বো হন্নমিত্যুক্ত্বা বিশ্বেদেবাংশ্চ সংযজেদিতি বিশ্বেদেবান্ যবৈঃ পুষ্পৈরিত্যাদিস্মৃতিষু চ বিশ্বেদেবমাত্রশ্রুতেঃ বিশ্বেভ্যো দেবেভ্য ইদমন্নং নম ইত্যেব ত্যাগবাক্যং ন তু পুরোরবোমাদ্রবসৌ বিশ্বেদেবা ইদমন্নং বো নম ইতি। দ্বিবচনবহুবচনয়োরেকত্রানন্বয়াৎ।

ন চাস্য ত্রৈপুরুষিকত্বং সম্ভবতি প্রেতশ্রাদ্ধত্বাৎ। অসপিণ্ডীকৃতং প্রেতং একোদ্দিষ্টেন তর্পয়েৎ। ইতি জাবালবচনাৎ। এতচ্চ বহ্বৃচানামেব বহ্বৃচগৃহ্যপরিশিষ্টকারেণোক্তত্বাৎ কাত্যায়নাদিভিরেকোদ্দিষ্টে নাত্র বিশ্বেদেবা ইতি দেবতানিষেধাৎ। একাদশাহশ্রাদ্ধস্যাপি নবশ্রাদ্ধসংজ্ঞামাহ যমঃ। চতুর্থে পঞ্চমে চৈব নবমৈকাদশে তথা। যদত্র দীয়তে জন্তোস্তন্নবশ্রাদ্ধমুচ্যতে॥ বৃষলং বৃষস্য ধর্ম্মস্যালমসাধকমিত্যর্থঃ। যৎ তু ব্রহ্মপুরাণীয়মিতি কৃত্বা বচনং পঠন্তি। বিশ্বেদেবৌ ক্রতুদক্ষৌ সর্ব্বাস্বিষ্টিষু

---

সংজ্ঞাবিশেষাভিধানফলন্তু তত্তন্নামকত্বেন চিন্তনমেবেতি বদন্তি। তদসৎ ইষ্টিশ্রাদ্ধে ক্রতুর্দক্ষ ইত্যাদিনানামুনিবচনেষু তত্র শ্রাদ্ধে দ্বয়োর্দ্বয়োর্দেবতাত্বাবগমেন তয়োস্তয়োস্তত্র তত্র শ্রাদ্ধে বিশেষ্যোল্লেখার্থমেব ক্রতুদক্ষাদিসংজ্ঞাভিধানাৎ। অতএবোক্তং সংজ্ঞাবিধেরেতদেব প্রয়োজনং যত্তয়া নির্দ্দেশ ইতি নামাভিধানস্য চ চিন্তনমেব ফলমিত্যপি ন ক্কাপ্যদৃষ্টত্বাৎ। অতএব ন বিদুর্যে দ্বিজাতয় ইত্যভিধায় অয়মুচ্চারণীয় ইত্যাদিনা যে যত্র বিহিতা ইত্যনেন ক্রতুদক্ষাদিবিশেষনামাজ্ঞানে সামান্যযচ্ছব্দেন প্রয়োগং দর্শয়তা নামজ্ঞানে তত্তন্নামোল্লেখঃ প্রতিপাদিতঃ। বিশ্বেদেবাংশ্চ সংযজেদিত্যাদিষু তু সকলপার্ব্বণশ্রাদ্ধমধিকৃত্যাভিহিতেষু তত্তচ্ছ্রাদ্ধবিশেষপ্রাপ্তক্রতুদক্ষাদীনাং নামাভিধানং সূচিতমেব। যদ্যপি দ্বিবচনবহুবচয়োরেকত্রানন্বয়াদিত্যুক্তং তদপি ন নিত্যবহুবচনান্তশব্দানাং সামানাধিকরণ্যেনান্বয়ে সমানবিভক্তিকত্বস্যৈব তন্ত্রত্বাৎ ন তু সমানবচনত্বস্যাপি অন্যথা উর্ব্বশ্যপ্সরসঃ দারাঃ স্যুর্ব্রাহ্মণী মুখ্যা ইত্যাদাববগম্যতে। অতএব বিশেষ্যসমানাধিকরণং প্রায়েণেতি পদশাস্ত্রে প্রায়েণেত্যভিহিতম্। তথাচ নিত্যবহুবচনান্তস্য বিশ্বদেবশব্দস্য ক্রতুদক্ষাবিত্যাদিদ্বিবচনান্তেন সামানাধিকরণ্যে কো

বিশ্রুতৌ। নিত্যং নান্দীমুখশ্রাদ্ধে বসুসত্যৌ চ পৈতৃকে॥ নবান্নালভনে দেবৌ কালকামৌ প্রকীর্ত্তিতৌ॥ অপি কন্যাগতে সূর্য্যে কাম্যে চ ধুরিলোচনৌ। তৎ সন্দিগ্ধ-মূলম্ ॥ ১১৬ ॥

অথোপবীতম্। প্রাচীনাবীতিনা সম্যগপসব্যমতন্দ্রিণা। পিত্র্যমানিধনাৎ কার্য্যং বিধিবদ্দর্ভপাণিনা॥ ইতি মনুবচনাৎ শ্রাদ্ধে প্রাচীনাবীতিত্বমুক্তম্। অত্রো-পবীতিত্বপ্রাচীনাবীতিত্বে গোভিলোক্তে। যথা গোভিলঃ। দক্ষিণং বাহুমুদ্ধৃত্য শিরোঽবধায় সব্যেঽংশে প্রতিষ্ঠা-পয়তি দক্ষিণং কক্ষমন্ববলম্বনং ভবত্যেবং যজ্ঞোপবীতী

---

বিরোধ ইতি। অতএব ক্রতুদক্ষৌ বিশ্বেদেবাঃ সর্ব্বাস্বিষ্টিষু বিশ্রুতা-বিত্যাদি মুনিবাক্যমপ্যুপপন্নম্। তস্মাৎ ক্রতুদক্ষৌ বিশ্বেদেবা ইত্যাদ্য-ভিলাপ এব সাধীয়ান্ ইতি। ন চ বিশেষনির্দ্দেশস্যাবশ্যকত্বে বিশ্বদেব-শব্দাভিধানে কিং প্রমাণং এতদ্বো হ্যন্নমিত্যত্রৈব ইতি বহুবচনস্যৈব তত্র প্রমাণত্বাৎ। অন্যথা যুবয়োরিত্যেব ব্রূয়াৎ। কেচিৎ তু ক্রতুদক্ষসংজ্ঞকা বিশ্বেদেবা ইত্যাদ্যভিলপন্তি। তদসৎ সংজ্ঞাশব্দান্তর্ভাবেন দেবতাত্বে প্রমাণাভাবাৎ। অত্র সমানাধিকরণবিশ্বশব্দোত্তরদেবশব্দঃ ক্রতুদক্ষাদি-দশসু শ্রাদ্ধদেবতাসু রূঢ়ো নিত্যবহুবচনান্তঃ ইতি সাম্প্রদায়ঃ। রুচি-শ্রাদ্ধমিতি। এতেন ইষ্টৌ জ্যোতিষ্টোমাদিযাগে। অঙ্গভূতং শ্রাদ্ধ-মিতি শ্রীদত্তব্যাখ্যানমপাকৃতমস্য নান্দীমুখগ্রহণেনৈব গ্রহণাৎ নবমিশ্র-সংজ্ঞক ইতি বহ্বৃচানাং নিষেধাভাবাৎ নবমিশ্রেঽপি বিশ্বেদেবসত্ত্বা-দিতি ভাবঃ। সন্দিগ্ধমূলমিতি। অত্র সন্দেহমভিদধতা সমূলত্বেঽপি নবান্নে বিশেষ উক্তো ন তত্র কশ্চিদ্বিরোধ ইতি সূচিতম্। বস্তুতো নির্ণয়ামৃতাদিষু লিখিতত্বাদ্বচনং সমূলমেবেতি বোধ্যম্ ॥ ১১৬ ॥

অথোপবীতম্। শিরোঽবধায়েতি। অবধানং কিঞ্চিন্নম্রীকরণং তেন প্রতিষ্ঠাপনে যজ্ঞোপবীতেন সহ শিরঃসংযোগো যথা ন ভবতি তথা

ভবতি। সব্যং বাহুমুদ্ধৃত্য শিরোঽবধায় দক্ষিণেঽংশে প্রতিষ্ঠাপয়তি সব্যং কক্ষমন্ববলম্বনং ভবত্যেবং প্রাচীনাবীতী ভবতি। তদর্থমুপবীতং নিরূপ্যতে। উপবীতমাহ গোভিলঃ। যজ্ঞোপবীতং কুরুতে সূত্রং বস্ত্রং বাপি বা কুশরজ্জুমেব যজ্ঞোপবীতং বিশিষ্টবিন্যাসধারণকর্ম্মতয়া কুরুতে। কিং তৎ সূত্রং বিশেষয়তি ছন্দোগপরিশিষ্টম্। ঊর্দ্ধন্তু ত্রিবৃতং কার্য্যং তন্তুত্রয়মধোবৃতম্। ত্রিবৃতঞ্চোপবীতং স্যাত্তস্যৈকো গ্রন্থিরিষ্যতে॥ বামাবর্ত্তবলিতং তন্তুত্রয়ং ত্রিগুণং কৃত্বা দক্ষিণাবর্ত্তবলিতং কার্য্যম্। তদেব ত্রিবৃতং ত্রিসরমুপবীতং স্যাৎ। একো গ্রন্থিরিতি নানাত্বনিরাসার্থঃ। তথা বৌধায়নঃ। কৌষং সৌত্রং ত্রিস্ত্রিবৃতং যজ্ঞোপবীতং আনাভেঃ। কৌষং কৃমিকোষোদ্ভবং পট্টসূত্রাদিময়মিত্যর্থঃ। সৌত্রং কার্পাসোদ্ভবম্। তথা মনুঃ। কার্পাসমুপবীতং স্যাদ্বিপ্রস্যোর্দ্ধবৃতং ত্রিবৃৎ। শণসূত্রময়ং রাজ্ঞো বৈশ্যস্যাবিকসৌত্রিকম্॥ ত্রিস্ত্রিবৃদিত্যুক্তত্বান্মনুবচনেঽপি ত্রিবৃন্মাত্রং ত্রিস-

শিরঃ কৃত্বেত্যর্থঃ। প্রতিষ্ঠাপয়তি যজ্ঞোপবীতমিতি শেষঃ। কক্ষমনু পশ্চাদবলম্বতে ইত্যবলম্বনমিত্যর্থঃ। কাশান্ কটং করোতীতিবৎ প্রকৃতিবিকারভাবেন সূত্রং যজ্ঞোপবীতং কুরুতে ইত্যন্বয়ে সূত্রাভাবে তৎস্থানবিহিতয়োর্ব্বস্ত্রকুশরজ্জ্বোরপি সূত্রধর্ম্মাস্ত্রিসরত্বাদয়ঃ স্যুঃ। সোমস্থানে বিহিতায়াঃ পূতিকায়াঃ সোমধর্ম্মাঃ প্রোক্ষণাদয় ইব। স চ তয়োর্ন সম্ভবতি বক্ষ্যতি চ বাসসো যজ্ঞোপবীতসাধনত্বাসম্ভবাদিত্যতোঽধ্যাহৃত্যান্বয়থা ব্যাচষ্টে বিশিষ্টবিন্যাসো গোভিলোক্তসব্যাংশে প্রতিষ্ঠাপনাদি তদ্রূপং যদ্ধারণং তৎ কর্ম্ম কুরুতে। যজ্ঞোপবীতমিতি পূর্ব্বোক্তেঽন্বয়ঃ।

স্নত্বেন বিশেষ্যম্। যৎ তু পৈঠীনসিবচনম্। কার্পাসমুপবীতং ষট্তন্তু ত্রিবৃতং ব্রাহ্মণস্য ক্ষৌমং রাজন্যস্য আবিকং বৈশ্যস্য তন্নবতন্তুসম্ভবে ষট্তন্তুবিধায়কম্ ॥ ১১৭ ॥

নবতন্তুত্বং ষট্তন্তুত্বঞ্চ ব্যক্তমাহ দেবলঃ। যজ্ঞোপবীতং কুর্ব্বীত সূত্রাণি নবতন্তবঃ। একেন গ্রন্থিনা তন্তুর্দ্বিগুণস্ত্রিগুণোঽথবা॥ একেন গ্রন্থিনা যুক্ত ইতি শেষঃ। দ্বিগুণস্ত্রিগুণোঽথবেতি তন্তুর্বলনেন দ্বিসরস্ত্রিসরোঽথবা কার্য্যঃ। দ্বিসরত্বং ত্রিসরত্বাসদ্ভাবে গোভিলে বাশব্দো বিকল্পার্থঃ। অপিশব্দো বস্ত্রকুশরজ্জোঃ সূত্রানুকল্পপ্রদর্শনার্থঃ। এবকারস্ত্রিসরত্বাদিব্যবচ্ছেদার্থঃ। দ্বিতীয়বাশব্দোঽনুক্তমুঞ্জগোবালাদিসমুচ্চয়ার্থঃ। তথাচ নিগমপরিশিষ্টম্। বাসসা যজ্ঞোপবীতানি কুরুতে তদভাবে ত্রিবৃতা সূত্রেণ কুশমুঞ্জবালপ্রতিসররজ্জুভির্ব্বা। বালোঽত্র গোবালঃ। যথা দেবলঃ। কার্পাসক্ষৌমগোবালশরবল্কতৃণোদ্ভবম্। সদা

ইত্থঞ্চোক্তব্যাখ্যানে যজ্ঞোপবীতস্থান এব বস্ত্রকুশরজ্জোর্ব্বিধানাৎ ন তয়োস্ত্রিসরত্বাদ্যাপত্তিঃ। যজ্ঞোপবীতস্বরূপঘটকত্বেন ত্রিসরত্বাদীনাং যজ্ঞোপবীতধর্ম্মত্বাভাবাদিতি নোক্তদোষঃ কিন্তু কীদৃশযজ্ঞোপবীতমিত্যর্থঃ। অধোবৃতমিত্যস্য ব্যাখ্যা বামাবর্ত্তবলিতমিতি ঊর্দ্ধন্ত ত্রিবৃতমিত্যস্য ব্যাখ্যা দক্ষিণাবর্ত্তবলিতমিতি। ত্রিস্ত্রিবৃতমিতি। নব বৈ ত্রিবৃদিতি শ্রুতেঃ ত্রিস্ত্রিসরীকৃতমিত্যর্থঃ। আনাভেরিতি সামগেতরপরং তস্য পরিশিষ্টকৃতা বিশেষাভিধানাৎ। অতএব। নাভেরূর্দ্ধমনায়ুষ্যমধোনাভেস্তপঃক্ষয়ঃ। তস্মান্নাভিসমং কার্য্যমুপবীতং দ্বিজাতিভিঃ॥ ইতি সামান্যোক্তমগ্নিপুরাণবচনমপি সামগেতরবিষয়ে বেদিতব্যম্। নবতন্তুসম্ভবে ইতি। নবতন্তুত্রিসরস্যৈব যজ্ঞোপবীতপদার্থত্বাদিতি ভাবঃ ॥১১৭॥

দেবল ইতি। সূত্রাণি যজ্ঞোপবীতং কুর্ব্বীত ইত্যন্বয়ঃ। তানি কিয়ন্তি

সম্ভবতো ধার্য্যমুপবীতং দ্বিজাতিভিঃ ॥ ইতি। তদভাবে ইতি প্রকরণাদ্বস্ত্রাভাবে কুশরজ্জুরিতি বোদ্ধব্যম্। নন্বেবং সূত্রময়মুপবীতং বস্ত্রাভাবেঽপি স্যাৎ ন ত্রিবৃতা সূত্রেণেতি ত্রিবৃৎসূত্রস্যৈকসরস্য বস্ত্রাভাবে বিধানার্থম্। ত্রিবৃৎসূত্রস্য তু ত্রিসরস্য সর্ব্বমুখ্যত্বমেব। ছন্দোগপরিশিষ্টকৃতা তত্রোপবীতশব্দস্য শঙ্কেতিতত্বেন মুখ্যত্বাৎ বস্ত্রাদৌ গৌণত্বাৎ একস্য অনুগতরূপস্যাভাবেঽনেকশক্তিকল্পনাপ্রসঙ্গাচ্চ। ন চ মুখ্যস্য গৌণত্বানুকল্পত্বং যুক্তম্। ননূপবীতস্থানে বিহিতত্বাৎ কুশরজ্জ্বাদীনামুপবীতধর্ম্মাস্ত্রিসরত্বাদয়ো

---

অত্রাহ নবতন্তব ইতি। কথং কুর্য্যাদিত্যাকাঙ্ক্ষায়ামাহ একেনেতি। নবতন্তুর্দ্বিগুণস্ত্রিগুণো বা একগ্রন্থিনা বিশিষ্টঃ কার্য্য ইত্যর্থঃ। বিকল্পার্থ ইতি। যজ্ঞোপবীতাভাবে বস্ত্রকুশরজ্জ্বোর্ব্বিকল্পার্থঃ ইত্যর্থঃ ন তু বস্ত্রযজ্ঞোপবীতয়োর্ব্বিকল্পার্থ ইত্যর্থঃ। বস্ত্রকুশরজ্জ্বোঃ সূত্রানুকল্পত্বপ্রদর্শনাৎ। এবকার ইত্যুক্তব্যাখ্যানেন শাস্ত্রপ্রাপ্তোঽপি ত্রিসরত্বাদিব্যবচ্ছেদ এবকারেণ মুনিনা স্পষ্টীকৃত ইতি তাৎপর্য্যম্। দ্বিতীয় ইত্যেব বা ইতি বাশব্দ ইত্যর্থঃ। সদা সম্ভবত ইতি। এষাং মধ্যে যৎ সম্ভবতি তদেব ধার্য্যমিত্যর্থঃ। নন্বেবমিতি। যথা বস্ত্রাভাবে কুশরজ্জুর্বিধিস্তথা ত্রিবৃৎসূত্রমপি স্যাদিত্যর্থঃ। একসরস্যেতি সূত্রেণ ইত্যেকবচনশ্রবণাৎ অন্যথা সূত্রং বস্ত্রং বেতি যজ্ঞোপবীতাভাবে বস্ত্রবিধায়কগোভিলবিরোধাপত্তেরিতি ভাবঃ। ননু যথা ত্রিসরস্য ত্রিবৃৎসূত্রস্য মুখ্যত্বং তথা বাসসা যজ্ঞোপবীতানি কুরুতে ইতি নিগমোক্তের্ব্বাসসোঽপি মুখ্যত্বং স্যাদিত্যাশঙ্কায়ামাহ একস্যেতি। তথাচ ত্রিসরত্রিবৃৎসূত্রে ছন্দোগপরিশিষ্টসঙ্কেতবাক্যাৎ যজ্ঞোপবীতশব্দস্য মুখ্যত্বং সিদ্ধং বস্ত্রে তথাবিধসঙ্কেতাভাবাৎ গৌণত্বমেবেতি অতো ন বৈপরীত্যাশঙ্কা। ননু ভবতু সূত্রময়স্যৈব মুখ্যত্বং তথাপি বচনবলাৎ বস্ত্রাভাবে তদ্বিধঃ স্যাদত আহ ন

ভবেয়ুঃ। ব্রীহিধর্ম্মাঃ প্রোক্ষণাদয় ইব যবে। অত্র কল্প-তরুঃ। যজ্ঞোপবীতান্যুত্তরীয়ে গৌণং তদ্ধর্ম্মবিন্যাসবিশেষ-মাত্রবিন্যাসপ্রাপ্ত্যর্থম্। তন্নির্যুক্তিকম্। ত্রিসরত্বাদেরপি তদ্ধর্ম্মত্বাবিশেষাৎ। অন্যে তু ত্রিসরত্বাদিবিশিষ্টস্যোপ-বীতশব্দার্থত্বেন তদ্ধর্ম্মত্বাভাবান্ন ব্রীহিধর্ম্মপ্রোক্ষণাদিবদত্র তৎসম্বন্ধঃ। ন সূত্রং বস্ত্রং বা কুশরজ্জুমেব বেতি সূত্রস্থানে বস্ত্রাদিবিধির্নোপবীতস্থানে। কিঞ্চ বাসসা যজ্ঞোপবী-তানীতি তৃতীয়য়া যজ্ঞোপবীতাঙ্গত্বেন বাসো বিধীয়তে ন যজ্ঞোপবীতকার্য্যাঙ্গত্বেন লক্ষণাপ্রসঙ্গাৎ। অতঃ সূত্র-কার্য্যকরত্বাৎ কথং সূত্রধর্ম্মাস্ত্রিসরত্বাদয়ো ন ভবেয়ুঃ।

---

চ মুখ্যস্যেতি। মুখ্যস্য সূত্রময়স্য গৌণবস্ত্রানুকল্পত্বং ন যুক্তমিত্যর্থঃ। উপবীতধর্ম্মা ইতি। এতচ্চ ত্রিসরত্বাদীনামুপবীতধর্ম্মত্ববাদিনঃ কল্পত-রোর্ম্মতমালম্ব্যোক্তম্। বস্তুতঃ সূত্রধর্ম্মা এব ত্রিসরত্বাদয়ো ন তূপবীত-ধর্ম্মা ইতি বক্ষ্যন্তে। ব্রীহিধর্ম্মা ইতি। ব্রীহিভির্যজেত যবৈর্যজেত ইত্যত্র ব্রীহিবৈকল্পিকে যবে ব্রীহিধর্ম্মাঃ প্রোক্ষণাদয় ইবেত্যর্থঃ। কল্পতরু-রিতি। বাসসা যজ্ঞোপবীতানি কুরুতে ইত্যত্র যজ্ঞোপবীতপদমুত্তরীয়ে গৌণং মুখ্যসূত্রময়যজ্ঞোপবীতধর্ম্মস্য বামাংশস্থাপনরূপবিন্যাসস্য প্রাপ্ত্যর্থমিতি কল্পতরুমতম্। তদ্ধর্ম্মেতি। মাত্রপদেন ত্রিসরত্বাদিব্যব-চ্ছেদঃ। নারায়ণোপাধ্যায়মতং দূষয়িতুমুখাপয়তি অন্যে ত্বিতি। তদ্ধর্ম্ম-ত্বাভাবাদিতি। ত্রিসরত্বাদিবিশিষ্ট এব যজ্ঞোপবীতশব্দসঙ্কেতাৎ ত্রিসর-ত্বাদীনামুপবীতস্বরূপঘটকতয়া উপবীতধর্ম্মত্বাভাবাদিত্যর্থঃ। সূত্রস্থানে ইতি তথাচ সূত্রস্থানবিহিতত্বাৎ কথং তদ্ধর্ম্মাস্ত্রিসরত্বাদয়ো ন ভবেয়ু-রিত্যর্থঃ। নন্থ ছন্দোগপরিশিষ্টবচনাৎ সূত্রং বস্ত্রং বেত্যত্র সূত্রপদং ত্রিস-রত্বাদিবিশিষ্টোপবীতাত্মকসূত্রপরমেব। তথাচোপবীতস্থানে এব বস্ত্রবিধা-নাৎ ন উক্তদোষঃ। ত্রিসরত্বাদীনামুপবীতধর্ম্মত্বাভাবাদত আহ কিঞ্চেতি।

পবিত্রানুষ্ঠানে কুশধর্ম্মা ইব কাশাদিষু দ্বিদলত্বাদয়ঃ। খলেবালী যূপো ভবতীতি যূপকার্য্যে খলেবালীবিধানাৎ অষ্টাস্রীকরণাদীনাং যূপপদার্থত্বাৎ মা ভবতু খলেবালী-সম্বন্ধঃ। উচ্যতে বাসসো যজ্ঞোপবীতসাধকত্বাসম্ভবাৎ তন্তুময়ে যজ্ঞোপবীতশব্দস্য শক্তিতত্বেন মুখ্যত্বাৎ। অর্থাদ্‌যজ্ঞোপবীতশব্দে তৎকার্য্যলক্ষণা। অতো যজ্ঞো-পবীতকার্য্যকারকে বাসসি ত্রিসরত্বাদীনাং যজ্ঞোপবীত-ধর্ম্মত্বাভাবান্ন সম্বন্ধঃ ॥ ১১৮ ॥

যজ্ঞোপবীতাঙ্গত্বেনেতি। যজ্ঞোপবীতসাধনত্বেনেত্যর্থঃ। লক্ষণেতি। যজ্ঞোপবীতশব্দস্য তৎকার্য্যে লক্ষণাপ্রসঙ্গাদিত্যর্থঃ। অত ইতি। যতো যজ্ঞোপবীতসাধনং বাসঃ অত ইত্যর্থঃ। দৃষ্টান্তমাহ পবিত্রেতি। কুশ-স্থানে কাশাদের্ব্বিহিতত্বেন কুশাদিনা পবিত্রনিষ্পাদনে কুশধর্ম্মা দ্বিদল-ত্বাদয়ঃ কাশাদিষু যথা তথা সূত্রস্থানে বাসসো বিহিতত্বাৎ বাসসা যজ্ঞো-পবীতনিষ্পাদনে সূত্রধর্ম্মাস্ত্রিসরত্বাদয়ো বাসসি ভবেয়ুরিত্যর্থঃ। এতেন কাশদূর্ব্বাদিনাপি পবিত্রকরণেষ্বনন্তর্গর্ভিত্বদ্বিদলত্বাদয়োঽপেক্ষণীয়া ইতি প্রতিপন্নম্। ননু মুখ্যধর্ম্মো যদি তৎকার্য্যকারিণ্যাবশ্যকস্তদা যূপধর্ম্মা-ণামষ্টাস্রীকরণাদীনাং খলেবাল্যাং প্রসঙ্গ ইত্যত আহ খলেবালীতি। ধান্যাদিমর্দ্দনার্থং খলমধ্যারোপিতঃ কাষ্ঠবিশেষঃ খলেবালী যূপকার্য্যে ইত্যত্র তৃতীয়াভাবান্ন যূপসাধনত্বেন খলেবালীবোধঃ কিন্ত্বভেদান্বয়বলাৎ তৎস্থানীয়ত্বেন তৎকার্য্যসাধনত্বেনৈব তদ্বোধঃ। অতোঽষ্টাস্রীকরণাদি-বিশিষ্টস্য যূপপদার্থত্বাদষ্টাস্রীকরণাদীনাং তদ্ধর্ম্মত্বাভাবাৎ খলেবাল্যাং সম্বন্ধো মা ভবতু ইহ তু বৈপরীত্যাৎ ত্রিসরত্বাদিসম্বন্ধো ভবিতুং যুক্ত এবেত্যর্থঃ। যজ্ঞোপবীতসাধনত্বাসম্ভবাদিতি। ঊর্দ্ধন্তু ত্রিবৃতৎ কার্য্য-মিত্যুক্তযজ্ঞোপবীতশব্দস্য বস্ত্রেণ কর্তুমশক্যত্বাদিতি ভাবঃ। তথা-চালাভে যজ্ঞোপবীতপদে তৎকার্য্যে লক্ষণা। তেন বাসসা যজ্ঞোপবীত-কার্য্যাণি কুর্ব্বতে ইত্যর্থাৎ যজ্ঞোপবীতস্থানে বস্ত্রবিধিপর্য্যবসানে ত্রিস-

অথার্ঘ্যঃ। অত্র কশ্চিৎ। বিশ্বান্ দেবান্ যবৈঃ পুষ্পৈরভ্যর্চ্চ্যাসনপূর্ব্বকম্। পূরয়েৎ পাত্রযুগ্মন্তু স্থাপ্য দর্ভপবিত্রকে॥ ইতি মৎস্যপুরাণবচনাৎ অর্ঘ্যদ্বয়ং দৈবে নিত্যমিতি বর্ণয়তি। তদসঙ্গতম্। যবৈরন্ববকীর্য্যাথ ভাজনে সপবিত্রকে। ইতি যাজ্ঞবল্ক্যবচনে একবচনাদেকত্বাবগতেঃ। বৈভক্তিকসংখ্যায়া অপ্যঙ্গত্বস্য পশ্বেকত্বাধিকরণে পশুনা যজেতেত্যত্র দর্শিতত্বাৎ। অর্ঘ্যদ্বয়বচনং দেবশ্রাদ্ধস্য তন্ত্রত্বাভাবে বর্ণনীয়ম্। যদ্বা পুরোরবোমাদ্রবসোরুভয়ত্বাৎ অর্ঘ্যোভয়ত্বং প্রীত্যতিশয়ার্থম্। অত্র কেচিৎ প্রথমে পাত্রে সংশ্রবান্ সমবনীয় পিতৃভ্যঃ স্থানমসীতি ন্যুব্জং পাত্রং করোতীতি কাত্যায়নাদিবচনে পিধানাশ্রবণাৎ পিধানরহিতস্যৈব পিতৃপাত্রস্য ন্যুব্জীকরণমিতি বদন্তি। তদসারম্। দত্ত্বার্ঘ্যং সংশ্রবাস্তেষাং পাত্রে কৃত্বা বিধানতঃ। পিতৃভ্যঃ স্থানমসীতি ন্যুব্জং পাত্রং করোত্যধঃ॥ ইতি যাজ্ঞবল্ক্যবচনেঽধঃস্থিতং পিতৃপাত্রং ন্যুব্জীকরোতীত্য-

রত্বাদীনাং যজ্ঞোপবীতধর্ম্মত্বাভাবাৎ ন বাসসি তৎপ্রসঙ্গ ইতি সমুদায়ার্থঃ॥ ১১৮॥

অথার্ঘ্য ইতি। স্থাপ্য দর্ভপবিত্রকে ইতি যন্নামেব দর্ভাণাং পরিগ্রহণার্থং দর্ভপদম্। অন্যথা পবিত্রপদাদেব কৌশপবিত্রলাভে দর্ভপদানর্থক্যং স্যাৎ। ভাজনে সপবিত্রকে ইতি। শন্নো দেব্যা পয়ঃ ক্ষিপ্ত্বা যবোঽসীতি যবান্ ক্ষিপেদিত্যুত্তরার্দ্ধেনান্বয়ঃ। যবৈরন্ববকীর্য্য ইতি। আবাহনাঙ্গযববিকরণপরম্। অতএব ভাজনে সপবিত্রকে ইত্যত্র দ্বিবচনশঙ্কাপি নিরস্তা। তথাত্বে উত্তরার্দ্ধেঽন্বয়াৎ বৈভক্তিকসংখ্যায়া অবিবক্ষিতত্বং নিরস্যতি বৈভক্তিকেতি। পশ্বেকত্বাধিকরণে ইতি। পশুনা

ম্বয়ানুপপত্ত্যা পিধানপাত্রাক্ষেপাৎ। অন্যথাঽধঃপদবৈয়-র্থ্যাপত্তেঃ। অতএব অধোভূমাবিতি কল্পতরুব্যাখ্যান-মযুক্তং সাঙ্গপ্রধানান্বয়তয়া বেদেঃ প্রাপ্তত্বাৎ। তদা কেন পিধানমিত্যাকাঙ্ক্ষায়াং প্রপিতামহপাত্রেণ পিধায় প্রতিষ্ঠাপয়তীতি শৌনকসূত্রমুপতিষ্ঠতে। নন্বেতস্য বহ্বৃ-চধর্ম্মত্বাৎ ছন্দোগযজুর্ব্বেদিনোঃ স্বগৃহ্যেঽনভিধানাৎ কথং তাভ্যাং তদনুষ্ঠানম্। তথা চ গৃহ্যপরিশিষ্টম্। বহ্বল্পং বা স্বগৃহ্যোক্তং যস্য কর্ম্ম প্রকীর্ত্তিতম্। তস্য তাবতি শাস্ত্রার্থে কৃতে সর্ব্বঃ কৃতো ভবেৎ॥ তথা ছন্দোগপরিশিষ্টম্। স্বশাখাশ্রয়মুৎসৃজ্য পরশাখাশ্রয়ন্তু যঃ। কর্ত্তুমিচ্ছতি দুর্ম্মেধা মোঘং তত্তস্য চেষ্টিতম্॥ তন্ন স্বশাখাশ্রয়মুৎ-সৃজ্য ইত্যভিধানাৎ স্বশাখোক্তকর্ম্মত্যাগেন পারশাখিক-কর্ম্মানুষ্ঠানং ন কার্য্যমিত্যর্থঃ। যথা। পিণ্ডে নমো বঃ পিতর ইত্যনেনাঞ্জলিকরণং গোভিলোক্তং বিহায় নমো বঃ পিতরঃ শুষ্মায় ইতি ষড়ঞ্জলিকরণং কাত্যায়নোক্তং গো-ভিলীয়ানাম্। অধিকঞ্চ পরোক্তমবিরোধি চ কর্ত্তব্যমেব।

যজেতেত্যত্র শ্রুতহান্যশ্রুতকল্পনভিয়া বাধকাভাবে সংখ্যায়া অপাঙ্গত্বস্য নিশ্চিতত্বাদিতি ভাবঃ। নন্বু মৎস্যপুরাণবচনমেব বাধকমস্তীত্যাশঙ্ক্যাহ অর্ঘ্যদ্বয়বচনন্ত্বিতি। যদ্বেতি। বাকারোঽনাস্থায়াং বস্তুতঃ ফলকল্পনে প্রমাণাভাবঃ বচনস্য নিত্যপ্রকরণাম্নাতত্বাৎ কল্পনাগৌরবাচ্চেতি বোধ্যম্। প্রথমে পাত্রে পিতৃপাত্রে সংশ্রবান্ দত্তার্ঘপাত্রস্থশেষজলানি দ্বিজকর-গলিতজলং সংশ্রব ইতি মিতাক্ষরা। অন্বয়ানুপপত্ত্যেতি। অধঃপদস্যা-বধিসাপেক্ষপরতয়া বিনাবধিমন্বয়ানুপপত্ত্যা ইত্যর্থঃ। নন্বধস্ত্বং ন বিব-ক্ষিতমিত্যত্রাহ অন্যথেতি। বৈয়র্থ্যাপত্তেরিতি। অতএবাধোভূমাবিতি

যথা ছন্দোগপরিশিষ্টম্। যন্নাম্নাতং স্বশাখায়াং পরো-ক্তমবিরোধি চ। বিদ্বদ্ভিস্তদনুষ্ঠেয়মগ্নিহোত্রাদিকর্ম্মবৎ॥ ইতি পরোক্তং বিরোধি ন কর্ত্তব্যম্। যথা শ্রাদ্ধে ব্রাহ্মণভোজনপূর্ব্বকস্য পিণ্ডদানস্য গোভিলোক্তস্য বিরোধি পিণ্ডদানপূর্ব্বকত্বং ব্রাহ্মণভোজনস্য গোভিলীয়ৈঃ। অগ্নি-হোত্রাদিকর্ম্মবদিতি। যথা ছন্দোগাদীনামনুক্তোঽপি যজু-র্ব্বেদিবিহিতোঽগ্নিহোত্রবিধিঃ ক্রিয়তে। নন্বেবং বহূনাং শাখান্তরোক্তানাম্ অঙ্গানামনুষ্ঠানং ন স্যাৎ। যথা পিণ্ডে পিত্রাবাহনাদি গোভিলেনোক্তং যজুর্ব্বেদিনাং ন অবি-রোধি চেতি চকারাদাকাঙ্ক্ষিত এব পরোক্তো গৃহ্যতে। যথাঽগ্নিহোত্রং জুহোতীতি বাক্যেনাবিশেষাৎ সর্ব্বশা-খিনামধিকারে বোধিতে বিধ্যপেক্ষায়াং যজুর্ব্বেদিকাগ্নি-হোত্রবিধেঃ সর্ব্বশাখিসম্বন্ধঃ। অতএব গোভিলেনানুক্ত-মপ্যন্নপ্রাশনাদিকর্ম্ম গোভিলীয়ৈঃ কর্ত্তব্যমেব। গোতমা-দিভির্গর্ভাধানাদিচত্বারিংশৎসংস্কারেষ্বন্নপ্রাশনস্যাবিশেষাৎ সর্ব্বশাখিসম্বন্ধপ্রতিপাদনাৎ প্রকৃতেঽপি পিধানং কেন

শ্রীদত্তব্যাখ্যা নিরস্তা। অত্র মৈথিলাঃ। পিতৃভ্যঃ স্থানমসীতি ন্যুব্জং পাত্রং করোত্যধঃ। করোতি তদুপরিন্যস্তপিতামহপ্রপিতামহপাত্রাভ্যামিত্যর্থঃ। পৈতৃকং প্রথমং পাত্রং তস্মিন্ পৈতামহং ন্যসেৎ। প্রপিতামহং ততো ন্যস্য নোদ্ধরেন্ন চ চালয়েৎ॥ ইতি স্মবচনৈনৈকবাক্যত্বাৎ। তেন পিতৃপাত্রে সংস্রবান্ স্থাপয়িত্বা পিধানরহিতমেব ন্যুব্জীকৃত্য তদুপরি পিতামহপ্রপিতামহপাত্রদ্বয়ং ক্রমেণ ন্যসেদিতি বদন্তি। তন্ন তথা সতি পাত্রং ন্যুব্জং করোতি পাত্রান্তরেণাধঃ করোতীতি বাক্যভেদঃ স্যাৎ। অস্মন্মতে তু অধঃস্থিতং পাত্রং ন্যুব্জং করোতীত্যেকমেব বাক্যং ইত্যেতৎ

ক্রিয়তামিত্যপেক্ষা বিদ্যত এব। গৃহ্যপরিশিষ্টবচনঞ্চ আন-কাঙ্ক্ষিতকর্ম্মত্যাগপরম্। তথা যমবচনাদপি প্রপিতামহ-পাত্রেণ পিধানম্। যথা যমঃ। পৈতৃকং প্রথমং পাত্রং তস্মিন্ পৈতামহং ন্যসেৎ। প্রপিতামহং ততো ন্যস্য নোদ্ধ-রেন্ন চ চালয়েৎ॥ পাত্রদ্বয়েন পিধানং বিকল্পার্থম্। ন চ পৈতামহমিতি সংশ্রবপরম্। পৈতৃকং প্রথমং পাত্রমিতি স্ববাক্যে পাত্রশ্রবণাৎ। অত্র কেচিৎ পিতৃপাত্রে মাতামহা-দিসংশ্রবগ্রহণে বচনাভাবাৎ পিত্রাদীনামিব মাতামহাদী-নামর্ঘ্যাদিপাত্রদর্শনাৎ মাতামহপাত্রে প্রমাতামহাদিদ্বিক-সংশ্রবং গৃহীত্বা পৃথঙ্মাতামহপাত্রস্য ন্যুব্জীকরণমাহুঃ। তদ-সৎ। আবৃতাস্তত্র তিষ্ঠন্তি পিতরঃ শৌনকোঽব্রবীৎ। ইত্যর্থবাদস্বরসাৎ পিতৃভ্যঃ স্থানমসীতি মন্ত্রলিঙ্গাচ্চ। পিতৃসংরক্ষণায়ৈব ন্যুব্জীকরণং কার্য্যম্। তচ্চ সকৃৎ কৃতে-নৈব ন্যুব্জীকরণেন মাতামহাদীনামপি কৃতং স্যাৎ। অতঃ

দেব ন্যায্যম্। কিঞ্চৈবং পিধানরহিতস্য ন্যুব্জত্বে সংশ্রবগ্রহণমদৃষ্টার্থং স্যাদিতি গৌড়াঃ তন্মতং দূষয়ন্তি। বস্তুতো মৈথিলমতমেব সমী-চীনমিত্যনুপদমেব বিবেচয়িষ্যামঃ। বেদেঃ বেদিরূপশ্রাদ্ধভূমেঃ। গোভি-লীয়ানামিতি ন কার্য্যমিতি পূর্ব্বেণান্বয়ঃ। পিণ্ডদানপূর্ব্বকত্বং ঋগ্বেদিনা-মিতি শেষঃ। গোভিলীয়ৈর্ন কর্ত্তব্যমিতি পূর্ব্বেণান্বয়ঃ। ক্রিয়তে ছন্দোগাদিভিরিত্যর্থঃ। বিকল্পার্থমিতি। পৈতামহং প্রপিতামহং বা ন্যসেদিতি বিকল্পার্থমিত্যর্থঃ। এতচ্চ ন সমীচীনমুক্তং যমবচনস্য বিক-ল্পার্থত্বে তত্র প্রথমমাদৌ পৈতৃকং পাত্রং ন্যস্য তস্মিন্ পৈতামহং ন্যসেৎ ততঃ প্রপিতামহং ন্যসেদিতি ক্রমাভিধানমনর্থকং স্যাৎ। তথা পিতৃ-পাত্রস্য ন্যাসানন্তরং ন্যাসান্তরবিধিবিরোধশ্চ স্যাৎ। তস্মাৎ মৈথি-

প্রযাজাদিতন্ত্রতাবৎ ন্যুব্জীকরণতন্ত্রতাপি শাস্ত্রার্থঃ। অতএবাবাহনং তন্ত্রেণৈব ক্রিয়তে মাতামহাদীনামপি পিতৃশব্দবাচ্যত্বাৎ ন্যুব্জীকরণমন্ত্রস্যাপি তন্ত্রতৈব। ন্যুব্জীকরণঞ্চ পিতৃপাত্রে নিধায়াথ ন্যুব্জমুত্তরতো ন্যসেৎ। ইতি মৎস্যপুরাণবচনাৎ। উত্তরত্র কর্ত্তব্যমত্রোপবিষ্টব্রাহ্মণস্যোত্তরস্যাং দিশীতি কল্পতরুঃ। ব্রাহ্মণানাং বামপার্শ্বে ইতি হলায়ুধঃ। আখ্যাতাৎ কর্ত্তুঃ সন্নিহিতত্বাৎ তস্যৈব বামপার্শ্বে ইতি পরমার্থঃ। তীর্থশ্রাদ্ধে চার্ঘ্যাবাহনে ন কার্য্যে। যথা দেবীপুরাণে। শ্রাদ্ধং তত্র চ কর্ত্তব্যমর্ঘ্যাবাহনবর্জ্জিতম্। শ্রাদ্ধং তত্তীর্থকং প্রোক্তং পিতৃণাং তুষ্টিকারকম্॥ অকালেঽপ্যথবা কালে তীর্থে শ্রাদ্ধং তথা নরৈঃ। প্রাপ্তৈরেব সদা কার্য্যং কর্ত্তব্যং পিতৃতর্পণম্। বিলম্বো নৈব কর্ত্তব্যো নৈব বিঘ্নং সমাচরেৎ॥ তীর্থপ্রাপ্তিনিমিত্তবিষয়মিদং তীর্থাদিপদোপাদানাৎ॥১১৯॥

---

লোক্তমেব সাধীয়ঃ। শৌনকবচনন্তু বহ্বৃচবিষয়মেব। সংশ্রবগ্রহণস্যাদৃষ্টার্থকতা ভবন্মতেঽপ্যাবশ্যকী তস্য ফলোপকারাঙ্গত্বাদিতি বিভাব্যম্। ততশ্চেতি। অতএব দক্ষ্ণার্ঘং সংশ্রবাংস্তেষামিতি বহুবচনমপ্যুপপদ্যতে ইতি। প্রযাজাদিতন্ত্রতাবদিতি। আগ্নেয়াষ্টাকপালোঽমাবস্যায়াং ঐন্দ্রং পয়োঽমাবাস্যায়ামিত্যুক্তাগ্নেয়াদিত্রিতয়োপকারকস্য প্রযাজাদিপঞ্চকস্য তন্ত্রতাবদিত্যর্থঃ। অতএবেতি। তন্ত্রতায়াশ্চ শাস্ত্রার্থত্বাদেবেত্যর্থঃ। অত্র মৈথিলাঃ। পিতৃপাত্রে পিতামহপ্রপিতামহপাত্রয়োঃ সংশ্রবমানীয় একং মাতামহপাত্রে প্রমাতামহবৃদ্ধপ্রমাতামহয়োঃ সংশ্রবঞ্চ সমবনীয় তয়োঃ পৃথগেব ন্যুব্জীকরণং মাতামহাদিশ্রাদ্ধেতিকর্ত্তব্যতাকলাপন্য। মাতামহানামপ্যেবং শ্রাদ্ধং কুর্য্যাদ্বিচক্ষণঃ। ইত্যতিদেশেন পৃথগেব প্রাপ্তেরিত্যাহুঃ। পিতৃশব্দবাচ্যত্বাদিতি। পিতৃ-

অথাগ্নৌকরণম্॥ কিমেতদ্দৈবকৃত্যং পিতৃকৃত্যং বেতি সংশয়ঃ। দৈবকৃত্যত্বে উপবীতিত্বাদয়ঃ পিতৃকৃত্যত্বে প্রাচীনাবীতিত্বাদয়ঃ। ননু কথং সংশয়ঃ সোমাদিপদানাং দেবতাবাচিত্বেন পিতৃবাচিত্বাভাবাৎ ন সোমাদীনামপি পিতৃত্বশ্রুতেঃ। যথা হারীতঃ। সোমো যমোঽঙ্গিরা-শ্চৈব সোমপাঃ পিরতস্তথা। বর্হিষদোঽগ্নিস্বাত্তাশ্চ হুতাদঃ ষড়্বিধো গণঃ॥ অত্র ছন্দোগপরিশিষ্টম্। অগ্নৌ-করণহোমশ্চ কর্ত্তব্য উপবীতিনা। প্রাঙ্মুখো নৈব দেবে-ভ্যো জুহোতীতি শ্রুতিশ্রুতেঃ॥ অপসব্যেন বা কার্য্যো দক্ষিণাভিমুখে ন তু। নিরূপ্য হবিরন্যস্মা অন্যস্মৈ ন হি হূয়তে॥ দৈবকৃত্যত্বে হেতুমাহ দেবেভ্য ইতি। তথা মাধ্যন্দিনী শ্রুতিঃ। স উদ্বাস্যাগ্নৌ দ্বে আহুতী জুহোতি দেবেভ্য ইত্যাদি। পিতৃকৃত্যত্বে হেতুমাহ নিরূপ্যেতি। অগ্নিমান্নির্ব্বপেৎ পিত্র্যচরুং বা শস্যমুষ্টিভিঃ। পিতৃভ্যো

---

শব্দস্য প্রাপ্তপিতৃলোকোপাধিবিশিষ্টরূঢ়ত্বাদিতি ভাবঃ আখ্যাতাদিতি। ন্যসেদিত্যাখ্যাতাদিত্যর্থঃ। সন্নিহিতত্বাৎ উপস্থিতত্বাৎ। বামপার্শ্বে ইতি। যস্য দক্ষিণে লক্ষ্ম ভবতি তং পুণ্যলক্ষ্মীকমাচক্ষতে উত্তরে চ স্ত্রিয়া ইতি শ্রুতৌ উত্তরে চাস্য সৌবর্ণং লক্ষ্ম পৃষ্ঠে ভবিষ্যতীতি মহাভারতে চ বামোরুপার্শ্বে উত্তরশব্দপ্রয়োগাদুত্তরপদস্য বামবোধকত্বাদিতি ভাবঃ। বস্তুতো হলায়ুধমতমেব জ্যায়ঃ। ব্রাহ্মণানাং কামপার্শ্বে ন্যসেৎ সংশ্রবপাত্রকম্। ইতি গরুড়পুরাণে বিশেষাভিধানাৎ॥ ১১৯॥

অথাগ্নৌকরণম্। বিচারফলমাহ দৈবকৃত্যত্ব ইতি। অত্রেতি অত্র সংশয়ে ছন্দোগপরিশিষ্টং সিদ্ধান্তয়তীতি শেষঃ। উদ্বাস্যেতি। অগ্নিতশ্চ-রুমবতার্য্যেত্যর্থঃ। নির্ব্বাপস্য পিত্রুদ্দেশ্যকত্বে প্রমাণমাহ অগ্নিমানিতি। শস্যমুষ্টিভিঃ সহ চরুং চরুসাধনং ঘৃতোদকাদি নির্ব্বপেৎ পাত্রে নিঃক্ষি-

নির্ব্বপামীতি। সব্যং দক্ষিণতো ন্যসেদিতি মৎস্যপুরাণবচনাৎ পিতৃভ্যস্ত্বাঘুষ্টং নির্ব্বপামীতি বাক্যেন চর্ব্বর্থং পিত্রুদ্দেশেনৈব ব্রীহিমুষ্টিনির্ব্বাপে কৃতে হোমোঽপি পিত্রুদ্দেশেনৈব কার্য্যঃ। নির্ব্বাপহোময়োঃ সমানোদ্দেশ্যত্বাৎ। অন্যথা নির্ব্বাপস্য হোমার্থত্বানুপপত্তেঃ। ননু তথাপি তদবস্থ এব সংশয়ঃ দ্বয়োরেব বচনার্থত্বাৎ। অত্র জিকনপ্রভৃতয়ঃ পূর্ব্ববচনেন পূর্ব্বপক্ষমভিধায় উত্তরবচনেন সিদ্ধান্তো দর্শিত ইত্যাহুঃ। তদসঙ্গতং পূর্ব্ববচনবৈয়র্থ্যাপত্তেঃ পূর্ব্বোক্তশ্রুতিবিরোধাচ্চ। কিঞ্চ শ্রুতিবিরুদ্ধোঽপ্যয়ং পক্ষঃ। যথা বৈজবাপগৃহ্যম্। যজ্ঞোপবীত্যগ্নৌ করবাণীত্যনুমন্ত্র্যাগ্নৌকরণং পিণ্ডপিতৃযজ্ঞাবৃতা সর্ব্বমনুক্রামেৎ। মৎস্যপুরাণে। যজ্ঞোপবীতী নির্ব্বর্ত্য ততঃ পর্য্যুক্ষণাদিকম্। প্রাচীনাবীতিনা কার্য্যমতঃ সর্ব্বং বিজানতা॥ পৈঠীনসিঃ। দেবান্ পিতৄংশ্চাবাহয়িষ্যে ইত্যনুজ্ঞাপ্যাগ্নৌ করিষ্যামীত্যনুজ্ঞাপ্য কুরুম্বেত্যাদি। অত্র দেবানামাবাহনম্ অগ্নৌকরণহোমার্থমবগম্যমানমদৃষ্টার্থং স্যাৎ।

---

পেৎ। ততঃ সব্যস্থং চরুপাত্রমগ্নের্দ্দক্ষিণভাগে ন্যসেদিত্যর্থঃ। পিত্রুদ্দেশেন পিণ্ডপিতৃযজ্ঞং পিত্রুদ্দেশেন। অন্যথেতি হোমার্থত্বানুপপত্তের্হোমাঙ্গত্বানুপপত্তেঃ। নম্বিতি। ছন্দোগপরিশিষ্টকৃতাপি তদ্বিধানাদিতি ভাবঃ। পূর্ব্ববচনেন অগ্নৌকরণহোমশ্চেতি। প্রথমবচনেন পূর্ব্বোক্তশ্রুতির্ম্মাধ্যন্দিনীয়শ্রুতিঃ। অগ্নৌ করবাণীত্যামন্ত্র্যেতি। অত্র বৈজবাপগৃহ্যস্য বহ্বৃচীয়ত্বাৎ তেষাং করবাণীতি প্রয়োগঃ। পারস্করস্য যজুর্ব্বেদিকত্বাদগ্নৌ করিষ্যে ইতি পারস্করশ্রুতের্যজুষামগ্নৌ করিষ্যে ইতি। অগ্নৌ করিষ্যামীতি গোভিলাচ্চ। সামগানামগ্নৌ করিষ্যামীতি প্রয়োগ

নিরূপ্য হবিরন্যস্মা ইতি হেতুমন্নিগদো ন মুখ্যার্থঃ কিন্তু স্তুতিপরো নিন্দাপরো বেত্যুক্তম্। হেতুমন্নিগদাধিকরণ-মুখ্যার্থত্বে তু দেবশ্রাদ্ধমপি পিত্রর্থেন হবিষা ন স্যাৎ। কেচিৎ তু অথোপবীতী সোমং পিতৃমন্তমগ্নিং কব্যবাহ-নঞ্চ যজেতেতি লিখিতসূত্রবলাৎ সোমপূর্ব্বাহুতিদ্বয়ে উপবীতিত্বং অগ্নিপূর্ব্বাহুতিত্রয়পক্ষে প্রাচীনাবীতিত্বমিতি ব্যবস্থামাহুঃ। তদসঙ্গতম্। সোমপূর্ব্বাহুতিদ্বয়পক্ষ এব প্রাচীনাবীতিত্বদর্শনাৎ। যথা শৌনকঃ। প্রাচীনাবী-তীধ্মমুপসমাধায় মেক্ষণেনাবদায় অবদানসম্পদা জুহুয়াৎ সোমায় পিতৃমতে স্বধা নমঃ অগ্নয়ে কব্যবাহনায় স্বধা নম ইতি। কিঞ্চ অগ্নিপূর্ব্বাহুতিত্রয়পক্ষ এব উপবীতিত্বং দৃশ্যতে। যথা মৎস্যপুরাণে। অগ্নেঃ সোমযমাভ্যাঞ্চ কুর্য্যা-দাপ্যায়নং বুধঃ। ইত্যভিধায়। যজ্ঞোপবীতী নির্ব্বর্ত্য ততঃ পর্য্যুক্ষণাদিকম্। প্রাচীনাবীতিনা কার্য্যমতঃ সর্ব্বং বিজানতা॥ বিকল্পোঽয়ং শাখাভেদব্যবস্থিত ইতি কল্প-

ইতি সিদ্ধম্। অগ্নৌকরণমিত্যত্র। আমশ্রাদ্ধং যদা কুর্য্যাৎ বিধিজ্ঞঃ শ্রাদ্ধদঃ সুতঃ। হস্তেঽগ্নৌকরণং কুর্য্যাদ্‌ব্রাহ্মণস্য বিশেষতঃ। অগ্নৌ-করণশেষন্তু পিত্রে তু প্রতিপাদয়েৎ॥ ইত্যাদিনানাবচনস্বরসাদগ্নৌকরণ-শব্দস্য শ্রাদ্ধাঙ্গহোমার্থতা। তেনাগ্নৌ বিপ্রপাণ্যাদাবপি সর্ব্বত্র হোমে-ঽগ্নৌকরণং করিষ্যে ইত্যাদিপ্রয়োগঃ। শ্রীদত্তানিরুদ্ধভট্টাদিভিরপ্যেবং-বিধপ্রয়োগো লিখিতঃ। পর্য্যুক্ষণমিত্যাদিকমিত্যাদিনা হোমান্তকর্ম্ম-পরিগ্রহঃ। আবৃৎ পরিপাটীতয়া সর্ব্বমনুক্রমেৎ তৎপরিপাটীক্রমেণ কুর্য্যাদিত্যর্থঃ। অদৃষ্টার্থং স্যাদিতি। অন্যাবাহনস্যান্যহোমার্থত্বা-সম্ভবেন অদৃষ্টার্থত্বমেব তদ্বাচ্যম্। তথাচ সতি কল্পনাগৌরবং স্যাদিতি

তরুপ্রভৃতয়ঃ। বস্তুতস্তু পিতৃকৃত্যত্বং দেবকৃত্যত্বং চ দ্বয়মপি বচনস্বরসাদবগম্যতে অত ইচ্ছাবিকল্পঃ। যথা শ্রুতিঃ। অগ্নৌকরণে প্রাচীনাবীতী ভূত্বেত্যাদি। তথা মনুঃ। অপসব্যমগ্নৌ হুত্বা সর্ব্বমাবৃৎ পরিক্রমং। অপসব্যেন হস্তেন নির্ব্বপেদুদকং ভুবি॥ যমঃ। পিতৄনাবাহয়িষ্যামীত্যুক্ত্বা তু প্রাঞ্জলিঃ শুচিঃ। যে মামকা ইতি পুনঃ সম্যগাবাহয়েৎ পিতৄন্। ততঃ সংস্তীর্য্য দর্ভাণাং প্রস্তরং দক্ষিণামুখঃ। শঙ্খলিখিতৌ। সঘৃতমন্নমনুজ্ঞাপ্য দর্ভৈর্দ্দক্ষিণাগ্রৈরগ্নিং পরিস্তীর্য্য জুহুয়াৎ। ব্রহ্মপুরাণে। ঘৃতাক্তসমিধো হুত্বা দক্ষিণাগ্রাঃ সমন্ত্রিকাঃ। তথা। পলাশঃ সমিদর্থে তু নিযোজ্যঃ পিতৃকর্ম্মণি। ইত্যাদি। শৌনকঃ। প্রাচীনাবীতীধ্মুপসমাধায়েত্যাদি। এষু বচনেষু প্রাচীনাবীতিত্বপিত্রাবাহনদক্ষিণামুখত্বদক্ষিণাগ্রকুশাস্তরণদক্ষিণাগ্রসমিদ্দানপিতৃকর্ম্মশব্দনির্দ্দেশাঃ পিতৃকর্ম্মচিহ্নান্যবগম্যন্তে। পূর্ব্বোক্তমধ্যন্দিনশ্রুতিবৈজবাপগৃহ্যমৎস্যপুরাণস্বরসাৎ দক্ষিণোপবীতিত্বং গোভিলস্বরসাচ্চ। যথাগ্নৌকরণানন্তরং গোভিলঃ। অত ঊর্দ্ধং

---

ভাবঃ। নন্নু হোমস্য দেবতার্থত্বে নিরূপ্য হবিরন্যস্মা ইতি হেতুমন্নিগদবিরোধ ইত্যত আহ নিরূপ্যেতি। ন মুখ্যার্থ ইতি। ন মুখ্যার্থপরঃ কিন্তু ক্বচিৎ স্তুতিপরঃ ক্বচিচ্চ নিন্দাপর ইত্যর্থঃ। এবঞ্চোক্তহেতুমন্নিগদস্য তাৎপর্য্যাভাবান্ন মুখ্যার্থবোধকত্বং অতো ন বিরোধঃ। পরন্তুসতি বিশেষবচনে নির্ব্বাপহোময়োঃ সমানোদ্দেশ্যকত্ববৈপরীত্যনিন্দাপরত্বমেব। ইহ তু বৈজবাপাদিবিশেষবচনমেবাস্তীতি ভাবঃ। হেতুমন্নিগদাধিকরণ ইতি। শূর্পেণ জুহোতি তেন হ্যন্নং ক্রিয়তে ইত্যত্র তেন

প্রাচীনাবীতিনা বাগ্‌যতেন কৃত্যং অগ্নৌকরণাদূর্দ্ধং প্রাচীনাবীতিত্বমভিদধৎ পূর্ব্বমুপবীতিত্বং দর্শয়তি। অতঃ শ্রুত্যো-র্ব্বিরোধে দ্বয়োরেব ধর্ম্মত্বাদিচ্ছাবিকল্পঃ। অতএব মনুঃ। শ্রুতিদ্বৈধন্তু যত্র স্যাত্তত্র ধর্ম্মাবুভৌ স্মৃতৌ। উভাবপি হিতৌ ধর্ম্মৌ সম্যগুক্তৌ মণীষিভিঃ॥ তথোক্তস্মৃতীনামপি তুল্যবলত্বে বিরোধাদ্বিকল্পঃ। তথা চ গৌতমঃ। তুল্যবলবিরোধে বিকল্পঃ একেনৈব মুনিনা ছন্দোগপরিশিষ্টকৃতা দ্বয়োরপি স্বহস্তিতত্বাৎ। ননু গোভিলেন সূত্রকৃতা উপবীতিত্বমাত্রাভিধানাত্তদ্বিরোধান্ন পরিশিষ্টস্বরসাদ্বিকল্পঃ। উচ্যতে। অত ঊর্দ্ধং প্রাচীনাবীতিনেত্যভিধানাদুপরিষ্টাদগ্নৌকরণেঽনিয়মোঽবগম্যতে ইতি ভট্টভাষ্যব্যাখ্যানাৎ অয়মেবানিয়মঃ সূত্রস্বরসসিদ্ধোঽব্যক্তো ব্যক্তীকৃতঃ পরিশিষ্টকৃতেতি সর্ব্বমনাকুলমিতি॥১২০॥

হীতি হেতুমন্নিগদস্য মুখ্যার্থত্বেঽন্নকরণত্বস্য হেতোর্দ্দর্ব্ব্যাদাবপি সত্ত্বেন তেনাপি হোমপ্রসঙ্গ ইত্যতো হেতুমন্নিগদো ন মুখ্যার্থ ইতি তত্রোক্তত্বাদিতি ভাবঃ। মুখ্যার্থত্বে বাধকমপ্যাহ মুখ্যার্থত্বে ত্বিতি। পিত্রর্থনিরুপ্তহুতশেষেণ দেবশ্রাদ্ধমপি ন স্যাদিত্যর্থঃ। সোমপূর্ব্বাহুতিদ্বয়ে ইতি। সোমায় পিতৃমতে স্বাহা অগ্নয়ে কব্যবাহনায় স্বাহেত্যাহুতিদ্বয়ে ইত্যর্থঃ। অগ্নিপূর্ব্বাহুতিত্রয়পক্ষেঽগ্নিসোমায় স্বাহেতি। ইধ্মমিতি। ইধ্মাখ্যং সমিদ্বিশেষং উপসমাধায়াগ্নৌ প্রক্ষিপ্য মেক্ষণেন চরুমবদায়াবদানসম্পদা সাজ্যেন গৃহীতচরুখণ্ডেন জুহুয়াদিত্যর্থঃ। আবৃৎ পরিক্রমমিতি পরিপাটীক্রমমিত্যর্থঃ। সঘৃতমন্নমিতি। সঘৃতমিত্যনেন ব্যঞ্জনব্যুদাসঃ। অতএব বিষ্ণুপুরাণম্। জুহুয়াদ্ব্যঞ্জনক্ষারবর্জ্জমন্নং ততোঽনলে ইতি। একেনৈবেতি। এতেন ইচ্ছাবিকল্পেঽষ্টদোষপাতাৎ

অথ হুতশেষদানম্। দৈবে পাত্রেঽপি হুতশেষং দেয়ম্। হুতশেষং প্রদদ্যাৎ তু ভাজনেষু সমাহিতঃ। হুতশেষং দত্ত্বা পাত্রমালভ্য জপতীত্যাদি যাজ্ঞবল্ক্যকাত্যায়নাদিভিঃ সামান্যেনাভিধানাৎ। ন তু। যত্র যৎ ক্রিয়তে কর্ম্ম পৈতৃকে ব্রাহ্মণান্ প্রতি। তৎ সর্ব্বং তত্র কর্ত্তব্যং বৈশ্বদেবান্যপূর্ব্বকম্ ॥ ইতি দেবলবচনাৎ দেবপাত্রেঽপি তদ্দেয়মিতি সমাধানং যুক্তং এতস্য প্রাপ্তয়োঃ ক্রমমাত্রপরত্বাৎ অন্যথা দৈবে পিণ্ডপ্রাপ্তিরপি স্যাৎ। অত্র কেচিৎ। অগ্নৌকরণশেষন্তু পিত্রে তু প্রতিপাদয়েৎ। প্রতিপাদ্য পিতৃণান্তু ন দদ্যাদ্বৈশ্বদেবিকে ॥ ইতি যমবচনাৎ দৈবে হুতশেষং ন দেয়মিত্যাহুঃ। তদসৎ এতস্য ক্রমবিশেষনিষেধপরত্বাৎ ক্রমান্তরেণ তু দানমনিষিদ্ধমেব অন্যথা প্রতিপাদ্যেতি বিশেষণবৈয়র্থ্যাপত্তেঃ। কিঞ্চ নায়ং হুতশেষনিষেধবিধিঃ শাস্ত্রতঃ প্রাপ্ত্যপ্রাপ্তিবিকল্পাভ্যাং গতার্থত্বাৎ। বৈশ্বদেবেতরস্মিন্ হুতশেষং দেয়মিতি পর্য্যুদাস এবায়মিতি চেন্ন সামান্যপ্রাপ্তে হি পর্য্যুদাসবিধিঃ যজতিষু যেযজামহং কুর্য্যান্নানুযাজেষ্বিতি-

---

শাখিভেদেন ব্যবস্থিতবিকল্প এবেতি কেনচিদুক্তং নিরস্তম্। সূত্রকৃতেতি উপজীব্যেন ইতি শেষঃ। তদ্বিরোধাদিতি। অত ঊর্দ্ধং প্রাচীনাবীতিনা বাগ্যতেন কার্য্যমিত্যনেনাগ্নৌকরণাদূর্দ্ধং প্রাচীনাবীতিত্বাভিধানাৎ অগ্নৌকরণে তেনোপবীতিত্বপ্রতিপাদনাৎ তদ্বিরোধাদিত্যর্থঃ ॥ ১২০ ॥

অথ হুতশেষদানমিতি। সামান্যেনাভিধানাদিতি। ভাজনত্বাদিসামান্যরূপেণৈবাভিধানাদিত্যর্থঃ। অন্যথা দৈব ইতি। পিত্রে যৎ যৎ কর্ত্তব্যং তস্য তস্য বৈশ্বদেবে প্রাক্কর্ত্তব্যত্বাভিধায়কত্বে ইত্যর্থঃ।

বৎ ইহ তু পিত্র্যে স্থিতি বিশেষত এব প্রাপ্তেঃ অন্যথানু-বাদাপত্তেঃ। ক্রমপর্য্যুদাসস্তু যুক্তঃ স্ববাক্যে পিত্র্যে স্থিতি দৈবপিত্র্যহুতশেষদানয়োঃ সামান্যক্রমাপ্রাপ্তেঃ। পিত্র্যেঽপীতি পাঠেঽপিশব্দো দৈবপরিগ্রহার্থো জ্ঞেয়ঃ পিতৃপদেনৈব মাতামহাদীনাং সংগ্রহণাৎ বিপ্রপাণাবগ্নৌকরণপক্ষে তৎপাত্রে হুতশেষং ন দেয়ম্। যথা ছন্দোগপরিশিষ্টম্। পিত্র্যে যঃ পঙ্‌ক্তিমূর্দ্ধন্যস্তস্য পাণাবনগ্নিমান্। হুত্বা মন্ত্রবদন্যেষাং তূষ্ণীং পাত্রেষু নিক্ষিপেৎ॥ অত্রান্যেষামিতি গ্রহণাৎ॥ ১২১॥

অথান্নাদি সঙ্কল্পবাক্যম্। তত্র শাঙ্খ্যায়নসূত্রম্।

অন্যথা দৈবে তদ্দাননিষেধকল্পে। ননু পিতৄণাং প্রতিপাদ্য হুত্বা হুতশেষং পিত্র্যে পাত্রে প্রতিপাদয়েদিত্যর্থো বাচ্য ইত্যত আহ কিঞ্চেতি। প্রাপ্ত্যপ্রাপ্তিভ্যাং ইতি। প্রাপ্তস্য নিষেধে প্রাপকবিধিবিরোধঃ। অপ্রাপ্তস্য নিষেধে বৈয়র্থ্যমিতি। উভয়থৈব গতার্থত্বাৎ তন্নিষেধবিধ্যসম্ভবাদিত্যর্থঃ। অন্যথেতি। বিশেষপ্রাপ্তাবপি পর্য্যুদাসাভ্যুপগমে বিশেষবিধিবলাদেবার্থসিদ্ধস্য তদিতরপর্য্যুদাসস্যানুবাদত্বেন বৈয়র্থ্যাপত্তেরিত্যর্থঃ। ক্রমপর্য্যুদাসেতি। পিত্রাদিক্রমেতরক্রমেণ দদ্যাদিতি ক্রমপর্য্যুদাসঃ। ননু পূর্ব্বার্দ্ধে পিতৃমাত্রপ্রাপ্তেঃ কথং সামান্যক্রমপ্রাপ্তিরিত্যত আহ স্ববাক্যে ইতি সামান্যক্রমপ্রাপ্তেরিতি। তথাচ দৈবে নিষেধানুপপত্ত্যা পিত্রে স্থিতি তুশব্দোঽপ্যর্থো দেবপরিগ্রহার্থঃ তেন যুগপদুভয়দানাসম্ভবাৎ দেবক্রমপিতৃক্রমত্বৌদাসীন্যেন সামান্যক্রমমাত্রপ্রাপ্তিরিতি ভাবঃ। অন্যেষামিতি। পাত্রালম্ভস্য তত্রাপ্যস্ত্যেব স্থালীস্থান্নস্যাপি হুতশেষত্বেন নামৃতেঽমৃতং জুহোমীতি মন্ত্রলিঙ্গবিরোধঃ হুতশেষনিষেধস্তু হোমার্থপৃথক্‌কৃতহুতশেষনিষেধবিষয়োঽন্যথা তৎপাত্রে স্থালীস্থান্নদানানুপপত্তেরিতি বোধ্যম্॥ ১২১॥

অন্নঞ্চাসাবেতত্ত ইত্যনুদ্দিশ্য ভোজয়েৎ। কাত্যায়নঃ। অসাবেষ তেঽর্ঘ ইতি। পিণ্ডপিতৃযজ্ঞাধিকারে স এব। যথাবানক্তং পিণ্ডান্ দদ্যাদসাবেতত্ত ইতি। অসাবিতি সম্বোধনান্তনাম্নোপলক্ষণম্। তথা গোভিলঃ। অসাবেষ তে পিণ্ডো যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধেতি। অসাবেতত্তে তিলোদকম্ অসাবেতত্তে সূত্রমিত্যাদি স্বধান্তম্। ব্রহ্মপুরাণে। ততো মধুঘৃতাক্তন্ত সোষ্ণমন্নং তিলান্বিতম্। গৃহীত্বা দেবতীর্থেন প্রণবেনৈব তৎ পুনঃ॥ এতদ্বো হ্যন্নমিত্যুক্ত্বা বিশ্বেদেবাংশ্চ সংযজেৎ। পিতৃভ্যস্ত ততো দদ্যাদন্নমামন্ত্রণে ন তু॥ অমুকামুকগোত্রৈতৎ তুভ্যমন্নং স্বধা নমঃ। নম ইতি স্ত্রীশূদ্রবিষয়ম্। এতেনামুক সগোত্র পিতরমুকদেবশর্ম্মন্নেতত্তেঽন্নং স্বধেতি যজুর্ব্বেদিনামুৎসর্গবাক্যম্। অমুক সগোত্র পিতরমুকদে-

---

অথান্নাদি সঙ্কল্পবাক্যম্। অনুদ্দিশ্য নির্দ্দিশ্য এষ তেঽর্ঘ ইত্যত্র বাজসনেয়িনামর্ঘশব্দো নির্যকারঃ পুংলিঙ্গঃ এতৎকাত্যায়নবচনাৎ। সামগানাস্ত সযকারো নপুংসকলিঙ্গঃ এতত্তেঽর্ঘ্যমিতি গোভিলাৎ। পিণ্ডং দদ্যাদসাবেতত্তে ইতি অত্র বাক্যরচনাবিধৌ এতদিতি নপুংসকলিঙ্গনির্দ্দেশাৎ বাজসনেয়িনাং নপুংসকলিঙ্গঃ পিণ্ডশব্দঃ। অতস্ত্রীংস্ত্রীন্ পিণ্ডান্ দদ্যাদিতি পারস্করদর্শনাৎ পুংলিঙ্গঃ পিণ্ডশব্দো বাজসনেয়িনামিতি মৈথিলানাং ভ্রম এব। সামগানাস্ত এষ তে পিণ্ড ইতি গোভিলাৎ পুংলিঙ্গ এব পিণ্ডশব্দ ইতি। সম্বোধনান্তোপলক্ষণমিতি। গোত্রসম্বন্ধনাম্নাং সম্বোধনান্তানামুপলক্ষণমিত্যর্থঃ। এষ তে পিণ্ড ইত্যত্র এষ তে পদদ্বয়ং বাচনিকম্। তত্র চৈকস্যাদৃষ্টার্থত্বমিতি প্রাঞ্চঃ। অন্যে তু এষ তে পিণ্ড ইতি লৌকিকাভিলাপঃ। যে চাত্র ত্বামিতি তু বৈদিকঃ লৌকিকবৈদিকয়োশ্চান্বয়াযোগাদুভয়ত্রৈব তেপদং বাচ্যং ইত্যাহুঃ। তদসৎ আকা-

বশর্ম্মন্নেতত্তেঽন্নং যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে স্বধেতি ছন্দোগানাম্। অমুক সগোত্র পিতরমুকদেবশর্ম্মন্নেতদন্নং তুভ্যং স্বধেতি সামান্যধর্ম্মঃ। পৌরাণিকত্বাৎ পুরাণকাত্যায়নয়োরেকবাক্যতয়া এতত্তেঽন্নং তুভ্যং স্বধেতি বাক্যকল্পনা ন প্রামাণিকী দ্বয়োরেব নিরাকাঙ্ক্ষত্বাৎ। তে তুভ্যমিতি পদয়োঃ পর্য্যায়য়োর্যুগপৎপ্রয়োগানর্থক্যাচ্চ। শূদ্রেণ তু বিশেষতঃ পৌরাণিক এব বিধিঃ কর্ত্তব্যঃ। যথা ভবিষ্যপুরাণে। ব্রাহ্মণাদিষু বর্ণেষু ত্রিষু বেদাঃ প্রতিষ্ঠিতাঃ। মন্বাদীনি চ শাস্ত্রাণি তথাঙ্গানি সমন্ততঃ॥ শূদ্রাশ্চেমে ভৃশং দীনাঃ প্রতিভান্তি মম দ্বিজ। কশ্চৈষামাগমঃ প্রোক্তঃ পরো দ্বিজ মণীষিভিঃ॥ ত্রিবর্গপ্রাপ্তয়ে ব্রহ্মন্ শ্রেয়সে চ তথোভয়োঃ॥ সুমন্তুরুবাচ। সাধু সাধু মহাবাহো শৃণু মে পরমং বচঃ। চতুর্ণামপি বর্ণানাং যানি প্রোক্তানি শ্রেয়সে॥

---

ঙ্ক্ষাদিসত্ত্বে লৌকিকবৈদিকয়োরন্বয়ে বাধকাভাবাৎ। অন্যথাত্রৈব কথং যে চাত্র ত্বামিতি মন্ত্রপ্রবিষ্টেন স্বধাশব্দেন এষ পিণ্ড ইত্যস্যান্বয়ঃ। অতএব বাচস্পতিমিশ্রেণ অদ্যেত্যাদি রুদ্রদৈবতং বৃষমিতি লৌকিকেন এনং যুবানং পতিং বো দদানীতি বৈদিকেন চ মিলিত্বা বৃষোৎসর্গাভিলাপ উক্ত ইতি। নব্যাস্তু যে চ ত্বামনু লক্ষীকৃত্য তিষ্ঠন্তি যাংশ্চানু লক্ষীকৃত্য ত্বং তিষ্ঠসি তস্মৈ সর্ব্বস্মৈ তে তুভ্যঞ্চ এষ তে ত্বদর্থকল্পিতঃ পিণ্ডঃ স্বধা ইতি সন্দংশবাক্যার্থে তে পদদ্বয়ার্থো নানুপপন্ন ইতি সমাদধুঃ। তিলান্বিতমিতি। দৈবে যববিকরণনিয়মাৎ তিলান্বিতমিতি শাখান্তরীয়মিতি শ্রাদ্ধচিন্তামণিঃ। এতত্ত্ব ইতি চতুর্থ্যন্তপদেন বিশ্বেদেবা ইতি সম্বোধনপদাক্ষেপ ইতি সম্প্রদায়ঃ। তন্ন তথা সতি দানেঽপি তুভ্যং সম্প্রদদে ইতি চতুর্থ্যন্তপদাৎ সম্বোধনপদাক্ষেপাপত্তেঃ। বস্তুতঃ সাংখ্যায়নেনা-

ধর্ম্মশাস্ত্রাণি রাজেন্দ্র শৃণু তানি নৃপোত্তম। বিশেষতস্তু শূদ্রাণাং পাবনানি মণীষিভিঃ ॥ অষ্টাদশ পুরাণানি চরিতং রাঘবস্য চ। রামস্য কুরুশার্দ্দূল ধর্ম্মকামার্থসিদ্ধয়ে ॥ যথোক্তং ভারতং বীর পারাশর্য্যেণ ধীমতা। বেদার্থং সকলং যোজ্যং ধর্ম্মশাস্ত্রাণি চ প্রভো ॥ নন্থ গোত্রসম্বন্ধনাম্নাং ক্রমনিয়মো নিষ্প্রমাণকঃ। প্রত্যুতানিয়মেন প্রয়োগো মুনীনাং দৃশ্যতে। তথা বিষ্ণুঃ। নামগোত্রাভ্যামুদঙ্মুখেষু। ব্রহ্মপুরাণে। অমুকামুকগোত্রৈতৎ তুভ্যমন্নং স্বধা নমঃ। তথা। প্রদক্ষিণঞ্চ নৈনিজ্যাদ্গোত্রনামানুমন্ত্রিতম্। ছন্দোগপরিশিষ্টম্। গোত্রনামভিরামন্ত্র্য পিতৄনর্ঘ্যং প্রদাপয়েৎ। সম্বন্ধার্পকপদপ্রয়োগোঽপ্যপ্রামাণিকঃ। উচ্যতে। গোত্রসম্বন্ধয়োর্নাম বিশেষণত্বাৎ বিশেষণবিশেষ্যক্রমস্য নাগৃহীতবিশেষণন্যায়লব্ধত্বাৎ গোত্রসম্বন্ধয়োঃ ক্রমনিয়মঃ কৃত ইতি চেৎ ন গোত্রসম্বন্ধোল্লেখস্য গোভিলাদিবচনসিদ্ধত্বে তৎক্রমস্য তৎপাঠক্রমসিদ্ধত্বাৎ। যথা গোভিলঃ। গোত্রং স্বরান্তং সর্ব্বত্র

---

সাবেতত্তে ইতি সামান্যাভিধানাৎ তুল্যন্যায়াচ্চ। দেবপক্ষেঽপি অভিলাপে সম্বোধনপদলাভঃ। অমুকামুক ইতি এতেন প্রত্যেকরূপেণ পিত্রাদিত্রীনুদ্দিশ্য তন্ত্রেণোৎসর্গঃ ন তু পিতৃভ্য ইতি দর্শনাৎ সাহিত্যভ্রমঃ কার্য্যঃ প্রাগেব বিবৃতমেতৎ; স্ত্রীশূদ্রবিষয়মিতি। বিষয়ভেদেন ব্যবস্থাসম্ভবেঽদৃষ্টার্থমেকত্র তুল্যার্থকপদদ্বয়প্রয়োগকল্পনায়াঃ ব্যাব্যর্থত্বাদিতি ভাবঃ। অতএব গোভিলাদৌ স্বধাপদমাত্রোক্তিঃ। সামান্যধর্ম্ম ইতি। সর্ব্বশাখিগোচর একপ্রকারোঽভিলাপ ইত্যর্থঃ। তেন সামগানামপি যে চাত্র ত্বেতি পাঠঃ। অতএব বক্ষ্যতি। একা শ্রুতিঃ সর্ব্বশাখিসাধা-

গোত্রস্যাক্ষয্যকর্ম্মণি। গোত্রস্তু তর্পণে প্রোক্তঃ কর্ত্ত-এবং ন মুহ্যতি॥ সর্ব্বত্রৈব পিতঃ প্রোক্তং পিতা তর্পণ-কর্ম্মণি। পিতুরক্ষয্যকালে তু অক্ষয্যাং তৃপ্তিমিচ্ছতা॥ শর্ম্মন্নর্ঘাদিকে কার্য্যে শর্ম্মা তর্পণকর্ম্মণি। শর্ম্মণোঽক্ষয্য-কালে তু পিতৄণাং দত্তমক্ষয়ম্॥ তথা পারস্করপ্রচেতো-নাম্নো বচনদ্বয়ং পঠ্যতে। অর্ঘদানেঽন্নসঙ্কল্পে পিণ্ডদানে তথাক্ষয়ে। গোত্রসম্বন্ধনামানি যথাবৎ প্রতিপাদয়েৎ॥ গোত্রসম্বন্ধনামানি পিতৄণামনুকীর্ত্তয়ন্। একৈকস্য তু বিপ্রস্য অর্ঘ্যপাত্রং বিনিক্ষিপেৎ॥ পিণ্ডদানে শঙ্খলিখিতৌ। সব্যেন পাণিনা দক্ষিণং পাণিমুপসমাধায় একৈকং ত্রিভি-রামন্ত্র্যাসাবেতত্ত ইতি ত্রিভির্গোত্রসম্বন্ধনামভিঃ তদেবং পূর্ব্বোক্তশাঙ্খ্যায়নাদিবচনৈঃ শ্রাদ্ধে দৈবপিত্র্যোৎসর্গ-

---

রণীতি কিন্তু গোভিলোক্তাভিলাপ এব তেষাং তৎপাঠ ইতি প্রতি-পাদিতম্। অত্র মৈথিলাঃ গোভিলেনার্ঘ্যগন্ধাদ্যন্নাবনেজনপিণ্ডসূত্র-দানেষু ষট্স্বেব বিশিষ্য মন্ত্রাভিধানাৎ আসনান্নোৎসর্গয়োর্ব্বৈ চাত্র ত্বেতি মন্ত্রো নাস্তীতি প্রাহুঃ। একত্রৈব তৎপ্রয়োগে তন্মাত্র এব তৎ-প্রয়োগো নান্যত্রেতি ভ্রমনিরাসায় নানাস্থানেঽর্ঘ্যাদৌ গোভিলেন তন্মন্ত্র-নির্দ্দেশঃ প্রদর্শনার্থঃ এব কৃতঃ তেনাসনোৎসর্গাদাবপি তন্মন্ত্রপাঠঃ। শ্রুত-ক্রমত্যাগঃ ছন্দোগানাং এব দ্বিবিধাভিলাপমূলশ্রুতিদ্বয়কল্পনাগৌরবং স্যাদিতি গৌড়াঃ। অত্র কাত্যায়নগোভিলব্রহ্মপুরাণাদিষু সর্ব্বত্রৈত-চ্ছব্দানন্তরং দেয়দ্রব্যনির্দ্দেশাৎ প্রাক্ তে তুভ্যং পদয়োর্দর্শনাদে-তদন্নং তুভ্যং স্বধেত্যাদিপ্রয়োগঃ। শ্রুতক্রমত্যাগস্যান্যায্যত্বাৎ অতএব নৈতৎপদস্থানে ইদংশব্দপ্রয়োগোঽপীতি বোধ্যম্। ননু যথা ছন্দো-গানামভিলাপে তে পদদ্বয়োপপত্তিস্তথা তে তুভ্যং পদয়োরপ্যুপপত্তির্ভ-বিষ্যতি ইত্যাহ তে তুভ্যমিতি। সামগানান্তু গোভিলোক্তস্বাদনায়ত্যা-

বাক্যে সম্বোধনান্তপদোপাত্তয়োর্দ্দৈবপিত্রোশ্চতুর্থ্যন্তেন নির্দ্দেশ ইত্যেকৈব শ্রুতিঃ সর্ব্বশাখিসাধারণী কল্পনীয়া। অপরো বিশেষঃ শাখিভেদব্যবস্থিত ইতি প্রাগুক্তম্। অক্ষয্যদানে ষষ্ঠ্যন্ততামাহ গোভিলঃ। শর্ম্মণোঽক্ষয্যকালে ত্বিতি। ছন্দোগপরিশিষ্টম্। অক্ষয্যোদকদানন্তু অর্ঘদানবদিষ্যতে। ষষ্ঠ্যৈব নিত্যং তৎ কুর্য্যান্ন চতুর্থ্যা কদাচন॥ অর্ঘ্যদানবদিতি জ্যেষ্ঠোত্তরকরত্বমতিদিশ্যতে। নন্বু চতুর্থ্যন্তবাক্যমাহ বিষ্ণুঃ। নমো বিশ্বেভ্যো দেবেভ্যা ইত্যনুমাদৌ প্রাঙ্মুখয়োর্নিবেদয়েৎ পিত্রে পিতামহায় প্রপিতামহায় চ নামগোত্রাভ্যামুদঙ্মুখেষু ন পূর্ব্বোক্তা-

হদৃষ্টার্থমেব তথা প্রয়োগ ইতি ভাবঃ। আগমঃ শাস্ত্রম্। বেদার্থো ধর্ম্মশাস্ত্রাণি চ তদর্থাংশ্চ সংযোজ্য ভবেৎ তদযুক্তমিত্যর্থঃ। ক্রমনিয়ম ইতি। গোত্রপদনির্দ্দেশানন্তরং সম্বন্ধিবাচকপিত্রাদিপদনির্দ্দেশোঽনন্তরং নামনির্দ্দেশ ইতি ক্রমো নিষ্প্রমাণক ইত্যর্থঃ। নাগৃহীতবিশেষণেতি ন্যায়াৎ বিশিষ্টবুদ্ধৌ বিশেষণজ্ঞানং প্রাগপেক্ষিতং তদর্থং বিশেষণপদস্য প্রাঙ্নির্দ্দেশ ইত্যর্থঃ। স্বরান্তমিতি। সম্বোধনান্তমিত্যর্থঃ। শর্ম্মেতি। শর্ম্মশাতসুখানি চ ইত্যনেন নপুংসকত্বেঽপি পুংলিঙ্গপ্রয়োগশ্ছান্দসঃ। অপরো বিশেষঃ শাখিভেদেনার্ঘপিণ্ডশব্দয়োর্লিঙ্গভেদঃ গোভিলোক্তাভিলাপে গোভিলীয়ানাং যে চাত্র ত্বেতি পাঠ ইত্যাদিরূপবিশেষঃ। ষষ্ঠ্যৈব নিত্যমিতি। ন কেবলং পার্ব্বণে কিন্তু নান্দীমুখেঽপীতি নিত্যপদলভ্যোঽর্থঃ। এতচ্চ গোভিলীয়ানামেব। বাজসনেয়িনান্তু পার্ব্বণে ষষ্ঠ্যন্ততা নান্দীমুখে প্রথমান্ততা পারস্করেণ তথাবিধানাৎ। ন চতুর্থ্যা কদাচনেত্যনেন চতুর্থীযুক্তঃ যে চাত্র ত্বেতি মন্ত্রনিষেধঃ। অন্যথা ষষ্ঠ্যৈব ইত্যনেনৈব তন্নিষেধসিদ্ধেবৈয়র্থ্যাপাতাৎ। জ্যেষ্ঠোত্তরকরত্বমিতি। যথাঽন্যেষাং করোপরিস্থিতে পঙ্‌ক্তিশ্রেষ্ঠে-

নেকবচনবিরোধান্নম ইতি বিশ্বেভ্যো দেবেভ্যো নিবেদয়েদিতি ভিন্নক্রমেণ যোজনা কার্য্যা। অন্যথা নমো বিশ্বেভ্যো দেবেভ্য ইত্যপি ক্রমঃ স্যাৎ। কিঞ্চ পিত্রে পিতামহায় প্রপিতামহায় চ নিবেদয়েদিতি সম্বন্ধেন চতুর্থ্যন্ততা লভ্যতে। বিশ্বেভ্যো দেবেভ্য ইত্যস্যাপি নিবেদয়েদিত্যনেন সম্বন্ধঃ। ননু সমানং গোত্রমস্যেতি সগোত্রপদব্যুৎপত্তৌ প্রকৃতে অর্থসঙ্গতির্ন স্যাৎ ন সগোত্রপদস্য গোত্রপর্য্যায়ত্বাৎ। যথা মহাভারতে মোক্ষধর্ম্মে। পরাশরসগোত্রস্য বৃদ্ধস্য সুমহাত্মনঃ। ভিক্ষোঃ পঞ্চশিখস্যাহং শিষ্যঃ পরমধার্ম্মিকঃ॥ যাজ্ঞবল্ক্যঃ। সমামাস তদর্দ্ধাহো নামজাতিসগোত্রকৈঃ। সব্রহ্মচারিকাত্মীয়পিতৃনামাদিচিহ্নিতম্॥ লেখ্যং কুর্য্যাদিতি সম্বন্ধঃ। অতো গোত্রসগোত্রয়োর্ব্বিকল্পঃ॥ ১২২॥

---

ব্রাহ্মণস্য করেঽর্ঘ্যপ্রক্ষেপস্তথাক্ষয্যোদকপ্রক্ষেপেঽপীত্যর্থঃ। এতদ্বোঽন্নং নম ইত্যাদি ন বাক্যং কিন্তু বিষ্ণুবচনে নমঃপদস্য প্রাঙ্নির্দ্দেশাৎ। এতদন্নং নমো ব ইত্যাদি চতুর্থ্যন্তপদান্তমেব তদিত্যাশঙ্কতে নন্বিতি। ভিন্নক্রমেণেতি। ইতিপদস্য নমঃপদানন্তরং দেবেভ্য ইত্যনন্তরং নিবেদয়েদিতি ক্রমেণেত্যর্থঃ। অন্যথা উক্তক্রমস্য বিবক্ষিতত্বে ক্রমঃ স্যাদিতি। তথা সতি এতদ্বো হ্যন্নমিত্যুক্ত্বেতি ব্রহ্মপুরাণবিরোধঃ নোক্তঃ স্যাদিতি। ক্রমস্য বিবক্ষিতত্বমিতি ভাবঃ। বিশ্বেভ্যো দেবেভ্য ইত্যস্য নিবেদয়েদিত্যনেন সহ সম্বন্ধে যুক্ত্যন্তরমাহ কিঞ্চেতি। নিবেদয়তি নাসম্বন্ধ ইতি সাহচর্য্যাদিতি শেষঃ। নন্বিতি। কাশ্যপগোত্র ইত্যাদৌ কাশ্যপো গোত্রমাদিপুরুষো যস্য স কাশ্যপগোত্র ইত্যর্থসঙ্গতিঃ স্যাৎ। কাশ্যপসগোত্র ইত্যাদৌ কাশ্যপঃ সগোত্রং যস্যেত্যর্থঃ স্যাৎ কাশ্যপস্য চ গোত্রত্বাভাবাৎ তস্য গোত্রান্তরসত্ত্বেঽপি কাশ্যপসন্তানস্য তদ্দোষত্বাভাবাৎ উক্তার্থসঙ্গ-

অথ ব্রাহ্মণভোজনপিণ্ডদানয়োঃ প্রাধান্যবিচারঃ। ইদমত্র বিচার্য্যং কিং ব্রাহ্মণভোজনং প্রধানম্ উত পিণ্ডদানম্ উভয়ং বা। তত্র ব্রাহ্মণভোজনং প্রধানমিতি গোবিন্দরাজঃ। ফলশ্রুতেঃ। ফলবৎসন্নিধাবফলং তদঙ্গমিতি ন্যায়াৎ পিণ্ডদানমঙ্গম্। যথা মনুঃ। একৈকমপি বিদ্বাংসং দৈবে পিত্রে চ ভোজয়েৎ। পুষ্কলং ফলমাপ্নোতি নামন্ত্রজ্ঞান্ বহূনপি॥ পিণ্ডদানান্তরেণাপি মঘাদৌ শ্রাদ্ধদর্শনাচ্চ গয়াদৌ পিণ্ডদানমাত্রদর্শনাৎ পিণ্ডদানং প্রধানমিত্যপরঃ। তথাহ্যশক্তৌ পিণ্ডদানমাত্রমাহ নিগমঃ। আহি-

তির্ন স্যাদিত্যর্থঃ। লেখ্যমিতি। ঋণাদিবিষয়ে ঋণগ্রহণসম্বন্ধিবৎসরমাসপক্ষতিথ্যুত্তমর্ণাধমর্ণনামজাতিগোত্রসহাধ্যায়িব্রহ্মচারিণামপি পিতৃনামচিহ্নিতং লেখ্যং কুর্য্যাদিত্যর্থঃ। বিকল্প ইতি। বস্তুতো গোত্রং স্বরান্তং সর্ব্বত্রেতি গোত্রনামানুমন্ত্রিতামতি। গোত্রনামানুবাদাদীত্যাদিষু সর্ব্বত্র মুনীনাং গোত্রপদমাত্রপ্রয়োগাৎ তৎপদান্তর্ভাবেনৈব শ্রুতেঃ কল্পনীয়তয়া শ্রাদ্ধীয়াভিলাপে গোত্রপদস্যৈব নির্দ্দেশঃ কার্য্যো ন সগোত্রপদস্য বিকল্পস্তু শ্রাদ্ধাতিরিক্তবিষয় এবেতি বোধ্যম্॥ ১২২॥

অথ ব্রাহ্মণভোজনেতি। অত্র ভোজনপদং করণসাধনাৎ ব্রাহ্মণস্য ভোজনং যস্মাদিতি বহুব্রীহ্যাশ্রয়ণাদ্ধেতুভূতান্নোৎসর্গপরং ত্যাগস্যৈব শ্রাদ্ধতয়া প্রাক্প্রতিপাদিতত্বাৎ। অতএব কুশময়ব্রাহ্মণপক্ষে ব্রাহ্মণভোজনাভাবেঽপি শ্রাদ্ধত্বসিদ্ধিঃ। ফলবৎসন্নিধাবিতি। ফলং স্বর্গাদি তদ্বৎ তজ্জনকং প্রধানমিত্যর্থঃ। তস্য সন্নিধৌ তৎ কথং স্যাদিত্যাকাঙ্ক্ষায়াং সত্যাং অফলং যৎ কর্ম্ম তত্তদঙ্গমিত্যর্থঃ। অতএবোক্তম্। অবিচ্ছিন্নে কথম্ভাবে যৎ প্রধানস্য পঠ্যতে। অবিজ্ঞাতফলং কর্ম্ম তস্য প্রকরণাঙ্গতা॥ ইতি। অস্যার্থঃ। প্রধানস্য কর্ম্মণঃ কথম্ভাবে কথং স্যাদিত্যাকাঙ্ক্ষায়ামনিবৃত্তায়াং অবিজ্ঞাতফলং অশ্রুতফলং যৎ

তাগ্নেঃ পিত্রর্চ্চনং পিণ্ডৈরেব ভীষ্মস্য পিণ্ডদানে শান্তনো-রুত্তানকরদর্শনাচ্চ উভয়মুক্তেরুভয়ং প্রধানমিতি ভট্টনা-রায়ণপ্রভৃতয়ঃ। তথা চ শ্লোকাঃ। প্রাধান্যং পিণ্ডদানস্য কেচিদাহুর্ম্মনীষিণঃ। গয়াদৌ পিণ্ডদানস্য স্মর্য্যমাণস্য দর্শ-নাৎ॥ শ্রুতৌ চ পিণ্ডদানস্য কেবলস্য বিধানতঃ। ভীষ্মস্য দদতঃ পিণ্ডান্ হস্তোত্তানশ্রুতেরপি॥ ভোজনস্য প্রধানত্বং বদন্ত্যন্যে মনীষিণঃ। ব্রাহ্মণানাং পরীক্ষায়াং মহাযত্নস্য দর্শনাৎ॥ মহাফলবিধিশ্চৈব পঙ্‌ক্তিপাবনভোজনাৎ। অপঙ্‌ক্ত্যভোজনে দাতুর্ম্মহানর্থপ্রদর্শনাৎ॥ আমশ্রাদ্ধবিধা-

কর্ম্ম পঠ্যতে কথ্যতে তস্য প্রকরণবলাৎ তৎপ্রধানাঙ্গতেতি। ন চ যস্য পর্ণময়ী জুহূর্ভবতি ন স পাপশ্লোকং শৃণোতি গোদোহেনাপঃ প্রণয়েৎ পশুকাম ইত্যাদ্যুক্তপর্ণজুহূগোদোহকরণকাপঃপ্রণয়নাদ্যঙ্গে-ঽব্যাপ্তিঃ ফলশ্রুতিসত্ত্বেনাফলত্বাভাবাদিতি বাচ্যং। অফলপদেন প্রধানজন্যফলাজনকত্বস্যৈব বিবক্ষিতত্বাৎ। যত্র যত্র চাঙ্গে ফল-শ্রুতিরস্তি তত্র তত্তদঙ্গসহিতপ্রধানস্যৈব তৎফলজনকত্বেন প্রধানাজন্য-ত্বাভাবাৎ। অন্যথা তত্তদঙ্গনিষ্পত্তৌ দৈবাৎ প্রধানানিষ্পত্তাবপি তত্তৎ-ফলোদয়প্রসঙ্গাৎ শিখাবন্ধনোপবীতধারণাদীনাং প্রাধান্যেঽপ্যাঙ্গত্বাব্যব-হারো গৌণ ইতি সম্প্রদায়ঃ। বস্তুতস্তু প্রধানশিখাবন্ধনাৎ অঙ্গশিখা-বন্ধনং পৃথগেব কিন্ত্বঙ্গীভূতশিখাবন্ধনে কৃতে প্রসঙ্গাৎ প্রধানশিখাবন্ধন-সিদ্ধিঃ স্নানাঙ্গতর্পণাৎ প্রধানতর্পণসিদ্ধিবদিতি বাচ্যং। উক্তানাস্তু ফলবত্ত্বাৎ স্বর্গাদিরূপতত্তৎফলজনকানাং প্রধানকর্ম্মণাং যাগাদীনাং যঃ সন্নিধিঃ তত্তৎফলজননে ব্যাপারঃ পরমাপূর্ব্বরূপঃ। তজ্জনকত্বে সতি নিমিত্তসপ্তম্যা জনকত্বলাভাৎ। অফলং স্বর্গাদিরূপমুখ্যফলাজনকত্বম্। তথাচ তজ্জন্যপরমাপূর্ব্বজনকত্বে সতি তজ্জন্যমুখ্যফলাজনকত্বং তদঙ্গত্ব-মিতি পর্য্যবসিতম্। ন চাঙ্গস্য ফলাজনকত্বে তত্র প্রবৃত্ত্যনুপপত্তিঃ

নস্য বিনা পিণ্ডৈঃ ক্রিয়াবিধেঃ। তদালভ্যাপ্যনধ্যায় ইত্যেবং শ্রবণাদপি ॥ বিধিদ্বৈধমুপাদায় সমত্বে তন্মতং পুনঃ। প্রাধান্যমুভয়োর্যস্মাত্তস্মাদেষ সমুচ্চয়ঃ ॥ বস্তুতস্তু। যদ্যপি অগ্নৌহুতেন দেবস্থাঃ পিতৃস্থা দ্বিজতর্পণৈঃ। নরকস্থাশ্চ তৃপ্যন্তি পিণ্ডৈর্দাতুস্ত্রিভির্ভুবি ॥ ইতি বচনাৎ ব্রাহ্মণভোজনপিণ্ডদানয়োঃ ফলশ্রুতের্দ্বয়োরেব প্রাধান্যং যুজ্যতে। যদ্যপি চ নিমিত্ততো ব্রাহ্মণভোজনস্য পিণ্ডদানস্য চানমুষ্ঠানেঽপি চ তয়োঃ প্রাধান্যং নানুপপন্নমসোমযাজি-

প্রবর্ত্তকেষ্টসাধনতা জ্ঞানবিরহাদিতি বাচ্যম্। ফলজনকত্বেন পরমাপূর্ব্বস্যাপীষ্টতয়া তৎসাধনতাজ্ঞানাদেব তত্র প্রবৃত্ত্যুপপত্তেঃ। অতএব যাগে রাগাদঙ্গে বৈধীতিসিদ্ধান্তঃ। অস্যার্থঃ। রাগঃ স্বর্গাদিফলেচ্ছাধীনযাগে প্রবৃত্তির্বৈধী বিধিরপূর্ব্বং তদিচ্ছায়া অঙ্গে প্রবৃত্তিরিতি। নচ প্রায়শ্চিত্তাঙ্গেঽব্যাপ্তিঃ প্রায়শ্চিত্তস্য সাক্ষাদেব পাপনাশহেতুতয়া তত্র পরমাপূর্ব্ববিরহাদিতি বাচ্যং কাম্যস্থলে লিঙঃ কার্য্যশক্তিকল্পনাবশ্যকত্বে বাচকশব্দসদ্ভাবাৎ প্রায়শ্চিত্তেঽপি তদাবশ্যকত্বাৎ নিত্যনিষেধাপূর্ব্ববৎ। অতএবোক্তং কাম্যে ক্লৃপ্তশক্তিলিঙাদিনিত্যে নিষেধে চাপূর্ব্বকল্পনাৎ প্রায়শ্চিত্তস্য চ নিত্যত্বং নির্ব্বিবাদমেবেতি। উদীচ্যাঙ্গদক্ষিণাদানাদিবিলম্বেন কার্য্যবিলম্বাৎ সাক্ষাৎ পাপনাশং প্রতি হেতুত্বাসম্ভবাচ্চেতি ব্যাচখ্যুঃ। তদসৎ প্রকৃত্যর্থগতনিমিত্ততায়া এব সর্ব্বত্র নিমিত্তসপ্তমীবাধ্যত্বেন প্রকৃত্যর্থনিরূপিতান্যনিষ্ঠনিমিত্ততায়া নিমিত্তসপ্তম্যাভিধাতুমশক্যত্বাৎ। শ্রাদ্ধে ফলশ্রুতিং দর্শয়তি। যথা মনুরিতি। মঘাদাবিত্যাদিপদাৎ নিত্যশ্রাদ্ধপরিগ্রহঃ। গয়াদাবিত্যাদিনা তীর্থশ্রাদ্ধাশক্তেন কর্ত্তব্যস্য তীর্থে পিণ্ডদানমাত্রস্য পরিগ্রহঃ। অন্যত্রাপি কেবলং পিণ্ডদানং দর্শয়তি যথাশক্ত্যাবপি। আহিতাগ্নেরিতি নিরগ্নেস্তু তত্রাপি ব্রাহ্মণভোজনমাত্রমেবেতি বোধ্যম্। স্মর্য্যমাণস্য স্মৃত্যুক্তস্য আমশ্রাদ্ধ-

পক্ষে দধিপয়োয়াগবৎ। তথাপি। নিত্যশ্রাদ্ধমদৈবং স্যা-
দর্ঘ্যপিণ্ডবিবর্জ্জিতম্। ইতি। তত্রাপি মহতী পূজা কর্ত্ত-
ব্যা পিতৃদৈবতে। ঋক্ষে পিণ্ডপ্রদানন্তু জ্যেষ্ঠপুত্রী বিব-
র্জ্জয়েৎ॥ ইতি হারীতদেবীপুরাণবচনাভ্যাং পিণ্ডদান-
নিষেধোঽবগম্যতে। ন চাপ্রাপ্তস্য নিষেধো ঘটতে। ন
চাতিদেশমন্তরেণ প্রাপ্তিরস্তি। অতিদেশশ্চাঙ্গত্বে যুজ্যতে
ন তু প্রাধান্যে প্রধানেন প্রধানস্যানতিদেশাৎ উপকার-
কত্বেনৈবাতিদেশস্য সপ্তমাধ্যায়ে দর্শিতত্বাৎ। অতো

বিধানস্যেতি। যদ্যপি আমশ্রাদ্ধেঽপি তেনাগ্নৌকরণং কুর্য্যাৎ পিণ্ডাং-
স্তেনৈব নির্ব্বপেদিতি পিণ্ডদানমস্তি তথাপি অশক্তাবামশ্রাদ্ধস্য বিধে-
য়স্য পিণ্ডৈর্ব্বিনা ক্রিয়াবিধের্দর্শনাৎ ইতি পূর্ব্বোক্তেনান্বিতোঽর্থঃ।
তথাচ নিত্যস্য কর্ম্মণো যথাশক্ত্যুপদেশাদঙ্গবাধেঽপি প্রধানস্যাবশ্য-
মনুষ্ঠেয়ত্বস্যোক্ত্যা প্রকৃতে শ্রাদ্ধস্য প্রাধান্যসিদ্ধিঃ পিণ্ডদানস্যাঙ্গত্বসিদ্ধি-
শ্চেতি ভাবঃ। বস্তুতস্তু। আমশ্রাদ্ধং যদা কুর্য্যাৎ বিধিজ্ঞঃ শ্রাদ্ধদঃ সুতঃ।
তেনাগ্নৌকরণং কুর্য্যাৎ পিণ্ডাংস্তেনৈব নির্ব্বপেৎ॥ ইত্যত্রৈব শ্রাদ্ধাৎ
পৃথক্ত্বেন পুনঃপিণ্ডদানাভিধানাদন্নোৎসর্গস্য শ্রাদ্ধপদার্থত্বেন শ্রাদ্ধপ্রা-
ধান্যসিদ্ধিরিতি বক্তুরাশয়ঃ। তদালভ্যেতি। শ্রাদ্ধীয়দ্রব্যমালভ্য স্বীকৃ-
ত্যানধ্যায়স্য শ্রবণাদপীত্যর্থঃ। ভট্টনারায়ণস্য। দেবস্থা দেবলোকস্থাঃ
পিতৃস্থাঃ পিতৃলোকস্থাঃ ফলশ্রুতিরিতি এতেন পিণ্ডদানস্য ফলাভাবাদ-
ঙ্গত্বসিদ্ধিরিতি গোবিন্দরাজোক্তমশুদ্ধমিতি প্রতিপন্নম্। নিমিত্তত ইতি।
গয়াদিনিমিত্তেন ব্রাহ্মণভোজনস্যাননুষ্ঠানে মঘাদিনিমিত্তেন পিণ্ডদানান-
নুষ্ঠানেঽপি শ্রাদ্ধসিদ্ধের্দ্বয়োরেব প্রামাণ্যং নানুপপন্নমুপপন্নমেবেত্যর্থঃ।
অসোমযাজীতি। অসোমযাজিনং পুরোডাশেনৈব যাজয়েদিতি শ্রুত্যা
দর্শপৌর্ণমাসয়োরসোমযাজিপক্ষে দধিপয়সোরননুষ্ঠানেঽপি সোমযাজি-
পক্ষে তয়োরনুষ্ঠানাৎ প্রাধান্যং নানুপপন্নং যথেত্যর্থঃ। তেন কিন্নিত্য-

ব্রাহ্মণভোজনং প্রধানম্ অঙ্গং পিণ্ডদানম্ অঙ্গেষু ফলশ্রুতিরর্থবাদ এব পিণ্ডদানমাত্রবিধিস্ত্বঙ্গভূতপিণ্ডদানাৎ কর্ম্মান্তরমেব প্রকরণান্তরন্যায়াদিতি সিদ্ধম্॥ ১২৩॥

অথ শ্রাদ্ধশেষভোজনম্। দেবলঃ। পশ্চাৎ স্বয়ঞ্চ পত্নীভিঃ পিণ্ডশেষমুদাহরেৎ। উদাহরেদভ্যবহরেৎ। উশনাঃ। তৈরনুজ্ঞাতঃ পিণ্ডশেষমিষ্টেভ্যো দদ্যাৎ স্বয়ং বা ভুঞ্জীত। বাশব্দঃ সমুচ্চয়ে। যাজ্ঞবল্ক্যঃ। প্রদক্ষিণমনুব্রজ্য ভুঞ্জীত পিতৃসেবিতম্। ননু পিতৃসেবিতং ভুঞ্জী-

---

ত্যাহ ন চাপ্রাপ্তস্যেতি। প্রাপ্তং হি প্রতিষিধ্যতে ইতি ন্যায়াদিতি ভাবঃ। অতিদেশশ্চেতি। উপকারকত্বেনৈবেতি। কিং কেন কথং কুর্য্যাদিত্যাদ্যুপকারকাকাঙ্ক্ষায়ামিতিকর্ত্তব্যতাকাঙ্ক্ষায়ামেব ইদং কৃত্বা তদ্বৎ কুর্য্যাদিত্যতিদেশবিধেঃ প্রধানাবিষয়ত্বাৎ উপকারকত্বঞ্চাঙ্গমেব ইতি শেষঃ। ননু পিণ্ডদানস্যাঙ্গত্বে নরকস্থাশ্চ তৃপ্যন্তীতি প্রাগুক্তফলশ্রুতিরনুপপন্না ইত্যত আহ অঙ্গে ফলশ্রুতিরিতি। অর্থবাদ এবেতি। স্তুতিবাদ এবেত্যর্থঃ। বস্তুতো বাক্যবৈয়র্থ্যস্যান্যায্যত্বাৎ তত্তদঙ্গসহকৃততত্তৎপ্রধানস্যৈব তত্তদঙ্গোক্তং ফলং ইতি প্রাগুক্তং বেদিতব্যম্। কর্ম্মান্তরমেবেতি। প্রধানীভূতকর্ম্মান্তরমেব। ন ত্বঙ্গরূপপিণ্ডদানং তদিত্যর্থঃ॥ ১২৩॥

অথ শ্রাদ্ধশেষভোজনম্। সমুচ্চয় ইতি। শেষপ্রশ্নানন্তরং ইষ্টৈঃ সহ ভুঙ্ক্ষ্বেতি ব্রাহ্মণপ্রতিবচনস্য গরুড়পুরাণেঽভিহিতত্বাৎ তদেকবাক্যতয়া সমুচ্চয় এব বাশব্দার্থো ন তু বিকল্পোঽষ্টদোষগ্রাসাদিতি ভাবঃ। বিধিরত্যন্তেতি। অত্যন্তাপ্রাপ্তৌ শাস্ত্রতো রাগতো ন্যায়তশ্চাপ্রাপ্তৌ বিধিঃ। যথাহরহঃ সন্ধ্যামুপাসীতেতি অমাবাস্যায়াং পিতৃভ্যো দদ্যাদিত্যাদি। সন্ধ্যাবন্দনাদেরুক্তবিধ্যতিরিক্তশাস্ত্রাপ্রাপ্তত্বাৎ কষ্টং কর্ম্মেতি ন্যায়েন দ্বিষ্টতয়া রাগাভাবাৎ ন্যায়াসম্ভবাচ্চ। নিয়ম ইতি। পাক্ষিকে পক্ষত্বে রাগতঃ প্রাপ্তৌ রাগাভাবে চাপ্রাপ্তৌ নিয়মঃ রাগসত্ত্বা-

তেতি ন ভোজনস্বরূপবিধিঃ অপ্রাপ্তবিষয়ত্বাদ্বিধেঃ ভোজনস্য রাগপ্রাপ্তত্বাৎ। তথাচোক্তম্। বিধিরত্যন্তমপ্রাপ্তৌ নিয়মঃ পাক্ষিকে সতি। তত্র চান্যত্র চ প্রাপ্তৌ পরিসংখ্যেতি গীয়তে॥ ন চ পরিসংখ্যা বিধেয়া পিতৃসেবিতমেব ভুঞ্জীত নান্যদিত্যেবংলক্ষণা হি সা চ স্বার্থহান্যস্বার্থকল্পনারাগপ্রাপ্তভক্ষণবাধলক্ষণদোষত্রয়দুষ্টা ন চ নিয়মবিধিনাগতৌ সম্ভবন্ত্যাং দোষত্রয়মভ্যুপগন্তুং যুজ্যতে। অতএব ঋতুকালাভিগামী স্যাদিতি মনুবচনে নিয়মবিধিরুক্তঃ এবং পঞ্চনখপরিসংখ্যাপি ন স্যাদিতি চেন্ন। শ্বাবিধং শল্লকং গোধাং খড়্গকূর্ম্মশশাংস্তথা। ভক্ষ্যান্ পঞ্চনখে-

সত্ত্বয়োরবশ্যানুষ্ঠানার্থং নিয়মঃ। যথা ঋতৌ স্বদারান্ গচ্ছেৎ। পিতা পুত্রস্য জাতস্য পশ্যেচ্চ জীবতো মুখম্। ইত্যাদি ঋত্বভিগমনপুত্রমুখদর্শনাদীনাং সুখসাধনতয়া রাগাৎ প্রাপ্তত্বাৎ রাগাভাবে চাপ্রাপ্তত্বাৎ রাগস্য কাদাচিৎকত্বাৎ। তত্র চান্যত্র চেতি। রাগাধীনপ্রাপ্তৌ শাস্ত্রাধীনপ্রাপ্তৌ চ সত্যামিতরব্যবচ্ছেদফলিকা পরিসংখ্যা। যথা প্রোক্ষিতং ভুঞ্জীত। শশকঃ শল্লকী গোধা খড়্গী কূর্ম্মশ্চ পঞ্চমঃ। ভক্ষ্যান্ পঞ্চনখেষ্বাহুরিন্ত্যাদি প্রোক্ষিতমাংসভোজনস্য শশকাদিভক্ষণস্য চ। দেবান্ পিতৄন্ সমভ্যর্চ্চ্য খাদন্ মাংসং ন দোষভাক্। ইত্যাদিশাস্ত্রপ্রাপ্তত্বাৎ মাংসভোজনস্য সুখসাধনতয়া রাগতঃ প্রাপ্তত্বাচ্চ তেন প্রোক্ষিতং ভুঞ্জীত ইত্যাদেঃ প্রোক্ষিতান্যন্ন ভুঞ্জীত ইত্যাদিরর্থঃ। ন চ লক্ষণাবাক্যস্য বৈয়র্থ্যাপত্ত্যান্যার্থতাৎপর্য্যকত্বে সিদ্ধে তদন্যথানুপপত্ত্যা লক্ষণায়া অদোষত্বাৎ। অতএব দৃশদি তণ্ডুলানাবপতি ধান্যমসীতি অত্র বাক্যাবধৃততণ্ডুলপরত্বানুপপত্ত্যা ধান্যমসীতি মন্ত্রে ধান্যপদে তণ্ডুললক্ষণেতি ধান্যমস্যধিকরণেঽপ্যুক্তম্। সা চেতি। স্বার্থহানিঃ পিতৃসেবিতভোজনস্য স্বার্থস্য তাৎপর্য্যবিষয়ত্বাৎ হানিঃ। অস্বার্থস্য পিতৃসেবিতাতিরিক্তভোজন-

স্বাহুরনুষ্ট্রাংশ্চৈকতোদতঃ ॥ ইতি মনুবচনেন এতে ভক্ষ্যা ইত্যনেন বিধিসিদ্ধৌ যৎ পঞ্চনখগ্রহণং তৎ পরিসংখ্যার্থমুক্তং পঞ্চনখেম্বিতি নির্দ্ধারণসপ্তমীবলাচ্চ। অত্র তু পরিসংখ্যায়াঃ প্রমাণাভাবান্নিয়মবিধিঃ। পিতৃসেবিতং ভুঞ্জীতৈব ইত্যর্থঃ ॥ ১২৪ ॥

রূপস্য তাৎপর্য্যবিষয়ত্বাৎ। কল্পনং রাগপ্রাপ্তস্য পিতৃসেবিতাতিরিক্তভোজনস্য বাধ ইতি দোষত্রয়মিত্যর্থঃ। অগত্যা পরিসংখ্যৈব ইহ স্বীকার্য্যেত্যত্রাহ ন চেতি। এবমিতি। দোষত্রয়যুক্তত্বাদিত্যর্থঃ। বিধিসিদ্ধৌ এতে ভক্ষ্যা এবেতি বিধিসিদ্ধৌ যুক্তমিতি অন্যথা তদ্বৈয়র্থ্যং স্যাদিতি ভাবঃ। স্পষ্টহেত্বন্তরমাহ পঞ্চনখেম্বিতি। নির্দ্ধারণেতি। নির্দ্ধারণং হি সামান্যাদ্বিশেষস্য ক্রিয়াদিনা পৃথক্করণম্। তেনাত্র পঞ্চনখসামান্যান্তর্ব্বিশেষীভূতগোধাদীনাং ভক্ষ্যত্বেন পৃথক্করণং অতস্তদিতরপঞ্চনখসামান্যস্যাভক্ষ্যত্বং নির্দ্ধারণে সপ্তমীবললভ্যমিতি ভাবঃ। ইদঞ্চ প্রকৃতেঽস্তীতি কৃত্বাভিহিতং ন তু পরিসংখ্যায়াং নির্দ্ধারণসপ্তম্যাদেরপেক্ষণীয়মিতি বোধ্যম্। তথাচ প্রমাণসত্ত্বে দোষত্রয়দুষ্টাপি পরিসংখ্যা স্বীকরণীয়েতি ভাবঃ। যত্র চ পরিসংখ্যা প্রামাণিকী নিয়মনিয়ামককাস্তি তত্র স্বয়মেবাভ্যুপেয়তে। যথা যাজনাধ্যাপনপ্রতিগ্রহৈর্ব্রাহ্মণো ধনমর্জ্জয়েদিত্যাদিধনার্জ্জনস্য রাগারাগাভ্যাং পক্ষতঃ প্রাপ্তেরপ্রাপ্তেশ্চ নিয়মঃ স চ গৃহস্থো ব্রাহ্মণঃ যাজনাধ্যাপনপ্রতিগ্রহৈর্ধনমর্জ্জয়েদেব ইত্যেবংরূপঃ। অকৃত্বা ভৈক্ষ্যচরণমসমিধ্য চ পাবকম্। অনাতুরঃ সপ্তরাত্রমবকীর্ণিব্রতঞ্চরেৎ ॥ ইতি মনুনা ভৈক্ষ্যানাচরণে প্রায়শ্চিত্তবিধানাৎ। তথা যাজনাদিভিস্ত্রিভিরেব ধনমর্জ্জয়েৎ নান্যব্যাপারৈরিত্যেবংরূপা পরিসংখ্যাপি। যদ্গর্হিতেনার্জ্জয়তি কর্ম্মণা ব্রাহ্মণো ধনম্। তস্যোৎসর্গেণ শুধ্যেৎ তু দানেন তপসৈব বা ॥ ইতি মনুনা স্ববৃত্ত্যতিরিক্তবৃত্ত্যার্জ্জনে প্রায়শ্চিত্তকথনাদিতি। নিয়মোঽয়ং দৃষ্টার্থ এব অদৃষ্টার্থত্বে প্রমাণাভাবাৎ ॥ ১২৪ ॥

ন চ দৃষ্টার্থে কর্ম্মণি বচনশতেনাপি নিয়মো বোধয়িতুং শক্যতে। অতঃ শ্রাদ্ধাঙ্গতয়াঽদৃষ্টার্থোঽয়ং নিয়মঃ। তথাচোপবাসবাসরেঽপি শ্রাদ্ধকরণে শেষভোজনপ্রসঙ্গঃ। কিঞ্চামাবাস্যাষ্টকাদাবপি মাংসশেষভোজনমিষ্টং স্যাৎ। মাংসব্যতিরিক্তভোজনেঽপি শেষশব্দার্থাহানিরিতি চেন্ন সর্ব্বস্মাৎ গ্রাসাবরার্দ্ধমশ্নীয়াদিত্যাপস্তম্ববচনে বহুকৃৎস্ন-বাচিসর্ব্বশব্দশ্রুতেঃ। ইষ্যত এবেতি চেন্ন পর্ব্বণি তদ্ভক্ষণ-নিষেধাৎ। দৃষ্টার্থভক্ষণবিষয়ো নিষেধবিধির্ভবিষ্যতি। হিংসানিষেধ-বিধিরিবাদৃষ্টার্থযাগাদি-পশুহিংসাব্যতিরিক্ত-বিষয় ইতি চেন্ন যাবজ্জীবনিরামিষপ্রতিজ্ঞায়ামপি মাংস-শেষভক্ষণপ্রসঙ্গাৎ। কেন মাংসং ন দেয়মিতি চেন্ন মাংসা-ষ্টকায়াং মাংসস্য প্রাধান্যাত্তদসম্ভবাৎ। সাগ্নেরমাবাস্যা-

অতো নাস্য শ্রাদ্ধাঙ্গত্বমিত্যাশঙ্কামপনয়তি ন চেতি। বচনশতেনা-পীতি। দৃষ্টার্থস্যাননুষ্ঠানে প্রত্যবায়বিরহাৎ কেবলেচ্ছাধীনত্বেন তত্র বচনস্যাকিঞ্চিৎকরত্বাদিতি ভাবঃ। এবমুক্তনিয়মপক্ষঞ্চ দূষয়তি তদা চেতি। অবরার্দ্ধমিতি। অবরার্দ্ধং নিকৃষ্টাবধির্যস্য তাদৃশং তেন গ্রাসা-ন্যূনমিত্যর্থঃ। বহুকৃৎস্নবাচীতি। বহূনাং শ্রাদ্ধশেষদ্রব্যাণাং কৃৎস্নবাচী-ত্যর্থঃ। ইষ্যত এবেতি। অমাবাস্যাষ্টকাদৌ শ্রাদ্ধশেষমাংসভোজন-মিষ্যত এবেত্যর্থঃ। দৃষ্টার্থেতি। পর্ব্বণি মাংসভোজননিষেধবিধিরয়ং রাগপ্রাপ্তমাংসভক্ষণবিষয়ো ন ত্বদৃষ্টার্থশ্রাদ্ধশেষমাংসভক্ষণবিষয়ঃ। যথা মা হিংস্যাৎ সর্ব্বা ভূতানীতি। হিংসানিষেধবিধির্ন যাগাঙ্গঃ অদৃষ্টার্থকপশু-হিংসাবিষয়ঃ কিন্তু তদিতরহিংসাবিষয়ঃ সামান্যবিশেষন্যায়েন সামান্যস্য তদিতরবিশেষপরত্বেন সঙ্কোচাত্তদর্থেত্যর্থঃ। যাবজ্জীবেতি। অত্রাপি মাংসভোজনাভ্যুপগমে ব্রতভঙ্গপ্রসঙ্গ ইতি ভাবঃ। প্রাধান্যাদাবশ্য-কত্বাৎ। তদসম্ভবাৎ মাংসদানাসম্ভবাৎ। ননু অপি বা স্থালীপাকং

শ্রাদ্ধে তদামিষেণ কর্ত্তব্যমিতি মনুবচনাদ্দর্শে চৌপবসথিকমন্নং দম্পতী ভুঞ্জীয়াতামিতি গোভিলোক্তভোজনে নিয়মদর্শনাচ্চ। উচ্যতে। ভক্ষ্যং ভোজ্যং তথা পেয়ং যৎকিঞ্চিৎ পচ্যতে গৃহে। ন ভোক্তব্যং পিতৃণাং তদনিবেদ্যং কথঞ্চন॥ যৎকিঞ্চিৎ পচ্যতে গেহে ভক্ষ্যং ভোজ্যমথাপি বা। অনিবেদ্য ন ভুঞ্জীত পিণ্ডমূলে কথঞ্চন॥ ইতি যমশঙ্খাভ্যাং পিতৃসেবিতমেব ভুঞ্জীত ইত্যবগমাৎ তদেকবাক্যতয়া পরিসংখ্যাবিধিরয়ম্॥ ১২৫॥

নিয়মবিধৌ মূলভূতশ্রুতিভেদকল্পনাপ্রসঙ্গাৎ ক্রিয়ান্তরকল্পনাভিয়া গঙ্গাঘোষাদাবস্বার্থপরত্বস্য স্বার্থহানেশ্চ

কুর্ব্বীতেতি গোভিলেন মাংসাসম্ভবে স্থালীপাকস্যাপি বিধানাৎ কৃতভথাবিধপ্রজ্ঞেন স্থালীপাকেনৈবাষ্টকাশ্রাদ্ধং কর্ত্তব্যং ন মাংসেন ইত্যত আহ সাগ্নেরিতি। তথাচ মনুনা সাগ্নেরমাবাস্যাশ্রাদ্ধে মাংসদাননিয়মিতত্বে তদ্দানাবশ্যকত্বাদিত্যর্থঃ। ননু শেষভোজননিয়মঃ সাগ্নীতরপর এবাস্তু অতঃ কৃতসমাংসশ্রাদ্ধস্য সাগ্নেঃ শেষমাংসভোজনাভাবেঽপি ন ক্ষতিরত আহ দর্শে চেতি। ঔপবসথিকেতি। সংস্কৃতাগ্নিশালাসমীপং গৃহমুপবসথং তদ্ভবমন্নং অর্থাদ্দর্শশ্রাদ্ধশেষান্নম্। তথাচ সাগ্নেরপি শ্রাদ্ধশেষভোজনং মনুনা নিয়মিতং অতো ন শেষভোজননিয়মস্য সাগ্নীতরপরত্বসম্ভব ইতি কৃততাদৃশপ্রতিজ্ঞস্য সাগ্নেঃ শ্রাদ্ধশেষমাংসভক্ষণং নিয়মপক্ষে দুর্নিবারমেবেতি ভাবঃ। ভক্ষ্যং মোদকাদি ভোজ্যমন্নাদীতি মিশ্রাঃ। যমশঙ্খাভ্যামিতি। আভ্যাং পিতৃসেবিতাতিরিক্তভোজনস্য প্রতিপাদিতত্বাৎ ইতি ভাবঃ। এতদুভয়ৈকবাক্যতয়া ভুঞ্জীত পিতৃসেবিতমিত্যাপি পরিসংখ্যাবিধিরিত্যর্থঃ॥ ১২৫॥

ননু উক্তযমাদিবচনে স্ফুটমভিধানাৎ পরিসংখ্যাস্তু মনুবচনন্তু নিয়মপরমেব নিয়মসম্ভবে দোষত্রয়দুষ্টায়াঃ পরিসংখ্যায়া অনাশ্রয়ণীয়ত্বাদি-

দৃষ্টত্বাৎ। অতএব রাগপ্রাপ্তবাধেঽপি নাত্র দূষণং বচনান্তরেণাপি বোধিতত্বাৎ। প্রোক্ষিতং ভক্ষয়েন্মাংসমিতিবৎ তত্র হি। নাদ্যাদবিধিনা মাংসং বিধিজ্ঞো নাপদি দ্বিজঃ। ইতি বচনৈকবাক্যতয়া প্রোক্ষিতমেব মাংসং ভোজ্যং নান্যদিতি পরিসংখ্যোক্তা। অতএব স্বদারনিরতঃ সদেত্যপি পরদারান্ন গচ্ছেদিত্যেকবাক্যতয়া পরিসংখ্যোক্তা। অস্তু বা নিয়মবিধিঃ। তথাপি ভক্ষণস্যোপযুক্তশেষপ্রতিপত্তিরূপত্বাৎ। প্রতিপত্তেশ্চ সত্যেঽবশেষেঽঙ্গত্ববিধানাৎ। ততশ্চোপবাসবাসরে পর্ব্বণি চ যাবজ্জীবনিরামিষপ্রতিজ্ঞায়াং চোপবাসাদিধর্ম্মানুরোধাৎ অন্নমাংসাদীনাং তথোপযোগঃ ন কর্ত্তব্যঃ। যথা শ্রাদ্ধমিষ্টভোজ্যং নিষ্পাদ্যাপরং কিঞ্চিৎ ভক্ষণার্থং নাবশিষ্যতে। ভক্ষণরূপপ্রতিপত্ত্যনুরোধাৎ শেষমপি স্থাপ্যমিতি চেন্ন। ন হি প্রতিপত্তিঃ প্রতিপাদ্যং

---

ত্যত্রাহ নিয়মবিধাবিতি। মূলভূতেতি। যমবচনবলাৎ পরিসংখ্যাশ্রুতিকল্পনায়ামাবশ্যকত্বাৎ নিয়মস্যাভ্যুপগমে তন্মূলভূতনিয়মশ্রুত্যন্তরকল্পনাপ্রসঙ্গাদিত্যর্থঃ। বাক্যভেদভিয়া স্বার্থহান্যস্বার্থপরত্বাভ্যুপগমে দৃষ্টান্তমাহ ক্রিয়ান্তরেতি। অতএব বক্ষ্যমাণহেতোরেব। বচনান্তবেণৈবেতি। যমশঙ্খাদিবচনে নৈবেত্যর্থঃ। বোধিতত্বাদিতি। তথাচ তত্র শ্রুতিভেদকল্পনায়া আবশ্যকত্বমিতি ভাবঃ। বচনান্তরৈকবাক্যতয়া পরিসংখ্যাভ্যুপগমে দৃষ্টান্তমাহ প্রোক্ষিতমিতি। অত্র হি প্রোক্ষিতং ভক্ষয়েদিত্যত্র হি। নন্বু যমাদিবচনমপি শ্রাদ্ধদিনে কুটুম্বাদিভোজনার্থং পৃথক্ স্বং পঠ্যতে তস্য কিঞ্চিদ্ভাগং পিতৃভ্যোঽনিবেদ্য ন ভুঞ্জীতেতি রাগপ্রাপ্তভোজননিষেধ এব গেহ ইত্যুপাদানাৎ অন্যথা তদ্বৈয়র্থ্যাপাতাৎ তৎ কথমুক্তযুক্ত্যা পরিসংখ্যেত্যত আহ অস্তু বেতি। তথাপীতি। ন নিয়মপক্ষোক্তদোষ ইতি শেষঃ। দোষাভাবে হেতুমাহ ভক্ষণ-

প্রয়োজয়তি প্রতিপাদ্যগুণভূতত্বাৎ প্রতিপত্তের্গুণস্য চ প্রধানাপ্রয়োজকত্বাৎ। অত এবাগ্নীষোমীয়ে পশৌ শকৃন্নিরস্যতি লোহিতং নিরস্যতি গুদেনোপযজতীত্যাদীনাং উপযুক্তশেষপ্রতিপত্তিরূপাণাং দৈবাল্লোহিতাদীনাং বিনাশে লোহিতাদ্যর্থং পশ্বন্তরালম্ভনপ্রয়োজকত্বং নিরস্তম্। এবং ভক্ষণরূপস্যাঙ্গস্য হানিঃ স্যাদিতি চেন্ন যদিকারারোপেণাঙ্গত্ববোধনাৎ। যদ্যবশিষ্যেৎ তদা কিং কর্ত্তব্যমিত্যপেক্ষায়াং প্রতিপত্তিবিধানাৎ। ততশ্চ যদি রথন্তরসামা সোমঃ স্যাত্তদা ঐন্দ্রবায়ব্যান্ গ্রহান্ গৃহ্লীতেতিবন্নাঙ্গহানিঃ। যদিকারারোপেণ চ বিধানান্নিয়মবিধিরপ্যুপপন্ন ইতি ॥১২৬॥

---

স্যেতি। সত্যেব শেষে ইতি। শ্রাদ্ধশেষঃ কিং কর্ত্তব্য ইত্যাকাঙ্ক্ষায়ামেব ভুঞ্জীতৈবেতি বিধ্যুত্থানাৎ সতি শেষ এব ভোজনস্যাঙ্গত্বপ্রাপ্তেরিতি ভাবঃ। শেষাসত্ত্বে ভোজনাভাবো ন দোষায়েতি স্থিতে সত্যাহ ততশ্চেতি শেষসত্ত্ব এব ভোজনস্যাঙ্গত্বাচ্চেত্যর্থঃ। আশঙ্কতে ভক্ষণরূপেতি। প্রতিপাদ্যগুণভূতেতি সতি প্রতিপাদ্যে কিং কর্ত্তব্যমিত্যাকাঙ্ক্ষায়াং প্রতিপত্তিবিধানাৎ প্রতিপাদ্যাভাবে তদ্বিধেরপ্রবৃত্তিস্তত্র প্রতিপত্তেঃ প্রশক্ত্যভাবাদিতি ভাবঃ। অতএব প্রতিপত্তেঃ পতিপাদ্যাপ্রয়োজকত্বাদেব। শকৃৎ পুরীষম্। লোহিতং রক্তম্। উপযুক্তশেষেতি। যজ্ঞোপযুক্তাৎ শেষস্য প্রতিপত্তিরূপাণামঙ্গানাং লোহিতনিরাসাদীনাং দৈবাৎ প্রতিপাদ্যানাং লোহিতাদীনাং বিনাশে প্রতিপাদ্যীভূতলোহিতাদীনাং বিনাশে পশ্বন্তরালম্ভনপ্রয়োজকত্বং নিরস্তমিত্যর্থঃ। অন্যথা তত্রাপি প্রতিপত্তিরূপাঙ্গানুরোধাৎ লোহিতাদ্যর্থং পশ্বন্তরালম্ভনমপি স্যাদিতি ভাবঃ। যদি করোতি বিধৌ যদিকারোপাদানাদিত্যর্থঃ। যদি রথন্তরেতি। রথন্তরাখ্যং সাম গীয়তে যত্র তাদৃশঃ সোমযাগো যদি স্যাত্তদা ইন্দ্রবায়ুদেবতাকানি যজ্ঞপাত্রাণি হোমার্থং গৃহ্লীতেত্যর্থঃ। নাঙ্গহানিরিত্যত্র। যথা সোমস্যাতাদৃশত্বে ইন্দ্রবায়ুদেবতানাং গ্রহাণামনুপাদানে তেষাং ন সোমাঙ্গত্ব-

অথামশ্রাদ্ধম্। মৎস্যপুরাণে। আমশ্রাদ্ধং যদা কুর্য্যাদ্বিধিজ্ঞঃ শ্রাদ্ধদঃ সুতঃ। তেনাগ্নৌকরণং কুর্য্যাৎ পিণ্ডাংস্তেনৈব নির্ব্বপেৎ॥ তেনামান্নেনৈব ন তু পক্কান্নেন। নন্বামশ্রাদ্ধস্য তীর্থোপরাগাদিনিমিত্তেন বিধানাৎ আমান্নং পিণ্ডেঽপি প্রাপ্তং পিণ্ডদানস্যাপি শ্রাদ্ধত্বাৎ তেনৈবেত্যনর্থকম্। সর্ব্বস্মাৎ প্রকৃতাদন্নাৎ পিণ্ডান্মধুতিলান্বিতান্। ইত্যাদিবচনৈঃ প্রকৃতান্নপ্রাপ্তেশ্চ। ন যদেতদ্‌শক্তিপরম্ অতো ব্রাহ্মণভোজনার্থং প্রচুরতরান্নপাকাসমর্থেন পিণ্ডদানার্থমল্পপাকসমর্থেনাপি পাকাঙ্গাবাধায় পিণ্ডার্থং পাকো ন কর্ত্তব্য ইতি তাৎপর্য্যম্। আমশ্রাদ্ধং কদা কার্য্যমিত্যাহ উশনাঃ। আত্মনো দেশকালানাং বিপ্লবে সমুপস্থিতে। আমশ্রাদ্ধং দ্বিজৈঃ কার্য্যং শূদ্রেণ তু সদৈব হি॥ আত্মবিপ্লবঃ পাককারণাপাটবম্। দেশ-

---

হানিস্তদ্বদিত্যর্থঃ। ননু। দন্তধাবনতাম্বূলং তৈলাভ্যঙ্গমভোজনম্। ভুক্তিদ্বয়ং পরান্নঞ্চ শ্রাদ্ধকৃৎ পরিবর্জ্জয়েৎ॥ ইতি বচনাৎ শ্রাদ্ধদিনে নোপবাস ইতি বাচ্যং অত্রাভোজনপদস্য কামক্রোধাদিমূলকানিয়তোপবাসপরত্বাৎ নিত্যনৈমিত্তিকোপবাসস্য তু তত্তদ্বিধিতো বলবদনিষ্টাননুবন্ধীষ্টসাধনত্বাবগমেন তদ্বিরোধাৎ নিষেধেন তস্য বলবদনিষ্টানুবন্ধিত্বপ্রতিপাদনাসম্ভবাৎ। স্মার্ত্তাস্তত্র বিষয়ে। উপবাসো যদা নিত্যঃ শ্রাদ্ধং নৈমিত্তিকং ভবেৎ। উপবাসং তদা কুর্য্যাদাঘ্রায় পিতৃসেবিতম্॥ ইতি বচনং পঠন্তি॥ ১২৬॥

অথামশ্রাদ্ধম্। পিণ্ডদানস্যাপীতি। শ্রাদ্ধত্বাৎ শ্রাদ্ধাঙ্গত্বাৎ। নবঙ্গত্বেঽপি কথং তত্রামপ্রাপ্তির্ন হি শ্রাদ্ধাঙ্গস্য শ্রাদ্ধদ্রব্যকত্বনিয়মোঽস্ত্যাদৌ ব্যভিচারাদিত্যত আহ সর্ব্বস্মাদিতি। অথবা শ্রাদ্ধত্বাদিতি। যথা শ্রুত্যর্থকমেব পূর্ব্বোক্তযথাশ্রুতশ্রাদ্ধলক্ষণব্যাপনাদিত্যাশয়াৎ। নম্বন্ন-

বিপ্লবোঽত্তিবৃষ্ট্যাদিনা। কালবিপ্লবঃ পরচক্রাদিভয়েন পাককালাত্যয়ঃ। এতেন মুখ্যভূতশ্রাদ্ধানুরোধতয়াঙ্গভূতপাকবাধঃ প্রকৃতাবপি বচনাদিত্যুক্তম্। ব্যাসঃ। যদ্যদ্দদ্যাৎ তু বিপ্রেভ্যঃ শৃতং বা যদি বাশৃতম্। তেনাগ্নৌকরণং কুর্য্যাৎ পিণ্ডাংস্তেনৈব নির্ব্বপেৎ॥ আমশ্রাদ্ধং যদা কুর্য্যাদ্বিধিজ্ঞঃ শ্রাদ্ধদস্তথা। হস্তেঽগ্নৌকরণং কুর্য্যাৎ ব্রাহ্মণস্য বিধানতঃ॥ হস্তে বিপ্রহস্তে। এতচ্চ সাগ্নিকবিষয়ম্। নিরগ্নের্ব্বিপ্রপাণাবেব হোমস্য প্রাপ্তত্বাৎ। তথা মনুঃ। অগ্ন্যভাবে তু বিপ্রস্য পাণাবেব জলেঽপি বা। এতদশক্তাবামান্নবিধানমতিদিষ্টমপি একোদ্দিষ্টে ন কার্য্যমিত্যাহ লঘুহারীতঃ। শ্রাদ্ধবিঘ্নে দ্বিজাতীনামামশ্রাদ্ধং প্রকীর্ত্তিতম্। অমাবাস্যাদিনিয়তং মাসসংবৎসরাদৃতে॥ একোদ্দিষ্টন্তু কর্ত্তব্যং পাকেনৈব সদা স্বয়ম্। অভাবে পাকপাত্রাণাং তদহঃ সমুপোষণম্॥ অমাবাস্যাদিনিয়তং

দানমেব শ্রাদ্ধং পিণ্ডদানাদিকং ত্বঙ্গমেব ন শ্রাদ্ধমিতি নানাবচনার্থপর্য্যালোচনাসিদ্ধং গ্রন্থকৃদুক্তশ্রাদ্ধলক্ষণস্যাপি স এব তাৎপর্য্যার্থস্তৎ কথং শ্রাদ্ধত্বেন পিণ্ডে আমপ্রাপ্তিসম্ভব ইত্যত আহ সর্ব্বস্মাদিতি। প্রকৃতাবিতি। তথাচ প্রকৃতিবদ্বিকৃতিরিতি ন্যায়েন বিকৃতাবপ্যামান্নবিহিতে তীর্থশ্রাদ্ধাদৌ তৎপ্রাপ্তমিতি ভাবঃ। অশক্তিপরমিতি। অত্র মিশ্রাঃ আমস্য পক্কস্থানে বিধানাৎ আমশ্রাদ্ধে পক্কনিবৃত্তিঃ তেনামশ্রাদ্ধে মোদকাদি নিবৃত্তিরিত্যাহুঃ। তন্ন তীর্থশ্রাদ্ধে শক্ত্বাদিবিধানাৎ। যথা দেবীপুরাণে। তীর্থেষু ব্রাহ্মণং নৈব পক্কান্নেনোপযোজয়েৎ। শক্তুভিঃ পিণ্ডদানঞ্চ সংযাবৈঃ পায়সেন চ। কর্ত্তব্যমৃষিভির্দৃষ্টং পিণ্যাকেন গুড়েন চ॥ ইতি। এবঞ্চ আমশ্রাদ্ধে ন দদ্যাৎ তু পক্কান্নং ব্রাহ্মণেষ্বপি। ইত্যনেন পক্কান্নস্য ওদনস্যৈব নিষেধো ন তু মোদকাদেরতঃ শূদ্রেণাপি

প্রোষিতে সহচারিণী। পত্যৌ তু কারয়েন্নিত্যম্ অন্যে-নাপ্যৃত্বিগাদিনা॥ অমাবাস্যাদীত্যাদিশব্দঃ সমস্তপার্ব্বণকালপরঃ। মাসসংবৎসরাদিত্যেকোদ্দিষ্টমাত্রপ্রদর্শনার্থমিত্যাহ একোদ্দিষ্টমিত্যাদি। অত্রাবিশেষিতদ্বিজাতিগ্রহণাৎ ব্রাহ্মণক্ষত্রিয়বৈশ্যৈঃ সাগ্নিনিরগ্নিসাধারণৈর্ব্বিঘ্নং বিনা পাকাঙ্গমেব পার্ব্বণশ্রাদ্ধং কর্ত্তব্যমিতি প্রতীয়তে। হলায়ুধস্তু প্রচেতোবচনদর্শনাৎ সাগ্নিবিষয়মিদম্। নিরগ্নিনা তু সর্ব্বদামান্নেনৈব তৎ কর্ত্তব্যম্। যথা বৃহৎপ্রচেতাঃ। আপদ্যগ্নৌ তীর্থে চ চন্দ্রসূর্য্যগ্রহে তথা। আমশ্রাদ্ধং দ্বিজৈঃ কার্য্যং শূদ্রেণ তু সদৈব হি॥ অত্র হ্যনগ্নাবিতি অগ্ন্যভাবে আমান্নবিধিরবগম্যতে। ততশ্চ দ্বিজাতীনামিতি সাগ্নিপরত্বাৎ একোদ্দিষ্টং তু কর্ত্তব্যমিত্যপি সাগ্নিপর-

মোদকাদি দেয়মেব্। অতএব শ্রাদ্ধবিষয়ে সুমন্তঃ। গোরসঞ্চৈব শক্তূংশ্চ তিলপিণ্যাকমেব চ। অপূপান্ ভক্ষয়েচ্ছূদ্রো যচ্চান্যৎ পয়সা কৃতম্॥ ইতি। অতএব চ। কন্দুপক্কং স্নেহপক্কং পায়সং দধিশক্তবঃ। এতান্যশূদ্রান্নভুজো ভোজ্যানি মনুরব্রবীৎ॥ ইতি। হারীতেনাপি সামান্যত এবাভিহিতমিতি। নিরগ্নেরিতি। নিরগ্নেঃ সর্ব্বদৈব পাণিপ্রাপ্তেরামশ্রাদ্ধে হস্তবিধানস্য বৈয়র্থ্যাদিতি ভাবঃ। শ্রাদ্ধবিঘ্ন ইতি। বিঘ্নো-ঽত্র পাকস্য ন তু শ্রাদ্ধস্য আমশ্রাদ্ধবিধানাৎ। স চ আত্মনো দেশকালাদেরিত্যাহুশনসোক্তো বোধ্যঃ। শ্রাদ্ধং নিত্যং কাম্যঞ্চ তত্র কাম্যং তাবন্নামেন কার্য্যং সর্ব্বশক্ত্যধিকরণে সর্ব্বাঙ্গোপেতস্যৈব কাম্যস্য ফলজনকত্বব্যবস্থিতেঃ প্রতিনিধৌ চাঙ্গহানেরাবশ্যকত্বাৎ অত উক্তমমাবাস্যাদিনিয়তমিত্যর্থঃ। একোদ্দিষ্টমাত্রপ্রদর্শনার্থমিতি। তথাচ মাসপদং ন মাসিকমাত্রপরং কিন্তু প্রেতশ্রাদ্ধমাত্রোপলক্ষণমন্যথাদ্যষাণ্মাসিকশ্রাদ্ধানামসংগ্রহঃ স্যাদিতি ভাবঃ। অতএব হারীতেন একোদ্দিষ্টস্তু

মেব। নিরগ্নিনা তু পার্ব্বণমেকোদ্দিষ্টঞ্চামান্নেনৈব কর্ত্তব্যম্। সাগ্নিনা তু শক্তৌ পাকাঙ্গকমেব পার্ব্বণমেকো-দ্দিষ্টন্তু পাকেনৈবেতি। কল্পতরৌ তু পাকাঙ্গকং শ্রাদ্ধ-মুক্ত্বা। এতচ্চানুপনীতোঽপি কুর্য্যাৎ সর্ব্বেষু পর্ব্বসু। শ্রাদ্ধং সাধারণং নাম সর্ব্বকামফলপ্রদম্। ভার্য্যাবিরহি-তোঽপ্যেতৎ প্রবাসস্থোঽপি নিত্যশঃ। শূদ্রোঽপ্যমন্ত্র-বৎ কুর্য্যাদনেন বিধিনা বুধঃ॥ ইতি মৎস্যপুরাণবচনাদেত-চ্ছব্দাৎ প্রকৃতবাচিনঃ সন্নিহিতপাকাঙ্গশ্রাদ্ধপ্রতীতেঃ। অত্র চানুপনীতভার্য্যারহিতপ্রবাসস্থানামবিকারবোধনাৎ নিরগ্নিনাপি পাকাঙ্গমেব শ্রাদ্ধং কর্ত্তব্যম্॥ ১২৭॥

অনগ্নাবিতি। পাকসামর্থ্যাগ্ন্যভাবপরমিতি ব্যাখ্যা-

---

কর্ত্তব্যমিত্যনেন একোদ্দিষ্টসামান্যস্য পাকেনৈব কর্ত্তব্যতোক্তেতি ইত্যা-হেতি। অন্যথা মাসসাংবৎসরাদৃতে ইত্যনেনৈব তত্র পাকে সিদ্ধে একোদ্দিষ্টন্ত্বিত্যভিধানস্য পৌনরুক্ত্যাপত্তেরিতি ভাবঃ। একোদ্দিষ্টপদং যদ্যপি প্রেতশ্রাদ্ধমাত্রে শক্তং তথাপি অত্রাজহৎস্বার্থলক্ষণয়া সাংবৎ-সরিকপরমপি। অতএবামাবাস্যাদিমরণনিমিত্তকস্য সাগ্নিকর্ত্তব্যস্য চ বিকৃতপার্ব্বণস্য সংগ্রহঃ। সদা স্বয়মিতি। স্বয়মেবেত্যর্থঃ। পাকে-নৈবেতি। তেনৈকোদ্দিষ্টে আমান্নব্যবচ্ছেদঃ। পাকাঙ্গকশ্রাদ্ধং সাগ্নি-পরমেব। নিরগ্নিনা তু আমান্নেনৈব পার্ব্বণমেকোদ্দিষ্টঞ্চ কর্ত্তব্যমিতি হলায়ুধমতং দূষয়িতুমুত্থাপয়তি হলায়ুধস্ত্বিতি। ইদং একোদ্দিষ্টন্তু কর্ত্তব্যমিতি বচনম্। অগ্ন্যভাবে সংস্কৃতাগ্ন্যভাবে কর্ত্তুর্নিরগ্নিত্বে ইতি যাবৎ। ততশ্চেতি। নিরগ্নেঃ সর্ব্বদৈবামশ্রাদ্ধে লব্ধে সতীত্যর্থঃ। সন্নিহিতপাকাঙ্গকশ্রাদ্ধপ্রতীতের্নিরগ্নিনাপি পাকাঙ্গকমেব শ্রাদ্ধং কর্ত্তব্য-মিত্যন্বয়ঃ॥ ১২৭॥

পাকসামর্থ্যেতি। চাণ্ডালাগ্নেঃ সূতিকাগ্নেরমেধ্যাগ্নেশ্চ কর্হিচিৎ।

নং তদসঙ্গতম্ আপদীত্যনেনৈব লব্ধত্বাৎ অনগ্নাবিত্যর্থ-কতাপত্তেঃ। কিঞ্চ এতদিতি শ্রাদ্ধসমানাধিকরণতয়া পাক-পরত্বাভাবাৎ পাকস্য শ্রাদ্ধশব্দানর্থকত্বাৎ। বস্তুতস্তু বিঘ্নাদিনিমিত্তেনামশ্রাদ্ধং দ্বিজৈঃ কার্য্যমিত্যুশনোবচন-প্রচেতোবচনয়োঃ শ্রাদ্ধবিঘ্নে দ্বিজাতীনামিতি হারীত-বচনে চাবিশেষিতদ্বিজাতিগ্রহণাৎ। পাকাঙ্গশ্রাদ্ধমভিধায় অনেন বিধিনা শ্রাদ্ধং ত্রিরব্দস্যেহ নির্ব্বপেদিতি মৎস্যপু-রাণবচনাচ্চ নিরগ্নেরপি পাকাঙ্গমেব শ্রাদ্ধম্। অতএবানু-পনীতানাং সর্ব্বেষামেব পাকাঙ্গকশ্রাদ্ধপ্রাপ্তৌ শূদ্রস্যাপি পাকাঙ্গপ্রশক্তৌ তস্যৈব নিষেধো দর্শিতো মৎস্যপুরাণে। এবং শূদ্রোঽপি সামান্যং বৃদ্ধিশ্রাদ্ধঞ্চ সর্ব্বদা। নমস্কা-

পতিতাগ্নেশ্চিতাগ্নেশ্চ ন শিষ্টৈর্গ্রহণং স্মৃতম্॥ ইতি দেবলোক্তাগ্নি-পক্কভিন্নোঽগ্নিঃ পাকসমর্থ ইত্যর্থঃ। আপদীত্যনেনৈবেতি। সিদ্ধান্তে তু আপৎপদং ন পাকাপদমভিধত্তে কিন্তু পাকবিলম্বেন কালাত্যয়াদি-রূপশ্রাদ্ধপদমেবেতি এতৎশব্দাৎ প্রকৃতবাচিন ইতি যদুক্তং তদ্দূষয়তি কিঞ্চেতি। শ্রাদ্ধসমানাধিকরণতয়া শ্রাদ্ধমিতি শ্রাদ্ধমিতি পদসমানাধিক-রণতয়া অগ্নিশেষিতেতি সাগ্নিপরত্বে দ্বিজাতিপদস্য সঙ্কোচঃ স্যাদিতি ভাবঃ। অতএব শূদ্রেণ তু সদৈব হীত্যপি সঙ্গচ্ছতে। অন্যথা নিরগ্নিনা সদৈব হীতি সামান্যাভিধানমেব উচিতং স্যাদিতি। এবং শূদ্রেঽপীতি। সামান্যং যৎকিঞ্চিদ্দাশাহিকপিণ্ডদানদেবতানৈবেদ্যাদিকং বৃদ্ধিশ্রাদ্ধ-পদং শ্রাদ্ধমাত্রোপলক্ষণম্। অতএব নমস্কারেণেতি সার্থকমন্যথা বৃদ্ধি-শ্রাদ্ধে সর্ব্বেষামেব বর্ণানাং নমস্কারস্য প্রাপ্তত্বাৎ তদনর্থকং স্যাদিতি। সর্ব্বদা আপদ্যনাপদি চ। ন বিরোধ ইতি অনগ্নাবিত্যস্য ন বৈয়র্থ্য-মিত্যর্থঃ। যদ্যপি সামান্যবিশেষভাবে বিশেষবৈয়র্থ্যং তথাপি মৎস্য-পুরাণাৎ নিরগ্নেরপি পাকে নির্ণীতেঽন্যথানুপপত্ত্যা সামান্যবিশেষভাব

রেণ মন্ত্রেণ কুর্য্যাদামান্নবদ্বুধঃ ॥ প্রচেতোবচনে ত্বনগ্নি-শব্দঃ পাকসামগ্র্যভাবপরঃ। আপদীতি সম্ভবত্যপি পাকে কালাত্যয়াৎ শ্রাদ্ধপদমভিপন্তে অতো ন বিরোধঃ। এতেন নিরগ্নিনাপি বিম্বাদ্যভাবে পক্কান্নেনৈব পার্ব্বণমেকোদ্দিষ্টঞ্চ কর্ত্তব্যম্। শূদ্রেণ ত্বামান্নেনৈব দাশাহিকপিণ্ডদান-দেবতা নৈবেদ্যাদিকমপ্যামান্নেনৈব তুল্যন্যায়াৎ। আমং শূদ্রস্য পক্কান্নং পক্কমুচ্ছিষ্টমুচ্যতে। ইতি বচনাচ্চ। জাত-শ্রাদ্ধন্তু দ্বিজাতিনাপি আমান্নেনৈব কর্ত্তব্যম্। জাতশ্রাদ্ধে ন দদ্যাৎ তু পক্কান্নং ব্রাহ্মণেষ্বপীত্যাদিপুরাণবচনাৎ আম-শ্রাদ্ধমিতি সমাখ্যানাচ্চ। তথা বিষ্ণুঃ। আমশ্রাদ্ধেষু সর্ব্বেষু

---

এব নাস্য ইতি ভাবঃ। এবঞ্চেৎ কল্পতরুব্যাখ্যানমপি যুক্তমিতি প্রতি-ভাতি। আমং শূদ্রস্য পক্কান্নমিত্যত্র চ ষষ্ঠী সম্বন্ধার্থে। সম্বন্ধশ্চ দ্বিবিধঃ স্বামিত্বাখ্যঃ কর্ত্তৃত্বাখ্যশ্চ। তেন শূদ্রস্বামিকস্য ব্রাহ্মণেন পক্কস্য ব্রাহ্মণস্বামিকস্য চ শূদ্রেণ পক্কস্য দানাদিনিষেধ ইতি সম্প্রদায়ঃ। স্মার্ত্তাস্তু কর্ত্তৃত্বমেব ষষ্ঠ্যর্থঃ। তেন শূদ্রেণ পক্কস্যৈব নিষেধো ন তু শূদ্র-স্বামিকস্য ব্রাহ্মণদ্বারা পক্কস্যাপি। অতঃ শূদ্রস্বামিকস্যাপি ব্রাহ্মণেন পক্কস্য চরোরন্নাদেশ্চ বৃষোৎসর্গাদৌ হবনীয়তা দেবার্চ্চনাদৌ নৈবেদ্য-বিধয়া দেয়তা চ ইত্যাহুঃ। অত্র চ সহজকঠিনানামগ্নিতাপিতানাং ক্লিন্নত্বং পাকস্তদযুক্তং তেন লাজাদীনাং জলাদিসম্পর্কে ক্লিন্নতাযোগাৎ পক্কত্বং দুগ্ধাদীনাং কঠিনত্বাভাবাৎ ন পক্কত্বং গুড়শর্করাদীনামেব মূলত্বেন সহজ-কঠিনত্বাভাবাৎ। পুনরগ্নিসংযোগেঽপি ঘৃতবন্ন পক্কত্বং অতো দুগ্ধাদীনাং মোদকাদীনাঞ্চ শূদ্রেণ পক্কানাং ন নিষেধঃ। এবঞ্চ নাপ্রোক্ষিতং স্পৃশেৎ কিঞ্চিৎ দৈবে পিত্রে কথঞ্চন। ইতি বায়ুপুরাণাৎ প্রোক্ষিতানামেব শ্রাদ্ধদেয়ত্বাৎ লাজচিপিটকাদীনাঞ্চ জলস্পর্শে ক্লিন্নত্বাল্লাজাদিকং শূদ্রেণ শ্রাদ্ধে ন দেয়মিতি সাম্প্রদায়িকাঃ। সমাখ্যানাদিতি। সমাখ্যানং

প্রথমপঞ্চকেনাগ্নিং হুত্বা ইত্যাদি। অত্রামশ্রাদ্ধং জাতশ্রাদ্ধমিতি ব্যাখ্যাতম্। অভাবে পাকপাত্রাণামিতি। পাকপাত্রাণাং স্থাল্যাদীনাম্। এতৎ সকলপাকসামগ্র্যভাবোপলক্ষণম্। তদহঃ সমুপোষণমিতি পাকপাত্রাভাবে পাকাভাবাচ্ছ্রাদ্ধলোপে বিহিতাতিক্রমজনিতপাপক্ষয়ার্থং প্রায়শ্চিত্তরূপং স্বয়মিত্যনেনৈকোদ্দিষ্টং স্বয়মেব কার্য্যং নান্যদ্বারা অমাবাস্যাদিনিয়তন্তু পার্ব্বণং সহচারিণী পত্নী প্রোষিতে পত্যৌ ঋত্বিগাদিদ্বারা কুর্য্যাৎ। আদিশব্দাৎ। ঋত্বিক্পুত্রো গুরুর্ভ্রাতা ভাগিনেয়োঽথ বিট্পতিঃ। এভিরেব হুতং যৎ তু তদ্ধুতং স্বয়মেব হি॥ ইতি বচনাৎ পুত্রাদয় উহ্যাঃ। স্বয়মশক্তাবেকোদ্দিষ্টং গোত্রজদ্বারা

সংজ্ঞা আমেন শ্রাদ্ধমামশ্রাদ্ধমিতি সংজ্ঞা। ব্যুৎপত্তিঃ তস্যাঃ পক্বান্নকৃতজাতশ্রাদ্ধেঽসম্ভবাৎ। জাতশ্রাদ্ধস্য বিষ্ণূক্তামশ্রাদ্ধসংজ্ঞানুপপত্তিঃ স্যাদিতি ভাবঃ। অভাবে পাকপাত্রাণামিত্যভিধানাৎ শ্রাদ্ধবিঘ্ন ইত্যাদিনা তচ্ছ্রাদ্ধস্য একাদশ্যাং কর্ত্তব্যতোপদেশাচ্চ। উপোষণং ন শ্রাদ্ধস্থানীয়ং কিন্তু তদহঃপাকসামগ্র্যসম্পাদনজনিতপাপক্ষয়ার্থং প্রায়শ্চিত্তরূপমেব ইত্যাহ তদহরিতি। অতএব উপোষণং শ্রাদ্ধস্থানীয়মেব তেন যথা নিত্যস্য শ্রাদ্ধস্য করণত্বাৎ প্রত্যবায়পরীহারঃ। তথোপোষণাদপীতি মৈথিলমতমসৎ তথাত্বে অভাবে পাকপাত্রাণামিতি বিশেষাভিধানং ন স্যাৎ শ্রাদ্ধাভাবে ইত্যেব বক্তুমুচিতত্বাৎ। একাদশ্যাং তচ্ছ্রাদ্ধবিধায়কবচনেন সহ বিরোধাৎ বিকল্পাপত্তেশ্চ। প্রেতশ্রাদ্ধাকরণে ষোড়শশ্রাদ্ধানামজাতত্বাৎ পিতুঃ প্রেতত্বপরীহারানুপপত্তেশ্চ। তত্রোপোষণস্যাপি বৈকল্পিককারণত্বোপগমে চ মহাগৌরবং স্যাৎ। অতো লাঘবাৎ তৎকালীনপাকসামগ্র্যসম্পাদনজন্যায়াদেকস্যা এব পাপব্যক্তেঃ। কল্পয়িতুমুচিতত্বেন তন্নাশার্থমেবোপোষণস্য যুক্তত্বাদিতি ভাব্যম্। স্বয়মশক্তা-

কার্য্যম্। যথা প্রেতক্রিয়াং প্রকৃত্য ব্রহ্মপুরাণম্। ন কদাচিৎ সগোত্রায় শ্রাদ্ধং কার্য্যমগোত্রজৈঃ। অত্র হি ন্যগোত্রজস্য সাক্ষাৎকর্ত্তৃত্বং নিষিধ্যতে সগোত্রায়েত্য-সম্বন্ধাপত্তেঃ। তস্মাদগোত্রজৈর্দ্বারভূতৈঃ সগোত্রায় শ্রাদ্ধং ন কর্ত্তব্যমিত্যস্যার্থঃ। তদা চ পর্য্যুদাসপক্ষে সগোত্রজ-দ্বারেণৈব কর্ত্তব্যমিতি স্ফুটমেব। প্রসজ্যপক্ষেঽগোত্রজ-বিশেষণস্বরসাৎ গোত্রজলাভঃ। প্রেতশ্রাদ্ধধর্ম্মগ্রাহিত্বাৎ সাংবৎসরিকমপি তথা। পার্ব্বণন্তু গোত্রজঋত্বিগাদিদ্বা-রাপি কর্ত্তব্যমেবেত্যমাবাস্যাদিবচনস্যার্থঃ॥ ১২৮॥

অথ জীবৎপিতৃকশ্রাদ্ধম্। তত্র মনুঃ। ধ্রিয়মাণে তু পিতরি পূর্ব্বেষামেব নির্ব্বপেৎ। বিপ্রবদ্বাপি তং শ্রাদ্ধে

---

বিতি। নন্বেবং সদা গ্রহণমনুপপন্নং তথাচ সদা স্বয়ং বিধানাৎ কথ-মন্যকর্ত্তৃত্বমিতি চেৎ অত্র কেচিৎ সদা পাকেনৈব ইত্যন্বয়ং বর্ণয়ন্তি। তদসৎ পাকেনৈব ইত্যেবকারেণৈব তদর্থলাভাৎ বৈয়র্থ্যাপাতাৎ। বস্তু-তস্তু ন কদাচিৎ সগোত্রায় শ্রাদ্ধং কার্য্যমগোত্রজৈরিতি। প্রথমোপ-স্থিতত্বাৎ সন্নিধানাচ্চ সগোত্রায়েত্যনেন নঞঃ সম্বন্ধেঽসগোত্রায়াঃ সগোত্রজৈর্দ্বারভূতৈরপি দেয়মিত্যর্থে সিদ্ধেমাতামহাদীনামসগোত্রাণাং শ্রাদ্ধং অগোত্রজদ্বারকমপীতি তত্র স্বয়ং কর্ত্তৃত্বানিয়মঃ। সগোত্রপি-ত্রাদিশ্রাদ্ধন্তু সদা স্বয়মিত্যর্থঃ সামান্যবিশেষন্যায়াদিতি প্রতীমঃ। কল্প-তরুকারাদয়স্তু স্বগোত্রায়েতি পঠন্তি ব্যাখ্যাং কুর্ব্বন্তি চ। স্বং গোত্রং বিদ্য-মানং যস্য তস্মৈ অগোত্রজৈর্ন দেয়ম্। তেন স্বগোত্রসত্ত্বেঽসগোত্রস্য ন শ্রাদ্ধাধিকার ইতি। পর্য্যুদাসপক্ষ ইতি অগোত্রজেতরৈঃ শ্রাদ্ধং কার্য্য-মিত্যেবংরূপপর্য্যুদাসপক্ষে ইত্যর্থঃ। প্রেতশ্রাদ্ধেতি। একপ্রেতো-দ্দেশ্যকশ্রাদ্ধস্যৈব একোদ্দিষ্টত্বাদিতি ভাবঃ॥ ১২৮॥

অথ জীবৎপিতৃকশ্রাদ্ধম্। পিতামহো বেতি। তচ্ছ্রাদ্ধং শ্রদ্ধয়া

স্বকং পিতরমাশয়েৎ ॥ পিতা যস্য তু বৃত্তঃ স্যাজ্জীবেচ্চাপি পিতামহঃ। পিতুঃ স নাম সংকীর্ত্য কীর্ত্তয়েৎ প্রপিতামহম্ ॥ পিতামহো বা তচ্ছ্রাদ্ধং ভুঞ্জীতেত্যব্রবীন্মনুঃ। কামং বা তদনুজ্ঞাতঃ স্বয়মেব সমাচরেৎ ॥ তথা। ত্রয়াণামুদকং কার্য্যং ত্রিষু পিণ্ডঃ প্রবর্ত্ততে। চতুর্থঃ সম্প্রদাতৈষাং পঞ্চমো নোপপদ্যতে ॥ ধ্রিয়মাণে জীবতীত্যর্থঃ। পূর্ব্বেষাং পিতুঃ পূর্ব্বেষাং পুরুষত্রয়াণামিত্যর্থঃ। অথবা স্বকং পিতরং ভোজয়েৎ। বিপ্রবদিতি গন্ধাদ্যর্চ্চনপূর্ব্বকমিত্যর্থঃ। তেন জীবন্তমেব পিতরং আদিতো ভোজয়িত্বা পুরুষত্রয়স্য শ্রাদ্ধং কর্ত্তব্যমিতি অপরঃ পক্ষঃ। ন তু স্বকং পিতরমাদিতো ভোজয়িত্বা

দীয়তে যৎ তত্তথেতি শ্রাদ্ধীয়দ্রব্যমিত্যর্থঃ। পক্ষান্তরং পূর্ব্বেষাং নির্ব্বপণপক্ষাদিতি শেষঃ। ত্রিষু জীবৎস্বিতি। যদ্যপি নৈতাদৃশং সূত্রং কিন্তু পিতরি পিতামহে প্রপিতামহে চ জীবতি নৈব কুর্য্যাদিত্যেব। তথাপি বিষ্ণুবচনম্। ত্রিতয়োদ্দেশ্যকশ্রাদ্ধমাত্রোপলক্ষণং তৎপ্রতিপাদনার্থং তথাভিধানমন্যথা মাতামহাদিত্রিকজীবনে তৎপক্ষশ্রাদ্ধস্য মাত্রাদিত্রিতয়জীবনে তাসামাভ্যুদয়িকাদৌ মাতৃপক্ষশ্রাদ্ধস্য চাসংগ্রহঃ স্যাদিতি ভাব ইতি সম্প্রদায়ঃ। বস্তুতস্তু অতএবেতি। যত এব পিতরি জীবতীতি পিতৃমাত্রজীবনপরং ন তু পিতৃপদস্য তদাদিত্রিতয়োপলক্ষকতয়া পিত্রাদিত্রিতয়জীবনপরমতএবেত্যর্থঃ। ত্রিম্বিতি। পিতরি পিতামহে প্রপিতামহে চ জীবতীত্যস্য সূত্রস্যার্থো নির্ব্বিরোধ ইতি শেষঃ ইতি। ত্রিষু মাতামহাদিষ্বিতি। এতচ্চ ত্রিতয়োদ্দেশ্যকশ্রাদ্ধমাত্রোপলক্ষণং ন জীবন্তমতি দদ্যাদিতি সামান্যশ্রুতিমূলত্বাৎ অন্যথা মাতামহাদিত্রিতয়জীবনে শাস্ত্রার্থব্যবস্থা ন স্যাৎ। ন্যায়ানুসারেণেতি। ন্যায়মেবাহ

তদূর্দ্ধং পুরুষত্রয়স্য শ্রাদ্ধং কর্ত্তব্যমিতি হলায়ুধব্যাখ্যান-মাদরণীয়ম্। পিতরং ভোজয়িত্বা তু পিণ্ডৌ নির্ব্বপুয়াৎ পরৌ। ইতি যজ্ঞপার্শ্বপরিশিষ্টবচনাৎ। পিতা যস্য ত্বিতি। পিতর্য্যবিদ্যমানে পিতামহে জীবতি পক্ষদ্বয়ম্। নামকীর্ত্তনং শ্রাদ্ধোপলক্ষণম্। কীর্ত্তয়েৎ প্রপিতামহ-মিত্যত্র বৃদ্ধপ্রপিতামহকীর্ত্তনমপি জ্ঞেয়ম্। যস্য পিতা প্রপিতামহশ্চ প্রেতৌ স্যাতাং স পিত্রে পিণ্ডং নিধায় পিতামহাৎ পরং দ্বাভ্যাং দদ্যাদিতি বিষ্ণুবচনাৎ। কাম্যং বেতি। তদনুজ্ঞাতঃ পিতামহানুজ্ঞাতঃ। কামমভিল-ষিতং সমাচরেৎ। ভোজনপক্ষাৎ পক্ষান্তরমিদম্। যদা পূর্ব্বেষাং তদা কিয়তামিত্যপেক্ষায়ামাহ ত্রয়াণামুদক-মিতি। বিষ্ণুঃ। পিতরি জীবতি যঃ শ্রাদ্ধং কুর্য্যাদ্যেষাং পিতা কুর্য্যাত্তেষাং কুর্য্যাৎ পিতরি পিতামহে চ জীবতি যেষাং পিতামহঃ পিতরি পিতামহে চ প্রপিতামহে চ জীবতি নৈব কুর্য্যাৎ। যস্য পিতা প্রেতঃ স্যাৎ স পিত্রে পিণ্ডং নিধায় পিতামহাৎ পরং দ্বাভ্যাং দদ্যাৎ। যস্য পিতা পিতামহশ্চ প্রেতৌ স্যাতাং স তাভ্যাং পিণ্ডৌ দত্ত্বা পিতামহপিতামহায় পিণ্ডং দদ্যাৎ। যস্য পিতামহঃ প্রেতঃ স্যাৎ স তস্মৈ পিণ্ডং নিধায় প্রপিতামহাৎ পরং

---

দৃষ্টার্থো হীতি। অয়মর্থঃ। দৃষ্টার্থমন্ত্রস্য হি দ্রব্যদেবতাকর্ম্মপ্রকাশনং ফলম্। তথাচ যস্য মন্ত্রস্য প্রকৃতৌ মুখ্যয়া বৃত্ত্যা সমবেতার্থতা তস্য বিকৃতাবপি সমবেতার্থতায়া আবশ্যকত্বাৎ মুখ্যয়া তদসম্ভবে সমবেতা-র্থকপদান্তরোহেন সা কর্ত্তব্যা। যথা বলিদানমন্ত্রাদৌ নরাদিপদস্থানে ছাগাদিপদোহ এবেতি। যস্য মন্ত্রস্য লক্ষণয়া প্রকৃতৌ সমবেতার্থতা তস্য

দ্বাভ্যাং দদ্যাৎ। যস্য পিতা প্রপিতামহশ্চ প্রেতৌ স্যাতাং স পিত্রে পিণ্ডং নিধায় পিতামহাৎ পরং দ্বাভ্যাং দদ্যাৎ। মাতামহানামপ্যেবং শ্রাদ্ধং কুর্য্যাদ্বিচক্ষণঃ। মন্ত্রোহেন যথান্যায়ং শেষাণাং মন্ত্রবর্জ্জিতম্॥ পিতরি জীবতীতি সাবধারণোহয়ং নির্দ্দেশঃ পিতর্য্যেব জীবতী-ত্যর্থঃ। অতএব ত্রিষু জীবৎসু নৈব কুর্য্যাদিত্যুক্তম্। এব-মন্যত্রাপি। যঃ শ্রাদ্ধমিতি। যচ্ছব্দোপাদানসামর্থ্যাদকর-ণপক্ষোহপি সূচিতঃ। মাতামহানামপ্যেবমিতি। যথা পিতরি জীবতি যেষাং পিতা কুর্য্যাত্তেষাং কুর্য্যাত্তথা মাতামহে জীবতি যেষাং মাতামহঃ যথা পিত্রাদিষু ত্রিষু জীবৎসু নৈব কুর্য্যাত্তথা মাতামহাদিষু ত্রিষু জীবৎসু মাতামহাদিপক্ষং নৈব কুর্য্যাদিত্যাদি সর্ব্বমতিদেশ্যং কিন্তু পিতৃপদবন্মন্ত্রে পিতৃপদস্থানে মাতামহাদিপদোহঃ কার্য্য ইতি বিশেষঃ। যথান্যায়মিতি। ঊহোহপি ক্রিয়মাণো ন্যায়ানুসারেণ কার্য্যঃ। দৃষ্টার্থো হি মন্ত্রোহসমবেতার্থপ-দবত্তয়া প্রযুজ্যমানো দৃষ্টার্থো ন ভবেৎ। অতঃ সমবে-

বিকৃতাবপি লক্ষণয়া সমবেতার্থত্বেনোহঃ। যথা এতদ্বঃ পিতরো বাস ইত্যত্র বাসঃপদস্য সূত্রে লক্ষণয়া প্রকৃতৌ পার্ব্বণে সমবেতার্থত্বাৎ বিকৃতা-বেকোদ্দিষ্টেহপি তথাত্বাৎ। তত্র নোহঃ প্রকৃতিবিকৃতিভাবাভাবে তু নোহঃ। যথা নরং পঞ্চত্বমাগতমিত্যাদৌ নরাদিপদস্থানে ন নারীদাহাদৌ নার্য্যাদিপদোহঃ। অত এতদেনং সংশয়াদস্মাদ্ধর্ম্মতস্ত্রাতুমর্হতীতি। দিব্যমন্ত্রে স্ত্রীকর্তৃক দিব্যমন্ত্রে ন লিঙ্গোহোহপি। তুল্যবদ্বিকল্পে তু একার্থ-প্রকাশকমন্ত্রস্যান্যার্থপক্ষেহসমবেতার্থত্বে বাধ এব। যথা ব্রীহিমন্ত্রস্য

তার্থপদপ্রক্ষেপেণ প্রযোজ্যঃ। যথাগ্নয়ে ত্বাজুষ্টং নির্ব্বপামীতি মন্ত্রঃ সৌর্য্যে চরৌ সূর্য্যপদপ্রক্ষেপেণ প্রযুজ্যত ইতি ঊহাধিকরণন্যায়ঃ। তদনুসারেণাত্রাপি শুন্ধন্তাং পিতরঃ শুন্ধন্তাং পিতামহাঃ শুন্ধন্তাং প্রপিতামহা ইতি মন্ত্রস্য পিত্রাদিপদস্থানে মাতামহাদিপদোহঃ কার্য্যঃ ॥ ১২৯ ॥

নন্বেবমমীমদন্ত পিতর ইত্যাদাবূহপ্রসঙ্গঃ। ন দ্বেধা পিতৃপদব্যাবৃত্তিঃ জনকত্বোপাধিনা পিতৃলোকপ্রাপ্ত্যা চ দৃশ্যতে। যথা বিষ্ণুপুরাণম্। প্রেতে পিতৃত্বমাপন্নে সপিণ্ডীকরণাদনু। ইতি। তথা লঘুহারীতঃ। ততঃ প্রভৃতি বৈ প্রেতঃ পিতৃসামান্যমাপ্নুয়াৎ। তদত্র মাতামহাদীনামপি সপিণ্ডীকরণেন পিতৃলোকপ্রাপ্তের্জ্জাত-

যবোপাদানপক্ষে বাধঃ। যস্য চ মন্ত্রস্য প্রকৃতাবেব অসমবেতার্থতা তস্য বিকৃতাবপি তথা এবেতি তত্র নোহঃ। যথা পার্ব্বণে এতদ্বঃ পিতরো বাস ইতি জল্পন্ পৃথক্ পৃথক্ ইত্যত্রৈকমেকং প্রতি বহুচনান্তপিতৃশব্দস্যাসমবেতার্থত্বাদেকোদ্দিষ্টেঽপি গৌড়মতেনোহঃ। অত্র বীজং অর্থপ্রকাশনাখ্যদৃষ্টপ্রয়োজনস্যাসম্ভবাৎ। মন্ত্রস্যাদৃষ্টার্থকত্বমিতি। অতএব স্বধিতিঃ পাশং প্রমুমোক্তু স্বধিতিঃ পাশান্ প্রমুমোক্তু ইতি মন্ত্রস্য একপাশিকায়াং প্রকৃতৌ একবচনান্তপাশশব্দস্য সমবেতার্থত্বাৎ দ্বিপাশিকায়াং রজ্জৌ বিকৃতিভূতায়াং দ্বিবনান্তপাশপদে নোহঃ বহুবচনান্তপাশশব্দস্য তু নোহঃ তস্যাপ্রকৃতাবেবাসমবেতার্থত্বাদিত্যাদাবিতি ॥ ১২৯ ॥

নন্বেবমিতি। অমীমদন্ত পিতর ইতি মন্ত্রে পিতৃপদস্থানে মাতামহপদপ্রসঙ্গ ইত্যর্থঃ। পিতৃলোকপ্রাপ্ত্যা চেত্যত্র পিতৃলোকপাপ্ত্যুপাধিনা বর্ত্তমানোঽপি পিতৃশব্দঃ ষট্পুরুষেষ্বেব বর্ত্ততে ন তু ভ্রাতৃপিতৃব্যাদি-

ত্বাৎ পিতৃলোকপ্রাপ্ত্যুপাধিনা পিতৃপদস্য সমবেতার্থত্ব-মেব। শুন্ধন্তাং পিতর ইত্যাদৌ তু জনকত্বোপাধিনৈব পিতৃপদপ্রবৃত্তিঃ। পিতৃলোকপ্রাপ্ত্যুপাধিনা প্রবৃত্তৌ শুন্ধন্তাং পিতামহা ইত্যনর্থকং স্যাৎ। ন চ পিতৃভ্যঃ স্বধোচ্যতামিত্যাদৌ স্বধাবাচনমন্ত্রে মাতামহাদিপদোহ ইতি ব্যাখ্যানং যুক্তম্। মাতামহেভ্যঃ স্বধোচ্যতামিতি কাত্যায়নগোভিলাদিভিরভিধানাৎ। ন চ শ্রুতস্য পদোহঃ সম্ভবতি। ন চ পিতরেতত্তেহর্ঘ্যং পিতামহৈতত্তেহর্ঘ্যং প্রপিতামহৈতত্তেহর্ঘ্যমিত্যাদৌ মাতামহপদোহ ইতি বাচ্যম্ এতস্যাভিলাপত্বেন মন্ত্রত্বাভাবাৎ মন্ত্রত্বে চ শেষাণাং মন্ত্রবর্জ্জিতমিত্যুৎসর্গবাক্যস্যাপি বর্জ্জনপ্রসঙ্গাৎ। অয়মেব বিধিঃ প্রোক্তঃ শূদ্রাণাং মন্ত্রবর্জ্জিতঃ। ইতি বরাহপুরাণ-বচনেন শূদ্রস্যোৎসর্গবাক্যনিষেধাপত্তেশ্চ। তস্মাদপৌ-রুষেয়গ্রন্থবিশেষ এব মন্ত্রশব্দো মুখ্যোহন্যত্র গৌণঃ।

ম্বিতি প্রাহুঃ। তন্ন পতিতে প্রব্রজিতে বা পিত্রাদিত্রিকে বৃদ্ধপ্রপিতা-মহাদিশ্রাদ্ধে বৃদ্ধপ্রপিতামহাদিম্বপি পিতৃশব্দস্য বর্ত্তনাৎ। কাশ্যাদিমৃতানাং মুক্তানাং পিতৃলোকপ্রাপ্ত্যভাবাদ্ধাতেশ্চ প্রাপ্তপিতৃলোকত্বশক্যতাবচ্ছেদ-কস্য ভ্রাত্রাদিসর্ব্বসাধারণ্যে তদ্ব্যাবর্ত্তনস্যাসম্ভবযুক্তিকত্বাচ্চ। পার্ব্বণো-দ্দেশ্যকত্বমেব পিতৃত্বমিত্যন্যে। তদপি তদত্র মাতামহাদীনামপি ইত্যা-দ্যুত্তরগ্রন্থানবলোকনেনৈব বস্তুতঃ পিতৃদেহপ্রাপ্তিরেব পিতৃলোকপ্রাপ্তি-পদার্থঃ। দিবি যে চ মূর্ত্তা ইত্যাদিনা পিতৃণাং দেহস্য প্রতিপাদিতত্বাৎ পিতৃদেহপ্রাপ্তের্ভ্রাত্রাদিসর্ব্বসাধারণত্বাৎ সর্ব্বানেব পিতৃপদং বোধয়তীতি ন তদ্ব্যাবৃত্তিরিতি ভাব্যম্। তস্মাদপৌরুষেয়েতি। ইদঞ্চ স্বমতেনাভি-

শেষাণাং মন্ত্রবর্জ্জিতমিতি। শেষাণাং পিতৃব্যমাতুলাদীনামেকোদ্দিষ্টে পিত্রূহযোগ্যপদবন্মন্ত্র এব ন প্রযোজ্যো ন তূহঃ কর্ত্তব্যঃ। ন তু পিতৃপদরহিতোঽপ্যপ্রযোজ্যোঽপ্রকৃতত্বাৎ। ছন্দোগপরিশিষ্টম্। স পিতুঃ পিতৃকৃত্যেষু অধিকারো ন বিদ্যতে। ন জীবন্তমতিক্রম্য কিঞ্চিদ্দদ্যাদিতি শ্রুতিঃ॥ পিতামহে ধ্রিয়মাণে পিতুঃ প্রেতস্য নির্ব্বপেৎ। পিতুস্তস্য চ বৃত্তস্য জীবেচ্চেৎ প্রপিতামহঃ॥ পিতুঃ পিতুঃ পিতুশ্চৈব তস্যাপি পিতুরেব চ। কুর্য্যাৎ পিণ্ডত্রয়ং যস্য সংস্থিতঃ প্রপিতামহঃ॥ জীবন্তমতি দদ্যাদ্বা প্রেতায়ান্নোদকে দ্বিজঃ। পিতুঃ পিতৃভ্যো দদ্যাদ্বা সপিতেত্যপরা শ্রুতিঃ॥ পিতৃকৃত্যেষু পিণ্ডপিতৃযজ্ঞপার্ব্বণতর্পণাদিষু জীবৎপিতৃকস্যাধিকারো নাস্তি। হেতুমাহ ন জীবন্তমিতি। জীবতোঽদত্ত্বা কিঞ্চিন্ন দেয়মিত্যেতাদৃশী যতঃ শ্রুতিরস্তি। পিতামহে ধ্রিয়মাণ ইতি সাবধারণো নির্দ্দেশঃ পিতামহ এব ধ্রিয়মাণ ইত্যর্থঃ। পিতুঃ প্রেতস্য নির্ব্বপেৎ পিতুরেব ন জীবন্তং পিতামহমতিক্রম্য প্রপিতামহস্যাপীত্যর্থঃ। তথা হারীতঃ।

হিতং নৈয়ায়িকমতে বৈদিকমন্ত্রস্যাপি পৌরুষেয়ত্বাৎ। গ্রন্থবিশেষঃ অভিযুক্তানাং মন্ত্রত্বেন ব্যবহারবিষয়ো গ্রন্থঃ। অন্যত্র পৌরাণিকাদৌ বস্তুতোঽপৌরুষেয়ত্ববিশেষণে প্রমাণাভাবাৎ। পৌরাণিকাদাবপি মন্ত্রপদং মুখ্যমেব। অতএব বেদমন্ত্রবর্জ্জং শূদ্রস্যেত্যত্র বেদেতি বিশেষণং পৌরাণিকমন্ত্রব্যাবর্ত্তকতয়া সার্থকমন্যথা মন্ত্রপদেনৈব তদ্ব্যাবর্ত্তনে বেদেতি ব্যর্থং স্যাদিতি ভাব্যম্। একোদ্দিষ্টেতি। পিতৃব্যাদীনাং

পিতামহে জীবতি বৈ পিতর্য্যেব সমাচরেৎ। পিতুর্জ্জনকস্য। পিতুঃ পিতুঃ পিতামহস্য। তস্যাপি পিতুঃ প্রপিতামহস্যেত্যর্থঃ। তেনাজীবৎ পিত্রাদিত্রিক এব পিণ্ডত্রয়ং কুর্য্যাদিতি পক্ষঃ। পক্ষান্তরমাহ জীবন্তমতদদ্যাদ্বেতি হেতুমাহ। স পিতা পিতুঃ পিতৃভ্যো বা দদ্যাদিত্যপরা শ্রুতিরস্তি যতঃ। অতএব হারীতঃ। জীবে পিতরি বৈ পুত্রঃ শ্রাদ্ধকালং বিবর্জ্জয়েৎ। যেষাং বাপি পিতা কুর্য্যাত্তেষামেকে প্রচক্ষতে ॥ ১৩০ ॥

নন্বেবং বিরোধঃ স্যাৎ। উচ্যতে। পূর্ব্ববচনং নিত্যাধিকারনিষেধার্থম্ উত্তরবচনমুপকারকত্বেনাবশ্যককর্ত্তব্যতাপরম্ অথবা পতিতপ্রব্রজিতজীবৎপিতৃকবিষয়মুত্তরবচনম্।

পার্ব্বণাভাবাৎ একোদ্দিষ্ট ইত্যুক্তং। ঊহযোগ্যেতি। প্রাগুক্তাৎ পিত্রাদিপুরুষষট্‌কাৎ শেষাণাং পিতৃব্যমাতৃমাতুলাদীনাং শ্রাদ্ধে ঊহযোগ্যপিতৃবন্মন্ত্রঃ শুন্ধন্তাং পিতর ইত্যাদিরূপেণ প্রযোজ্যঃ ন তু পিতৃব্যাদিপদোহেন প্রযোজ্য ইত্যর্থঃ। পিতৃপদবন্মন্ত্র ইত্যভিধানাৎ বৃদ্ধিশ্রাদ্ধে তিলোঽসীতি মন্ত্রে যবোঽসীতি ঊহশ্চ কর্ত্তব্য ইত্যুক্তম্। ঊহযোগ্যতা চ পিতৃপদস্য জনকপুংস্ত্বেন জনকপরত্বমেব। অতো দেবতাভ্যঃ পিতৃভ্যশ্চেত্যাদিমন্ত্রঃ প্রযোজ্য এব তত্র পিতৃপদস্য দিব্যপিতৃপদস্য দিব্যপিতৃপরত্বেন ঊহাযোগাৎ। পিতৃব্যাদিশ্রাদ্ধে পিতৃপদবৎ তচ্ছূন্যস্য বা মন্ত্রসামান্যস্যৈব বর্জ্জনমিতি শ্রীদত্তমতং দূষয়তি ন ত্বিতি। অপ্রকৃতিত্বাদিতি। মাতামহপক্ষে ঊহ্যমানমন্ত্রস্যৈব প্রকৃতিত্বাদিতি ভাবঃ। অতএব মন্ত্রবর্জ্জিতমাবাহনাদিমন্ত্রবর্জ্জিতমিতি কল্পতরুব্যাখ্যানমপি নিরস্তম্। তস্য চেতি। পিতামহস্য চেত্যর্থঃ। নির্ব্বপেদিত্যনেনান্বয়ঃ। এতেন দ্বৈপুরুষিকশ্রাদ্ধমুক্তম্ ॥ ১৩০ ॥

বিরোধঃ স্যাদিতি। ন জীবন্তমতিক্রম্যেতি। জীবন্তমতি দদ্যা-

অতএব কাত্যায়নঃ। ব্রাহ্মণাদিহতে তাতে পতিতে সঙ্গবর্জ্জিতে। ব্যুৎক্রমাচ্চ মৃতে দেয়ং যেভ্য এব দদাত্যসৌ॥ আদিশব্দাচ্চাণ্ডালাদীনাং গ্রহণম্। পতিতে তাতে জীবত্যপি সঙ্গবর্জ্জিতে প্রব্রজিতে জীবত্যপীত্যর্থঃ। ব্যুৎক্রমাদুদরভেদাদিনা মৃতে। পুত্রজন্মাদিনিমিত্তবৃদ্ধিশ্রাদ্ধবিষয়ং নোত্তরবচনং ন তু পিতুরশক্তৌ তদনুজ্ঞাবিষয়মুত্তরবচনমিতি ব্যাখ্যানং যুক্তম্। তদানীমৃত্বিক্তুল্যত্বেনাধিকারাৎ। এবং পিতুরাজ্ঞাপক্ষে পিতুরেব মাতামহাদিপক্ষঃ স্বাধিকারপক্ষে স্বমাতামহাদিপক্ষ ইতি বিশেষঃ। হারীতঃ। জীবে পিতরি বৈ পুত্রঃ শ্রাদ্ধকালং বিবর্জ্জয়েৎ। যেষাং বাপি পিতা দদ্যাত্তেষামেকে প্রচক্ষতে॥ পিতামহে

---

দিত্যেতয়োর্বিরোধঃ স্যাদিত্যর্থঃ। উপকারত্বেন সুতসংস্কারমঠাদিপ্রতিষ্ঠাঙ্গত্বেন। ননু জীবন্তমতিদদ্যাদিত্যুত্তরবচনস্য পতিতপ্রব্রজিতপিতৃবিষয়ত্বে পৌনরুক্ত্যাপত্তিঃ। ছন্দোগপরিশিষ্টকৃতঃ কাত্যায়নস্যৈব ব্রাহ্মণাদিহতে তাতে ইতি বচনান্তরেণৈব তদর্থস্য সিদ্ধত্বাৎ। অত আহ পুত্রজন্মনিমিত্তেতি। প্রথমকল্পস্যাঙ্গভূতবৃদ্ধিশ্রাদ্ধবিষয়ত্বং উত্তরকল্পস্য তু নৈমিত্তিকপ্রধানীভূতবৃদ্ধিশ্রাদ্ধবিষয়ত্বমিতি ভেদঃ। ইদানীং পিতুরনুজ্ঞাকালে হোমান্ত ইতি জীবৎপিতৃবিষয়ে চত্বারঃ কল্পাঃ ক্রমেণোক্তাঃ। একো হোমান্তঃ। পিতরং ভোজয়িত্বা ইতি দ্বিতীয়ঃ। যেভ্যঃ পিণ্ডানিতি তৃতীয়ঃ। ন জীবন্তমতীতি চতুর্থঃ। পিতৃমাত্রমরণমাত্রবিষয়ে কল্পদ্বয়মাহ জীবেৎ পিতামহ ইতি। পিতুরেকস্য ইত্যেকঃ। ত্রীন্ বা পিণ্ডানিতি দ্বিতীয়ঃ। ত্রীনিতি প্রপিতামহস্যাপি মরণবিষয়ং অন্যথা তস্যাপি ভোজনং পিতামহতুল্যন্যায়াদিতি। পিণ্ডান্ শ্রাদ্ধীয়ান্নাদিদ্রব্যাণি। তথাচ পুরুষত্রয়স্য পৃথক্পৃথগন্নাদিকং সম্পাদ্যতে নৈকেনান্নাদীনাং মধ্যমং পিতামহং ভোজয়েদিত্যর্থঃ। দ্বৌ

জীবতি বৈ পিতর্য্যেব সমাপয়েৎ। উদকাঞ্জলিং প্রদীপঞ্চ অঞ্জনঞ্চ প্রযত্নতঃ॥ ব্যাখ্যাতার্থমিদম্। উদকাঞ্জলিমিতি পিণ্ডাঙ্গসামগ্রীপ্রদর্শনার্থম্। যজ্ঞপার্শ্বপরিশিষ্টম্। হোমান্তঃ পিতৃযজ্ঞঃ স্যাজ্জাবে পিতরি নামতঃ। পিতরং ভোজয়িত্বা বা পিণ্ডৌ নির্ব্বপুয়াৎ পরৌ॥ যেভ্যঃ পিণ্ডান্ পিতা দদ্যাত্তেভ্যঃ পুত্রোঽপি দাপয়েৎ। ন জীবন্তমতি দদ্যাদিত্যেষা নৈগমী শ্রুতিঃ॥ জীবেৎ পিতামহো যস্য পিতা চান্তরিতো ভবেৎ। পিতুরেকস্য দাতব্যমেতদাহুর্ম্মণীষিণঃ॥ ত্রীন্ বা পিণ্ডান্ সমারোপ্য মধ্যমং তেন ভোজয়েৎ। দ্বৌ পিণ্ডৌ ব্রাহ্মণে দদ্যাদগ্নাবম্ভসি বা ক্ষিপেৎ॥ উভৌ যদি ব্যতীতৌ তু জীবেচ্চেৎ প্রপিতামহঃ। পিণ্ডৌ নির্ব্বপুয়াৎ পূর্ব্বৌ ভোজয়েৎ প্রপিতামহম্॥ হোমো জীবৎপিত্রাদিনাম্না তদন্তস্তাবন্মাত্রং কর্ত্তব্যং নাম্নোৎসর্গপিণ্ডদানাদিকং কর্ত্তব্যমিত্যর্থঃ। ব্যক্তমপরম্। নিগমঃ। যো বা জীবতি পিতৃণাং তং ভোজয়েৎ পিণ্ডস্থানে ইত্যেকে। জীবতামজীবতাঞ্চ দেয়মেবেতি হিরণ্যকেতুঃ। তথা একস্মিন্নপি জীবত্যদান-

---

পিণ্ডাবিতি পিতৃপিতামহয়োর্যথাবিধি শ্রাদ্ধং কৃত্বা তদুভয়ীয়ান্নাদিদ্বয়ং ব্রাহ্মণায় দদ্যাৎ অগ্নৌ জলে বা ক্ষিপেদিত্যর্থঃ। উভৌ পিতৃপিতামহৌ অর্থাৎ প্রপিতামহে জীবতীত্যর্থঃ। ইতি কাত্যায়ন ইত্যন্তং নিগমসূত্রং ব্যাচষ্টে পিণ্ডস্থানিতীতি। জীবতামিত্যনেনেতি। পিণ্ডাদিকং শ্রাদ্ধীয়দ্রব্যং তদ্বিধিনোৎসৃজ্য জীবতে দেয়মজীবতাঞ্চ ব্রাহ্মণেভ্যো দদ্যাদিতি হিরণ্যকেতুরাহ ইত্যর্থঃ। জীবতঃ শ্রাদ্ধস্য একমাত্রজীবনে শ্রাদ্ধাভাবস্য

ন্নিতি কাত্যায়নঃ। পিণ্ডস্থান ইত্যনেন পিণ্ডো ন দেয়ঃ তৎস্থানে ভোজনমাত্রং বিধীয়তে। জীবতামিত্যনেন জীবতামপি পিণ্ডাদিকমুৎসৃজ্য দেয়মিতি হিরণ্যকেতুরাহ। এতচ্চ শাখিভেদব্যবস্থিতম্। একস্মিন্ জীবত্যদানমিত্যপি শাখিভেদব্যবস্থিতমেব। পিতৃপিতামহপ্রপিতামহাধিকারে আশ্বলায়নসূত্রম্। ন পরেভ্যোঽনধিকারান্ন প্রত্যক্ষং ন জীবেভ্যোঽপি নির্ব্বপেৎ ন জীবান্তরিতেভ্যো জহুয়াজ্জীবেভ্যঃ সর্ব্বহুতং সর্ব্বজীবিনো নামান্যবিদ্বাংস্তৎপিতৃপিতামহপ্রপিতামহ ইতি। ন পরেভ্যো জীবতঃ পিত্রাদেঃ পরেভ্যঃ ন প্রত্যক্ষং জীবদ্ভ্য ইত্যর্থঃ। ন জীবেভ্যো নির্ব্বপেন্ন জীবান্তরিতেভ্য ইতি শ্রুতিরিতি শেষঃ। কর্ত্তব্যমাহ জুহুয়াজ্জীবেভ্যঃ জীবতাং হোমঃ কর্ত্তব্য ইত্যর্থঃ। সর্ব্বজীবিনঃ পিত্রাদিত্রিকজীবিনঃ। সর্ব্বহুতং ত্রয়াণাং হোমঃ কর্ত্তব্যঃ নাম্নোঽজ্ঞানেঽমুক পিতৃপিতামহপ্রপিতামহেতি কৃত্বা দদ্যাৎ নির্ব্বপেন্নির্ব্বপেৎ। তদেষ সংক্ষেপঃ। পিতরি জীবতি চত্বারঃ পক্ষাঃ। একঃ পিতৃকৃত্যানধিকারঃ। পিতামহাদীনাং দাতব্যমিত্যপরঃ। পিতরং ভোজয়িত্বা পিতামহপ্রপিতামহয়োর্দেয়মিত্যপরঃ। হোমমাত্রং বা কর্ত্তব্যম্।

---

চ ছন্দোগপরিশিষ্টাদিবিরুদ্ধত্বাদাহ এতচ্চেতি। অনধিকারাদিতি। ত্রিষু জীবৎসু নৈব কুর্য্যাদিতি মনুবচনাদিত্যর্থঃ। ন প্রত্যক্ষমিত্যত্র হেতুমাহ ন জীবদ্ভ্য ইতি। নাম্নাং জীবতাং হোমঃ কার্য্যঃ। নামাজ্ঞানে কথং স্যাদত আহ নামান্যবিদ্বানিতি। পিতৃপিতামহয়োরেব যদ্যপি জীব-

পিতৃমাত্রোপরতাবপি চত্বারঃ পক্ষাঃ। পিতুরেব দেয়মিত্যেকঃ। পিত্রে দত্ত্বা পিতামহপ্রপিতামহৌ ভোজনীয়ৌ হোমো বা পিত্রে দত্ত্বা প্রপিতামহাৎ পরং দ্বাভ্যাং দেয়মিত্যন্যঃ। পিতৃপিতামহমাত্রোপরতাবপি চত্বারঃ পক্ষাঃ। পিতৃপিতামহয়োরেব দেয়মিত্যেকঃ। তয়োর্দত্ত্বা প্রপিতামহো ভোজনীয়ঃ হোমো বা তয়োর্দত্ত্বা প্রপিতামহপিত্রে দেয়মিত্যন্যঃ। পিতামহমাত্রে জীবত্যপি চত্বারঃ। পিতৃপ্রপিতামহয়োরেব দেয়ং পিতৃপ্রপিতামহয়োর্দত্ত্বা পিতামহো বা ভোজনীয়ঃ তয়োর্দত্ত্বা প্রপিতামহপিত্রে বা দেয়ং হোমো বা পিতামহস্য ইত্যন্যঃ ॥ ১৩১ ॥

অথ দ্বিপিতৃকশ্রাদ্ধম্। দ্বিপিতৃকমাহ বৌধায়নঃ। মৃতস্য চ প্রসূতো যঃ ক্লীবস্য ব্যাধিতস্য বা। অন্যেনানুমতেনাপি স্বে ক্ষেত্রে ক্ষেত্রজঃ স্মৃতঃ। স এব দ্বিপিতা দ্বিগো-

দতিক্রমেণ দানে ত্রৈপুরুষিকমেব প্রাপ্নোতি ন তু দ্বৈপুরুষিকম্। অতএব কীর্ত্তয়েৎ প্রপিতামহমিত্যত্র বৃদ্ধপ্রপিতামহকীর্ত্তনমপি জ্ঞেয়মিতি স্বয়মেব প্রাগুক্তম্। ততশ্চ পিতুরেব দাতব্যং ত্রৈপুরুষিকং বা কর্ত্তব্যমিত্যেব বক্তুমুচিতম্। পিতামহে ধ্রিয়মাণে পিতর্য্যেব সমাপয়েৎ। ইতি বচনাৎ স্বপিত্রে পিণ্ডং নিধায় প্রপিতামহাৎ পরং দ্বাভ্যাং দদ্যাদিতি বিষ্ণুসূত্রাচ্চ। তথাপি দ্বৈপুরুষিকমিদং পক্ষান্তরমুক্তম্। কামং বা তদনুজ্ঞাতঃ স্বয়মেব ইতি মনুনা ত্রৈপুরুষিকাদতিরিক্তস্য দ্বৈপুরুষিকস্যাপ্যভিহিতত্বাদিতি ॥ ১৩১ ॥

অথ দ্বিপিতৃকশ্রাদ্ধম্। মৃতস্যেতি। মৃতস্য ক্ষেত্রে গুরুণানুমতেনান্যেন প্রসূতো জনিতঃ ক্লীবব্যাধিতয়োর্ব্বা ক্ষেত্রে তেনৈবানুমতেন

ত্রশ্চ। বিশেষয়তি হারীতঃ। জীবতি ক্ষেত্রজমাহুরস্বাতন্ত্র্যাৎ মৃতে দ্ব্যামুষ্যায়ণমগুপ্তবীজত্বাৎ জীবত্যপি ক্রিয়াভ্যুপগমাৎ। দ্বিপিতৃকমাহ মনুঃ। ক্রিয়াভ্যুপগমাৎ ত্বেবং বীজার্থং যৎ প্রদীয়তে। তস্যেহ ভাগিনৌ দৃষ্টৌ বীজী ক্ষেত্রিক এব চ॥ অপুত্রাভ্যাং বীজিক্ষেত্রিভ্যাং মম ক্ষেত্রং তব বীজং যদপত্যমুৎপদ্যতে তস্য দ্বাবপি বীজিক্ষেত্রিকৌ পিতৃত্বভাগিনৌ ভবত ইত্যেবংরূপঃ ক্রিয়াভ্যুপগমঃ। শাঙ্খায়নসূত্রম্। পিণ্ডান্ যথাবনেজনং নিধায়োভাবেকস্মিন্ পিতৃভেদেন জীবতঃ পিতুরস্তি ন জীবান্তরিতায় যেভ্যো বাপি পিতা তেভ্যঃ পুত্রো হোমান্তং বা। পিতৃভেদে একস্মিন্ পিণ্ডে উভৌ বীজিক্ষেত্রিকৌ কীর্ত্তয়েদিতি শেষঃ। ন জীবতঃ পিতুরিত্যাদি প্রাগেব ব্যাখ্যাতম্। প্রবরাধ্যায়ঃ। অথ যদি পিতৃব্যেণ জ্ঞাতিনা বৈককা-

---

নান্যেন প্রসূতো যঃ স ক্ষেত্রজ ইত্যর্থঃ। জীবতীতি। ক্ষেত্রিণীত্যর্থঃ। অস্বাতন্ত্র্যাদিতি। ক্ষেত্রস্যেতি শেষঃ। অগুপ্তবীজত্বাদিতি। গুরুনিয়োগবিষয়মিদম্। যদিতি ক্রিয়াবিশেষণম্। যৎ ক্ষেত্রদানং তস্য ফলভাগিনাবিত্যর্থঃ। ক্রিয়াভ্যুপগমং ব্যাচষ্টে অপুত্রাভ্যামিতি। ইত্যেবংরূপঃ ইত্যেবংব্যবস্থাপনরূপঃ। দ্বিপিতৃকর্ত্তব্যশ্রাদ্ধপরিপাটীং দর্শয়তি শাংখ্যায়নেতি। যথাবনেজনমিতি। নিধায় প্রত্যবনেজনং দদ্যাদিতি শেষঃ। পিতৃভেদে দ্বিপিতৃকত্বে প্রকারান্তরমাহ যেভ্যো বাপীতি। হোমান্তমিতি তৃতীয়ঃ প্রকারঃ। প্রবরাধ্যায় ইতি। আতৃতীয়াৎ পুরুষাদিত্যন্তং প্রবরাধ্যায়সূত্রম্। এককার্য্যেণেতি। একস্য ক্ষেত্রিকস্য কার্য্যো যস্য তেন জাতা জনিতা ইত্যর্থঃ। এতেভ্যঃ পিতৃব্যাদিভ্যঃ। যদ্যপি স্যাদিতি পিতৃব্যাদীনাং স্বাসু ভার্য্যাসু যদ্যপত্যা-

র্য্যেণ জাতাস্তে পরিগ্রহীতুরেব ভবন্তি। অথ যদ্যেষাং স্বাসু ভার্য্যাসু অপত্যং ন স্যাদৃক্থং হরেদ্যঃ পিণ্ডং চৈভ্যস্ত্রিপুরুষং দদ্যুঃ যদ্যপি স্যাদুভাভ্যামেব দদ্যুরিত্যাচার্য্যবচনম্। দ্বে শ্রাদ্ধে কুর্য্যাৎ একশ্রাদ্ধে বা পৃথগনুদ্দিশ্য একপিণ্ডে দ্বাবনুকীর্ত্তয়েৎ। পরিগ্রহীতারং চোৎপাদয়িতারম্। আতৃতীয়াৎ পুরুষাৎ পরিগ্রহীতুঃ ক্ষেত্রিকস্য ন বীজিনঃ ক্রিয়ানিয়মাভাবঃ ॥ ১৩২ ॥

ইদমেষাং পিতৃব্যাদীনাং স্বভার্য্যাস্বপত্যাভাববিষয়ঞ্চ। যদ্যপি স্যাদিত্যনেনাপত্যসদ্ভাবে দ্বিপিতৃকত্বং ক্রিয়ানিয়মে জ্ঞেয়ম্। অতঃ শ্রাদ্ধভেদাভেদয়োর্ব্বিকল্পঃ। ভেদপক্ষে ফলভূমা কল্পনীয়ঃ। হারীতঃ। নাবীজং ক্ষেত্রং ফলতি নাক্ষেত্রং বীজং প্ররোহতি। উভয়দর্শ-

ন্তরং স্যাৎ তদাপি ক্রিয়াভ্যুপগমপক্ষে উভাভ্যাং বীজিক্ষেত্রিভ্যাং পিণ্ডং দদ্যুরিত্যর্থঃ। আচার্য্যবচনমিতি প্রামাণ্যাবধারণার্থম্। দ্বে শ্রাদ্ধে ইতি। একস্মিন্নেব প্রয়োগে মাতামহশ্রাদ্ধবৎ দ্বয়োঃ পিত্রোঃ শ্রাদ্ধদ্বয়ং কুর্য্যাদিত্যর্থঃ। পৃথঙনির্দ্দিশ্যেতি। দ্বয়োর্গোত্রসম্বন্ধসামান্যমিত্যত্রৈকাভিলাপেনৈবাম্নাদ্যুৎসর্গং কুর্য্যাদিত্যর্থঃ। পিণ্ডদানমপি তথৈব ইত্যাহ একপিণ্ড ইতি। প্রধানীভূতগয়াপিণ্ডে শ্রাদ্ধাঙ্গপিণ্ডে চেত্যর্থঃ। ব্যাচষ্টে পরিগ্রহীতুরিতি। ক্রিয়ানিয়মাভাব ইতি। ক্রিয়াভ্যুপগমে তু তদপত্যস্য উভয়ীয়ত্বাদিতি ভাবঃ॥ ১৩২ ॥

ইদমিতি। ইদং অথেত্যাদিনোক্তম্। বীজিনাং পিণ্ডদানং ধনগ্রহণঞ্চ ন কেবলং ক্রিয়াভ্যুপগমাৎ অপি তু বীজিনোঽনপত্যান্তরাভাবে ক্রিয়াভ্যুপগমাভাবেঽপীত্যর্থঃ। উভয়দর্শনাদিতি। উভয়োরন্যতরাভাবে ফলাভাবদর্শনাদিত্যর্থঃ। অপরে ইতি। প্রামাণ্যার্থং নির্ব্বাপে শ্রাদ্ধে পিণ্ডান..

মাতুভয়োরপত্যমিত্যপরে। তেষামুৎপাদয়িতুঃ প্রথমং প্রবরো ভবতি। দ্বৌ দ্বৌ পিণ্ডৌ নির্ব্বপেৎ দত্ত্যঃ একপিণ্ডে বা দ্বাবনুকীর্ত্তয়েৎ দ্বিতীয়ে পুত্রস্তৃতীয়ে পৌত্রঃ লেপিনস্ত্রীন্ বাচক্ষাণঃ আসপ্তমাদিত্যেকে। উভয়োর-পত্যমিতি ক্রিয়ানিয়মে বোদ্ধব্যং মৃতক্ষেত্রিকবিষয়ং বা। তেষাং বীজিক্ষেত্রিকাণাং মধ্যে বীজিনঃ প্রথমমার্ষেয়ং ক্ষেত্রিণো দ্বিতীয়মিতি দ্বিপ্রবরতাক্রত্বঙ্গে চার্ষেয়বরণে একপিণ্ডে বেত্যত্র বীপ্সাধ্যাহারঃ। যদি দ্বিপিতা স্যাদে-কৈকস্মিন্নেব দ্বৌ দ্বাবুপলক্ষয়েদিত্যাপস্তম্ববচনাৎ দ্বিতী-য়ে পিতামহপিণ্ডে পুত্রো দ্ব্যামুষ্যায়ণস্তু দ্বাবনুকীর্ত্তয়েদি-ত্যনুষঙ্গঃ। এবং তৃতীয়ে প্রপিতামহপিণ্ডেঽপি পৌত্রো দ্ব্যামুষ্যায়ণস্তু। এবং লেপভাগিনঃ ত্রীন্ বা আচক্ষাণঃ পিণ্ডাননুবদন্ দ্বিপিতৃকত্বং নিয়োগাদিতি। বিশেষয়তি নারদঃ। দ্ব্যামুষ্যায়ণকা দত্ত্যুর্দ্বাভ্যাং পিণ্ডোদকে পৃথক্। ঋক্থাদর্দ্ধাংশমাদদ্যুর্বীজিক্ষেত্রিকয়োস্তথা॥ পৃ-থগিতি ফলাতিশয়ার্থঃ। দ্বিপিতৃকং নিয়োগাদিতি। যাজ্ঞবল্ক্যঃ। অপুত্রেণ পরক্ষেত্রে নিয়োগাৎপাদিতঃ সুতঃ। উভয়োরপ্যসাবৃক্থী পিণ্ডদাতা চ ধর্ম্মতঃ॥

---

দ্বির্ব্বিধানাৎ শ্রাদ্ধদ্বয়ং পৃথক্ কর্ত্তব্যমিতি প্রতিপাদিতম্। মৃতক্ষেত্রি-কবিষয়ং বেতি। ক্ষেত্রিণি মৃতে বীজিনোঽপত্যান্তরাভাবে বা ক্রিয়া নিয়মভাবেঽপি বোদ্ধব্যমিত্যর্থঃ। দ্বিপ্রবরতেতি। যাগাদৌ ঋত্বিক্-ত্বেন বরণে প্রবরদ্বয়োল্লেখঃ কর্ত্তব্য ইত্যর্থঃ। বীপ্সাধ্যাহার ইতি। তেনৈকৈকপিণ্ডে ইত্যর্থঃ। দ্বিতীয়ে পিতামহপিণ্ডে ইতি। ইদমুপলক্ষণং

মরীচিঃ। সগোত্রাদন্যগোত্রাদ্বা যো ভবেৎ বিধবাসুতঃ। পিণ্ডং শ্রাদ্ধবিধানঞ্চ ক্ষেত্রিণে প্রাক্ প্রদাপয়েৎ ॥ বীজিনে তু ততঃ পশ্চাৎ ক্ষেত্রী জীবতি চেৎ ক্বচিৎ। বীজিনে দদ্যুরাদৌ তু মৃতে পশ্চাৎ প্রদীয়তে ॥ উভৌ যদি মৃতৌ স্যাতাং বীজিন্যাদৌ তদা দদৎ। ক্ষেত্রিণ্যাদৌ ন দত্তং স্যাদ্বীজিনে নোপতিষ্ঠতে ॥ যদি ক্ষেত্রী প্রথমং মৃত-স্তদা ক্ষেত্রিণে প্রথমং দেয়ং যদি বীজী তদা বীজিনে। এতেনান্যতরোপরতাবপি দ্বিপিতৃকস্য পার্ব্বণং দর্শিতম্। যদ্যুভৌ মৃতৌ তদাদৌ বীজিনে দদ্যাৎ পশ্চাৎ ক্ষেত্রিণে। ক্ষত্রিণেঽগ্রতো দানে দত্তমপি ন দত্তং স্যাৎ। অনিয়োগজাতে ব্যবস্থামাহ নারদঃ। জাতা যে ত্বনিযুক্তায়ামেকেন বহুভিস্তথা। অঋক্থভাজস্তে সর্ব্বে বীজিনামেব তে সুতাঃ ॥ দদ্যুস্তে বীজিনে পিণ্ডং মাতা চেৎ শুল্কতো হৃতা। অশুল্কোপহৃতায়াস্তু পিণ্ডদা বোঢ়ুরেব তে ॥

প্রপিতামহপিণ্ডেঽপি দ্বাবনুকীর্ত্তয়েদিতি চ বোদ্ধব্যম্। লেপিনস্ত্রীন্ বা আচক্ষাণ ইত্যস্যার্থমাহ পিত্রাদীতি। পিত্রাদিপিণ্ডাননু লক্ষীকৃত্য লেপিনস্ত্রীন্ বদন্ উদ্দিশ্য দদ্যাদিত্যর্থঃ। নারদ ইত্যস্য পূর্ব্বং দ্বিপিতৃকত্বং নিয়োগাদিতি বিশেষয়তীতি পাঠঃ ক্বচিৎ পুস্তকে তিষ্ঠতি। স পুনরশুদ্ধ এব বচনস্যাতদর্থত্বাৎ কিন্তু যাজ্ঞবল্ক্যস্য পূর্ব্বমেবেতি। ঋক্থাদর্দ্ধাংশমিতি পুত্রান্তরসদ্ভাবে বোধ্যম্। ন চ ক্ষেত্রিণঃ পুত্রান্তরসত্ত্বে ক্ষেত্রজোৎপাদনস্যাবিহিতত্বেন তস্য চাধর্ম্ম্যত্বাৎ ধনগ্রাহিত্বমেব নাস্তি কুতোঽর্দ্ধহরত্বমিতি বাচ্যং ক্রিয়ানিয়োগাৎ ক্ষেত্রজপুত্রে জাতে পশ্চাৎ স্বয়মুৎপাদিতে পুত্রান্তরে ঋক্থার্দ্ধহরত্বসম্ভবাদিতি সম্প্রদায়ঃ। মরীচিরিতি। তচ্চ ক্ষেত্রিপিত্রাদিনা সহ বীজিনঃ নিরাকৃত্যপগমবিষয়ম্। ক্ষেত্রী জীবতি

অরিক্থভাজঃ ক্ষেত্রিণামিত্যর্থঃ। এবকারেণ দ্বিপিতৃকত্বং নিরস্তম্। তদেতৎ শুল্কতঃ স্ত্রীসংগ্রহণে বোদ্ধব্যম্। শুল্কাভাবে ক্ষেত্রিণ এব তে পিণ্ডদাঃ॥ ১৩৩॥

অথ পুত্রিকাপুত্রশ্রাদ্ধম্। অত্র পুত্রিকাস্বরূপমাহ মনুঃ। অপুত্রোঽনেন বিধিনা সুতাং কুর্ব্বীত পুত্রিকাম্। যদপত্যং ভবেদস্যাস্তন্মম স্যাৎ স্বধাকরম্॥ বশিষ্ঠঃ। অভ্রাতৃকাং প্রদাস্যামি তুভ্যং কন্যামলঙ্কৃতাম্। অস্যাং যো জায়তে পুত্রঃ স মে পুত্রো ভবেদিতি॥ গোতমঃ। পিতোৎসৃজেৎ পুত্রিকামনপত্যোঽগ্নিং প্রজাপতিঞ্চেষ্ট্বাঽস্মদর্থমপত্যমিতি। অভিসন্ধিমাত্রাৎ পুত্রিকেত্যেকেষাম্। ব্রহ্মপুরাণে। অপুত্রেণ তু যা কন্যা মনসা পুত্রবৎ কৃতা। রাজাগ্নিবান্ধবেভ্যশ্চ সমক্ষং বাথ কুত্র-

চেদিতি। অর্থাদ্বীজিন্যাদৌ মৃতে ইত্যর্থঃ। মৃতে পশ্চাদিতি ক্ষেত্রিণি পশ্চান্মৃতে তস্মৈ পশ্চাদ্দীয়তে ইত্যর্থঃ। এষা চ ব্যবস্থা একতরমাত্রোপরমপর্য্যন্তম্। উভয়োপরতৌ চান্যেবেত্যাহ উভৌ যদীতি। যদ্ব্যভাবিতি। যদোভাবিত্যর্থঃ। অনিয়োগজাভেতি। সধবায়াং বিধবায়াং নাত্র বিশেষঃ॥ ১৩৩॥

অথ পুত্রিকাপুত্রশ্রাদ্ধম্। অস্মদর্থমপত্যমিতি। এবমুক্ত্বা পিতা উৎসৃজেৎ নরায় দদ্যাদিত্যর্থঃ। আগর্ভমিতি। প্রথমঃ পুংগর্ভো মমেতি শুল্কমিত্যর্থঃ। প্রচেতস আহরিতি শেষঃ। মাতামহপিতামহানামিতি বহুবচনাৎ প্রপিতামহলাভঃ। তেন মাতামহতৎপিতামহানামিত্যর্থঃ ইতি কেচিৎ। তদসৎ গ্রন্থবিরোধাৎ। হেতুরুক্ত ইতি। পুত্রিকা হি পুত্রবদিত্যুক্তম্। তত্র পুত্রিকা [illegible] দ্বারেণ পার্ব্বণপিণ্ডদাতৃত্বাৎ নরকোদ্ধাররূপেঽনুগ্রহে পুত্রেণ সহ বিশেষাভাবো হেতুরুক্ত ইত্যর্থঃ।

চিৎ॥ আগর্ভমথবা শুল্কমুক্ত্বা দত্তা বরায় যা। মৃতে পিতরি বা দত্তা সা বিজ্ঞেয়া চ পুত্রিকা॥ এতেন চতুর্ব্বিধপুত্রিকা দর্শিতা। বাক্‌কৃতা অভিসন্ধিকৃতা আগর্ভশুল্কমুক্ত্বা দত্তা পিত্রোরুপরতৌ এতস্যাং যদপত্যং তদেতৎ পিতুরিত্যুক্ত্বা বান্ধবৈর্দ্দত্তা। শঙ্খলিখিতৌ। পুত্রিকা হি পুত্রবদিতি। প্রাচেতসঃ। তস্যা অপত্যং পুত্রিকাসুতো মাতামহপিতামহানাং পিণ্ডদঃ পুত্রদৌহিত্রয়োর্ন বিশেষোঽস্ত্যনুগ্রহে। মাতামহপিতামহানামিতি বংশদ্বয়োপলক্ষণম্। পুত্রদৌহিত্রয়োরৌরসপুত্রপুত্রিকাপুত্রয়োঃ। অনুগ্রহে পার্ব্বণদ্বারা নরকোদ্ধারাদিরূপে। বিশেষাভাবঃ পুত্রবদিত্যস্য হেতুরুক্তঃ। এতচ্চোভয়পিণ্ডদাতৃত্বম্ উভয়াপেক্ষত্বাদিতি মাতামহব্রাহ্মণোপবেশনপ্রকণেঽভিহিতম্। জনকরিক্‌থগ্রহণাদপীত্যাহ মনুঃ। দৌহিত্রো হ্যখিলং রিক্‌থমপুত্রস্য পিতুর্হরেৎ। স এব দদ্যাদ্ দ্বৌ পিণ্ডৌ পিত্রে মাতামহায় চ॥ মাতুঃ প্রথমতঃ পিণ্ডং নির্ব্বপেৎ পুত্রিকাসুতঃ। দ্বিতীয়ন্তু পিতুস্তস্যাস্তৃতীয়ন্তু পিতুঃ পিতুঃ॥ দৌহিত্রোঽত্র প্রকরণাৎ পুত্রিকাপুত্রঃ। সোঽপুত্রস্য পুত্রান্তররহিতস্য জনকস্য রিক্‌থং

উভয়পিণ্ডদাতৃত্বমিতি। মাতামহবর্গপিতৃবর্গোভয়পিণ্ডদাতৃত্বমিত্যর্থঃ। জনকেতি। উভয়পিণ্ডদাতৃত্বমিতি পূর্ব্বেণান্বয়ঃ। লক্ষণাপত্তেরিতি। জনকশক্তস্য পিতৃপদস্য মাতৃজনকত্বেন বোধনে লক্ষণাপত্তেরিত্যর্থঃ। নমু কথমত্র লক্ষণা পিতৃপদস্য জনকমাত্রবচনত্বাৎ মাতৃজনকস্যাপি জনকত্বাৎ। তথাচ পিতৃপদস্য জনকত্ববিশিষ্ট এবার্থঃ। পিতৃপদস্য চ স

হরেৎ। স এব রিক্‌থহারী পুত্রিকাপুত্রঃ পিত্রে পিণ্ডং দদ্যান্নান্যঃ। অত্র পিতুর্জননী পিতুর্ম্মাতামহস্য ইতি কল্পতরুকারপ্রভৃতয়ঃ। তদসঙ্গতং পিতৃশব্দস্যামুখ্যার্থস্থাপত্তেঃ। পিত্রে মাতামহায় চেতি স্ববাক্যে পিতৃপদস্য জনকপরত্বাচ্চ। এতস্য পিণ্ডদানপরিপাটীমাহ মাতুরিতি। পুত্রিকায়া মাতামহপুত্রত্বেন পিতৃতুল্যত্বাদিতি ॥১৩৪॥

অথৈকোদ্দিষ্টম্। তস্য কালমাহ ছন্দোগপরিশিষ্টে কাত্যায়নঃ। শ্রাদ্ধমগ্নিমতঃ কার্য্যং দাহাদেকাদশেঽহনি। ধ্রুবাণি তু প্রকুর্ব্বীত প্রমীতাহনি সর্ব্বদা॥ দ্বাদশ প্রতিমাস্যানি আদ্যং ষাণ্মাসিকে তথা। সপিণ্ডীকরণঞ্চৈব ইত্যেতৎ শ্রাদ্ধষোড়শম্॥ একাহেন তু ষণ্মাসা যদা স্যুরপিবা ত্রিভিঃ। ন্যূনাঃ সংবৎসরশ্চৈব স্যাতাং ষাণ্মাসিকে তদা॥ অগ্নিমতঃ শ্রৌতাগ্নিমতঃ। দাহাদেকাদ-

সম্বন্ধিকতয়া স্বসম্বন্ধ্যুপস্থাপকত্বাৎ তাৎপর্য্যবশাৎ মাতুরেবোপস্থাপকত্বাৎ লক্ষণাং বিনৈব মাতৃজনকবোধস্য সুঘটত্বাদত আহ পিত্রে মাতামহায় চেতি ॥ ১৩৪ ॥

অথৈকোদ্দিষ্টম্। শ্রাদ্ধমগ্নিমত ইতি। অগ্নিমৎসম্প্রদানকং শ্রাদ্ধং তস্য দাহাদেকাদশেঽহনি নিরগ্নিনাপি কার্য্যং সাগ্নের্নিরগ্নেরপি দাহাবধ্যেবাশৌচশ্রবণাৎ। একাদশেঽহনীত্যত্রাহঃপদং সাবনদিনপরং ন তু তিথিপরম্। সূতকাদিপরিচ্ছেদো দিনমাসাব্দপাস্তথা। ইত্যশৌচবিহিতসাবনমাসসম্বন্ধসন্নিধানাৎ একাদশাহপদস্য দশাহোত্তরদিনত্বেন বোধকত্বাৎ। ধ্রুবাণি আবশ্যকানি আদ্যাদিসপিণ্ডনান্তানি ষোড়শশ্রাদ্ধানি। প্রমীতাহনীতি মরণনিরূপ্যতিথাবিত্যর্থঃ। আদ্যশ্রাদ্ধস্য ষাণ্মাসিকদ্বয়স্য চ ষোড়শান্তর্ভূতত্বেন তেষাং মৃতাহাকর্ত্তব্যত্বাৎ যথাশ্রুতাসঙ্গতেঃ।

হহনি শ্রাদ্ধং কার্য্যং তদবধিনা তস্যাশৌচস্মরণাৎ অশৌচান্তে চ শ্রাদ্ধবিধানাৎ স্মার্ত্তাগ্নিমতো নিরগ্নেশ্চ মরণাদেকাদশেহহনীতি বোদ্ধব্যম্। তয়োর্ম্মরণাদবধেরশৌচবিধানাৎ। যথা শঙ্খঃ। মরণাদেব কর্ত্তব্যং সংযোগো যস্য নাগ্নিনা। দাহাদূর্দ্ধমশৌচং স্যাদ্ যস্য বৈতানিকো বিধিঃ॥ অত্রাগ্নিপদং বৈতানিকগ্রহণাৎ শ্রৌতাগ্নিপরম্। বৈতানিকঃ শ্রৌতো হোমঃ। একাদশেহহনীতি অশৌচান্তোপলক্ষণম্। অথাশৌচব্যপগমে সুস্নাত ইত্যাদি বিষ্ণুবচনম্। ক্ষত্রাদিঃ সূতকান্তে তু ভোজয়েদযুজো দ্বিজানিতি মৎস্যপুরাণবচনাভ্যামেকবাক্যত্বাৎ। অতঃ ক্ষত্রাদীনামশৌচান্ত এব শ্রাদ্ধং কর্ত্তব্যং নৈকাদশাহে। এবং বক্ষ্যমাণান্যপ্যেকাদশাহশ্রাদ্ধবিধায়কানি বচনান্যশৌচা-

সর্ব্বদেতি। তেন স্বেচ্ছয়া নোৎকর্ষাপকর্ষৌ কার্য্যাবিতি তাৎপর্য্যম্। ধ্রুবাণি গণয়তি দ্বাদশেতি। শ্রাদ্ধষোড়শমিতি ধ্রুবমিতি শেষঃ। ষাণ্মাসিকদ্বয়োঃ কালমাহ একাহেন ত্বিতি। অত্র অহঃপদং তিথিপরম্। চান্দ্রমাসসম্বন্ধিতয়োপন্যস্তস্যাহঃপদস্য তিথিপরত্বনিয়মাদহোরাত্রস্য চান্দ্রমাসষটকত্বাৎ মৃতাহসাহচর্য্যাচ্চ। তেনৈকস্মিন্ দিনে তিথিদ্বয়লাভে ষাণ্মাসিকং ষষ্ঠমাসিকঞ্চ কার্য্যম্। সংবৎসরশ্চেতি পৃথগুপাদানং তদ্বর্ষেহধিমাসপাতে ত্রয়োদশে মাসি দ্বিতীয়ষাণ্মাসিককরণার্থং অন্যথা তদ্ব্যর্থং স্যাৎ। এবঞ্চ প্রথমষণ্মাসাভ্যন্তরে মলমাসপাতেহপি প্রথমষাণ্মাসিকস্য ষষ্ঠমাসিকমৃততিথিপূর্ব্বতিথিরেব কালঃ। দ্বিতীয়ষাণ্মাসিকস্য তু সপ্তমমাসিকমৃততিথিপূর্ব্বতিথিঃ। নন্বেবং সপ্তমে মাসি ক্রিয়মাণত্বাৎ দ্বিতীয়ষাণ্মাসিকত্বমনুপপন্নং তত্র ষাণ্মাসিকপদস্য ভাক্তত্বাৎ দ্বিতীয়ষণ্মাসাভ্যন্তরে মলমাসপাতে ভাক্তত্বস্যাবশ্যকত্বাৎ। বৈতানিকপরমিতি। মরণাদেব কর্ত্তব্যং সংযোগো যস্য নাগ্নিনা। দাহাদূর্দ্ধমশৌচং স্যাৎ যস্য বৈতা-

ন্তপরাণ্যেব। প্রমীতাহনীতি মৃততিথাবপরাণ্যপি শ্রাদ্ধানি কর্ত্তব্যানি। তানি ধ্রুবাণি নিত্যানি প্রমীতাহনি সর্ব্বদা ইত্যনেন প্রেতসংস্কারকাণি শ্রাদ্ধানি স্বকাল এব কার্য্যাণীতি দর্শয়তি। প্রেতসংস্কারকাণি শোড়শশ্রাদ্ধানি গণয়তি দ্বাদশ প্রতিমাস্যানীতি। ননু মাসি ভবং মাস্যং ন চ মাসিকশ্রাদ্ধং তথা অতীতে মাস্যেকত্রিংশদ্দিনে মৃতাহে ক্রিয়মাণত্বাৎ। অতএব একোদ্দিষ্টশ্রাদ্ধমভিধায়াহ বিষ্ণুঃ। এবং মৃতাহে প্রতিমাসং কুর্য্যাৎ অত্র কেচিন্মাসেন নিমিত্তেন অনন্তরতিথৌ ক্রিয়ত ইতি মাস্যপদব্যুৎপত্তিঃ ॥ ১৩৫ ॥

---

নিকো বিধিঃ ॥ ইত্যত্র উত্তরার্দ্ধে বৈতানিকাগ্নিমৃত এব দাহাবধ্যশৌচপ্রতিপত্তেরিতি ভাবঃ। অশৌচান্তপরাণ্যেবেতি। অশৌচান্তদিনপরাণ্যেবেত্যর্থঃ। এতানি ধ্রুবাণি নিত্যানীতি। অতঃ সিদ্ধং ষোড়শশ্রাদ্ধানাং নিত্যত্বম্। এতেন পিতুঃ প্রেতলোকত্যাগপিতৃলোকপ্রাপ্তিফলকত্বাৎ কাম্যত্বমেব শ্রাদ্ধষোড়শমিতি পাশ্চাত্যমতমপাস্তম্। যে তু। যস্যৈতানি ন দীয়ন্তে প্রেতশ্রাদ্ধানি ষোড়শ। পিশাচত্বং ধ্রুবং তস্য দত্তৈঃ শ্রাদ্ধশতৈরপি ॥ ইতি বচনং তন্নিত্যত্বে প্রমাণমাহুঃ তে শাস্ত্রার্থানভিজ্ঞা এব পিতৃগতনিন্দার্থবাদেন নিত্যত্বাসিদ্ধেঃ। যদকরণে প্রত্যবায় ইত্যত্র প্রত্যবায়পদস্য স্বগতপ্রত্যবায়পরত্বাৎ। অকুর্ব্বন্ বিহিতং কর্ম্ম নরো নরকমৃচ্ছতি। ইত্যত্র সামানাধিকরণ্যাবগমাৎ। ন চ প্রত্যবায়ঃ স্বগত এব তেনৈব পিতুঃ পিশাচত্বমিতি বাচ্যং তৎপিশাচত্বস্য প্রাগেব জাতত্বাৎ। ষোড়শশ্রাদ্ধাকরণে তস্মাদনিস্কৃতিমাত্রস্য বচনার্থত্বাৎ ত্রিংশদহোরাত্রাত্মকসাবনমাসাভিপ্রায়েণাশঙ্কতে নম্বিতি। ন তু প্রথমমাসিকং তথেত্যর্থঃ। মৃতাহকর্ত্তব্যতায়াং প্রমাণমাহ অতএবেতি। ত্রিংশদ্দিনাভ্যন্তরে মৃতা-

এবং ত্রৈপক্ষিকসাংবৎসরিকাদীনাং ন এবমেকাহেন তু ষণ্মাসা ইত্যনেন মৃতাহপূর্ব্বদিনে ষাণ্মাসিকত্বানুপপত্তেঃ। অন্যে তু মৃতাহে প্রতিমাসং কুর্য্যাৎ ইতি বিষ্ণুবচনে মৃতাহনি তু কর্ত্তব্যং প্রতিমাসং তু বৎসরমিতি যাজ্ঞবল্ক্যবচনে চৈকাদিনাধিকে মাসসংবৎসরপদপ্রয়োগাদ্দণ্ডিন্যায়াদজহৎস্বার্থলক্ষণয়া একাদিনাধিকমাসসংবৎসরপরত্বং মাসসংবৎসরপদয়োরিতি তচ্চিন্ত্যং দ্বিতীয়াদিমাসানামেকাদিনাধিকত্বাসম্ভবাৎ তিথিবৃদ্ধিহ্রাসাভ্যাং ন্যূনাধিকত্বসম্ভবাচ্চ। উচ্যতে। নাত্র ত্রিংশদহোরাত্রাত্মকঃ সাবনো মাসোঽঙ্গং তিথিবৃদ্ধিহ্রাসাভ্যাং তদসম্ভবাৎ কিন্তু ত্রিংশত্তিথ্যাত্মকশ্চান্দ্র এব। তথাচ সূর্য্যসিদ্ধান্তে। তৎত্রিংশতা ভবেন্মাসঃ সাবনোঽর্কোদয়ৈস্তথা। ঐন্দ্র-

হাপ্রাপ্তেরিতি ভাবঃ। নিমিত্তেন পূর্ব্ববর্ত্তিত্বাদনন্তরতিথিজ্ঞাপকেন ॥ ১৩৫ ॥

এবমিতি। এতেন ত্রৈপক্ষিকশ্রাদ্ধস্য ত্রিপক্ষানন্তরমৃতাহকর্ত্তব্যত্বমুক্তম্। অতএব ঊর্দ্ধং ত্রিপক্ষাদ্যচ্ছ্রাদ্ধং মৃতাহন্যেব তদ্ভবেদিত্যাদি সঙ্গচ্ছতে। এতেন সাবনব্যবস্থয়া পঞ্চচত্বারিংশদ্দিনে শ্রাদ্ধমিতি কেষাঞ্চিন্মতং নিরস্তম্। পঞ্চচত্বারিংশদ্দিনেতিথিপ্রাপ্ত্যনিয়মাৎ দণ্ডিন্যায়াদিতি। যথা দণ্ডিনো গচ্ছন্তীত্যত্র তাৎপর্য্যবলাদ্দণ্ডিপদমজহৎস্বার্থলক্ষণয়া দণ্ড্যদণ্ডিসমুদায়পরং তথা মাসপদমপি একদিনাধিকসমুদায়পরমিত্যর্থঃ। দ্বিতীয়াদিমাসানামিতি। অন্ত্যমৃতাহেন পূর্ব্বমাসসমাপ্তে তদুত্তরত্রিংশদন্তিমদিন এব মৃতাহপাতস্যৌৎসর্গিকত্বাদিতি ভাবঃ। তিথিবৃদ্ধিহ্রাসাভ্যামিতি। তথাচ প্রথমমাসেঽপি কদাচিত্তিথিবৃদ্ধ্যা একত্রিংশদ্দিনোত্তরমপি মৃতাহপাতাৎ তিথিহ্রাসেন চ ত্রিংশদভ্যন্তরেঽপি মৃতাহপাতান্ন নিস্তার ইতি ভাবঃ। কিন্তু ত্রিংশত্তিথ্যাত্মক ইতি।

বস্তিথিভিস্তদ্বৎ সংক্রান্ত্যা সৌর উচ্যতে॥ অতএব তিথিনৈকেন দিবসশ্চান্দ্রমানে প্রকীর্ত্তিত ইতি প্রাগুক্তম্। তেন মৃততিথের্মৃততিথিং যাবচ্চান্দ্রঃ। মৃততিথেরিত্যবধৌ পঞ্চমী। এবং মৃতাহে প্রতিমাসমিতি বচনাদন্তমৃততিথেঃ পূর্ব্বমাসশব্দার্থত্বং ন পূর্ব্বমৃততিথেরুত্তরমাসশব্দার্থতা অতো ন বিরোধঃ। আদ্যমেকাদশাহশ্রাদ্ধং ষাণ্মাসিককালমাহ একাহেন ত্বিতি। একাহন্যূনে ষাণ্মাসশব্দো গৌণঃ। এবং চতুর্থাহত্রৈপক্ষিকদ্বাদশাহানাং ন ষোড়শান্তর্ভাবঃ। ত্রৈপাক্ষিকমুক্তং ব্রহ্মপুরাণে। সূতকান্তে গুহ শ্রাদ্ধমেকোদ্দিষ্টং প্রচক্ষ্যতে।

তথাচ মৃতাহে প্রতিমাসং কুর্য্যাদিত্যাদিনা মৃততিথৌ শ্রাদ্ধস্য নির্ব্বিবাদতয়া তত্র তিথিবৃদ্ধিহ্রাসাভ্যাং ন কশ্চিদ্দোষ ইতি ভাবঃ। তন্ত্রিংশতেতি। পূর্ব্বপ্রক্রান্তষষ্টিদণ্ডাত্মকাহোরাত্রত্রিংশতা নাক্ষত্রো মাসো ভবেদিত্যর্থঃ। তথা ত্রিংশতার্কোদয়ৈঃ সাবনমাস ইত্যর্থঃ। ঐন্দবশ্চান্দ্রঃ। তদ্বৎ ত্রিংশতা। ননু পূর্ব্বমৃততিথিমাদায় ত্রিংশত্তিথ্যাত্মকমাসগণনে আগামিমৃততিথিপূর্ব্বতিথাবেব মাসপূর্ত্তেঃ প্রথমমাসে মৃততিথ্যপ্রাপ্ত্যা প্রথমমাসিকলোপঃ স্যাৎ। কিঞ্চ। একাহেন তু ষণ্মাসা যদা স্যুরপি বা ত্রিভিঃ। ন্যূনাঃ সংবৎসরশ্চৈব স্যাতাং ষাণ্মাসিকে তদা॥ ইত্যনেন একাহোনষষ্ঠমাসে মৃততিথিপূর্ব্বতিথৌ ষাণ্মাসিকশ্রাদ্ধং বিহিতং তদ্বিরোধ ইত্যত আহ এতেনেতি। ত্রিংশত্তিথ্যাত্মকমাসপরিগ্রহাদেবেত্যর্থঃ। মৃততিথের্মৃততিথিরিতি। যদ্যপি। চান্দ্রঃ শুক্লাদিদর্শান্তঃ সাবনস্ত্রিংশতা দিনৈঃ। তথা। তত্র পক্ষাবুভৌ মাসে শুক্লকৃষ্ণৌ ক্রমেণ হি। ইত্যাদিনানাবচনবলাৎ শুক্লাদিদর্শান্ত এব চান্দ্রপদং মুখ্যম্। অতএব গ্রন্থকৃতাপি মলমাসনিরূপণে ইন্দ্রাগ্নী যত্র হূয়েতে ইতি বচনব্যাখ্যাবসরে শুক্লপ্রতিপদাদিদর্শান্তো মাসশব্দার্থঃ চান্দ্রোহপ্যয়মেব ইত্যভিহিতং

দ্বাদশেঽহনি মাসে চ ত্রিপক্ষে চ ততঃ পরম্। ত্রৈপ-ক্ষিকগ্রহণে প্রায়শ্চিত্তস্মরণাচ্চ তৎসিদ্ধিঃ। যথা শঙ্খঃ। চান্দ্রায়ণং নবশ্রাদ্ধে পরাকো মাসিকে মতঃ। ত্রিপক্ষে চাতিকৃচ্ছ্রঃ স্যাৎ ষণ্মাসে কৃচ্ছ্র এব হি। আব্দিকে পাদ-কৃচ্ছ্রঃ স্যাদেকাহঃ পুনরাব্দিকে॥ তথাচ পঠন্তি। ত্রৈপক্ষিকং ত্রিপক্ষে তু বৃত্তে স্যাত্তদনন্তরম্। ব্রহ্ম-পুরাণে। নৃণাস্তু ত্যক্তদেহানাং শ্রাদ্ধাঃ ষোড়শসংখ্যয়া। চতুর্থে পঞ্চমে চৈব নবমৈকাদশে তথা॥ ততো দ্বাদশ-

---

তথাপ্যত্র যৎকিঞ্চিৎ তিথিপ্রচয়ে চান্দ্রশব্দো গৌণঃ। এবঞ্চ। মুখ্যং শ্রাদ্ধং মাসি মাসি অপর্য্যাপ্তাবৃতুং প্রতি। ইত্যাদৌ মাসর্ত্তুশব্দো গৌণাবেবেতি বোধ্যম্। অবধৌ পঞ্চমীতি। তথাচ পূর্ব্বমৃততিথেরবধিভূতত্বেন উপ-লক্ষকত্বমাত্রং ন তু মাসঘটকত্বং মাসঘটিকা ভূত্তরতিথিরেব ইত্যর্থঃ। ন বিরোধ ইতি। ন প্রথমমাসিকলোপাৎ মৃতাহে প্রতিমাসং কুর্য্যাদিত্যা-দিনা তদ্বিধানবিরোধঃ। ন বা মৃতাহপূর্ব্বেদ্যুঃ ষাণ্মাসিকবিধানবিরোধঃ আগামিমৃততিথিমাদায়ৈব পূর্ব্বমাসসমাপ্তেরিতি ভাবঃ। এতেন পূর্ব্ব-মৃততিথিমাদায় মাসবর্ষগণনা মৈথিলোক্তা হেয়া। গৌণ ইতি। ষাণ্মা-সিকপদান্তর্গতষণ্মাসশব্দো গৌণ ইত্যর্থঃ। চতুর্থাহেতি। এবঞ্চৈষাং নিত্যত্বে প্রমাণাভাবাৎ কাম্যত্বমিতি ভাবঃ। মৃতকান্ত ইতি। অশৌ-চান্তদ্বিতীয়দিন ইত্যর্থঃ। গুহেতি সম্বোধনম্। গৃহেতি পাঠে দশাহাভ্য-ন্তরীণশ্রাদ্ধপিণ্ডানাং বহির্ব্বিধানাৎ তৎপরশ্রাদ্ধস্য গৃহে ক্রিয়মাণ-ত্বাৎ গৃহশ্রাদ্ধব্যপদেশঃ। নবশ্রাদ্ধং যমবচনে বক্ষ্যমাণং কৃচ্ছ্রং প্রাজাপত্যং আব্দিকং সপিণ্ডীকরণং পুনরাব্দিকং সপিণ্ডীকরণানন্তরং পুনঃ ক্রিয়মাণং প্রথমসাংবৎসরিকম্। অত্রাপি পিতুঃ প্রেতত্বাভাবেঽপি বচনাদ্দোষঃ প্রথমাব্দেঽন্যশ্রাদ্ধাভাবাৎ। ত্রৈপক্ষিকমিতি। মরণতিথিমা-দায় ত্রিপক্ষে বৃত্তে পক্ষান্তরীণমৃততিথাবিত্যর্থঃ। তেষাং ত্যক্তদেহানাম্।

ভির্ম্মাসৈঃ শ্রাদ্ধা দ্বাদশসংখ্যয়া। কর্ত্তব্যাঃ শুচিভিস্তেষাং তত্র বিপ্রাংস্তু তর্পয়েৎ॥ শ্রাদ্ধ ইতি পুংলিঙ্গং ছান্দসম্। এতচ্চ ষোড়শশ্রাদ্ধং শাখিভেদব্যবস্থিতম্। বৌধায়নঃ। একাদশ্যাং দ্বাদশ্যাং বা শ্রাদ্ধকর্ম্ম প্রচক্ষ্যতে। বাশব্দোঽত্র সমুচ্চয়ার্থঃ। একাদশাহশ্রাদ্ধমভিধায়। দ্বিতীয়েঽহ্নি পুনস্তদ্বদেকোদ্দিষ্টং সমাচরেদিতি বক্ষ্যমাণমৎস্যপুরাণবচনাৎ॥ ১৩৬॥

অতো মজ্জিকনেনোক্তং বিকল্পার্থোঽয়ং বাশব্দঃ। অতএব শ্রাদ্ধমেকং দিনদ্বয় ইতি পঠন্তীতি প্রত্যুক্তম্। পৈঠীনসিঃ। মৃতস্য মাসি মাসি শ্রাদ্ধং কুর্য্যাৎ সংবৎস-

অত্র শ্রাদ্ধচিন্তামণিঃ। যস্যাবীরাপারশবাদেঃ সপিণ্ডনং নিষিদ্ধং তস্য ব্রহ্মপুরাণোক্তং ষোড়শশ্রাদ্ধং শাখিভেদেন ব্যবস্থিতত্বকল্পনে গৌরবাদিত্যাহ। ন চ। যানি পঞ্চদশাদ্যানি অপুত্রস্যেতরাণি চ। একস্যৈব তু দেয়ানি অপুত্রায়াশ্চ যোষিতঃ॥ ইতি ধর্ম্মপ্রদীপবচনেনাপুত্রায়াশ্চ পঞ্চদশশ্রাদ্ধবিধানাৎ শাখিভেদব্যবস্থৈব শ্রেয়সীতিবাচ্যম্। আদ্যানি পঞ্চদশশ্রাদ্ধানি যানি যানি চেতরাণি প্রেতশ্রাদ্ধসমাপ্ত্যোত্তরক্রিয়মাণ শ্রাদ্ধানি তান্যপুত্রস্যাপুত্রায়াশ্চ একস্যৈব একমুদ্দিশ্যৈব দেয়ানীতি বচনার্থে তস্য পঞ্চদশশ্রাদ্ধবিধায়কত্বাভাবাদিতি চেন্ন চতুর্থে পঞ্চমে চৈবেতি যমবচনম্। যস্মিন্নবে পুরাণে বা বিশ্বেদেবা ন লেভিরে। আসুরং তদ্ভবেচ্ছ্রাদ্ধং বৃষলং মন্ত্রবর্জ্জিতম্॥ ইত্যাশ্বায়নবচনয়োরেকবাক্যতয়া শাখিভেদব্যবস্থিতত্বস্যৈব সিদ্ধেঃ সামযজুষোর্নবশ্রাদ্ধাদৌ বিশ্বদেববিরহাৎ। এতেন ব্রহ্মপুরাণীয়কল্পে দেবমাপ্যায়তমিতি বোধ্যম্॥ ১৩৬॥

বিকল্পার্থ ইতি। একাদশাহে তদসম্ভবে দ্বাদশেঽহনীতি ব্যবস্থিতবিকল্পার্থ ইত্যর্থঃ। মৃতস্য মাসি মাসীতি। তেন মরণানন্তরং বৎসরপর্য্যন্তং প্রতিমাসং কুর্য্যাদিত্যর্থঃ। মরণতিথেস্তু পূর্ব্বমাসীয়ত্বাৎ তস্য

রান্তে বিসর্জ্জনং নবমমাস্যমিত্যেকে। বিসর্জ্জনং সপিণ্ডীকরণং নবমে মাসি চ সপিণ্ডীকরণমশক্তবিষয়ম্। যমঃ। চতুর্থে পঞ্চমে চৈব নবমৈকাদশে তথা। যদত্র দীয়তে জন্তোস্তন্নবশ্রাদ্ধমুচ্যতে ॥ অস্থিসঞ্চয়নাদর্ব্বাগাহিতাগ্নের্দ্বিজন্মনঃ। অযুগ্মান্ ভোজয়েদ্বিপ্রাংস্তন্নবশ্রাদ্ধমুচ্যতে ॥ পঞ্চমে নবমে শ্রাদ্ধং প্রেতোপকারার্থমনাবশ্যকং নবশ্রাদ্ধসংজ্ঞা এতদ্গ্রহণে প্রায়শ্চিত্তবিশেষজ্ঞাপনার্থং আহিতাগ্নেস্ত্বস্থিসঞ্চয়নাদর্ব্বাগপি শ্রাদ্ধান্তরমস্তীতি দর্শিতম্। ষোড়শশ্রাদ্ধানাঞ্চ প্রমাণমভিহিতম্। ফলমাহ দেবলঃ। একাদশাদিভিঃ শ্রাদ্ধৈর্ম্ম তস্যাপ্যায়নং ভবেৎ। সম্যক্ সংবৎসরে পূর্ণে পিতৃণাং স্থানমৃচ্ছতি ॥ আপ্যায়নং তুষ্টিঃ প্রেতত্বপরীহারঃ সংবৎসরে পূর্ণ ইতি সংবৎসরে বিহিতসপিণ্ডনস্য পিতৃত্বপ্রাপ্তিফলমিত্যর্থঃ। এতেন প্রেতত্ব-

---

চ মরণানন্তরত্বাভাবাৎ তত্রাকরণে দিনবীপ্সাবাধঃ। অশক্তবিষয়মিতি। অশক্তিশ্চ ভাব্যশক্তিনিশ্চয়ঃ। প্রেতোপকারার্থমিতি। শাখিভেদে প্রেতোপকারার্থমিত্যর্থঃ। তুষ্টিস্তৃপ্তিরেব তস্যাশ্চ প্রেতত্বদশায়ামসম্ভবাদাহ প্রেতত্বপরীহার ইতি। ননু কথং সপিণ্ডনস্য প্রেতত্বপরীহারঃ ফলং দেবলবচনে তস্য পিতৃলোকপ্রাপ্ত্যভিধানাদত আহ ব্যক্তমাহেতি। যম ইতি। এতেন পঞ্চদশশ্রাদ্ধানাং প্রেতত্বপরীহারমাত্রং ফলম্। সপিণ্ডনস্য তু প্রেতত্বপরীহারঃ পিতৃলোকপ্রাপ্তিশ্চ ইত্যুভয়ং ফলমিত্যুক্তম্। ইত্থঞ্চ ষোড়শশ্রাদ্ধৈঃ ষোড়শকলিকাপূর্ব্বাণি জন্যন্তে। তৈশ্চ পরমাপূর্ব্বমেকং তস্মাৎ প্রেতত্বপরীহারঃ। সপিণ্ডনেন চ পৃথক্ পরমাপূর্ব্বান্তরং জন্যতে। তেন পিতৃত্বপ্রাপ্তির্জায়তে। অন্যথা একস্যৈব পরমাপূর্ব্বস্য উভয়জনকত্বাভিধানে পঞ্চদশশ্রাদ্ধানা-

পরীহারঃ ষোড়শশ্রাদ্ধফলং পিতৃলোকপ্রাপ্তিঃ সপিণ্ডনস্ত্বেত্যুক্তম্। প্রেতত্বপরীহারঃ ফলমিতি ব্যক্তমাহ যমঃ। যস্যৈতানি ন দীয়ন্তে প্রেতশ্রাদ্ধানি ষোড়শ। পিশাচত্বং ধ্রুবং তস্য দত্তৈঃ শ্রাদ্ধশতৈরপি॥ শঙ্খঃ। ততঃ শ্রাদ্ধমশুদ্ধৌ তু কুর্য্যাদেকাদশে তথা। কর্ত্তুস্তাৎকালিকী শুদ্ধিরশুদ্ধঃ পুনরেব সঃ॥ অশুদ্ধৌ চতুর্থাহাদৌ তথা একাদশে শ্রাদ্ধং কর্ত্তব্যম্। কথমশুদ্ধৌ শ্রাদ্ধং শৌচস্যাধি-

---

মপি পিতৃত্বপ্রাপ্তিফলকত্বাপত্তেরিতি বোধ্যম্। শ্রাদ্ধবিধানাক্ষেপাদিতি। তাৎকালিকীত্যত্র তৎপদেন বিধেয়স্য শ্রাদ্ধস্য প্রক্রান্তস্য পরামর্শাদিত্যর্থঃ। তন্মাত্রনিষ্ঠেতি। শ্রাদ্ধং শ্রাদ্ধাধিকরণসময়মাত্রে শুদ্ধিরিত্যর্থঃ। কর্ম্মান্তরে ইতি। কর্ম্মান্তরে ক্রিয়মাণে তৎকালস্য শ্রাদ্ধাধিকরণভিন্নকালতয়া তদানীমশুদ্ধেঃ স্থিরত্বাদিতি ভাবঃ। কেচিৎ তু শ্রাদ্ধবিধানাক্ষেপাৎ শ্রাদ্ধবিধায়কবাক্যস্যাক্ষেপাৎ বৈয়র্থ্যাদিতি যাবদিত্যাহুঃ। অত্র সাম্প্রদায়িকাঃ। এতেন তুল্যন্যায়াদেকাহবৃষোৎসর্গে পূর্ব্বদিনেঽশৌচসত্ত্বেঽপ্যধিবাসঃ কার্য্য ইত্যায়াতং ন চান্যদা বৃষোৎসর্গ এবাধিবাসোঽঙ্গং ন তদানীমিতি চেৎ একাদশাহবৃষোৎসর্গবিধিঃ কিং নিরঙ্গং বৃষোৎসর্গং বিদধাতি উত সাঙ্গং বা। আদ্যে অঙ্গান্তরেঽপি দত্তোঽঞ্জলিঃ। দ্বিতীয়েঽশৌচান্তদ্বিতীয়দিনে বৃষোৎসর্গঃ কার্য্য ইতি বিধিরেবাঙ্গান্তরবদধিবাসং বিদধাতি একাদশাহশ্রাদ্ধপূর্ব্বদিনে নিমন্ত্রণবৎ প্রাচীনাচারোঽপ্যেতাদৃশ এব ইতি বদন্তি। তদসৎ প্রধানাধিকারস্যৈবাঙ্গাধিকারতয়া প্রধানাধিকারস্য শৌচস্য পূর্ব্বদিনেঽভাবাৎ কথং তদঙ্গাধিবাসানুষ্ঠানং অন্যথা তুল্যন্যায়াৎ নৈমিত্তিকে প্রধানাধিকারস্য নিমিত্তনিশ্চয়স্যাভাবেঽপি ক্যাশ্লিষ্টেজ্যাবিধিবলাৎ। তত্র তদঙ্গপূর্ব্বদিনাবাহনমপি স্যাৎ। যচ্চোক্তং বিধিরেবাধিবাসং বোধয়তীতি। তদপ্যসৎ। ন হি বৃষোৎসর্গং কুর্ব্বীত ইত্যাদিবিধয়ঃ সাঙ্গবৃষোৎসর্গং

কারিবিশেষণত্বাৎ কালাশৌচাধিকরণে দর্শিতমিত্যাহ কর্ত্তুস্তাৎকালিকীতি। শ্রাদ্ধবিধানাপেক্ষয়া তাবন্মাত্রনিষ্ঠাশুদ্ধিঃ কল্প্যতে। স পুনরশুদ্ধ এব কর্ম্মান্তর ইতি শেষঃ। ব্যাঘ্রঃ। একাদশে চতুর্থে চ মাসি মাসি চ বৎসরম্। প্রতিসংবৎসরঞ্চৈবমেকোদ্দিষ্টং মৃতাহনি॥ বৎসরং ব্যাপ্য মাসি মাসি কার্য্যমিতি সম্বন্ধঃ। মৎস্যপুরাণে। তত একাদশাহে তু দ্বিজানেকাদশৈব তু। ক্ষত্রাদিঃ সূতকান্তে তু ভোজয়েদযুজো দ্বিজান্। দ্বিতীয়েঽহ্নি পুনস্তদ্বদেকোদ্দিষ্টং সমাচরেৎ॥ একাদশদ্বিজভোজনং ফলা-

বোধয়ন্তি লক্ষণাপত্তেঃ অঙ্গবিধানবৈয়র্থ্যাপত্তেশ্চ। জীবৎপিতৃকস্যেব পিতামহাদিভ্যঃ তুল্যন্যায়াৎ বৃদ্ধিশ্রাদ্ধাপত্তেশ্চ কিন্তু প্রধানবিধিতঃ প্রধানমাত্রবোধঃ। অনন্তরং কিং কেন কথমিত্যাকাঙ্ক্ষায়ামঙ্গবিধয়ঃ প্রবর্ত্তন্তে তেভ্য এব তত্তদঙ্গাবগতেঃ। অত্র চাধিবাসবিধির্বৃষোৎসর্গসামান্যবিষয়ঃ ন তু বিশিষ্যৈকাদশাহবৃষোৎসর্গবিষয়ঃ। সামান্যস্য চ তদিতরত্র চরিতার্থত্বেন শৌচাধিকারবিধেঃ অশৌচে কর্ম্মনিষেধকবিধেশ্চ বাধাসামর্থ্যাৎ। একাদশাহীয়শ্রাদ্ধনিমন্ত্রণস্য চ প্রাতরেব তদ্দিনে স্নানোত্তরং কর্ত্তব্যত্বাৎ পূর্ব্বদিনাসম্ভব এব প্রাতর্নিমন্ত্রণবিধানাদিতি সংক্ষেপঃ। তত্র একাদশাহ ইতি। মরণদিনাদেকাদশাহে ইত্যর্থঃ। ব্রাহ্মণমাত্রবিষয়মেতৎ। সমীপবচন ইতি। ন ত্ববয়বার্থকঃ আদ্যমেকাদশেঽহনীত্যাদিনা সহৈকবাক্যতয়া দশমেঽহনি অরণ্যং গত্বা কৃতশ্মশ্রুকর্ম্মাণ ইত্যুপক্রম্য শ্বোভূতে একোদ্দিষ্টং কুর্য্যাদিতি হারীতবচনেন ঊর্দ্ধং দশম্যাঃ পরেদ্যুস্তচ্ছ্রাদ্ধমিতি বৈজবাপবচনেন সহৈকবাক্যতয়া চ অশৌচান্তদ্বিতীয়দিনস্যৈব নিমিত্তত্বাদিতি ভাবঃ। এতেনাশৌচব্যপগমে ইতি বিষ্ণুসূত্রাদশৌচব্যপগম এব নিমিত্তম্। ব্যপগমশ্চ নাশৌচ-

তিশয়ার্থম্। একাদশাহশ্রাদ্ধং ন ক্ষত্রাদিবিষয়মিত্যাহ ক্ষত্রাদিরিতি। ক্ষত্রাদিঃ পুনরশৌচান্তে শ্রাদ্ধং কুর্য্যাৎ। অন্তশব্দঃ সমীপবচনঃ। অতএব বিষ্ণুঃ। অথাশৌচব্যপগম ইতি। এবঞ্চৈকাদশাহশ্রাদ্ধবিধায়কানি যানি বৌধায়নবচনানি তানি ব্রাহ্মণবিষয়কাণি অশৌচান্তোপলক্ষকাণি বা মৎস্যপুরাণবিষ্ণুবচনৈকবাক্যত্বাৎ ন তু মুখ্যৈকাদশাহে চাতুর্ব্বর্ণ্যশ্রাদ্ধবিষয়াণি মৎস্যপুরাণবিষ্ণুবচনবিরোধাচ্চ ॥ ১৩৭ ॥

কিঞ্চ। রাজ্ঞাঞ্চ দশমঃ পিণ্ডো দ্বাদশেঽহনি দীয়তে।

ধ্বংসমাত্রং তস্যানন্তত্বেনাতিপ্রসঙ্গাৎ কিন্তু তদুৎপত্তিঃ তৎসম্বন্ধিদিনমিতি যাবৎ। এবঞ্চ সদ্যঃশৌচে তদ্দিন এবাদ্যশ্রাদ্ধং বৃষোৎসর্গাদিকঞ্চ কার্য্যমিতি দ্বৈতনির্ণয়োক্তমসৎ রাত্রৌ সদ্যঃশৌচজ্ঞানে শ্রাদ্ধাদিনিষেধাৎ পরদিনে চাশৌচব্যপগমরূপনিমিত্তাভাবাৎ বৃষোৎসর্গাদীনাং লোপপ্রসঙ্গাৎ শ্রাদ্ধস্য চ কৃষ্ণৈকাদশ্যাং করণপ্রসঙ্গাৎ ইষ্টাপত্তৌ সকলেষ্টব্যবহারবিরোধাৎ উক্তহারীতবচনবিরোধাচ্চ। এতেন চ শুদ্ধিপ্রথমদিনত্বেন নিমিত্তত্বমিত্যপি নিরস্তম্। তথাত্বে বাক্যে তথোল্লেখাপ্রসঙ্গাচ্চ তস্মাৎ সদ্যঃশৌচেঽপি পরদিন এব শ্রাদ্ধং বৃষোৎসর্গাদিকঞ্চ সর্ব্বং কার্য্যমিতি মতং সাধীয়ঃ। অতএব। মিত্রাণাং তদপত্যানাং শ্রোত্রিয়াণাং গুরোস্তথা। ভাগিনেয়সুতানাঞ্চ সর্ব্বেষাং ত্বপরেঽহনি॥ শ্রাদ্ধং কার্য্যঞ্চ প্রথমে স্নাত্বা কৃত্বা জলক্রিয়াম্। ইত্যাদিপুরাণে সদ্যঃশৌচস্থানেঽপি দ্বিতীয়দিনে শ্রাদ্ধাদিকং স্পষ্টমেবোক্তং ব্যাখ্যাস্যতে চ স্বয়ং যস্য যাবদশৌচং তস্মাদপরদিনে ইতি॥ ১৩৭॥

মাসে পূর্ণেঽহ্নীতি। অত্র মাসপদং সাবনপরং সূতকাদিপরিচ্ছেদ ইত্যুক্তবচনাৎ। দিনান্যষ্টাবিতি। অত্র পক্ষে পিণ্ডদ্বয়ং মাসশেষে দেয়ম্।

বৈশ্যস্য পঞ্চদশমে জ্ঞেয়স্তু দশমস্তথা। শূদ্রস্য দশমঃ পিণ্ডো মাসে পূর্ণেহহ্নি দীয়তে॥ ইত্যাদিপুরাণবচনাৎ। পিণ্ডাঃ শূদ্রায় দাতব্যো দিনান্যষ্টৌ নবাথবা। সম্পূর্ণে তু ততো মাসে পিণ্ডশেষং সমাপয়েৎ॥ ইতি প্রচেতো-বচনাচ্চ। দ্বাদশপঞ্চদশত্রিংশদ্দিনেষু ক্ষত্রিয়বৈশ্যশূদ্রাণাং দশমপিণ্ডদানাবগতেস্তেষামপ্যশৌচান্ত এব শ্রাদ্ধং যুজ্যতে এবঞ্চ একাদশাহশ্রুতেরশৌচান্তোপলক্ষকত্বে ত্র্যহৈকা-হাশৌচেঽপ্যশৌচান্ত এব শ্রাদ্ধম্। এতেন মুখ্যদশাহ এব দশমপিণ্ডদানং সমাপ্য চতুর্ভিরেব বর্ণৈঃ সংপূর্ণত্র্যহ একাহাশৌচিভিরেকাদশাহ এব শ্রাদ্ধং নিবর্ত্ত্যত ইতি প্রাচামাচারো দুরাচার এব। ইদানীমেকোদ্দিষ্টেতি-কর্ত্তব্যতামাহ শাতাতপঃ। একোদ্দিষ্টন্তু যচ্ছ্রাদ্ধং তন্নৈ-মিত্তিকমুচ্যতে। তদপ্যদৈবং কর্ত্তব্যমযুগ্মানাশয়েদ্দ্বিজান্॥

---

যুজ্যত ইতি। পিণ্ডদানানন্তরমেব শ্রাদ্ধবিধানাৎ তথৈব পিণ্ডদানস্য পূর্ব্বক্রিয়াত্বস্য শ্রাদ্ধস্য মধ্যমক্রিয়াত্বস্যোপপন্নত্বাচ্চেতি ভাবঃ। একা-হাশৌচেতি। দ্বিতীয়দিন এব শ্রাদ্ধং যুক্তং হারীতাদিবচনাদিতি বোধ্যম্। দীক্ষণীয়াদিম্বিতি। প্রযাজাখ্যাহুতিপঞ্চকস্য দর্শপৌর্ণমা-সাঙ্গভূতস্য দীক্ষণীয়াদিম্বিষ্টিষু নিষেধানুপপত্ত্যা তাসু দর্শপৌর্ণমাসধর্ম্মা-তিদেশস্তত্র কল্প্যতে তদ্বদিহাপীত্যর্থঃ। অত্রাতিদেশঃ পঞ্চবিধঃ শাস্ত্র-কার্য্যনিমিত্তব্যপদেশরূপভেদাৎ। শাস্ত্রেণাতিদেশো যথা শ্রুতৌ সমান-মিতরৎ শ্যেনেনেতি। অত্র সমানপদেনাতিদেশঃ। স্মৃতাবপি নিত্যেন তুল্যং শেষং স্যাদিতি। অত্র তুল্যশব্দেনাতিদেশঃ। কার্য্যেণাতিদেশো যথা অপ্রযাজাস্তা ইত্যত্রাতিদেশস্য কার্য্যেণ নিষেধেন দর্শপৌর্ণমাসধর্ম্মাতি-দেশঃ। নিমিত্তত্বেনাতিদেশো যথা মৌদ্গং চরুং নির্ব্বপেৎ শ্রীকাম ইতি

অদৈবং কর্ত্তব্যমিত্যপ্রাপ্তদেবশ্রাদ্ধনিষেধানুপপত্ত্যা পার্ব্বণেতিকর্ত্তব্যতাতিদেশঃ কল্প্যতে। দীক্ষণীয়াদিষু অপ্রযাজাস্তা ইতি নিষেধানুপপত্ত্যা দর্শপৌর্ণমাসধর্ম্মাতিদেশবৎ। কাত্যায়নঃ। একোহর্ঘ্য একং পবিত্রং একঃ পিণ্ডো নাবাহনং নাগ্নৌকরণং নাত্র বিশ্বেদেবাঃ স্বদিতমিতি তৃপ্তিপ্রশ্নঃ সুস্বদিতমিত্যনুজ্ঞানং উপতিষ্ঠতামিত্যক্ষয্যস্থানে অভিরম্যতামিতি বিসর্গোঽভিরতাঃ স্ম ইত্যপরে। নন্বেকং পবিত্রমিত্যত্র ন পবিত্রবিধিঃ অতিদেশাদেৎপ্রাপ্তেঃ। অপ্রাপ্তপ্রাপকলক্ষণস্য বিধিত্বস্যাযোগাৎ অতিদেশতঃ প্রাপ্তের্ব্বিলম্বিতত্বাদগ্রত এব উপদেশস্য

বিকৃতৌ শ্রূয়তে। অত্র প্রাকৃতব্রীহিধর্ম্মাঃ প্রোক্ষণাদয়ো মুদ্গাচরৌ কল্প্যন্তে। ন বেতি সন্দেহে সিদ্ধান্তঃ ব্রীহিকার্য্যকারিণি মুদ্গে ব্রীহিকার্য্যনিমিত্তত্বাৎ ব্রীহিধর্ম্মাঃ প্রোক্ষণাদয়ঃ স্যুরিতি ব্যপদেশেনাতিদেশো যথা শ্রুতৌ মাসমগ্নিহোত্রং জুহোতীতি। অত্র মাসসাধ্যায়নাখ্যযাগেঽগ্নিহোত্রপদব্যপদেশাদগ্নিহোত্রধর্ম্মাতিদেশঃ। রূপেণ তদন্যত্বরূপেণাতিদেশো যথা যজমানাদন্যোযূপ ইতি শ্রুতৌ যূপে যজমানাদন্যত্বরূপাবগমায় যজমানধর্ম্মস্য তদীয়পরিমাণস্যাতিদেশঃ। প্রকৃতে চ কার্য্যাতিদেশঃ কার্য্যেণ তদপ্যদৈবং কর্ত্তব্যমিতি দৈবনিষেধেন অতিদেশস্য কার্য্যেণ পার্ব্বণধর্ম্মাতিদেশাৎ। নাবাহনমিতি। অয়ঞ্চাবাহননিষেধঃ শ্রাদ্ধার্থাবাহনবিষয়ঃ শ্রাদ্ধস্যৈবোপস্থিতত্বাৎ। ন তু পিণ্ডার্থাবাহনস্যেতি স্মার্ত্তাঃ। বিলম্বিতত্বাদিতি। নাবাহনমিত্যাদিনা নিষেধাবগতৌ তদন্যথানুপপত্ত্যা অতিদেশকল্পনা অনন্তরমতিদেশাৎ পবিত্রপ্রাপ্তিরিতি বিলম্বিতত্বাৎ তদপেক্ষয়াগ্রত এবোপদেশবিধিত্ববোধকত্বমিত্যর্থঃ। তদর্থেতি বিধ্যর্থশাস্ত্রেত্যর্থঃ। নন্মু প্রাপ্তপ্রাপকেত্যত্র নিষ্ঠানির্দ্দেশাৎ পশ্চাৎ প্রাপ্তিসত্ত্বেঽপি বিধিত্বং স্যাদাহ অপ্রাপ্তপ্রাপক ইতি। অবিবক্ষি-

বিধিত্বমিতি চেন্ন যত্র তদ্বিধিত্বমনপেক্ষ্যান্যতঃ প্রাপ্তিঃ পশ্চাদপি স্যান্ন তত্র বিধিত্বমিতি তদর্থশাস্ত্রাধিকরণে দর্শিতত্বাৎ অপ্রাপ্তপ্রাপকো বিধিরিত্যত্রোক্তপ্রত্যয়স্যা-বিবক্ষিতভূতকালত্বাৎ। ন চাতিদেশাৎ পবিত্রষট্প্রাপ্তা-বেকত্ববিধিঃ এককরণসাধ্যে একোদ্দিষ্টাপূর্ব্বে এককরণ-ধর্ম্মাকাঙ্ক্ষয়ৈকস্যৈব পবিত্রস্যাতিদেশতো লাভাৎ। অত-এবাষ্টমিকবিকৃত্যধিকরণে সৌর্য্যঞ্চরুং নির্ব্বপেৎ ব্রহ্ম-বর্চ্চসকাম ইত্যত্র ষট্করণসাধ্যদর্শপৌর্ণমাসাপূর্ব্বস্য এক-করণধর্ম্মাতিদেশ উক্তঃ॥ ১৩৮॥

তেতি। বিধিপ্রতিপাদ্যার্থস্য প্রকারান্তরেণ প্রাপ্তিসত্ত্ব এব বিধের্ব্বৈ-য়র্থ্যং অতঃ প্রাপ্তিযোগ্যতামাত্রং বিবক্ষিতং ন ভূতীতপ্রাপ্তিরিতি ভাবঃ। একো পূর্ব্ব ইতি। অয়মর্থঃ। গুরুমতে কৃতিসাধ্যাপূর্ব্বং লিঙর্থঃ। তত্রৈব চ প্রকৃত্যর্থযাগাদেঃ কারণত্বেনান্বয়ঃ। তথাচোক্তম্। কৃতিতৎসাধ্য-মধ্যস্থো যাগাদির্ব্বিষয়ো মতঃ। কার্য্যে সংঘটিতাকারে করণত্বেন সম্মতঃ॥ ইতি কারিকার্থস্তু কৃত্যা তৎসাধ্যে কার্য্যে পরমাপূর্ব্বে জন-নীয়ে যাগাদিস্মধ্যস্থো দ্বারভূতঃ সংঘটিতাকারে কৃতিসাধ্যত্ববিশিষ্টে কার্য্যে করণত্বেনান্বেতীতি সম্মতঃ ইতি। অতএব দর্শপৌর্ণমাসাভ্যাং যজেতেত্যত্র তৃতীয়ার্থঃ করণতা তদ্দ্বারা দর্শপৌর্ণমাসয়োর্ব্বিধ্যর্থকার্য্যে-ঽন্বয়ঃ। তথাচৈকোদ্দিষ্টং কুর্য্যাদিতি বিধেঃ একোদ্দিষ্টকরণং কৃতি-সাধ্যং কার্য্যং ইতি বোধঃ। একোদ্দিষ্টশ্রাদ্ধসাধ্যাপূর্ব্বজ্ঞানানন্তরমে-কোদ্দিষ্টশ্রাদ্ধধর্ম্মাকাঙ্ক্ষোদয়াৎ তদ্বলেনাতিদেশাদেকপবিত্রলাভ ইত্য-ত্রানুরূপং দৃষ্টান্তমাহ অতএবেতি। অষ্টমেঽধ্যায়ে ইত্যর্থঃ। বিকৃতি-ভূতঃ সূর্য্যযাগ একঃ তৎসাধ্যাপূর্ব্বে ষড়্যাগসাধ্যাপূর্ব্বকরণস্যৈকস্য এক-যাগস্যাতিদেশ উক্তো ন তু ষন্নামনাকাঙ্ক্ষিতত্বাৎ তদত্রাপীত্যর্থঃ ॥১৩৮॥

এতৎসিদ্ধান্তন্যায়মূলা পবিত্রৈকত্বস্মৃতিরিতি চেন্ন তথাপ্যর্ঘ্যৈকত্বাৎ। পবিত্রৈকত্বপ্রাপ্তৌ বিধিত্বং ন স্যাৎ। ন চ পবিত্রশব্দেন স্বাবয়বভূতদললক্ষণা কার্য্যা অনুপপত্ত্যভাবাৎ। ন চ দলে মুখ্যত্বং বিশিষ্টদ্বিদলবাচিত্বাৎ পবিত্রশব্দস্য। যথা ছন্দোগপরিশিষ্টে কাত্যায়নঃ। অনন্তর্গর্ব্ভিণং সাগ্রং কৌশং দ্বিদলমেব চ। প্রাদেশমাত্রং বিজ্ঞেয়ং পবিত্রং যত্র কুত্রচিৎ॥ উচ্যতে। যত এব বৈয়র্থ্যং স্যাদত এব পবিত্রশব্দে দললক্ষণোচ্যতে। কিঞ্চ

---

বিধিত্বং ন স্যাদিতি। যদ্যপি ন্যায়মূলত্বেঽপি বিধিত্বং নাস্তি তথাপীত্যপির্ভিন্নক্রমে তেন তথা ন্যায়মূলতয়া অর্থৈক্যাৎ পবিত্রৈক্যপ্রাপ্তাবপি বিধিত্বং ন স্যাদিত্যর্থঃ। অত্র শ্রাদ্ধচিন্তামণিঃ। শ্রুতিপ্রাপ্তেঽর্থে প্রকরণাদীনামনবকাশাদেকং পবিত্রমিতি সার্থকং অন্যথা একোদ্দিষ্টত্বাদর্ঘ্যৈকস্যাপি লাভাৎ একোঽর্ঘ্য ইত্যপি ব্যর্থং স্যাদিত্যাহ। তদসৎ তথাপি বিধিবৈয়র্থ্যানুদ্ধারাৎ। ন চেতি। বিশিষ্টদ্বিদলবাচিপবিত্র শব্দস্য স্বাবয়বভূতেঽর্ঘ্যৈকদেশে বিশিষ্টৈকদলে লক্ষণা কার্য্যা ইতি ন চেত্যর্থঃ। অনুপপত্ত্যভাবাদিতি। গঙ্গায়াং ঘোষ ইত্যাদিরিবান্বয়ানুপপত্ত্যভাবাদিত্যর্থঃ। বৈয়র্থ্যরূপানুপপত্তিঃ স্বয়মেব বক্ষ্যতে সিদ্ধান্তে। অনন্তর্গর্ভিণমিতি। অন্তর্গর্ভবদ্দলেতরদলমিত্যর্থঃ। তেন তৃতীয়াদিদলগ্রহণমিতি সাম্প্রদায়িকাঃ। অন্তর্গর্ভস্য ভেদরূপোঽভাবঃ অনন্তর্গর্ভং তদযুক্তমন্তর্গর্ভভিন্নমিত্যর্থঃ। তেন দ্বিতীয়াদিদলগ্রহণমিতি স্মার্ত্তাঃ তদসৎ অন্তঃপদবৈয়র্থ্যাপত্তেঃ। মিশ্রাস্তু অন্তঃপদং সার্থকীকৃত্য গর্ভপ্রথমং গর্ভিদ্বিতীয়ং অনন্তগর্ভীতি তৃতীয়ং অন্তর্গর্ভোঽস্যাস্তীতি ব্যুৎপত্তেঃ তদ্ভিন্নং তেন চতুর্থাদিদলগ্রহণমিতি প্রাহুঃ। কৌশমিত্যনেন কুশপদস্য গ্রহে শক্তির্দ্দর্শিতা। ননু লক্ষণৈব ইত্যত আহ কিঞ্চেতি প্রকৃতাবিতি। প্রকৃতীভূতযাগে বিধিমন্ত্রয়োর্দ্দলে প্রবৃত্তত্বাৎ প্রযুক্তত্বা-

কিঞ্চ প্রকৃতৌ বিধৌ মন্ত্রে চ পবিত্রশব্দস্য দলে প্রবৃত্তত্বান্নি-রূঢ়লক্ষণেয়ম্। নিরূঢ়লক্ষণা চ মুখ্যতুল্যেত্যুক্তং সর্ব্বপি-ষ্টাধিকরণে। তথাচ প্রকৃতৌ গোভিলঃ। তত এব বর্হিষঃ প্রাদেশমাত্রে পবিত্রে কুরুতে ওষধীমন্তর্দ্ধায় ছিনত্তি ন নখেন পবিত্রেস্থো বৈষ্ণব্যাবিতি অথৈনে অদ্ভিরনুমার্ষ্টি বিষ্ণোর্ম্মনসা পূতেস্থ ইত্যত্রাপি সাঙ্কেতিকপবিত্রপরত্ব-মিতি চেন্ন পবিত্রে কুরুত ইতি বিধৌ ছেদনাদিমন্ত্রে চ দ্বিবচনানুপপত্তেঃ প্রাদেশবিধানানর্থক্যাচ্চ। প্যারস্করো-ঽপি। অর্থবদুপস্তীর্য্য পবিত্রে কৃত্বেতি। দর্ভপরৈতেব

দিত্যর্থঃ। নিরূঢ়েতি। নিরূঢ়লক্ষণা চ ন দূষণাবহেতি ভাবঃ। সর্ব্ব-পিষ্টাধিকরণ ইতি। তদ্‌যথা সর্ব্বপিষ্টং মিথুনেন পেষণীয়মিতি শ্রূয়তে। অত্র মিথুনশব্দস্য সপুত্রপাষাণপরত্বে লক্ষণাপ্রসঙ্গাৎ মিথুনপদেন স্ত্রীপু-রুষাবেবোক্তৌ ইতি পূর্ব্বপক্ষে সিদ্ধান্তসূত্রম্। নিরূঢ়ত্বাদিতি। নিরূ-ঢ়লক্ষণা শক্তিতুল্যা শক্তিবত্তস্যা অপি ঝটিত্যুপস্থাপকত্বাৎ। তেন মিথুন-শব্দস্য সপুত্রপেষণপাষাণে নিরূঢ়ত্বাৎ। অত্র সপুত্রপাষাণ এবার্থঃ। অন্যথা কুত্র পেষণীয়মিত্যনধ্যবসায়ঃ স্যাৎ। পেষণে স্ত্রিয়া অপ্যন্বয়ঃ স্যাদিতি। অতএবেতি। তত আস্তৃতবর্হিষ ইত্যর্থঃ। ন নখেনেতি। নখমাত্রনিষেধাদ্দোষবিধানাপ্রকারান্তরেণাপি ছেদনমবগময়তি ছেদনা-দীত্যাদিনা মার্জ্জনগ্রহণম্। অর্থাস্ত সাঙ্কেতিকপবিত্রদ্বয়পরৈতেব। অতো ন দ্বিবচানুপপত্তিরত আহ প্রাদেশবিধানেতি। ন চ প্রাদেশবিধান-মিতরবিশেষণনিরাসার্থমিতি বাচ্যং পরিসংখ্যাপ্রসঙ্গাৎ। তথাপি পবিত্রপদলক্ষণায়া দুষ্পরিহারত্বাচ্চ। দর্ভপরৈতেবেতি। অস্ত্র কুশং কুথো দর্ভঃ পবিত্রমথ ইতি লিঙ্গানুশাসনাৎ। দর্ভাঃ পবিত্রমিত্যুক্তেঃ পবিত্রশব্দস্য কুশগুচ্ছেঽপি শক্তত্বাৎ ন তু সাঙ্কেতিকপবিত্রৈকদলপরতা

কুতো ন ভবতীতি চেন্ন বর্হিষ ইতি ষষ্ঠ্যা অবয়বাবয়বি-সম্বন্ধপ্রতীতেঃ। অনন্তর্গর্ভিত্বসাগ্রত্বাদয়ঃ পরিশিষ্টবচনা-ল্লভ্যন্তে। হোমপ্রকরণপঠিতমিদম্। পার্ব্বণে তু পাত্রেষু পবিত্রান্তর্হিতেষ্বিত্যেতাবন্মাত্রমেব শ্রূয়তে ইতি চেন্ন। আকাঙ্ক্ষয়া পার্ব্বণে হোমাঙ্গপবিত্রধর্ম্মাতিদেশাৎ। ইতরথা তত্র সাঙ্কেতিকপবিত্রধর্ম্মমাত্রানুষ্ঠানে মার্জ্জন-মন্ত্রচ্ছেদনমন্ত্রাদীনামনুষ্ঠানং ন স্যাৎ॥ ১৩৯॥

---

লক্ষণাপ্রসঙ্গাদিতি ভাবঃ। অবয়বাবয়বিসম্বন্ধেতি। তথাচ কুশগুচ্ছ-রূপদর্ভপরত্বে তত্র কুশগুচ্ছস্য বর্হিষোঽবয়বাবয়বিসম্বন্ধাভাবাদনন্বয়ঃ স্যাদিতি দলপরতৈব পবিত্রশব্দস্যেতি ভাবঃ। ন চাস্তৃতবর্হিষো দর্ভ-দ্বয়মুপাদায় ইত্যধ্যাহারেণ ব্যাখ্যেয়ং শ্রুতশব্দার্থে সম্ভবত্যশ্রুতাধ্যা-হারস্যান্যায্যত্বাৎ। নন্বু শ্রুতত্বাৎ প্রাদেশমাত্রদলং গোভিলার্থঃ স্যাৎ ন ত্বনন্তর্গর্ভিত্বাদয়োঽত্র স্যুরিত্যত আহ অনন্তর্গর্ভিত্বেতি। পরিশিষ্ট-বচনাদিতি। তথাচ গোভিলে। প্রাদেশবিধিরূপলক্ষণং পরিশিষ্টে যত্র কুত্রচিদিত্যভিধানাদিতি ভাবঃ। এতেন পবিত্রশব্দস্য বিশিষ্ট-দ্বিদলে একস্মিন্নপি দলে প্রয়োগদর্শনসত্ত্বেঽপি একদল এব লঘুত্বাদ্ভূরি-প্রয়োগাচ্চ শক্তিঃ অন্যত্র লক্ষণেতি নিরস্তম্। সঙ্কেতশাস্ত্রস্য শক্তি-গ্রাহকতয়া বলবত্ত্বাৎ প্রয়োগস্য লক্ষণয়াপ্যুপপত্তেরিতি। হোমপ্রকর-ণেতি। গোভিলবচনং হোমপ্রকরণে পঠিতম্। অত্রৈব চ ছেদন-মার্জ্জনমন্ত্রশ্রুতিঃ পার্ব্বণে তু পবিত্রমাত্রশ্রবণাৎ সাঙ্কেতিকপবিত্রমাত্র-প্রাপ্তেঃ কথং তত্র ছেদনমন্ত্রমার্জ্জনমন্ত্রাণাং প্রাপ্তেরিত্যাশঙ্কার্থঃ। আকা-ঙ্ক্ষয়েতি। হোমীয়পবিত্রস্য ছেদনাদৌ মন্ত্রদর্শনাৎ পার্ব্বণেঽপি প্রাদেশ-করণার্থং ছেদনে মার্জ্জনে চ মন্ত্রাকাঙ্ক্ষোদয়াদিতি ভাবঃ। অনুষ্ঠানং ন স্যাদিতি। তথাচ সকলপ্রামাণিকব্যবহারবিরোধঃ স্যাদিতি ভাবঃ ॥ ১৩৯॥

তস্মাদতিদেশপরম্পরাগতদ্বিদলরূপপবিত্রপ্রাপ্তৌ তদ্দ্বিত্বস্যাপি প্রাপ্তত্বাৎ। তদ্বাধেন দলগতৈকত্বমেকো- দ্দিষ্টে বিধীয়তে। মহাভারতে। পার্ব্বণেষু তু সর্ব্বেষু পবিত্রং দ্বিদলং স্মৃতম্। একোদ্দিষ্টে তু সম্প্রাপ্তে দ্বিদলং নৈব কারয়েৎ॥ কেচিৎ তু মধুপর্কাদৌ পবিত্রমন্তরে- ণার্ঘ্যশব্দপ্রয়োগাজ্জলকুসুমগন্ধাদিযুক্ত এবার্ঘ্যশব্দার্থঃ। তথা কাত্যায়নঃ। সপবিত্রেষু হস্তেষ্বিত্যভিধায়াসাবেষ তে- ঽর্ঘ্য ইতি পবিত্ররহিতমেবার্ঘ্যমাহ। অতঃ কথং পবিত্রৈক- ত্বপ্রাপ্তিঃ। তন্ন অষ্টাঙ্গেঽর্ঘ্যে গন্ধপুষ্পং বিনাপ্যর্ঘ্যশব্দপ্র- য়োগাৎ। যথা ব্রহ্মপুরাণে। এষ তেঽর্ঘ্য ইতি প্রোক্ত্বা তেভ্যো দদ্যাদ্যথাষ্টধা। জলং ক্ষীরং দধি ঘৃতং তিল- তণ্ডুলসর্ষপান্। কুশাগ্রাণি চ পুষ্পাণি দত্ত্বাচামেত্ততঃ পরম্॥ ভবিষ্যপুরাণে। আপঃ ক্ষীরং কুশাগ্রাণি দধ্যাজ্যমধুতণ্ডুলাঃ। তিলাশ্চ সর্ষপাশ্চৈব অর্ঘ্যোঽষ্টাঙ্গঃ

---

উপসংহরতি তস্মাদিতি। অতিদেশপরম্পরা ইতি। পার্ব্বণে হোমাঙ্গপবিত্রাতিদেশঃ পার্ব্বণধর্ম্মাতিদেশশ্চ একোদ্দিষ্টে ইত্যতিদেশ- পরম্পরেত্যর্থঃ। অত্র কেচিৎ পবিত্রাণাং তথা জপ্যে ইতি বিষ্ণুবচনাৎ পবিত্রশব্দস্য মন্ত্রবাচিত্বাৎ অত্রাপি মন্ত্রবাচকতা ততশ্চৈকবচনবন্মন্ত্রা- নূহেনৈকোদ্দিষ্ট ইত্যনেন সমানার্থকমেকং পবিত্রমিতি বাক্যং অতো নানার্থকমিত্যাহুঃ। তদসৎ একপদস্থ একবচনান্তপদবতি আধুনিকলক্ষ- ণাপেক্ষয়া একদলে নিরূঢ়লক্ষণায়া বলীয়স্ত্বাৎ। মধুপর্কাদাবিতি। বরণাদৌ মধুপর্কাদিদানে ইত্যর্থঃ। অতঃ কথমিতি। যেন বৈয়র্থ্যং স্যাদিতি শেষঃ। আপঃ ক্ষীরমিতি। আপো মুখ্যাঃ ক্ষীরাদ্যষ্টকমঙ্গ- মিত্যর্থঃ। অন্যথানঙ্গত্বাপত্তেঃ। বিকৃতাবেকোদ্দিষ্টে ইত্যতিদেশ-

প্রকীর্ত্তিতঃ ॥ তস্মাদব্যভিচারাজ্জলমেবার্ঘপার্হদ্রব্যসহিতমর্ঘ্যশব্দার্থঃ । তচ্চ দ্রব্যং বিধানানুসারাল্লভ্যম্। পার্ব্বণে চ পবিত্রবিধানাৎ সপবিত্র এবার্ঘ্যোঽতিদেশপ্রাপ্তো বিকৃতাবনূদ্যতে প্রাপ্ত্যনুসারিত্বাদনুবাদস্য । অন্যথা নিত্যশ্রাদ্ধমদৈবং স্যাদর্ঘ্যাপি গুবিবর্জ্জিতমিত্যনেনার্ঘাবাধে পবিত্রবাধো ন স্যাৎ। সপবিত্রেষু হস্তেষ্বিত্যত্র হস্তস্থপবিত্রসহিতস্যৈবার্ঘ্যস্যোৎসর্গঃ ॥ অভিরতাস্ম ইত্যপরে ভোক্তৃব্রাহ্মণা ব্রূয়ুরিতি শেষঃ । ষোড়শশ্রাদ্ধাধিকারে ব্রহ্মপুরাণে। ভবদ্ভিঃ স্বদিতং কচ্চিদিতি চামন্ত্রয়েদ্দ্বিজান্। উচুঃ সুস্বদিতং বিপ্রাঃ প্রেতারাক্ষয্যমস্ত্বিতি ॥ স্বদিতমিতি তৃপ্তাস্থ প্রশ্নস্থানে কার্য্যমেকোদ্দিষ্টে। মৎস্যপুরাণে। স্বদিতং বিকিরে ব্রূয়াদ্বিসর্গে চাভিরম্যতাম্ ॥ ১৪০ ॥

প্রাপ্তত্বাদনুবাদঃ এককরণসাধ্যত্বেন পবিত্রৈক্যানুবাদশ্চ অতো বৈয়র্থ্যভিয়া পবিত্রশব্দস্য দললক্ষণৈব একোদ্দিষ্টে সাধীয়সীতি ভাবঃ। অন্যথেতি। অর্ঘ্যাৎ পবিত্রস্য পৃথক্ত্বে ইত্যর্থঃ। হস্তস্থেতি। তথাচ পবিত্রং নার্ঘ্যাৎ পৃথগিতি ভাবঃ। অনিরুদ্ধভট্টেন সামগানাং প্রেতাবাহনং এহি প্রেতেতি একবচনোহেন যল্লিখিতং তৎপ্রমাদকৃতমেব অবিশেষেণ দ্বয়োরেবাবাহনয়োর্নিষেধাৎ। ন চৈকঃ পিণ্ডো নাবাহনং নাগ্নৌকরণমিতি গোভিলসূত্রেঽগ্নৌকরণাৎ প্রাগাবাহননির্দ্দেশাৎ তৎপ্রাক্কালীনাবাহনস্যৈব নিষেধো ন তূত্তরকালীনস্য পিণ্ডার্থাবাহনস্যেতি স্মার্ত্তোক্তং যুক্তমিতি বাচ্যম্। একঃ পিণ্ড ইত্যস্য পরতোঽভিধানাৎ পিণ্ডাবাহনস্যৈব নিষেধো ন শ্রাদ্ধার্থাবাহনস্যেতি বিপরীতস্যাপি সুবচত্বাৎ। নৈবাগ্নৌ-

বিকিরে বিকরণে সতীত্যর্থঃ। আশ্বলায়নগৃহ্যপরিশিষ্টম্। প্রেতশ্রাদ্ধেষু সর্ব্বেষু ন স্বধা নাভিরম্যতাম্। শস্ত্যস্তু বিসৃজেদেবং সকৃৎ প্রণববর্জ্জিতম্॥ একোদ্দিষ্টস্তু পিণ্ডে তু অনুশব্দো ন যুজ্যতে। পিতৃশব্দং ন যুঞ্জীত পিতৃহা চোপজায়তে॥ ন স্বধেতি স্বধাবাচং ন কুর্য্যাদিত্যর্থঃ। ন তু হবিস্ত্যাগাদিবাক্যে স্বধাপদনিষেধ ইতি হলায়ুধবচনমাদরণীয়ম্। স্বধোচ্যতামিতি বাক্যং বিসৃজেদিত্যাশ্বলায়নোক্তেঃ। নাভিরম্যতামিতি। বহ্বৃচধর্ম্মোঽয়ং বহ্বৃচানামেব প্রাপ্তত্বেন নিষেধোপপত্তেঃ। তথা পার্ব্বণে হারীতঃ। অভিরম্যতামিত্যেকে। অভিরম্যতামিতি বিসর্গ ইতি কাত্যায়নবিরোধাচ্চ। প্রেতৈকোদ্দিষ্টবিষয়মিদং।

করণং তত্র তচ্চাবাহনবর্জ্জিতমিতি ব্রহ্মপুরাণেঽগ্নৌকরণাৎ পরমাবাহননিষেধাচ্চ। অতো বিনিগমনাবিরহাৎ দ্বয়োরেব নিষেধঃ। কল্পতরুকারাদীনামপি সম্মতমেতৎ। প্রেতায়াক্ষয্যমস্ত্বিতি শাখিভেদব্যবস্থিতম্॥ ১৪০॥

বিকরণে সতীতি। তেন বিকরণানন্তরমিত্যর্থঃ। এতচ্চ সামগেতরবিষয়ং সামগানাং প্রকৃতৌ পার্ব্বণতৃপ্তিপ্রশ্নানন্তরবিকরণবিধানাৎ। ন চ বৈকৃতবিশেষোপদেশেন সর্ব্বশাখিনামেব বিকরণানন্তরং তৃপ্তি প্রশ্নো ভবতু। ন চৈকোদ্দিষ্টে বিকরণানন্তরং স্বদিতমিতি পৃচ্ছেৎ ইতি বৈকৃতবিধেঃ সামগেতরপরত্বে সঙ্কোচদূষণং উক্তবিধিকল্পনে বিধ্যনুবাদাপত্তেঃ। তথাহি পারস্করাণাং প্রকৃতৌ প্রাপ্তত্বেনানুবাদঃ সামগানান্তুপ্রাপ্তত্বেন বিধিরিতি। তস্মাদেকোদ্দিষ্টে স্বদিতমিতি পৃচ্ছেদিত্যেব বিধিঃ ন তত্রানন্তর্য্যান্তর্ভাবঃ কালস্তু যৎ শাখিনাং যথা প্রকৃতীতি বিভাব্যম্। আশ্বলায়নোক্তেরিতি। আদ্যশ্রাদ্ধবিষয়ে আশ্বলায়নোক্তস্য স্বধাবাচননিষে-

পরিশিষ্টবচনম্। কাত্যায়নাদিবচনমিতরৈরেকোদ্দিষ্টবিষয়মিতি কল্পতরুঃ। তদসৎ অভিরম্যতামিতি বিসর্জ্জনমিত্যভিধায় এতৎ প্রেতশ্রাদ্ধমিতি গোভিলেনাভিধানাৎ। কিঞ্চ বহ্বৃচানামেব পার্ব্বণেঽভিরম্যতামিত্যনেন বিসর্জ্জনস্য প্রাপ্তত্বাৎ সর্ব্বশাখিগোচরনিষেধানুপপত্তেঃ। অতঃ শাখিভেদব্যবস্থিতোঽয়ং প্রেতশ্রাদ্ধেষ্বিত্যভিধানাৎ। কথং সাংবৎসরিকাদৌ নিষেধ ইতি চেৎ অতিদেশাদিতি ক্রমঃ। এবং স্বধাবাচননিষেধোঽপি। অনুশব্দো যে চাত্র ত্বামিতি মন্ত্রোপলক্ষণার্থঃ। পিতৃশব্দং ন যুঞ্জীতেতি সম্বন্ধকীর্ত্তননিষেধপরমিতি কশ্চিৎ। নৈবম্ অনু-

ধস্য তৎপরিশিষ্টকৃতা প্রেতশ্রাদ্ধেষু সর্ব্বেষ্বিত্যনেন বিকৃতত্বাৎ ইতি ভাবঃ। এতেন হবিস্ত্যাগবাক্যে স্বধাপদং দেয়মেবেতি প্রতিপাদিতম্। অন্যথা সাংবৎসরিকেঽপি তৎপ্রাপ্তির্ন স্যাৎ। অত্র কেচিৎ স্বধাপিতৃহবির্দ্দান ইত্যভিধানকোষাৎ। প্রেতানাঞ্চ পিতৃত্বাভাবাৎ তৎশ্রাদ্ধে স্বধাপদনিষেধং বদন্তি। তদসৎ অত্র পিতরো দেবতাঃ পিত্র্যে তু দ্বিগুণা দর্ভা ইত্যাদিবচনাৎ অত্র পিতৃপদস্য মৃতমাত্রপরত্বাৎ। অন্যথা গঙ্গাদিমৃতানাং মুক্তানাং পিতৃত্বপ্রাপ্ত্যভাবাৎ তেষাং শ্রাদ্ধে স্বধাপদপ্রয়োগো ন স্যাৎ। অতএব ন স্বধাঞ্চ প্রযুঞ্জীত প্রেতপিণ্ডে দশাহিকে। ইতি দশাহিকবিশেষণাৎ দশাহিকপিণ্ডদানমাত্রে স্বধাপদনিষেধাৎ। অন্যত্রার্ঘ্যাদৌ প্রেতশ্রাদ্ধেঽপি স্বধাপদং দেয়মিতি স্মার্ত্তেনাপ্যুক্তম্। অতএবানিরুদ্ধভট্টাদিভিরপ্যত্র স্বধাপদং লিখিতমিতি। নন্বু গোভিলীয়েতরেষামেব বিধিনিষেধয়োরুক্তব্যবস্থা ভবতু ইত্যাশঙ্ক্যাহ কিঞ্চেতি। সর্ব্বশাখীতি। তথা সতি বহ্বৃচানাং নিষেধস্যাপ্রাপ্তত্বেন তদংশে বিধিত্বম্। অন্যেষাঞ্চ বিধ্যভাবেনৈব নিষেধস্য সিদ্ধের্ব্বিধ্যনুবাদাপত্তেরিতি ভাবঃ। কথং সাংবৎসরিকাদাবিতি প্রেতশ্রাদ্ধে এব একোদ্দিষ্ট-

শব্দবৎ সাংবৎসরিকে পিতৃপদনিষেধাপত্তেঃ। প্রেত-শ্রাদ্ধে পিতৃপদবন্মন্ত্রপ্রয়োগো ন কার্য্য ইতি হলায়ুধঃ। ন অতিদেশাৎ সাংবৎসরিকেঽপি তন্নিষেধাপত্তেঃ। বস্তু-তস্তু এতৎ প্রেতশ্রাদ্ধমিতি বচনাৎ প্রেতপদবত্ত্বেন দেব-তাত্বাৎ পিতৃপদস্থানে প্রেতপদবিধানাৎ উৎসর্গবাক্যে মন্ত্রে চ পিতৃপদনিবৃত্তিরিতি ন্যায়মূলমিদং বচনম্। অতো ন সাংবৎসরিকে তৎপ্রসঙ্গঃ। অতএব প্রেতপিণ্ডোঽপি বিষয়োঽস্ত। বিষ্ণুঃ। অশৌচব্যপগমে সুস্নাতঃ সুপ্র-ক্ষালিতপাণিপাদঃ আচান্তস্ত্বেবংবিধান্ ব্রাহ্মণান্ যথাশ-ক্ত্যুদঙ্মুখান্ গন্ধমাল্যবস্ত্রালঙ্কারাদিভিঃ পূজিতান্ ভো-জয়েৎ। একবন্মন্ত্রানূহেতৈকোদ্দিষ্টে উচ্ছিষ্টসন্নিধাবেক-মেব তন্নামগোত্রাভ্যাং পিণ্ডং নির্ব্বপেৎ ভুক্তবৎসু ব্রাহ্ম-ণেষু দক্ষিণয়াভিপূজিতেষু প্রেতনামগোত্রাভ্যাং দত্তা-

---

পদস্য মুখ্যত্বাদিতি ভাবঃ। অতএব গোভিলেন মুখ্যৈকোদ্দিষ্টমেকো-ঽর্ঘ্য একং পবিত্রমিত্যাদ্যভিধায় এতৎ প্রেতশ্রাদ্ধমিত্যুক্তম্। আদি-পদাৎ শস্ত্রহতভ্রাত্রাদীনামেকোদ্দিষ্টবিধিকচতুর্দ্দশীশ্রাদ্ধপরিগ্রহঃ। এতেন একোদ্দিষ্টং মৃতাহনীত্যাদাবেকোদ্দিষ্টপদং সাংবৎসরিকে গৌণং তদ্ধর্ম্ম-প্রাপ্ত্যর্থমিতি সিদ্ধম্। এতেনৈকমুদ্দিশ্য যদ্দীয়তে ইতি ব্যুৎপত্ত্যা সাংবৎসরিকেঽপি একোদ্দিষ্টপদং মুখ্যমিতি মৈথিলোক্তং নিরস্তম্। এক-পুরুষীয়পার্ব্বণেঽতিব্যাপ্তেঃ। তথাত্র দৈবমস্তীতি চেৎ তথাপি আশ্বলায়-নীয়ানাং সদৈবৈকোদ্দিষ্টেঽব্যাপ্তেঃ। উপলক্ষণার্থ ইতি। ন চোপলক্ষ-ণত্বে মানাভাব ইতি বাচ্যং অনুশব্দমানাভাবেঽন্বয়ানুপপত্তেঃ। বস্তুত-স্ত্বিতি। অয়ং ভাবঃ। এতৎ প্রেতশ্রাদ্ধমিতি। গোভিলেন প্রেতো-দ্দেশ্যকত্বাভিধানাৎ অসপিণ্ডীকৃতং প্রেতমেকোদ্দিষ্টেন ইত্যভিধানাচ্চ। তথা প্রেতায়াক্ষয্যমস্ত্বিতি ব্রহ্মপুরাণাৎ ত্রীণি পিতৃণামেকং প্রেতস্যেতি

কয়োদকেষু চতুরঙ্গুলপৃথ্বীস্তাবদন্তরাস্তাবদধঃখাতা বিতস্ত্যায়তাস্তিস্রঃ কর্ষূঃ কুর্য্যাৎ। কর্ষূসমীপে চাগ্নিত্রয়মুপসমাধায় পরিস্তীর্য্য তত্রৈকৈকস্মিন্ বাহুতিত্রয়ং জুহুয়াৎ: সোমায় পিতৃমতে স্বধা নমঃ। অগ্নয়ে কব্যবাহনায় স্বধা নমঃ। যমায়াঙ্গিরসে স্বধা নমঃ। স্থানত্রয়ে প্রাগ্বৎ পিণ্ডত্রয়নির্ব্বপনং কুর্য্যাৎ। ততো দধিঘৃতমধুমাংসৈঃ কর্ষূত্রয়ং পূরয়িত্বা এতত্ত ইতি জপেৎ। এবং মৃতাহে প্রতিমাসং কুর্য্যাৎ। অশৌচব্যপগম ইতি সর্ব্বেষামেব বর্ণানামেকাহাদ্যশৌচেঽপি। অশৌচান্ত এব শ্রাদ্ধং দর্শয়তি। সুস্নাতঃ শিরঃস্নাতঃ। এবংবিধান্ পঙ্‌ক্তিপাবনাদীন্মন্ত্রান্ বহুবচনান্তান্ একবদেকবচনবদূহেত বিকৃতান্ কুর্য্যাৎ একস্মিন্ পিতরি বহুবচনস্যাসমবেতার্থত্বাৎ। প্রকৃতাবর্থপ্রকাশনাথ্যদৃষ্টপ্রয়োজনস্য মন্ত্রস্য বিকৃতৌ বহুবচনস্থানে একবচনোহঃ কর্ত্তব্য ইতি॥ ১৪১॥

সপিণ্ডনে পিতৃভেদেন উপাদানাৎ প্রেতায় পিণ্ডমিত্যাদিপুরাণাচ্চ। পিতৃপদবত্ত্বেন দেবতাত্বে নির্ণীয়তেঽতিদেশপ্রাপ্তং পিতৃপদবত্ত্বেন দেবতাত্বং অর্থাৎ পরাহতম্। অতএব প্রেতান্তনামগোত্রাভ্যামিতি ব্রহ্মপুরাণে প্রেততর্পণং সম্বন্ধপদং বিনৈবাভিহিতমিতি। অতএব ন্যায়মূলত্বাদেব। অস্যেতি। পিতৃপদনিষেধস্যেত্যর্থঃ। তত্রাপি প্রেতপদবত্ত্বেনৈব দেবতাত্বাভুক্তন্যায়াবিশেষাদিত ভাবঃ। অত্র মৈথিলাঃ পিতৃপদস্থানে প্রেতপদাভিধানে প্রমাণাভাবাৎ পিতৃপদং প্রেতপদঞ্চ যুগপদিচ্ছন্তি। নান্দীমুখশ্রাদ্ধে নান্দীমুখাদিবদিতি পিতৃপদনিষেধস্তু নমো বঃ পিতর ইত্যাদিমন্ত্রপর ইত্যাহুঃ। তদসৎ নান্দীমুখশ্রাদ্ধে পিতৃপদনিষেধাভাবেন দৃষ্টান্তবৈষম্যাৎ। পিতৃশব্দং ন যুঞ্জীত ইত্যস্য

ন্যায়মূলমিদং বচনম্। অতএব এতদ্বঃ পিতরো বাস ইতি মন্ত্রস্য বহুবচনস্থানে নৈকবচনোহঃ প্রকৃতাবেকৈ-কত্র পিত্রাদৌ প্রযুক্তস্য এতস্যানর্থকত্বাৎ। তথা ব্রহ্মপু-রাণম্। এতদ্বঃ পিতরো বাস ইতি জল্পন্ পৃথক্ পৃথক্ ইতি। অতএব দৈক্ষে পশৌ একবচনান্তঃ পাশমন্ত্রো বহু-বচনান্তশ্চ শ্রুতঃ। তত্রৈকবচনান্তস্য প্রকৃতাবর্থবত্ত্বাৎ। দ্বিপাশিকায়াং বিকৃতৌ দ্বিবচনোহঃ কার্য্যঃ। বহুবচনা-ন্তস্য প্রকৃতাবনর্থকত্বাৎ বিকৃতাবপি নোহঃ কিন্তু বহুবচ-নান্তস্যৈব প্রয়োগ ইত্যুক্তম্। বৃহস্পতিঃ। একোদ্দিষ্ট-বিধানেন যদেকস্য প্রদীয়তে। আবাহনাগ্নৌকরণরহিতং

নমো বঃ পিতর ইত্যেতাবন্মাত্রপরত্বে শপথাতিরিক্তপ্রমাণাভাবাৎ। স্মার্ত্তেন তু সর্ব্বে শবস্পর্শিনঃ পিতৃপদস্থানে প্রেতপদোহেন তর্পয়েয়ুরিতি বচনেনৈব পিতৃপদস্থানে প্রেতপদোহঃ স্ফুট এবেতি প্রতিপাদিত ইতি। প্রেতনামগোত্রাভ্যামিতি তেন সম্বন্ধবাচকপিত্রাদিপদনিষেধঃ। চতু-রঙ্গুলপৃথ্বা চতুরঙ্গুলবিস্তারা পৃথিবী। বহুবচনস্যেতি। প্রকৃতৌ পার্ব্বণে শ্রুতস্য বহুবচনস্যেত্যর্থঃ ॥ ১৪১ ॥

একবচনোহঃ কর্ত্তব্য ইতি। বহুবচনস্য বাধিতার্থকত্বেনার্থপ্রকাশ-নাসমর্থত্বাদিতি ভাবঃ। অতএবেতি। অর্থপ্রকাশনার্থাদৃষ্টপ্রয়োজন-মন্ত্র এব উহো ন দৃষ্টার্থকমন্ত্রেঽপীতি যতোঽত ইত্যর্থঃ। অনর্থকত্বা-দিতি। তথাচ দৃষ্টপ্রয়োজনাসম্ভবাদদৃষ্টার্থক এব এতন্মন্ত্রপাঠ ইতি ভাবঃ। অত্র দৃষ্টান্তমাহ অতএবেতি। দৈক্ষে দীক্ষাযাগসম্বন্ধিনি পশৌ একপাশিকায়াং রজ্জৌ সুধিতিঃ পাশং প্রমুমোক্তুঃ সুধিতিঃ পাশৌ প্রমুমোক্তুরিতি মন্ত্রাবুপদিষ্টৌ। তত্রৈকপাশিকায়ামেকবচনস্যার্থবত্ত্বেন বিকৃতৌ দ্বিপাশিকায়াং দ্বিবচনোহঃ অন্যথানন্বয়াপত্তেঃ। বহুবচনান্তস্য

দৈববর্জ্জিতম্ ॥ বস্ত্রালঙ্কারশয্যাদ্যং পিতুর্যদ্বাহনায়ুধম্। গন্ধমাল্যৈঃ সমভ্যর্চ্চ্য শ্রাদ্ধভোক্ত্রে তদর্পয়েৎ ॥ ভোজনঞ্চানেকবিধং কারয়েদ্ব্যঞ্জনানি চ। যথাশক্ত্যা প্রদদ্যাচ্চ গোভূহেমাদিকন্তথা ॥ শ্রোত্রিয়া ভোজনীয়াস্তু নব সপ্ত ত্রয়োদশ। জ্ঞাতয়ো বান্ধবা নিঃস্বাস্তথাচাতিথয়োঽপরে ॥ প্রদদ্যাদ্দক্ষিণান্তেষাং সর্ব্বেষামনুরূপতঃ। হতমশ্রোত্রিয়ং শ্রাদ্ধং হতো যজ্ঞস্ত্বদক্ষিণঃ ॥ তস্মাৎ পণং কাকিনীং বা ফলং পুষ্পমথাপি বা। প্রদদ্যাদ্দক্ষিণাং যজ্ঞে তয়া স সফলো ভবেৎ ॥ গোভূহেমাদিকমিতি শ্রাদ্ধদক্ষিণা। শ্রোত্রিয়া ভোজনীয়াস্ত্বিত্যনেন ভোজ্যদানমুক্তম্। প্রদদ্যাদ্দক্ষিণামিত্যনেন দক্ষিণা ভোজ্যেঽভিহিতা। কাকিনী পণস্য তুরীয়াংশঃ। ফলং পুষ্পমথাপি বেত্যনেন যদ্যপ্যানতিকরী দক্ষিণা তথাপি তদশক্তাবতুষ্ট্যর্থা দক্ষিণাপি দেয়েতি দর্শিতম্ ॥ ১৪২ ॥

তু নোহঃ প্রকৃতাবসমবেতার্থকতয়া বিকৃতাবপি তথৈব ন্যায্যত্বাদিত্যর্থঃ। এবঞ্চ ক্বচিৎ প্রকৃতেরূহঃ ক্বচিৎ প্রত্যয়স্য ক্বচিদুভয়স্য ক্বচিন্নোভয়োরিত্যুক্তম্। প্রকৃতের্যথা এতদ্বঃ পিতরো বাস ইতি বহুবচনস্য তু নোহঃ প্রকৃতাবেবাসমবেতার্থত্বাদিত্যুক্তমেব। প্রত্যয়ে যথা সাংবৎসরিকে অমীমদন্ত ইত্যত্র অমীমদৎ পিতা যথাভাগমিতি। যথাভাগমাবৃষায়িষত ইত্যত্র যথাভাগমাবৃষায়স্বেতি। তথা নমো ব ইত্যত্র নমস্ত ইতি স্বধাস্থ তর্পয়ত মে পিতৃন্ ইত্যত্র পিতরমিতি চ প্রেতশ্রাদ্ধেষু সর্ব্বত্র এষ্বেব মন্ত্রেষু অমীমদৎ প্রেত ইত্যাদিরূপঃ প্রকৃতিপ্রত্যয়য়োর্দ্বয়োরেবোহঃ। দেবতাভ্য ইত্যত্র তু নোভয়োঃ অগ্নিষ্বাত্তাদিগণপরত্বেন পিতৃপদস্য বহুবচনস্য চ সর্ব্বত্রাবাধিতত্বাদিতি। শ্রাদ্ধভোক্তেত্যত্র মৈথিলাঃ। এক-

একোদ্দিষ্টশ্রাদ্ধমভিধায় বরাহপুরাণম্। অয়মেব বিধিঃ প্রোক্তঃ শূদ্রাণাং মন্ত্রবর্জ্জিতঃ। অমন্ত্রস্য তু শূদ্রস্য বিপ্রো মন্ত্রেণ গৃহ্যতে॥ অয়মেব শ্রাদ্ধবিধিঃ শূদ্রাণামুক্তঃ কিন্তু মন্ত্ররহিতো মন্ত্রজন্যাদৃষ্টসিদ্ধিস্তু সামান্যপ্রাপ্তনমস্কারাৎ। যথা শূদ্রাধিকারে গোতমঃ। অনুমতোঽস্য নমস্কারো মন্ত্রঃ অনুষ্ঠেয়ার্থপ্রকাশনন্তু ব্রাহ্মণপঠিতমন্ত্রাদিত্যাহ। বিপ্রো মন্ত্রেণ গৃহ্যতে সম্বধ্যত ইত্যর্থঃ। অমন্ত্রস্য তু শূদ্রস্যেতি পরিভাষেয়ং ন তু পরিভাষাপ্রকরণেন নিয়ম্যতে। তেন শূদ্রস্য স্নানদানাদাবপি ব্রাহ্মণেন মন্ত্রঃ পঠনীয় ইতি। অন্যথা প্রকরণাদেকোদ্দিষ্ট এব

বচনাদেকস্মিন্নেব ব্রাহ্মণে একোদ্দিষ্টশ্রাদ্ধং ন তু বহুষু। অতএব বরাহপুরাণে। বিপ্র ত্বামহং নিমন্ত্রয়ে ইত্যেকবচনমুক্তমিত্যাহুঃ। তদসৎ। একোদ্দিষ্টন্তু যচ্ছ্রাদ্ধং তন্নৈমিত্তিকমুচ্যতে। তদপ্যদৈবং কর্ত্তব্যময়ুগ্মাশয়েদ্দ্বিজান্॥ ইতি ভবিষ্যপুরাণবিরোধাৎ একবচনস্য তু একব্রাহ্মণ এবোপপন্নতয়া পার্ব্বণাতিদেশপ্রাপ্তব্রাহ্মণানামেকত্ববাধস্যান্যায্যত্বাৎ। ভোজ্যদানমুক্তমিতি। শ্রাদ্ধাৎ পরতোঽভিধানাদিতি ভাবঃ। অদৃষ্টার্থঃ অদৃষ্টমাত্রার্থঃ আনতিকর্য্যা অপি অদৃষ্টার্থকত্বাৎ অত্র পদং পুষ্পস্যানতিরূপদৃষ্টপ্রয়োজনাভাবাদিতি ভাবঃ॥ ১৪২॥

তুল্যন্যায়াদিতি। স্ত্রিয়া অপি অমন্ত্রত্বাবিশেষাৎ অমন্ত্রা হি স্ত্রিয়ো মতা ইত্যুক্তেঃ। অনুপনীতেন তু শ্রাদ্ধে মন্ত্রাঃ পঠনীয়াঃ। নাভিব্যাহারয়েদ্ব্রহ্ম স্বধানিনয়নাদৃতে। ইতি মনুনা প্রতিপ্রসবাৎ। অর্থক্রমস্যেতি। মন্ত্রবর্ণানামিতি শেষঃ। উপবিষ্টব্রাহ্মণেনেতি। শ্রাদ্ধভোক্তৃব্রাহ্মণেনেত্যর্থঃ। পুরোহিতস্য দ্বিত্বাশ্রবণাদিতি ভাবঃ। বিনা বিপ্রমিতি। তেন বিপ্রদ্বারা শ্রোতব্যমিতি ভাবঃ। ন্যায়মপি খণ্ডয়তি ধনং দদাবিতি। দানঞ্চেদং ব্রাহ্মণে প্রতিপত্তিরূপমেব দানস্য পূর্ব্বাঙ্গবিধেয়ত্বাৎ

ব্রাহ্মণস্য মন্ত্রপাঠঃ স্যান্ন পার্ব্বণাদৌ। অতএব পিত্র্যে তু দ্বিগুণা দর্ভা ইতি কাত্যায়নবচনং প্রকরণান্ন শ্রাদ্ধমাত্র-বিষয়ং কিন্তু পরিভাষাত্বাৎ পিতৃকৃত্যমাত্রবিষয়ম্। অম-ন্ত্রস্যেতি বিশেষণোপাদানং যাবদমন্ত্রপ্রাপ্ত্যর্থম্। তেন স্ত্রিয়া অপি ক্রিয়মাণে ব্রাহ্মণস্য মন্ত্রপাঠঃ তুল্যন্যায়ত্বাচ্চ। যদার্থপ্রকাশনাথ্যং দৃষ্টমর্থক্রমস্য ধ্যানাদিনা ভবতি তদা মন্ত্রপাঠেঽপি ন কদাচিৎ ক্ষতিঃ। ব্রাহ্মণপঠিতমন্ত্রস্য দৃষ্ট-মাত্রজনকত্বাৎ অদৃষ্টস্য নমস্কারেণ জনিতত্বাৎ। বিপ্রা মন্ত্রেণ গৃহ্নত ইতি পাঠে উপবিষ্টব্রাহ্মণেন মন্ত্রঃ পঠ-নীয়ঃ। ব্রাহ্মণান্তরপাঠস্তু প্রতিনিধিনেতি। অত্র কশ্চিৎ বৈদিকমন্ত্রপাঠনিষেধোঽয়ং পৌরাণিকমন্ত্রস্তু শূদ্রেণ পঠ-নীয়ঃ। যথা পদ্মপুরাণম্। সূত উবাচ। ন হি বেদে-ষ্বধিকারঃ কচিৎ শূদ্রস্য বিদ্যতে। পুরাণেষ্বধিকারো মে দর্শিতো ব্রাহ্মণৈরিহ॥ নৈতস্য সূতাধিকারপ্রতিপাদক-ত্বাৎ সূতস্য সঙ্করজাতিত্বেন শূদ্রান্যজাতিত্বাৎ। যথা যাজ্ঞ-বল্ক্যঃ। ব্রাহ্মণ্যাং ক্ষত্রিয়াৎ সূত ইতি। যত্র প্রতি-লোমজস্যাধিকারস্তত্র শূদ্রস্য সুতরামিতি ন্যায়াৎ শূদ্রাধি-

ইতি শ্রাদ্ধোত্তরঞ্চ দানং নিষ্ফলত্বায়েতীতি দাননিষেধাচ্চ। ত্রয়োদশাহ-বিধেয়মিতি। ক্ষত্রিয়স্য দ্বাদশাহাশৌচবিধানাদিতি ভাবঃ। শেষং প্রাপ্যেতি। পুনঃশব্দস্য স্বরসাদিতি ভাবঃ। বস্তুতো ব্রাহ্মণেভ্যঃ সমুৎসৃজেদিত্যভিধানাৎ প্রেতশ্রাদ্ধশেষস্যামাঙ্গলিকত্বাচ্চ। শেষপর্য্যন্তং সর্ব্বমেব ব্রাহ্মণেভ্যো দদ্যাৎ পুনঃশব্দস্ত্বর্থঃ। স্বয়ন্তু মঙ্গলভোজনমেব কুর্য্যাচ্চেত্যর্থঃ। অতএব শাতাতপঃ। প্রেতশ্রাদ্ধে যদুচ্ছিষ্টং গ্রহে

কার ইতি চেন্ন বচনান্ন্যায়স্য দুর্ব্বলত্বাৎ। যথা পুরাণমধিকৃত্য ভবিষ্যে। অধ্যেতব্যং ন চান্যেন ব্রাহ্মণং ক্ষত্রিয়ং বিনা। শ্রোতব্যমিহ শূদ্রেণ নাধ্যেতব্যং কদাচন॥ তথা। শ্রৌতং স্মার্ত্তং হি বৈ ধর্ম্মং প্রোক্তমস্মিন্নৃপোত্তম। তস্মাচ্ছূদ্রৈর্বিনা বিপ্রং ন শ্রোতব্যং কদাচন॥ কিঞ্চ প্রতিলোমজাতত্বেঽপি সূতস্য বিশিষ্টতেজোময়ত্বাৎ অধিকারো যুক্তঃ। অতএব শূদ্রাপুত্রস্যাপি বিদুরস্য ধর্ম্মোপদেশকত্বং ধর্ম্মাবতারদেহত্বাদুপপন্নম্। তপোবলহীনানাং দুর্ব্বাচাং সঙ্করজাতানাং শূদ্রাণাং বা কথমধিকারো ভবতু। তথাপস্তম্বঃ। তেষাং তেজোবিশেষেণ প্রত্যবায়ো ন বিদ্যতে। তদন্বীক্ষ্য প্রযুঞ্জানঃ সীদত্যবরজোঽবলঃ॥ তেষাং পূর্ব্বেষাম্। অবরজোঽর্ব্বাচীনঃ

পর্য্যুসিতঞ্চ যৎ। দম্পত্যোর্ভুক্তশেষঞ্চ ন ভুঞ্জীত কদাচন॥ ইতি। উচ্ছিষ্টং শ্রাদ্ধশেষং পাকপাত্রমিত্যর্থঃ। ব্যবহারোঽপ্যেতাদৃগেব। তদঙ্গেতি। হুতশেষদানাঙ্গেত্যর্থঃ। উপনীয় গায়ত্রীমুপদিশ্য ন স্থানস্তর্য্যমেব ক্ত্বার্থঃ। ন স্বঙ্গস্বং ভুক্ত্বা ব্রজতীত্যাদৌ ব্যভিচারাৎ। অন্যথা ত্রিবৃতা সূত্রেণ যূপং পরিধীয় সবনীয়ং পশুমুপাকরোতীত্যত্র যূপপরিধানস্যাপি পশূপাকরণাপত্তেঃ। উপনীয়াধ্যাপয়েদিত্যত্র তু উপনীতস্য বেদানধিকারাৎ। উপনয়নস্যাধিকাররূপতায়া অঙ্গত্বং কল্প্যমেব ন তু ক্ত্বা বোধ্যম্। প্রকৃতে প্রধানীভূতে শ্রাদ্ধে হুতশেষদানং পাত্রালম্ভনঞ্চ দ্বয়মেবাঙ্গম্। কথং তৎ হুতশেষদানবাধাৎ পাত্রালম্ভনবাধ ইত্যত আহ তথেতি। ননু পৃথিবী তে পাত্রমিত্যন্নমমৃতং চিন্তয়েৎ। পঠন্নিতি ব্রহ্মপুরাণানুসারাৎ মন্ত্রস্থা মৃতপদস্যামৃততুল্যে লক্ষণা ন তু যজ্ঞশেষপরত্বেতি বাচ্যং হুতশেষস্যৈব সুধাত্বেন চিন্তায়া ব্রহ্মপুরাণার্থত্বাৎ। সংশ্রব-

ইতি। শ্রীরামায়ণে। সমতীতে দশাহে তু কৃতশৌচো বিধানতঃ। চক্রে দ্বাদশিকং শ্রাদ্ধং ত্রয়োদশিকমেব চ ॥ ততশ্চোদ্দিশ্য পিতরং ব্রাহ্মণেভ্যো ধনং দদৌ। মহার্হাণি চ রত্নানি গাশ্চ বাহনমেব চ॥ যানানি দাসীর্দ্দাসাংশ্চ বেশ্মানি সুমহান্তি চ। ভূষণানি চ মুখ্যানি রাজ্ঞস্তস্যৌর্দ্ধ-দেহিকে ॥ দশাহগ্রহণমশৌচকালোপলক্ষণার্থম্। দ্বাদশিকং দ্বাদশাহেন নির্বৃত্তং ত্রয়োদশাহবিধেয়মিত্যর্থঃ। এবং ত্রয়োদশিকং চতুর্দ্দশাহবিধেয়ম্। ঔর্দ্ধদেহিকে শ্রাদ্ধে। অতএব রাজধর্ম্মে বশিষ্ঠঃ। রাজনি তু প্রেতে দদ্যাৎ প্রাসঙ্গিকম্। এতেন মাতাপিতৃবৃদ্ধির্ব্যাখ্যাতা। প্রসঙ্গো বিষয়োপভোগঃ তদর্থং শয্যাসনাদিকং প্রাসঙ্গিকম্। মাতাপিতৃবৃদ্ধির্ম্মাতাপিত্রোরপি শ্রাদ্ধং প্রাসঙ্গিক-শয্যাসনাদিদানেন বর্দ্ধয়িতব্যম্। দেবলঃ। একোদ্দিষ্টস্য শেষন্তু ব্রাহ্মণেভ্যঃ সমুৎসৃজেৎ। পশ্চাৎ স্বয়ঞ্চ ভুঞ্জীত পুনর্ম্মঙ্গলভোজনম্ ॥ একোদ্দিষ্টশেষং প্রাপ্য পুনঃ পাকান্তরেণ ভোক্তব্যং প্রেতশ্রাদ্ধপাকাবশেষস্যামাঙ্গলিকত্বাৎ। অত্রৈকোদ্দিষ্টে হুতশেষস্যাভাবাৎ তদঙ্গসম-

গ্রহণন্যুব্জীকরণে ইতি। প্রথমে পাত্রে সংস্রবান্ সমবনীয় ইতি পারস্করবচনাৎ পিতৃপাত্রে সংস্রবগ্রহণং তস্য চ সংস্রবস্য ন্যুব্জং পাত্রং করোত্যধ ইতি যাজ্ঞবল্ক্যোক্তেঃ। প্রপিতামহপাত্রেণ পিধায় প্রতিষ্ঠাপয়তীতি শৌনকোক্তেঃ। প্রপিতামহপাত্রেণ পিধানমুক্তং তৎপ্রয়োজনঞ্চ সংস্রবজলে পিতৃরক্ষণমেব। আবৃতাস্তত্র তিষ্ঠন্তি পিতরঃ শৌনকোঽব্রবীদিত্যাশ্বলায়নবচনাৎ। প্রকৃতে চ পিধানাভাবেন ন্যুব্জীকরণাভাবাদাবরণা-

স্রুকপাত্রালম্ভনবাধঃ। অঙ্গত্বঞ্চ কাত্যায়নগোভিলয়োর্হু-তশেষং দত্ত্বা পাত্রমালভ্য জপতীতি কৃত্বা শ্রুতিদর্শনাৎ উপনীয়াধ্যাপয়েদিতিবৎ। তথামৃতং জুহোমীতি মন্ত্র-লিঙ্গাচ্চ হুতশেষাঙ্গত্বমমৃতং হুতশেষমিত্যর্থঃ। সংস্রবগ্রহ-ণন্যুব্জীকরণে চ ন কার্য্যে পিধানপাত্রাভাবেন সংস্রবর-ক্ষণস্য কার্য্যস্যাভাবাৎ। ন পাত্রমালভ্য জপতি নাশিষঃ প্রার্থয়েদিতি প্রচেতোনাম্না লিখিতবচনান্নাশিঃপ্রার্থন-মিতি বদন্তি ॥ ১৪৩ ॥

অথান্বষ্টকশ্রাদ্ধম্। হারীতঃ। মৃতে পিতরি বৈ পুত্রঃ পিণ্ডমব্দং সমাচরেৎ। অন্নং কুম্ভঞ্চ বিপ্রায় প্রেতনির্দ্দে-শধর্ম্মতঃ॥ পিণ্ডদানমিদং শাখিভেদব্যবস্থিতম্। পিণ্ডম-

ভাবেন সংস্রবরক্ষণস্যাজাতত্বাদুভয়মেব ন কর্ত্তব্যমিতি ভাবঃ। মৈথি-লমতে তূভয়মেব কর্ত্তব্যং তৈঃ সংস্রবরক্ষণাভ্যুপগমেন তদর্থং পিধানা-নুক্তেঃ। শৌনকোক্তপিধানানন্তরন্যুব্জীকরণস্য বহ্বৃচমাত্রীয়ত্বাৎ যাজ্ঞ-বল্ক্যোক্তাধঃস্থস্য চ ন্যুব্জীকৃতপাত্রস্যৈব। পৈতৃকং প্রথমং পাত্রং তস্মিন্ পৈতামহং ন্যসেৎ। প্রপিতামহং ততো ন্যস্য নোদ্ধরেন্ন চ চালয়েৎ॥ ইতি যমবচনাৎ। এতচ্চ প্রাগেব বিবৃতম্। বদন্তীতি বচনস্যামূলত্বাদেবাস্বরসঃ। তস্মাদতিদেশপ্রাপ্তত্বাদাশিঃপ্রার্থনং কর্ত্ত-ব্যমেব। অন্যথা সাংবৎসরিকেঽপি তল্লাভো ন স্যাদিতি। অত ঊর্জ্জং বহন্তীত্যঞ্জলিদানং ন কর্ত্তব্যং স্বধাবাচননিবৃত্ত্যা তন্নিবৃত্তেঃ। তথাহি স্বধাবাচনীয়ান্ দর্ভানাস্তীর্য্য স্বধাং বাচয়িষ্যে ইতি পৃচ্ছতীত্যুপক্রমস্য এবমপো নিষিঞ্চতি ঊর্জ্জং বহন্তীরিত্যনেন স্বধাবাচনার্থমাস্তৃতদর্ভেষু সেকবিধানাৎ তদভাবাত্তদভাবঃ সিদ্ধান্ত ইতি বদন্তি ॥ ১৪৩ ॥

অথান্বষ্টকশ্রাদ্ধম্। মৃতে পিতরীত্যত্রাব্দপদং কিঞ্চিন্ন্যনাব্দপরম্।

পেয়কে নিঘ্নন্তীতি পারস্করবচনাৎ। কুম্ভমুদককুম্ভং ব্রাহ্মণায়োদকুম্ভঞ্চ দদ্যাদিতি পারস্করবচনাৎ। প্রেত-নির্দ্দেশধর্ম্মত ইতি। প্রেতশব্দোচ্চারণং কর্ত্তব্যমিতি হলায়ুধব্যাখ্যানমযুক্তং সপিণ্ডীকরণান্তত্বাৎ প্রেতকৃত্যস্য প্রেতশব্দোচ্চারণস্য প্রাপ্তত্বাৎ। বস্তুতস্তু প্রেতনির্দ্দেশঃ প্রেতৈকোদ্দিষ্টং তদ্ধর্ম্মতঃ তদ্ধর্ম্মাতিদেশঃ কার্য্যমিত্যর্থঃ। নন্বিতি। প্রাপ্তার্ঘ্যবাধঃ কুতঃ পিণ্ডনিষেধাদর্ঘ্যনিষেধ ইতি চেন্ন হেত্বভাবাৎ মঘাশ্রাদ্ধেঽপ্যর্ঘ্যনিষেধাপত্তেঃ। নিত্যং তাবৎ প্রবক্ষ্যামি অর্ঘ্যাবাহনবর্জ্জিতম্ ইতি মৎস্যপুরাণবচনাৎ। নিত্যশ্রাদ্ধমদৈবং স্যাদর্ঘ্যপিণ্ডবিবর্জ্জিতম্ ইতি বৃহস্পতিবচনাচ্চ নিত্যশ্রাদ্ধেঽর্ঘ্যপিণ্ডনিষে-

---

অশৌচান্তাদ্দ্বিতীয়েঽহ্নীত্যুপক্রম্য। উদকুম্ভশ্চ দাতব্যো ভক্ষ্যভোজ্য-সমন্বিতঃ। যাবদব্দং নরশ্রেষ্ঠ সতিলোদকপূরিতঃ॥ ইতি মৎস্যপুরাণেঽশৌচান্তদ্বিতীয়দিনাবধিতদ্দানাভিধানাৎ। এতচ্চ শ্রাদ্ধং সাবনাহেন কর্ত্তব্যং ন তু তিথিকার্য্যং অহরহরন্নমস্মৈ ব্রাহ্মণায় ইতি বক্ষ্যমাণপারস্করবচনে নিরুপাধিপ্রযুক্তাহঃপদস্য সাবনদিনবোধকত্বাৎ। অতএবাহরহর্দ্দদাতীত্যত্র তথা সিদ্ধান্তিতম্। অতএব চ। কৃত্যে প্রত্যহং তত্র ভবতো ভৃগুনন্দন। ইতি বক্ষ্যমাণবচনং সঙ্গচ্ছতে। ক্ষুত্ক্ষয়োস্তিথিনিয়ম্যত্বাসম্ভবাৎ। বস্তুতস্ত্বিতি। এতচ্চ ন সমীচীনং পূর্ব্বোক্তে শ্রাদ্ধলক্ষণাক্রান্ততয়া ক্বচিৎ পিণ্ডবিধানেন চাস্য শ্রাদ্ধত্বে সিদ্ধে। অসপিণ্ডীকৃতং প্রেতমেকোদ্দিষ্টেন তর্পয়েৎ। তথা প্রেতায়ান্নসমাযুক্তমিতি মৎস্যপুরাণে প্রেতদৈবতত্বাভিধানাচ্চ একোদ্দিষ্টস্যৈব প্রাপ্তত্বেন প্রেতনির্দ্দেশধর্ম্মত ইত্যস্য বৈয়র্থ্যতাদবস্থ্যাৎ। বস্তুতো হলায়ুধমতমেব যুক্তং বৃদ্ধিনিমিত্তকালাপকর্ষে অর্ব্বাক্ সপিণ্ডীকরণমিতি বক্ষ্যমাণবচনাৎ পশ্চা-

ধাৎ। অম্বুঘটশ্রাদ্ধমপি নিত্যশ্রাদ্ধমেব অহরহঃক্রিয়মাণত্বাৎ। যথা ভবিষ্যপুরাণম্। অহন্যহনি যৎ শ্রাদ্ধং তন্নিত্যমভিধীয়তে। যে ত্বম্বুঘটশ্রাদ্ধস্য শ্রাদ্ধত্বং নেচ্ছন্তি তে নিরস্তাঃ। হারীতপারস্করাদিভিঃ শ্রাদ্ধপ্রকরণে পঠিতত্বাৎ প্রাগুক্তশ্রাদ্ধলক্ষণাক্রান্তত্বাচ্চ পিণ্ডদানশ্রুতেশ্চাত্র চ সর্ব্বেষ্বেব বচনেষু অন্নস্যাম্বুঘটস্য চ স্বাতন্ত্র্যেণোপাদানাৎ। স্বতন্ত্রয়োরেবোৎসর্গবাক্যে নিবেশঃ। এষোঽম্বুঘট এতদন্নমিত্যেবংরূপঃ সর্ব্বত্রৈবাম্বুঘটস্যাপ্যুৎসর্গঃ। পারস্করঃ। অহরহরন্নমস্মৈ ব্রাহ্মণায়োদকুম্ভং চ দদ্যাৎ। পিণ্ডমপ্যেকে নিপৃণন্তি দদতীত্যর্থঃ। অম্বুঘটশ্রাদ্ধফলমাহ মৎস্যপুরাণে। যাবদব্দঞ্চ যো দদ্যাদুদকুম্ভং বিমৎসরঃ। প্রেতায়ান্নসমাযুক্তং সোঽশ্বমেধফলং লভেৎ॥ তথা পঠন্তি। প্রেতলোকে চ বসতি নৃণাং বর্ষং প্রকীর্ত্তিতা। ক্ষুত্তৃষ্ণে প্রত্যহং তত্র ভবতো ভৃগুনন্দন। তদর্থমিহ দাতব্যং জলমন্নঞ্চ বৎসরম্॥ যাজ্ঞবল্ক্যঃ। অর্ব্বাক্ সপিণ্ডীকরণং যস্য সংবৎসরাদ্ভবেৎ। তস্যাপ্যন্নং সোদকুম্ভং দদ্যাৎ সংবৎসরং দ্বিজে॥ সংবৎ-

---

দপি বর্ষপর্য্যন্তমম্বুঘটশ্রাদ্ধে কর্ত্তব্যে পূর্ব্বোক্তক্রমেণ পিতৃশব্দে প্রাপ্তে তন্নিরস্য তৎস্থানে প্রেতবিধায়কত্বেন প্রেতনির্দ্দেশধর্ম্মত ইত্যস্য তন্মত এব সার্থকত্বাৎ প্রাপ্তপিতৃলোকে প্রেতশব্দপ্রয়োগশ্চ গঙ্গাদিমৃতানাং মুক্তানাং ষোড়শশ্রাদ্ধবৎ উপপাদনীয়ঃ। এবঞ্চ সপিণ্ডনপ্রাগ্বিহিতশ্রাদ্ধে প্রেতবত্ত্বেন দেবতাত্বং তৎপরবিহিতশ্রাদ্ধে চ পিতৃপদবত্ত্বমিতি পর্য্যবসিতোঽর্থঃ। নিরাসে হেতুমাহ হারীতেতি। অহরহরন্নমিতি। অস্মৈ প্রেতায় প্রেতমুদ্দিশ্য ব্রাহ্মণায় দদ্যাদিত্যর্থঃ। যাবদব্দঞ্চেতি।

সরাদর্ব্বাক্ সপিণ্ডীকরণং বৃদ্ধাদিনিমিত্তেনেতি বক্ষ্যতি। সপিণ্ডীকরণান্তপ্রেতশ্রাদ্ধাপকর্ষেঽস্যাপ্যপকর্ষপ্রাপ্তৌ বচনম্। উশনাঃ। একোদ্দিষ্টং ন কুর্ব্বীত ন্যাসিনাঞ্চৈব সর্ব্বদা। অহন্যেকাদশে প্রাপ্তে পার্ব্বণন্তু বিধীয়তে॥ সপিণ্ডীকরণন্তেষাং ন কর্ত্তব্যং সুতেন বৈ। ত্রিদণ্ডগ্রহণাদেব প্রেতত্বং নৈব জায়তে॥ ১৪৪॥

অত্র প্রাঞ্চঃ। ব্যাসোক্তনারায়ণবলিদানং যতীনাং কার্য্যম্ উদকানর্হাণাং চাণ্ডালাদিহতানাং ব্যাসেন তথাবিধানাৎ যতেরপ্যুদকানর্হত্বাৎ। তথা মনুঃ। বৃথা সঙ্করজাতানাং প্রব্রজ্যাসু চ তিষ্ঠতাম্। আত্মনস্ত্যাগিনাঞ্চৈব নিবর্ত্তেতোদকক্রিয়া॥ আদিপুরাণে। ত্রয়াণামা-

---

যাবদন্বানুষ্ঠানস্য কর্তৃগতাশ্বমেধফলজনকত্বং উদ্দিশ্যগতক্ষুৎক্ষোপশমস্তু প্রাত্যহিকানুষ্ঠানস্যৈবেতি বোধ্যম্। সপিণ্ডীকরণান্তেতি। সপিণ্ডীকরণান্তা তু জ্ঞেয়া প্রেতক্রিয়া বুধৈঃ। ইত্যনেন প্রেতশ্রাদ্ধসামান্যস্যৈব সপিণ্ডীকরণান্তত্বাৎ সপিণ্ডীকরণাপকর্ষে প্রেতশ্রাদ্ধান্তর্গতস্যাস্মৃষটশ্রাদ্ধস্যাপকর্ষপ্রাপ্তৌ তন্নিষেধার্থং বচনমিত্যর্থঃ। ন চ যাজ্ঞবল্ক্যবচনশক্তিকৃতাপকর্ষবিষয়ম্। তত্রৈব বর্ষপর্য্যন্তং প্রেতত্বসম্ভবে তচ্ছ্রাদ্ধাভোক্তৃত্বাৎ। ন তু বৃদ্ধিনিমিত্তাপকর্ষবিষয়ং তদুত্তরং প্রেতত্বাভাবাদিতি বাচ্যং কাম্যস্যাপ্যস্মৃষটশ্রাদ্ধস্য কৃতসঙ্কল্পত্বেন নিত্যতয়া বৃদ্ধ্যনন্তরমপ্যবশ্যং কর্ত্তব্যত্বাৎ। এতচ্চ শ্রাদ্ধং মধ্যেঽশৌচপাতে ন কার্য্যমনধিকারাৎ অধিকারিণ এবাহরহঃকর্ত্তব্যত্বাভিধানাৎ সন্ধ্যাদিবৎ নাপ্যশৌচান্তে পতিততৎকরণং মৃতাহকর্ত্তব্যশ্রাদ্ধস্যৈবাশৌচান্তকর্ত্তব্যতোপদেশাৎ॥ ১৪৪॥

উদকানর্হাণামিতি। যতেরপ্যুদকানর্হত্বাদিতি ভাবঃ। তস্যোদ-

প্রমাণাঞ্চ কুর্য্যাদ্দাহাদিকাং ক্রিয়াম্। যতেঃ কিঞ্চিন্ন কর্ত্তব্যং ন চান্যেষাং করোতি সঃ॥ বলিদানমাহ ব্যাসঃ। শুক্লৈকাদশ্যাং দশপিণ্ডান্ দত্ত্বা দ্বাদশ্যাং নারায়ণাদিদেবতানাং প্রেতস্য চ দৈবপূর্ব্বং শ্রাদ্ধং কৃত্বা পঞ্চপিণ্ডান্ দদ্যাৎ। তদ্যথা। প্রথমং বিষ্ণবে দদ্যাৎ ব্রহ্মণে চ শিবায় চ। যমায় পরিবারায় চতুর্থং পিণ্ডমুৎসৃজেৎ॥ মৃতং সঙ্কীর্ত্ত্য মনসা গোত্রপূর্ব্বমতঃ পরম্। ইতি। তন্ন উশনোবচনেন ন্যাসিনাং বিশেষতঃ পার্ব্বণবিধানাৎ উদকানর্হতাসাম্যে নারায়ণবলিদানকল্পনাযোগাৎ। কিঞ্চ যতের্দ্দাহাদিক্রিয়ানিষেধাৎ আদিশব্দেন দশপিণ্ডনিষেধাচ্চ প্রেতত্বাভাবেন চ প্রেতশরীরপূরকপিণ্ডদানাযোগাচ্চ। ননু। নৈষ্ঠিকানাং বনস্থানাং যতীনাং নিয়তাত্মনাম্। নাশৌচং কীর্ত্ত্যতে সদ্ভিঃ পতিতে চ তথা মৃতে॥ ইতি কূর্ম্মপুরাণবচনেনাশৌচাভাবাৎ একাদশে শ্রাদ্ধং নির্যুক্তিকম্। সত্যং যতীনাং বচনাদেবেতি ক্রমঃ। অতএব। সদ্যঃশৌচেঽপি কর্ত্তব্যং শ্রাদ্ধমেকাদশেঽহনীতি। পঠিতমেতদ্বিষয়মেব। অস্মাদেব বচনাৎ প্রত্যাব্দিকমপি যতীনাং

---

কানর্হত্বে প্রমাণমাহ তথা মনুরিতি। পরিবারায় সপরিবারায়। ননু কালভেদাদনয়োর্ব্বাধ্যবাধকভাবঃ। উশনসা মরণাদেকাদশাহে পার্ব্বণং বিধীয়তে ব্যাসেন তু শুক্লৈকাদশ্যাং দশপিণ্ডদানং দ্বাদশ্যাং পার্ব্বণং বিহিতমিতি সন্ন্যাসিনাং দ্বয়মেবাস্তিত্যত আহ কিঞ্চেতি। আদিশব্দেনেতি। আদিপুরাণবচনে ইতি শেষঃ। অস্মাদেবেতি। উশনোবচনাদিত্যর্থঃ। তত্র সর্ব্বদাপদাৎ বিশিষ্য সপিণ্ডীকরণনিষে-

পার্ব্বণবিধিনৈব কার্য্যম্। নন্থ প্রব্রজিতস্য পার্ব্বণনিষেধঃ শ্রূয়তে। যথা ছন্দোগপরিশিষ্টে কাত্যায়নঃ। ব্রাহ্মণাদিহতে তাতে পতিতে সঙ্গবর্জ্জিতে। ব্যুৎক্রমাচ্চ মৃতে দেয়ং যেভ্য এব দদাত্যসৌ॥ সঙ্গবর্জ্জিতে প্রব্রজিতে পিতরি মৃতে যেভ্যঃ পিতা দদ্যাত্তেভ্যো দদ্যান্ন তস্মায়িতি তস্যার্থঃ। ন ত্রিদণ্ডগ্রহণাদুশনোবচনস্য ত্রিদণ্ডবিষয়ত্বং কাত্যায়নবচনস্যৈকদণ্ডবিষয়ত্বমিত্যবিরোধঃ। সপিণ্ডনাকরণে হেতুমাহ ত্রিদণ্ডগ্রহণাদেবেতি। প্রেতত্বস্যাপ্রাপ্তত্বান্ন তৎপরিহারার্থং সপিণ্ডনং কার্য্যমিত্যর্থঃ। লঘুহারীতঃ। সপিণ্ডীকরণং যাবৎ প্রেতশ্রাদ্ধানি ষোড়শ। পৃথক্ নৈব সুতাঃ কুর্য্যুঃ পৃথগ্দ্রব্যা অপি ক্বচিৎ॥ প্রেতসংস্কারকর্ম্মাণি যানি শ্রাদ্ধানি ষোড়শ। যথাকালন্তু কার্য্যাণি নান্যথা মুচ্যতে ততঃ॥ সপিণ্ডীকরণান্তানি ষোড়শ শ্রাদ্ধানি পৃথগ্ধনা অপি পৃথঙ্ন কুর্য্যুঃ কিন্তু মিলিত্বা একং শ্রাদ্ধং কুর্য্যুঃ পর্য্যুদাসপরত্বান্নঞঃ প্রসজ্যপক্ষেঽপি বিশেষণস্বরসাৎ অপৃথগেব কুর্য্যুঃ। তত্র জ্যেষ্ঠস্য সাক্ষাৎকর্ত্তৃত্বমন্যেষাং দ্রব্যার্পণানুমত্যাদিদ্বারেত্যধিকারিপ্রকরণে মরীচিবচনে বক্ষ্যতে। প্রেতসংস্কারকর্ম্মাণীতি। যথাকালমেকাদশাহমাসষণ্মাসসংবৎসরেষ্বিত্যর্থঃ। নন্থ বিধানসামর্থ্যাদেব প্রাপ্তেরনর্থকমিদম্ উৎকর্ষাপকর্ষনিষেধার্থমিদমিতি চেন্ন। তদ্বিধিবিরোধাৎ।

ধাচ্চ। পঞ্চদশশ্রাদ্ধানাং সাংবৎসরিকস্য চ ত্রিদণ্ডিনাং পার্ব্বণবিধিনৈব কর্ত্তব্যত্বপ্রতীতেরিত্যর্থঃ। একোদ্দিষ্টে বিশেষমাহ লঘুহারীত ইতি।

সপিণ্ডনাপকর্ষে মাসিকাপকর্ষো ন কার্য্য ইতি চেন্ন ষোড়শান্তর্গতসপিণ্ডীকরণস্য যথাকালবিধানানর্থকত্বাৎ। ষোড়শশব্দে সঙ্কোচ ইতি চেৎ অনভিজ্ঞো ভবান্ সঙ্কোচ-শব্দার্থস্য সামান্যশব্দস্য হি বিশেষনিষ্ঠত্বং সঙ্কোচঃ। স্বর্গ-কামপদস্যেব সমর্থনরপরত্বম্। ন চাত্র তথা কিন্ত্বেকদেশ-পরতয়া লক্ষণৈব স্যাৎ॥ ১৪৫॥

পুরোডাশকপালবৎ উচ্যতে শক্তৌ সত্যাং যথাকালং কার্য্যাণীত্যর্থঃ। অশক্তৌ সত্যাং কালান্তরমপি দ্রষ্টব্যমিতি তাৎপর্য্যার্থঃ। এতেন পূর্ব্বোক্তকালানাং মুখ্যত্বং দর্শিতম্। অথবা নাবশ্যকবৃদ্ধিনিমিত্তেন ষোড়শাপকর্ষো ন কার্য্য ইতি তাৎপর্য্যম্। মরীচিঃ। মুখ্যং শ্রাদ্ধং মাসি মাসি অপর্য্যাপ্তাবৃতুং প্রতি। দ্বাদশাহেন বা কুর্য্যাদেকাহে

উৎকর্ষাপকর্ষ ইতি। যথোক্তকালাদুত্তরকালকরণমুৎকর্ষঃ তৎপূর্ব্বকাল-করণমপকর্ষশ্চ। তদ্বিরোধাদিতি। অপর্য্যাবৃত্তং প্রতীত্যাদ্যুৎকর্ষবিধে-র্ব্বিরোধাদিত্যর্থঃ। সমর্থনরপরত্বমিতি। যজমানেক্ষিতং হবির্জুহো-তীতি যজমানঃ শৃণোতীত্যঙ্গবিধিবলাৎ স্বর্গকামপদস্যান্ধবধিরেতরস্বর্গ-কামপরত্বং যথেত্যর্থঃ। ন চাত্র তথেতি ষোড়শশব্দস্য ন সামান্যত্বং তস্য ষোড়শপর্য্যাপ্ত্যবচ্ছিন্নবাচকত্বেন পঞ্চদশবাচকত্বাভাবাৎ। তস্মাৎ ষোড়শপর্য্যাপ্ত্যধিকরণীভূতপঞ্চদশপরত্বে লক্ষণৈব স্যাদিত্যর্থঃ॥১৪৫॥

পুরোডাশকপালবদিতি। পুরোডাশকপালেন তুষানাবপতীতি বাক্যেনাঘাতজনিতব্রীহিতুষাণাং পুরোডাশকপালেনাবাপো বিধীয়তে। তত্র চ পুরোডাশশ্রবণপ্রয়োজকত্বেনোপস্থিতকপালেনাবাপপ্রয়োজনা-কাঙ্ক্ষা ন হ্যমুকপ্রয়োজনস্য চৈত্রস্য কিং প্রয়োজনমিত্যাকাঙ্ক্ষা ভবতি। অতঃ পুরোডাশপদে তদনুষ্ঠানকপালে লক্ষণা ন তু পুরোডাশাশ্রয়কপাল-সম্বন্ধিকপালান্তরেণেতি বোধ ইতি সম্প্রদায়ঃ। ননু একপ্রয়োজনব-

দ্বাদশাথবা॥ মাসি মাসি শ্রাদ্ধং কর্ত্তব্যমিতি মুখ্যঃ কল্পঃ। অপর্য্যাপ্তাবসামর্থ্যে ঋতুং প্রতি ঋতুর্ম্মাসদ্বয়ং তেন প্রতিমাসং শ্রাদ্ধকরণাসমর্থেন মাসদ্বয়েন শ্রাদ্ধং কর্ত্তব্যম্। তত্রাপ্যশক্তৌ দ্বাদশভির্দ্দিনৈর্দ্বাদশশ্রাদ্ধানি কার্য্যাণি। তদসম্ভবে একস্মিন্নেব দিনে দ্বাদশশ্রাদ্ধসমাপ্তিঃ। ছন্দোগপরিশিষ্টে কাত্যায়নঃ। পিতামহঃ পিতুঃ পশ্চাৎ পঞ্চত্বং যদি গচ্ছতি। পৌত্ত্রেণৈকাদশাহাদি কর্ত্তব্যং শ্রাদ্ধষোড়শম্॥ নৈতৎ পৌত্ত্রেণ কর্ত্তব্যং পুত্ত্রবাংশ্চ পিতামহঃ॥ পিতৃমরণাৎ পশ্চাৎ যদা পিতামহমরণং ভবতি তদা পৌত্ত্রেণৈকাদশাহাদি শ্রাদ্ধষোড়শং

ত্বেন উপস্থিতে প্রয়োজনাকাঙ্ক্ষায়াং বাধকাভাবাৎ। ন হি ঘটপ্রয়োজনেন দণ্ডেন গাং নিবারয় ইত্যত্র নিরাকাঙ্ক্ষত্বম্। কিঞ্চ অধিষ্ঠানলক্ষণাং বিনাপি পুরোডাশস্য কপালেনেতি ষষ্ঠীসমাসেনৈবোপপত্তাবেকপ্রয়োজনবত্ত্বেনোপস্থিত্যভাবাৎ। ন চ প্রথমোপস্থিতত্বেন চতুর্থীসমাসস্যৈব ঔচিত্যেনাধিষ্ঠানলক্ষণাবশ্যকীতি বাচ্যং প্রথমোপস্থিতেরেবাভাবাৎ। ন হি চতুর্থ্যুপস্থিতিং বিনা ষষ্ঠ্যুপস্থিতিঃ প্রমাণাভাবাৎ। বস্তুতস্তু পুরোডাশং শ্রপয়েদিতি বিধৌ কথন্তাবাকাঙ্ক্ষায়াং ব্রীহীনাবহন্তি ত্রিস্তণ্ডুলান্ ফলীকরোতি পুরোডাশকপালে তুষানাবপতীত্যাদ্যঙ্গবিধয়ঃ প্রবর্ত্তন্তে। ততঃ পুরোডাশাঙ্গত্বমত্রাপ্যস্য সিদ্ধম্। উপরাগে চ পুরোডাশকপালাঙ্গত্বে চাবচ্ছেদকপুরোডাশস্যাপ্যঙ্গত্বং স্যাৎ। তথাচ একং প্রতি একস্য প্রধানত্বমঙ্গত্বং বিরুদ্ধম্। অয়মেব চ বিনিযুক্তবিনিয়োগবিরোধঃ পদার্থঃ। তং প্রতি অঙ্গত্বেন বিনিযুক্তস্য তং প্রত্যেব প্রধানত্বেন বিনিয়োগবিরোধ ইত্যস্যৈব তদর্থত্বাৎ যথাশ্রুতস্তু ন সঙ্গচ্ছতে। শ্রাদ্ধেঽর্ঘ্যে বিনিযুক্তস্য তদাধানপাত্রস্য ন্যুব্জীকরণাদৌ পুন-

কার্য্যম্। ষোড়শমিতি বিশেষণং জীবত্যপি পিতরি পিতামহমরণে ষোড়শবহির্ভূতপার্ব্বণাভ্যনুজ্ঞানার্থম্। তেন উভয়থৈব পৌত্রস্য পার্ব্বণাধিকারঃ ষোড়শশ্রাদ্ধাধিকারে তু বিশেষঃ। ননু পিতৃমরণানন্তরং পিতামহে মৃতে ষোড়শশ্রাদ্ধাধিকারঃ প্রাপ্তঃ। পুত্রবত্যপ্রাপ্তত্বাৎ নৈতৎ পৌত্রেণেতি নিষেধোঽনুপপন্নঃ। পর্য্যুদাসোঽপ্যনুপপন্ন এব। সত্যজীবৎপুত্রস্য পৌত্রেণ ষোড়শশ্রাদ্ধং কর্ত্তব্য-

র্ব্বিনিয়োগদর্শনাৎ। অতঃ পুরোডাশপদে তদধিষ্ঠানকপালে লক্ষণা ইতি পুরোডাশাধিষ্ঠানকপালস্য কপালেনেত্যর্থঃ। ষষ্ঠ্যর্থোঽত্র সম্বন্ধঃ সাদৃশ্যং তচ্চ পরিমাণসংস্কারাদীতি। এবঞ্চ পুরোডাশাশ্রয়কপালে সমপরিমাণসংস্কারবতা কপালেন তুষানাবপতীত্যর্থঃ পর্য্যবসিত ইতি বাচাং পূর্ব্বোক্তকালানাং মুখ্যং শ্রাদ্ধং মাসি মাসীতি পূর্ণে সংবৎসরে সপিণ্ডীকরণমিত্যাদ্যুক্তকানাম্। ননু তথাপি বচনবৈয়র্থ্যমেব তত্তৎকাল-কর্ত্তব্যতাবোধকবিধিভিরেব তথাত্বস্য প্রতিপাদনাদিত্যাহ অথবেতি। অনাবশ্যকং সম্ভবৎকালান্তরং তচ্চ নবগৃহপ্রবেশমঠপ্রতিষ্ঠাদি। অপ-কর্ষপ্রসঙ্গাৎ তৎকালং দর্শয়তি মরীচিরিতি। ঋতুর্ম্মাসদ্বয়মিতি। তেনাত্র কল্পে দ্বিতীয়মাসিকদিনে প্রথমমাসিকং দ্বিতীয়মাসিকঞ্চ শ্রাদ্ধদ্বয়ং কার্য্য-মেবং চতুর্থমাসিকদিনে তৃতীয়মাসিকচতুর্থমাসিকশ্রাদ্ধে কার্য্যে ইত্যেবং ক্রমঃ ষষ্ঠমাসিকদিনে চ পঞ্চমমাসিকং অনন্তরং প্রথমষাণ্মাসিকং তদন-ন্তরঞ্চ ষষ্ঠমাসিকমিতি শ্রাদ্ধত্রয়ং কার্য্যম্। যচ্চাত্র মিশ্রেণাভিহিতং একাহেন ষষ্ঠমাসে ষাণ্মাসিকং কৃত্বা মৃততিথৌ পঞ্চমমাসিকং ষষ্ঠমাসি-কঞ্চ কার্য্যমিতি। তদ্ধেয়ং তদাদিন্যায়েন পঞ্চমমাসিকোৎকর্ষে তদাদি-কস্য ষাণ্মাসিকস্যোৎকর্ষ এব ন্যায্যো যতঃ অতএব পঞ্চমমাসিকান-ন্তরং প্রথমষাণ্মাসিকমিতি ক্রমস্যাপ্যবাধঃ। ক্রমরূপাঙ্গবাধাপেক্ষয়া একা-হেন তু ষণ্মাসা ইত্যস্য মুখ্যকল্পবিষয়ত্বেন সঙ্কোচস্যৈব ন্যায্যত্বাৎ। এবং দ্বাদশদিনকল্পেঽপি ষষ্ঠমাসস্থানীয়ে ষষ্ঠদিনে উক্তক্রমেণ ষাণ্মাসিকং

মিত্যেবংলক্ষণঃ। স চ প্রাপ্তত্বাৎ ন বিধেয়ঃ। উচ্যতে পিতৃব্যসদ্ভাবে পৌত্রস্য ষোড়শশ্রাদ্ধানধিকারজ্ঞাপনার্থমিদমিতি সর্ব্বমুপপন্নম্॥ ১৪৬॥

অথ সপিণ্ডীকরণম্। শাতাতপঃ। সংবৎসরে তু বিজ্ঞেয়ং সপিণ্ডীকরণন্ত্বিহ। সপিণ্ডীকরণান্তা তু জ্ঞেয়া প্রেতক্রিয়া বুধৈঃ॥ সংবৎসরশব্দোঽত্র সংবৎসরান্তদিবসপরঃ। সংবৎসরান্তে প্রেতায়েতি বিষ্ণুবচনাৎ। অত্র জিকনঃ। অন্ত্যমৃতাহেঽন্ত্যমাসিকং কৃত্বাঽপরদিনে সপিণ্ডীকরণং কার্য্যম্। পূর্ণে সংবৎসর ইতি গোভিলবচনাৎ। মাসিকশ্রাদ্ধবিধানানন্তরং ততঃ সংবৎসরে পূর্ণে ইতি

ষষ্ঠমাসিকঞ্চ কার্য্যম্। জীবত্যপীতি ষোড়শশ্রাদ্ধনিষেধাৎ পার্ব্বণস্য কর্ত্তব্যত্বপ্রতীতেরিতি ভাবঃ। এতেন মৃতকপৌত্রস্য পিতৃব্যসত্ত্বেঽপি পিতামহস্য সাংবৎসরিকাধিকারঃ সিদ্ধঃ। তস্যাপি ষোড়শশ্রাদ্ধবহির্ভূতত্বাদিতি বোধ্যম্। উভয়থেতি। মৃতে জীবতি বা পিতরীত্যর্থঃ। আদৌ পিতরি মৃতে পিতামহে জীবতি পিতামহে মৃতে পিতরি জীবতি চ ইতি বার্থঃ। বিশেষঃ পিতৃমরণান্তর্য্যানিয়মঃ। পুত্রবত্যপ্রাপ্তত্বাদিতি। পিতুর্ম্মরণানন্তরং পিতামহমরণ এব পৌত্রেণ কর্ত্তব্যমিতি বিধানাৎ জীবতি পিতর্য্যপ্রাপ্তত্বাদিত্যর্থঃ। স চেতি। পিতামহঃ পিতুঃ পশ্চাদিতি পূর্ব্ববচনেন প্রাপ্তত্বাদিত্যর্থঃ॥ ১৪৬॥

অথ সপিণ্ডীকরণম্। সংবৎসরান্তদিনপর ইতি। তস্যাপি পূর্ব্বমৃততিথিং বিহায়াপরমৃততিথিমাদায় মাসবর্ষগণনয়া সংবৎসরান্তর্গতত্বেন সাংবৎসরিকত্বাদিতি ভাবঃ। ন চ বিষ্ণুবচনাৎ সংবৎসরাৎ পরদিন এব ক্রিয়তাম্ এতদেকবাক্যতয়া সংবৎসরে ত্বিতি। সতি সপ্তম্যেবাস্ত্বিতি বাচ্যং সংবৎসরস্য সপিণ্ডীকরণাঙ্গত্বাৎ সংবৎসরে তু বিজ্ঞেয়মিত্যাদি-

ক্কাত্যায়নবচনে তত ইত্যুপাদানাৎ। অথ সপিণ্ডীকরণং সংবৎসরমেকং পিণ্ডমনুদ্দিশ্য সমাপ্তে বৎসরে চত্বার্য্যুদপাত্রাণীতি বৈজবাপগৃহ্যদর্শনাচ্চ। এতেনান্ত্যমৃতাহস্য সংবৎসরবহির্ভূতত্বান্মৃতাহাৎ প্রাগেব সংবৎসরসমাপ্তের্মৃতাহ এব সপিণ্ডীকরণং যুজ্যতে। অতএবান্ত্যমৃতাহপূর্ব্বদিনে শ্রাদ্ধমাব্দিকম্ অন্ত্যমৃতাহবিহিতং দ্বাদশমাসিকশ্রাদ্ধং পুনরাব্দিকং বদন্তীতি নিরস্তম্। সংবৎসরমেকং পিণ্ডমনুদ্দিশ্যেত্যাদিবচনৈরজহৎস্বার্থলক্ষণয়া সংবৎসরপদস্য মৃতাহসহিতসংবৎসরত্বাবধারণাৎ। তন্ন সংবৎসরে তু বিজ্ঞেয়ম্। ততঃ সংবৎসরে পূর্ণে পূর্ণে সংবৎসরে সমাপ্তে সংবৎসরে ইতি শাতাতপকাত্যায়নগোভিলবৈজবাপগৃহ্যবচনেষু সংবৎসরস্যাধিকরণত্বেনাঙ্গত্বাবধারণাৎ অনন্তরদিনস্য চাশব্দার্থত্বাৎ। তদনুপপত্ত্যা পূর্ণসমাপ্তশব্দ-

বক্ষ্যমাণবচনৈঃ সংবৎসরস্যাধিকরণত্বাবগমাৎ সর্ব্বত্র সতি সপ্তমী পক্ষে সপ্তম্যা লক্ষণাপ্রসঙ্গাৎ। অতএবোক্তমুপপদবিভক্তেঃ কারকবিভক্তির্গরীয়সীতি। বিষ্ণুবচনেঽন্তশব্দোঽবয়বার্থক এব ন তু সমীপার্থকঃ। বক্ষ্যতে চৈতদনুপদমেব। জিকন এব মতান্তরং দূষয়তি এতেনেতি। নিরস্তমিত্যগ্রেণান্বয়ঃ। সংবৎসরমুদ্দিশ্য ইত্যত্র সংবৎসরপদেনান্ত্যমৃতাহগ্রহণাৎ তত্রৈব দ্বাদশমাসিকবিধানাৎ তদনন্তরঞ্চ সমাপ্তে সংবৎসরে ইত্যাদিনা সপিণ্ডনাভিধানেন নিরস্তমিত্যর্থঃ। অতএবেতি। অন্ত্যমৃতাহস্য সংবৎসরবহির্ভূতত্বাদেবেত্যর্থঃ। আব্দিকং দ্বিতীয়ষাণ্মাসিকম্। অন্ত্যমৃতাহবিহিতং পুনরাব্দিকাখ্যং সপিণ্ডনমিত্যর্থঃ। সংবৎসরমেকমিত্যাদাবেব বিবৃতমেতৎ। সংবসরপদস্যেতি। বৈজবাপগৃহ্যানুসারেণ পূর্ব্বমৃততিথিমাদায় বৎসরগণনয়ান্ত্যমৃতাহস্য বৎসরবহির্ভূতত্বেন তৎসহিত-

য়োঃ। সংপূর্ণে তু ততো মাসে পিণ্ডশেষং সমাপয়েৎ। শূদ্রস্য দশমঃ পিণ্ডো মাসে পূর্ণেঽহ্নি দীয়তে॥ ইতিবদীষদসমাপ্তিপরত্বম্ একদিবসো ন সংবৎসরব্যবচ্ছেদকপরত্বঞ্চ। সম্যক্‌সমাপ্তিপরত্বেঽন্ত্যকলায়াঃ শ্রাদ্ধাঙ্গত্বাসম্ভবাৎ। অতএব সংবৎসরান্তে প্রেতায়েতি বিষ্ণুপুরাণবচনমুপপদ্যতে। অন্তশব্দস্যাবয়বার্থত্বাৎ। দশান্তঃ পট ইতিবৎ যদ্যপি দশাহান্তে পুনঃ ক্রিয়েত্যত্র সমীপার্থোঽন্তশব্দো দৃশ্যতে। তথাপি নানামুনিবচনেষু সংবৎসরপদে লক্ষণাপ্রসঙ্গাৎ অবয়বার্থ এবায়মন্তশব্দঃ॥ ১৪৭॥

তস্মাদন্ত্যমৃতাহ এব সপিণ্ডনমিতি স্থিতম্। এতেন যৎ পঠন্তি। পিতুঃ পিতৃত্বপ্রাপ্ত্যর্থং পূর্ণে সংবৎসরে সতি। মৃতাহাৎ পরতঃ কুর্য্যাৎ সপিণ্ডীকরণং বুধঃ॥

সংবৎসরে সংবৎসরপদস্য লাক্ষণিকত্বাদিতি ভাবঃ। অবধারণাদিতি একোদ্দিষ্টপ্রকরণ ইতি শেষঃ। অশব্দার্থত্বাদিতি। মৃততিথের্ম্ ততিথিং যাবচ্চান্দ্র ইত্যুক্তদিশাঽন্ত্যমৃতাহস্য সংবৎসরাবয়বত্বাৎ তদনন্তরদিনস্য সংবৎসরপদবাচ্যত্বাদিত্যর্থঃ। তদনুপপত্ত্যা অধিকরণত্বানুপপত্ত্যা। শ্রাদ্ধাঙ্গত্বাভাবাদিতি সূক্ষ্মত্বেন তত্র শ্রাদ্ধনিষ্পত্ত্যসম্ভবাদিতি ভাবঃ। নানামুনিবচনেষ্বিতি। সংবৎসরে তু বিজ্ঞেয়মিতি শাতাতপাদিবচনেষু সংবৎসরোত্তরদিনপরত্বে লক্ষণাপ্রসঙ্গাদিত্যর্থঃ। ন চ ভবন্মতেঽপি সম্পূর্ণসমাপ্তপদয়োরীষদসমাপ্তিপরত্বেন লক্ষণাবশ্যকীতি বাচ্যং মন্মতে মুনিপ্রয়োগদর্শনান্নিরূঢ়লক্ষণা। সা চ শক্তিতুল্যা ন দোষাবহা। ত্বন্মতে তু একদিনাধিকসংবৎসরলক্ষণাধুনিকী দূষণাবহেতি বিশেষঃ॥ ১৪৭॥

তস্মাদিতি। বস্তুতস্তু সপিণ্ডীকরণং কুর্য্যাৎ পূর্ণেঽব্দে তৎক্ষয়েঽহনীতি। গরুড়পুরাণবচনমেবাত্র স্ফুটপ্রমাণমস্তি। অতএব চাত্র মাস-

ইতি। তদনাকরম্। অত্র চ। অর্ব্বাক্‌সংবৎসরাদ্‌বৃদ্ধৌ পূর্ণে সংবৎরেঽপি বা। যে সপিণ্ডীকৃতাঃ প্রেতা ন তেষাস্তু পৃথক্ ক্রিয়া॥ ইতি শাতাতপবচনম্। বৃদ্ধৌ নিমিত্তীভূতায়ামর্ব্বাক্ সপিণ্ডনমর্থবদ্‌বৃদ্ধিনিমিত্তং প্রাগপি সপিণ্ডনমস্তীতি জ্ঞাপয়তি। চতুরবত্তং জুহোতীতি হোমানুবাদ ইব হোমাদিবিধিম্। তদা চ বৃদ্ধিনিমিত্তেন সপিণ্ডীকরণাপকর্ষে বচনাভাবান্ন মাসিকাপকর্ষ ইতি জিকনপ্রভৃতীনাং সম্মতম্। অথ তদাদিতদন্তন্যায়াদপকর্ষঃ। যথা দৈক্ষে পশৌ তিষ্ঠন্তং পশুং প্রযজতীতি বাক্যবলাৎ প্রযাজাপকর্ষে তদন্তকর্ম্মকলাপাপকর্ষঃ। ন তত্র প্রকৃতৌ

বর্ষগণনা পূর্ব্বমৃততিথিং বিহায় পরমৃততিথিমাদায় সিদ্ধম্। অন্যথাঽন্ত্যমৃতাহস্য সংবৎসরবহির্ভূতত্বেন তত্র সপিণ্ডনে সংবৎসরস্যাঙ্গত্ববিধিবিরোধাপত্তেরিতি বোধ্যম্। চতুরবত্তমিতি। দোঽবখণ্ডনে ইত্যস্যাবত্তমিতি রূপম্। স্রুচি ঘৃতস্রুবমেকং দত্ত্বা চরোর্ম্মেক্ষণেনাবদায় খণ্ডদ্বয়ং দ্বির্দ্দত্ত্বা তদুপরি পুনর্ঘৃতস্রুবং দদ্যাদিতি চতুরবত্তং ভৃগুগোত্রস্য মধ্যে বারত্রয়ং চরুখণ্ডদানমিতি পঞ্চাবত্তং চতুরবত্তং পঞ্চাবত্তং জুহোতীত্যত্র জুহোতীত্যনুবাদো যথা চতুরবত্তং পঞ্চাবত্তং বা জুহুয়াদিতি হোমবিধিং জ্ঞাপয়তি তথাত্রাপি অর্ব্বাক্ সংবৎসরাদ্‌বৃদ্ধৌ যে সপিণ্ডীকৃতা ইতি বৃদ্ধিনিমিত্তকমপি সপিণ্ডনানুবাদঃ। বৃদ্ধিনিমিত্তেন সংবৎসরাদর্ব্বাক্ সপিণ্ডীকরণং কুর্য্যাদিতি অপকর্ষবিধিং জ্ঞাপয়তীত্যর্থঃ। বৃদ্ধিনিমিত্তেনেতি। তথাচৈতন্মতে মহাগুরৌ প্রেতীভূতে কথং বৃদ্ধিকর্ম্মেতি আকাঙ্ক্ষায়াং নোক্তাপকর্ষবিধিঃ কিন্তু বাচনিক এবাত্রাপি সপিণ্ডনাপকর্ষ ইতি বোধ্যম্। তদাদিতদন্তেতি। উভয়ত্রৈব বহুব্রীহিঃ। তেন স আদির্যস্যেতি তদাদিন্যায়ঃ সঃ অন্তো যস্যেতি তদন্তন্যায় ইতি ন্যায়-*

ক্রমস্য ক্লৃপ্তত্বাৎ ক্লৃপ্তক্রমানুরোধাৎ ভবত্বপকর্ষঃ। ন চেহ মাসিকসপিণ্ডনয়োঃ ক্রমক্লৃপ্তিরস্তি। কল্প্যতামিতি চেন্ন প্রয়োগবিধ্যৈক্যে হি ক্রমকল্পনা ইত্যুক্তং পঞ্চমাধ্যায়ে। এতয়োস্তু ভিন্নফলত্বেন প্রয়োগবিধিভেদাৎ মাসিকশ্রাদ্ধানাং প্রেতত্ববিমুক্তিমাত্রং ফলম্। সপিণ্ডনস্তু প্রেতত্ববিমুক্তিপূর্ব্বকপিতৃদেহপ্রাপ্তিঃ। তত্র ষোড়শশ্রাদ্ধানাং প্রেতত্ববিমুক্তিঃ ফলমিতি প্রাগেব যমবচনে দর্শিতম্। সপিণ্ডনস্য পিতৃদেহপ্রাপ্তিঃ ফলমিত্যাহ বিষ্ণুধর্ম্মোত্তরে মার্কণ্ডেয়ঃ। কৃতে সপিণ্ডীকরণে নরঃ সংবৎসরাৎ পরম্। প্রেতদেহং পরিত্যজ্য ভোগদেহং প্রপদ্যতে॥ ভোগদেহঃ পিতৃদেহঃ। তথা বিষ্ণুপুরাণে।

দ্বয়ং তত্রোৎকর্ষে তদাদিন্যায়ো যথা অগ্নিমারুতাদূর্দ্ধং অনুযাজৈশ্চরন্তীত্যত্র। সর্ব্বত্র হি যাগে আগন্তুকহোমাৎ প্রাগনুযাজাহুতয়ঃ। অনন্তরঞ্চ প্রযাজাহুতয়ঃ যাগবিশেষে চাগ্নিমারুতাদূর্দ্ধমিত্যনেনাগ্নিমারুতাহুতিরূপস্যাগন্তুকস্য পরতোবিধানাৎ। অনুযাজোৎকর্ষে তদাদিকস্য প্রযাজাদেরুৎকর্ষঃ। অপকর্ষে তদন্তন্যায়ো যথা পশুযাগে তিষ্ঠন্তং পশুং প্রযজন্তীত্যত্র। যাগান্তরে হি পশ্চাদালম্ভনাদিক্রিয়াকলাপাদনন্তরং প্রযাজাহুতয়ঃ পশুযাগে চ তিষ্ঠন্তং পশুমিত্যনেন পশ্বালম্ভনাৎ প্রাক্ প্রযাজবিধানাগন্তুকহোমাৎ প্রাক্‌কর্ত্তব্যতাকপং তদপকর্ষং বোধয়তি। বেদঃ প্রযাজাপকর্ষে চ তদন্তস্য হবিরাসাদনাদেরপকর্ষঃ। প্রকৃতে চ মাসিকানাং সপিণ্ডীকরণান্তত্বাৎ তদন্তন্যায়েন সপিণ্ডীকরণাপকর্ষে মাসিকাপকর্ষঃ স্যাদিত্যর্থঃ। তত্রেতি। হবিরাসাদনাদেঃ প্রযাজপূর্ব্বভাবিত্বস্য বাচনিকত্বাদস্তু তত্র তথা। ইহ তু তাদৃশবচনাভাবাৎ মাসিকসপিণ্ডীকরণয়োর্ন ক্রমঃ ক্লৃপ্তঃ। যেন তদনুরোধাৎ সপিণ্ডনাপ-

প্রেতে পিতৃত্বমাপন্নে সপিণ্ডীকরণাদনু। ইতি। সপিণ্ডীকরণানন্তরং হারীতঃ। ততঃ প্রভৃতি বৈ প্রেতঃ পিতৃসামান্যমাপ্নুয়াৎ। বিন্দতে পিতৃলোকঞ্চ ততঃ শ্রাদ্ধং প্রবর্ত্ততে॥ ইতি ॥ ১৪৮ ॥

অতঃ ফলভেদেনাধিকারিভেদাৎ। প্রয়োগবিধিভেদে কথং ক্রমকল্পনা। অতঃ সপিণ্ডনাপকর্ষে ন মাসিকাপকর্ষ ইত্যত্রাহ সপিণ্ডীকরণান্তা ত্বিতি। সর্ব্বৈব প্রেতক্রিয়া সপিণ্ডীকরণান্তেতি প্রতিপাদনাৎ দ্বয়োরপি সাধিকারয়োর্ব্বাচনিক এব ক্রমঃ দর্শপৌর্ণমাসাবিষ্ট্বা সোমেন যজেতেতিবৎ। অতঃ কৃতমাসিকস্য সপিণ্ডনাধিকারাদ্বাচনিকক্র-

কর্ষে মাসিকাপকর্ষঃ স্যাদিত্যর্থঃ। আশঙ্কতে কল্প্যতামিতি। প্রয়োগবিধ্যৈক্যে হীতি। প্রয়োগবিধিরপূর্ব্বম্। অত্রায়মর্থঃ। যত্রাঙ্গাঙ্গিভাবোপপন্নানাং পৃথক্প্রধানানাং দর্শপৌর্ণমাসষট্কাদিরূপাণাং বা একমেব পরমাপূর্ব্বমুৎপদ্যতে তদর্থৈনৈকে নৈবাধিকারিণাং সর্ব্বেষাং তেষাং কর্ত্তব্যতয়া যুগপৎ কর্ত্তুরশক্যত্বাৎ ক্রমাকাঙ্ক্ষায়াং পাঠক্রমাদিনানুষ্ঠানক্রমঃ কল্পনীয়ঃ। যত্র তু নানাপ্রধানানাং বিভিন্নপরমাপূর্ব্বফলকত্বং তত্রাধিকারিভেদাৎ সর্ব্বেষামেকাধিকারিকর্ত্তব্যত্বাভাবাৎ ক্রমাকাঙ্ক্ষাবিরহান্ন ক্রমকল্পনেতি। এতয়োর্ম্মাসিকসপিণ্ডীকরণয়োর্ভিন্নফলত্বেন প্রেতত্ববিমুক্ত্যাদিরূপভিন্নফলত্বেন। প্রয়োগবিধিভেদাৎ পরমাপূর্ব্বভেদাৎ। ফলভেদং দর্শয়তি মাসিকশ্রাদ্ধানামিতি। পিতৃসামান্যং পিতৃত্বম্ ॥ ১৪৮ ॥

অধিকারভেদাদিতি। এতৎফলকামনারূপস্যাধিকারস্য ভেদেন কর্ত্তুর্ভেদাদিত্যর্থঃ। অত ইতি। ক্রমকল্পনাবিরহেণ ক্রমাভাবাৎ মাসিকানাং সপিণ্ডীকরণাৎ পশ্চাদপি কর্ত্তুং শক্যত্বাদিত্যর্থঃ। সাধিকারয়োরিতি। পৃথক্ সাধিকারয়োর্ম্মাসিকসপিণ্ডীকরণয়োরিত্যর্থঃ।

মানুরোধাৎ সপিণ্ডনাপকর্ষে মাসিকাপকর্ষঃ। কল্পতরৌ তু প্রেতক্রিয়া প্রেতশব্দোল্লেখেন ক্রিয়া সপিণ্ডীকরণান্তা। অতোঽপকর্ষে সপিণ্ডীকরণেঽম্বুঘটশ্রাদ্ধং ন প্রেতশব্দেন কার্য্যং কিন্তু পিতৃশব্দেনেত্যুক্তম্। তন্ন প্রেতসম্বন্ধিনী ক্রিয়া প্রেতক্রিয়া ন তু প্রেতশব্দেন লক্ষণাপ্রসঙ্গাৎ শব্দস্য স্বরূপবাচকত্বাভাবাৎ। তস্মাদুক্তমেব ব্যাখ্যানং যুক্তম্। কিঞ্চ সপিণ্ডনাপকর্ষে যদি সকলপ্রেতশ্রাদ্ধা-পকর্ষো ন প্রামাণিকস্তদা সপিণ্ডনাপকর্ষপক্ষেঽম্বুঘট-শ্রাদ্ধস্য স্বকাল এব প্রাপ্তত্বাৎ পুনর্বিধানমনর্থকং স্যাৎ। যথা যাজ্ঞবল্ক্যঃ। অর্ব্বাক্ সপিণ্ডীকরণং যস্য সংবৎসরা-দ্ভবেৎ। তস্যাপ্যন্নং সোদকুম্ভং দদ্যাৎ সংবৎসরং দ্বিজে॥

বাচনিক এব ক্রম ইতি। তথা ক্রমকল্পনা মাস্তু কিন্তু বাচনিক এব ক্রম ইতি ভাবঃ। অতএব ষোড়শশ্রাদ্ধগণনেঽপি একাদশাহশ্রাদ্ধস্যা-দ্যত্ববিধানাৎ স্ফুট এব ক্রম উক্তঃ। দশপৌর্ণমাসাবিতি। অত্র যথা-শ্রুতের্ব্বাচনিকঃ ক্রমস্তথা প্রকৃতেঽপীত্যর্থঃ। অতঃ কৃতমাসিকস্যেতি। এবঞ্চাদ্যশ্রাদ্ধস্য দৈবাদশৌচান্তদিনাকরণেঽন্তরাকৃষ্টৈকাদশ্যা অলাভে মাসিকদিনে কর্ত্তব্যতা তথা দ্বিতীয়মাসিকাদেরপি দৈবাৎ তৃতীয়-মাসিকাদেঃ প্রাগকরণে তৃতীয়মাসিকাদিদিনে কর্ত্তব্যতা। তেষাং তত্র বিধানাভাবেঽপি ক্রমরূপাঙ্গানুরোধাৎ অকৃততৎপূর্ব্বশ্রাদ্ধস্য তচ্ছ্রাদ্ধাধিকারাভাবাচ্চ। ন তু পতিতশ্রাদ্ধস্য গৌণকালানুরোধাৎ মাসিকশ্রাদ্ধস্য মুখ্যকালবাধোঽন্যায্যত্বাৎ। লক্ষণাপ্রসঙ্গাদিতি। যদ্যপি তৎপুরুষপক্ষেঽপি পূর্ব্বপদে ষষ্ঠ্যর্থসম্বন্ধে লক্ষণা তথাপি সা নিরূঢ়েতি বিশেষঃ। এতেনাম্বুঘটশ্রাদ্ধমুপপদ্যতে। অপকৃষ্য সপিণ্ডী-করণানন্তরমপি প্রেতপদোল্লেখেন কার্য্যমিতি কল্পতরুমতনিরাসাৎ প্রতি-

কিঞ্চ। অর্ব্বাক্ সংবৎসরাদ্বৃদ্ধৌ পূর্ণে সংবৎসরেঽপি বা। যে সপিণ্ডীকৃতাঃ প্রেতা ন তেষান্তু পৃথক্ ক্রিয়া॥ ইতি শাতাতপবচনমপকৃষ্য সপিণ্ডীকরণপক্ষেঽপি পৃথক্-ক্রিয়ামেকোদ্দিষ্টক্রিয়াং প্রত্যাব্দিকক্রিয়াব্যতিরিক্তাং নিরস্যতি। যতঃ। ততঃপ্রভৃতি সংক্রান্তাবুপরাগা-দিপর্ব্বসু। ত্রিপিণ্ডমাচরেচ্ছ্রাদ্ধমেকোদ্দিষ্টং মৃতাহনি॥ ইতি মৎস্যপুরাণবচনং সপিণ্ডনাদূর্দ্ধং মৃতাহনি প্রত্যাব্দি-কক্রিয়ামেকোদ্দিষ্টবিধিনা বিদধাতি। কিঞ্চাপকৃষ্যাপি সপিণ্ডনে কৃতে প্রেতত্বনিস্তারপূর্ব্বা পিতৃলোকপ্রাপ্তিরব-গম্যতে। প্রেতত্বনিস্তারশ্চ ষোড়শশ্রাদ্ধসাধ্য ইতি কথং মাসিকানপকর্ষঃ॥ ১৪৯॥

---

পন্নম্। সপিণ্ডীকরণাপকর্ষানন্তরমনুষ্টশ্রাদ্ধস্ত অর্ব্বাক্ সংবৎসরাদ্যস্ত ইতি যাজ্ঞবল্ক্যবচনাদেব সিদ্ধম্। ননু পদানাং স্বপরত্বেঽপি লক্ষণা নিরূঢ়ৈব শর্ম্মা দেবশ্চ বিপ্রস্যেত্যাদৌ শর্ম্মাদেবাদিপদানাং স্বস্মিন্ মুনি-প্রয়োগানাং দর্শনাৎ। তথাচ বিনিগমক ইত্যতো যুক্ত্যন্তরমাহ কিঞ্চেতি। ননু। যঃ সপিণ্ডীকৃতং প্রেতং পৃথক্পিণ্ডে নিযোজয়েৎ। বিধিঘ্নস্তেন ভবতি পিতৃহা চোপজায়তে॥ ইতি বচনাৎ নিষেধপ্রশক্তাবনুষ্টশ্রাদ্ধস্য প্রতিপ্রসবার্থমুক্তবচনার্থবদ্ভবিষ্যতীতি অত আহ কিঞ্চেতি। প্রত্যাব্দি-কব্যতিরিক্তমিতাত্র হেতুমাহ যত ইতি। বিদধাতীত্যন্তং যতোঽতঃ প্রত্যাব্দিকব্যতিরিক্তাং নিরস্যতীত্যর্থঃ। তথাচ সপিণ্ডীকরণানন্তরং নিষেধান্মাসিকশ্রাদ্ধস্য কর্ত্তব্যতা ন স্যাদিতি ভাবঃ। ননু মা ভবতু তত্র মাসিকশ্রাদ্ধং কেবলসপিণ্ডীকরণাদেব প্রেতত্ববিমুক্তিরিত্যনুপপত্ত্যভাবা-দিত্যত আহ কিঞ্চাপকৃষ্যেতি। ষোড়শশ্রাদ্ধমধ্যে ইতি। যস্যৈতানি ন দীয়ন্তে প্রেতশ্রাদ্ধানি ষোড়শ। পিশাচত্বং ধ্রুবং তস্য দত্তৈঃ শ্রাদ্ধ-শতৈরপি॥ ইত্যাদিবচনাদিত্যর্থঃ॥ ১৪৯॥

যথা অর্ব্বাক্ সংবৎসরাদ্‌বৃদ্ধৌ ইত্যনেন সপিণ্ডনাপকর্ষমভিধায়াহ শাতাতপঃ। ন পৃথক্ পিণ্ডদানন্তু তস্মাদূর্দ্ধং বিধীয়তে। প্রেতানামিহ সর্ব্বেষাং যে মন্ত্রৈশ্চ নিযোজিতাঃ॥ প্রেতত্বাচ্চেহ নিস্তীর্ণাঃ প্রাপ্তাঃ পিতৃগণন্তু তে। নন্নু। কৃতে সপিণ্ডীকরণে নরঃ সংবৎসরাৎ পরম্। প্রেতদেহং পরিত্যজ্য ভোগদেহং প্রপদ্যতে॥ ইতি বিষ্ণুধর্ম্মোত্তরবচনমপকৃষ্য সপিণ্ডনে কৃতে সংবৎসরানন্তরমেব পিতৃত্বপ্রাপ্তিং বোধয়তি। অন্যথা সংবৎসরাৎ পরমিতি ব্যর্থং স্যাৎ। তথাগ্নিপুরাণে। অর্ব্বাক্ সংবৎসরাদ্‌যস্য সপিণ্ডীকরণং ভবেৎ। প্রেতত্বমিহ তস্যাপি

সপিণ্ডনাপকর্ষে মাসিকাপকর্ষ ইত্যত্র স্ফুটমেব প্রমাণমাহ যথেতি। ন পৃথক্ পিণ্ডদানন্ত্বিতি। তথাচ মাসিকানাং প্রেতত্বপরীহারার্থমাবশ্যকতয়া সাপিণ্ডানন্তরং তন্নিষেধে তৎপূর্ব্বং তৎকরণং স্ফুটমেবোক্তমিতি ভাবঃ। এবঞ্চ যস্য মাসিকানি সর্ব্বাণ্যেব শ্রাদ্ধানি পতিতানি সপিণ্ডনকালশ্চ গতঃ তত্র সপিণ্ডনাৎ পূর্ব্বং তানি কৃত্বা সপিণ্ডনং কার্য্যম্। অতএব মিতাক্ষরায়াং যস্য মাসিকাদীনি বিঘ্নবিস্মরণাদিনা পতিতানি তস্যাপি তন্নিবৃত্তৌ কৃষ্ণৈকাদশ্যাং বৎসরান্তমৃতাহে বা কার্য্যাণীতি লিখিতম্। নন্নু সপিণ্ডীকরণাপকর্ষেঽপি সংবৎসরপর্য্যন্তং ন প্রেতত্বপরিহার ইতি বচনসিদ্ধম্। তত্র চ বীজং মাসিকানামকরণমেবান্যথা ষোড়শশ্রাদ্ধসম্পত্তৌ সামগ্রীসত্ত্বাদনন্তরমেব প্রেতত্বপরিহারস্য দুর্নিবারত্বাৎ। তৎ কথং সপিণ্ডনাপকর্ষে মাসিকাপকর্ষ ইত্যাশঙ্কতে নন্বিতি। নন্নু ভবতু সপিণ্ডনাপকর্ষে মাসিকাপকর্ষঃ তথাপি বৎসরান্তরমেব প্রেতত্বপরিহারাৎ কথং তন্মধ্যে বৃদ্ধিকর্ম্মসম্ভবঃ। মহাগুরৌ প্রেতীভূতে বৃদ্ধিকর্ম্ম ন যুজ্যতে। ইত্যুক্তেরত আহ তস্মাদিতি। শাতাতপবচনাচ্চেতি।

জ্ঞেয়ং সংবৎসরং নৃপ ॥ তন্ন এতয়োরেব মাসিকাপকর্ষে প্রমাণত্বাৎ। অন্যথা প্রেতত্বপরিহারকারণাভাবাদেব প্রেতত্বসিদ্ধেরনর্থকত্বাপত্তেঃ। তস্মাদশক্ত্যা ষোড়শাপকর্ষবিষয়মিদং বচনদ্বয়ম্। বৃদ্ধিনিবন্ধনে ত্বপকর্ষেঽনন্তরমেব প্রেতত্বপরিহারঃ তদর্থমেবাপকর্ষাৎ শাতাতপবচনাচ্চ। কিঞ্চ মাসিকানাপকর্ষে তৎসাধ্যস্য প্রেতদেহপরিহারস্যাজাতত্বাৎ। তদভাবে পিতৃদেহপ্রাপ্তেরপ্যজাতত্বাৎ। কথং নান্দীমুখে পিতৃপদপ্রয়োগঃ। কিঞ্চ। সপিণ্ডীকরণাদূর্দ্ধং ন দদ্যাৎ প্রতিমাসিকম্। একোদ্দিষ্টবিধানেন দদ্যাদিত্যাহ শৌনকঃ ॥ ইতি ছন্দোগপরিশিষ্টবচনবিরোধঃ। অপকর্ষপক্ষে সপিণ্ডীকরণাদূর্দ্ধং প্রতিমাসমেকোদ্দিষ্টবিধানেন ন দদ্যাৎ কিন্তু পার্ব্বণবিধানেন ইত্যর্থো বক্ষ্যতে। অতঃ সপিণ্ডনাপকর্ষে মাসিকাপকর্ষ ইতি সিদ্ধম্। যৎ তু। যস্য সংবৎসরাদর্ব্বাক্ সপিণ্ডীকরণং ভবেৎ। মাসিকঞ্চোদকুম্ভঞ্চ দদ্যাৎ সংবৎসরং দ্বিজঃ ॥ ইতি লোকাক্ষিনাম্না বচনং লিখিতম্। তদনাকরং সমূ-

অর্ব্বাক্ সংবৎসরাদিতি। শাতাতপবচনে বৃদ্ধিনিমিত্তমপকর্ষং বিদধতা তদানীং প্রেতত্বপরিহারোঽপি প্রতিপাদিতঃ। অন্যথা মহাগুরোঃ প্রেতীভাবে বৃদ্ধ্যনুপপত্তেরিতি ভাবঃ। যুক্ত্যন্তরমপ্যাহ কিঞ্চেতি। কথং নান্দীমুখেতি। অত্র হি নান্দীমুখবিশেষণবিশিষ্টপিতৃপরত্বেনৈব দেবতাত্বাৎ নান্দীমুখাঃ পিতর ইত্যাদ্যভিধানাদিতি ভাবঃ। বিরোধং দর্শয়তি অপকর্ষপক্ষে ইতি। অয়ঞ্চ কিঞ্চেত্যাদিপাঠো গ্রন্থকৃদসম্মতো ভ্রান্তপরম্পরাপ্রাপ্ত এব। গ্রন্থকৃতৈতদ্বচনস্যান্যথাব্যাখ্যাস্যমানত্বাদিতি

লত্বেঽপ্যপ্রাপ্তপ্রেতত্ববিষয়ং বেতি বক্ষ্যতে। তথা পঠ-
ন্তি। শ্রাদ্ধানি ষোড়শাদত্ত্বা ন তু কুর্য্যাৎ সপিণ্ডতাম্।
তদ্ধানৌ চ কৃতে প্রেতঃ পিতৃত্বং ন প্রপদ্যতে ॥ শ্রাদ্ধানি
ষোড়শাপাদ্য বিদধীত সপিণ্ডতাম্। পিতুঃ পুত্রো বিধা-
নজ্ঞ ইতি পৌরাণিকা বিদুঃ॥ গোভিলঃ। পূর্ণে সংবৎসরে
ষণ্মাসে ত্রিপক্ষে বা যদহর্ব্বা বৃদ্ধিরাপদ্যেত তদহশ্চত্বার্য্যু-
দকপাত্রাণি সতিলগন্ধপুষ্পোদকানি ত্রীণি পিতৃণামেকং
প্রেতস্য প্রেতপাত্রং পিতৃপাত্রেষ্বাসিঞ্চতি যে সমানা ইতি
দ্বাভ্যামেতেন পিণ্ডো ব্যাখ্যাতঃ। পূর্ণে সংবৎসর ইতি
মুখ্যঃ কল্পঃ। তদশক্তৌ সংবৎসরান্তে বিসর্জ্জনং নবম-
মাস্যমিত্যেক ইতি। পৈঠীনসিবচনান্নবমো মাসঃ। তদ-
শক্তৌ ষষ্ঠো মাসঃ। তত্রাপ্যশক্তৌ ত্রিপক্ষঃ ॥ ১৫০ ॥

বোধ্যম্। উপসংহরতি অত ইতি। এবং দাশাহিকপিণ্ডদানমাসি-
কয়োরপি সমাখ্যাবলাৎ ক্রমসিদ্ধিঃ। পূর্ব্বক্রিয়া মধ্যমা চ তথাচৈবোত্তরা
ক্রিয়া। ইতি বিষ্ণুপুরাণে দাশাহিকপিণ্ডদানাদেঃ পূর্ব্বক্রিয়াত্বস্যাদ্যাদি-
মাসিকানাঞ্চ মধ্যমত্বাভিধানাচ্চ। সাকরত্বেঽপীতি। অয়মাশয়ঃ।
গঙ্গাদিমৃতানামপ্রাপ্তপ্রেতভাবত্বাৎ কেবলং নিত্যত্বেন প্রত্যবায়পরীহা-
রার্থং ষোড়শশ্রাদ্ধানাং কর্ত্তব্যত্বে বৃদ্ধিশ্রাদ্ধে পিতৃপদেন দেবতাত্বসিদ্ধয়ে
সপিণ্ডনাপকর্ষঃ। এতৎষোড়শশ্রাদ্ধানাঞ্চ প্রেতক্রিয়াত্বাভাবাৎ। সপিণ্ডী-
করণান্তা তু জ্ঞেয়া প্রেতক্রিয়া বুধৈঃ। ইতি বচনাবিষয়ত্বেন তদন্তন্যায়া-
নবসরাৎ। অত্র সপিণ্ডনাপকর্ষেণ মাসিকাপকর্ষঃ প্রমাণাভাবাৎ। অতঃ
সপিণ্ডনানন্তরং মাসিকানি কর্ত্তব্যানীতি। শ্রাদ্ধানি ষোড়শেতি।
অন্নোৎসর্গস্য শ্রাদ্ধত্বাভ্যুপগমাৎ তদ্রূপাণি ষোড়শ শ্রাদ্ধানি অকৃত্বা

তত্রাপ্যশক্তৌ প্রথমমাসস্যাশৌচাপগমে দ্বাদশভি-র্দ্দিনৈর্দ্বাদশমাসিকশ্রাদ্ধানি নির্ব্বর্ত্য ত্রয়োদশাহঃ সপিণ্ডীকরণকালঃ। শূদ্রস্য দ্বাদশাহ এব মাসিকার্থবৎ দ্বাদশাহং শ্রাদ্ধং কৃত্বা ত্রয়োদশেঽহ্নি বা কুর্য্যাৎ। মন্ত্রবর্জ্জং হি শূদ্রাণাং দ্বাদশেঽহনীতি। বক্ষ্যমাণবিষ্ণুবচনাৎ। প্রথমমাসিকবিষয়ত্বং বিষ্ণুবচনস্যেতি নির্যুক্তিকং ষণ্মাস-

সপিণ্ডনং পিণ্ডমিশ্রণং ন কুর্য্যাদিত্যর্থঃ। সপিণ্ডনপদস্য সপিণ্ডীকরণশ্রাদ্ধপরত্বে তস্য ষোড়শশ্রাদ্ধানন্তর্য্যবাধাৎ ॥ ১৫০ ॥

প্রথমমাসস্যেতি। দ্বিজাতিপ্রায়েণ শূদ্রস্য তু অশৌচব্যপগম এবেতি বোধ্যম্। দ্বাদশভির্দ্দিনৈরিতি। অত্র দ্বাদশাহাদিদ্বাদশভির্দ্দিনৈরিত্যর্থঃ। একাদশাহস্যাদ্যশ্রাদ্ধাবরুদ্ধত্বাদিতি বদতি গোবিন্দানন্দঃ। তদসৎ প্রমাণাভাবাৎ ক্রমার্থমাদ্যশ্রাদ্ধানন্তরং তদ্দিনারম্ভেঽপি ক্ষতিবিরহাৎ। অতএব গ্রন্থকৃতাপি অশৌচব্যপগম ইত্যেবাভিহিতম্। তত্ত্বাদ্যশ্রাদ্ধদিনব্যপগমে ইতি। শূদ্রস্য বিশেষমাহ শূদ্রস্যেতি। দ্বাদশাহ এবেতি। সপিণ্ডনকাল ইতি পূর্ব্বেণান্বয়ঃ। মাসিকার্থবদিতি। মাসিকস্যার্থঃ প্রয়োজনং প্রেতাপ্যায়নাদি তদ্‌যুক্তং দ্বাদশভির্দ্দিনৈর্দ্বাদশশ্রাদ্ধং কৃত্বা ইত্যর্থঃ। দ্বাদশেঽহনীতি। তেষাং ত্রিংশদ্দিবসাশৌচবিধানাদাদ্যশ্রাদ্ধদিনে প্রথমমাসিকস্য কৃতত্বেন তদনন্তরৈকাদশদিবসেষু একাদশমাসিকানি কৃত্বা চরমে দ্বাদশদিনে সপিণ্ডনং কুর্য্যাদিত্যর্থঃ। যদি ত্বশৌচমধ্যে মৃতাহপাতস্তদাশৌচান্ত এব প্রথমমাসিকস্য কর্ত্তব্যত্বাৎ তদ্দিনাবধি দ্বাদশদিনেষু দ্বাদশমাসিকানি চরমদিনে চ সপিণ্ডনমিতি প্রথমমাসস্য একাহ এবেতি। মৈথিলাস্তু দ্বাদশপূরণদিন এব সপিণ্ডনম্। অস্থিতেশ্চ শরীরস্য দ্বাদশাহঃ প্রশস্যতে। ইতি ব্যাঘ্রবচনৈকবাক্যত্বাৎ ইতি বদন্তি। তদসৎ ব্যাঘ্রবচনস্য দ্বাদশাহেন বা কুর্য্যাদেকাহে ইতি মরীচ্যুক্তদ্বাদশাহেনৈকবাক্যত্বকল্পনাসম্ভবাৎ। ন চ

ত্রিপক্ষবিষয়ত্বয়ৈব কুতো ন ভবেদিতি চেন্ন। প্রথমমাসিক এব দ্বাদশমাসিকাপকর্ষসম্ভবাৎ। তত্রাপ্যশক্তৌ প্রথমমাসস্যৈকাহ এব দ্বাদশমাসিকসহিতসপিণ্ডীকরণকালঃ। একাহে দ্বাদশাথবেতি পূর্ব্বোক্তমরীচিবচনাৎ। কল্পতরৌ তু ভবস্মিন্ মাসি বৃদ্ধৌ নিশ্চিতায়ামেব নবমষষ্ঠাসাদয়ঃ সপিণ্ডীকরণাপকর্ষকালা ইত্যুক্তম্। তচ্চিন্ত্যম্। যদহর্ব্বা বৃদ্ধিরাপন্না সন্নিহিতা ভবতি সোঽপি সপিণ্ডীকরণকালঃ। এতেনেদং নিরস্তম্। কথং বৃদ্ধিদিনে সপিণ্ডনং বৃদ্ধি-

একাহে দ্বাদশাথবেতি তদুত্তরকল্পেন সহৈকবাক্যত্বকল্পনামাদায় বিনিগমনাবিরহঃ। একাহে দ্বাদশাথবেত্যনেন একবাক্যত্বকল্পনে দ্বাদশাহপদস্য চাতুর্ব্বর্ণ্যসাধারণাধর্ম্মাশৌচাঙ্গতৃতীয়দিনপরত্বেনাজহৎস্বার্থলক্ষণাপত্তেঃ। অস্মন্মতে তু দ্বাদশদিনসমুদায়পরত্বান্ন লক্ষণেতি বিনিগমনয়োঃ স্ফুটত্বাৎ। যদ্যপি মরীচিবচনে দ্বাদশমাসিকানামেব কাল উক্তঃ তথাপি সপিণ্ডনস্য কালান্তরানভিধানাৎ সপিণ্ডনস্যাপি স এব কালঃ। শ্রীপতিপ্রভৃতয়োঽপ্যেবম্। তচ্চিন্ত্যমিতি প্রমাণাভাবাদিতি শেষঃ। সন্নিহিতা ভবতীতি। সন্নিধানঞ্চ বৃদ্ধ্যব্যবহিতপূর্ব্বদিনত্বমেব। অন্যথা বৃদ্ধাবিত্যনেনৈব সিদ্ধের্বৃদ্ধিরাপদ্যেত ইত্যভিধানং ব্যর্থং স্যাৎ। অত আসন্নপূর্ব্বদিনলাভার্থমেব তদুপাদানমিতি ভাবঃ। এতেনেতি। সপিণ্ডনসম্বন্ধিপূর্ব্বদিনকর্ত্তব্যত্বেনেত্যর্থঃ। পার্ব্বণাতিদেশেনেতি। এতেন সপিণ্ডীকরণস্যাপরাহ্ণঃ কাল ইতি স্ফুটমুক্তম্। অতিদেশঃ নিত্যেন তুল্যং শেষং স্যাদিতি ভবিষ্যপুরাণাদিবচনেষু নিত্যপদস্যাবশ্যকপার্ব্বণৈকোদ্দিষ্টোভয়পরতয়া যথা পার্ব্বণবিধানাতিদেশাদপরাহ্ণপ্রাপ্তিস্তথৈকোদ্দিষ্টবিধানাতিদেশাৎ মধ্যাহ্নস্যাপীতি বাচ্যম্। সন্দেহে সদৈবকবহুদেবতাকপার্ব্বণধর্ম্মাতিদেশস্যৈব ন্যায্যত্বাৎ। অতো বহূনামনুরোধাৎ পার্ব্বণকালগ্রহণং ন ত্বেকদ্দিষ্টকালগ্রহণম্। অয়মর্থঃ।

শ্রাদ্ধস্য প্রাতর্বিধানাৎ সপিণ্ডনস্য পার্ব্বণবিধানাতিদে-শেনাপরাহ্নপ্রাপ্তেরিতি। অতো ন বৃদ্ধিদিনে সপিণ্ডনং কিন্তু বৃদ্ধিসন্নিহিতপূর্ব্বদিন ইতি। ইতিকর্ত্তব্যতামাহ তদহরিতি উদকপাত্রাণ্যর্ঘ্যপাত্রাণি ত্রীণি পিতৃণামেকং প্রেতস্যেতি ॥ ১৫১ ॥

পাঠক্রমাদনুষ্ঠানক্রমঃ কল্প্যঃ। একং প্রেতস্যে-

---

ছন্দোগানাং বৃষোৎসর্গচরৌ তণ্ডুলপিষ্টয়োরুপাদানসন্দেহে। যদ্যপ্য-দন্তকঃ পূষা পৈষ্টমত্তি সদা চরুম্। অগ্নীন্দ্রেশ্বরসামান্যাত্তণ্ডুলোঽত্র বিধীয়তে॥ ইতি ছন্দোগপরিশিষ্টেন বহুদেবতাকতণ্ডুলোপদেশাদব-সীয়তে। অতএব জৈমিনিরপি বিরুদ্ধধর্ম্মসমবায়ে ভূয়সাং স্যাৎ সধর্ম্মকত্বমিতি বিদধে। শ্রাদ্ধচিন্তামণিস্তু প্রেতোপাধিনা পিতৃশ্রাদ্ধ-করণাদেকোদ্দিষ্টমেব প্রধানং অতস্তত্র মধ্যাহ্নতরঃ প্রশস্ত ইতি সপিণ্ডী-করণে মধ্যাহ্ন এব কাল ইত্যাহ। বস্তুতস্তু আংশিকপার্ব্বণৈকোদ্দি-ষ্টোভয়রূপতয়া নরসিংহাকারং সপিণ্ডীকরণং ন পার্ব্বণং নাপ্যেকোদ্দিষ্টং কিন্তু তাভ্যাং পৃথক্। অতস্তত্র কালবিশেষানভিধানাৎ কালাকাঙ্ক্ষায়াং সর্ব্বশ্রাদ্ধপ্রকৃতিত্বেন পার্ব্বণস্যৈব কালোঽন্বেতীতি বোধ্যম্। গোবিন্দা-নন্দরঘুনন্দনাভ্যাস্তু। সপিণ্ডীকরণং বক্ষ্যে পূর্ণেঽব্দে তৎক্ষয়েঽহনি। সপিণ্ডীকরণং কুর্য্যাদপরাহ্নে তু পূর্ব্ববৎ॥ ইতি গরুড়পুরাণবচনমেব সপিণ্ডনস্যাপরাহ্নিকত্বে প্রমাণমিত্যুক্তম্। আচার্য্যচূড়ামণিস্তু অপরাহ্নে তু পৈতৃকমিত্যুৎসর্গঃ। তথাচাপবাদকাভাবাৎ উৎসর্গ এব সপিণ্ডনে-ঽপরাহ্নপ্রাপ্তির্ন ত্বতিদেশাদিত্যাহ পূর্ব্বদিনে ইতি। মিশ্রাস্তু বৃদ্ধি-দিন এবাবশিষ্টমাসিকানামপকর্ষ ইত্যাহুঃ। তে চ শেষান্নভক্ষণবাধভয়েন সপিণ্ডনদিনে সাংবৎসরিকবাধ ইত্যুক্ত্বা বৃদ্ধৌ কিমিতি বাধং বিস্মৃত-ন বিদ্মঃ॥ ১৫১ ॥

পাঠক্রমাদিতি। তথাচাদৌ পিতৃপক্ষানুষ্ঠানং পশ্চাৎ প্রেতপক্ষানুষ্ঠান-

ত্যত্র প্রেতশব্দোঽচিরপ্রমীতং জনকমাহ। অত্র কশ্চিৎ প্রকর্ষেণ ইতো গত ইতি ব্যুৎপত্ত্যা প্রেতপদং চিরপ্রমীতবৃদ্ধপ্রপিতামহপরতয়া ব্যাখ্যাতবান্। অতস্তস্যৈব পিণ্ডপাত্রজলয়োঃ সমর্পিতত্বান্নিবৃত্তিঃ। যথা শাতাতপঃ। অর্ব্বাক্ সংবৎরাদ্ বৃদ্ধৌ পূর্ণে সংবৎসরেঽপি বা। যে সপিণ্ডীকৃতাঃ প্রেতা ন তেষান্তু পৃথক্ ক্রিয়া॥ ন পৃথক্ পিণ্ডদানন্তু তস্মাদূর্দ্ধং বিধীয়তে। প্রেতানামিহ সর্ব্বেষাং যে মন্ত্রৈস্তু নিযোজিতাঃ॥ তথা। যঃ সপিণ্ডীকৃতং প্রেতং পৃথক্ পিণ্ডে নিযোজয়েৎ। বিধিঘ্নস্তেন ভবতি পিতৃহা চোপজায়তে॥ সপিণ্ডীকৃতস্য পার্ব্বণে একোদ্দিষ্টে চ পৃথক্পিণ্ডদাননিষেধোঽবগম্যতে। স চ বৃদ্ধপ্রপিতামহস্যৈব ঘটতে। তথা মৎস্যপুরাণম্। যে সমানা ইতি দ্বাভ্যামাদ্যাস্তু বিভজেত্রিধা।

মিত্যর্থঃ। অথ মৈথিলাঃ। সপিণ্ডীকরণশ্রাদ্ধং দেবপূর্ব্বং নিযোজয়েদিতি বচনাদাদৌ দেবপক্ষঃ প্রেতসপিণ্ডীকরণার্থমেব পিতামহাদিশ্রাদ্ধবিধেঃ প্রেতপ্রাধান্যাদাদৌ প্রেতায় দত্ত্বা পশ্চাৎ পিতামহাদিভ্যো দদ্যাৎ। অতএব। সংবৎসরান্তে প্রেতায় তৎপিত্রে তৎপিতামহায় ইতি বিষ্ণুবচনে। তথা চত্বার্য্যুদকপাত্রাণি একং প্রেতায় ত্রীণি পিতৃভ্য ইতি বৈজবাপগৃহ্যে চ প্রেতায়েত্যাদাবুক্তম্। ব্রহ্মপুরাণে চ। প্রেতবিপ্রস্য হস্তে তু চতুর্ভাগং জলং ক্ষিপেৎ। ততঃ পিতামহাদিভ্যশ্চ মন্ত্রৈশ্চ পৃথক্ পৃথক্॥ ইতি সুব্যক্তমেব প্রেতপূর্ব্বকত্বমুক্তমিত্যাহুঃ। তন্ন পূর্ব্বদেবদানে পার্ব্বণস্যোপক্রান্তত্বাৎ তন্মধ্যে প্রেতশ্রাদ্ধস্যান্যায্যত্বাৎ। পিতৄনেবাশয়েত্তত্র পুনঃ প্রেতঞ্চ নির্দ্দিশেৎ। ইতি শাতাতপেন শ্রাদ্ধক্রমস্য স্ফুটাভিধানাচ্চ। বলবচ্ছাব্দক্রমাববোধেন চ বিষ্ণুবৈজবাপয়োঃ পাঠক্রমস্যানুপাদেয়ত্বাৎ

চতুর্থস্য পুনঃ কার্য্যং ন কদাচিদ্যতো ভবেৎ॥ ততঃ পিতৃত্বমাপন্নঃ স চতুর্থস্তদা পুমান্। অগ্নিষ্বাত্তাদিমধ্যস্থ প্রাপ্নোত্যমৃতমুত্তমম্॥ সপিণ্ডীকরণাদূর্দ্ধং তস্মৈ তস্মান্ন দীয়তে। পিতৃম্বেব তু দাতব্যং তৎপিণ্ডো যেষু সংস্থিতঃ॥ তথা। ত্রিভিঃ সপিণ্ডীকরণৈরাসেকাত্রিতয়ং পিতা। যদা প্রাপ্স্যতি কালেন তদা মুচ্যেত বন্ধনাৎ। মুক্তোঽপি লেপভাগিত্বং প্রাপ্নোতি কুশমার্জ্জনাৎ॥ ইতি। আদ্যমাদ্যপুরুষসম্বন্ধাদ্বৃদ্ধপ্রপিতামহপিণ্ডমিত্যর্থঃ। তথা চতুর্থস্য বৃদ্ধপ্রপিতামহস্যাগ্নিস্বত্তাদিপদপ্রাপ্ত্যা বন্ধনবিমোচনাৎ পিণ্ডদানে কার্য্যং নাস্তি। অতস্তৎপিণ্ডং ত্রিধা বিভজ্য প্রপিতামহাদিপিণ্ডেষু সমর্পয়েৎ। বৃদ্ধপ্রপিতামহপিণ্ডো যেষু সমর্পিতস্তেভ্য এব তদূর্দ্ধং দদ্যাৎ। বৃদ্ধস্তু মুক্তোঽপি লেপমাত্রভাগীতি তদসঙ্গতং ব্রহ্মপুরাণবিরোধাৎ। যথা ব্রহ্মপুরাণম্। প্রেতবিপ্রস্য হস্তে তু চতুর্ভাগং জলং ক্ষিপেৎ। ততঃ পিতামহাদিভ্যস্তন্মন্ত্রৈশ্চ পৃথক্ পৃথক্॥ যে সমানা

কল্পনীয়ত্বেন তস্য শাব্দক্রমাপেক্ষয়া দুর্ব্বলত্বাৎ। অতএব হরিশর্ম্মনারায়ণোপাধ্যায়াদিভির্দ্ধৃতং পুরাণবচনম্। শ্রাদ্ধদ্বয়মুপক্রম্য বিদধীত সপিণ্ডতাম্। তয়োঃ পার্ব্বণবৎ পূর্ব্বমেকোদ্দিষ্টমথাপরম্॥ ইতি। অতঃ পিতৃপূর্ব্বকমেব সপিণ্ডীকরণং কিন্তু অর্ঘ্যদানমাত্রে প্রেতপূর্ব্বকতা লিখিতা ব্রহ্মপুরাণে বিশেষ্যশাব্দক্রমাভিধানাৎ। তত্রাপি গন্ধপুষ্পপ্রক্ষেপপর্য্যন্তং পিতৃপূর্ব্বকতৈব কেবলোৎসর্গে তু প্রেতপূর্ব্বকত্বম্। ক্রমঃ পৌর্ব্বাপর্য্যম্। তচ্চ ষড়্বিধং শ্রুত্যর্থপঠনস্থানমুখ্যপ্রাবর্ত্তিকাঃ ক্রমাঃ

ইতি দ্বাভ্যাং তজ্জলন্তু সমর্পয়েৎ। অথ তেনৈব বিধিনা দর্ভমূলেঽবনেজনম্॥ পিতুর্দ্দত্ত্বা তু তৎ পিণ্ডং দদ্যাত্তুক্ত্যা তু পূর্ব্ববৎ। দত্ত্বা পিণ্ডমথাষ্টাঙ্গং ধ্যাত্বা তঞ্চ শুভাম্বরম্॥ সুবর্ণরূপ্যদর্ভৈস্তু তস্মিন্ পিণ্ডং ততস্ত্রিধা। কৃত্বা পিতামহাদিভ্যঃ পিতৃভ্যঃ প্রেতমর্চ্চয়েৎ॥ অত্র পিতামহাদিজলপিণ্ডয়োঃ পিতৃজলপিণ্ডসমর্পণমবগম্যতে। তথা। মৃতে পিতরি যস্যাথ বিদ্যতে চ পিতামহঃ। তেন দেয়াস্ত্রয়ঃ পিণ্ডাঃ প্রপিতামহপূর্ব্বকাঃ। তেভ্যশ্চ পৈতৃকঃ পিণ্ডো নিযোক্তব্যস্তু পূর্ব্ববৎ॥ অত্রাপি পিতৃপিণ্ডসমর্পণমবগম্যতে। তথা বিষ্ণুঃ। সংবৎসরান্তে প্রেতায় তৎপিত্রে তৎপিতামহায় তৎপ্রপিতামহায় চ ব্রাহ্মণান্ দৈবপূর্ব্বান্ ভোজয়েৎ। অত্র তচ্ছব্দাৎ প্রেতস্য পিতৃপিতামহপ্রপিতামহানামবগমাৎ প্রেতশব্দাদচিরপ্রমীত এবাবগম্যতে। ন চ স পিতা যস্যেতি বহুব্রীহিঃ ন ঋতশ্চেতি বহুব্রীহৌ নিত্যং কপ্রত্যয়বিধানাৎ তৎপিতৃকায়েতি স্যাৎ। তথাশ্বলায়নগৃহ্যম্। চত্বার্য্যুদপাত্রাণি একং মৃতস্য ত্রীণীতরেষাম্।

---

ইত্যুক্তেঃ। তত্র শ্রৌতঃ শাব্দঃ ক্রমো যথা উপষদ্ভিশ্চরিত্বা মাসমগ্নিহোত্রং জুহোতীত্যাদৌ। অত্র ক্ত্বাশ্রুতেরুপষদাখ্যযাগত্রয়মাসাগ্নিহোত্রয়োঃ ক্রমঃ শাব্দঃ। অর্থক্রমো যথা অগ্নিহোত্রং জুহোতি যবাগুং পচতি ইত্যত্র অগ্নিহোত্রার্থত্বাৎ প্রাগ্‌যবাগুপাকঃ। পাঠক্রমো যথা সমিধো যজতি ইড়ো যজতি বর্হির্যজতি স্বাহাকারং যজতি তনূনপাতং যজতি ইত্যত্র প্রযাজাখ্যাহুতিপঞ্চকে পাঠক্রমাদেব ক্রমঃ। স্থানক্রমো যথা দর্শপৌর্ণমাসবিকৃতিভূতাসামিষ্টৌ প্রকৃতিবদ্বিকৃতিরিতি ন্যায়েন প্রকৃতিধর্ম্মাণাং

অত্র মৃতশব্দাদচিরপ্রমীত এবাবগম্যতে। কিঞ্চ গোভিলেনৈকোদ্দিষ্টমভিধায় এতৎ প্রেতশ্রাদ্ধমিত্যুক্ত্বা সপিণ্ডনবিধাবেকং প্রেতস্যেত্যুক্তম্ ॥ ১৫২ ॥

অত্রাপি প্রেতশব্দাৎ পূর্ব্বপ্রেতশব্দোক্তাচিরপ্রমীত এব প্রতীয়তে তদবরুদ্ধবুদ্ধিত্বাৎ। শাতাতপবচনে তু প্রেতস্য সপিণ্ডনাদূর্দ্ধং পৃথক্ পিণ্ডদাননিষেধ একোদ্দিষ্টবিষয়ো ন পিণ্ডদানমাত্রবিষয়ঃ পৃথক্ পদানর্থক্যাপত্তেঃ। আদ্যত্বস্তু অধোগণনয়া পিতুরুপপদ্যত এব। মৎস্যপুরাণেঽপি।
সপিণ্ডীকরণশ্রাদ্ধং দেবপূর্ব্বং নিযোজয়েৎ। পিতৄনেবাশয়েত্তত্র পুনঃ প্রেতঞ্চ নির্দ্দিশেৎ ॥ ইত্যচিরপ্রমীতমভিধায়।
গন্ধোদকতিলৈর্যুক্তং কুর্য্যাৎ পাত্রচতুষ্টয়ম্। অর্ঘ্যার্থং পিতৃপাত্রেষু প্রেতপাত্রং প্রসেচয়েৎ ॥ ইত্যত্রাপি স এব প্রেতপদাদবগম্যতে। ননু কথং ত্রিধা বিভাগঃ পিতামহপ্র-

তদঙ্গকপালানাং প্রযাজাদীনাং প্রাপ্তৌ প্রকৃতৌ যস্মিন্ স্থানে ক্রিয়তে তেন যেষাং অঙ্গানাং প্রকৃতৌ প্রধানস্য প্রাক্কর্ত্তব্যতা যেষাঞ্চ পশ্চাৎকর্ত্তব্যতা বিকৃতাবপি তেষাং তথৈব কর্ত্তব্যতা তেন কদা কর্ত্তব্যমিতি নানধ্যবসায়ঃ স্থানপদেন চাদিমধ্যাবসানমুচ্যতে। মুখ্যক্রমো যথা গ্রহযাগেঽধিদৈবতপ্রত্যধিদৈবতঞ্চ যাজেতেতি শ্রূয়তে। তত্র ক্রমাকাঙ্ক্ষায়াং মুখ্যযাগানন্তরমেব তদুভয়যজনং উৎপত্তিবিধৌ মুখ্যস্য প্রথমোপস্থিতত্বাদিতি ॥ ১৫২॥

অচিরপ্রমীতেতি। জনকশব্দোঽত্র হঠাদাযাতঃ। তথাবিধানাৎ পিতামহাদীনামপি বোধকত্বাৎ। প্রেতশব্দস্য বৃদ্ধপ্রপিতামহপরত্বয়েতি। এতন্মতে পৃথক্ ক্রিয়া পুনঃ শ্রাদ্ধম্। প্রেতবিপ্রস্য হস্তে ত্বিতি। অত্র প্রেতপদমচিরপ্রমীতপরং পরতঃ ততঃ পিতামহাদিভ্য ইত্যভিধানাৎ।

পিতামহাভ্যামেব পার্ব্বণেঽপৃথক্ পিণ্ডদানাৎ। অতো দ্বেধৈব বিভাগো যুক্তঃ। ইত্যত্রোক্তং চতুর্থস্য পুনঃ কার্য্যমিতি তৃতীয়বিভাগসমর্পণেনৈব চতুর্থস্য বিসর্জ্জনং ভবতীত্যর্থঃ। অতএব ত্রিভিঃ সপিণ্ডীকরণৈরাসেকত্রিতয়ং পিতা। ইতি পিতুরেবাসেকত্রিতয়মিত্যবগম্যতে। অথাত্রাসন্তোষঃ তদা শাখিভেদব্যবস্থিতোঽয়ং প্রকারঃ। প্রকৃতমভিধীয়তে। এতেন পিণ্ডো ব্যাখ্যাত ইতি পিণ্ডমিশ্রীকরণ অর্ঘ্যপাত্রমিশ্রীকরণপরিপাটী বোদ্ধব্যা। বিষ্ণুঃ। সংবৎসরান্তে প্রেতায় তৎপিত্রে তৎপিতামহায় তৎপ্রপিতামহায় ব্রাহ্মণান্ দেবপূর্ব্বান্ ভোজয়েৎ। অত্রাগ্নৌকরণমাবাহনং পাদ্যমর্ঘ্যঞ্চ দদ্যাৎ সংসৃজেত্ত্বা পৃথিবীসমানাধন্ত ইতি প্রেতপাত্রং পাত্রত্রয়ে যোজয়েৎ উচ্ছিষ্টসন্নিধৌ পিণ্ডচতুষ্টয়ং কুর্য্যাৎ ব্রাহ্মণাংশ্চাচান্তান্ দত্তদক্ষিণাংশ্চানুব্রজ্য বিসর্জ্জয়েৎ। ততঃ প্রেতপিণ্ডমর্ঘ্যপাত্রোদকবৎ পিণ্ডত্রয়ে নিদধ্যাৎ। কর্ষূত্রয়সন্নিকর্ষেঽপ্যেবং সপিণ্ডনং মাসিকা-

চতুর্ভাগং চতুর্থভাগং তদবরুদ্ধবুদ্ধিস্থত্বাদিতি প্রেতশব্দাৎ প্রাক্ তয়ৈবোপস্থিতত্বাদিতি ভাবঃ। একোদ্দিষ্টবিষয় ইতি। সাংবৎসরিকঞ্চ নৈকোদ্দিষ্টং কিন্তু তদ্ধর্ম্মগ্রাহি পৃথক্ত্বেন তদ্ব্যাবৃত্তিঃ। আদ্যন্তু বিভজেত্রিধেতি। ব্যাচষ্টে আদ্যস্ত্বিতি। স এবেতি। অচিরপ্রমীত এবেত্যর্থঃ। চতুর্থস্য পুনঃ কার্য্যমিতি ব্যাখ্যাতুমাহ নম্বিতি। অথাত্রাসন্তোষ ইতি। তৎপিণ্ডো যেষাং সংস্থিত ইত্যত্র গত্যভাবাদসন্তোষ ইত্যর্থঃ। বিষ্ণুরিত্যত্র প্রেতায়ানুক্ত্বা তৎপিত্রে ইত্যভিধানাৎ। কৃতসপিণ্ডনস্য পিতুঃ পশ্চাদপি পিতামহমরণে তৎপিত্রাদিভিরেব কৃতসপিণ্ডৈরকৃতসপিণ্ডৈর্ব্বা তস্য সপিণ্ডনং কার্য্যং ন তু স্বপিত্রা সহে-

র্থবৎ দ্বাদশাহং শ্রাদ্ধং কৃত্বা ত্রয়োদশেহহ্নি বা কুর্য্যাৎ। মন্ত্রবর্জ্জং হি শূদ্রাণাং দ্বাদশেহহ্নি সংবৎসরাভ্যন্তরে যদ্যধিমাসকো ভবেৎ তদা মাসিকার্থং দিনমেকং বর্দ্ধয়েৎ। ততঃ প্রেতপিণ্ডমিতি। বিসর্জ্জনানন্তরং পিণ্ডমিশ্রীকরণং বহ্বৃচানাম্। কর্ষূত্রয়সন্নিকর্ষেহপ্যেবমিতি প্রেতৈকোদ্দিষ্টসম্বন্ধিকর্ষূত্রয়সন্নিহিতেষু পিতামহাদিপিণ্ডেষু সংসৃজেদিত্যর্থঃ। অপকর্ষমাহ মাসিকার্থবদিতি। মাসিকপ্রয়োজনং প্রেতস্যাপ্যায়নাদি তেন যুক্তানি শ্রাদ্ধানি অশৌচাপগমে দ্বাদশস্বহঃসু কৃত্বা ত্রয়োদশেহহ্নি সপিণ্ডীকরণং কুর্য্যাদিত্যর্থঃ। আদ্যমেকোদ্দিষ্টমশৌচান্ত এব ॥১৫৩॥

ত্যুক্তম্। কর্ষূত্রয়সন্নিকর্ষেহপ্যেবং সপিণ্ডনমিতি। সপিণ্ডনং পিণ্ডমিশ্রণমিত্যর্থঃ। অতএব সংসৃজেদিত্যর্থ ইতি ব্যাখ্যাস্যতে মন্ত্রবর্জ্জমিতি। এতেন। অর্ঘ্যার্থং পিতৃপাত্রেষু প্রেতপাত্রং প্রসেচয়েৎ। যে সমানা ইতি দ্বাভ্যামেতজ্ জ্ঞেয়ং সপিণ্ডনম্॥ ইতি ভবিষ্যপুরাণে সমন্ত্রকশ্রাদ্ধসপিণ্ডনপদসঙ্কেতাৎ। তত্রাধিকারবোধকবিধিবলাদেব স্ত্রীশূদ্রয়োর্যে সমানা ইতি মন্ত্রদ্বয়পাঠেহধিকারঃ কল্প্যতে রথকারন্যায়াদিতি ভ্রমো নিরস্তঃ। মন্ত্রবর্জ্জমিত্যস্য নির্ব্বিষয়ত্বাপত্তেঃ শাস্ত্রাপেক্ষয়া ন্যায়স্য দুর্ব্বলত্বাৎ। ন চ তদুভয়ান্যমন্ত্রনিষেধ ইতি বাচ্যম্। যে সমানা ইতি দ্বাভ্যাং শেষং পূর্ব্ববদাচরেৎ। এতৎ সপিণ্ডীকরণমেকোদ্দিষ্টং স্ত্রিয়া অপি॥ ইতি যাজ্ঞবল্ক্যবচনাৎ। যে সমানা ইতি মন্ত্রদ্বয়বৎ সপিণ্ডনাঙ্গশাস্ত্রান্তরাণামপি শঙ্কেতসিদ্ধেঃ। কিঞ্চ স্ত্রীশূদ্রয়োর্মন্ত্রজন্যাদৃষ্টসিদ্ধির্নমস্কারাদেবানুমতঃ অস্য নমস্কারো মন্ত্র ইত্যুক্তেঃ। অর্থপ্রকাশনাখ্যাদৃষ্টপ্রয়োজনার্থমেবায়ং মন্ত্রান্তরপাঠঃ। অর্থপ্রকাশনস্য চ ব্রাহ্মণপঠিতমন্ত্রাদেব সিদ্ধের্ন শূদ্রস্য স্ত্রিয়া বা মন্ত্রপাঠাধিকারকল্পনেতি। অত্র কল্পে আদ্যাদিশ্রাদ্ধানাং কাললোপাৎ আদ্যমেকোদ্দিষ্টমিতি ॥ ১৫৩ ॥

ষাণ্মাসিকদ্বয়ন্তু ষষ্ঠদ্বাদশয়োরেবেত্যস্মিন্ পক্ষে ষোড়শশ্রাদ্ধকরণপরিপাটী। এতচ্চ ত্রৈপক্ষিকপর্য্যন্তং সপিণ্ডীকরণাসামর্থ্যে ইতি প্রাগেব ব্যাখ্যাতম্। সংবৎসরাভ্যন্তর ইতি। সংবৎসরমধ্যেঽধিমাসপাতে একং শ্রাদ্ধদিনং বর্দ্ধয়েৎ। তেন ত্রয়োদশসু দিনেষু ত্রয়োদশ শ্রাদ্ধানি কৃত্বা চতুর্দ্দশে সপিণ্ডীকরণম্। এতেন সংবৎসরমধ্যেঽধিমাসে ত্রয়োদ-

ষষ্ঠদ্বাদশয়োরেবেতি। দিনয়োরিত্যর্থঃ। এতেন একাহেন তু ষণ্মাসা ইতি বচনাৎ ষষ্ঠমাসিকপূর্ব্বদিনে ষাণ্মাসিকপ্রাপ্তেরত্র পঞ্চমদিন এব ষাণ্মাসিকমিতি যে বদন্তি তে নিরস্তাঃ। দ্বাদশদিনানাং দ্বাদশমাসস্থানীয়তয়া পঞ্চমমাসস্থলীয়ে পঞ্চমদিনে ষষ্ঠমাসবিহিতষাণ্মাসিকস্যাপ্রশক্তেঃ। একং শ্রাদ্ধদিনমিতি। শ্রাদ্ধস্য বিশেষণতয়া তৎকরণসিদ্ধিঃ। অত্র মলমাসস্থলীয়ে শ্রাদ্ধদ্বয়স্যৈব বৃদ্ধের্ন দিনস্যাপীতি মিশ্রমতম্। তেনেতি। একপক্ষে ত্রয়োদশদিনে দ্বিতীয়ষাণ্মাসিকম্। অস্থিতেশ্চ শরীরস্যেত্যস্য বিবরণং পরচক্রাদীতি ষোড়শশ্রাদ্ধাপকর্ষকাল ইতি। ষোড়শপদেনাদ্যশ্রাদ্ধপরং তস্য স্বকালকৃতত্বেন সর্ব্বথৈবাপকর্ষাসম্ভবাৎ। পুত্রসমুচ্চয়ার্থ ইতি। পূর্ব্বং তস্যাপি প্রক্রান্তত্বাদিতি ভাবঃ। এতেন সংস্কারকস্যাপি মহাগুরৌ প্রেতীভূতেঽপকর্ষেণ স্বপুত্রাদেশ্চূড়াদিকং কার্য্যমিতি প্রতিপন্নম্। সপিণ্ড ইত্যনেনৈব সিদ্ধে ভ্রাতৃভ্রাতৃপুত্রয়োঃ পৃথগুপাদানং তয়োরসত্ত্ব এবান্যসপিণ্ডাধিকারার্থম্। পুত্রকন্যাদেরিত্যাদিপদাৎ পুংসবনসীমন্তোন্নয়নার্থং পত্ন্যা অপি গ্রহণং তয়োরপ্যভ্যুদয়পদার্থত্বাৎ পত্যুর্ম্মহাগুরোঃ প্রেতত্বাৎ তদ্গর্ভসংস্কারার্থমপকর্ষস্যাবশ্যকত্বাৎ। বিবাহাদিত্যাদিপদাৎ পুংসবনসীমন্তোন্নয়ননামকরণনিষ্ক্রমণান্নপ্রাশনানাং গ্রহণং। চূড়াদিবদেষামভ্যুদয়শব্দার্থানাং সংস্কারাণামাবশ্যকত্বাৎ। অষ্টৌ সংস্কারকর্ম্মাণি গর্ভাধানমিব স্বয়ম্। পিতা কুর্য্যাত্তদন্যো বা তস্যাভাবেঽপি তৎক্রমাৎ॥ ইতি বৃদ্ধশাতাত-

শস্থ মাসেষু ত্রয়োদশ শ্রাদ্ধানি ভবন্তীতি জ্ঞাপিতম্। অতঃ সপিণ্ডীকরণাপকর্ষে সর্ব্বত্র মাসিকাপকর্ষ ইতি সিদ্ধম্। অপকর্ষনিমিত্তমাহ ব্যাঘ্রঃ। আনন্ত্যাৎ কুলধর্ম্মাণাং পুংসাঞ্চৈবায়ুষঃ ক্ষয়াৎ। অস্থিতেশ্চ শরীরস্য দ্বাদশাহঃ প্রশস্যতে॥ কুলধর্ম্মজ্যোতিরাগমাদিসিদ্ধানন্তরভাবিবিনা-শপরচক্রাদিভয়োৎপন্নম্লেচ্ছদেশগমনাদিভির্নিমিত্তৈরশৌ-চাপগমে দ্বাদশদিনানি ষোড়শশ্রাদ্ধাপকর্ষকালঃ। লঘু-হারীতঃ। ভ্রাতা বা ভ্রাতৃপুত্রো বা সপিণ্ডঃ শিষ্য এব

---

পেন নিয়মবিধানাৎ। অত্র কালান্তরাসহিষ্ণূনামেব চূড়াদীনামপকর্ষ-নিমিত্তত্বম্। যথাকালস্তু কার্য্যাণি নান্যথামুচ্যতে ততঃ। ইত্যুক্তেঃ। অত-এব যদহর্ব্বা বৃদ্ধিরাপদ্যেত ইত্যাবশ্যকবৃদ্ধিপদমিত্যুক্তম্। গর্ভাধান-সংস্কারার্থঞ্চ নাপকর্ষঃ। বিদেশগমনঞ্চৈব তীর্থযাত্রাঞ্চ মৈথুনম্। মহা-গুরুনিপাতে তু বর্জ্জয়েদ্দেবদর্শনম্॥ ইতি কূর্ম্মপুরাণে মৈথুননিষেধাৎ। অন্যথা প্রতিমাস ঋতুকালে গর্ভাধানস্যাবশ্যকত্বাৎ সর্ব্বদৈবাপকর্ষপ্রসঙ্গে৷ মৈথুনবিষেধো ব্যর্থঃ স্যাদিতি। এবং জাতকর্ম্মার্থং নাপকর্ষঃ প্রাক্ পুত্রজন্মরূপনিমিত্তনিশ্চয়াভাবাৎ। এবঞ্চ জাতকর্ম্মগর্ভাধানব্যতিরিক্তাঃ পুংসবনাদিবিবাহান্তা বৃদ্ধিপদার্থা অষ্টৌ সংস্কারা অসম্ভবা চ কালান্তরা মহাগুরুনিপাতেঽপকর্ষনিমিত্তানীতি নির্গলিতার্থঃ। বৃদ্ধি-পদার্থশ্চ বৃদ্ধিশ্রাদ্ধযুক্তপুংসবনাদিকর্ম্মৈতি ভানুভট্টাদয়ঃ। ননু যত্র বৃদ্ধিং নিশ্চিত্য পূর্বদিনে সপিণ্ডনং কৃতং পরদিনে চ বিঘ্নেন বৃদ্ধ্যভাব-স্তত্র কীদৃশী ব্যবস্থা ইতি চেৎ তত্র পুনঃ সপিণ্ডীকরণং ন কর্ত্তব্যমিতি ব্যবস্থা বৃদ্ধিনিশ্চয়বদধিকারিকৃতত্বেন তস্য শাস্ত্রবোধিতত্বাৎ শাস্ত্রবোধিত-সপিণ্ডীকরণস্যৈব প্রেতত্ববিমুক্তিহেতুত্বাৎ। ননু তথাপি। কৃতে সপিণ্ডীকরণে নরঃ সংবৎসরাৎ পরম্। প্রেতদেহং পরিত্যজ্য ভোগ-দেহং প্রপদ্যতে॥ ইতি বচনাৎ সপিণ্ডনাপকর্ষপক্ষেঽপি সংবৎসরপূর্ত্তা-

বা। সহ পিণ্ডক্রিয়াং কৃত্বা কুর্য্যাদভ্যুদয়ন্ততঃ॥ তৎ... কাম্যং যৎ কর্ম্ম বৎসরাৎ প্রথমাদৃতে॥ অভ্যুদয়ো বিবাহাদিঃ। বাশব্দঃ পুত্রসমুচ্চয়ার্থঃ। তেন মৃতস্য পুত্র-ভ্রাত্রাদিভিঃ সপিণ্ডনং কৃত্বা মৃতপিতৃকস্য পুত্রকন্যাদেশ্চূড়াকরণোপনয়নবিবাহাদি কার্য্যম্। কাম্যমনাবশ্যকং কর্ম্ম ইষ্টাপূর্ত্তব্রতদানাদি। তথৈব সপিণ্ডনানন্তরমেব কার্য্যং কিন্তু প্রথমসংবৎসরং বিনেতি বিশেষঃ। অপকর্ষানিমিত্তত্বং কাম্যস্য নাস্তীত্যর্থঃ॥ ১৫৪॥

---

বেব প্রেতত্ববিমুক্তিঃ। তৎ কথমপকর্ষানন্তরং সংবৎসরাভ্যন্তরে বৃদ্ধিসম্ভবঃ মহাগুরোঃ প্রেতীভাবতাদবস্থ্যাৎ। সপিণ্ডীকরণজন্যাদৃষ্টেন প্রেতত্ববিমুক্ত্যুৎপাদ্যানাং যথা পূর্ণসংবৎসরকালসহকারী তথা বৃদ্ধ্যারম্ভপ্রাক্‌কালোঽপি পৃথক্ সহকারীতি কল্প্যতে। অন্যথা বৃদ্ধিনিমিত্তেনাপকর্ষবিধানমনর্থকং স্যাৎ। কৃতেঽপ্যপকর্ষে মহাগুরোঃ প্রেতত্বসত্ত্বে ন বৃদ্ধিসম্ভবাৎ। অতএব যদা কর্ত্তুরশক্ত্যা তদপকর্ষঃ তদাপি বর্ষমধ্যে ন বৃদ্ধ্যনুপপত্তিঃ তদারম্ভপ্রাক্‌কালসহকারেণৈব প্রেতত্ববিমুক্তেঃ। কৃতে সপিণ্ডীকরণে ইতি বচনঞ্চাশক্তিকৃতসপিণ্ডনাপকর্ষবিষয়মিতি। অত্র কেচিৎ চূড়োপনয়নবিবাহাস্ত্রয় এবাপকর্ষনিমিত্তানি ন ত্বন্নপ্রাশনান্ত-সংস্কারাঃ। যথাকালন্তু কার্য্যাণীতি বচনানুরোধাৎ। অন্যথানুপপদ্যমান-বৃদ্ধ্যর্থমেবাপকর্ষবিধানং অন্নপ্রাশনান্তাস্তু। নৈমিত্তিকানি কাম্যানি নিপতন্তি যথা যথা। তথা তথৈব কার্য্যাণি ন কালস্তু বিধীয়তে॥ ইতি বচনাৎ তন্মধ্যে করণাদন্যথোপপন্না এবেত্যতো বৃদ্ধিশ্রাদ্ধং বিনৈব তানি কার্য্যাণীত্যাহুঃ। তদসৎ সংস্কারাণামাগন্তুকনিমিত্তজন্যত্বা-ভাবাৎ কাম্যত্বাভাবাচ্চ নৈমিত্তিকানীত্যুক্তবচনাবিষয়ত্বাৎ। শান্ত্যর্থং স্বস্ত্যয়নকার্য্যাদীনামেব তদ্বচনবিষয়ত্বাৎ। অন্যথা তুল্যন্যায়াচ্চূড়াদয়োঽপ্যন্যথোপপন্না এবেতি তেষামপি তন্মধ্যে করণপ্রসঙ্গে যদহর্ব্বা বৃদ্ধিরাপদ্যেতেতি নির্বিষয়ং স্যাৎ। কাম্যমনাবশ্যক-

এতেনাবশ্যকং কর্ম্ম চূড়াকরণাদি সপিণ্ডনমপকৃষ্য কার্য্যম্। নেষ্টাপূর্ত্তাদিনিমিত্তান্তরেণ ত্বপকর্ষে কৃতে বৎসরমধ্যেঽপি কাম্যং কর্ত্তব্যমেব। এবমপকৃষ্টে সপিণ্ডনে পার্ব্বণমপি সংবৎসরমধ্যে কর্ত্তব্যমেব। অবিশেষেণ সাপিণ্ডনানন্তরতয়া বোধিতত্বাৎ নিষেধাভাবাৎ প্রেতত্বপবিহারপূর্ব্বকপিতৃলোকপ্রাপ্তের্জ্জাতত্বাচ্চ। অন্যথা সাগ্নেঃ পিণ্ডপিতৃযজ্ঞোঽপি ন স্যাৎ পার্ব্বণতুল্যত্বাৎ। তথা মৎস্যপুরাণে। সাপিণ্ডীকরণাদূর্দ্ধং প্রেতঃ পার্ব্বণ-

মিতি। যৎ কর্ম্ম কালান্তরে কর্ত্তুং শক্যতে তদনাবশ্যকম্। অপকর্ষনিমিত্তত্বমিতি। প্রথমাদ্বৎসরাদূতে ইত্যনেন কাম্যাভ্যুদয়স্যেষ্টাপূর্ত্তাদেঃ প্রথমবৎসরাদ্বহিরেব কর্ত্তব্যতোদেশেন নিমিত্তাপকর্ষাভাবপ্রতিপাদনাদিতি ভাবঃ॥ ১৫৪॥

এতেনেতি। আবশ্যকমসম্ভবৎকালান্তরং কর্ম্ম। এতেন সম্ভবৎকালান্তরস্য বৃদ্ধ্যভাবাচ্চূড়াদেরপি নাপকর্ষনিমিত্তত্বমিতি প্রতিপাদিতম্। নিমিত্তান্তরেণ দ্বিতীয়নিমিত্তান্তরং বৃদ্ধিঃ সাগ্নেঃ পিণ্ডপিতৃযজ্ঞঃ তত্র তদানীং পিতৃত্বপ্রাপ্ত্যভাবাৎ কিন্তু বৎসরপূর্ত্তাবেবেতি। অশক্ত্যাপকর্ষে বর্ষমধ্যে পার্ব্বণং কাম্যকর্ম্ম চ ন কর্ত্তব্যমেবেতি। কাম্যে কর্ত্তব্যমেবেতি। মৈথিলাস্তু তথৈব কাম্যমাভ্যুদয়িকযুক্তকাম্যং তেন যস্মিন্ কাম্যে ত্বাভ্যুদয়িকমস্তি তন্ন কার্য্যমন্যৎ কাম্যং কার্য্যমেবেত্যাহুঃ। তন্ন বৃদ্ধীষ্টাপূর্ত্তযোগাশ্চ গৃহস্থশ্চ ততো ভবেৎ। ইত্যনেনাভ্যুদয়িকরহিতস্যাপি নিষেধপ্রতীতেঃ। অবিশেষেণেতি। সপিণ্ডীকরণাদূর্দ্ধমিতি বক্ষ্যমাণমৎস্যপুরাণবচনেনেতি শেষঃ। প্রেতত্বপরীহারেতি। পিতুঃ প্রেতত্বসত্ত্ব এব পার্ব্বণানধিকারাৎ তদভাবে পার্ব্বণাধিকারস্য সিদ্ধত্বাদিতি ভাবঃ। এতেন বৃদ্ধিনিমিত্তকাপকর্ষেঽপি কাম্যং ন বৎসরাভ্যন্তরে কার্য্যম্। প্রথমাদ্বৎসরাদূতে ইতি বচনাদিতি কেষাঞ্চিদ্ভ্রমো নিরস্তঃ। অন্যথেতি। নিমিত্তান্তরেণ কৃতে সপিণ্ডীকরণে পিণ্ডপিতৃযজ্ঞোঽপি ন

ভুগ্‌ভবেৎ। বৃদ্ধীষ্টাপূর্ত্তযোগ্যশ্চ গৃহস্থশ্চ ততো ভবেৎ ॥ তথা ছন্দোগপরিশিষ্টম্। পিতুঃ সপিণ্ডতাং কৃত্বা কুর্য্যান্মাসানুমাসিকম্। মাসানুমাসিকং পার্ব্বণং। সপিণ্ডনমভিধায়াহ হারীতঃ। ততঃ প্রভৃতি বৈ প্রেতঃ পিতৃসামান্যমাপ্নুয়াৎ। বিন্দতে পিতৃলোকঞ্চ ততঃ শ্রাদ্ধং প্রবর্ত্ততে ॥ নমু। সপিণ্ডীকরণাদূর্দ্ধং ন দদ্যাৎ প্রতিমাসিকম্। একোদ্দিষ্টবিধানেন দদ্যাদিত্যাহ শৌনকঃ ॥ ইতি ছন্দোগপরিষ্টেনাস্য বিরোধঃ। অপকৃষ্টসপিণ্ডীকরণাদূর্দ্ধং প্রতিমাসিকমেকোদ্দিষ্টবিধানেন দদ্যাদিত্যভিধানাদর্থতঃ পার্ব্বণাখ্যপ্রতিমাসিকনিষেধঃ। ন দদ্যাৎ প্রতিমাসিকমেকোদ্দিষ্টবিধানেনেতি সম্বন্ধাৎ দদ্যাদিত্যাহ শৌনক ইত্যনেন একোদ্দিষ্টস্যাপকৃষ্টসপিণ্ডনাদূর্দ্ধং বিকল্পো দর্শিতঃ। স চাপ্রাপ্তপ্রেতভাববিষয়ঃ। তথা পদ্মপুরা-

স্যাদিত্যর্থঃ। গৃহস্থশ্চ ততো ভবেদিতি। মহাগুরুনিপাতীতি শেষঃ। সপিণ্ডীকরণাদূর্দ্ধং গার্হস্থধর্ম্মবান্ ভবেদিত্যর্থঃ। গার্হস্থ্যধর্ম্মঃ পঞ্চমহাযজ্ঞঋত্বভিগমনাদিঃ। তথাচ কালিকাপুরাণম্। মহাগুরুনিপাতী তু কাম্যং কিঞ্চিন্ন চাচরেৎ। আর্ত্বিজ্যং ব্রহ্মচর্য্যঞ্চ শ্রাদ্ধং দেবযুতঞ্চ যৎ ॥ মহাগুরুনিপাতী সংস্কার্য্যঃ সংস্কারকো বা সপিণ্ডনাৎ পূর্ব্বং কাম্যমিত্যাদ্যুক্তকর্ম্মাণি নাচরেদিত্যর্থঃ। অতএব দেবীপুরাণে। প্রমীতৌ পিতরৌ যস্য দেহস্তস্যাশুচির্ভবেৎ। নাপি দৈবং ন বা পৈত্র্যং যাবৎ পূর্ণো ন বৎসরঃ ॥ ইতি। অত্র বৎসরপদং পিতৃত্বপ্রাপককালোপলক্ষণম্। অস্যেতি। পার্ব্বণস্য নিষেধ ইত্যর্থঃ। নিষেধং বিবৃণোতি অপকৃষ্টেতি। উত্তরার্দ্ধে একোদ্দিষ্টবিধানাৎ পূর্ব্বার্দ্ধে পার্ব্বণনিষেধ ইত্যর্থঃ। স চাপ্রাপ্তপ্রেতভাববিষয় ইতি প্রাগেব বিবৃতমেতৎ। এতচ্চ সপিণ্ডনানন্তরং মাসিকদানাভিধানং ব্রহ্মপুরাণবচনানবলোকনেন। বক্ষ্যতঃ।

ণম্। শুক্রাঙ্গারকযুক্তা চ চতুর্থী জায়তে যদা। শ্রদ্ধয়া শ্রাদ্ধকৃদ্বিপ্রো ন প্রেতো জায়তে মৃতঃ॥ ননু ভ্রাত্রাদয়ঃ সপিণ্ডনং কৃত্বাভ্যুদয়ং কুর্য্যুরিতি সামান্যতোঽভিধানাৎ স্বপুত্রচূড়াকরণাদাবপি সপিণ্ডনাপকর্ষঃ স্যাৎ॥ ১৫৫॥

তন্ন মৃতস্য সংস্কার্য্যপুত্রদুহিতৃবিষয়ত্বাদভ্যুদয়শব্দস্য মহাগুরৌ প্রেতীভূতে কথমভ্যুদয়কর্ম্মেত্যাকাঙ্ক্ষায়ামপকর্ষবচনম্। ন চ ভ্রাতুর্ভ্রাতা মহাগুরুঃ সপিণ্ডস্য বা সপিণ্ডঃ। ননু বৃদ্ধৌ বৃদ্ধিশ্রাদ্ধসিদ্ধ্যর্থং সপিণ্ডনাপকর্ষঃ পিতৃত্বাভাবেন তৎপিতৃপদেন দেবতাত্বাভাবাৎ। তদা চ মাতৃসপিণ্ডনাপকর্ষো নির্যুক্তিকঃ। ছন্দোগব্যতিরিক্তানাং মাতুরপি বৃদ্ধিশ্রাদ্ধেঽন্তর্ভাবোঽস্তীতি চেন্ন ছন্দোগানামন-

মাসি মাসি চ কর্ত্তব্যং যাবৎ সংবৎসরং দ্বিজ। অতঃ পরন্তু কর্ত্তব্যং সপিণ্ডীকরণং ক্রমাৎ॥ ইতি ব্রহ্মপুরাণে সামান্যতস্তদন্তন্যায়স্য বোধিতত্বাৎ সপিণ্ডনাপকর্ষাৎ সামান্যত এব মাসিকাপকর্ষ। ইতি ন সপিণ্ডনোত্তরং কুত্রাপি মাসিকৈকোদ্দিষ্টদানং নিরুক্তবচনস্যায়মর্থঃ। অশক্তকৃতাপকর্ষে প্রেতত্বসম্ভবাৎ। পার্ব্বণাখ্যং মাসিকং ন কুর্য্যাদিতি কাত্যায়নাদিমতম্। শৌনকস্তু বর্ষমধ্যে একোদ্দিষ্টবিধানেন দদ্যাদিত্যাহ। তচ্চ শৌনকীয়ত্রাদ্ধস্থ চবিষয়মিতি। সপিণ্ডনাপকর্ষঃ স্যাদিতি ভ্রাত্রাদীনামিতি শেষঃ॥ ১৫৫॥

স্বপুত্রদুহিতৃবিষয়ত্বে হেতুমাহ মহাগুরাবিতি। প্রমীতৌ পিতরৌ যস্যেতি লিখিতদেবীপুরাণবচনাৎ মহাগুরুনিপাতীতি কালিকাপুরাণবচনাচ্চ আবশ্যকবৃদ্ধ্যর্থং তত্রৈবাকাঙ্ক্ষোদয়াদিতি ভাবঃ। ভ্রাতুর্ভ্রাতেতি। তথাচ তত্র নাকাঙ্ক্ষোদয় ইতি ভাবঃ। তদয়ং ব্যবস্থানিকর্ষঃ। সংস্কারকস্য বৃদ্ধ্যধিকারিণো মহাগুরুনিপাতে স্বমাতাপিত্রোঃ সপিণ্ডনা-

পকর্ষপ্রসঙ্গাৎ। ন। মহাগুরৌ প্রেতীভূতে বৃদ্ধিকর্ম্ম ন যুজ্যতে। ইতি বৃদ্ধ্যর্থমেব সপিণ্ডনাপকর্ষঃ পূর্ব্বোক্তগোভিলশাতাতপলঘুহারীতবচনেম্ববগম্যতে ন বৃদ্ধিশ্রাদ্ধার্থম্। কিঞ্চ। একাদশাহং নির্ব্বর্ত্য অর্ব্বাগব্দাদ্‌যথাবিধি। প্রকুর্ব্বীতাগ্নিমান্ পুত্রো মাতাপিত্রোঃ সপিণ্ডনম্॥ ইতি ছন্দোগপরিশিষ্টবচনে পিণ্ডপিতৃযজ্ঞার্থং মাতৃসপিণ্ডনাপকর্ষোহবগম্যতে। অতঃ সিদ্ধং বৃদ্ধ্যর্থং মাতাপিত্রোঃ সপিণ্ডনাপকর্ষ ইতি। সাগ্নেঃ পুত্রস্য পিণ্ডপিতৃযজ্ঞোহপ্যপকর্ষনিমিত্তমিত্যাহ জাবালঃ। নাসপিণ্ড্যাগ্নিমান্ পুত্রঃ পিতৃযজ্ঞং সমাচরেৎ। পাপী ভবত্যকুর্ব্বন্ হি পিতৃহা চোপজায়তে॥ সপিণ্ডীকরণং কুর্য্যাৎ পূর্ব্বদর্শেহগ্নিমান্ সুতঃ। পরতো দশরাত্রস্য পূর্ণে হ্যব্দে তথেতরঃ॥ অকরণে নিন্দাং বদন্

কর্ষঃ। সংস্কার্য্যস্য মহাগুরুনিপাতে তদীয়মাতাপিত্রোরপকর্ষঃ। তয়োর্ম্মহাগুরুনিপাতে দ্বয়োরেবাপকর্ষঃ। এবং কনিষ্ঠভ্রাতৃকর্ত্তব্যাবশ্যকস্বপুত্রকন্যাবৃদ্ধৌ জ্যেষ্ঠেন পিতুঃ সপিণ্ডনাপকর্ষঃ কার্য্যঃ ন্যায়তৌল্যাৎ। ন চ সপিণ্ডনক্রিয়াং কৃত্বেতি ক্ত্বানির্দ্দেশাৎ সমানকর্ত্তৃকবৃদ্ধাবেবাপকর্ষঃ ইতি বাচ্যং কনিষ্ঠস্যাপ্যসপিণ্ডিতমহাগুরুত্বাৎ। বৃদ্ধিকর্ম্মযোগ্যত্বে তৎপুত্রাদেরাবশ্যকবৃদ্ধিঃ কথং স্যাদিত্যাকাঙ্ক্ষায়াং ন্যায়তৌল্যেন তদর্থাপকর্ষস্যাবশ্যকত্বে সতি শ্রুতাবানন্তর্য্যমাত্রে ক্রিয়াং কৃত্বেতি তাৎপর্য্যাৎ ন তু সমানকর্ত্তৃকত্বেহপি। অন্যথা জ্যেষ্ঠপুত্রঃ স্বমাতৃসপিণ্ডনাধিকারী পিতা চ কনিষ্ঠভ্রাতৃভগিন্যোর্বৃদ্ধ্যধিকারী তত্র কা গতিঃ। তথা পত্নী সপিণ্ডনাধিকারিণী পিতামহঃ কন্যাদাতা তস্যাশ্চাবশ্যকবিবাহঃ কথং স্যাদিতি। মৈথিলাস্তু সপিণ্ডনানধিকারিণা কনিষ্ঠেন স্বপুত্রবৃদ্ধাদৌ পিতামহাদীনামেবাভ্যুদয়িকং কার্য্যং ন চ স্বপিতৃভ্যঃ পিতা দদ্যাদিত্যনেন বিরোধঃ

পিতৃযজ্ঞস্যাবশ্যকর্ত্তব্যতামাহ পাপী ভবতীতি। অশৌচাপগমে দর্শাৎ প্রাক্ সপিণ্ডনং সাগ্নিনা সুতেন কার্য্যমিত্যাহ সপিণ্ডীকরণমিতি। ইতরোঽনগ্নিঃ পূর্ণেঽব্দে কুর্য্যাৎ। বৈজবাপঃ। অথ সপিণ্ডীকরণং সংবৎসরমেকং পিণ্ডমনুদ্দিশ্য সমাপ্তে সংবৎসরে চত্বার্য্যুদকপাত্রাণি প্রযুনক্তি। তত্রৈকং প্রেতায় ত্রীণি পিতৃভ্যঃ তৎ প্রেতপাত্রং পিতৃপাত্রেষ্বাসিঞ্চতি। যে সমানা ইতি দ্বাভ্যামেবং পিণ্ডানাং অথাভিমৃষতি। এষ বোঽনুগতঃ প্রেতঃ পিতরস্তং দধামি বঃ। শিবমস্ত্বিতি শেষাণাং জায়ন্তাং চিরজীবিনঃ॥ সমানীব আকূতিঃ সমানা হৃদয়ানি বঃ। সমানমস্তু বো মনো যথা

পিতরি শ্রাদ্ধাযোগ্যে পিতামহাদীনামেব স্বপিতৃত্বাৎ পিতৃপদস্য প্রাপ্তপিতৃলোকপরত্বাবশ্যকত্বাৎ প্রব্রজিতপিতৃকবদিত্যাহুঃ। তদসৎ বৃদ্ধীষ্টাপূর্ত্তযোগ্যশ্চ গৃহস্থশ্চ ততো ভবেৎ। ইতি সামান্যতো বৃদ্ধিনিষেধাবগমাৎ প্রমাতৌ পিতরৌ যস্যেতি নিষেধাচ্চ। অন্যথা জ্যেষ্ঠস্য নিরগ্নিত্বে সপিণ্ডনং বিনাপি সাগ্নিকনিষ্ঠস্য পিণ্ডপিতৃযজ্ঞাধিকারঃ স্যাৎ। প্রব্রজিতে পিতরি তু। ব্রাহ্মণাদিহতে তাতে পতিতে সঙ্গবর্জ্জিতে। ব্যুৎক্রমাচ্চ মৃতে দেয়ং যেভ্য এব দদাত্যসৌ॥ ইতি বিশেষবচনাদেব পিতামহাদিশ্রাদ্ধম্ ইহ তু বচনাভাবাৎ ন তদ্‌গৃহ্যতে ইতি। বৃদ্ধ্যর্থমেবেতি। ব্রতাদিরূপাভ্যুদয়ার্থমিত্যর্থঃ। পূর্ব্বোক্তেতি। যদহর্ব্বা বৃদ্ধিরাপদ্যেতেতি গোভিলসূত্রে অর্ব্বাক্ সংবৎসরাদ্‌বৃদ্ধ্যাবিতি শাতাতপবচনে সহ পিণ্ডক্রিয়াং কৃত্বেতি লঘুহারীতবচনে চ বৃদ্ধেরেব নিমিত্তত্বাবগমাদিতি ভাবঃ। অতঃ সিদ্ধমিতি। এতেন যেষামবীরাদীনাং সপিণ্ডননিষেধস্তেষামপি পুত্রকন্যাভ্যুদয়ার্থং পঞ্চদশশ্রাদ্ধাপকর্ষ ইত্যপি সিদ্ধং ন্যায়সাম্যাদিতি। জাবাল ইতি। অসপিণ্ডঃ অকৃতপিতৃমাতৃসপিণ্ডনোঽগ্নিমান্ পুত্রঃ পিতৃযজ্ঞং ন সমাচরেৎ পিতৃযজ্ঞঞ্চাকুর্ব্বন্ পাপী ভবতি পিতৃহা চ ভবতীত্যর্থঃ। তদা

বঃ সুসমাহিতঃ॥ ইতি। সঙ্গচ্ছধ্বং সংবদধ্বং শং বো মনাংসি জানতাম্। দেবভোগং যথা পূর্ব্বে সঞ্জানানা উপাসতে॥ ১৫৬॥

ইত্যভিশস্তপতিতভ্রূণঘ্নং স্ত্রীঞ্চাভিচারিণীং নাতিদিশেৎ। ঋজ্বর্থম্। শাতাতপঃ। সপিণ্ডীকরণশ্রাদ্ধং দেবপূর্ব্বং নিযোজয়েৎ। পিতৃনেবাশয়েত্তত্র পুনঃ প্রেতঞ্চ নির্দ্দিশেৎ॥ নিরূপ্য চতুরঃ পিণ্ডান্ পিণ্ডদঃ প্রতিনামতঃ। যে সমানা ইতি দ্বাভ্যামাদ্যন্তু বিভজেত্রিধা॥ এষ এব বিধিঃ পূর্ব্বমর্ঘ্যপাত্রচতুষ্টয়ে। আসিঞ্চেৎ পিতৃপাত্রাণি

কিং কর্ত্তব্যমত্রাহ সপিণ্ডীকরণং কুর্য্যাদিতি। দর্শাৎ পূর্ব্বদিনে সপিণ্ডনং কুর্য্যাদিত্যর্থঃ। অত্র পূর্ব্বে দর্শে ইত্যধিকরণসপ্তমীনির্দ্দেশাৎ দর্শদিনে সপিণ্ডনমিতি শ্রাদ্ধচিন্তামণিঃ। তন্ন একাদশাহং নির্ব্বর্ত্ত্য অর্ব্বাক্ দর্শাদ্‌যথাবিধি। ইতি প্রাগুক্তপরিশিষ্টবচনবিরোধাৎ। এবঞ্চাশৌচান্তরং দর্শাৎ প্রাক্ ত্রয়োদশদিনলাভে দ্বাদশদিনে দ্বাদশমাসিকানি ত্রয়োদশদিনে একস্মিন্নপি দিনে দ্বাদশমাসিকানি কৃত্বা তস্মিন্নেব দিনে বা দর্শপূর্ব্বদিনে বা সাগ্নিনা সপিণ্ডনাপকর্ষঃ কার্য্য ইতি॥ ১৫৬॥

নাতিদিশেন্ন সপিণ্ডয়েদিত্যর্থঃ। এবং পিণ্ডানামিতি। একং প্রেতপিণ্ডং পিতৃপিণ্ডেষু যোজয়িত্বা তানভিষিঞ্চতি একীকৃত্য নির্ম্মাতি ভেদ্যেব ইত্যাদিমন্ত্রৈরিত্যর্থঃ। দেবপূর্ব্বমিতি। যদ্যেকস্য সপিণ্ডীকরণস্য পার্ব্বণাংশে দেবপূর্ব্বকত্বাদিতি ভাবঃ। যে সমানা ইতি দ্বাভ্যামিত্যত্র বিভাগেঽপি মন্ত্রদ্বয়স্য করণত্বং স্ফুটমভিহিতম্। অত্র শ্রুতিভেদকল্পনভিয়া বিভজেদিত্যস্য বিভাগপূর্ব্বকং সমর্পয়েদিত্যর্থং ব্যাখ্যায় যে সমানা ইতি দ্বাভ্যাং তজ্জলঞ্চ সমর্পয়েদিতি ব্রহ্মপুরাণৈকবাক্যতয়া সমর্পণমাত্রে মন্ত্রান্বয়ো ন বিভাগে ইতি গোবিন্দানন্দেন যদভিহিতং

প্রেতপাত্রেণ মন্ত্রবৎ॥ পিতৄনেবেত্যেবকারো মাতামহাদিব্যাবৃত্ত্যর্থঃ। পুনঃ প্রেতঞ্চ নির্দ্দিশেদিতি ব্রাহ্মণান্তরমুপাদায় প্রেতশ্রাদ্ধং কর্ত্তব্যমিত্যর্থঃ। পুনঃশব্দস্বরসাৎ পিত্রাদিব্রাহ্মণ এব প্রেতনির্দ্দেশঃ কার্য্য ইতি কশ্চিৎ। তদসঙ্গতং প্রেতবিপ্রস্য হস্তে তু চতুর্ভাগং জলং ক্ষিপেৎ। ইতি ব্রহ্মপুরাণবিরোধাৎ পুনঃশব্দস্য কা গতিরিতি চেৎ শ্রাদ্ধার্থনির্দ্দেশমাত্রস্যাবৃত্তিরিতি ব্রূমঃ। বিশেষস্তু প্রেতশ্রাদ্ধস্যাবৃত্তিঃ পক্ষান্তরে নাস্তি। আশ্বালায়নগৃহ্যম্। অথ সপিণ্ডীকরণং চত্বার্য্যুদকপাত্রাণ্যেকং প্রেতস্য ত্রীণীতরেষাং প্রথমং পাত্রং ত্রিষু পাত্রেষু নিযোজয়েৎ সমানীব আকূতিরিত্যেবমেবং প্রথমং পিণ্ডং ত্রিষু পিণ্ডেষু নিযোজয়েৎ। মধুমতীভিঃ সঙ্গচ্ছধ্বমিতি দ্বাভ্যামেবঞ্চতুর্থোঽনুজ্ঞাপিতো ভবতি। ন চাত্র দৈবং যোজয়েৎ প্রাগেব দৈবেঽর্ঘ্যমন্নাদ্যঞ্চ দত্ত্বা গন্ধমাল্যৈঃ পাত্রমর্চ্চয়িত্বা হুতশেষং পিতৃভ্যঃ পাণিষু দদ্যাৎ। চতুর্থো

তদসং লক্ষণাপ্রসঙ্গাৎ। অন্যথা ব্রহ্মপুরাণে এব সমর্পয়েদিত্যস্য সমর্পণার্থং বিভজেদিতি ব্যাখ্যানেন শাতাতপৈকবাক্যতয়া বিভাগমাত্রে মন্ত্রান্বয়ো ন সমর্পণে ইতি বৈপরীত্যস্যাপি সম্ভবাৎ। পুনঃশব্দস্বরসাদিতি। পিতৃব্রাহ্মণে প্রেতশ্রাদ্ধানুষ্ঠানার্থমেব পুনঃশব্দঃ প্রেতব্রাহ্মণস্য পৃথক্ত্বে তদ্বৈয়র্থ্যং স্যাদিতি বক্তুরাশয়ঃ। শ্রাদ্ধার্থনির্দ্দেশমাত্রস্যেতি। তথাচ পুনঃশব্দস্য ন ব্রাহ্মণৈক্যমর্থঃ। কিন্ত্বাবৃত্তিরেব তস্যাশ্চ শ্রাদ্ধার্থনির্দ্দেশস্য শ্রাদ্ধদ্বয়ে বারদ্বয়ং জাতত্বাৎ তত্রৈব যোগ্যত্বেনান্বয় ইতি ভাবঃ। পক্ষান্তরেঽপীতি। পিতৃসম্বন্ধিব্রাহ্মণে প্রেতশ্রাদ্ধকরণপক্ষেঽপীত্যর্থঃ। নাস্তীতি। প্রেতশ্রাদ্ধস্য বারদ্বয়াকরণাদিত্যর্থঃ। আশ্বলায়নগৃহ্যমিতি।

বৃদ্ধপ্রপিতামহোঽনুজ্ঞাপিতো বিসর্জ্জিত ইত্যর্থঃ। ন চাত্র দৈবং যোজয়েদিতি। প্রেতসম্বন্ধিত্বয়া দৈবং ন যোজয়েদিতি হলায়ুধঃ। পিত্রাদীনামাসনদানাদি ॥১৫৭॥

পদার্থকাণ্ডে দেবাসনাদিপদার্থসঙ্করং ন কুর্য্যাদিতি কল্পতরুঃ। হারীতঃ। সমাপ্তেঽব্দে পশুশ্রাদ্ধং বিধিবৎ প্রতিপাদয়েৎ। চতুরো নির্ব্বপেৎ পিণ্ডান্ প্রথমং তেষু নির্ব্বপেৎ ॥ বপাং পশুং চরুঞ্চৈব হবদানানি যানি চ। হুত্বা তানি বিধানেন শেষান্ পিণ্ডান্ সমাপয়েৎ ॥ ততঃ প্রভৃতি বৈ প্রেতঃ পিতৃনামান্তমাপ্নুয়াৎ। বিন্দতে পিতৃলোকঞ্চ ততঃ শ্রাদ্ধং প্রবর্ত্ততে ॥ পশুশ্রাদ্ধং পশু-

পিতৃভ্যঃ পাত্রেষু দদ্যাদিত্যন্তং সূত্রং সমানীবাকূতিরিতি মন্ত্রেণার্ঘ্যনিযোজনং মধুমতীতি সংগচ্ছধ্বমিতি মন্ত্রদ্বয়েন পিণ্ডনিযোজনমিত্যর্থঃ। প্রেতসম্বন্ধিতয়েতি। ন চ প্রেতশ্রাদ্ধস্য একোদ্দিষ্টত্বনিয়মাৎ ন তত্র বিশ্বেদেবা ইতি স্ফুটনিষেধাচ্চ নিষেধসিদ্ধ্যর্থমেতদিতি বাচ্যং বান্ধবানামেকোদ্দিষ্টে বিশ্বেদেবসত্ত্বাৎ এতন্নিষেধার্থবত্ত্বাৎ। পিত্রাদীনামিতি। বৈয়র্থ্যমাশঙ্ক্য কল্পতরুরেবমাহেরিত্যর্থঃ ॥ ১৫৭ ॥

পদার্থকাণ্ডেনেতি। শ্রাদ্ধং ত্রিকাণ্ডং গন্ধাদিদানপর্য্যন্তমেকঃ অগ্নেৌৎসর্গান্তো দ্বিতীয়ঃ বিসর্জ্জনান্তস্তৃতীয়ঃ। তত্র দেবকাণ্ডং সমাপ্য পিতৃকাণ্ডারম্ভ ইতি যাজ্ঞবল্ক্যমতং দৈবে একপদার্থং সমাপ্য তৎপদার্থং পিতৃপক্ষে কুর্য্যাদিতি পারস্করাদীনাং সম্মতম্। তৎসপিণ্ডনে একং কাণ্ডং সমাপ্যৈব পিতৃকাণ্ডারম্ভঃ কার্য্যো ন তু পদার্থসঙ্করঃ কার্য্য ইত্যর্থঃ। শ্রীদত্তোপাধ্যায়স্তু প্রাগেব দৈবেঽর্ঘ্যমন্ত্রাদ্যঞ্চ দত্ত্বেতি সূত্রাদগ্নেৌৎসর্গপর্য্যন্তমেবাত্র কাণ্ড ইত্যাহ। মিশ্রসম্মতমপ্যেতদিতি পিণ্ডনির্ব্বাপপ্রকারমাহ বপাং পশুমিতি। হৃন্মেদস্তু বপা বসেত্যমরঃ। পিতৃসমানতা-

মাংসেন শ্রাদ্ধম্। পশুং পশোরবত্তং মাংসান্তরমিত্যর্থঃ। অবদানানি সূপশাকাদীনি। সপিণ্ডনফলমাহ ততঃ প্রভৃ-তীতি। পিতৃসামান্যং পিতৃসমানতাম্। ততঃ শ্রাদ্ধং পার্ব্বণমিত্যর্থঃ। ব্রহ্মপুরাণে। চতুর্ভ্যশ্চার্ঘ্যপাত্রেভ্য একং বামেন পাণিনা। গৃহীত্বা দক্ষিণেনৈব পাণিনা চ তিলোদকম্॥ সম্মার্জ্জয়িত্বা পৃথিবীং যে সমানা ইতি স্মরন্। প্রেতবিপ্রস্য হস্তে তু চতুর্ভাগং জলং ক্ষিপেৎ॥ ততঃ পিতামহাদিভ্যস্তন্মন্ত্রৈশ্চ পৃথক্ পৃথক্। যে সমানা ইতি দ্বাভ্যাং তজ্জলন্তু সমর্পয়েৎ॥ অর্ঘ্যং তেনৈব বিধিনা প্রেতপাত্রাচ্চ পূর্ব্ববৎ। তেভ্যশ্চার্ঘ্যং নিবেদ্যৈব পশ্চাচ্চ স্বয়মাচমেৎ॥ তথা। অথ তেনৈব বিধিনা দর্ভমূলেঽবনে-

মিতি। পিতামহাদিনং পার্ব্বণোদ্দেশ্যত্বেন পিতৃপদনির্দ্দেশ্যতামিত্যর্থঃ। এতচ্চ পিতৃসমানতারূপং সপিণ্ডনস্য ফলং প্রাপ্তাপ্রাপ্তপ্রেতভাবসাধা-রণং ততঃ প্রভৃতীত্যত্র প্রেতপদঞ্চ মৃতমাত্রপরং পিতৃলোকপ্রাপ্তিরূপ-ফলঞ্চ প্রাপ্তপ্রেতভাবানামেব গঙ্গাদিমৃতানামপ্রাপ্তপ্রেতভাবানাং মুক্তানাং তদসম্ভবাৎ। গৃহীত্বা দক্ষিণেনৈবেতি। তিলোদকযুক্তমেকমর্ঘ্য-পাত্রং গৃহীত্বেত্যর্থঃ। যে সমানা ইতি স্মরন্নিতি। প্রেতার্থমর্ঘ্যজলমুৎ-সৃজ্য যে সমানা ইতি মন্ত্রদ্বয়েন প্রেতার্ঘ্যজলং সুবর্ণরূপ্যদর্ভৈন চতুর্দ্ধা বিভজ্য ভাগমেকং প্রেতবিপ্রহস্তে ক্ষিপেদিত্যর্থঃ। তত ইতি। পিতামহা-দীনুদ্দিশ্য তন্মন্ত্রৈঃ পিতামহাদিভেদেন ত্রিরাবৃত্তৈর্যা দিব্যা ইতি মন্ত্রৈশ্চ-কারাদুৎসর্গবাক্যৈশ্চ যথাবহুৎসৃজেৎ তেনৈব বিধিনা যে সমানা ইতি দ্বাভ্যাং তজ্জলং প্রেতপাত্রস্থজলং ভাগত্রয়রূপং পিতামহাদ্যর্ঘ্যপাত্রেষু ত্রিষু পৃথক্ পৃথক্ সমর্পয়েৎ মিশ্রয়েদিত্যর্থঃ। ন কেবলং জলমাত্রসমর্পণং অপিতু তদর্ঘ্যসম্বন্ধিগন্ধপুষ্পাদিভাগসমর্পণমপীত্যত্র নানার্ঘ্যমিতি

জনম্। পিতুর্দ্দত্ত্বা তু পিণ্ডন্তু দদ্যাদ্ভক্ত্যা চ পূর্ব্ববৎ॥ দত্ত্বা পিণ্ডমথাষ্টাঙ্গং ধ্যাত্বা তঞ্চ সুভাস্বরম্। সুবর্ণরূপ্য-দর্ভৈস্তু তস্মিন্ পিণ্ডং ততস্ত্রিধা। কৃত্বা পিতামহাদিভ্যঃ পিতৃভ্যঃ প্রেতমর্চ্চয়েৎ॥ সংসৃজতু ত্বা পৃথিবী বায়ুরগ্নিঃ প্রজাপতিঃ॥ এতন্মন্ত্রং জপেদ্ভক্ত্যা সমানাবর্ত্তমেব চ। যে সমানা ইতি দ্বাভ্যাং পিতৃভ্যঃ প্রেতমর্চ্চয়েৎ॥ সুব-র্ণুলাংস্ততস্তাংস্ত্রীন্ পিণ্ডান্ কৃত্বা প্রপূজয়েৎ। অর্ঘ্যপু-ষ্পৈস্তথা ধূপৈর্দীপগন্ধানুলেপনৈঃ। মুখ্যন্তু পিতরং কৃত্বা পুনস্ত্বন্যান্ যথাক্রমম্॥ ১৫৮॥

---

গুপাত্তম্। তেভ্য ইতি পিতামহাদিভ্যঃ তানুদ্দিশ্য সমুৎসৃষ্টং অর্ঘ্যং নিবেদ্য তৎসম্বন্ধিব্রাহ্মণহস্তে পৃথক্ পৃথক্ প্রক্ষিপ্য পশ্চাৎ স্বয়মাচমনং কুর্য্যাদিত্যর্থঃ। এতেনাদৌ প্রেতার্ঘ্যমুৎসৃজ্য চতুর্ভাগং কৃত্বা ভাগমেকং প্রেতব্রাহ্মণহস্তে প্রক্ষিপ্যাবশিষ্টভাগত্রয়মুৎসৃষ্টপিতামহাদ্যর্ঘ্যপাত্রত্রয়েষু মিশ্রীকর্ত্তব্যমিতি সমুৎসৃষ্টেন সমুৎসৃষ্টানাং সমন্বয়ঃ প্রতিপাদিতঃ। অত-এবানুৎসৃষ্টে সমন্বয়ঃ পিতৃদয়িতোক্তো নিরস্তঃ। উক্তব্রহ্মপুরাণে প্রেত-বিপ্রহস্তে চতুর্ভাগজলক্ষেপাভিধানেনাদাবেব প্রেতার্ঘ্যস্যোৎসর্গসিদ্ধেঃ পিতামহাদ্যর্ঘ্যানামপি প্রেতার্ঘ্যমিশ্রণানন্তরং নিবেদনমাত্রাভিধানেন প্রাগুৎসর্গলাভাচ্চ। অতএব চোৎসৃষ্টপ্রেতার্ঘ্যসমর্পণানন্তরং পিতা-মহাদ্যর্ঘ্যোৎসর্গ ইতি মতমপি নিরস্তং উৎসৃষ্টস্য পুনরুৎসর্গপ্রসঙ্গাচ্চ। অতএব চ সংস্রবসমন্বয়ো মৈথিলোক্তমপি নিরস্তম্। সর্ব্বত্র ব্রহ্মপুরাণ-বিরোধাৎ। অথ তেনৈব ইতি। ব্রহ্মপুরাণ এব পূর্ব্বোক্তপার্ব্বণ-বিধিনা স্বধাকরণকুশাস্তরণক্রমেণ দর্ভমূলেঽবনেজনং দত্ত্বা পিতুঃ প্রেতস্য পিণ্ডং দত্ত্বা পূর্ব্ববৎ পিতামহাদিভ্যঃ পিণ্ডান্ ভক্ত্যা দদ্যাৎ। দত্ত্বাঽনন্তরং তস্মিন্ প্রেতপিণ্ডে পিতরং ভাস্বরং ধ্যাত্বা বচনান্তরপ্রাপ্তাভ্যাং যে সমানা ইতি মন্ত্রাভ্যাং ততস্তৎপিণ্ডং পিতামহাদিরূপপিত্রর্থং তেষাং পিণ্ডেষু মিশ্রণার্থং সংমার্জ্জয়িত্বা পৃথিবীং তেন মন্ত্রেণ গন্ধাদিনা প্রেতমর্চ্চ-

মৃতে পিতরি যস্যাথ বিদ্যতে তু পিতামহঃ। তেন দেয়াস্ত্রয়ঃ পিণ্ডাঃ প্রপিতামহপূর্ব্বকাঃ॥ তেভ্যশ্চ পৈতৃকঃ পিণ্ডো নিযোক্তব্যস্তু পূর্ব্ববৎ। মাতর্য্যথ মৃতায়ান্তু বিদ্যতে চ পিতামহী। প্রপিতামহীপূর্ব্বকন্তু কার্য্যস্তত্রাপ্যয়ং বিধিঃ॥ একং প্রেতপাত্রং বামেনানন্তরং দক্ষিণেন গৃহীত্বেতি সম্বন্ধঃ। যে সমানা ইতি মন্ত্রদ্বয়ং পঠন্ প্রেতব্রাহ্মণহস্তে প্রেতপাত্রস্থজলং চতুর্ভাগং দদ্যাৎ। তদনন্তং পিতামহাদ্যুৎসর্গবাক্যৈঃ যে সমানা ইতি দ্বাভ্যাং মন্ত্রাভ্যাং প্রেতপাত্রস্থভাগত্রয়জলং পিতামহা-

য়েৎ। ততো যে সমানা ইতি মন্ত্রাভ্যাং ততস্তু পিণ্ডং পিতামহাদিরূপং পিত্রর্থং তেষাং পিণ্ডেষু ভাগত্রয়রূপং প্রেতমর্পয়েৎ মিশ্রয়েৎ। অর্চ্চয়েদিতি পাঠেঽর্চ্চনপূর্ব্বকং নিঃক্ষিপেদিত্যর্থঃ। পুনঃ পূজামাহ সুবর্ত্তুলানানিতি। একৈকভাগেন সহ তান্ পিণ্ডান্ পৃথক্ পৃথক্‌ত্বেন নির্ম্মায় আদৌ পিতরমনন্তরমন্যান্ পিতামহাদীংশ্চ যথাক্রমং অর্ঘ্যপুষ্পাদ্যৈঃ প্রপূজয়েৎ। তেষু পিণ্ডেষু তানুদ্দিশ্য অর্ঘ্যপুষ্পাদীনি দদ্যাদিত্যর্থঃ॥ ১৫৮॥

পিতামহে জীবতি পিতুঃ সপিণ্ডনপ্রকারমাহ মৃতে পিতরীতি। পিতরি জীবতি মাতৃসপিণ্ডনপ্রকারমাহ মাতর্য্যথেতি। ব্যাচষ্টে একমিত্যাদি। পিতামহাদ্যর্ঘ্যজলেষ্বিতি। সমুৎসৃষ্টেষু তেষ্বিত্যর্থঃ। তত্রাদৌ পিতা মৃতঃ পিতামহঃ প্রপিতামহো বা পুত্রান্তররহিতঃ বা সংবৎসরাভ্যন্তরে পশ্চান্মৃতস্তত্র পিতুঃ সপিণ্ডনব্যবস্থামাহ পিতুঃ সপিণ্ডতামিতি। অসংস্কৃতাবিতি। তেন পিতামহাদেরপুত্রত্বং সিদ্ধম্। অন্যথা। পিতামহঃ পিতুঃ পশ্চাৎ প্রেতত্বং যদি গচ্ছতি। পৌত্রেণৈকাদশাহাদি কর্ত্তব্যং শ্রাদ্ধষোড়শম্। নৈতৎ পৌত্রেণ কর্ত্তব্যং পুত্রবাংশ্চেৎ পিতামহঃ॥ ইত্যনেন পুত্রসত্ত্বে পৌত্রাদেঃ পিতামহাদিসপিণ্ডনানধিকারাৎ। প্রেতীভূতয়োরপীতি। প্রেতীভূতয়োঃ পিতামহপ্রপিতামহয়োঃ

দিপাত্রেষু মিশ্রীকৃত্য পিতামহাদিভ্যস্তিলোদকং দদ্যাৎ। অর্ঘ্যমপি পুষ্পোদকং তেনৈব বিধিনৈবেতি। এতেন প্রেত-ব্রাহ্মণহস্তে উৎসজ্য দত্তস্যৈবার্ঘ্যজলস্য ভাগত্রয়ং পিতা-মহাদ্যর্ঘ্যজলেষু মিশ্রীকর্ত্তব্যমিতি প্রতীয়তে। অতএব দত্তস্যৈব প্রেতপিণ্ডস্য মিশ্রীভাবং বক্ষ্যতি। ব্যুৎক্রমপরম্। ছন্দোগপরিশিষ্টে কাত্যায়নঃ। পিতুঃ সপিণ্ডতাং কৃত্বা কুর্য্যান্মাসানুমাসিকম্। অসংস্কৃতৌ ন সংস্কার্য্যৌ পূর্ব্বৌ পৌত্রপ্রপৌত্রকৈঃ। পিতরং তত্র সংস্কুর্য্যাদিতি কাত্যা-য়নোঽব্রবীৎ। পাপিষ্ঠমপি শুদ্ধেন শুদ্ধং পাপকৃতাপি বা॥ পিতামহেন পিতরং কুর্য্যাদিতি বিনিশ্চয়ঃ। পিতুঃ সপিণ্ডতাং কৃত্বৈব প্রেতীভূতয়োরপি পিতামহ-প্রপিতামহয়োর্ম্মাসানুমাসিকং প্রতিমাসবিহিতপার্ব্বণং কর্ত্তব্যম্। ন তু তয়োঃ সপিণ্ডনপ্রতীক্ষা কার্য্যা। নন্বস-

সতোরপি তৎপূর্ব্বপুরুষদ্বয়মাদায় মাসানুমাসিকং প্রতিমাসিকং কর্ত্তব্য-মিত্যর্থঃ। কেচিৎ তু পিতুঃ সপিণ্ডতাং কৃত্বা পিতুঃ পার্ব্বণং প্রেতীভূত-পিতামহপ্রপিতামহাভ্যাং সহৈব কার্য্যমিতি গ্রন্থকৃদভিপ্রায়ং বর্ণয়ন্তি। তদসৎ। সপিণ্ডীকরণাদূর্দ্ধং প্রেতঃ পার্ব্বণভুগ্ভবেৎ। ততঃ শ্রাদ্ধং প্রব-র্ত্তেতেত্যাদিমৎস্যপুরাণহারীতাদিভিঃ প্রেতস্য পার্ব্বণনিষেধাৎ। ন চ তথাপ্যেকপুরুষিকমেব পার্ব্বণমাস্তাং কথং পূর্ব্বপুরুষদ্বয়ান্তর্ভাব ইতি বাচ্যম্। সপিণ্ডীকরণাদূর্দ্ধং যত্র যত্র প্রদীয়তে। তত্র তত্র ত্রয়ং কুর্য্যা-দ্বর্জ্জয়িত্বা মৃতাহনি॥ ইতি শঙ্খাদিভিস্ত্রৈপুরুষিকত্ববিধানাৎ। পিতা-মহজীবন্ এব একপুরুষপার্ব্বণস্য। পিতামহে তু জীবে বৈ পিতর্য্যেব সমাপয়েদিতি। হারীতাদিভিরভিহিতত্বাৎ। ন চ। ব্রাহ্মণাদিহতে তাতে পতিতে সঙ্গবর্জ্জিতে। ব্যুৎক্রমাচ্চ মৃতে দেয়ং যেভ্য এব দদাত্যসৌ॥

পিণ্ডনেনাসংস্কৃতাভ্যাং দ্বাভ্যাং সহ পিতুঃ কথং সপিণ্ড-নাখ্যঃ সংস্কারঃ। তস্মাত্তদর্থং তয়োঃ সপিণ্ডীকরণমপকর্ষ-ণীয়ং পিতুরেব বা সপিণ্ডনমুৎকর্ষ্টব্যমিত্যাত আহ অসংস্কৃতাবিতি। অসংস্কৃতৌ ন সংস্কার্য্যৌ ইতি পাঠেঽপ্যসঙ্করীকৃতাবমিশ্রীকৃতৌ অসপিণ্ডীকৃতাবিতি প্রাগুক্ত এবার্থঃ। উৎকর্ষাপকর্ষৌ ন কার্য্যাবিত্যনেন বচনেনোক্তম্। কথমসংস্কৃতেন সহ সংস্কার ইত্যত্রাহ পাপিষ্ঠমপীতি। পাপিষ্ঠমকৃতসপিণ্ডনং পিতরং শুদ্ধেন কৃত-সপিণ্ডীকরণেন পিতামহেন পাপকৃতা বাঽকৃতসপিণ্ডনে-নাপি শুদ্ধং কুর্য্যাদিতি শাস্ত্রে বিনিশ্চয়ঃ॥ ১৫৯॥

অতো বচনবলাদদোষ ইতি তাৎপর্য্যম্। সংস্কুর্য্যা-দিত্যপপাঠঃ। অন্যে তু সৎপাঠং কৃত্বার্থং বর্ণয়ন্তি।

ইতি বচনাবিষয়ত্বাৎ। কথং প্রেতমতিক্রম্য তৎপূর্ব্বয়োঃ শ্রাদ্ধমিতি বাচ্যং শ্রাদ্ধানার্হে পিতরি কথং পার্ব্বণমিত্যাকাঙ্ক্ষায়াং প্রবৃত্ততয়া তদ্বচনে পতিতাদিপদানাং শ্রাদ্ধানর্হপিতুরুপলক্ষণত্বাৎ পতিতাদিভেদেন নানাশ্রুতিকল্পনাপেক্ষয়া শ্রাদ্ধানর্হপিতরি পূর্ব্বেষাং দদ্যাদিত্যেকস্যা এব তন্মূলশ্রুতেঃ কল্পনায়া লঘুত্বাৎ। অন্যথা জীবৎপিতৃকেণ পুত্রেণ স্বপুত্রচূড়াকরণাদাবনুষ্ঠীয়মানে প্রেতস্য পার্ব্বণনিষেধাৎ প্রেতীভূতং পিতামহং বিহায় তৎপূর্ব্বেষাং বৃদ্ধিশ্রাদ্ধং ন স্যাৎ। উৎকর্ষ্টব্যমিতি। স্বকালে পিতামহাদিসপিণ্ডনে অকৃতে পরতঃ কৃষ্ণৈকাদশ্যাং পিতুঃ সপিণ্ডনোৎকর্ষঃ কর্ত্তব্যো বা ইত্যর্থঃ। অকৃতসপিণ্ডনেনাপীতি। পাপিষ্ঠমপীতি। পাপবতাম্বয়োঽন্যথা বৈয়র্থ্যাদিতি ভাবঃ। শ্রাদ্ধং কুর্য্যাদিতি। পিতরমিতি পূর্ব্বেণান্বয়ঃ॥ ১৫৯॥

অতো বচনাদিতি। প্রেতীভূতয়োরপি পিতামহপ্রপিতামহয়োঃ

শুদ্ধমপি সংস্কুর্য্যাদিতি যজ্ঞাদিনাহপ্রাপ্তপ্রেতত্বমপি সপিণ্ডয়েদিত্যর্থঃ। তথাচ বিষ্ণুধর্ম্মোত্তরপ্রথমকাণ্ডম্। যৈরিষ্টং বিবিধৈর্যজ্ঞৈঃ পূজিতো যৈশ্চ কেশবঃ। প্রেতলোকং ন তে যান্তি তথা যে সমরে হতাঃ॥ ইত্যপ্রেতীভূতস্য প্রেতত্ববিমুক্তিফলার্থং কথং সপিণ্ডনমিতি চেন্ন নিত্যত্বাদিতি ক্রমঃ। নিত্যাদপি ফলসিদ্ধিরানুষঙ্গিকী

সপিণ্ডনে পার্ব্বণবিধিকশ্রাদ্ধাদদোষ ইত্যর্থঃ। কেচিৎ তু প্রেতীভূতেন সহ সপিণ্ডনে তস্যৈকোদ্দিষ্টমেব কার্য্যং ন পার্ব্বণম্। অসপিণ্ডীকৃতং প্রেতমেকোদ্দিষ্টেন তর্পয়েদিতি। বচনস্য সঙ্কোচে হেত্বভাবাদিত্যাহুঃ। তন্ন। শ্রাদ্ধদ্বয়মুপক্রম্য কুর্ব্বীত সহ পিণ্ডতাম্। তয়োঃ পার্ব্বণবৎ পূর্ব্বমেকোদ্দিষ্টমথাপরম্॥ ইত্যাদিনানাবচনৈঃ সপিণ্ডনস্য প্রেতাংশে একোদ্দিষ্টত্বস্য ইতরাংশে পার্ব্বণত্বস্য সিদ্ধেঃ। উক্তবচনেন চ প্রেতেন সহ সপিণ্ডনে বোধিতে তদ্বিরোধাদসপিণ্ডীকৃতং প্রেতমিতি বচনস্য তদিতরপরত্বে সঙ্কোচাৎ অন্যথা বচনাৎ প্রেতীভূতপুরুষত্রয়েণ সপিণ্ডনে ক্রিয়মাণে সর্ব্বেষামেবৈকোদ্দিষ্টে সতি সপিণ্ডনস্য নিত্যেন তুল্যং শেষং স্যাদিত্যুক্তস্য পার্ব্বণতুল্যত্বস্য ব্যাঘাতশ্চ স্যাৎ। অপপাঠ ইতি। শুদ্ধপদেনৈব সংস্কারলাভে পুনঃ সংস্কারাভিধানাসঙ্গতেরিতি ভাবঃ। অপ্রাপ্তপ্রেতত্বং দর্শয়তি তথেতি। নিত্যত্বাদিতি। তথাচ পুত্রেণ স্বপ্রত্যবায়পরিহারার্থমেব সপিণ্ডনং তত্র ক্রিয়তে ন তু প্রেতত্ববিমুক্তিফলার্থমিতি ভাবঃ। নন্ন নিত্যত্বে কথং ফলশ্রুতিরিত্যত আহ নিত্যাদপীতি। পঞ্চযজ্ঞাদিবদিতি। পঞ্চযজ্ঞাদিভ্য ইব প্রত্যবায়পরীহারপাপক্ষয়াদিফলমিত্যর্থঃ। ক্ষয়ং কেচিদুপাত্তস্য ইতি নিত্যকর্ম্মণেতি শেষঃ। অনুৎপত্তিমিতি। প্রত্যবায়প্রাগভাবপালনমিত্যর্থঃ ইতি সম্প্রদায়ঃ। বস্তুতস্তু বিহিতস্যাননুষ্ঠানাদিত্যাদিবচনাৎ নিত্যকর্ম্মাকরণমেব প্রত্যবায়সাধনম্। কর্ম্মণামননুষ্ঠিতেন তদ্বিঘটনমাত্রং তেন সামগ্র্যভাবাৎ ন

পঞ্চযজ্ঞাদিবৎ প্রত্যবায়পরিহারপাপক্ষয়াদি। তথা ভবিষ্যপুরাণম্। ক্ষয়ং কেচিদুপাত্তস্য দুরিতস্য প্রচক্ষতে। অনুৎপত্তিং তথা চান্যে প্রত্যবায়স্য মন্বতে। নিত্যক্রিয়াং তথাচান্যে হ্যনুষঙ্গফলাং শ্রুতিম্॥ তচ্চিন্ত্যং প্রেতগতসংস্কারাভাবে সংস্কুর্য্যাদিত্যনন্বয়াপত্তেঃ। সপিণ্ডনস্য নিত্যত্বে প্রমাণাভাবাচ্চ। কিঞ্চ নিত্যেন কাম্যস্য প্রস-

---

প্রত্যবায়োৎপত্তিরিতি ভাবঃ। তথাচ প্রত্যবায়স্যানুৎপত্তিং প্রতি প্রত্যবায়সামগ্রীবিঘটনমিত্যর্থঃ। অন্যথা প্রাগভাবস্য চ প্রতিযোগিব্যাপ্যত্বনিয়মেন নিত্যকর্ম্মণি কৃতেহপ্যুত্তরকালং প্রত্যবায়োৎপত্ত্যাপত্তেরিতি বোদ্ধব্যম্। নিত্যক্রিয়ামিতি। নিত্যা ক্রিয়া যস্যা ইতি ব্যুৎপত্ত্যা নিত্যকর্ম্মবোধিকাং শ্রুতিং প্রাপ্যানুষঙ্গফলমানুষঙ্গিকং ফলমেব প্রয়োজনমাহুরিত্যর্থঃ। ফলান্বিতি পাঠে শ্রুতিং প্রাপ্য নিত্যক্রিমানুষঙ্গিকফলান্বিত্যর্থঃ। প্রেতগতসংস্কারাভাবে ইতি। অপ্রাপ্তপ্রেতভাবস্য প্রেতগতপ্রেতত্ববিমুক্তিরূপসংস্কারাভাবে ইত্যর্থঃ। ননু সপিণ্ডীকরণাদূর্দ্ধং প্রেতঃ পার্ব্বণভাগ্ভবেদিত্যাদ্যুক্তেঃ। পার্ব্বণার্হত্বরূপঃ সংস্কারোহস্ত্যেব তৎ কথমনন্বয় ইত্যত আহ সপিণ্ডনস্যেতি। সংস্কারফলকতয়েতি শেষঃ। নিত্যকাম্যয়োরেকবিধ্যবোধিতত্বাদিতি প্রাক্ স্বয়মভিহিতম্। তথাচ যৎ কাম্যং সংস্কারফলকং তৎ কথং নিত্যমিতি ভাবঃ। ননু মাস্তু নিত্যকাম্যয়োরেকবিধিবোধ্যত্বং তথাপি ধ্রুবাণি তু প্রকুর্ব্বীত ইত্যুক্ত্বা তন্মধ্যে সপিণ্ডনস্যাপি গণিতত্বাৎ ধ্রুবত্বেন সপিণ্ডনস্য নিত্যত্বং পৃথগ্বিধিবোধ্যমেব ভবিষ্যতীত্যত আহ কিঞ্চেতি। কাম্যস্য ফলস্য প্রসঙ্গসিদ্ধ্যভ্যুপগমে অনির্ম্মোক্ষেতি। নিত্যকর্ম্মণি মুমুক্ষোরপি অধিকারাৎ তত্রাপ্যানুষঙ্গিকফলভোগার্থং জনন আবশ্যকত্বে মোক্ষো ন স্যাদিতি ভাবঃ। নন্বানুষঙ্গিকভোগানন্তরমেব মোক্ষো ভবিষ্যতি ক্ব নির্ম্মোক্ষঃ প্রসঙ্গঃ প্রকৃতে চ ফলস্য পিতৃগতত্বেন বৈয়ধিকরণ্যাৎ ন তত্র প্রসঙ্গলেশোহপীত্যাহ

ঙ্গেহনির্ম্মোক্ষপ্রসঙ্গঃ। কিঞ্চ নিত্যে কর্ম্মণি কথং কাম্যস্য প্রসঙ্গঃ কামিনঃ কর্ত্তুরভাবেন কাম্যফলসামগ্র্যভাবাৎ ॥ ১৬০ ॥

অতএব কাম্যো নৈমিত্তিকো বার্থো নিত্যমর্থং বিকৃত্যাভিনিবিশতে ন নিত্য ইত্যুক্তং দ্বাদশাধ্যায়ে। তস্মাত্তু-বিষ্ণুপুরাণে যন্নিত্যস্যানুষঙ্গিকফলত্বমুক্তং তৎকীর্ত্ত্যাদি-দৃষ্টফলাপেক্ষয়েতি। মাতুঃ সপিণ্ডীকরণং কথং কর্ত্তব্য-মিত্যাহ বৃদ্ধশাতাতপঃ। মাতুঃ সপিণ্ডীকরণং কথং কার্য্যং সুতৈর্ভবেৎ। পিতামহ্যা সহৈবাস্যাঃ সপিণ্ডীকরণং স্মৃতম্॥ এতৎ তু ভর্ত্তৃসদ্ভাবে। তস্মিন্ সতি সুতাঃ কুর্য্যুঃ পিতামহ্যা সহৈব ত্বিতি। বক্ষ্যমাণলঘুহারীতবচনাৎ। তথাচ পঠন্তি। পিতামহ্যাদিভিঃ স্ত্রীভির্মাতরস্তু

---

কিঞ্চেতি। কামিন ইতি। নিত্যে কর্ম্মণি অকামঃ কর্ত্তাধিকারী কাম্যে তু কামনাবান্ কর্ত্তা। তথাচানুষঙ্গিকফলে কামনাবিরহাৎ কামনাবৎ কর্ত্তুর-ভাবেনানধিকারিকৃতকর্ম্মণানুষঙ্গিকফলসিদ্ধিরিত্যর্থঃ। ননু তর্হি ব্রহ্ম-বধপ্রায়শ্চিত্তেন প্রসঙ্গতঃ পাপান্তরনাশ ইতি সিদ্ধান্তঃ কথং সংগচ্ছতে তত্রাপি তৎকামনাবিরহাৎ ইতি চেদপসিদ্ধান্ত এবায়মপরিশীলিতমীমাং-সকবচনত্বাৎ এতস্য পরন্তু বধপ্রায়শ্চিত্তাদবগোরণপাপক্ষয়ঃ। অব-গোরণস্যাপি মরণানুকূলত্বেন বধরূপতয়া তৎপাপক্ষয়স্যাপি তত্র কামনা-বিষয়ত্বাৎ ইতি রহস্যম্ ॥ ১৬০ ॥

অতএবেতি। যত এব নিত্যেন প্রসঙ্গফলসিদ্ধিরতএবেত্যর্থঃ। কাম্যো নৈমিত্তিকো বার্থো নিত্যমর্থং বিকৃত্য নিত্যত্বং বিকাররূপেণ বাধিত্বাহভিনিবিশতে জায়তে সোহর্থো নৈমিত্তিকঃ কাম্যো বা ভবতি ন তু তস্য নিত্যত্বমিত্যর্থঃ। নিত্যে নিষ্কামোহধিকারী কাম্যে তু কাম-

সপিণ্ডয়েৎ। পিতরি ধ্রিয়মাণে তু তেনৈবোপরতে সতি॥ ছন্দোগপরিশিষ্টে কাত্যায়নঃ। মাতুঃ সপিণ্ডীকরণং পিতামহ্যা সহোদিতম্। যথোক্তেনৈব কল্পেন পুত্রিকায়া ন চেৎ সুতঃ॥ পিতামহ্যেতি সাবধারণোঽয়ং নির্দ্দেশঃ। যথোক্তেন কল্পেন পূর্ণে সংবৎসরে ষণ্মাসে ত্রিপক্ষে বেত্যাদিগোভিলোক্তেন। এতচ্চ পুত্রিকাপুত্র-ব্যতিরিক্তস্য পুত্রিকাপুত্রস্য বিশেষমাহ উশনাঃ। পিতুঃ পিতামহে যদ্বৎ পূর্ণে সংবৎসরে সুতৈঃ। মাতুর্ম্মাতামহে তদ্বদেষা কার্য্যা সপিণ্ডতা॥ পিতামহ ইতি পিতামহ-ত্রিকোপলক্ষণং মাতামহ ইত্যত্রাপি তথা। বৌধায়ন-যজ্ঞপার্শ্বৌ। আদিশেৎ প্রথমে পিণ্ডে মাতরং পুত্রিকা-সুতঃ। দ্বিতীয়ে পিতরং তস্যাস্তৃতীয়ে চ পিতামহম্॥ ন চ পার্ব্বণবিষয়মিদং পার্ব্বণমুখেন সপিণ্ডনস্যাপ্যনেন দর্শিতত্বাৎ অন্যথৈবংবিধপার্ব্বণানুপপত্তেঃ। মৃতে পিত-রি মাতৃসপিণ্ডনমাহ বৃহস্পতিঃ। স্বেন ভর্ত্রা সহ শ্রাদ্ধং মাতা ভুঙ্‌ক্তে স্বধাময়ম্। পিতামহী চ স্বেনৈব স্বৈনৈব

নাবান্ নৈমিত্তিকে চ নিমিত্তনিশ্চয়বানধিকারী ইত্যধিকারিভেদেন কর্ম্মণো ভেদাদিতি ভাবঃ। সাবধারণ ইতি। পিতামহ্যৈব সহেত্যর্থঃ। তেন পিতামহ্যাদিভিস্তিসৃভিঃ সপিণ্ডনেঽপি মাতুঃ পিণ্ডমিশ্রণং পিতা-মহীপিণ্ডমাত্র এবেতি প্রতিপাদিতম্। অতএব তস্যাশ্চৈব তু জীবন্ত্যাং তস্যাঃ শ্বশ্র্বেতি নিশ্চয়ঃ। ইত্যনেন শ্বশ্রূজীবন এব তস্যাঃ শ্বশ্র্বৈব যুক্তম্। এতচ্চ পরে স্থিতি কৃত্বা স্বয়মেব বক্ষ্যতি স্ফুটমিতি। তথেতি। মাতা-মহাদিত্রিকোপলক্ষণমিত্যর্থঃ। পার্ব্বণমুখেনেতি। প্রকৃতিবদ্বিকৃতি-

ঙ্গেহনির্ম্মোক্ষপ্রসঙ্গঃ। কিঞ্চ নিত্যে কর্ম্মণি কথং কাম্যস্য প্রসঙ্গঃ কামিনঃ কর্ত্তুরভাবেন কাম্যফলসামগ্র্যভাবাৎ ॥ ১৬০ ॥

অতএব কাম্যো নৈমিত্তিকো বার্থো নিত্যমর্থং বিরু-[illegible]ভিনিবিশতে ন নিত্য ইত্যুক্তং দ্বাদশাধ্যায়ে। তস্মাদ্ভ-বিষ্যপুরাণে যন্নিত্যস্যানুষঙ্গিকফলত্বমুক্তং তৎকীর্ত্ত্যাদি-

বাপ্ত্যৈব ভর্ত্রা সহৈঃ সপিণ্ডীকরণং কথং কর্ত্তব্য-তথাপি মাতৃপিতামহীপ্রপিতামহ।ন[illegible]পিণ্ডীকরণং কথং ভোক্তৃত্বস্য তৎপিণ্ডৈকত্বফলাদবগম্যতে। এতচ্চ [illegible]-পিণ্ডাংশভোক্তৃত্বস্য সপিণ্ডনফলত্বং লঘুহারীতবচনে স্ফুটী-ভবিষ্যতি। তথা ভর্ত্তৃগোত্রেণ পিণ্ডোদকদানং ভর্ত্তৃগো-ত্রভাগিত্বং ভর্ত্তৃশরীরাভেদপ্রতিপাদনঞ্চ ভর্ত্রা সহ সপি-ণ্ডনকরণতয়োপন্যস্তম্। এতচ্চ স্ফুটীকরোতি লঘুহা-রীতঃ। স্বেন ভর্ত্রা সহৈবাস্যাঃ সপিণ্ডীকরণং স্ত্রিয়াঃ। একত্বং সা গতা যস্মাচ্চরুমন্ত্রাহুতিব্রতৈঃ॥ তস্মিন্ সতি সুতাঃ কুর্য্যুঃ পিতামহ্যা সহৈব তু। তস্যাঁশ্চৈব তু জীব-

---

ন্যায়াদিতি ভাবঃ। অন্যথেতি। সপিণ্ডনৈকদেশীভূতপার্ব্বণানুষ্ঠান-স্তেরিত্যর্থঃ। পিতামহপিতৃভ্যামিতি। [পিতামহতৎপিতৃভ্যামিত্যর্থঃ। স্বেন স্বেন গোত্রেণ ইত্যর্থঃ॥ ১৬১ ॥

যদ্যপ্যত্রেতি স্বেন ভর্ত্রা সহেত্যনেন পিত্রাদিভ্যো দানে মাত্রাদী-নামংশভাগিত্বস্যৈব প্রতিপাদনাদিতি ভাবঃ। উপন্যস্তমিতি। পাণি-গ্রহণিকা মন্ত্রা ইত্যাদিনেতি শেষঃ। ব্রাহ্মণাদিবিবাহবিষয়ে গোত্রং ব্যবস্থাপ্যাসুরাদিনিন্দিতবিবাহবিষয়ে ব্যবস্থামাহ সংস্থিতায়ামিতি। ত্রিকোপলক্ষণার্থমিতি। তেন ভর্ত্রাদিপিণ্ডেষু ত্রিষ্বেব বিভজ্য মাতুঃ

সপিণ্ডয়েৎ। পিতরি ধ্রিয়মাণে তু তেনৈবোপরতে সতি॥ ছন্দোগপরিশিষ্টে কা[illegible]য়নঃ। মাতুঃ সপিণ্ডীকরণং পিতাম[illegible] থাক্তে[illegible] কল্পেন পুত্রি-কায়া ন [illegible] পিতামহ্যেতি [illegible]ণাহয়ং নির্দ্দেশঃ। যথোক্তেন কল্পেন পূর্ণে [illegible]ক-ত্রিপক্ষে বেত্যাদিগোভিলোক্তেন। নর্ব্বেধ্বংশহরা [illegible] ব্যতিরিক্তস্থ পুত্রিকাপুত্রস্থ বিগতে ভর্ত্তরি জীবতি। অত্র পিতামহে যদ্বৎ প[illegible]হীত শ্রবণং ভর্ত্রাদিত্রিকপিতামহ্যা-তদ্বত্রৈকোপলক্ষণার্থমিতি হলায়ুধকল্পতরুকারপ্রভৃতয়ঃ। অপরে তু ভর্ত্রা সহৈব পিতামহ্যা সহৈবেত্যেবকার-শ্রবণাৎ পূর্ব্বোক্তবৃদ্ধশাতাতপবচনে চৈবকারশ্রুতেঃ। পিতামহী চ স্বেনৈব স্বেনৈব প্রপিতামহীতি। বৃহস্পতি-বচনাচ্চ। ভর্তৃপিতামহ্যোরেব পিণ্ডে মাতৃপিণ্ডমিশ্রী-করণমিতি বদন্তি। শ্বশ্বাদিভিরিতি পৈঠীনসিবচনে চাদি-

পিণ্ডমিশ্রণমিত্যর্থঃ। হলায়ুধকল্পতরুকারপ্রভৃতয় ইত্যনেন স্বানভিমতত্বং সূচিতং তদ্বীজঞ্চ শ্বশুরস্যাগ্রতো যস্মাদিত্যাদিনা শ্বশুরাদিপিণ্ডে মাতুঃ পিণ্ডমিশ্রণনিষেধবিরোধঃ। স্বাভিমতং নারায়ণোপাধ্যায়মতমাহ অপরে ত্বিতি। এতন্মতমেবোপপাদয়তি শ্বশ্রাদিভিরিতি। অন্যথেতি। তস্যাং পিতামহ্যামজীবন্ত্যামপি যদি তস্যাঃ শ্বশ্বা সহ মাতুঃ সপিণ্ডনং তদা জীবন্ত্যামিতি বিশেষণমব্যাবর্ত্তকতয়া ব্যর্থং স্যাদিতি ভাবঃ। গোবিন্দানন্দাদয়স্তু ব্রহ্মপুরাণে। তেভ্যশ্চ পৈতৃকঃ পিণ্ডো নিযোক্ত-ব্যশ্চ পূর্ব্ববদিত্যনেন ত্রিভিঃ সপিণ্ডনমুক্ত্বা প্রপিতামহীপূর্ব্বস্তু জ্ঞেয়স্ত-

টীকরোতি তস্যা-
ন্যথা জীবন্ত্যামিতি
ষ্ঠন্তি। পতিনৈকেন
মৃতাপি হি নীতৈ-
ক্যং চরুমন্ত্রাহুতিব্রতৈঃ॥ মাতুঃ সপিণ্ডীকরণং পত্যা
সার্দ্ধং বিধীয়তে। তস্মাৎ পতিব্রতানান্তু সৈব সঙ্গতি-
রিষ্যতে ॥ ১৬২ ॥

নন্বেবং পিতামহপ্রপিতামহয়োস্তথা প্রপিতামহীবৃদ্ধপ্র-
পিতামহ্যোঃ সপিণ্ডনশ্রাদ্ধান্তর্ভাবঃ কুতঃ। তন্ন যথোক্তে-
নৈব কল্পেনেতি ছন্দোগপরিশিষ্টকৃতা গোভিলোক্তস্য
চত্বার্য্যুদকপাত্রাণীত্যতিদেশাৎ এতৎসপিণ্ডীকরণমেকো-
দ্দিষ্টং স্ত্রিয়া অপীতি যাজ্ঞবল্ক্যবচনে চ পূর্ব্বোক্তপাত্রচ-
তুষ্টয়যুক্তসপিণ্ডীকরণস্যৈকোদ্দিষ্টস্য একাদশাহাদিশ্রাদ্ধ-
করণস্য চাতিদেশাৎ। কিঞ্চ। মাতর্য্যথ মৃতায়ান্তু বিদ্যতে
চ পিতামহী। প্রপিতামহীপূর্ব্বন্তু জ্ঞেয়স্তত্রাপ্যয়ং বিধিঃ॥
ইতি ব্রহ্মপুরাণবচনে প্রপিতামহীপূর্ব্বপিণ্ডত্রয়দানাবগমাৎ।

---

ত্রাপ্যয়ং বিধিরিত্যতিদেশাৎ। যথা মাতৃসপিণ্ডনে প্রপিতামহ্যাদিশ্রাদ্ধ-
লাভস্তথা তাসাং পিণ্ডত্রয়েষু পিণ্ডমিশ্রণমপি লভ্যতে। অতো হলায়ুধা-
দিমতমেব সাধীয়ঃ। অতএব গ্রন্থকৃতা বদন্তীত্যনেন অপরে তু মতে-
ঽস্বরসো দর্শিত ইত্যাহুঃ॥ ১৬২॥

সপিণ্ডনান্তর্ভাবঃ কুত ইতি। মাতৃসপিণ্ডনেঽভাবঃ কুতস্তেষাং
সপিণ্ডেষু মাতৃপিণ্ডমিশ্রণাভাবাদিত্যর্থঃ। আসুরাদীতি। অতএব
শঙ্খধরবচনম্। ব্রাহ্ম্যাদিষু বিবাহেষু যা চাপি কন্যকা ভবেৎ। ভর্তৃ-
গোত্রেণ কর্ত্তব্যাস্তস্যাঃ পিণ্ডোদককৃিয়াঃ। আসুরাদিবিবাহেষু পিতৃ-

তিলোদকমিতি সমস্তৌর্দ্ধদেহিকোপলক্ষণার্থং পিতৃগোত্রভজনঞ্চাসুরাদিনিন্দিতবিবাহোঢ়াবিষয়মিতি স্মৃতিমঞ্জরীকারপ্রভৃতয়ঃ। ঊর্দ্ধন্তু পতিপৈতৃকমিত্যত্র হেতুরেকমূর্ত্তিত্বমিতি। এতেনাসুরাদিনিন্দিতবিবাহোঢ়ায়া একমূর্ত্তিত্বমেকগোত্রত্বঞ্চ ন চতুর্থী হোমাদিফলং কিন্তু সপিণ্ডনফলমিতি দর্শিতম্। সকলস্ত্রীসাধারণং সপিণ্ডনফলম্। ভর্তৃপিণ্ডাংশহরত্বমিত্যাহ সপিণ্ডীকরণাদূর্দ্ধমিতি। ধর্ম্মেষু ধর্ম্মশাস্ত্রেষু। নন্বেবং প্রথমং পিতামহ্যা সহ সপিণ্ডনে পশ্চান্মৃতে ভর্ত্তরি তেনাপি সহ সপিণ্ডনং কার্য্যম্। অন্যথা ভর্তৃপিণ্ডাংশহরত্বানুপপত্তেঃ তস্য ভর্তৃপিণ্ডমিশ্রীকরণফলত্বাৎ। ন। তস্মিন্ সতি সুতাঃ কুর্য্যুঃ পিতামহ্যা সহৈব তু। ইত্যনেন ভর্ত্রা সহ সপিণ্ডনস্য স্থলে পিতামহ্যা সহ সপিণ্ডনবিধানাৎ তৎফলপিতৃলোকপ্রাপ্তেঃ ভর্তৃপিণ্ডাংশহরত্বসাধনত্বাবগতেঃ। প্রাজাপত্যব্রতস্থানে বিহিতধেনুদানস্যৈব শরীরগতপাপক্ষয়জনকত্বমদৃষ্টফল-

---

গোত্রেণ ধর্ম্মবিৎ॥ ইতি। তস্যেতি। ভর্তৃপিণ্ডাংশহরত্বস্যেত্যর্থঃ। তৎফলেতি। তৎফলস্য ভর্ত্রা সহ সপিণ্ডনফলস্য পিতৃলোকপ্রাপ্তেঃ ভর্তৃপিণ্ডাংশহরত্বস্য চ সাধনত্বং পিতামহ্যা সহ সপিণ্ডনস্যাবগমাদিত্যর্থঃ। কথমেকেন সহ সপিণ্ডনাদন্যপিণ্ডাংশহরত্বমাত্রাদ্যদৃষ্টফলত্বেনেতি মাতুঃ পিত্রা সহ সপিণ্ডনাৎ পিতামহ্যা সহ সপিণ্ডনং কর্ম্মান্তরমিত্যভ্যুপগমেন সমাধায় কর্ম্মৈক্যেন সমাদধাতি। কিঞ্চেতি। সাধনান্তরবিধিরিতি। একস্মিন্মাতৃসপিণ্ডনে পিতামহীপিণ্ডমিশ্রণং সাধনান্তরবিধির্ন তু পিতামহ্যা সহ সপিণ্ডনাখ্যঃ কর্ম্মান্তরবিধিঃ স্বতন্ত্রবিধিকল্পনে গৌরবাৎ সপিণ্ডনঘটকতামাত্রকল্পনে লাঘবাৎ। অতঃ কর্ম্মণ ঐক্যাৎ

ত্বেন বাধকাভাবাৎ। কিঞ্চ পিতামহ্যা সহেতি লাঘবাৎ সাধনান্তরবিধিরয়ং ন কর্ম্মান্তরবিধিঃ তদা চ কথং ফলভেদঃ। অন্যথা জীবতি পিতামহে প্রপিতামহাদিনা সপিণ্ডনে কৃতে পশ্চান্মৃতে তস্মিন্ পার্ব্বণে পিতুস্তৎপিণ্ডভোক্তৃত্ব-ফলার্থং সপিণ্ডনাবৃত্তিঃ স্যাৎ পূর্ব্বসপিণ্ডনক্রিয়া বিনষ্টা। মৃতে ভর্ত্তরি কালান্তরে কথং ভর্ত্তৃপিণ্ডভোক্তৃত্বমিতি চেৎ অদৃষ্টদ্বারেতি ক্রমঃ। অতঃ কৃতে সপিণ্ডনে পশ্চাৎ মৃতে ভর্ত্তরি পুনঃ সপিণ্ডনং ন কার্য্যমিতি স্থিতম্। মৃতে ভর্ত্তরি প্রেতীভূতেঽকৃতসপিণ্ডনে সতি মাতুঃ সপিণ্ডনং প্রেতীভূতেনৈব ভর্ত্রা সহেতি। পাপিষ্ঠমপি শুদ্ধেনেত্যনেন তুল্যন্যায়সিদ্ধম্। সপিণ্ডনফলমাহ হারীতঃ। ততঃ প্রভৃতি বৈ প্রেতঃ পিতৃসামান্যমাপ্নুয়াৎ। বিন্দতে পিতৃলোকঞ্চ ততঃ শ্রাদ্ধং প্রবর্ত্ততে॥ ইতি। সামান্যং সমানতাং শ্রাদ্ধং প্রবর্ত্ততে পার্ব্বণাদিকামত্যর্থঃ॥ ১৬৩॥

---

কথমুক্তফলানুপপত্তিরিতি ভাবঃ। তস্মিন্ মৃতে ইতি। পিতামহে মৃতে তৎপিণ্ডভোক্তৃত্বফলার্থমিত্যর্থঃ। অত্র কিঞ্চিৎ শ্রাদ্ধানন্তরং জ্যেষ্ঠস্য মরণদিনানধিকারেঽবশিষ্টশ্রাদ্ধাধিকারিণা কনিষ্ঠপুত্রাদিনা সমাপনীয়ানি। ন চ ষোড়শশ্রাদ্ধানামেককর্ত্তৃকত্বনিয়মঃ অধিকারিকৃত-ষোড়শশ্রাদ্ধস্যৈব প্রেতত্ববিমুক্তিহেতুত্বাৎ। নন্বু একাধিকারিকৃতত্বেন গৌরবাৎ অধিকারশ্চ জ্যেষ্ঠাদ্যভাবে কনিষ্ঠাদেরপি। ন চ সপিণ্ডীকরণং মাসিকার্থবৎ দ্বাদশাহং কৃত্বা ত্রয়োদশেঽহ্নি কুর্য্যাদিতি বিষ্ণুবচনে ক্ত্বাশ্রুতেঃ সমানকর্ত্তৃত্বনিয়ম ইতি বাচ্যং তস্য কালাকাঙ্ক্ষায়াং প্রবৃত্ত-তয়া তৎপরত্বেন সমানকর্ত্তৃত্বে তাৎপর্য্যাভাবাৎ সমানকর্ত্তৃকত্বস্য চ পক্ষ-প্রাপ্তস্যানুবাদমাত্রমিতি মিশ্রাঃ॥ ১৬৩॥

অথ সপিণ্ডনোত্তরশ্রাদ্ধম্। শাতাতপঃ। প্রদানং যত্র যত্রৈষাং সপিণ্ডীকরণাৎ পরম্। তত্র পার্ব্বণবৎ শ্রাদ্ধং জ্ঞেয়মভ্যুদয়াদৃতে॥ অর্বাক্ সংবৎসরাদ্বৃদ্ধৌ পূর্ণে সংবৎসরেঽপি বা। যে সপিণ্ডীকৃতাঃ প্রেতা ন তেষান্তু পৃথক্ ক্রিয়া॥ ন পৃথক্ পিণ্ডদানন্তু তস্মাদূর্দ্ধং বিধীয়তে। প্রেতানামিহ সর্ব্বেষাং যে মন্ত্রৈশ্চ নিযোজিতাঃ। কৃতার্থাস্তে তু সংক্রান্তাঃ সপিণ্ডীকরণে কৃতে॥ প্রেতত্বাচ্চেহ নিস্তীর্ণাঃ প্রাপ্তাঃ পিতৃগণন্তু তে। যঃ সপিণ্ডীকৃতং প্রেতং পৃথক্ পিণ্ডে নিযোজয়েৎ। বিধিঘ্নস্তেন ভবতি পিতৃহা চোপজায়তে॥ যত্র যত্রেতি বীপ্সা। সপিণ্ডনোত্তরসকলশ্রাদ্ধব্যাপ্ত্যর্থা। পার্ব্বণবদমাবাস্যাশ্রাদ্ধবদিত্যর্থঃ। অনেন সম্পূর্ণত্রৈপুরুষিকপার্ব্বণশ্রাদ্ধবিধানমতিদিশ্যতে। তথা মৎস্যপুরাণম্। এতদগ্নিমতঃ প্রোক্ত-

অথ সপিণ্ডনোত্তরশ্রাদ্ধম্। অথ সপিণ্ডননিরূপণানন্তরং ক্রমপ্রাপ্ততয়া তদুত্তরং শ্রাদ্ধং নিরূপ্যতে ইতি শেষঃ। সকলশ্রাদ্ধব্যাপ্ত্যর্থেতি। অত্র মৃতাহেতরেতি বিশেষণীয়ং অগ্রিমগ্রন্থে তথৈবাভিধাস্যমানত্বাৎ। অনেনেতি। ত্রৈপুরুষিকপার্ব্বণশ্রাদ্ধেতিকর্ত্তব্যতাতিদিশ্যতে ইত্যর্থঃ। প্রধানস্যানতিদেশাৎ যথাশ্রুতাসঙ্গতেঃ। ততশ্চেতি। মৎস্যপুরাণবচনাৎ প্রত্যাব্দিকমপ্যগ্নিমতা ত্রৈপুরুষিকং কার্য্যমিত্যর্থঃ। নিরগ্নিনা তু প্রত্যাব্দিকমেকোদ্দিষ্টমেব কার্য্যং শাতাতপবচনস্য মৃতাহেতরপরত্বেনাগ্রে উপসংহরণীয়ত্বাৎ। অতএবেতি। সপিণ্ডনাপকর্ষে মাসিকাপকর্ষো ন কার্য্য ইতি মতং প্রাগেব সপিণ্ডনপ্রকরণে দূষিতং পুনরপি প্রসঙ্গাদ্দূষিতম্। তেন সপিণ্ডনাপকর্ষে মাসিকাপকর্ষো ধ্রুব এবেতি তাৎপর্য্যম্। পূর্ণে সংবৎসরে সপিণ্ডনে মাসিকানাং প্রাগের কৃতত্বাৎ সপিণ্ডীকরণানন্তরং

অন্নাহার্য্যঞ্চ পার্ব্বণম্। যথেন্দুসঙ্ক্ষয়ে তদ্বদন্যত্রাপি নিগদ্যতে॥ অভ্যুদয়াদৃত ইতি অভ্যুদয়ে ন সম্পূর্ণং পার্ব্বণম্ ইতিকর্ত্তব্যতাভেদাৎ। ততশ্চ প্রত্যাব্দিকশ্রাদ্ধমপি ত্রৈপুরুষিকমিতি তাৎপর্য্যম্। অপকৃষ্টসপিণ্ডনানন্তরমেকোদ্দিষ্টং ন কার্য্যমিত্যাহ অর্ব্বাক্ সংবৎসরাদ্বৃদ্ধাবিতি। অতএবাপকৃষ্য কৃতে সপিণ্ডনে মাসিকশ্রাদ্ধং ন স্বকালে কর্ত্তব্যমিত্যুক্তম্। পূর্ণে সংবৎসরে পতিতং মাসিকশ্রাদ্ধং সপিণ্ডনানন্তরং ন কার্য্যম্। তথা পূর্ব্বদিনে মধ্যাহ্নাপ্রাপ্তাবুত্তরত্র মধ্যাহ্নপ্রাপ্তাবপি সপিণ্ডনানন্তরং ন কার্য্যম্। হেতুমাহ। যস্মাৎ সপিণ্ডনেন কৃতার্থীকৃতাঃ প্রেতত্বান্নিস্তীর্ণাঃ পিতৃলোকং প্রাপ্তবন্তঃ তস্মাত্তেঽপৃথক্ কার্য্যাঃ। পৃথক্ করণে নিন্দামাহ যঃ সপিণ্ডীকৃতমিতি। লঘুহারীতঃ। সপিণ্ডীকরণে বৃত্তে পৃথক্ত্বং নোপপদ্যতে। পৃথক্ত্বে তু কৃতে পশ্চাৎ পুনঃ কার্য্যা সপিণ্ডতা॥ পুনঃ

পুনস্তেষাং প্রশক্ত্যভাবাৎ। পূর্ণে সংবৎসরেঽপি বেতি তন্নিষেধবৈয়র্থ্যমাশঙ্ক্যাহ পূর্ণ ইতি। পতিতং মাসিকশ্রাদ্ধমিতি। সপিণ্ডনানন্তরং ন কার্য্যমিত্যগ্রেণান্বয়ঃ। অনেন পূর্ণে সংবৎসরে সপিণ্ডনাৎ পরং পতিতমাসিকস্য গৌণকালকৃষ্ণৈকাদশ্যাং করণপ্রশক্তির্দ্দর্শিতা। অপতিতস্য দ্বাদশমাসিকস্য পতিতস্য পূর্ব্বমাসিকস্য চ দ্বয়োরেব পূর্ণে সংবৎসরে সপিণ্ডনানন্তরকরণপ্রশক্তিমাহ তথেতি। উত্তরত্র মধ্যাহ্নে প্রাপ্তাবপি মাসিকং ন কার্য্যমিত্যর্থঃ। অনেন চ মৃততিথেঃ পূর্ব্বদিনেঽপরাহ্ণ এব প্রাপ্তৌ পরদিনে চ মধ্যাহ্নপ্রাপ্তৌ আপরাহ্ণিকত্বেন সপিণ্ডনস্য পূর্ব্বদিনে কর্ত্তব্যতয়া পরদিনে মধ্যাহ্নানুরোধাৎ মাসিকশ্রাদ্ধকরণপ্রশক্তির্দ্দর্শিতা। তথাচৈতন্নিষেধার্থং পূর্ণে সংবৎসরেঽপি বা ইতি সার্থকমিতি ভাবঃ।

সপিণ্ডীকরণেঽনিষ্টপ্রদর্শনাদিয়মপি একোদ্দিষ্টনির্দ্দেব। জাবালঃ। পিতৃযজ্ঞন্তু নির্ব্বর্ত্য মাসিকে শ্রাদ্ধ এব চ। শ্রাদ্ধং প্রতিরুচৌ চৈব মাতাপিত্রোর্মৃতাহনি॥ অস-পিণ্ডীকৃতং প্রেতমেকোদ্দিষ্টেন তর্পয়েৎ। সপিণ্ডী-করণাদূর্দ্ধং ত্রিভিঃ সামান্যমিষ্যতে॥ ঔরসক্ষেত্রজৌ পুত্রৌ বিধিনা পার্ব্বণেন তু। প্রত্যব্দমিতরে কুর্য্যুরে-কোদ্দিষ্টং সুতা দশ॥ পিতৃযজ্ঞং তর্পণং নির্ব্বর্ত্য ক্রিয়-মাণে শ্রাদ্ধেঽহরহঃ ক্রিয়মাণ ইত্যর্থঃ॥ ১৬৪॥

তেনাম্বুঘটশ্রাদ্ধে তথা। মৃতাহনি বিহিতে মাসিকে তথা বিশিষ্টতীর্থদ্রব্যাদিপ্রাপ্তৌ প্রেতশ্রাদ্ধকরণেচ্ছায়া-মসপিণ্ডীকৃতং প্রেতমেকোদ্দিষ্টেন তর্পয়েৎ। ত্রিভিঃ সামান্যমিতি। ত্রয়াণাং পুরুষাণাং সামান্যং ত্রৈপুরুষিকমি-ত্যর্থঃ। বিশেষমাহ ঔরসক্ষেত্রজাবিতি। মৎস্যপুরাণে। ততঃ প্রভৃতি সংক্রান্তাবুপরাগাদিপর্ব্বসু। ত্রিপিণ্ডমাচরেৎ

এতেন পতিতাপতিতমাসিকমাত্রং সপিণ্ডনাৎ প্রাক্ তদ্দিননিষিদ্ধেতর-কালান্তরে তিথ্যন্তরেঽপি কার্য্যং ন তু সপিণ্ডনাৎ পরত ইতি প্রতিপাদি-তম্। যদ্যপি তদন্তন্যায়সিদ্ধমেবৈতৎ তথাপি ন্যায়মূলমেবেদং বচনমিতি ভাবঃ। ন চ তথাপি মাসিকানুরোধাৎ পরদিন এব মধ্যাহ্নে মাসিকং সপিণ্ডীকরণঞ্চ কিং ন স্যাতামিতি বাচ্যং প্রথমোপস্থিতসপিণ্ডনস্য কাল-পরিত্যাগে হেত্বভাবাৎ একোদ্দিষ্টকালবাধেন বহুদৈবতসপিণ্ডনকাল-পরিগ্রহস্যৈব ন্যায্যত্বাচ্চ॥ ১৬৪॥

তেনাম্বুঘটশ্রাদ্ধে ইতি। তেন পিতৃযজ্ঞং নির্ব্বর্ত্য ক্রিয়মাণে মাসিকে দর্শবিহিতে ইতি ব্যাখ্যায় দর্শনিমিত্তকত্বেন প্রেতমেকোদ্দিষ্টেন তর্প-য়েদিতি কর্কোপাধ্যায়মতং নিরস্তম্। প্রাপ্তশ্রাদ্ধ এব একোদ্দিষ্টবিধি-

শ্রাদ্ধমেকোদ্দিষ্টং মৃতাহনি॥ একোদ্দিষ্টং পরিত্যজ্য পার্ব্বণং যঃ সমাচরেৎ। সদৈব পিতৃহা স স্যান্মাতৃভ্রাতৃবিনাশকঃ॥ মৃতাহে পার্ব্বণং কুর্ব্বন্নধোহধো যাতি মানবঃ। সম্পূর্ণেষ্বাকুলীভাবঃ প্রেতেষু তু যতো ভবেৎ॥ তথা। যত্র যত্র প্রদাতব্যং সপিণ্ডীকরণাৎ পরম্। পার্ব্বণেন বিধানেন দেয়মগ্নিমতা সদা॥ অত্র মহার্ণবপ্রকাশকারঃ। প্রত্যব্দং মৃতাহনি পার্ব্বণৈকোদ্দিষ্টয়োস্তুল্যবদ্বিকল্পে প্রাপ্তে ব্যবস্থা। যথা ঔরসঃ ক্ষেত্রজশ্চ যঃ সাগ্নিঃ স প্রত্যব্দমেব মৃতাহে পার্ব্বণং কুর্য্যাদিতি। ঔরসক্ষেত্রজৌ পুত্রৌ বিধিনা পার্ব্বণেন তু। পার্ব্বণেন বিধানেন দেয়মগ্নিমতা সদেতি জাবালমৎস্যপুরাণবচনদর্শনাৎ। নিরগ্নিকাবৌরসক্ষেত্রজাবিতরে দশ পুত্রাঃ সাগ্নয়ো নিরগ্নয়শ্চ প্রত্যব্দং মৃতাহে একোদ্দিষ্টং কুর্য্যুরিতি। তচ্চিন্ত্যম্। ঔরসক্ষেত্রজাবিত্যসাগ্নিমদ্বচনদর্শনাৎ। বিশেষপরত্বং নির্ব্বাসনম্। সামান্যবচনস্য বিশেষবচনদর্শ-

কত্বস্য বচনার্থত্বাৎ নামাবাস্যাশ্রাদ্ধে তস্য পার্ব্বণত্বাবধারণাৎ তত্র পৃথক্ প্রেতৈকোদ্দিষ্টবিধিকল্পনে তু গৌরবাৎ বিশিষ্টতীর্থেত্যাদি ইচ্ছেদিতি হেতুমন্ত্রোপলক্ষণং সম্পূর্ণেষু মৃতাহনিমিত্তেষু প্রেতেষু মৃতেষু অত্রেতি উক্তশাতাতপাদিবচনাৎ। পরস্পরবিরোধমাশঙ্ক্য প্রকাশকারাঃ মৃতাহে একোদ্দিষ্টং কুর্য্যুরিত্যন্তমাহুরিতি শেষঃ। বিকল্পে প্রাপ্ত ইতি। শাতাতপাদিনা সাপিণ্ডনাৎ পরং মৃতাহে পার্ব্বণপ্রতিপাদনাৎ। তত্র পৃথক্প্রেতৈকোদ্দিষ্টবিধিকল্পনে তু গৌরবাৎ। বিশিষ্টতীর্থেত্যাদি হেতুমাত্রোপলক্ষণম্। সংপূর্ণেষু মৃতাহনিমিত্তেষু অত্রেতি উক্তশাতাতপবচনাৎ পরস্প[illegible]বিরোধমা[illegible]াহ প্রকাশকারঃ। মৃতাহে একোদ্দিষ্টং

মাদ্বিশেষপরত্বং ভবতীতি চেন্ন। অস্যাপি নির্যুক্তিকত্বাদ্বাক্যভেদে শ্রুতিভেদকল্পনাগৌরবং স্যাদিতি চেন্ন। বিশেষস্য সামান্যশ্রুতিমূলত্বসম্ভবে শ্রুতিভেদকল্পনানুপপত্তেঃ। শাস্ত্রং হি শাস্ত্রান্তরমুপোদ্বলয়তি স্বর্গকামশ্রুতেরিবাধ্যয়নবিধিলব্ধবিদ্যত্রৈবর্ণিকপরত্বমিতি চেন্ন। স্বর্গকামশ্রুতেস্ত্রৈবর্ণিকপরত্বে কল্পনালাঘবস্য কারণত্বাৎ। সামান্যপরত্বে শূদ্রস্য বিদ্যাপ্রযুক্তিকল্পনাগৌরবাপত্তেঃ॥ ১৬৫॥

ন চাত্র তথা বিশেষণার্থক্যপরিহারার্থং সামান্যস্য বিশেষপরত্বমিতি চেন্ন। সাগ্নিঃ সদা পার্ব্বণং কুর্য্যাৎ নিরগ্নিরিচ্ছয়া ন নিত্যমিত্যেতাবতাপি বিশেষণোপপত্তেঃ। কিঞ্চাগ্নিমতেত্যস্য ঔরসক্ষেত্রজপুত্রবিশেষকত্বে কারণা-

কুর্য্যবিত্যন্তমাহুরিতি শেষঃ। বিকল্পে প্রাপ্তে ইতি শাতাতপাদিনা সপিণ্ডনাৎ পরং মৃতাহে পার্ব্বণবিধানাৎ। অত্র মৎস্যপুরাণে চৈকোদ্দিষ্টবিধানাদ্বিকল্পে প্রাপ্তে ইত্যর্থঃ। বচনাদিতি। বচনয়োরেকবাক্যতয়া সাগ্নিকৌরসক্ষেত্রজলাভাদিতি ভাবঃ। তচ্চিন্ত্যমিতি। ব্যাখ্যানমাত্রদূষণমিদং ব্যবস্থা তত্তুল্যৈরিতি বোধ্যম্। নির্ব্বাসনং নির্যুক্তিকং বিশেষস্য সামান্যপরত্বে ন শ্রুতিভেদ ইত্যর্থঃ। উপোদ্বলয়তি বিশোধয়তি স্বর্গকামশ্রুতেরিব ইতি যজমানোঽহরহঃ স্বাধ্যায়মধীয়ীতেত্যাদ্যঙ্গবিধানশাস্ত্রং শাস্ত্রান্তরং স্বর্গকামো যজেতেতি সামান্যশাস্ত্রং ত্রৈবর্ণিকপরতয়া বিশেষয়তি যথেত্যর্থঃ॥ ১৬৫॥

ন চাত্রেতি। বিশেষস্য সামান্যপরত্বেঽপ্যত্র ন কল্পনাগৌরবমিত্যর্থঃ। বিশেষণানর্থক্যেতি। বিশেষস্য সামান্যপরত্বেঽগ্নিমদ্বিশেষণানর্থক্যাপত্তিরতঃ সামান্যস্য বিধিরিত্যর্থঃ। ন হ্যেকস্য বিধেঃ সাগ্নিবিষয়ে নিত্যবদ্বিধায়কত্বং নিরগ্নিবিষয়ে চানিত্যবদ্বিধায়কত্বং ন সম্ভবতি

ভাবাৎ দশবিধপুত্রবিশেষকত্বমেব ন কৃতঃ। কিঞ্চার্ব্বাক্ সংবৎসাদ্বৃদ্ধাবিত্যস্য শাতাতপবচনস্য যদি সাগ্নিকপরত্বং তদা পূর্ণে সংবৎসরেঽপি বেত্যসঙ্গতং স্যাৎ সাগ্নেঃ পূর্ণ-সংবৎসরে সপিণ্ডনাভাবাৎ। অথ নিরগ্নিপরত্বং তদা তস্যাপি পার্ব্বণসম্বন্ধেঽগ্নিমতেতি বিশেষণমনর্থকমেবা-পতিতম্। নিরগ্নিনা চৈকোদ্দিষ্টং কার্য্যমিত্যপ্যসম্ভবমেব ভবেৎ। ইদং পুনরুচ্যতে। মৃতাহনি তু কর্ত্তব্যং প্রতি-মাসন্তু বৎসরম্। প্রতিসংবৎসরঞ্চৈবমাদ্যমেকাদশেঽ-হনি॥ ইতি যাজ্ঞবল্ক্যবচনাৎ। একাদশে চতুর্থে চ মাসি মাসি চ বৎসরম্। প্রতিসংবৎসরঞ্চৈব একোদ্দিষ্টং

---

নি[illegible]ত্যসংবে[illegible] বাক্যভেদাপত্তিরত আহ কিঞ্চেতি। অগ্নিমতেত্যস্যেতি। তথাচাগ্নিমদ্বিশেষণং কিমৌরসক্ষেত্রজয়োঃ কিংবা দ্বাদশবিধপুত্রাণামিত্যত্র বিনিগমকাভাবাৎ দশবিধপুত্রেণ সাগ্নিকেন পার্ব্বণং কার্য্যং ঔরসক্ষেত্রজাভ্যান্তু সাগ্নিনিরগ্নিসাধারণাভ্যাং পার্ব্বণং কার্য্যং একোদ্দিষ্টং সুতা দশেতি জাবালবচনন্তু নিরগ্নিপরমেব কিং ন স্যাৎ এবমপ্যগ্নিমদ্বিশেষণনার্থক্যাদিতি ভাবঃ। নন্বৌরসক্ষেত্রজৌ পুত্রৌ বিধিনা পার্ব্বণেন তু। ইত্যনেন তয়োঃ পার্ব্বণস্য শ্রুতত্বাৎ তয়োরেব দেয়মগ্নিমতা সদেত্যনেনাগ্নিমদ্বিশেষণং ন্যায্যং তস্য দশবিধপুত্রবিষয়-কত্বে তেষামশ্রুতপার্ব্বণকল্পনে গৌরবাৎ। কিঞ্চৈবং সাগ্নয়ো দশবিধাঃ পুত্রাঃ পার্ব্বণং কুর্য্যুঃ তথৌরসক্ষেত্রজৌ পার্ব্বণং কুর্য্যাতাং তথা নিরগ্নয়ো দশবিধপুত্রা একোদ্দিষ্টং কুর্য্যুরিতি বিধিত্রয়কল্পনা স্যাৎ। মম্মতে তু সাগ্নি-কৌরসক্ষেত্রজৌ পার্ব্বণং কুর্য্যাতাং সাগ্নিকৌরসক্ষেত্রজপুত্রভিন্না একো-দ্দিষ্টং কুর্য্যুরিতি বিধিদ্বয়মেবেত্যত আহ কিঞ্চেতি অর্ব্বাগিতি। অর্ব্বাক্ সংবৎসরাদিতি শাতাতপবচনমেকোদ্দিষ্টনিষেধকং তৎ কিং সাগ্নিপরং নিরগ্নিপরং বা। আদ্যে পূর্ণে সংবৎসরেঽপি বা ইত্যসঙ্গতং সাগ্নেদর্শাৎ

মৃতাহনি॥ ইতি ব্যাঘ্রবচনাৎ। ততঃ প্রভৃতি সংক্রান্তাবুপরাগাদিপর্ব্বসু। ত্রিপিণ্ডমাচরেৎ শ্রাদ্ধমেকোদ্দিষ্টং মৃতাহনি॥ ইতি মৎস্যপুরাণবচনাচ্চ। শাতাতপলঘুহারীতজাবালবচনানাং সপিণ্ডনোত্তরকালং সর্ব্বত্র পার্ব্বণবিধায়কানাং সামান্যবিশেষন্যায়াৎ মৃতাহেতরপরত্বম্ একোদ্দিষ্টং পরিত্যজ্যেতি বিশেষনিন্দাশ্রবণাচ্চ। তদেব ব্যক্তং বক্ষ্যতি শঙ্খঃ। সপিণ্ডীকরণাদূর্দ্ধং যত্র যত্র প্রদীয়তে। তত্র তত্র ত্রয়ং কুর্য্যাদ্বর্জ্জয়িত্বা মৃতাহনি॥ মৃতাহশব্দোঽত্র নিরূপপদো মাসবিশেষাঙ্কিততিথিবিশে-

---

প্রাগেব সপিণ্ডনবিধানেন পূর্ণসংবৎসরে তদভাবাৎ। দ্বিতীয়ে একোদ্দিষ্টনিষেধাগ্নিরগ্নেরপি পার্ব্বণসম্বন্ধে সিদ্ধেঽগ্নিমদ্বিশেষণমনর্থকমব্যাবর্ত্তকত্বাদিত্যর্থঃ। নিরগ্নিনাচেতি। ইতরে দশবিধপুত্ত্রাঃ সাগ্নয়ো নিরগ্নয়শ্চৈকোদ্দিষ্টং কুর্য্যুরিত্যনেন নিরগ্নিনৈকোদ্দিষ্টং কার্য্যমিতিযৎ স্বয়মুক্তং তদপ্যসম্বন্ধং নির্ব্বিষয়মেব ভবেদিত্যর্থঃ। পরোক্তব্যাখ্যানমনং কৃত্বা স্বয়ং ব্যাচষ্টে ইদং পুনরিত্যাদি। মৃতাহনীতি। বৎসরং ব্যাপ্য প্রতিমাসমিত্যর্থঃ। যদ্যপ্যত্র ন সাক্ষাদেকোদ্দিষ্টপ্রতীতিঃ তথাপি মাসিকাদিসাহচর্য্যাত্তদবগতিরিতি ভাবঃ। শাতাতপেতি। প্রদানং যত্র যত্রৈষামিতি শাতাতপবচনম্। সপিণ্ডীকরণে বৃত্তে ইতি লঘুহারীতবচনম্। সপিণ্ডীকরণাদূর্দ্ধং ত্রিভিঃ সামান্যমিতি জাবালবচনং এষামিত্যর্থঃ। তদিতরপরত্বং মৃতাহেতরপরত্বম্। ননু বর্জ্জয়িত্বা মৃতাহনীতি অপকৃষ্টসপিণ্ডীকরণাদূর্দ্ধং প্রতিমাসি মৃতাহে একোদ্দিষ্টবিধায়কত্বিত্যত আহ মৃতাহনীতি। অত ইতি। সপিণ্ডনোত্তরপার্ব্বণবিধায়কং শাতাতপাদিবচনং সামান্যং একোদ্দিষ্টং মৃতাহনীতি বচনং বিশেষঃ। তথাচ সামান্যবিশেষয়োরতুল্যবলতয়া বিকল্পাপ্রশক্তের্মহার্ণবোক্তং তুল্যবদ্বিকল্পে প্রাপ্তে ইত্যসদিতি ভাবঃ। ননু শাতাতপীয়েন প্রদানং যত্র যত্রৈ-

ষপরঃ। উপপদাৎ তু ক্বচিত্তিথিবিশেষমাত্রপরঃ। যথা এবং মৃতাহে প্রতিমাসং কুর্য্যাদিত্যাদৌ। অতো ন সামান্যবিশেষয়োস্তুল্যবদ্বিকল্পঃ। তেন প্রত্যাব্দিকেতরপরত্বাদর্ব্বাক্সংবৎসাদ্বৃদ্ধাবিতি শাতাতপবচনং নিরগ্নের্ম্মাসিকাপকর্ষবিষয়তয়োপপন্নং পূর্ণে সংবৎসরেঽপি বেতি পতিতমাসিকনিষেধপরতয়েতি। এবং মৃতাহেতরপার্ব্বণনিয়মে কৃতে মৃতাহে সর্ব্বেষাং পুত্রাণামেকোদ্দিষ্টপ্রশক্তৌ জাবালবচনাৎ ঔরসক্ষেত্রজয়োঃ পার্ব্বণাধিকারঃ ॥ ১৬৬ ॥

তৌ চ দেয়মগ্নিমতা সদেতি বচনাৎ সাগ্নিকাবিতি বিশেষণীয়ৌ। অন্যথা বিশেষণানর্থক্যাৎ। ন চ সাগ্নিকা-

সাম্বেতি প্রথমবচনেনৈব মৃতাহেতরত্র সর্ব্বত্র পার্ব্বণপ্রাপ্তৌ তদীয়মর্দ্ধক্ সংবৎসরাদিতি দ্বিতীয়বচনং ব্যর্থমিত্যাহ তেনেতি। প্রত্যাব্দিকেতরপরত্বাদিতি। প্রথমবচনস্যেতি শেষঃ। সপিণ্ডীকরণান্তা তু জ্ঞেয়া প্রেতক্রিয়া বুধৈঃ। ইতি শাতাতপীয়বচনান্তরেণৈতদর্থসিদ্ধের্বৈয়র্থ্যতাদবস্থ্যমেবেতি বাচ্যম্। প্রেতক্রিয়ায়া এব সপিণ্ডীকরণান্তত্বস্য তদ্বচনেনোক্তত্বাদপ্রাপ্তপ্রেতভাবস্য ক্রিয়ায়াস্তদবিষয়ত্বাদত এব তদন্তত্মায়াবিষয়ত্বাচ্চ তদপকর্ষবিষয়কতয়া বচনস্যার্থবত্ত্বাৎ। নন্বেবং সপিণ্ডীকরণে একোদ্দিষ্টবিধানেন দদ্যাদিত্যাহ শৌনকঃ। ইতি বচনস্য একোদ্দিষ্টস্যোত্কৃষ্টসপিণ্ডীকরণাদূর্দ্ধং বিকল্পো দর্শিতঃ। স চাপ্রাপ্তপ্রেতভাববিষয় ইতি গ্রন্থকর্ত্তৃব্যাখ্যানবিরোধঃ তস্যাপ্রাপ্তপ্রেতভাবসাগ্নিবিষয়ত্বাৎ। অতএবাপ্রোক্তং নিরগ্নেরিতি। পতিতমাসিকেতি। তেনৈতদ্বচনং নিরগ্নিবিষয়মেবেতি ন সাগ্নিনিরগ্নিকল্পেন পূর্ব্বোক্তদোষাবকাশ ইতি ভাবঃ ॥ ১৬৬ ॥

তৌ চেতি ঔরসক্ষেত্রজৌ। সাগ্নিকাবিতি বিশেষণীয়াবিত্যর্থঃ।

ভ্যামৌরসক্ষেত্রজাভ্যাং নিত্যম্ অনগ্নিকাভ্যামিচ্ছয়া বিকল্পেনেতি বাচ্যং নিত্যানিত্যসংযোগেন বিধিবৈষম্যাৎ বাক্যভেদাপত্তেঃ। ন চ দশবিধপুত্রবিশেষকত্বমেরাস্তু ন ক্বত ইতি বাচ্যম্। তেষাং পার্ব্বণাধিকারপ্রতিপাদকবচনাভাবাৎ ঔরসক্ষেত্রজাবিতি জাবালবচনৈকবাকতয়া ঔরসক্ষেত্রজবিশেষকত্বপ্রতীতেঃ। কিঞ্চ ঔরসক্ষেত্রজয়োঃ সাগ্নিনিরগ্নিসাধারণয়োঃ পার্ব্বণাধিকারঃ দশবিধপুত্রাণাং সাগ্নিকানাং পার্ব্বণং বিধেয়ম্ অন্যেষামেকোদ্দিষ্টমিতি শ্রুতিত্রয়কল্পনাপত্তেঃ। মৎপক্ষে তু সাগ্নিকৌরসক্ষেত্রজয়োঃ পার্ব্বণমন্যেষামেকোদ্দিষ্টমিতি শ্রুতিদ্বয়ং কল্পনীয়ম্। কিঞ্চ এবমেকোদ্দিষ্টপ্রতিপাদকানাং বচ-

---

বিশেষণীয়মিতি পাঠে তৌ সাগ্নিকাবিতি জাবালবচনং বিশেষণীয়মিত্যর্থঃ। অন্যথেতি। সাগ্নিনিরগ্নিসাধারণৌরসক্ষেত্রজৌ সাগ্নিকাবিতি বিশেষণীয়ৌরসক্ষেত্রজপরত্বেঽগ্নিমদ্বিশেষণং ব্যর্থং স্যাদিত্যর্থঃ। মহার্ণবমতোক্তদোষানাশঙ্ক্য উদ্ধরতি ন চেত্যাদি। নিত্যাদি চেতি। প্রাগেব বিবৃতমেতৎ। ঔরসক্ষেত্রজৌ বিশেষয়তি। অগ্নিমদ্বচনাৎ অগ্নিমদৌরসক্ষেত্রজপ্রতীতেরিত্যর্থঃ। দ্বয়োরেব পার্ব্বণবিধায়কতয়া তুল্যবিষয়ত্বাদিতি ভাবঃ। নন্বু নিরগ্নয়ো দশবিধপুত্রা একোদ্দিষ্টং কুর্য্যুস্তদিতরে পার্ব্বণং কুর্য্যুরিতি তদিতরে পার্ব্বণং কুর্য্যুরিতি মন্মতে তু শ্রুতিদ্বয়মেবেত্যত আহ কিঞ্চৈবমিতি। মুখ্যপুত্রেতি। মুখ্যপুত্রস্যৌরসস্য ভবন্মতে মৃতাহে পার্ব্বণস্যৈব বিধানাদিতি ভাবঃ। উপলক্ষণমেতৎ অন্যানতিপ্রশক্তদশবিধপুত্রসাধারণৈকরূপাভাবাৎ। প্রত্যেকবিধিপর্য্যবসানে নিরগ্নিপদার্থস্যাভাবানুপ্রবেশেন বিধিকল্পনে চ মহাগৌরবাৎ লাঘবেন ঔরসক্ষেত্রজৌ সাগ্নিকৌ পার্ব্বণং কুর্য্যাতামিত্যভাবপ্রবেশেন বিধিকল্পনায়া এবৌচিত্যাৎ ইত্যপি বোধ্যম্। শঙ্খ ইতি। ত্রয়ং ত্রৈপু-

নানাং মুখ্যপুত্রপরত্বং ন স্যাৎ ক্ষেত্রজাদীনামমুখ্যপুত্রত্বাৎ। তথা মনুঃ। ক্ষেত্রজাদীন্ সুতানেতানেকাদশ যথোদিতান্। পুত্রপ্রতিনিধীনাহুঃ ক্রিয়ালোপান্মনীষিণঃ॥ তস্মাদৌরসক্ষেত্রজয়োঃ সাগ্ন্যোরেব মৃতাহে পার্ব্বণাধিকারঃ। নিরগ্ন্যোরেকোদ্দিষ্টাধিকারঃ। ঔরসক্ষেত্রজব্যতিরিক্তানান্তু সাগ্নিনিরগ্নিসাধারণমেকোদ্দিষ্টমিতি সিদ্ধম্। অমাবাস্যাপ্রৌষ্ঠপদ্যূর্দ্ধং কৃষ্ণপক্ষমৃতাহে নিরগ্নিনাপি পার্ব্বণবিধিনা প্রত্যাব্দিকং কার্য্যং তদিতরমৃতাহে একোদ্দিষ্টমিতি আহ শঙ্খঃ। সপিণ্ডীকরণাদূর্দ্ধং যত্র যত্র প্রদীয়তে। তত্র তত্র ত্রয়ং কুর্য্যাৎ বর্জ্জয়িত্বা মৃতাহনি॥ অমাবাস্যাং ক্ষয়ো যস্য প্রেতপক্ষেঽথবা পুনঃ। সপিণ্ডীকরণাদূর্দ্ধং তস্যোক্তঃ পার্ব্বণো বিধিঃ॥ প্রেতপক্ষোঽত্র প্রৌষ্ঠপদ্যূর্দ্ধং কৃষ্ণপক্ষঃ ন কৃষ্ণপক্ষমাত্রম্ অমাবাস্যাপদবৈয়র্থ্যাপত্তেঃ॥ ১৬৭॥

---

[প্রত্যা]ব্দিকমিত্যর্থঃ। কিন্তু মৃতাহং বর্জ্জয়িত্বা তত্রৈকোদ্দিষ্টমেবেত্যর্থঃ। মৃতাহে নিষিদ্ধস্য পার্ব্বণস্য প্রতিপ্রসবমাহ অমাবাস্যামিতি। প্রেতপক্ষঃ অশ্বযুক্কৃষ্ণপক্ষঃ। তমধিকৃত্য প্রাবৃড়্তৌ যমঃ। প্রেতান্ বিসর্জ্জয়তীতি ব্রহ্মপুরাণাৎ তস্যৈব প্রেতসম্বন্ধিত্বাৎ। এতেনামাবাস্যাব্যতিরিক্তমলমাসে ভাদ্রকৃষ্ণপক্ষমৃতস্য প্রত্যাব্দিকমেকোদ্দিষ্টবিধিনৈব কার্য্যং ন পার্ব্বণবিধিনা তস্য প্রেতপক্ষে মৃতত্বাভাবাৎ। নভো বাথ নভস্যে বা মলমাসো যদা ভবেৎ। সপ্তমঃ পিতৃপক্ষঃ স্যাদন্যত্রৈব তু পঞ্চমঃ॥ ইত্যনেন মলমাসভাদ্রকৃষ্ণপক্ষস্য প্রেতপক্ষত্বনিরাসাৎ। ন কৃষ্ণপক্ষমাত্রমিতি। প্রেতপদস্য মৃতপরতয়া তৎসম্বন্ধিকৃষ্ণপক্ষমাত্রং [নে]ত্যর্থঃ॥ ১৬৭॥

এতচ্চ প্রত্যাব্দিকং ত্রৈপুরুষিকমেব কার্য্যং ন ষাট্-পৌরুষিকম্। কর্ষূসমন্বিতং মুক্ত্বা তথাদ্যং শ্রাদ্ধষোড়শম্। প্রত্যাব্দিকঞ্চ শেষেষু পিণ্ডাঃ স্যুঃ ষডিতি স্থিতিঃ॥ ইতি ছন্দোগপরিশিষ্টবচনেন প্রত্যাব্দিকব্যতিরেকেণ ষট্‌সংখ্যানিয়মাৎ। কর্ষূসমন্বিতমন্বষ্টকাশ্রাদ্ধম্। আদ্যমেকাদ-

---

ত্রৈপুরুষিকমেব কার্য্যমিতি। অতএবাস্য কালোঽপ্যপরাহ্ণঃ পার্ব্বণত্বাৎ। অত্র প্রদীপকারপারিজাতরত্নাকরশ্রীদত্তাদয়ঃ। তস্যোক্তঃ পার্ব্বণো বিধিরিতি একবচনাদ্‌যস্য মৃতাহস্তস্যৈব পার্ব্বণধর্ম্মাতিদেশাৎ পিতামহাদিশ্রাদ্ধস্য প্রধানস্যানতিদেশাৎ। বিশ্বদেবাস্থিতি পার্ব্বণেতিকর্ত্তব্যতাযুক্তমেকোদ্দিষ্টমেব কার্য্যং ন পার্ব্বাণমিতি প্রাহুঃ। ন চাস্য মতে অমাবাস্যাং ক্ষয়ো যস্য ইত্যস্য পূর্ব্ববচনোক্তপার্ব্বণপ্রতিপ্রসবরূপতয়া অমাবাস্যাপ্রেতপক্ষেতরমৃতাহং বর্জ্জয়িত্বা সর্ব্বত্র ত্রয়ং কুর্য্যাৎ। তথা অমাবাস্যাপ্রেতপক্ষেতরমৃতাহে একোদ্দিষ্টং কুর্য্যাদিতি বিধিদ্বয়ম্। প্রদীপকারাদিমতে তু মৃতাহেতরত্র পার্ব্বণং কুর্য্যাৎ। অমাবাস্যাপ্রেতপক্ষেতরমৃতাহে একোদ্দিষ্টং কুর্য্যাৎ। অমাবাস্যাপ্রেতপক্ষমৃতাহে পার্ব্বণং কুর্য্যাৎ। অমাবাস্যাপ্রেতপক্ষমৃতাহে পার্ব্বণবিধিকৈকোদ্দিষ্টং কুর্য্যাদিতি বিধিত্রয়মতো গৌরবমিতি বাচ্যম্। নানাভেদঘটিতগুরুশরীরপার্ব্বণবিধিকৈকোদ্দিষ্টবিধ্যোঃ কল্পনাপেক্ষয়া মৃতাহে একোদ্দিষ্টং কুর্য্যাদিত্যেকেনৈব বিধিনা প্রাপ্তং অমাবাস্যাদিমৃতাহ একোদ্দিষ্টমনূদ্য অমাবাস্যাং ক্ষয়ো যস্যেত্যস্য পার্ব্বণেতিকর্ত্তব্যতারূপাঙ্গবিধেঃ কল্পনা এব লঘুত্বাৎ। অমাবাস্যাপ্রেতপক্ষভেদয়োরেকত্র নিবেশেন তদ্বিশেষণবিশেষ্যভাবে বিনিগমনাবিরহেণ বিধিত্রয়স্য ভবন্মতেঽপ্যাবশ্যকত্বাৎ। যুক্তঞ্চৈতৎ অন্যথা অমাবাস্যাদিমৃতাহে মাতৃশ্রাদ্ধং পার্ব্বণং কথং ন স্যাৎ মাতৃপার্ব্বণস্য পূর্ব্ববচনাপ্রাপ্তত্বেন প্রতিপ্রসবাস্পর্শাৎ। তদর্থঞ্চাপরপার্ব্বণবিধিকল্পনে তন্মত এব বিধিচতুষ্টয়াপত্ত্যা মহাগৌরবাৎ তাদৃশবচনাভাবেন তৎকল্পনায়াং প্রমাণাভাবাচ্চ। তস্মাৎ মৃতা-

শাহাদি শ্রাদ্ধম্ অথবাদ্যং পার্ব্বণস্থাদিভূতং ষোড়শানাং পূরণং সপিণ্ডনমিত্যর্থঃ ॥ ১৬৮ ॥

অগ্ন্যাদিনিমিত্তেন প্রত্যাব্দিকং পার্ব্বণং মাতুরপীত্যাহাপস্তম্বঃ। অপুত্রা যে মৃতাঃ কেচিৎ স্ত্রিয়ো বা পুরুষাশ্চ যে। তেষামপি চ দেয়ং স্যাদেকোদ্দিষ্টং ন পার্ব্বণম্ ॥ মিত্রবন্ধুসপিণ্ডেভ্যঃ স্ত্রীকুমারীভ্য এব চ। দদ্যাদ্বৈ মাসিকং শ্রাদ্ধং সংবৎসরমতোঽন্যথা ॥ অত্রো-

হেতরত্র পার্ব্বণং কুর্য্যাৎ। মৃতাহে একোদ্দিষ্টং কুর্য্যাদিতি স্বতন্ত্রবিধিদ্বয়ং অমাবাস্যাদিমৃতাহ একোদ্দিষ্টবিধিনা কুর্য্যাদিতি অঙ্গবিধিরিত্যেব সাধীয় ইতি সুধীভির্ব্বিভাব্যম্। অতএব বিকৃতিপার্ব্বণেন পার্ব্বণশ্রাদ্ধসিদ্ধিঃ পিতামহাদিপ্রধানশ্রাদ্ধানাং তত্রানিষ্পত্তেঃ। ষট্‌সংখ্যানিয়মাদিতি। উক্তব্যতিরিক্তপিতৃশ্রাদ্ধে মাতামহাদিশ্রাদ্ধনিয়মাদিতর্থঃ। অথৈকপুরুষিকপার্ব্বণে ষট্‌সংখ্যাভাবান্নিয়মানুপপত্তেঃ। অতএবামাবাস্যাদিমৃতাহ একোদ্দিষ্টাভ্যুপগমে তত্র মাতামহশ্রাদ্ধে তাবতাপি ষট্‌সংখ্যানিয়মবিরোধাদিত্যপি প্রত্যুক্তং উক্তবচনেনৈব মৃতাহাদ্যুক্তব্যতিরিক্ত এব মাতামহশ্রাদ্ধনিয়মনাৎ তদা তস্যৈকোদ্দিষ্টত্বব্যাঘাতাচ্চ। ন ম্বেকাদশাহাদিশ্রাদ্ধানামেকোদ্দিষ্টত্বাদেব ষট্‌পিণ্ডাপ্রাপ্তেস্তন্নিষেধো ব্যর্থ ইত্যাশঙ্ক্যাহ অথবেতি। অগ্ন্যাদীতি। আহিতাগ্নিম্ অনিমিত্তেনেত্যর্থঃ। আদিপদাদমাবাস্যাপ্রেতপক্ষয়োগ্র হণম্ ॥ ১৬৮ ॥

অপুত্রা যে ইতি। স্ত্রিয়ো বা পুরুষো বা যে জনা অপুত্রা মৃতা ইত্যর্থঃ। অন্যথা স্ত্রিয়ো যে ইত্যন্বয়ানুপপত্তেঃ। প্রমীতা যোষিতোঽপি বা ইতি দ্বিতীয়চনস্থানে পাঠো দায়ভাগসম্মতঃ। মৃতাহপ্রকরণান্মৃতাহ ইত্যভিধানাচ্চ। প্রত্যাব্দিকশ্রাদ্ধবিষয়ং বচনমিদং যেষাং মৃতাহে পার্ব্বণং বিহিতম্। তেষামেবাপুত্রাণাং পার্ব্বণং নিষিধ্যৈকোদ্দিষ্টং বিধীয়তে। অতএবোক্তং পার্ব্বণমিতি। অপুত্রা ইতি। পুত্রভিন্নাধিকারিণমুপলক্ষয়তি

পুত্রা ইতি বিশেষণোপাদানং সপুত্রাণাং পার্ব্বণাভ্যনুজ্ঞানার্থম্। একোদ্দিষ্টমভিধায় ন পার্ব্বণমিতি নিষেধানুবাদোঽত্যন্তনিন্দার্থঃ। এতচ্চ মাত্রে পিতামহ্যৈ প্রপিতামহ্যৈ চ ব্রাহ্মণান্ ভোজয়িত্বেত্যন্বষ্টকায়াং দর্শনাৎ। মাতৃত্রিতয়দৈবতং কার্য্যং পিতুরিব মাতুরমাবাস্যাদৌ পার্ব্বণং স্যাদিতি চেন্ন। ন খল্বিদং শ্রাদ্ধবিধায়কং কিন্তু বচনান্তরপ্রাপ্তং শ্রাদ্ধমনূদ্য তস্য পার্ব্বণত্বমেকোদ্দিষ্টত্বং বা বিদধাতি অন্যথা বিধিগৌরবাপত্তেঃ। ন চ মাতুঃ শ্রাদ্ধমেকাদশাহবদমাবাস্যাদৌ প্রাপ্তং যত এষামেকোদ্দিষ্টং দেয়ং দানার্হমত একোদ্দিষ্টং দদ্যাদিত্যাহ মিত্রবন্ধুসপিণ্ডেভ্য ইতি। স্ত্রী পরিণীতা পুত্রশূন্যা। কুমারী অনূঢ়া। এষাং

তেন কন্যাপৌত্রদৌহিত্রাদিভিস্তেষাং পুত্রত্বমপি একোদ্দিষ্টমেব কার্য্যং ন পার্ব্বণম্। অতএবোক্তং পিত্রোরেব হি পার্ব্বণমিতি। তথাচ পঠন্তি। অমাবাস্যাং প্রমীতস্য পৌত্রঃ সংবৎসরং প্রতি। পিতামহায় চেদ্দদ্যাদেকোদ্দিষ্টং ন পার্ব্বণম্॥ ইতি। মিত্রং মাতুলভাগিনেয়াদির্বন্ধুর্বান্ধবন্ধুর্মাতুলপুত্রাদিঃ। বিশেষোপাদানং ক্ষেত্রজাদিপরং উভয়পরত্বে বৃত্তিদ্বয়বিরোধাৎ। তেনৌরসসত্ত্ব এব পার্ব্বণং ন ক্ষেত্রজাদিসত্ত্ব ইতি কেচিৎ। তন্ন পুন্নামনরকত্রাণকর্তৃপুরুষত্বস্য উভয়সাধারণস্য লক্ষতাবচ্ছেদকত্বে বৃত্তিদ্বয়বিরোধাভাবাৎ। ভবতু বা ঔরসপুত্রপরত্বং তথাপি ক্ষেত্রজাদিষু পুত্রধর্ম্মাতিদেশেন তেষামপি পার্ব্বণাধিকারাসিদ্ধেঃ। বচনান্তরপ্রাপ্তমিতি। প্রতিসংবৎসরঞ্চৈবেত্যাদিবচনপ্রাপ্তমিত্যর্থঃ। ন চেতি। অনেন বচনমিদং মৃতাহশ্রাদ্ধবিষয়ং ইত্যুক্তম্। অত ঊর্দ্ধমিতি সংবৎসরাৎ পরং ষণ্মাসিকং তৎপ্রকারেণেত্যর্থঃ। তদেব বিবৃণোতি ন পার্ব্বণবিধিনেতি। অত্রৈকেন কেবলমপুত্রাণাং মৃতাহে পার্ব্বণং ন দেয়মপিত্বমাবাস্যাদাবপি। অমিত্রেত্যাদি এতৎ সর্ব্বমপুত্রোপলক্ষণম্।

মাসিকশ্রাদ্ধং সংবৎসরপর্য্যন্তং দেয়ম্। অত ঊর্দ্ধমন্যথা ন মাসিকপ্রকারেণ। ন পার্ব্বণবিধিনা কিন্তু সাংবৎসরিকমেকোদ্দিষ্টপ্রকারেণ। মৃতাহাজ্ঞানে কুত্র শ্রাদ্ধমিত্যাহ প্রচেতাঃ। অবিজ্ঞাতমৃতেঽমাবাস্যায়াং শ্রবণদিবসে বা। মৃতশব্দোঽত্র মৃতাহপরঃ। অনিশ্চিতমরণস্যৌর্দ্ধদেহিকাভাবাৎ। মাসবিশেষজ্ঞানে তিথিবিশেষাজ্ঞানে তন্মাসস্যামাবাস্যা বক্ষ্যমাণা বা তন্মাসকৃষ্ণৈকাদশী গ্রাহ্যা। মাসবিশেষাজ্ঞানে শ্রবণদিবস ইতি ব্যবস্থা। মাসজ্ঞানেঽপি শ্রবণদিবসবিধৌ মাসান্তরে কর্ম্মপ্রসঙ্গাৎ। তিথ্যজ্ঞানে তু তিথ্যন্তরবিধির্যুজ্যতে এব। এবঞ্চ সংবৎসরবিশেষাজ্ঞানে শ্রবণদিনাদারভ্য সংবৎসরপর্য্যন্তং যথাক্রমং প্রেতকৃত্যং সমাপ্য শ্রবণদিনে আব্দিকং প্রত্যাব্দিকঞ্চ করণীয়ম্।

এবকারো ভিন্নক্রমে এভ্যঃ সংবৎসরং ব্যাপ্য তদেব দদ্যাৎ। অতঃপরং সংবৎসরাৎ পরং মাসিকামাবাস্যাদিবিহিতং পার্ব্বণমন্যথা ন দদ্যাদিতি বচনার্থং বর্ণয়ন্তি। বক্ষ্যমাণো বেতি। শ্রাদ্ধবিঘ্নে সমুৎপন্নেঽপি বক্ষ্যমাণবচনাদিতি শেষঃ। আব্দিকং প্রত্যাব্দিকঞ্চেতি। আব্দিকং সপিণ্ডীকরণং প্রত্যাব্দিকং আগামিসাংবৎসরিকং প্রত্যাব্দিকঞ্চ কৃত্বেতি। এতেন পতিতসাংবৎসরিকং বৎসরান্তরেণ কর্ত্তব্যমিতি কস্যচিৎ ভ্রমো নিরস্তঃ। অমাবাস্যায়ামেকাদশ্যাং বেতি বর্ত্তমানাব্দিকং করণীয়মিতি পূর্ব্বেণান্বয়ঃ। শ্রুতাহাদিতি পতিতং প্রেতকৃত্যং মাসিকাদিশ্রাদ্ধং শ্রুতাহাবধিত্রিপক্ষান্ত দর্শ এব সমাপয়েৎ শেষং সাংবৎসরিকং যথাকালং বচনান্তরপ্রাপ্তশ্রবণদিনে কুর্য্যাদিত্যর্থঃ। তেন স্মোক্তস্য সংবৎসরপর্য্যন্তম্॥ যথাক্রমমিত্যনেন সংবৎসরপর্য্যন্তং প্রতিমাসশ্রবণদিবসে মাসিককরণস্য কৃষ্ণৈকাদশ্যাং পতিতমাসিককরণস্য চ বিরোধঃ।

সংবৎসরবিশেষজ্ঞানে তু শ্রবণদিনাদারভ্য যাবদশৌচং পিণ্ডং সমাপ্যাশৌচান্তে আদ্যশ্রাদ্ধং কৃত্বা কৃষ্ণৈকাদশ্যাং পতিতমাসিকাব্দিকপ্রত্যাব্দিকং কৃত্বা বর্ত্তমানমাব্দিকং শ্রবণদিনে প্রাপ্তে কর্ত্তব্যম্। মাসবিশেষজ্ঞানে তু তথৈব সর্ব্বং সমাপ্য তন্মাসস্যামাবাস্যায়ামেকাদশ্যাং বেতি শাস্ত্রার্থঃ। যৎ তু পঠন্তি। শ্রুতাহাৎ প্রেতকৃত্যন্তু আত্রিপক্ষং সমাচরেৎ। দর্শে তু পতিতং শ্রাদ্ধং যথা-কালং সমাচরেৎ॥ তদনাকরম্। শ্রবণদিনমবধারণদিনো-পলক্ষণম্। যথা পঠন্তি। গতস্য ন ভবেদ্বার্ত্তা যাবদ্দ্বাদশ-বার্ষিকী। প্রেতাবধারণং তস্য কর্ত্তব্যং সুতবান্ধবৈঃ॥ ইতি। লঘুহারীতঃ। শ্রাদ্ধবিঘ্নে সমুৎপন্নে মৃতাহে-

গতস্যেতি। দূরতিদেশগতস্যেত্যর্থঃ। তত্রাবধারণশ্রুতেঃ সর্ব্বত্রৈবাবধা-রণমেবেত্যর্থঃ। শ্রাদ্ধবিঘ্নে ইতি। অত্র বিশেষ ইতি শ্রবণাৎ শুক্লৈকাদ-শ্যামপি শ্রাদ্ধমিতি শ্রাদ্ধচিন্তামণিঃ। তন্ন একাদশীমাত্রে কুর্ব্বীত কৃষ্ণৈ-কাদশ্যাং বিশেষতঃ। কুর্বীতেতি শ্রুতিদ্বয়কল্পনাপেক্ষয়া অমাবাস্যাপেক্ষয়া বিশেষতঃ কৃষ্ণৈকাশ্যাং কুর্ব্বীতেত্যেকস্যৈব বিধেঃ কল্পয়িতুমুচিতত্বাৎ পৃথ-গমাবাস্যাবিধেশ্চ বচনান্তরসিদ্ধত্বেন ভবন্মতেঽপ্যাবশ্যকত্বাৎ। সপিণ্ড-নবিষয়শ্চেতি চকারাৎ সাংবৎসরিকবিষয়শ্চেতি। মৃতাহসন্নিধানাৎ ইতি। যস্যৈব শ্রাদ্ধস্য মৃতাহেঽবিদিতে কৃষ্ণৈকাদশ্যাং বিধিস্তস্যৈব শ্রাদ্ধবিঘ্নে তত্র বিধিরুপস্থিতত্বাৎ ন ত্বনুপস্থিতপার্ব্বণস্য ইতি ভাবঃ। অতএবেতি। মৃতাহসম্বন্ধিশ্রাদ্ধবিষয়ত্বাদেবেত্যর্থঃ। তর্হি মৃতাহেতরক্রিয়মাণানাং আদ্যষাণ্মাসিকশ্রাদ্ধানাং কথং বিঘ্নে কৃষ্ণৈকাদশ্যাং করণম্। অত্র কেচিৎ মৃতাহসম্বন্ধিত্বং মৃতাহনিরূপিতত্বং তচ্চ মৃতাহাবধিকত্বাৎ একাদ-শাহশ্রাদ্ধে ষাণ্মাসিকদ্বয়েঽপ্যস্তীতি বদন্তি। তদসৎ পর্ণনরদাহে

হবিদিতে তথা। একাদশ্যাং প্রকুর্ব্বীত কৃষ্ণপক্ষে বিশেষতঃ॥ বিঘ্নোঽত্র দ্রব্যাদ্যসম্পত্তিকৃতঃ। স চৈকোদ্দিষ্টবিষয়ঃ সপিণ্ডনবিষয়শ্চ ন পার্ব্বণবিষয়ঃ মৃতাহসন্নিধানাৎ। অতএব মৃতাহে পার্ব্বণবিধিনা ক্রিয়মাণস্যাপি শ্রাদ্ধস্য করণমেকাদশ্যামবিরুদ্ধম্॥ ১৬৯॥

অশৌচেন শ্রাদ্ধবিঘ্নেঽশৌচান্তে কর্ত্তব্যতামাহ ঋষ্যশৃঙ্গঃ। দেয়ে পিতৄণাং শ্রাদ্ধে তু অশৌচং জায়তে যদি। তদশৌচব্যতীতে বৈ তেষাং শ্রাদ্ধং বিধীয়তে॥ শুচীভূতেন দাতব্যং যা তিথিঃ প্রতিপদ্যতে। সা তিথিস্তস্য কর্ত্তব্যা ন ত্বন্যা বৈ কদাচন॥ অত্রৈকে বচনার্থং

---

সাগেশ্চ দাহাদারভ্যাশৌচবিধানাদশৌচান্তশ্রাদ্ধাসংগ্রহাৎ। অন্যে তু সাংবৎসরিকব্যতিরিক্তপার্ব্বণবিধিকশ্রাদ্ধেতরশ্রাদ্ধমাত্রেবিবক্ষিতং এতদভিপ্রায়েণৈব গ্রন্থকৃতা মৃতাহসম্বন্ধিত্বয়োপন্যস্তমিতি প্রাহুঃ॥ ১৬৯॥

অশৌচেনেতি। সামান্যবিশেষন্যায়াৎ ন তু কৃষ্ণৈকাদশীবিধিঃ প্রবর্ত্ততে ইতি ভাবঃ। অত্রাশৌচান্তদিনে যদ্যশৌচান্তরপাতস্তদা দ্বিতীয়াশৌচান্তদিনেঽপি শ্রাদ্ধং ন চ মুখ্যশ্রাদ্ধদিনেঽশৌচ এব অশৌচান্তবিধির্নাশৌচান্তরে প্রবর্ত্ততে ইতি বাচ্যং মুখ্যগৌণসাধারণশ্রাদ্ধদিন এব শৌচে তদন্তে শ্রাদ্ধস্যাভিধায়কত্বাৎ বচনস্য শ্রাদ্ধদিনে মুখ্যত্বান্তর্ভাবে গৌণত্বাৎ মানাভাবাচ্চ। অন্যথা তুল্যন্যায়েন মুখ্যদিন এব বিঘ্নে কৃষ্ণৈকাদশীবিধানাৎ কৃষ্ণৈকাদশ্যাং পুনর্বিঘ্নে কৃষ্ণৈকাদশ্যন্তরেঽপি শ্রাদ্ধং ন স্যাৎ। দেয়ে ইতি। সামান্যবিঘ্নেঽপ্যবশ্যং দেয়তয়া হারীতোক্তে ইত্যর্থো বক্ষ্যতে। শ্রাদ্ধবিঘ্নে সমুৎপন্নেঽন্তরা মৃতসূতকে। ইত্যত্র মৃতসূতকপদোপাদানাৎ তদেকবাক্যতয়াশৌচপদমত্র মৃতসূতকোভয়পরমেব অতঃ সূতান্তে স্ত্রিয়া রজোযোগান্তে চ তত্র পতিতং শ্রাদ্ধং কর্ত্তব্যমিতি

বর্ণয়ন্তি। একোদ্দিষ্টবিষয়মিদম্। অশৌচমধ্যেঽপি একোদ্দিষ্টস্য বিধিবাক্যবিহিতত্বেন দেয়ত্বাৎ একোদ্দিষ্টেতরশ্রাদ্ধানাং শঙ্খেন পর্য্যুদস্তত্বাৎ। তথা শঙ্খঃ। দানং প্রতিগ্রহো হোমঃ স্বাধ্যায়ং পিতৃকর্ম্ম চ। প্রেতপিণ্ডক্রিয়াবর্জ্জং সূতকে বিনিবর্ত্ততে॥ সর্ব্বেষামেব সামান্যশাস্ত্রপ্রাপ্তশাস্ত্রীয়নিষেধানাং পর্য্যুদাসত্বং নঞর্থবিচারে দর্শিতম্। প্রেতপিণ্ডক্রিয়া প্রেতৈকোদ্দিষ্টং তদ্ধর্ম্মগ্রাহিত্বাৎ প্রতিসাংবৎসরিকমপি। পিণ্ডদানমেব কুতো ন ভবতীতি চেন্ন তদেকোদ্দিষ্টস্যাপি পর্য্যুদস্তত্বেনাদেয়ত্বাৎ দেয়ে পিতৄণামিতি নির্ব্বিষয়ং স্যাৎ। অশৌচমধ্যে

মৈথিলমতং নিরস্তম্। তস্মাৎ ক্ষতাদিনা পতিতশ্রাদ্ধং কৃষ্ণৈকাদশ্যামমাবাস্যায়াং বা কর্ত্তব্যম্। নম্বশৌচব্যপগমে যস্যাং কস্যাঞ্চিৎ তিথৌ করণপ্রসঙ্গ ইত্যত্রাহ শুচীভূতেনেতি। দাতব্যং দানার্হং প্রশস্তমধ্যাহ্নাদিকালং প্রাপ্য প্রশস্তকালোপলক্ষিতা যা তিথিঃ প্রতিপদ্যতে সা তিথিঃ কর্ত্তব্যেত্যর্থঃ। তেনাশৌচান্তদিনে সঙ্গবাভ্যন্তরতিথৌ ন শ্রাদ্ধং কিন্তু তদুত্তরমধ্যাহ্নাদিসম্বন্ধিতিথাবেব। যদি তু দৈবাত্তত্র মধ্যাহ্নাদিপ্রশস্তকালোঽতীতস্তদাপি তৎতিথিখণ্ড এবাপ্রশস্তকালান্তরেঽপি শ্রাদ্ধং নিয়মবলাৎ। ন চ তত্তিথেঃ পরদিনেঽপি মধ্যাহ্নাদিসম্বন্ধে পরদিনেঽপি ন কথং তত্তিথিমাত্রস্যৈব নিয়মনাদিতি বাচ্যং শুচীভূতেনেত্যভিধানেন শৌচব্যবহিতদিনসম্বন্ধিতিথিখণ্ডনিয়মস্যৈবোক্তত্বাৎ। অতএব পক্ষিণ্যশৌচে রাত্রৌ শ্রাদ্ধনিষেধাৎ তত্তিথেঃ পরদিনেঽলাভেঽপি তৎপরতিথৌ শ্রাদ্ধমবিরুদ্ধং অশৌচান্ততিথের্দানার্হকালাসম্বন্ধিত্বাৎ। নম্বেবমশৌচানন্তরং মলমাসপাতে তদনন্তরং প্রতিপদি শ্রাদ্ধপ্রসঙ্গঃ। ন চেষ্টাপত্তির্মলমাসান্যাপ্তকৃষ্ণৈকাদশ্যামেব তচ্ছ্রাদ্ধস্য গ্রন্থকৃতা পূর্ব্বং ব্যবস্থাপিতত্বেন

দেয়ত্বে কুতো নানুষ্ঠানমিতি চেন্ন। তদশৌচে ব্যতীতে তু তেষাং শ্রাদ্ধং বিধীয়তে। ইতি ঋষ্যশৃঙ্গবিরোধাৎ। বিকল্পঃ কুতো ন ভবতীতি চেন্ন সামান্যবিশেষয়োরতুল্যত্বেন বিকল্পাযোগাৎ অশৌচেতরকালেঽপ্যেকোদ্দিষ্টবিধিবাক্যানাং চরিতার্থত্বাৎ। অতএব গোতমঃ। তুল্যবলবিরোধে বিকল্পঃ অশৌচে নিত্যমননুষ্ঠানাৎ। অশৌচে দেয়ত্বপ্রতিপাদকং শাস্ত্রমপ্রমাণং স্যাদিতি চেন্ন। সামান্যজ্ঞানস্যৈকদেশে সত্যত্বেঽপি প্রমাণত্বাৎ। কৃষ্ণলে নিত্যমননুষ্ঠানে হন্তের্ব্রীহিকার্য্যকরণমবহন্যাদিতি শাস্ত্রস্যেব এবং তর্হি সামান্যবিশেষন্যায়াৎ পদাহবনীয়বৎ সামান্যশাস্ত্রস্য

তদ্বিরোধাৎ অতএব ন ত্বন্যা বৈ কদাচন ইতি নিষেধাৎ। তচ্ছ্রাদ্ধস্যাসম্ভবং কালান্তরকর্ত্তব্যতয়াবশ্যকত্বেন প্রতিপ্রসবাৎ মলমাস এব তত্তিথৌ শ্রাদ্ধমিতি নারায়ণোপাধ্যায়মতমপ্যপাস্তম্। বিঘ্নান্তরপতিতশ্রাদ্ধস্য কৃষ্ণৈকাদশ্যাং বিধানাৎ তত্র কপলাধিকরণন্যায়েনাব্যবহিতকৃষ্ণৈকাদশ্যা এব প্রাপ্তত্বাৎ মলমাসেঽপি তচ্ছ্রাদ্ধপ্রসঙ্গাৎ তস্যাপ্যসম্ভবং কালান্তরকর্ত্তব্যত্বস্য তুল্যত্বাচ্চ। এবং পক্ষিণ্যশৌচে তত্তিথেঃ পরদিনাপ্রাপ্তৌ শ্রাদ্ধলোপাপত্তেশ্চ। নৈবমশৌচান্ততিথের্মুখ্যত্বমাত্রপরত্বাৎ বচনস্য ন তু নিয়মপরত্বমন্যথা তত্তিথৌ রক্তস্রাবাদিবিঘ্নান্তরপাতে শ্রাদ্ধলোপ এব স্যাৎ ততশ্চাশৌচান্তরতিথৌ ন শ্রাদ্ধস্য দেয়ত্বম্। তত্র মলমাসাদিবিঘ্নে বিঘ্নান্তরপতিতত্বাৎ কৃষ্ণৈকাদশ্যাং করণস্যৈব শাস্ত্রার্থত্বাৎ অতঃ কৃষ্ণৈকাদশ্যাং তচ্ছ্রাদ্ধকরণং সম্যগেবোক্তমিতি। অদ্য তৎতিথিপদমত্র দিনপরং তেন শুচীভূতেন সতা যদ্দিনং প্রাপ্যতে অশৌচান্তদ্বিতীয়দিনমিত্যর্থঃ। অতো ন পক্ষিণ্যশৌচে পরদিনে শ্রাদ্ধানুপপত্তিরিত্যাহুঃ। অন্যৈরেকে ইতি। অনিরুদ্ধভট্টপ্রভৃতয় ইত্যর্থঃ। বিধিবাক্যবিহিতত্বেনেতি। একোদ্দিষ্টং

তদিতরপরতৈব স্যাৎ ন পর্য্যুদস্তস্যাপর্য্যুদস্তস্য চ দ্বয়োরেব বিধ্যোস্তদিতরপরত্বে প্রেতপিণ্ডক্রিয়াবর্জ্জমিতি দেয়ে পিতৃণামিত্যনর্থকং স্যাৎ। পদাহবনীয়াদৌ তু বাধকাভাবাদ্ভবতু তদিতরপরত্বং তস্মান্নৈকোদ্দিষ্টবিধীনামশৌচেতরপরত্বং নাপ্যশৌচমধ্যেঽনুষ্ঠানং ঋষ্যশৃঙ্গবচনবিরোধাদিতি স্থিতম্। অশৌচে ব্যতীতে কস্যাং তিথৌ ক্রিয়তাং ইত্যাহ শুচীভূতেনেতি। শুচীভূতেন যা তিথিঃ প্রাপ্যতে তস্যাং কর্ত্তব্যং ন তু মুখ্যকালে পতিতত্বাৎ।

---

মৃতাহনীত্যাদিবিধিবাক্যেন সামান্যতো বিহিতত্বেনেত্যর্থঃ। নন্বশৌচপর্য্যুদাসঃ সর্ব্ববিধিষ্বনুগতঃ তৎ কথমশৌচমধ্যে তচ্ছ্রাদ্ধস্য বিধিবাক্যবিহিতত্বমত আহ একোদ্দিষ্টেতরশ্রাদ্ধানামিতি। তর্হি সাংবৎসরিকস্য কুতো দেয়ত্বমত আহ তদ্ধর্ম্মগ্রাহিত্বাদিতি। প্রেতশ্রাদ্ধস্যৈবৈকোদ্দিষ্টপদাভিধেয়ত্বস্য উক্তত্বেন সাংবৎসরিকস্যৈকোদ্দিষ্টত্বাভাবাৎ তদ্ধর্ম্মগ্রাহিত্বাদিত্যর্থঃ। তথাচ মাস্ত বচনাদ্দেয়ত্বং তস্য তথাপ্যতিদেশাদেব ভবিষ্যতীত্যর্থঃ। পিণ্ডদানমপীতি। প্রেতপিণ্ডক্রিয়াবর্জ্জমিত্যত্র প্রেতপিণ্ডপদং পূরকপিণ্ডপরমেব কুতো ন ভবতীত্যর্থঃ। তদেতি। তথা চ বচনান্যথানুপপত্ত্যা প্রেতপিণ্ডপদং প্রেতৈকোদ্দিষ্টপরমিতি ভাবঃ কুতো নানুষ্ঠানমিতি পর্য্যুদাসাভাবাদিতি ভাবঃ। সামান্যবিশেষয়োরিতি। একোদ্দিষ্টং মৃতাহনীতি সামান্যবিধিঃ তদশৌচব্যতীত ইতি বিশেষবিধিঃ তয়োরিত্যর্থঃ। অতুল্যবলত্বে হেতুমাহ অশৌচেতরকাল ইতি। অতএবেতি। তুল্যবলত্বমন্যূনানতিরিক্তবিষয়কত্বেন অশৌচদেয়ত্বপ্রতিপাদকমিতি একোদ্দিষ্টং মৃতাহনীত্যাদি সামান্যশাস্ত্রমশৌচেঽপি দেয়ত্বপ্রতিপাদকমপ্রমাণং স্যাদিত্যর্থঃ। সামান্যজ্ঞানস্যেতি। মৃতাহমাত্রং সামান্যং তজ্জ্ঞানস্যাশৌচেতরমৃতাহে একদেশে প্রামাণ্যেঽপি প্রামাণ্যাদিত্যর্থঃ। কৃষ্ণল ইতি। কৃষ্ণলঃ সুবর্ণমাষঃ হস্তেরব-

কৃষ্ণৈকাদশ্যাদিবচনাবকাশ ইত্যাহ ন ত্বন্যা বৈ কদাচনেতি। তদেতচ্চিন্ত্যম্। অমাবাস্যাদিমৃতাহকর্ত্তব্যস্য সাগ্নিকর্ত্তব্যস্য চ প্রত্যাব্দিকশ্রাদ্ধস্য পার্ব্বণবিধিনা ক্রিয়মাণস্যাপ্যশৌচপতিতস্য একোদ্দিষ্টধর্ম্মানতিদেশাৎ। অশৌচাপগমে নানুষ্ঠানং স্যাৎ কিন্তু অমাবাস্যাশ্রাদ্ধধর্ম্মগ্রাহিত্বাৎ নিত্যশ্রাদ্ধবল্লোপ এব স্যাৎ। তদা চ সকলশিষ্টাচারবিরোধঃ স্যাৎ। কিঞ্চ প্রেতশ্রাদ্ধেতরসকলশ্রাদ্ধানাং সূতকে পর্য্যুদস্তত্বাৎ সাংবৎসরিকস্যাপ্যুপদেশাৎ এব সূতকপর্য্যুদাসে জ্ঞাতে তদ্বিরোধাৎ কথমতিদেশাৎ সূতকে

ঘাতস্য কৃষ্ণলে বৈতুষ্যরূপদ্বারবাধেন নিত্যমনুষ্ঠানে ইত্যর্থঃ। ব্রীহিকার্য্যেতি। অয়মর্থঃ। ব্রীহীন্ বহন্তীতি শ্রুতৌ ব্রীহিপদে যবাদিসাধারণার্থং নিয়োগসাধনদ্রব্যত্বেন লক্ষণা নিয়োগসাধনস্তু কৃষ্ণলং শ্রপয়েদিতি বিধিনা কৃষ্ণলমপি তত্র চ দ্বারবাধান্নিত্যমবঘাতবাধেঽপি ব্রীহীন্ বহন্তীতি সামান্যশাস্ত্রস্য ব্রীহিযবাদাবেকদেশে প্রামাণ্যাৎ প্রামাণ্যম্। যথেতি পদাবহনীয়েতি যবাদিতি পদে জুহোতীতি বিশেষবিধিনা যজ্জুহোতি তদাবহনীয়ে ইতি সামান্যশাস্ত্রস্যাগ্নৌ হবনসামান্যবোধকস্য সামান্যবিশেষন্যায়াৎ পদদহনেতরহবনবিষয়কত্বং যথা তথাত্রাপি দেয়ে পিতৄণাং শ্রাদ্ধে স্থিতি বিশেষবিধেমৃ তাহে একোদ্দিষ্টবিধায়কস্য সামান্যশাস্ত্রস্য শৌচেতরপরমস্তু তৎ কৃতস্তস্যাশৌচে দেয়ত্বমিত্যর্থঃ। পর্য্যুদস্তস্যেতি। অমাবাস্যাদিপার্ব্বণবিধিঃ পর্য্যুদস্তবিধিঃ প্রেতপিণ্ডক্রিয়াবর্জ্জমিত্যনেন একোদ্দিষ্টং মৃতাহনীতি অপর্য্যুদস্তবিধিঃ। তথা দ্বয়োরেবাশৌচেতরপরত্বে প্রেতপিণ্ডক্রিয়াবর্জ্জমিত্যনর্থকং স্যাৎ মৃতাহৈকোদ্দিষ্টবিধেরশৌচেতরপরত্বেন সর্ব্বদৈবাপ্রাপ্তেঃ। তবন্মতে প্রতিপ্রসবদৈফল্যাৎ এবং তন্মূলকং দেয় ইতি বিশেষণমপ্যনর্থকং স্যাদিত্যর্থঃ।

সাংবৎসরিকস্য দেয়তা। কিঞ্চ প্রেতপিণ্ডক্রিয়াপদং প্রেতপিণ্ডদান এব মুখ্যং শ্রাদ্ধপরত্বে লক্ষণাপ্রসঙ্গাৎ। দেয়ে পিতৃণামিত্যন্যথা ব্যাখ্যস্যামঃ। সূতকমধ্যে দেয়-মপ্যদেয়মিতি ন নির্ব্বন্ধসহম্। ইদং পুনরুচ্যতে। দেয় ইতি বিশেষণবলাৎ বিঘ্নে চাবিঘ্নেঽপ্যবশ্যদেয়শ্রাদ্ধে যদাশৌচাখ্যো বিঘ্ন উৎপন্নস্তদা তদশৌচান্তে তিথৌ দেয়ং ন কৃষ্ণৈকাদশী প্রতীক্ষণীয়া। অতএব ন ত্বন্যা বৈ কদাচনেতি প্রতিষেধঃ। অন্যথাঽপ্রাপ্তত্বেন নিষেধানু-পপত্তেঃ। বিঘ্নে চ মৃতাহসম্বন্ধিশ্রাদ্ধস্য দেয়তা লঘুহারী-তেনোক্তা নামাবাস্যাদিশ্রাদ্ধস্যেতি সর্ব্বমনবদ্যম্ ॥১৭০॥

অথ শ্রাদ্ধাধিকারিণঃ। মরীচিঃ। মৃতে পিতরি

---

ঋষ্যশৃঙ্গবচনবিরোধাদিতি। তদশৌচে ব্যতীতে স্থিত্যনেন বিরোধাদি-ত্যর্থঃ। ন ত্বন্যা বৈ কদাচনেতীতি বর্ণয়ন্তীতি পূর্ব্বোক্তেনান্বয়ঃ। নিত্যশ্রাদ্ধবদিতি। অহরহঃক্রিয়মাণশ্রাদ্ধবদিত্যর্থঃ। ননু দেয়বচনান্যথা-নুপপত্ত্যা লক্ষণাঽবশ্যং বাচ্যেত্যত আহ দেয়ে পিতৃণামিতি। ন নির্ব্বন্ধ-সহমিতি। ন বিচারসহমিত্যর্থঃ। তথাহি ভবন্মতে সামান্যশাস্ত্রেণা-শৌচমধ্যেঽপি দেয়ত্বে বোধিতে তদশৌচে ব্যতীতে স্থিত্যনেন দেয়ত্ব-প্রতিপাদনং ন সম্ভবতি বিরোধাৎ। অশৌচমধ্যে চ নিত্যমননুষ্ঠানে সামান্যশাস্ত্রাণাং তদংশে সামান্যশব্দস্য বজ্রলেপত্বাচ্চেতি। কেচিৎ তু দেয়ে পিতৃণামিতি বচনে দেয়ত্বান্যথানুপপত্তিরেব প্রাগুক্তব্যাখ্যান-বীজমুক্তং তন্ন বক্ষ্যমাণরীত্যান্যথানুপপন্নে তদা সর্ব্বমেব পূর্ব্বোক্ত-ব্যাখ্যানমপাস্তমিতি ব্যাচখ্যুঃ। অবশ্যং দেয় ইতি আবশ্যকার্থে প্রকৃতিপ্রত্যয়বিধানাদিতি ভাবঃ। লঘুহারীতেনোক্তেতি। শ্রাদ্ধবিঘ্নে সমুৎপন্নে ইতি লঘুহারীতেনোক্তেত্যর্থঃ ॥ ১৭০ ॥

প্রেতশ্রাদ্ধপ্রসঙ্গাৎ তদধিকারিণো নিরূপয়তি অথেতি। প্রমীতস্যেতি।

পুত্রেণ ক্রিয়া কার্য্যা বিধানতঃ। বহবঃ স্যুর্যদা পুত্রাঃ পিতুরেকত্র বাসিনঃ॥ সর্ব্বেষান্তু মতং কৃত্বা জ্যেষ্ঠেনৈব তু যৎ কৃতম্। দ্রব্যেণ চাবিভক্তেন সর্ব্বৈরেব কৃতং ভবেৎ॥ পুত্রেণেত্যবিশেষাৎ সর্ব্বেষামধিকারঃ। পুত্রেণেত্যেকবচনমবিবক্ষিতম্। প্রমীতস্য পিতুঃ পুত্রৈঃ শ্রাদ্ধং দেয়ং প্রযত্নত ইতি। বক্ষ্যমাণবৃহস্পতিবচনাৎ। সর্ব্বেষাং পৃথগনুষ্ঠানপ্রাপ্তাবাহ বহবঃ স্যুরিতি। একত্র বাসিনো-

অত্র প্রযত্নত ইত্যভিধানাৎ প্রেতকৃত্যেষু সপিণ্ডীকরণান্তেষু পুত্রস্য নিত্যাধিকার ইত্যুক্তমিতি সংপ্রদায়ঃ। তদসৎ সপিণ্ডনোত্তরপার্ব্বণাদাবপি পুত্রস্য নিত্যাধিকারাৎ বিশেষাভিধানবৈকল্যাৎ কিন্তু প্রযত্নতঃ প্রকর্ষেণেত্যর্থঃ। এবঞ্চ যত্নেতি এতেন জ্যেষ্ঠেন সপিণ্ডনান্তকৃত্যেষু বিদেশস্থকনিষ্ঠেন কৃতদ্রব্যার্পণানুমতিনা পুনঃ পিণ্ডদানমারভ্য সর্ব্বং কর্ম্ম কার্য্যমিত্যুক্তম্। ন চ প্রেতত্বাভাবাৎ কথং প্রেতকর্ম্মেতি বাচ্যং পুত্রস্য নিত্যাধিকারাৎ। অকরণে প্রত্যবায়াৎ অপ্রাপ্তপ্রেতভাবানামিবাবশ্যানুষ্ঠেয়ত্বাৎ। যৎ তু। প্রথমেঽহনি যো দদ্যাৎ প্রেতায়ান্নোদকে দ্বিজঃ। যস্মান্নবসু চান্যেষু স এব প্রদদাত্যপি॥ ইতি বচনম্। তত্রৈবকারোঽপিকারশ্চাভিন্নক্রমে সোঽপি দদ্যাদেবেত্যর্থঃ। অন্যথাপিশব্দবৈয়র্থ্যাৎ। অতএব বশিষ্ঠমহর্ষিণাধিষ্ঠিতেন ভরতেন দত্তেঽপি পূরকপিণ্ডে শ্রীরামেণ পুনঃ পিণ্ডো দত্ত ইতি রামায়ণে বাল্মীকিমহর্ষিবচনং সঙ্গচ্ছতে যথা। ঐঙ্গুদং বদরোন্মিশ্রং পিণ্যাকং দর্ভসস্তরে। ন্যুপ্য পিণ্ডাংস্ততো রাম ইদং বচনমব্রবীৎ॥ ইদং ভুংক্ষ্ব মহারাজ প্রীতো যদশনা বয়ম্। যদন্নঃ পুরুষো রাজংস্তদন্নাঃ পিতৃদেবতাঃ॥ ইতি। এবঞ্চ জ্যেষ্ঠস্যাপাটবাদিনাঽশক্তৌ তদানীমধিকারিণা কনিষ্ঠেন সপিণ্ডনান্তকৃত্যেষু অনুমতিদ্রব্যার্পণবিধানাভাবাৎ প্রত্যবায়পরীহারার্থং জ্যেষ্ঠেনাপি ন পুনঃ সর্ব্বং কর্ম্ম কর্ত্তব্যমেবেতি সম্প্রদায়ঃ। স্মার্ত্তাস্তু। দেশান্তরাদাবন্নমিতি দ্রব্যার্পণয়োরভাবেঽপি ন পৃথক্ শ্রাদ্ধম্। পৃথক্‌চৈব

হবিভক্তধনাঃ। একত্র বাসিন ইত্যনেন প্রাপ্তে দ্রব্যেণ চাবিভক্তেনেতি গ্রহণং বিভক্তধনানামপি শ্রাদ্ধীয়দ্রব্যেণাবিভক্তেন পুনঃ কৃতসংশ্লেষেণাপৃথগেব শ্রাদ্ধং দর্শিতম্। অতএব শঙ্খঃ। যদ্যেকজাতা বহবঃ পৃথক্ ক্ষেত্রাঃ পৃথক্ ধনাঃ। একপিণ্ডাঃ পৃথক্ শৌচাঃ পিণ্ডস্ত্বাবর্ত্ততে ত্রিষু॥ পৃথক্ক্ষেত্রা বিজাতীয়মাতৃজাতাঃ। একপিণ্ডা একমেব পিণ্ডং দদ্যুরিত্যর্থঃ। পৃথক্শৌচা বিজাতীয়মাতৃসম্বন্ধেন পৃথক্শৌচভাগিনঃ। পিণ্ডস্ত্বাবর্ত্ততে ত্রিম্বিতি সপিণ্ডতা ত্রিষু পুরুষেষ্বেব ভবতীত্যর্থঃ। ততশ্চাবিভক্তধনানাং পুত্রাণাং সর্ব্বানুমত্যা বিভক্তধনানামপি শ্রাদ্ধীয়দ্রব্যসংশ্লেষেণ জ্যেষ্ঠ এব শ্রাদ্ধং কুর্য্যাৎ। নন্বেবং কনীয়সামপ্যধিকারাদকরণে প্রত্যবায়ঃ স্যাদিত্যত্রাহ। সর্ব্বৈরেব কৃতং ভবেদিতি সর্ব্বেষামেবানুমতিদ্রব্যার্পণদ্বারা

সুতাঃ কুর্য্যুঃ পৃথগ্দ্রব্যা অপি ক্বচিৎ॥ তথা। প্রবর্ত্তয়তি যো মোহাৎ ক্রিয়ামনাপ্রবর্ত্তিতাম্। বিধিঘ্নস্তেন ভবতি পিতৃহা চোপজায়তে॥ তস্মাৎ প্রেতক্রিয়া যেন কেনাপি চ কৃতো যদি। ন তাং প্রবর্ত্তয়েৎ প্রাজ্ঞঃ সতাং ধর্ম্মমনুস্মরন্॥ ইত্যাদিনা পৃথক্ করণনিষেধাৎ। সর্ব্বেষাম্ভ মতং কৃত্বেতি দ্রব্যেণ চাবিভক্তেন চ তেষামেতদেব কর্ত্তব্যমিতি প্রতিপাদিতং ন তত্তদভাবে পৃথক্শ্রাদ্ধং বিধান্তরকল্পনাপত্তেঃ। অতএব সংবৎসরপ্রদীপে হলায়ুধেনোক্তং যদি বৈমাত্রেয়ঃ কনিষ্ঠোঽগ্নিমান্ জ্যেষ্ঠশ্চ নিরগ্নিস্তদা দর্শাদর্বাক্ কনিষ্ঠেন সপিণ্ডনে কৃতে সপিণ্ডনং জ্যেষ্ঠেন পুনর্নাবর্ত্তনীয়ং পৃথক্করণনিষেধাৎ। এবং কনিষ্ঠস্য বৃদ্ধ্যুপনিপাতেঽপি বোদ্ধব্যম্। এতচ্চ জ্যেষ্ঠস্য বিদেশস্থত্বে কনিষ্ঠে স্বদেশস্থিতে তদ্দ্বারৈব সপিণ্ডনং কারয়িতব্যমিতি। শ্রাদ্ধচিন্তামণাবপি যদ্যপি। অকৃত্বা প্রেতকার্য্যাণি

শ্রাদ্ধনিষ্পাদনেন প্রত্যবায়পরিহারাদিফলসিদ্ধিঃ। সত্যপ্যধিকারে ন পৃথগনুষ্ঠানং বচনাদিত্যর্থঃ। এবঞ্চ যত্র দেশান্তরাদাবনুমতিদ্রব্যসংশ্লেষয়োরভাবস্তত্র পৃথগেব শ্রাদ্ধং অন্যথা প্রত্যবায়পরিহারো ন স্যাৎ। এতচ্চাপৃথগনুষ্ঠানং সপিণ্ডীকরণপর্য্যন্তং তদূর্দ্ধং অবিভক্তানামনিয়মো বিভক্তানাং পৃথগেব। যথা লঘুহারীতঃ। সপিণ্ডীকরণান্তানি যানি শ্রাদ্ধানি ষোড়শ। পৃথঙ্‌নৈব সুতাঃ কুর্য্যুঃ পৃথগ্‌দ্রব্যা অপি ক্বচিৎ॥ সপিণ্ডীকরণান্তানীতি বিশেষণাৎ সপিণ্ডীকরণাদূর্দ্ধং পৃথক্‌ শ্রাদ্ধং বিভক্তানামবিভক্তানাঞ্চ দর্শয়তি। অতএব ব্যাসনাম্না বচনং পঠ্যতে। অর্ব্বাক্‌ সংবৎসরাজ্জ্যেষ্ঠঃ শ্রাদ্ধং কুর্য্যাৎ সমেত্য চ। ঊর্দ্ধং সপিণ্ডীকরণাৎ সর্ব্বে কুর্য্যুঃ পৃথক্‌ পৃথক্‌॥ ১৭১॥

প্রেতস্য ধনহারকঃ। বর্ণানাং যদ্বধে প্রোক্তং তদ্ব্রতং নিয়তশ্চরেৎ॥ ইতি শঙ্খবচনেন সর্ব্বেষামেব পুত্রাণাং প্রেতশ্রাদ্ধকরণমায়াতি তথাপি স্বীয়স্বীয়ধনদ্বারা তৎকারয়িতব্যম্‌। সর্ব্বেষাস্তু মতং কৃত্বেতি লঘুহারীতবচনাদিত্যুক্তমিতিপ্রাহুঃ। এবঞ্চৈতন্মতে বালকভ্রাতুরিব বিদেশস্থভ্রাত্রাদীনাং প্রত্যবায়পরীহারং স্বয়মনুধ্যায় সপিণ্ডনং কর্ত্তব্যমিতি। প্রাঞ্চস্তু চিরকালীনাপাটবসম্ভাবনায়াং দ্রব্যার্পণানুমতী বিধায় কালদ্বারা জ্যেষ্ঠেনাপি সপিণ্ডনং কারয়িতব্যম্‌। ততঃ পশ্চাৎ পাটবে সতি পুনর্নাবর্ত্তনীয়মিতি প্রাহুঃ। নন্বু মরীচিবচনে সামান্যতোঽভিধানাৎ প্রেতক্রিয়াবৎ সপিণ্ডনোর্দ্ধক্রিয়াণামেবাপৃথক্‌কর্ত্তব্যত্বমস্ত্বিত্যাশঙ্ক্যাহ এতচ্চেতি। সপিণ্ডনোর্দ্ধং পৃথগনুষ্ঠানে প্রমাণমাহ যথেতি। সপিণ্ডীকরণান্তানীতি অন্যথা সপিণ্ডনোর্দ্ধশ্রাদ্ধানামপ্যপৃথগনুষ্ঠানে তদ্বিশেষণোপাদানমব্যাব-

নন্ববিভক্তানামপৃথগেব দৈবপিত্র্যকৃত্যমাহ বৃহস্পতিঃ। একপাকেন বসতাং পিতৃদেব দ্বিজার্চ্চনম্। একং ভবেদ্বিভক্তানাং তদেব স্যাৎ গৃহে গৃহে॥ তথাচ মনুঃ। এবং সহ বসেয়ুর্ব্বা পৃথগ্বা ধর্ম্মকাম্যয়া। পৃথগ্বিবর্দ্ধতে ধর্ম্মস্তস্মাদ্ধর্ম্ম্যা পৃথক্ ক্রিয়া॥ অত্র বিভাগস্য পৃথগ্ধর্ম্মনিমিত্ততাপ্রতীতেরবিভাগে পৃথক্‌ত্বং নাস্তীত্যবগম্যতে। সত্যং বিভাগে পৃথগনুষ্ঠানং নিয়তং অবিভাগে চানিয়তমিত্যেবংপরমিদং বচনদ্বয়ম্। ততশ্চাবিভক্তানাং সপিণ্ডনা-

র্ত্তকতয়া ব্যর্থং স্যাদিতি ভাবঃ। তথাচ সপিণ্ডীকরণান্তবিশেষপরলঘুহারীতৈকবাক্যতয়া সামান্যমপি মরীচিবচনং সপিণ্ডীকরণান্তকৃত্যবিশেষপরমিতি ভাবঃ। অবিভক্তানামনিয়মশ্চাগ্রে বক্ষ্যতে॥ ১৭১॥

একপাকেন বসতামিতি। অবিভক্তানামিত্যর্থঃ। পৃথগ্বিবর্দ্ধতে ইতি। যদ্যপি সহবাসেঽপ্যেকেনৈব কর্ম্মণা ধর্ম্মোৎপত্ত্যা পার্থক্যে ধর্ম্মবৃদ্ধিরনুপপন্না তথাপি পার্থক্যে স্বস্বাসাধারণধনেন ধর্ম্মকর্ম্মকরণাদতিশয়ধর্ম্মপ্রাপ্তিরেব ধর্ম্মবৃদ্ধিঃ। পৃথগনুষ্ঠানে ফলাতিশয় ইতি। নব্যাস্তু বৃহস্পতিবচনে বিভক্তা ইতি বিশেষাভিধানাৎ অবিভক্তানামপৃথগেব শ্রাদ্ধং বিভক্তানান্তু পৃথগেবেতি। তথাচ শঙ্খঃ। বিভক্তা অবিভক্তা বা কুর্য্যুঃ শ্রাদ্ধমদৈবকম্। মঘাসু চ তথান্যত্র নাধিকারঃ পৃথগ্বিনা॥ অদৈবকং সাংবৎসরিকং মঘাশ্রাদ্ধঞ্চ পৃথগেব সর্ব্বে কুর্য্যুঃ। অন্যত্রামাবাস্যাশ্রাদ্ধাদৌ পৃথগ্বিনা নাধিকারোঽতোঽপৃথগেব কুর্য্যুরিত্যর্থঃ। একোদ্দিষ্টস্য তু বিভক্তাবিভক্তসাধারণং পৃথক্‌কারণম্। একোদ্দিষ্টন্তু কর্ত্তব্যং পাকেনৈব সদা স্বয়ম্। ইতি লঘুহারীতেনাপি স্বয়মেবেত্যনেনান্যদ্বারা নিষেধাৎ। যত্তু সপিণ্ডীকরণান্তানীতি বিশেষণাৎ পৃথগনুষ্ঠানস্বরসঃ। স বিভক্তবিষয় এবেতি। শ্রাদ্ধচিন্তামণ্যাদিসম্মতমপ্যেতৎ শিষ্টাচারো-

দূর্দ্ধমপৃথগনুষ্ঠানেঽপি ধর্ম্মসিদ্ধিঃ পৃথগনুষ্ঠানে ফলাতিশয়ঃ। বিভক্তানাং পৃথগনুষ্ঠানমেব সপিণ্ডীকরণান্তানীতি বিশেষণস্বরসাৎ সিদ্ধম্। জ্যেষ্ঠশ্চাত্র সকলপুত্ত্রাপেক্ষয়াগ্রোৎপন্নো গ্রাহ্যো দৈবর্ষিপিত্র্যর্ণপরিহারকত্বেন তস্যৈব সর্ব্বোৎকৃষ্টত্বাৎ। অতএব বিভাগং প্রক্রম্য মনুঃ। জ্যেষ্ঠেন জাতমাত্রেণ পুত্ত্রী ভবতি মানবঃ। পিতৃণামনৃণশ্চৈব স তস্মাল্লব্ধুমর্হতি। এবং ভূতজ্যেষ্ঠাভাবেঽপি বিভক্তানামবিভক্তানাঞ্চ সপিণ্ডীকরণান্তমপৃথগেব শ্রাদ্ধং লঘুহারীতবচনাৎ কিন্তু কর্ত্তুরনিয়মঃ।

ঽপ্যেতাদৃগেবেতি ব্যাচখ্যুঃ। কর্ত্তুরনিয়ম ইতি। স্বক্ষেত্রে সংস্কৃতায়াস্তু স্বয়মুৎপাদয়েৎ তু যম্। তমৌরসং বিজানীয়াৎ পুত্রং প্রথমকল্পিতম্॥ ঔরসো ধর্ম্মপত্নীজ ইত্যাদিশঙ্খযাজ্ঞবল্ক্যাদিবচনাৎ সর্ব্বেষাং পুত্রত্বস্য তুল্যত্বাৎ। জ্যেষ্ঠস্য তু সর্ব্বেষাস্তু মতং কৃত্বেতি মরীচিবচনাৎ সর্ব্বদা বাধিকার ইতি ভাবঃ। অতএব জ্যেষ্ঠস্য ক্ষতাদিনানধিকারে নিয়তকালকর্ত্তব্যেষু ষোড়শশ্রাদ্ধেষু কনীয়সাপ্যধিকার ইতি রুদ্রধরেণাপ্যুক্তম্। বস্তুতস্তু জ্যেষ্ঠাভাবে জীবদপেক্ষ্য জ্যেষ্ঠস্যৈবাধিকারঃ। অন্যথা জ্যেষ্ঠস্য করণেনৈব সর্ব্বেষাং প্রত্যবায়পরীহারাৎ তদভাবে সর্ব্বেষাং পৃথগনুষ্ঠানং স্যাদকর্ত্তৃণাং প্রত্যবায়ো বা স্যাদতো মরীচিবচনে জ্যেষ্ঠপদং জীবদপেক্ষজ্যেষ্ঠসাধারণপুত্রপরমেব সকলজ্যেষ্ঠাভাবে তু সর্ব্বকনিষ্ঠেনাপি কর্ত্তব্যং পুত্রত্বেন তস্যাপ্যধিকারিত্বাদিতি সুধীভির্বিভাব্যম্। প্রচেতোবচনে ক্রমেণোক্তঃ কেবলং পিণ্ড এবোক্তঃ। তত্র ক্রমব্যবস্থামাহ ব্যবস্থামাহেতি পুত্রেষু বিদ্যমানেষ্বিতি। অত্র স্বধাপদং সপিণ্ডীকরণান্তকর্ম্মপরম্। অতএব পুত্রেষ্বিত্যেতদ্বচনানন্তরম্। অপুত্রস্য চ যা পুত্ত্রী সাপি পিণ্ডপ্রদা ভবেৎ। তস্য পিণ্ডান্ দশৈবৈতানেকাহেনৈব নির্ব্বপেৎ॥ ইত্যুক্তম্। অতএব। নৈতৎ পৌত্রেণ কর্ত্তব্যং পুত্রবাংশ্চেৎ পিতামহঃ। ইতি

ভ্রাত্রাদীনামধিকারমাহ প্রচেতাঃ। পুত্রো ভ্রাতা পিতা বাপি মাতুলো গুরুরেব চ। এতে পিণ্ডপ্রদা জ্ঞেয়াঃ সগোত্রাশ্চৈব বান্ধবাঃ॥ বান্ধবাঃ সপিণ্ডাঃ। ব্যবস্থামাহ গৌতমঃ। পুত্রাভাবে সপিণ্ডা মাতৃসপিণ্ডা বা শিষ্যাশ্চ দদ্যুস্তদভাবে ঋত্বিগাচার্য্যৌ। এতেন পুত্রসদ্ভাবেঽন্যস্যানধিকারঃ। অতএব ঋষ্যশৃঙ্গঃ। পুত্রেষু বিদ্যমানেষু নান্যং বৈ কারয়েৎ স্বধাম্। বহুবচনাৎ সকলপুত্রাধিকারঃ। মাতৃসপিণ্ডা মাতুলাদয়ো বাশব্দাৎ সপি-

বচনে এতৎপদস্মরসাৎ। তদুত্তরক্রিয়াসু পুত্রসত্ত্বেঽপি পৌত্রাদ্যধিকার ইতি ধর্ম্মপ্রদীপঃ। অতএব দুহিত্রাদীনামপি সাংবৎসরিকাচরণং লোকে দৃশ্যতে। অত্র চ পুত্রেষ্বিতি বহুবচনাৎ দ্বাদশবিধপুত্রগ্রহণম্। এষামধিকারক্রমমাহ যাজ্ঞবল্ক্যঃ। ঔরসো ধর্ম্মপত্নীজস্তৎসমঃ পুত্রিকাসুতঃ। ক্ষেত্রজঃ ক্ষেত্রজাতস্তু সগোত্রেণেতরেণ বা। গৃহে প্রচ্ছন্ন উৎপন্নো গূঢ়জস্তু সুতঃ স্মৃতঃ। কানীনঃ কন্যকাজাতো মাতামহসুতো মতঃ। অক্ষতায়াং ক্ষতায়াং বা জাতঃ পৌনর্ভবঃ সুতঃ। পিণ্ডদোঽংশহরশ্চৈষাং পূর্ব্বাভাবে পরঃ পরঃ। সজাতীয়েষ্বয়ং প্রোক্তস্তনয়েষু ময়া বিধিঃ॥ ইতি। অত্র পরিণীতক্ষত্রিয়াদিপুত্রাণামৌরসত্বেঽপি নাধিকারঃ। সজাতীয়েষ্বয়ং প্রোক্ত ইত্যুপসংহারাৎ। পুত্রিকাসুত ইতি পুত্রিকায়াঃ সুত ইতি নার্থঃ। তস্য পৌত্রত্বাৎ কিন্তু পুত্রিকৈব সুত ইত্যর্থঃ। অতএব। আজ্যং বিনা যথা তৈলং সদ্ভিঃ প্রতিনিধীকৃতম্। তথৈকাদশ পুত্রাঃ স্যুঃ পুত্রিকৌরসয়োর্বিনা॥ ইতি বৃহস্পতিনা একাদশপুত্রাদৌ পুত্রিকায়া এবাধিকার উক্তঃ। দ্বৌ বিহায়ৈকাদশত্বঞ্চ পারশবেন ত্রয়োদশপুত্রেণ সহ। তথাচোক্তম্। যং ব্রাহ্মণস্তু শূদ্রায়াং কামাদুৎপাদয়েৎ সুতম্। স পারয়ন্নেব শবস্তস্মাৎ পারশবঃ স্মৃতঃ॥ ইতি। মাতামহসুত ইতি। অদত্তায়াস্তু যো জাতো দৈবযোগাৎ পিতুর্গৃহে। ন কানীনসুতস্তস্য যস্য সা দীয়তে

ণ্ডাভাবে জ্ঞেয়াঃ। তদভাবে শিষ্যস্তদভাবে ঋত্বিক্ তদভাবে আচার্য্যঃ পুত্রাভাবে সপিণ্ডা ইত্যত্র পত্ন্যভাবে সহোদরাভাবে ইতি বোধ্যম্। সহোদরাধিকার উক্তঃ। আদিপুরাণে। ভ্রাতুর্ভ্রাতা স্বয়ঙ্কুর্য্যাত্ তদ্ভার্য্যা চেন্ন বিদ্যতে। তস্য ভ্রাতৃসুতশ্চক্রে যস্য নাস্তি সহোদরঃ॥ অত্র ভ্রাতা কনিষ্ঠো জ্যেষ্ঠশ্চাবিশেষাৎ নানুজস্য তথাগ্রজ ইতি ছন্দোগপরিশিষ্টং কনিষ্ঠভ্রাতৃসদ্ভাববিষয়ং এবং ভ্রাতুরভাবে ভ্রাতৃপুত্রোঽধিকারীতি দর্শিতম্॥ ১৭২॥

পন্দঃ॥ অক্ষতায়ামিতি। অক্ষতযোন্যাং ক্ষতযোন্যাং বা পুনরূঢ়ায়াং জাতো জনকস্য সুত ইত্যর্থঃ। ক্রীত ইতি। পুত্রার্থঃ ক্রীত ইত্যর্থঃ। এষাং সজাতীয়ানামেব পুত্রাণাং শ্রাদ্ধাধিকারে ক্রমোঽয়মুক্তঃ। দ্রব্যার্পণমিত্যনেন দ্বারা তু সজাতীয়ানাং বিজাতীয়ানাঞ্চ সর্ব্বেষামেব যুগপদেবাধিকার ঋষ্যশৃঙ্গবৃহস্পতিবচনয়োঃ পুত্রত্বাবিশেষেণ প্রতিপাদকত্বাৎ বহুবচনাচ্চ। এষামভাবে এষাং পুত্রাণাং তদভাবে পৌত্রাণাঞ্চ ক্রমেণাধিকারঃ। পুত্রঃ পৌত্রঃ প্রপৌত্রো বেতি বক্ষ্যমাণবিষ্ণুপুরাণবচনাদ্ধনহারিত্বাচ্চ। সহোদরাভাবে চেতি। ভ্রাতৃপুত্রাভাবে ইত্যপি বোধ্যম্। তস্য ভ্রাতৃসুতশ্চক্রে যস্য নাস্তি সহোদর ইত্যনেন সহোদরাভাবে ভ্রাতৃপুত্রাধিকারবোধনাৎ। নাস্তি সহোদর ইত্যত্র বৈমাত্রেয়াভাবোঽপি বোদ্ধব্যঃ। এতেন সহোদরপদোপাদানাৎ সহোদরাসত্ত্ব এব বৈমাত্রেয়সত্ত্বেঽপি সোদরপুত্রাধিকার ইতি হারলতোক্তং নিরস্তম্। বৈমাত্রেয়স্যাপি ভ্রাতৃপদার্থত্বেন ভ্রাতুর্ভ্রাতা স্বয়ঙ্কুর্য্যাত্ ইত্যনেন বৈমাত্রেয়াধিকারস্যাপি প্রাগুক্তেস্তদনুরোধেন উত্তরার্দ্ধে সোদরপদস্য বৈমাত্রেয়োপলক্ষকত্বাৎ। এতেন সুতপর্য্যন্তাভাবে বৈমাত্রেয়াধিকার ইতি মিশ্রমতমপ্যপাস্তম্। পত্ন্যভাবে ভ্রাতুরধিকারাৎ বৈমাত্রেয়স্যাপি ভ্রাতৃপদার্থত্বাৎ। অবিশেষাদিতি। অন্যথা ভ্রাতৃপদস্য সঙ্কোচাপত্তেঃ। কনিষ্ঠাভা-

অত্র সোদরাভাবে সাপত্ন্যভ্রাতা সোদরভ্রাতৃপুত্রা-ভাবে সাপত্ন্যভ্রাতৃপুত্রঃ তয়োরপি ভ্রাতৃভ্রাতৃপুত্রশব্দার্থ-ত্বাৎ। পত্ন্যভাবে সহোদর ইত্যত্র দুহিত্রভাবেঽপি বোদ্ধ-ব্যঃ। যথা ঋষ্যশৃঙ্গঃ। অপুত্রস্য চ যা পুত্রী সৈব পিণ্ড-প্রদা ভবেৎ। তথা মনুঃ। অঙ্গাদঙ্গাৎ সম্ভবতি পুত্রব-দ্দুহিতা নৃণাম্। তস্যামাত্মনি তিষ্ঠন্ত্যাং কথমন্যো ধনং হরেৎ॥ নন্বু পুত্রাভাবে দ্বয়োরধিকারপ্রতিপাদনাৎ পত্ন্য-ভাবে দুহিতুরিতি কথং লভ্যতে। উচ্যতে। পুত্রাভাবে পত্ন্যা ধনগ্রহণাধিকারাৎ তস্য চোপকারকত্বব্যাপ্তত্বাৎ। পিণ্ডদানাদিকঞ্চোপকারঃ। অতঃ পত্ন্যা দুহিতৃতো মুখ্যং পিণ্ডদাতৃত্বম্। তথা যাজ্ঞবল্ক্যঃ। পত্নী দুহিতরশ্চৈব পিতরৌ ভ্রাতরস্তথা। তৎসুতো গোত্রজো বন্ধুঃ শিষ্যঃ সব্রহ্মচারিণঃ॥ এষামভাবে পূর্ব্বস্য ধনভাগুত্তরোত্তরঃ।

বেঽপি জ্যেষ্ঠস্যানধিকারাপত্তেশ্চ তদধিকারপ্রতিপাদকবিশেষবচনা-ভাবাদিতি ভাবঃ॥ ১৭২॥

অত্রেতি। সহোদরাভাবে সাপত্ন্যভ্রাতা তদভাবে সহোদরভ্রাতৃপুত্র-স্তদভাবে চ সাপত্ন্যভ্রাতৃপুত্র ইত্যর্থঃ। এতেন সোদরভ্রাতৃপুত্রাভাবে ইতি হারলতোক্তং নিরস্তম্। আদিপুরাণে সামান্যতঃ সোদরাভাব এব ভ্রাতৃপুত্রাধিকারস্যোক্তত্বাৎ উপকারাতিশয়েন প্রাক্ তদধিকারস্যৈব-যুক্তত্বাচ্চ। দুহিত্রভাবেঽপীতি। তেন পত্ন্যভাবে দুহিতা তত্রাপ্যাদাব-দত্তা সগোত্রত্বাৎ ততো বাগ্দত্তা তদনন্তরং পরিণীতেতি ক্রমঃ। দ্বয়োরধি-কারেতি। শঙ্খবচনে পুত্রাভাবেপত্ন্যা ঋষ্যশৃঙ্গেন চ পুত্রাভাবে দুহিতুরধি-কারস্য প্রতিপাদনাৎ। পত্ন্যভাবে দুহিতুরিতি ক্রমঃ কথং ন লভ্যতে ইত্যর্থঃ। অত্র নব্যাঃ। ভ্রাতুঃ প্রাক্ দুহিতুশ্চ পশ্চাৎ দৌহিত্রস্যাধি-

স্বর্জ্জাতস্থ হ্যপুত্রস্থ সর্ব্ববর্ণেষ্বয়ং বিধিঃ ॥ ননু পুত্রসদ্ভাবেঽপি পত্নীদুহিত্রোরধিকারঃ প্রবর্ত্ততে। যথা। অপুত্রা স্ত্রী যথা পুত্রঃ পুত্রবত্যপি ভর্ত্তরি। দদ্যাৎ পিণ্ডং জলঞ্চৈব জলমাত্রন্তু পুত্রিণী॥ দুহিতা পুত্রবৎ কুর্য্যান্মাতাপিত্রোস্তু সংস্কৃতা। অশৌচমুদকং পিণ্ডমেকোদ্দিষ্টং সদা তয়োঃ॥ তন্ন এতয়োরমূলত্বাৎ সমূলত্বেঽপি বালদেশান্তরিতপুত্রসদ্ভাববিষয়ঃ পত্ন্যধিকারঃ দুহিত্রধিকারশ্চ পুত্রপত্ন্যভাববিষয়ো ভবিষ্যতি। ভ্রাত্রাদীনামনধিকারার্থঃ। ভ্রাতৃপুত্রাভাবে পিতা। পুত্রো ভ্রাতা পিতা বাপীতি প্রচেতোবচনাৎ। তুল্যন্যায়তয়া মাতাপি। ন পুত্রস্থ পিতা দদ্যাদিতি ছন্দোগপরিশিষ্টং ভ্রাতৃপুত্রসদ্ভাববিষয়ম্। স্ত্রিয়াশ্চ পুত্রাভাবে দুহিতা। অপুত্রস্থ তু যা পুত্রীতি স্ত্রীপুংসাধারণত্বাৎ ঋক্থগ্রহণাধিকারাচ্চ। তদভাবে

কারঃ পার্ব্বণপিণ্ডদাতৃত্বেন ভ্রাত্রাদিভ্যো বলবত্ত্বাদিত্যাহুঃ। শ্রাদ্ধচিন্তামণৌ চ সকুল্যাভাবে দৌহিত্রাধিকারঃ। পার্ব্বণপিণ্ডদাতৃত্বস্য পত্নীদুহিতৃবদকিঞ্চিৎকরত্বেন তদন্যতয়া সম্বন্ধোৎকর্ষাদিত্যুক্তম্। যুক্তমেতৎ। মাতামহানাং দৌহিত্রাঃ কুর্ব্বন্ত্যহনি চাপরে। তেঽপি তেষাং প্রকুর্ব্বন্তি দ্বিতীয়েঽহনি সর্ব্বদা॥ ইত্যাদিপুরাণে মাতামহতুল্যতয়া দৌহিত্রস্য প্রতিপাদনাৎ সকুল্যাভাবে দৌহিত্রাধিকারস্য স্ফুটত্বাদতত্রব কেনাপি মুনিনা সকুল্যাদেরাদৌ দৌহিত্রাধিকারো বিশিষ্য নাভিহিতঃ। পুত্রো ভ্রাতা পিতাপীতি। যদ্যপ্যত্র ভ্রাতৃপুত্রোল্লেখো নাস্তি তথাপি তস্য ভ্রাতৃসুতশ্চক্রে যস্য নাস্তি সহোদর ইতি বচনেনৈকবাক্যতয়া ভ্রাতৃপদস্য ভ্রাতৃপুত্রোপলক্ষকত্বেন পুত্রো ভ্রাতা পিতা বাপীতি উক্তম্। ভ্রাতৃপুত্রস্য পুত্রাতিদেশেন বলবত্ত্বাচ্চেতি মন্তব্যম্। তুল্যন্যায়তয়েতি।

সপত্নীপুত্রঃ তস্যাপি পুত্রত্বস্মরণাৎ। যথা মনুঃ। বহ্বীনামেকপত্নীনামেকা চেৎ পুত্রিণী ভবেৎ। সর্ব্বাস্তাস্তেন পুত্রেণ প্রাহ পুত্রবতীর্ম্মনুঃ॥ তদভাবে পতিঃ। তদভাবে স্নুষা। যথা পুত্রাভাবে শঙ্খঃ। ভার্য্যাপিণ্ডং পতির্দ্দদ্যাৎ ভর্ত্রে ভার্য্যা তথৈব চ। শ্বশ্র্বাদেশ্চ স্নুষা চৈব তদভাবে দ্বিজোত্তমঃ॥ ন ভার্য্যায়াঃ পতির্দ্দদ্যাদিতি ছন্দোগপরিশিষ্টং দুহিতৃসপত্নীপুত্রসদ্ভাববিষয়ম্। আদিগ্রহণাৎ শ্বশ্র্বাঃ শ্বশুরস্য চ। তদভাবে সপিণ্ডসমানোদকসগোত্রপিতৃবংশমাতৃবংশজাঃ। তদভাবেঽসম্বন্ধী দ্বিজোত্তমোঽধিকারী। বিষ্ণুপুরাণে। পুত্রঃ পৌত্রঃ প্রপৌত্রো বা তদ্বদ্বা ভ্রাতৃসন্ততিঃ। সপিণ্ডসন্ততির্ব্বাপি ক্রিয়ার্হা নৃপ জায়-

জনকত্বাবিশেষাদিত্যর্থঃ। স্ত্রীপুংসাধারণত্বাদিতি। যদ্যপ্যত্রাপুত্রস্যেতি পুংলিঙ্গনির্দ্দেশোঽস্তি তথাপি অঙ্গাদঙ্গাৎ সম্ভবতীত্যনেনৈকবাক্যতয়াঙ্গোদ্ভবত্বেন দুহিতুঃ পুত্রতুল্যতয়া পুংস্ত্বমবিবক্ষিতমিতি ভাবঃ। ননু সপত্নীপুত্রস্য পুত্রত্বস্মরণাৎ কথং দুহিতুঃ পশ্চাৎ তুল্যাধিকার ইত্যত্রাহ ঋক্থগ্রহেণেতি। কন্যায়াঃ সপিণ্ডীপুত্রস্য চ দ্বয়োরেব পুত্রত্বাতিদেশতৌল্যেঽপি কন্যায়া ঋক্থগ্রাহিত্বেন বলবত্ত্বাৎ প্রাগধিকার ইতি ভাবঃ। একপত্নীনামিতি। একস্য পত্নীনামিত্যর্থঃ। তদভাবে পতিরিতি সপত্নীপুত্রস্য পুত্রাতিদেশেন বলবত্ত্বাদিতি ভাবঃ। হরিনাথোপাধ্যায়াদয়স্তু ভার্য্যাপিণ্ডং পতির্দ্দদ্যাদিতি বাক্যস্যোপদেশরূপস্য শীঘ্রপ্রবৃত্তিকতয়া বলবত্ত্বাৎ বহ্বীনামিতি বাক্যস্য চাতিদেশরূপতয়াবিলম্বপ্রবৃত্তিকত্বেন দুর্ব্বলত্বাৎ সপত্নীপুত্রাৎ প্রাক্ পত্যুরধিকার ইত্যাহুঃ। মিশ্রমতমপ্যেতৎ। তদসৎ। পত্যুরধিকারে পুত্রাভাবস্যাবশ্যমধিকারিতাবচ্ছেদকতয়া তত্রাতিদেশানুরোধাৎ আতিদেশিকসাধারণপুত্রাভাবস্যৈব তদ-

তে॥ এষামভাবে সর্ব্বেষাং সমানোদকসন্ততিঃ। মাতৃপক্ষস্য পিণ্ডেন সম্বন্ধা যে জলেন বা॥ কুলদ্বয়েঽপি চোচ্ছন্নে স্ত্রীভিঃ কার্য্যা ক্রিয়া নৃপ। সঙ্ঘাতান্তর্গতৈর্ব্বাপি কার্য্যা প্রেতস্য সৎক্রিয়া॥ উচ্ছন্নবন্ধুঋক্থাদ্বা কারয়েদবনীপতিঃ। পূর্ব্বক্রিয়া মধ্যমাশ্চ তথা চৈবোত্তরাঃ ক্রিয়াঃ। ত্রিপ্রকারাঃ ক্রিয়া প্রোক্তাস্তাসাং ভেদান্ শৃণুষ্ব মে॥ আদাহবার্য্যায়ুধাদিস্পর্শাদ্যন্তাশ্চ যাঃ ক্রিয়াঃ। তাঃ পূর্ব্বা মধ্যমা মাসি মাস্যেকোদ্দিষ্টসংজ্ঞিতাঃ॥ প্রেতে পিতৃত্বমাপন্নে সপিণ্ডীকরণাদনু। ক্রিয়ন্তে যাঃ ক্রিয়াঃ পিত্র্যাঃ প্রোচ্যন্তে তা নৃপোত্তরাঃ॥ পিতৃমাতৃসপিণ্ডৈস্তু সমানসলিলৈর্নৃপ। সংঘাতান্তর্গতৈর্ব্বাপি রাজ্ঞা বা ধনহারিণা॥ পূর্ব্বাঃ ক্রিয়াস্তু কর্ত্তব্যাঃ পুত্রাদ্যৈ-

---

বচ্ছেদকত্বোপগমাৎ অন্যথা। পত্ন্যনন্তরং সপত্নীপুত্রাধিকারো ভবেদভিমতোঽপি ন স্যাৎ কিন্তু শ্বশুরাদেশ্চ স্নুষা চৈবেত্যুপদেশস্য বলবত্ত্বাৎ স্নুষায়া এবাদাবধিকারপ্রাপ্তেঃ। এবমাতিদেশিকপুত্রিকাপুত্রসত্ত্বেঽপি পত্ন্যা এব পুংশ্রাদ্ধেঽপ্যধিকারাপত্তেঃ। পুত্রাদ্যধিকারে তু মুখ্যপুত্রভাবস্যৈবাবচ্ছেদকতাভঙ্গাদঙ্গাৎ সন্তবতীতি মন্বনাঙ্গোক্তবচনেন বলবত্ত্বোক্তেঃ। অতএব যদা সাম্যবলো ন স্যাৎ সুতো দৌহিত্র এব বা। ইতি বৃহস্পতিবচনব্যাখ্যানে ঔরসপদেন পুত্রদুহিত্রোরুপাদানম্। সুতপদেন সপত্নীপুত্রস্যোপাদানং অনয়োঃ [illegible] ইত্যুক্তম্। জীমূতবাহনেনাপীতি। স্মার্ত্তাস্তু পুত্রপৌত্রপ্রপৌত্রাভাবে পত্নী তদভাবে দুহিতা তদভাবে দৌহিত্রঃ তদভাবে সপত্নীপুত্রঃ তদভাবে পতিঃ তদভাবে স্নুষেতি ক্রমমাহুঃ। তদভাবে সপিণ্ডেতি। স্নুষাভাবে সম্বন্ধসন্নিকর্ষতারতম্যেন সপিণ্ডাস্তদভাবে সমানোদকাস্তদভাবে পিতৃবংশজা ভগিনীপুত্রাদয়ঃ।

রেব চোত্তরাঃ। দৌহিত্রৈর্বা নরশ্রেষ্ঠ কার্য্যাস্তত্তনয়ৈস্তথা॥ মৃতাহনি তু কর্ত্তব্যাঃ স্ত্রীণামপ্যুত্তরাঃ ক্রিয়াঃ। প্রতিসংবৎসরং রাজন্নেকোদ্দিষ্টবিধানতঃ॥ বাশব্দঃ পুত্রাভাবে পৌত্রস্য তদভাবে প্রপৌত্রস্যাধিকারার্থঃ। এতদপি সপিণ্ডনপর্য্যন্তং তদূর্দ্ধং তুল্যবদেব পুত্রপৌত্রপ্রপৌত্রাণামধিকার ইতি। পিতামহঃ পিতুঃ পশ্চাদিতি বচনে নিরূপিতম্॥ ১৭৩॥

যদ্যপি পুত্রাভাবে পত্নীদুহিত্রোরধিকার উক্ত তথাপি পৌত্রপ্রপৌত্রয়োরভাবে বোদ্ধব্যঃ। পার্ব্বণপিণ্ডদাতৃত্বেন তয়োরগ্রে রিক্থহরত্বাৎ। তদ্বত্বা ভ্রাতৃসন্ততিরিতি।

---

মাতৃবংশজা মাতুলপুত্রাদয় ইত্যর্থঃ। তদভাবে সপিণ্ডেত্যাদ্যুক্তে প্রমাণমাহ বিষ্ণুপুরাণে ইতি। ব্যাচষ্টে। বাশব্দ ইত্যাদি পুত্রাভাবে ইতি। তথাচ ব্যবস্থিতবিকল্পার্থ এবাত্র বাশব্দো ন স্বৈচ্ছিকবিকল্পার্থঃ। নৈতৎ পৌত্রেণ কর্ত্তব্যং পুত্রবাংশ্চেৎ পিতামহঃ। ইতি পরিশিষ্টবচনাৎ ইতি ভাবঃ। তদূর্দ্ধং সপিণ্ডনাৎ পরতঃ। তুল্যবদেবেতি পিতুঃ পিতামহাদীনাঞ্চ শ্রাদ্ধে পিতৃব্যভ্রাতৃপুত্রাদীনাং তুল্যবদেবাধিকার ইত্যর্থঃ। পিত্রা সহ পুত্রস্য তু ন পিতামহাদিশ্রাদ্ধে তুল্যবদধিকারঃ। সপিতুঃ পিতৃকৃত্যেষু অধিকারো ন বিদ্যতে। ইতি বচনাৎ॥ ১৭৩॥

যদ্যপীতি। তদভাবে তু পত্নীস্যাদিতি। অপুত্রস্য চ যা পুত্রীতি। শঙ্খশ্বব্যশৃঙ্গাদিভিরধিকার উক্ত ইত্যর্থঃ। ঋক্থহারিত্বাদিতি। পুত্রঃ পৌত্রঃ প্রপৌত্রো বেতি বিষ্ণুপুরাণাচ্চেত্যপি বোধ্যম্। অতএব ন সংশয়ঃ। ঋক্থহারিত্বেন পৌত্রপ্রপৌত্রয়োর্ব্বলবত্ত্বাদিতি ভাবঃ। তদভাবেঽসবর্ণা ইতি। সবর্ণায়াস্তু প্রপৌত্রানন্তরমেবাধিকারবদিতি ভাবঃ। গৌতমেনোক্তা ইতি। শিষ্যা দদ্যুস্তদভাবে ঋত্বিগাচার্য্যাবিতি গোতমেনোক্তা ইত্যর্থঃ। তদভাবে ইতি। সতীর্থৈকতীর্থিনোরপ্যভাবে ইত্যপি

যথা পুত্রাভাবে পুত্রসন্ততিস্তথা ভ্রাতুরভাবে ভ্রাতৃসন্ততি-রিতি প্রাগপ্যুক্তম্। এবং সপিণ্ডাভাবে সপিণ্ডসন্ততিঃ সমানোদক ইত্যর্থঃ। এবং সমানোদকাভাবে সমানোদকসন্ততিঃ সগোত্র ইত্যর্থঃ। এষামভাবে মাতৃপক্ষস্য মাতামহপক্ষস্য পিণ্ডেন সম্বন্ধাঃ সপিণ্ডা ইত্যর্থঃ। তদভাবে মাতৃপক্ষস্য জলেন সম্বন্ধাঃ সমানোদকা ইত্যর্থঃ। তদভাবেঽসবর্ণা পরিণীতা স্ত্রী। তদভাবেঽপরিণীতা। তদ-

রোধাৎ। ক্রমেণাচার্য্যসচ্ছিষ্যধর্ম্মভ্রাত্রৈকতীর্থিনঃ। ইত্যনেন তয়োরপি ধনগ্রাহিত্বেন সঙ্খ্যাতান্তর্গতাপেক্ষয়া বলবত্ত্বাৎ। শঙ্খোক্ত ইতি। তদভাবে দ্বিজোত্তম ইতি শঙ্খোক্ত ইত্যর্থঃ। অধিকারিক্রম ইতি। আদাবৌরসঃ ততঃ পুত্রিকা ততঃ ক্ষেত্রজাদ্যাঃ সবর্ণা যাজ্ঞবল্ক্যোক্তক্রমেণাধিকারিণঃ। এষামভাবে তু। এষাং পুত্রশ্চ পৌত্রশ্চ পত্ন্যপুত্রা চ পুত্রিণী। অদত্তা দুহিতা দত্তানুজো জ্যেষ্ঠস্তয়োঃ সুতঃ॥ বৈমাত্রেয়োঽথ তৎপুত্রঃ পিতা মাতা বিমাতরঃ। পিতামহঃ স্নুষা চৈব সপিণ্ডাঃ সন্নিকর্ষতঃ। সকুল্যগোত্রা দৌহিত্রো মাতামহোঽথ মাতুলঃ। মাতামহসপিণ্ডাস্তু তৎসমানোদকাস্ততঃ॥ ভাগিনেয়োঽথ জামাতা শ্বশুরঃ শিষ্যঋত্বিজৌ। আচার্য্যশ্চাপ্যুপাধ্যায়ঃ সতীর্থশ্চ সখা ততঃ। সপত্নীতনয়ঃ স্বামী স্নুষাপুংবৎ পরে স্মৃতাঃ॥ ইতি স্মৃত্যুক্তাধিকারিণামুক্তক্রমেণাধিকারক্রম ইত্যর্থঃ। অত্রাপুত্রা পুত্রিণী অপুত্রিকা দুহিতেত্যর্থঃ। অদত্তা দত্তেতি দুহিতৃণাং ক্রম উক্তঃ। বৈমাত্রেয়োঽথেতি তয়োঃ সুত ইত্যনন্তরং যোজনা পূর্ব্বোক্তক্রমানুরোধাৎ। সপত্নীতনয় ইতি তু কন্যাপর্য্যন্তাভাবে স্ত্রীশ্রাদ্ধাধিকারিণ উক্তাঃ। পুংবদিতি স্নুষাপর্য্যন্তানামভাবে পুরুষবদেব স্ত্রিয়া অপ্যধিকারিক্রম ইত্যর্থঃ। আয়ুধাদিত্যাদিপদাৎ অগ্ন্যাদীনাং গ্রহণং স্পর্শাদিত্যাদিপদাৎ বিষ্ণুনামকীর্ত্তনাদিসংগ্রহঃ। পিতৃমাতৃসপিণ্ডানেয় ইতি। উক্তক্রমেণ প্রাপ্তাধিকারোঽবশ্যং কুর্য্যাদিত্যর্থঃ। অবশ্য-

ভাবে শিষ্যর্ত্ত্বিগাচার্য্যাঃ গোতমোক্তাঃ। তদভাবে সংঘ্যা-তান্তর্গতঃ মঠব্রাহ্মণঃ। তদভাবেঽসম্বন্ধী দ্বিজোত্তমঃ শঙ্খোক্তঃ। তদভাবে চোচ্ছন্নবন্ধোর্ধনেন দ্বারা নৃপতিঃ কারয়েদিত্যধিকারিক্রমঃ। ক্রিয়াভেদে নাধিকারিনিয়ম-মাহ পূর্ব্বাঃ ক্রিয়া ইতি। আদাহেতি। দাহাবধেরশৌ-চান্তবিহিতা বার্য্যায়ুধাদিস্পর্শাদ্যন্তাঃ যাস্তাঃ পূর্ব্বাঃ। মাসি মাসীত্যেকাদশাহাদিসপিণ্ডনান্তপ্রেতক্রিয়োপলক্ষ-ণম্। এতদ্ব্যক্তীকরোতি প্রেতে পিতৃত্বমাপন্নে সপিণ্ডীক-

---

করণলাভশ্চ পূর্ব্ববচনেনাধিকারসিদ্ধাবপি পুনশ্চারম্ভাৎ সিদ্ধে সত্যা-মারম্ভোনিয়মায়েতি ন্যায়াৎ। অনিয়ম ইতি। পুনরারম্ভাৎ পুত্রাদ্যৈ-রেব চেতি। অত্র চকারস্য উত্তরাশ্চেতি ভিন্নক্রমেণ যোজনয়া তৎসমু-চ্চিতমধ্যমক্রিয়াস্বপি তেষাং নিয়তাধিকার ইতি বোধ্যম্। ভ্রাতৃসন্ততি-পর্য্যন্তা ইতি। পুত্রাদ্যৈরেবেত্যেবকারেণ পূর্ব্বোক্তবচনোক্তাধিকারিণাং মধ্যে পূর্ব্বক্রিয়াধিকারনিয়তানাং পিতৃমাতৃসপিণ্ডাদীনাং ব্যাবর্ত্তনা-দিতি ভাবঃ। সমুচ্চয়ার্থ ইতি। অনুক্তদুহিত্রাদিসমুচ্চয়ার্থ ইত্যর্থঃ। তেন পুত্রসত্ত্বেঽপি দৌহিত্রস্য পার্ব্বণৈকোদ্দিষ্টয়োরধিকারঃ সিদ্ধ এব। বাশ-ব্দসমুচ্চিতানাং দুহিত্রাদীনাং ভ্রাত্রাদীনাঞ্চ একোদ্দিষ্টমাত্রাধিকার ইত্যাহ ভ্রাতৃসন্ততীতি। দৌহিত্রসন্ততয় ইতি। তত্তনয়ৈস্তথেত্যনেন উক্তা ইত্যর্থঃ। অত্র দৌহিত্রসন্ততেঃ পিণ্ডবহির্ভাবাৎ পুত্রিকাপুত্ররূপদৌহিত্র-সন্ততিপরমিত্যর্থ ইতি কল্পতরুঃ। তদসৎ পুত্রিকাপুত্রসন্ততেঃ প্রপৌত্র-ত্বেন পার্ব্বণেঽপ্যধিকারাৎ একোদ্দিষ্টং কুর্য্যু ইতি গ্রন্থাসঙ্গতেঃ। অন্যে তু স তনয়ো যস্যেতি বহুব্রীহিণা তত্তনয়ৈরপত্যৈর্দুহিতৃভিরিত্যর্থ ইত্যাহুঃ। তদপ্যসৎ দুহিতৃদৌহিত্রসন্ততয় ইতি গ্রন্থবিরোধাৎ। বস্তুতস্তু দৌহিত্রসন্ততেরপি বচনাদধিকারঃ কিন্তু তস্য নিত্যত্বে প্রমাণাভাবাৎ কাম্যত্বমিতি বিশেষঃ। অত্র পুত্রমৃতপিতৃপৌত্রপ্রপৌত্রদৌহিত্রাণাং

রণাদস্তু ইতি। সপিণ্ডনোত্তরাঃ পার্ব্বণাদিক্রিয়া উত্তরাঃ। পিতৃমাতৃসপিণ্ডৈস্ত্বিত্যত্র পিতৃমাতৃসপিণ্ডাদয়ঃ পূর্ব্বাং ক্রিয়ামবশ্যং কুর্য্যুঃ। মধ্যমায়ামনিয়মঃ। উত্তরায়াং পুত্রাদয়ো ভ্রাতৃসন্ততিপর্য্যন্তা নিয়তাঃ। দৌহিত্রৈর্ব্বেতি। বাশব্দঃ সমুচ্চয়ার্থঃ। ভ্রাতৃ ভ্রাতৃসন্ততিদুহিতৃদুহিতৃসন্ততয়ঃ একোদ্দিষ্টং কুর্য্যুঃ পার্ব্বণনিষেধাৎ ॥১৭৪॥

স্ত্রীণামপ্যুত্তরক্রিয়ায়ামধিকারঃ কিন্তু প্রতিসংবৎসরবিহিতৈকোদ্দিষ্টক্রিয়ায়ামেব ন পার্ব্বণবৃদ্ধিশ্রাদ্ধাদৌ সপিণ্ডনস্য মধ্যমায়ামন্তর্ভাবান্ন তত্র স্ত্রীণামধিকারপ্রতিষেধঃ। মার্কণ্ডেয়পুরাণে। সর্ব্বাভাবে স্ত্রিয়ঃ কুর্য্যুঃ

---

পার্ব্বণসাংবৎসরিকয়োর্যুগপৎ অধিকারঃ। ষোড়শশ্রাদ্ধে তু পূর্ব্বোক্তক্রমেণেতি বিশেষঃ। অধিকারিণ্যাঃ পত্নীদুহিত্রোস্ত্বেকোদ্দিষ্ট এব নিয়তাধিকারঃ। স্ত্রীণাং পার্ব্বণনিষেধাৎ। এবমধিকারিণো ভ্রাত্রাদেরপি একোদ্দিষ্টমাত্রে। গোবিন্দানন্দস্তু পুত্রসদ্ভাবে মৃতপিতৃকপৌত্রস্য দুহিতুর্দৌহিত্রস্য চ নিয়তাধিকারাভাবাৎ গৌরবাতিশয়েন ব্রৈহিকমেব সাংবৎসরিকানুষ্ঠানম্। ন চ কাম্যাধিকারত্বে কিং মানমিতি বাচ্যং অনিষিদ্ধবিষয়ে তৃপ্তিকামনৈব প্রমাণম্। শিষ্টাচারোঽপ্যেতাদৃশ এবেত্যাহ। স্ত্রিয়স্তু পুত্রদুহিতৃপতিস্মরণাৎ আদ্যসাংবৎসরিকাদ্যেকোদ্দিষ্টমাত্রে নিয়তাধিকারাঃ। পরন্তু ষোড়শশ্রাদ্ধে ক্রমেণেতি বিশেষঃ॥ ১৭৪ ॥

মৃতাহনি তু কর্ত্তব্যাঃ স্ত্রীণামপ্যুত্তরক্রিয়াঃ। ইত্যত্র স্ত্রীণামিতি কর্ত্তরি ষষ্ঠীত্যাহ স্ত্রীণামপীতি অধিকারিপ্রকরণাদিতি ভাবঃ। স্ত্রীণাং পত্নীদুহিতৃস্মুষাণামিত্যর্থঃ। সপিণ্ডনস্যাপ্যংশে পার্ব্বণত্বাৎ স্ত্রীণামধিকারনিষেধঃ স্যাদিত্যাশঙ্কায়ামাহ সপিণ্ডনস্য ত্বিতি। মধ্যমায়ামিতি। এতেন স্ত্রীণামুত্তরক্রিয়ায়ামেবাধিকারইত্যুক্তিঃ মধ্যমক্রিয়ায়াস্ত্বধিকার এবেতি

স্বভর্ত্তৃণামমন্ত্রকম্। তদভাবে তু নৃপতিঃ কারয়েৎ স্বকুটুম্ববৎ॥ তথা। স্ত্রীণামপ্যেবমেবৈতদেকোদ্দিষ্টমুদাহৃতম্। সপিণ্ডীকরণং তাসাং পুত্রাভাবে ন বিদ্যতে॥ প্রতিসংবৎসরং কার্য্যমেকোদ্দিষ্টং স্ত্রিয়াঃ নরৈঃ। মৃতাহনি যথান্যায়ং নৃণাং যদ্বদিহোদিতম্॥ স্ত্রিয়োঽসবর্ণা ইতি প্রাগেব ব্যাখ্যাতম্। এবমেব অমন্ত্রকমিত্যর্থঃ। তাসামিতি গ্রহণাৎ পুরুষস্য পুত্রাভাবেঽপি সপিণ্ডনং সূচিতম্। কথং সপিণ্ডনাভাবে পিতৃলোকপ্রাপ্তেরভাবাৎ প্রত্যাব্দিকমিত্যাহ প্রতিসংবৎরমিতিবচনাৎ পঞ্চদশভিরেব শ্রাদ্ধৈঃ পিতৃলোকপ্রাপ্তিঃ। যথা পুরোডাশাভ্যামেব সোমযাজিনং যাজয়েদিতি বচনাদাজ্যং বিনা পুরোডাশাভ্যামেব দর্শপৌর্ণমাসধর্ম্মসিদ্ধিঃ। নৃণাং পুংসাং সপিণ্ডনাধিকারিশূন্যানাং যদ্বৎ। লঘুহারীতঃ। পুত্রেণৈব তু কর্ত্তব্যং সপিণ্ডীকরণং স্ত্রিয়াঃ। পুরুষস্য

স্ফুটমভিহিতম্। তথা স্ত্রীণামিতি। অত্র সম্প্রদানে ষষ্ঠী প্রাগেব ব্যাখ্যাতমিতি। কুলদ্বয়েঽপি চোচ্ছন্নে ইতি বিষ্ণুপুরাণবচনব্যাখ্যানেঽসবর্ণা পরিণীতেতি ব্যাখ্যাতমিত্যর্থঃ। অমন্ত্রকমিত্যর্থ ইতি। অত্র। মৃতাহনি তু কর্ত্তব্যমেকোদ্দিষ্টং শৃণুস্ব তৎ। দেবহীনং তথা কার্য্যং তথাচৈকপবিত্রকম্॥ ইত্যাদিনা সমন্ত্রকপুরুষৈকোদ্দিষ্টমভিধায়। সপিণ্ডীকরণং কার্য্যং তস্যাপি বিধিরুচ্যতে। গন্ধোদকতিলৈর্যুক্তং তত্র পাত্রচতুষ্টয়ম্॥ কুর্য্যাৎ পিতৃণামেকন্তু কুর্য্যাৎ প্রেতস্য পুত্রকঃ। পাত্রত্রয়ে প্রেতপাত্রমর্ঘ্যঞ্চৈব প্রষেচয়েৎ। যে সমানা ইতি বদন্ শেষং পূর্ব্ববদাচরেৎ। স্ত্রীণামপ্যেবমেবৈতদেকোদ্দিষ্টমুদাহৃতম্॥ ইতি মার্কণ্ডেয়পুরাণে সমন্ত্রৈকোদ্দিষ্টস্য

পুনস্তন্তে ভ্রাতৃপুত্রাদয়োঽপি যে॥ ভ্রাতৃপুত্রাদয়ঃ। ভ্রাতা বা ভ্রাতৃপুত্রো বা সপিণ্ডঃ শিষ্য এব বা। ইতি লঘুহারীতোক্তাঃ। নমু। যানি পঞ্চদশাদ্যানি অপুত্রস্যেতরাণ্যপি। একস্যৈব তু দাতব্যমপুত্রায়াশ্চ যোষিতঃ॥ ইতি ছন্দোগপরিশিষ্টোক্তবিরোধঃ। উচ্যতে যথা। অপুত্রস্য তু যা পুত্রীতি পত্ন্যভাবে ব্যাখ্যাতম্। যথা। সপিণ্ডীকরণং তাসাং পুত্রাভাবে ন বিদ্যতে। ইতি। পত্ন্যভাবে ব্যাখ্যাস্যতে। তথা। যানি পঞ্চদশাদ্যানি অপুত্রস্যেতরাণ্যপীতি। ভ্রাতৃভ্রাতৃপুত্রাদ্যভাবে ব্যাখ্যাস্যতে তেন পিতৃসমানোদকসগোত্রমাতৃসপিণ্ডসমানোদকাদিভিঃ পঞ্চদশৈব শ্রাদ্ধানি কার্য্যাণি। ন সপিণ্ডনমিতি ন বিরোধঃ। সপিণ্ডনাভাবেঽপি সপিণ্ডনোত্তরশ্রাদ্ধানি কার্য্যাণীত্যাহ ইতরাণ্যপীতি একস্যৈব তু দাতব্যমিতি। একোদ্দিষ্টবিধিনৈব যানি প্রাপ্তানি প্রত্যাব্দিকশ্রাদ্ধানি তান্যেব কার্য্যা-

স্ত্রীণামপ্যতিদেশাৎ। সমন্ত্রকৈকোদ্দিষ্টমেব সবর্ণস্ত্রীণামমন্ত্রকন্তু সর্ব্বস্ত্রীণামেবেতি ব্যবস্থা। অতএব সর্ব্বাভাবে স্ত্রিয় ইত্যনেন সর্ব্বাভাবে অধিকারিণ্যোঽসবর্ণা স্ত্রী রুক্তানুপদমেব স্ত্রীণামপ্যেবমেবৈতদিত্যুক্তম্। ব্যবহারোঽপ্যেবমেব। স্ত্রীমাত্রস্যৈবৈকোদ্দিষ্টমমন্ত্রকমিতি সামান্যাঃ। অনিরুদ্ধভট্টস্তু স্ত্রীসম্প্রদানকশ্রাদ্ধমাত্রমেবামন্ত্রকমিত্যাহ দ্বয়মপি মার্কণ্ডেয়পুরাণদর্শনাৎ। যদপি। স্ত্রীণামমন্ত্রকং শ্রাদ্ধং তথা শূদ্রাসুতস্য চ। প্রাগ্দ্বিজাতের্ব্রাতাদেশাৎ শ্রাদ্ধং কুর্য্যাস্তথৈব হি। ইতি গোবিন্দরাজশঙ্খধরাদিভির্ধৃতং মরীচিবচনং তদপ্যসবর্ণাস্ত্রীবিষয়মেবেতি। বচনাদিতি। অস্মাদেব বচনাদিত্যর্থঃ। এবঞ্চ সপিণ্ডনানধিকারিকৃতপঞ্চদশশ্রাদ্ধানাং প্রেতত্ববিমুক্তিপূর্ব্বকপিতৃত্বপ্রাপ্তিঃ ফলম্। সপি-

ণীত্যর্থঃ। নামাবাস্যাদিশ্রাদ্ধানি ইতরাণীতি ব্যক্তি-ভেদেন বহুবচনং ব্যক্তমপরম্। অন্যে তু ভ্রাতা বা ভ্রাতৃপুত্রো বা সপিণ্ডঃ শিষ্য এব বা। সহ পিণ্ডক্রিয়াং কৃত্বা কুর্য্যাদভ্যুদয়ন্ততঃ॥ ইতি বচনাদপুত্রস্য মৃতস্য কন্যাবিবাহাভ্যুদয়নিমিত্তেন ভ্রাত্রাদিভিঃ সপিণ্ডনং কার্য্যম্। অন্যথা পঞ্চদশশ্রাদ্ধানীতি ব্যবস্থামাহুঃ। তন্ন উক্তপ্রকারেণ ব্যবস্থাবিরোধপরিহারসম্ভবে ভ্রাতৃপুত্রাদীনামধিকারসঙ্কোচে হেত্বভাবাৎ। যচ্চেতরাণ্যপীতি অমাবাস্যাদিশ্রাদ্ধান্যপুত্রস্যৈকোদ্দিষ্টবিধিনা ভ্রাত্রাদিভিঃ কার্য্যাণীতি ব্যাখ্যানং তদসঙ্গতম্। এতস্যৈকোদ্দিষ্টশ্রাদ্ধানুবাদেন ভ্রাত্রাদ্যধিকারমাত্রপ্রতিপাদকত্বাৎ। অন্যথা গৌরবাপত্তেঃ॥ ১৭৫॥

পৈঠীনসিঃ। অপুত্রায়াং মৃতায়াস্তু পতিঃ কুর্য্যাৎ সপিণ্ডতাম্। শ্বশ্র্বাদিভিঃ সহৈবাস্যাঃ সপিণ্ডীকরণং

ণ্ডনাধিকারিকৃতানাঞ্চ পঞ্চদশানাং প্রেতত্বপরিহারমাত্রফলম্। সপিণ্ডনস্য তু প্রেতত্বপরীহারঃ পিতৃত্বপ্রাপ্তিশ্চ ফলমিতি ভাবঃ। পুরোডাশাভ্যামেবেতি। দর্শপৌর্ণমাসে আগ্নেয়োষ্টাকপালাগ্নীসোমীয়ৈকাদশকপালৌ দ্বৌ পুরোডাশসাধ্যৌ ইতরাশ্চোপাংশুপ্রভৃতয়শ্চত্বারঃ সন্নায্যসাধ্যাঃ। তত্র পুরোডাশাভ্যামেব ইত্যেবকারাৎ সন্নায্যং বিনাপি কেবলপুরোডাশাভ্যাং যথা দর্শপৌর্ণমাসফলসিদ্ধিরিত্যর্থঃ। পুত্রেণৈব ত্বিতি এবকারঃ পতিভিন্নব্যাবৃত্ত্যর্থঃ॥ ১৭৫॥

অপুত্রায়াং মৃতায়াং ত্বিতি বক্ষ্যমাণবচনাৎ অতোবালদেশান্তরস্থপুত্রসদ্ভাবেঽপ্যন্যেন কার্য্যম্। অত্র মৈথিলাঃ। বহ্বীনামেকপত্নীনা-

ভবেৎ॥ ব্যাখ্যাতার্থমিদম্। এতেন যঃ পুত্রাভাবে সপিণ্ডীকরণনিষেধ উক্তঃ স পত্যভাবে বোদ্ধব্যঃ। সপিণ্ডীকরণাদূর্দ্ধং পুত্রৈরপি মৃতাহব্যতিরেকেণ যোষিতাং শ্রাদ্ধং ন দেয়মিত্যাহ। ছন্দোগপরিশিষ্টে কাত্যায়নঃ। ন যোষিদ্ভ্যঃ পৃথগ্দদ্যাদবসানদিনাদৃতে। স্বভর্ত্তৃপিণ্ডমাত্রাভ্যস্তৃপ্তিরাসাং যতঃ স্মৃতা॥ প্রাগেব ব্যাখ্যাতার্থং ছন্দোগবিষয়ঞ্চেদং বক্ষ্যমাণশঙ্খবচনে মৃতাহব্যতিরেকেণাপি মাতৃশ্রাদ্ধবিধানাৎ। যথা শঙ্খঃ। পিত্রাদিত্রয়পত্নীষু ভোজ্যা মাতঃ প্রতি দ্বিজাঃ। স্ত্রীণামেব তু তদন্যস্মান্মাতৃশ্রাদ্ধমিহোচ্যতে॥ অন্বষ্টকা তথা মাতৃশ্রাদ্ধঞ্চৈব মৃতাহনি। একোদ্দিষ্টং সদা মুক্ত্বা ত্রিষু নান্যৎ পৃথগ্ভবেৎ॥ বৃদ্ধিশ্রাদ্ধে মাতৃঃ প্রতি দ্বিজা ভোজ্যা ইতি যদ্বিহিতং তৎ পিত্রাদিত্রয়পত্নীষ্বিতি বোদ্ধব্যম্। যতঃ

মেকা চেৎ পুত্রিণী ভবেৎ। সর্ব্বাস্তাস্তেন পুত্রেণ প্রাহ পুত্রবতীর্মনুঃ॥ ইত্যনেন পুত্রত্বমতিদিশ্য পুত্রকার্য্যাবিবাদাৎ। সপিণ্ডনস্য চ পুত্রকার্য্যত্বাৎ সপত্নীপুত্রাণামপি স্ত্রীণাং সপিণ্ডনং কার্য্যমিত্যাহুঃ। পুত্রেণৈবেত্যত্র পুত্রপদং মুখ্যপুত্রপরমেব। অবশিষ্টপুত্রসাধারণপুত্রপরত্বে পুংসাং ভ্রাতৃপুত্রেঽপি পুত্রত্বাতিদেশাৎ উত্তরার্দ্ধে ভ্রাতৃপুত্রেঽন্যত্রোক্তেঽনুপপত্তেরিতি স্মার্ত্তাঃ। ততশ্চ পতিদুহিত্রাদ্যোঃ সত্ত্বে দুহিতৃদৌহিত্রসপত্নীপুত্রৈঃ পঞ্চদশশ্রাদ্ধেষু কৃতেষু পতিঃ সপিণ্ডনং কুর্য্যাৎ ষোড়শশ্রাদ্ধানামেকাধিকারিকত্বনিয়মতোঽস্য প্রাগেবাভিহিতত্বাদিতি বোধ্যম্। আদিপদগ্রাহ্যান্ বিবৃণোতি ভ্রাতৃপুত্রাদয়স্ত্বিতি। অত্র চাবিশেষাৎ সপিণ্ডপদেন স্ত্রীপুংসোগ্রহণাৎ অদত্তদুহিতৃপত্নীস্নুষাদীনাং পুংসঃ সপিণ্ডনাধিকারঃ। তেন সমানোদকদত্তদুহিত্রাদীনাং ন সপিণ্ডনাধিকারঃ।

স্ত্রীণামেব তচ্ছ্রাদ্ধমতো মাতৃশ্রাদ্ধমুচ্যতে। অন্বষ্টকা মাতৃ-শ্রাদ্ধং মৃতাহে একোদ্দিষ্টম্ এতেষু ত্রিষু কালেষু শ্রাদ্ধং মুক্ত্বা নান্যৎ স্ত্রীণাং পৃথক্ শ্রাদ্ধং ভবেৎ। অন্বষ্টকা-শ্রাদ্ধং স্ত্রীণামিত্যাহ বিষ্ণুঃ। অষ্টকাসু দৈবপূর্ব্বং শাক-মাংসাপূপৈঃ শ্রাদ্ধং কৃত্বান্বষ্টকাস্বষ্টকাবদগ্নৌ হুত্বা দৈব-পূর্ব্বমেব মাত্রে পিতামহ্যৈ প্রপিতামহ্যৈ চ পূর্ব্ববৎ ব্রাহ্মণান্ ভোজয়িত্বা দক্ষিণাভিশ্চাভ্যর্চ্চ্যানুব্রজ্য বিস-র্জ্জয়েৎ। ততঃ ষট্ কর্ষূঃ কুর্য্যাৎ। তন্মূলে চ প্রাগুদ-গ্ন্যুপসমাধানং কৃত্বা হুত্বা চ পিণ্ডত্রয়নির্ব্বপণং প্রত্যেক-মেকৈকস্মিন্ কর্ষূমূলে কুর্য্যাৎ। কর্ষূত্রয়ং পুরুষাণাং কর্ষূ-ত্রয়ং স্ত্রীণাং পুরুষকর্ষূত্রয়ং সাম্নোদকেন পূরয়েৎ। স্ত্রী

---

অত্র কেচিৎ দৌহিত্রস্যোত্তরক্রিয়ায়ামধিকারাৎ সপিণ্ডনেঽপ্যধিকার-মাহুঃ। তন্ন লঘুহারীতেনৈবকারাৎ ভ্রাত্রাদিভ্যোঽন্যেষাং পর্য্যুদস্তত্বাৎ। ন চ সপিণ্ডনাধিকারিণ এব উত্তরক্রিয়াধিকারিনিয়মঃ। স্ত্রিয়াশ্চ সপিণ্ডনানধিকারিণোঽপি দুহিতৃদৌহিত্রাদেরুত্তরক্রিয়ায়ামধিকারাৎ। ছন্দোগপরিশিষ্টবিরোধ ইতি। পুত্রাভাব এব পঞ্চদশশ্রাদ্ধোক্ত্যা সপিণ্ডননিষেধাৎ বিরোধ ইত্যর্থঃ। ভ্রাতৃপুত্রাভাবে ব্যাখ্যেয়মিতি সপিণ্ডনকার্য্যাভাবে ব্যাখ্যেয়মিত্যর্থঃ। সাংবৎসরিকস্যৈকত্বাদ্বহু-বচনানুপপত্তেরাহ ব্যক্তিভেদেনেতি। ন চ তর্হি অপুত্রস্য কন্যাপুত্রবৃদ্ধৌ বৃদ্ধিশ্রাদ্ধাকরণপ্রসঙ্গঃ। তত্র বৃদ্ধিশ্রাদ্ধস্য কর্ম্মাঙ্গত্বেন তদিতরশ্রাদ্ধ-স্যৈব একস্যৈবেত্যেবকারেণ পর্য্যুদাসাৎ অন্যথা কর্ম্মবৈগুণ্যপ্রসঙ্গাৎ অতঃ সপিণ্ডনানধিকারেণাপি বৃদ্ধিশ্রাদ্ধং কর্ত্তব্যমেবেতি। শ্রাদ্ধচিন্তা-মণিমতমপ্যেতৎ। অন্যথা গৌরবাপত্তেরিতি ভ্রাত্রাদীনামমাবাস্যাদি-নিমিত্তেনৈকোদ্দিষ্টতদ্বিধিকল্পনাগৌরাবপত্তেরিত্যর্থঃ। মন্মতে তু প্রাপ্তৈ-কোদ্দিষ্টমনূদ্য ভ্রাত্রাদেরধিকারমাত্র কল্পনমিতি লাঘবমিতি ভাবঃ।

কর্ষূত্রয়ং সান্নেন পয়সা দধ্না মাংসেন প্রত্যেকং কর্ষূত্রয়ং পূরয়িত্বা জপেৎ। ভবতীভ্যোঽস্তু চাক্ষয়ং শাকমাংসাপূপৈর্যথাক্রমমিত্যর্থঃ। পুরুষকর্ষূত্রয়মিতি করণাৎ পিতৄণামপ্যত্র শ্রাদ্ধম্। অন্বষ্টকা পিতৄণাঞ্চ নিত্যমেব বিধীয়তে। ইতি বচনাচ্চ। মাতামহানামপ্যত্র শ্রাদ্ধম্। পিতরো যত্র পূজ্যন্তে তত্র মাতামহাধ্রুবমিতি। সামান্যতঃ প্রাপ্তত্বাৎ। কর্ষূসমন্বিতং মুক্তে্বতি বচনেন ষট্পিণ্ডদাননিষেধাচ্চ। অত্রাপি ছন্দোগৈর্ম্মাতৃশ্রাদ্ধং ন কার্য্যং ছন্দোগপরিশিষ্টবিরোধাৎ। মাতামহশ্রাদ্ধঞ্চ ন কার্য্যং ষট্পিণ্ডদাননিষেধাৎ কিন্তু ত্রৈপুরুষিকম্। অগ্নিসাধ্যত্বান্নাত্র নিরগ্নেরধিকার ইতি জিকনঃ। তদসঙ্গতম্। অগ্ন্যভাবে বিপ্রপাণ্যাদৌ পার্ব্বণে হোমবিধানাৎ। তদ্ধর্ম্মগ্রাহিত্বাদত্রাপি সাগ্নের্নিয়মঃ। কিঞ্চ এতচ্চানুপনীতোঽপীতি মৎস্যপু-

পুত্রৈরপীত্যপিনা পৌত্রাদিপরিগ্রহঃ। ন যোষিদভ্য ইতি সপিণ্ডীকরণোত্তরশ্রাদ্ধবিষয়কৈতদ্বচনম্। তেন নৈকাদশাহাদিশ্রাদ্ধপর্য্যুদাসঃ। ছন্দোগবিষয়কঞ্চেদমিতি। ন চৈবং মাতুঃ সপিণ্ডীকরণে ছন্দোগানাং কথং পিতামহ্যাদিশ্রাদ্ধমিতি বাচ্যম্। ছন্দোগপরিশিষ্টেনৈব বিশেষ্য তদভিধানাৎ। যথা। মাতুঃ সপিণ্ডীকরণং পিতামহ্যা সহোদিতমিতি কেচিৎ। কিঞ্চ বিষ্ণুপতিতশ্রাদ্ধানুপপত্ত্যাঽবসানদিনপদমবসানদিননিমিত্তকশ্রাদ্ধপরমবশ্যং বাচ্যং তথাচ সপিণ্ডীকরণস্যাপ্যবসানদিননিমিত্তকত্বাৎ ন তত্র পিতামহ্যাদিশ্রাদ্ধপর্য্যুদাস ইতি।

† পিত্রাদিত্রয়পত্নীষ্বিতি সপ্তমী দ্বিতীয়ার্থে তেন পিত্রাদিত্রয়পত্নীঃ মাতুঃ প্রতিদ্বিজা ভোজ্যা ইত্যর্থঃ। পিত্রাদিত্রয়পত্নীস্ত্বিত্যেব পাঠঃ শ্রীদত্তসম্মতঃ। গ্রন্থকৃতা পুনরন্যথা ব্যাখ্যা স্যাৎ। অস্তু চাক্ষয়মিত্যস্তং বিষ্ণু-

রাণে সর্ব্ববর্ণগোচরত্বেনানুপনীতশূদ্রাণামধিকারপ্রতি-পাদনাৎ। কথমনগ্নেরনধিকারঃ। অতঃ শূদ্রস্যাপ্যধি-কার ইতি সিদ্ধম্‌ ॥ ১৭৬ ॥

অথ বৃদ্ধিশ্রাদ্ধম্‌। বিষ্ণুপুরাণে। কন্যাপুত্রবিবাহেষু প্রবেশে নববেশ্মনঃ। নামকর্ম্মণি বালানাং চূড়াকর্ম্মাদিকে তথা ॥ সীমন্তোন্নয়নে চৈব পুত্রাদিমুখদর্শনে। নান্দীমুখং পিতৃগণং পূজয়েৎ প্রয়তো গৃহী ॥ যুগ্মাংস্তু প্রাঙ্মুখান্‌ বিপ্রান্‌ ভোজয়েৎ মনুজেশ্বর ॥ চূড়াকর্ম্মাদিক ইত্যাদিশব্দাৎ উপনয়নাদীনাং গ্রহণম্‌। সীমন্তোন্নয়নে চেতি চকারাৎ গর্ভাধানপুংসবনাদীনাং গ্রহণম্‌।

স্থত্রং যথাক্রমমিত্যর্থঃ। কর্ষূসমন্বিতমিতি কর্ষূপলক্ষিতমন্বষ্টকাশ্রাদ্ধ-মিত্যর্থঃ। ষট্‌পিণ্ডদাননিষেধাচ্চেতি তত্র মাতামহানাং শ্রাদ্ধাকরণাৎ মাত্রাদিত্রিকপিত্রাদিত্রিকয়োঃ ষট্‌পিণ্ডদানপ্রশক্ত্যা নিষেধঃ স্যাদিতি ভাবঃ ॥ ১৭৬ ॥

অথ বৃদ্ধিশ্রাদ্ধম্‌॥ বৃদ্ধিশ্রাদ্ধবিধায়কবাক্যমাহ কন্যাপুত্রবিবাহেষ্বিতি। নানিষ্ট্বা তু পিতৄন্‌ শ্রাদ্ধৈঃ কর্ম্ম বৈদিকমারভেদিত্যনেন বিবাহাদাবপি-প্রাপ্তং শ্রাদ্ধমনূদ্য বিবাহাদিকন্যাপুত্রসংস্কারকর্ম্মসু তত্র পিতুরধিকার-মাত্রবিধায়কমিদং বচনং ন তু পিতৃকর্ত্তৃকশ্রাদ্ধান্তরবিধিঃ গৌরবাৎ। ইত্থঞ্চ। নানিষ্ট্বা তু পিতৄনিত্যত্র ক্ত্বাপদমানন্তর্য্যমাত্রপরং ন তু সমান-কর্ত্তৃকত্বপরমপি অতএব কর্ম্মাদিষু চ সর্ব্বেষ্বিতি বক্ষ্যমাণবচনে প্রাক্‌-কর্ত্তব্যতামাত্রমুক্তং ন তু সমান কর্ত্তৃকত্বমপি। ইত্থঞ্চ। কর্ম্মাদিষু চ সর্ব্বে-ষ্বিতি সামান্যবিধিবলাৎ প্রাপ্তং বিবাহকর্ত্তৃকত্বং শ্রাদ্ধং বিশেষবচনেন বাধ্যতে তেন বাধকস্য পিতুরসত্ত্বে বিদেশস্থত্বে বা পিতৃব্যাদিসত্ত্বেঽপি বিবাহকর্ত্তুঃ পুত্রস্যৈব শ্রাদ্ধাধিকারঃ সামান্যবিধিবলাৎ কন্যাবিবাহে তু দাতুরেব তেনৈব সামান্যবিধিনাপ্রাপ্তত্বাৎ। অয়ঞ্চ পিত্রধিকারঃ পুত্রস্য

পুত্রাদিমুখদর্শনে পুত্রস্যাদিমুখদর্শনে ইত্যর্থঃ। ন ত্বাদি-শব্দাৎ পৌত্রপ্রপৌত্রাণাং গ্রহণমিতি হলায়ুধব্যাখ্যানং যুক্তম্। মুখদর্শনারম্ভো শ্রাদ্ধারম্ভপ্রসঙ্গাৎ বিবাহবৎ ব্যক্তমপরম্। অত্র বিবাহাদের্ভাবিনো নিমিত্তত্বম্। নানিষ্ট্বা তু পিতৄন্ শ্রাদ্ধৈঃ কর্ম্মবৈদিকমারভেদিতি। শাতাতপবচনাৎ। অত্রৈকে বৈদিকগ্রহণাৎ পুত্রমুখদর্শনগৃহপ্রবেশনয়োঃ রাগপ্রাপ্তত্বেনাবৈদিকত্বান্ন ভাবিনোর্নিমিত্তত্বং কিন্তুভয়োঃ প্রাক্ সত এব নিমিত্তত্বাৎ বিবাহাদৌ বচনাদগত্যা ভাবিনো নিমিত্তমুপচারাৎ। তচ্চিন্ত্যম্।

বিবাহ এব স্বপিতৃভ্যঃ পিতা দদ্যাৎ সুতসংস্কারকর্ম্মস্বিতি বচনাৎ তস্যৈব চ সংস্কারকর্ম্মত্বাৎ দ্বিতীয়বিবাহস্য তু ন সংস্কারকর্ম্মত্বং সংস্কারবতি-বিরোধেন তাদৃশসংস্কারান্তরাজনকত্বাৎ কিন্তু দ্বিতীয়বিবাহস্যাপি বৈদিককর্ম্মতয়া নানিষ্ট্বা তু পিতৄন্ শ্রাদ্ধৈরিতি বচনাৎ বিবাহকর্ত্রা স্বয়-মেব বৃদ্ধিশ্রাদ্ধং কর্ত্তব্যমিতি। নামকর্ম্মণীতি অত্র নামকর্ম্মণীত্যনন্তরং চূড়াকর্ম্মাদিকে ইত্যনন্তরমাদিপদোপাদানাৎ মধ্যয়োর্নিষ্ক্রমণান্নপ্রাশ-নয়োর্ন বৃদ্ধিশ্রাদ্ধমিতি মিশ্রাঃ। তন্ন। সর্ব্বাস্বেবান্বাহার্য্যবস্তীতি গোভি-লেন তয়োরপি শ্রাদ্ধপ্রাপ্তেঃ। অতএব স্বপিতৃভ্যঃ পিতা দদ্যাৎ সুত-সংস্কারকর্ম্মস্বিতি সংস্কারমাত্র এব শ্রাদ্ধমুক্তম্। অতঃ স্বরসমাত্রস্যা-কিঞ্চিৎকরত্বেনাদিপদস্য প্রকারমাত্রবাচিত্বাৎ। অতএব সর্ব্বমৈথিল মূর্দ্ধন্যেন চণ্ডেশ্বরেণ ধৃতং রাজমার্ত্তণ্ডবচনম্। সুতোৎপত্তৌ তথা শ্রাদ্ধমন্নপ্রাশনিকে তথা। চূড়াকার্য্যে ব্রতে চৈব নাম্নি পুংসবনে তথে-ত্যাদি। শৌনকবচনঞ্চ। কৃত্বাভ্যুদয়িকং শ্রাদ্ধং দধিমধ্বাজ্যদ্রব্যকম্। অন্নঞ্চপ্রাশয়েদন্নপাত্র ইত্যভিমন্ত্রিতমিতি। উপনয়নাদীনামিতি আদি-পদেন নিষ্ক্রমণান্নপ্রাশনবেদারম্ভসমাবর্ত্তনানাং গ্রহণম্। অথান্নপ্রাশ-

নরকনিস্তারকারণত্বাবগতে রাগপ্রাপ্তমুখদর্শনস্যাপি নিয়মবিধের্ব্বৈদিকত্বাৎ। যথা বৃহস্পতিঃ। পুন্নাম্নো নরকাদ্ যস্মাত্ত্রায়তে পিতরং সুতঃ। মুখসন্দর্শনেনাপি তদুৎপত্তৌ

নস্য গোভিলগৃহ্যানুক্তত্বাৎ কথং সামগানামন্নপ্রাশনপ্রাপ্তিঃ কথং বা তত্র তেষাং শ্রাদ্ধপ্রাপ্তিরিতি চেৎ। অন্নপ্রাশনস্য পারস্করোক্তত্বেন পরোক্তমবিরোধি চেতি বচনাত্তেষামপ্যন্নপ্রাশনপ্রাপ্তির্বৈদিককর্ম্মত্বেন লিখিতরাজমার্ত্তণ্ডশৌনকবচনাভ্যাঞ্চ তত্র শ্রাদ্ধস্যাপি প্রাপ্তিরিতি। অতএব ভোজনস্য রাগপ্রাপ্তত্বাৎ লৌকিকত্বেনালৌকিকং লৌকিকেনাঙ্গমিতি তন্ত্রসূত্রবিরোধাৎ শ্রাদ্ধস্য তদঙ্গত্বাভাবেন নৈমিত্তিকমেব তত্র শ্রাদ্ধং নৈমিত্তিকস্য চ নিমিত্তোত্তরভাবিত্বাৎ অন্নপ্রাশনাৎ পশ্চাদেব শ্রাদ্ধমিতি ভ্রমোঽপি নিরস্তঃ। শৌনকবচনে প্রাক্ কর্ত্তব্যতোক্তেঃ বক্ষ্যতে চৈতদ্গ্রন্থকৃতৈব। প্রতিষ্ঠাদীনাং গৃহ্যানুক্তত্বেঽপি কূর্ম্মপুরাণবচনাদেব তৎশ্রাদ্ধপ্রাপ্তিঃ। যথা। অন্নপ্রাশে চ সীমন্তে পুত্ত্রোৎপত্তিনিমিত্তকঃ। পুংসবনে নিষেকে চ নববেশ্মপ্রবেশনে। সেতুবৃক্ষজলাদীনাং প্রতিষ্ঠাসু বিশেষতঃ। তীর্থযাত্রা বৃষোৎসর্গে বৃদ্ধিশ্রাদ্ধং বিধীয়তে। ইতি। পুংসবনাদীনামিত্যাদিনা প্রতিষ্ঠাদীনাং গ্রহণম্। নিষেককালে সোমে চ সীমন্তোন্নয়নে তথা। জ্ঞেয়ং পুংসবনে চৈব শ্রাদ্ধং কর্ম্মাঙ্গমিষ্যতে। ইত্যেকবাক্যত্বাদিতি ভাবঃ। নিষেকোগর্ভাধানম্। অত্র স্মার্ত্তাঃ। নিষেককাল ইতি সামগেতরপরম্। বিবাহাদিঃ কর্ম্মগণোয উক্তোগর্ভাধানং শুশ্রুম যস্য চান্তে। বিবাহাদাবেকমেবাত্র শ্রাদ্ধং নাদৌকর্ম্মণঃ কর্ম্মণঃ স্যাদিতি। ছন্দোগপরিশিষ্টবিরোধাৎ। অন্তশব্দস্যাবয়ববাচিত্বেন তৎশ্রাদ্ধনিষেধাদতঃ সামগানাং গর্ভাধানে শ্রাদ্ধং নাস্তীত্যাহুঃ। তদসৎ দশাহান্তে পুনঃ ক্রিয়েতিবৎ অন্তশব্দস্য সমীপার্থতয়োপপত্তৌ নিষেককাল ইত্যস্য সঙ্কোচে যুক্ত্যভাবাৎ তস্মাৎ সর্ব্বৈরেব গর্ভাধানে শ্রাদ্ধং কার্য্যমিতি গ্রন্থকৃতা সামান্যেন উক্তমেব সাধীয়ঃ। মিশ্রোঽপ্যেবমেবাহ বিবাহবদিতি বিবাহাবৃত্তৌ শ্রাদ্ধাবৃত্তিবদিত্যর্থঃ। বৈদিকমিতি বেদপ্রমাণমাত্রগম্যমি-

যতেত সঃ॥ অতএব পুত্রমুখদর্শনানুষ্ঠাননিয়মো দৃশ্যতে। রাগতোঽপি নিয়মাসম্ভবাৎ গৃহপ্রবেশনস্য তু বিশেষ-খ্যাপকপ্রমাণাভাবাদ্রবিসংক্রান্তিবৎ দ্বিধৈব নিমিত্তত্বং ন

---

ত্যর্থঃ। অনিষ্ট্বা নারভেৎ ইষ্ট্বা বারভেদিত্যর্থঃ। ন চাস্য বচনস্য বৈদিক-কর্ম্মসামান্যে শ্রাদ্ধবিধায়কতাদ্গাঙ্গাস্নানদুর্গোৎসবাদাবপি শ্রাদ্ধং স্যাদিতি বাচ্যম্। কন্যাপুত্রবিবাহেম্বিতি বিষ্ণুপুরাণাৎ প্রতিষ্ঠাদৌ লিখিতবচনাদি-তশ্চ যত্র যত্র বৈদিককর্ম্মণি শ্রাদ্ধং প্রাপ্তং তত্র তত্র তৎপ্রাক্ কর্ত্তব্যতা-মাত্রবিধায়কত্বাৎ এতদ্বচনস্য লাঘবাৎ। ন চৈবম্। নাষ্টকাসু ভবেৎশ্রাদ্ধং ন শ্রাদ্ধে শ্রাদ্ধমিষ্যতে। ইতি নিষেধোঽনুপপন্নঃ সামান্যবিধ্যভাবেন তত্র শ্রাদ্ধপ্রশক্ত্যভাবাদিতি চেন্ন। সর্ব্বাণ্যেবান্বাহার্য্যবন্তীতি। গোভি-লেন স্বোক্তকর্ম্মসামান্য এবান্বাহার্য্যশ্রাদ্ধস্যোক্তত্বাৎ। তন্মধ্যে চাষ্ট-কাদেরপি পঠিতত্বাৎ শ্রাদ্ধপ্রশক্ত্যা নিষেধোপপত্তেঃ। অন্বাহার্য্যমুক্তং গৃহ্যপরিশিষ্টে। যচ্ছ্রাদ্ধং কর্ম্মণামাদৌ যাচান্তে দক্ষিণা ভবেৎ। অমা-বাস্যাং দ্বিতীয়ং যদন্বাহার্য্যং বিদুর্ব্বুধা ইতি। আধুনিকাস্তু বৈদিকপদং বচনৈকবাক্যতয়া গৃহ্যোক্তকর্ম্মপরমিত্যাহুঃ। তন্মন্দং গৃহ্যোক্তে চ যত্র যজ্ঞপ্রতিষ্ঠাদৌ পরতঃ শ্রাদ্ধস্য কর্ত্তব্যত্বাপত্তেঃ। যজ্ঞপ্রতিষ্ঠাদিষু শ্রাদ্ধ-প্রাপ্তিস্তু যজ্ঞোদ্বাহাদিমঙ্গলে ইতি মৎস্যপুরাণবচনাৎ। স্নানসন্ধ্যয়োর্নি-ষেধাভাবো ন শ্রাদ্ধাধিকারসম্পাদকতয়াঽনবস্থাপত্ত্যা ন তত্র শ্রাদ্ধাঙ্গম্। স্নাতোঽধিকারী ভবতীতি অনর্হঃ কর্ম্মণাং বিপ্রঃ সন্ধ্যাহীনো যতঃ স্মৃত ইত্যাদিবচনাৎ। কাম্যস্নানস্য গৃহ্যানুক্তত্বাৎ বচনান্তরাভাবাচ্চ ন তত্র শ্রাদ্ধম্। এবমাচমনেঽপ্যধিকাররূপে আচান্তোদকেন কৃত্যমিতি গোভিল গৃহ্যোক্তেঽপি ন শ্রাদ্ধমনবস্থাপাতাদিতি। অত্রৈকে ইতি নারা-য়ণোপাধ্যায়া ইত্যর্থঃ। নরকনিস্তারেতি নরকনিস্তারকারণত্বাৎ পুত্র-মুখমবশ্যং পশ্যেদিতি নিয়মবিধিঃ। মুখদর্শনস্য রাগপ্রাপ্তত্বেঽপি গর্ভাধানবদাবশ্যকত্ববিধের্বৈদিকত্বমিতিভাবঃ। নরকনিস্তারকত্বে প্রমাণ-মাহ দদাতেতি তথাচ মুখদর্শনাৎ প্রাগেব শ্রাদ্ধমিতি ভাবঃ। বস্তু-

হি গৃহপ্রবেশনক্রিয়ায়াঃ পরমার্থতো নিমিত্তত্বং লাক্ষণিক-ত্বেন শ্রাদ্ধকালে তদসম্ভবাৎ ॥ ১৭৭ ॥

কিন্তু তদ্বৃদ্ধের্নিমিত্তত্বাদৌপচারিকম্। তচ্চ ভাবি-নোঽপি সমানং নান্দীমুখং পিতৃগণমিত্যনেন নান্দীমুখ-বিশেষণবতঃ পিত্রাদের্দ্দেবতাত্বং মাত্রাদীনামপি তথৈব দেবতাত্বমাহ ব্রহ্মপুরাণম্। প্রপিতামহসংজ্ঞাশ্চ নান্দী-মুখ্যশ্চ মাতৃণাং। মাতামহেভ্যশ্চ তথা নান্দীবক্তে্ভ্য এব চ ॥ নান্দীমুখপদস্য চ পিতৃপদাৎ পূর্ব্বং প্রয়োগ-নিয়মঃ। ভ্যঃ পিতৃলকাত্যায়নৌ। নান্দীমুখান্ পিতনা- স্তামিতি কাত

ভ্যস্তদনু শ্রাদ্ধদান

তস্য মুখ স্বজনকাদীনাং বচনাৎ তথাহি। জাতে পুত্রে পিতুঃ স্নানং সচেলন্তু বিধীয়তে। জাতকর্ম্ম ততঃ কুর্য্যাৎ শ্রাদ্ধমভ্যুদয়াত্মকমিতি। বিষ্ণুপুরাণে স্নানানন্তরশ্রাদ্ধমুক্তম্। স্নানন্তু মুখদর্শনানন্তরম্। যথা ব্রাহ্মে। সুতকে তু মুখং দৃষ্ট্বা জাতস্য জনকস্ততঃ। কৃত্বা সচেলং স্নানন্তু শুদ্ধো ভবতি তৎক্ষণাদিতি। ব্যবহারোঽপ্যেবম্। ননু নিমিত্তত্বং কারণত্বং তচ্চ প্রাক্ সত এব তৎ কথং ভাবিনো গৃহপ্রবেশস্য নিমিত্তত্বমত আহ ন হীতি ॥ ১৭৭ ॥

ঔপচারিকমিতি। নিমিত্তীভূতবৃদ্ধিবিষয়তয়া গৃহপ্রবেশেঽপি নিমি-ত্তত্বং ভাক্তমিত্যর্থঃ। তত্রেদং বোধ্যং সংক্রান্তৌ বাচনিকমেব পূর্ব্বাপর-কালগ্রহণং ইহ তু ন তথা প্রত্যুতপ্রবেশে নববেশ্মন ইতি বাক্যে ন প্রবেশস্যৈব নিমিত্তত্বমুক্তম্। সপ্তমী তিমিত্তায়ামিতিসূত্রাৎ তচ্চ নিমি-ত্তত্বং গৃহপ্রবেশস্য বৃত্তস্যৈবোপপদ্যতে ইতি তদন্যথানুপপত্ত্যা নিশ্চ-য়োদ্বারত্বেন কল্প্যতে ন তু প্রবেশপদতন্নিশ্চয়ে লক্ষণা প্রমাণাভাবাৎ। অতো গৃহপ্রবেশানন্তরমেব শ্রাদ্ধমুক্তম্। অতএব মদনপারিজাত-ধৃতং বচনমপি। নবং গৃহং প্রবিশ্যৈবং তন্মধ্যে পূজয়েচ্ছিবম্। বৃদ্ধিশ্রাদ্ধং

বাহয়িষ্যে ইতি পৃচ্ছতি । নান্দীমুখাঃ পিতরঃ পিতামহাঃ প্রপিতামহাশ্চ প্রীয়ন্তামিত্যক্ষয্যস্থানে ইত্যাদি প্রাঙ্মুখা- নিতি ছ:ন্দাগব্যতিরিক্তবিষয়মিতি বক্ষ্যতে । নিনিত্তান্তর- মিতি বক্ষ্যতে। নিমিত্তান্তরমুক্তং মৎস্যপুরাণে। উৎসবা- নন্দসন্তানে যজ্ঞোদ্বাহাদিমঙ্গলে । মাতরঃ প্রথমং পূজ্যাঃ পিতরস্তদনন্তরম্ ॥ ততো মাতামহা রাজন্ বিশ্বেদেবাস্ত- থৈব চ। উৎসবঃ পুত্রজন্ম । আনন্দঃ পুং ত্রনাদিঃ । যজ্ঞো জ্যোতিষ্টোমাদিঃ। মাতরঃ প্রথমমিদি নাষ্টতাং পিত্রাদি- শ্রাদ্ধাগ্রতঃ শ্রাদ্ধং কর্ত্তব্যম্ । বিশ্বেদানঃ সামানি । ন ক্রম- পরং মাতৃশ্রাদ্ধং ছন্দোগব্যতিরিক্ত বান্বাহার্য্যবত্তীতি । ক্রম্ । ব্রহ্মপুরাণে। পিতা পিতামহশ্চৈ ন্যাক্তত্বাৎ । তন্মধ্যে মিতঃ ।

ধাপপঙ্ক্তেঃ । অন্বাহা

ততঃ কৃত্বা ব্রাহ্মণানপি তর্পয়েদিতি। নান্দীমুখ শ্রাদ্ধবৎ ইতি ন তু প্রেতশ্রাদ্ধবৎ সম্বন্ধার্থকপিত্রাদিপদস্থানে নান্দীমুখপদমিতি ভাবঃ । অত্র আগন্তুকানামন্তে নিবেশ ইতি ন্যায়াৎ পিতৃপদাৎ পরং নান্দীমুখ- পদমিতি মৈথিলমতম্। তদসৎ । স্বধাবতি পদস্থানে পুষ্টিশব্দো বদেদিতি। পিতৄনিতি পদাৎ পূর্ব্বং বদেন্নান্দীমুখানিতি । মিশ্রাদিলিখিতবচনবিরো- ধাৎ । মাতামহেভ্য ইতিবহুবচনাৎ মাতামহাদিভ্য ইত্যর্থঃ। প্রাঙ্মুখা- নীতি বিষ্ণুপুরাণে প্রাঙ্‌মুখানিত্যর্থঃ। উদ্বাহাদীত্যাদিপদান্নামকরণনিষ্ক্র- মনাদীনাং গ্রহণম্ । বিশ্বেদেবাস্তথৈব চেতি ইদন্তু ন ক্রমবিধায়কং প্রদদ্যাদ্দৈবপূর্ব্বকমিতি বক্ষ্যমাণশাতাতপবচনাৎ কিন্তু বিশ্বেদেব- শ্রাদ্ধমাত্রবোধকম্। পুংসবনাদীত্যাদিপদাৎ গর্ভাধান সীমন্তোন্নয়নয়ো- র্গ্রহণম্। মিশ্রৈস্তু উৎসবানন্দহেতৌ সন্তানপুত্রোৎপত্ত্যাদাবিতি ব্যাখ্যা- তম্ । প্রাগেবোক্তমিতি ছন্দোগানাং অবসানদিনাতিরিক্তে মাতৃ- শ্রাদ্ধাভাবস্য প্রাগুক্তত্বাদিতি ভাবঃ। অত্র ব্রাহ্মণোপবেশনক্রমস্তু- নির্ণয়ামৃতলিখিতভবিষ্যপুরণাৎ জ্ঞেয়ঃ । যথা। সর্ব্বাদৌ দক্ষিণে দেবা

ত্রয়ো হ্যশ্রুমুখাশ্চৈতে পিতরঃ পরিকীর্ত্তিতাঃ॥ তেভ্যঃ পূর্ব্বতরা যে চ প্রজাবন্তঃ সুখৈষিতাঃ। তে তু নান্দীমুখা নান্দী সমৃদ্ধিরিতি কথ্যতে॥ কর্ম্মণ্যথাভ্যুদয়িকে মঙ্গল্যবতি শোভনে। জন্মন্যথোপনয়নে বিবাহে পুত্রকস্য চ। পিতৄন্নান্দীমুখান্নাম তর্পয়েদ্বিধিপূর্ব্বকম্॥ অত্র কশ্চিৎ তেভ্যঃ পূর্ব্বতরা ইত্যনেন পিতামহপুত্রাদিত্রিকস্য নান্দীমুখসংজ্ঞাবিধানং বৃদ্ধিশ্রাদ্ধে দেবতাত্বপ্রদর্শনার্থম্। নন্নু নান্দীমুখাঃ পিতরঃ পিতামহাঃ প্রপিতামহাশ্চ প্রীয়ন্তাং নান্দীমুখেভ্যঃ পিতৃভ্যঃ পিতামহেভ্যঃ প্রপিতামহেভ্যশ্চ প্রীয়ন্তামিতি কাত্যায়নগোভিলয়োর্দ্দর্শনাৎ। ষড্‌ভ্যঃ পিতৃভ্যস্তদনু শ্রাদ্ধদানমুপক্রমেদিতি। ছন্দোগপরিশিষ্টদর্শনাচ্চ স্বজনকাদীনাং দেবতাত্বে সিদ্ধে প্রপিতামহপিত্রাদিত্রিকস্য নান্দীমুখসংজ্ঞাভিধানমমাবাস্যায়াং পিতরঃ

মাতৄণাঞ্চ তদুত্তরে। পিত্রাদীনামুদক্ তস্মাৎ ততো মাতামহদ্বিজাঃ। ইতি। অত্র দক্ষিণশব্দঃ পশ্চিমদিশ্যেব দক্ষিণদিগ্‌ভাগপরঃ উত্তরবাক্যে তদুত্তর ইতি স্বরসাৎ। এতেন পার্ব্বণে দেববিপ্রদক্ষিণে পিত্রাদ্যবস্থানাদত্রাপি তথা। তেন পশ্চিমদিশি দক্ষিণভাগে মাতৃপক্ষঃ তদুত্তরে পিতৃপক্ষঃ সর্বোত্তরে দেবপক্ষঃ। কিন্তু প্রদদ্যাদ্দৈবপূর্ব্বকমিত্যনুরোধাৎ প্রদক্ষিণমুপচার ইত্যনুরোধাচ্চ দৈবে দত্বাপ্রদক্ষিণাবর্ত্তেন পরাবৃত্যমাত্রদিষ্ট্যা দদ্যাদিতিক্রম ইতি কেষাঞ্চিন্মতং নিরস্তম্। উক্তবচনেনৈব সর্ব্বদক্ষিণে দেবপক্ষস্য প্রতিপাদনাৎ সাংদৃষ্টিকন্যায়স্যাকিঞ্চিৎকরত্বাৎ পার্ব্বণাপেক্ষয়া বহুশোবৈলক্ষণ্যস্য বৃদ্ধিশ্রাদ্ধে দর্শনাচ্চ। অযথাক্রমো যজুর্বেদিনামেব তেষামেব প্রাঙ্মুখব্রাহ্মণোপবেশনাৎ। সামগানান্তুন্যথাক্রমো বক্ষ্যতে। কর্ম্মণ্যথাভ্যুদয়িকে ইতি যজ্ঞপ্রতিষ্ঠাদাবিত্যর্থঃ।

পূজ্যা নান্দীমুখা অপীতি কন্যাগতাপরপক্ষবিষয়ম্। বৃদ্ধিশ্রাদ্ধে তু নান্দীমুখশব্দো গৌণ ইতি। তন্ন। নান্দীমুখসংজ্ঞামভিধায়। কর্ম্মণ্যথাভ্যুদয়িকে মঙ্গল্যবতি শোভনে। পিতৄন্নান্দীমুখান্নাম তর্পয়েদ্বিধিপূর্ব্বকমিতি। ব্রহ্মপুরাণ এব কৃতনান্দীমুখসংজ্ঞানাং বৃদ্ধিশ্রাদ্ধে দেবতাত্বপ্রতীতেঃ। কিঞ্চ। যে স্যুঃ পিতামহাদূর্দ্ধং তে স্যুর্নান্দীমুখাস্ত্বিতি। ব্রহ্মপুরাণ এব কন্যাগতাপরপক্ষবিষয়ে নান্দীমুখসংজ্ঞাবিধানাৎ ইদং তত্রৈব। পৃথক্ সংজ্ঞাবিধানং বৃদ্ধিশ্রাদ্ধার্থমেবাবতিষ্ঠতে ইতরথা বৈবর্থ্যাপত্তেঃ ॥ ১৭৮ ॥

কিঞ্চ কাত্যায়নগোভিলসূত্রেঽপি পিতৃপিতামহাদিপদং নান্দীমুখবিশেষণসম্বন্ধান্ন স্বজনকাদিপরম্। সম্বন্ধিশব্দানাং স্বসম্বন্ধিপরত্বনিয়ম ইতি চেন্ন। চৈত্রস্য পিতা ইত্যাদৌ ব্যভিচারাৎ। উপপদান্তত্র তথাভাবে প্রকৃ-

প্রদর্শনার্থমিতি তেন জনকাদয়স্তথোন্মুখা ন বৃদ্ধিশ্রাদ্ধার্হাঃ। কিন্তু বৃদ্ধপ্রপিতামহাদ্যাঃ পূর্ব্বতরাস্ত্রয় এব উক্তব্রহ্মপুরাণাদিতি পূর্ব্বপক্ষঃ। নম্বিতি প্রীয়তামিতি দ্বয়ান্তং কাত্যায়নগোভিলসূত্রদ্বয়ং স্বধাবাচনবিষয়ং স্বজনকাদীনামিতি স্বধাং ন [illegible] সান্নিধ্যাত্তৎপিত্রাদীনামেব সূত্রস্থপিত্রাদিপদবোধনাদিতি ভাবঃ। নন্বপ্রপিতামহাদীনামেব নান্দীমুখসংজ্ঞকত্বে কথং বৃদ্ধিশ্রাদ্ধে পিত্রাদীনাং নান্দীমুখত্বেন নির্দ্দেশ ইত্যত আহ বৃদ্ধিশ্রাদ্ধে ত্বিতি গৌণ ইতি কাত্যায়নবচনবলাদিতি ভাবঃ। তত্রৈবেতি ব্রহ্মপুরাণ এবেত্যর্থঃ ॥ ১৭৮ ॥

তর্হি কাত্যায়নগোভিলবচনয়োঃ কা গতিরিত্যত আহ কিঞ্চ কাত্যায়নেতি। ন স্বজনকাদিপরমিতি কিন্তু পিতামহজনকাদিপরমেবেতি শেষঃ। আশঙ্কতে সম্বন্ধিশব্দানামিতি স্বসম্বন্ধাতি সম্বন্ধিপিত্রাদি-

তেঽপি তুল্যং গৌণং নান্দীমুখপদমস্ত্বিতি চেন্ন। অনুপপত্ত্যভাবাৎ পিতৃপদমমুখ্যং স্যাদিতি চেন্ন তস্য জনকমাত্রে মুখ্যত্বাৎ। ভবতু বা পিতৃপদমমুখ্যম্ উপপদস্বরসাৎ। নাগৃহীত বিশেষণন্যায় এব শরণম্। ক্ষেত্রজাদয়ঃ পুত্রা ইতিবৎ ষড্‌ভ্যঃ পিতৃভ্য ইত্যত্রাপ্যেকবাক্যতয়া পিতৃপদং প্রপিতামহপিত্রাদিত্রকপরম্। অতএব কাত্যায়নাদিসূত্রেভ্যঃ স্বজনকাদীনাং দেবতাত্বাবগতেঃ। ব্রহ্মপুরাণীয়দেবতাপক্ষঃ শাখিভেদব্যবস্থিত ইতি হলায়ুধব্যাখ্যা নিরস্তা। কল্পতরৌ তু স্বজনকাদীনাং দেবতাত্বপ্রতীতেঃ। ব্রহ্মপুরাণীয়প্রপিতামহপিত্রাদিত্রিকপক্ষো জীবৎপিত্রাদিত্রিকযজমানবিষয় ইত্যুক্তম্। যস্য ত্রয়ো জীবন্তি স নৈব কুর্য্যাদিতি। বিষ্ণুক্তনিষেধো বৃদ্ধিশ্রাদ্ধেঽপ্যতিদেশাৎ প্রাপ্ত ইতি চেন্ন। উপদেশেনাতিদেশ-

পদানামুচ্চারয়িতৃপিত্রাদিবোধকত্বনিয়ম ইত্যর্থঃ। উপপদাদিতি চৈত্রস্যেত্যুপপদাদিত্যর্থঃ। তুল্যমিতি স্বজনকে চৈত্রস্যেত্যন্বয়বাধাৎ যথা চৈত্রস্য পিতেত্যত্র পিতৃপদং ন স্বজনকপরং কিন্তু চৈত্রপিতৃপরং তথা নান্দীমুখবিশেষণস্য স্বজনকাদাবন্বয়াবোধাৎ স্বকৃতগোভিলাদিসূত্রেঽপি-পিত্রাদিপদং ন স্বজনকাদিপরং কিন্তু প্রপিতামহপিত্রাদিপরমিতি তুল্যমিত্যর্থঃ। অনুপপত্তিমাহ পিতৃপদমমুখ্যত্বানুপপত্তিরেব নান্দীমুখপদস্য গৌণত্বে বীজমিত্যর্থঃ। ননু জনকত্বমাত্রস্য শক্যতাবচ্ছেদকত্বে পিতৃপদাৎ স্বপিত্রধীনার্থঃ স্যাদতঃ স্বাংশস্য পিতৃশক্যতাবচ্ছেদককোটিপ্রবিষ্টত্বং বাচ্যং তৎ কথং প্রপিতামহপিতরি তন্মুখ্যং জায়ে ইত্যত আহ ভবতু বেতি বাকারোঽস্বরসসূচনায় বস্তুতঃ স্বান্তর্ভাবেন শক্তিকল্পনে স্বস্বশক্তিভেদেন শক্ত্যানন্ত্যপ্রসঙ্গাৎ জনকত্ববিশিষ্ট এব পিতৃ-

বাধাৎ। তন্ন উক্তযুক্তেঃ স্বজনকাদীনাং দেবতাত্বানব-গমাৎ। উচ্যতে। স্বপিতৃভ্যঃ পিতা দদ্যাৎ সুতসংস্কা-রকর্ম্মসু। ইতি ছন্দোগপরিশিষ্টবচনাৎ। যদা ত্রয়ঃ পিত্রাদয়ো মৃতাস্তদা পিত্রাদিত্রিকস্য বৃদ্ধিশ্রাদ্ধম্। যদা তু ত্রয়ো জীবন্তি তদা ত্রৈপুরুষিকং ন কর্ত্তব্যমিতি বিষ্ণ্বা-দিভিরুক্তম্। যদা তু ত্রয়ঃ পুরুষাঃ প্রব্রজিতাঃ পতিতা বা মৃতাস্তদা কথং বৃদ্ধিশ্রাদ্ধং কর্ত্তব্যমিত্যত্রেদং ব্রহ্মপুরাণব-চনং। হি শব্দো যস্মাদর্থে। যদা স্বজনকাদয়ঃ পতিতত্বা-দিনা শ্রাদ্ধানর্হত্বেনাশ্রুমুখা অপ্রসন্নমুখা ভবন্তি তদা তেভ্যঃ পূর্ব্বতরাঃ পুরুষাঃ শ্রাদ্ধার্হত্বেন প্রসন্নমুখত্বান্নান্দীমুখাঃ। পার্ব্বণমপি তেষাং বিষ্ণ্বাদিভিরনিষিদ্ধমেব। ইতরথা জনকাদয় এব শ্রাদ্ধার্হত্বে প্রসন্নমুখত্বান্নান্দীমুখসংজ্ঞাং লভন্তে। প্রসন্নমুখত্বস্য প্রবৃত্তিনিমিত্তস্য বিদ্যমানত্বাৎ।

---

পদস্য শক্তিঃ স্বাংশলাভস্তু শ্রুতপদান্তরাদধ্যাহারবেতি ভাবঃ। যদি চ জনকত্বং নৈকমখণ্ডং তদা জনকতাঘটকপদার্থসার্থক এব খণ্ডশক্তিঃ ভাবপ্রত্যয়ভাববৎ ভাবপ্রত্যয়বদেব চ তেষামেকপদোপাত্তানামপি পর-স্পরান্বয়বোধ ইতি বোধ্যম্। উপপদস্বরসাৎ নান্দীমুখ ইতি বিশে-ষণপদস্বরসাৎ। ননু বিশেষ্যপিতৃপদস্বরসাৎ বিশেষণনান্দীমুখপর-মেব কুতোনামুখ্যং স্যাদ্বিনিগমনাবিরহাদিত্যত আহ নাগৃহীতেতি তথা চ নাগৃহীতবিশেষণন্যায়েন নান্দীমুখবিশেষণস্য প্রথমোপস্থিতত্বেন তৎ প্রতীত্যঙ্কুরোধাৎ চরমোপস্থিতবিশেষ্যান্বয়ে তদ্বাধাৎ বিশেষ্যপদ-স্যৈব মুখ্যার্থত্যাগো ন্যায্য ইতি ভাবঃ। বিশেষণান্বয়বাধাৎ বিশেষ্য পদস্য মুখ্যার্থত্যাগে দৃষ্টান্তমাহ ক্ষেত্রজাদয় ইতি। অত্র ক্ষেত্রজবিশেষ-ণান্বয়বোধাৎ পুত্রপদমুখ্যার্থস্যৈবাস্য ত্যাগঃ। একবাক্যতয়েতি নান্দী-

ন প্রপিতামহপিত্রাদয়ঃ তেষামেব শ্রাদ্ধানর্হত্বেনাশ্রুমুখত্বাৎ। তস্মাৎ শ্রাদ্ধার্হপিত্রাদিত্রিকস্য যজমানস্য বৃদ্ধিশ্রাদ্ধে পিত্রাদিত্রয় এব নান্দীমুখাঃ শ্রাদ্ধানর্হপিত্রাদিত্রিকস্য প্রপিতামহপিত্রাদয়ঃ। কন্যাগতে পুনর্নান্দীমুখসংজ্ঞাবিধানসামর্থ্যাৎ। শ্রাদ্ধার্হপিত্রাদিত্রিকস্যাপি প্রপিতামহপিত্রাদয়ো নান্দীমুখা ইতি সর্ব্বমুপপন্নম্। মঙ্গল্যবতি মঙ্গল্যকর্ম্মাঙ্গকে তদেব দর্শয়তি জন্মন্যথোপনয়ন ইতি। শাতাতপঃ। নানিষ্ট্বা তু পিতৄন্ শ্রাদ্ধৈঃ কর্ম্ম বৈদিকমারভেৎ। তিস্রোঽপি মাতরঃ পূর্ব্বং পূজনীয়াঃ প্রযত্নতঃ॥ অকৃত্বা মাতৃযাগন্তু যঃ শ্রাদ্ধং পরিবেশয়েৎ। তস্য ক্রোধসমাবিষ্টা হিংসাং কুর্ব্বন্তি মাতরঃ॥ তথা। পূর্ব্বাহ্নে দৈবিকং শ্রাদ্ধং কার্য্যমভ্যুদয়ার্থিনা। সব্যেন চোপবীতেন ঋজুদর্ভেণ ধীমতা॥ অপসব্যেন যো দদ্যাৎ বৃদ্ধিশ্রাদ্ধমিতক্রমাৎ। ন তস্য দেবাস্তৃপ্যন্তি পিতরশ্চ

---

মুখং পিতৃগণমিত্যাদ্যেকবাক্যতয়েত্যর্থঃ। অতএবেতি কাত্যায়নাদিবচনে পিত্রাদিপদস্য প্রপিতামহপিত্রাদি পরত্বাদেবেত্যর্থঃ। কল্পতরুরেব কণ্টকোদ্ধারায়াশঙ্কতে যথেতি। অতিদেশাৎ প্রাপ্ত ইতি জীবৎপিত্রাদিত্রিকস্য প্রকৃতৌ পার্ব্বণেপ্রাপ্তোবিকৃতৌ বৃদ্ধিশ্রাদ্ধেঽপ্যতিদেশাৎ প্রাপ্ত ইত্যর্থঃ। উপদেশেনেতি ব্রহ্মপুরাণে প্রপিতামহপিত্রাদীনাং নান্দীমুখ সংজ্ঞাভিধানপূর্ব্বকতচ্ছ্রাদ্ধোপদেশেনেত্যর্থঃ। উক্তাদ্যুক্তেবিতি উপপদস্বরসাদিত্যুক্তযুক্তেরিত্যর্থঃ। ইদং বচনমিতি প্রপিতামহপিত্রাদি শ্রাদ্ধবিধায়কমুক্তব্রহ্মপুরাণবচনমিত্যর্থঃ। প্রসন্নমুখত্বস্যেতি তেন শ্রাদ্ধার্হত্বেন প্রসন্নমুখত্বং নান্দীমুখপদপ্রবৃত্তিনিমিত্তমিত্যুক্তম্। ননু কন্যাগতে পুননান্দীমুখসংজ্ঞাভিধানস্য কা গতিরিত্যত্রাহ কন্যা-

যথাবিধি ॥ পিতৄণাং রূপমাস্থায় দেবা হ্ব্যং সমশ্নুতে। তস্মাৎ সব্যেন দাতব্যং বৃদ্ধিশ্রাদ্ধেষু নিত্যশঃ ॥ যুগ্মাংস্তু ভোজয়েদ্বৃদ্ধৌ ব্রাহ্মণান্নিয়তঃ শুচিঃ। নান্দীমুখাশ্চ পিতরঃ প্রীয়ন্তামিতি বাচয়েৎ ॥ মাতৃশ্রাদ্ধন্তু পূর্ব্বং স্যাৎ পিতৄণাং তদনন্তরম্। ততো মাতামহানাঞ্চ বৃদ্ধৌ শ্রাদ্ধ-ত্রয়ং ভবেৎ॥ ত্রিষ্বপ্যেতেষু যুগ্মাংস্তু ভোজয়েৎ ব্রাহ্মণান্ শুচিঃ। প্রদক্ষিণন্তু সব্যেন প্রদদ্যাদ্দৈবপূর্ব্বকম্ ॥ শ্রাদ্ধং কৃত্বৈব বৈদিকং কর্ম্ম কর্ত্তব্যমিতি নঞ্দ্বয়স্যার্থঃ। তিস্রো মাতর ইতি মাতৃশ্রাদ্ধমুক্তম্। মাতৃযাগো গৌর্য্যাদিমাতৃপূজা। দৈবিকমিত্যস্যোপপত্তিমাহ পিতৄণাং রূপমাস্থায়েতি। সব্যেন দক্ষিণেন। বাচয়েদক্ষয্যস্থান ইতি শেষঃ। দৈব-পূর্ব্বকমিতি। মাতৃশ্রাদ্ধেঽপি দৈবপূর্ব্বকতা দর্শিতা। লঘুহারীতঃ। মাতৃশ্রাদ্ধন্তু যুগ্মৈঃ স্যাৎ সদৈবং প্রাঙ্মুখৈঃ পৃথক্। পৃথক্ সদৈবং কর্ত্তব্যং দেবশ্রাদ্ধং পৃথক্

---

গতে ইতি শ্রাদ্ধার্হপিত্রাদিত্রিকস্য পুংসঃ প্রপিতামহপিত্রাদীনাং লেপ-ভাগিত্বেন শ্রাদ্ধানর্হাণাং পুনর্নান্দীমুখসংজ্ঞাভিধানেন শ্রাদ্ধার্হত্ব-প্রতিপাদনাৎ প্রসন্নমুখত্বপ্রবৃত্তিনিমিত্তসম্ভবাৎ তেঽপি নান্দীমুখা উচ্যন্তে তেন পুনঃ সংজ্ঞাবিধেস্তেষামপি শ্রাদ্ধং কন্যাগতে শ্রাদ্ধার্হপিত্রা-দিত্রিকেণাপি পুংসা কার্য্যমিত্যুক্তম্। মঙ্গল্যকর্ম্মাঙ্গকে ইতি মঙ্গল্য-কর্ম্মাঙ্গমাতৃপূজাদি অঙ্গং যস্য উপনয়নাদেস্তন্নিত্যর্থঃ। তদেব দর্শয়-তীতি যদ্যপি পুত্রাদিজন্মনিমিত্তকং মাতৃপূজাদি নাঙ্গং অলৌকিকং লৌকিকে নাঙ্গমিতি তন্ত্রসূত্রবিরোধেনালৌকিকস্য লৌকিকাঙ্গত্বা-ভাবাৎ। কিন্তু নৈমিত্তিকং প্রধানমেব তথাপি উপনয়নাদ্যপেক্ষয়া যমাঙ্গোক্তিরিতি বোধ্যম্। অতিক্রমাদিতি বিধিমতিক্রম্যেত্যর্থঃ।

কর্ত্তব্যমিত্যর্থঃ। মার্কণ্ডেয়পুরাণে। বৈশ্বদেববিহীনং তৎ কেচিদিচ্ছন্তি সত্তমাঃ। পৃথক্ বৈশ্বদেববিহীনমিত্যর্থঃ। এতেন তন্ত্রতা দর্শিতা। আবৃত্তৌ তু ফলভূমা কল্পনীয়ঃ। ॥ ১৭৯ ॥

হলায়ুধস্তু মাতৃশ্রাদ্ধং দৈবরহিতমেব কার্য্যমিত্যাহ কাত্যায়নঃ। আভ্যুদয়িকে প্রদক্ষিণমুপচারঃ পিত্র্য-মন্ত্রবর্জ্জং জপঃ ঋজবো দর্ভাঃ যবৈস্তিলার্থঃ সুসম্পন্নমিতি তৃপ্তিপ্রশ্নঃ দধিবদরাজ্যাক্ষতমিশ্রাঃ পিণ্ডাঃ নান্দীমুখান্ পিতৄনাবাহয়িষ্যে ইতি পৃচ্ছতি। নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিত্যক্ষয্যস্থলে নান্দীমুখান্ পিতৄন্ আবাহয়িষ্যে ইতি পৃচ্ছতি। নান্দীমুখাঃ পিতরঃ পিতামহাঃ প্রপিতামহা

---

নঞ্দ্বয়স্যার্থ ইতি নানিষ্টেৎতি নঞ্দ্বয়ঘটিতবাক্যপর্য্যবসিতার্থ ইত্যর্থঃ। দেবশ্রাদ্ধং পৃথক্ কর্ত্তব্যমিতি মাতৃপক্ষে পৃথগ্দেবশ্রাদ্ধং কর্ত্তব্যমিত্যর্থঃ। তন্ত্রতা দর্শিতা ইতি মাত্রাদিপক্ষত্রয়েষ্বেকমেব বিশ্বদেবশ্রাদ্ধং কার্য্য-মিত্যর্থঃ। দেবরহিতমেবেতি উক্তমার্কণ্ডেয়পুরাণাদিতি শেষঃ। আহেত্যস্বরসসূচনায় তদ্বীজঞ্চ সদৈবকং মাতৃশ্রাদ্ধপ্রতিপাদকলঘুহারীত-বচনম্ ॥ ১৭৯ ॥

আভ্যুদয়িকে ইতি অভ্যুদয়সাধনে নান্দীমুখশ্রাদ্ধে ইত্যর্থঃ। পিত্র-বর্জ্জমিতি ভোজনকালে যোজপঃ স পিতৃস্বকাশকমন্ত্রং বর্জ্জয়িত্বা কার্য্য ইত্যর্থঃ। দধিবদরেতি দধ্যাদীনাং প্রাশস্ত্যমাত্রং নত্বাবশ্যকতা প্রীয়-ন্তামিত্যক্ষয্যস্থান ইতি পার্ব্বণোক্তাক্ষয্যোদকদানবাক্যস্য প্রকারান্তর-বিধিরয়ং একোদ্দিষ্টে উপতিষ্ঠতামিত্যক্ষয্যস্থানে ইতিবৎ এতেনাক্ষ-য্যোদকদানাৎ কর্ম্মান্তরবিধিরয়মিতি শ্রীদত্তমতমপাস্তম্। অত্রেকেহ-ক্ষয্যস্থানে এতাবন্মাত্রং সর্ব্বানুদ্দিশ্য সকৃদেব কর্ত্তব্যং নত্বাবৃত্তিরিত্যাহুঃ। তদসৎ। অর্ঘ্যেঽক্ষয্যোদকে চৈব পিণ্ডদানেঽবনেজনে। তন্ত্রস্য বিনি-

মাতামহাশ্চ প্রীয়ন্তাং ন স্বধাং প্রযুঞ্জীত যুগ্মানাশয়েৎ। ন স্বধামিতি স্বধাশব্দপ্রয়োগো ন কার্য্যঃ। আশ্বলায়নগৃহ্যম্। আভ্যুদয়িকে যুগ্মা ব্রাহ্মণাঃ সমূলদর্ভাঃ প্রাঙ্মুখেভ্যঃ উদঙ্মুখো দদ্যাৎ উদঙ্মুখেভ্যো বা প্রাঙ্মুখঃ দ্বৌ দর্ভৌ পবিত্রে সোপযামানি পাত্রাণি চত্বারি শন্নোদেবীরিত্যনুমন্ত্রিতাস্বহপ্সু যবানাবপতি। যবোঽসি সোমদৈবত্যো গোসবো দেবনির্ম্মিতঃ। প্রত্নমদ্ভিঃ পৃক্তঃ পুষ্ট্যা নান্দীমুখান্ পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহেতি নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিত্যপাং প্রতিগ্রহণং বিসর্জ্জনঞ্চ। এবমু-

ক্তিঃ স্যাৎ স্বধাবাচন এব চেতি। তন্ত্রতানিষেধাৎ। ন চ বহুবচনবলাৎ তন্ত্রতাবিধিরেবেদমিতি বাচ্যং বহুবচনস্য স্বধাবাচনবৎ অদৃষ্টার্থকত্বেনান্যথাসিদ্ধতয়া নিষেধবাধাক্ষমত্বাৎ। ন চ স্বধাবাচনে পিতৃভ্যঃ স্বধোচ্যতাং পিতামহেভ্যঃ স্বধোচ্যতামিত্যাদি পৃথঙ্নির্দ্দেশাদস্ত্বদৃষ্টার্থকতা ইহ তু ন পৃথঙ্নির্দ্দেশ ইতি বাচ্যং অত্র নান্দীমুখাঃ পিতরঃ পিতামহাঃ প্রপিতামহাশ্চ প্রীয়ন্তামিতি কাত্যায়নাদিভিঃ পৃথঙ্নির্দ্দিষ্টত্বাৎ। এবঞ্চ পিতর ইতি সম্বন্ধার্থকপদস্য প্রথমাবহুবচনান্তনির্দ্দেশাৎ তদ্যুগনদ্ধবাহিনোর্গোত্রনাম্নোরপি প্রথমাবহুবচনান্ততা সিদ্ধা নামুকগোত্রস্য পিতুরমুকদেবশর্ম্মণো দত্তৈতদন্নপানাদিকমক্ষয্যমস্ত্বিতি গরুড়পুরাণোক্তাক্ষয্যোদকদানবাক্যেপ্রাপ্তস্য গোত্রনাম্নাং ষষ্ঠ্যেকবচনস্য স্থানে প্রথমাবহুবচনং অক্ষয্যমস্ত্বিতিস্থানে প্রীয়ন্তামিতি চানেন বিধীয়তে অতশ্চান্নপানাদিকমিতি প্রথমন্তস্য প্রীয়ন্তামিতি বৃদ্ধাবক্ষয্যোদকদানবাক্যং সিদ্ধং এবং পিতামহ প্রপিতামহয়োর্মাত্রাদিপক্ষে মাতামহাদিপক্ষে চ বহুবচনান্তগোত্রাদিতত্তৎপদপ্রক্ষেপঃ কার্য্যঃ। সামগানাং পুনরত্রাপি পার্ব্বণবৎ ষষ্ঠ্যন্তমেব বাক্যং বক্ষ্যতে। স্বধাবাচনং পার্ব্বণাৎ পৃথগ্বাক্যমাহ নান্দীমুখান্ পিতৄনিতি অত্র মাত্রাদিপক্ষে বাক্যাকাংক্ষায়াং

ত্তরয়োরপি পিতামহপ্রপিতামহয়োশ্চ নিত্যঞ্চাগ্নৌকরণং স্বাহাকারেণ হোমশ্চাতো দেবা অবন্তু ন ইত্যঙ্গুষ্ঠগ্রহণং ইদং বিষ্ণুর্ব্বিচক্রমে ইত্যত্র পাবমানী শাশ্বতী ঐন্দ্রী চ প্রতিরথঞ্চ শ্রাবয়েৎ ভুক্তাশয়েষু পিণ্ডদানমাশয়ান্ গোময়েনোপলিপ্য তেষু প্রাগগ্রান্ কুশানাস্তীর্য্যালঙ্কৃত্য পৃষদাজ্যমিশ্রতদন্নো হবিঃ সর্ব্বত্র তস্যার্দ্ধেন দ্বে দ্বে আজ্যাহুতীর্জুহুয়াৎ। নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিতি বিসৃজেৎ। প্রদক্ষিণমুপচারো যবৈস্তিলার্থঃ সর্ব্বং দ্বির্দ্বিরিতি প্রাঙ্মু-

---

পিত্রাদি দৃষ্টমেব বাক্যং পিত্রাদিপদস্থানে মাত্রাদিপদপ্রক্ষেপেণ বোধ্যম্। প্রতিবচনঞ্চ সর্ব্বত্রৈব প্রীয়ন্তামিতি। ন চাক্ষয্যবৎ স্বধাবাচনেঽপি গোত্রনামাদ্যুৎকীর্ত্তনং কথং ন ক্রিয়তে ইতি বাচ্যং প্রকৃতৌ স্বধাবাচনে তথাঽনুক্তত্বাৎ অক্ষয্যে তু প্রকৃতৌ তথৈবোক্তত্বাৎ। যথা পারস্করঃ। অর্ঘ্যদানেঽন্নসংস্কারে পিণ্ডদানে তথাক্ষয়ে। গোত্রসম্বন্ধনামানি যথাবৎ প্রতিপাদয়েদিতি। অয়ঞ্চ প্রথমান্তপ্রয়োগো যাজুর্ব্বেদিকাদীনাম্। সামগানাঞ্চ প্রথমাস্থানে চতুর্থী বাচনিকী। যথা গোভিলঃ। নান্দীমুখাঃ প্রীয়ন্তামিতি দৈবে বাচয়িত্বা নান্দীমুখেভ্যঃ পিতৃভ্যঃ পিতামহেভ্যঃ প্রপিতামহেভ্যঃ মাতামহেভ্যঃ প্রমাতামহেভ্যঃ বৃদ্ধপ্রমাতামহেভ্যঃ প্রীয়ন্তামিতি। অত্র দৈবপক্ষে নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিতি পিতৃপ্রীতিবচনং সামগানাং পার্ব্বণাদধিকং স্বধাবাচনপ্রশ্নস্তু গোভিলেনানুক্তোঽপি কাত্যায়নোক্তোগ্রাহ্যঃ। পরোক্তমবিরোধি চেতি বচনাদিতি সম্প্রদায়ঃ। ন স্বধাম্ভীতি সর্ব্বত্র মন্ত্রবাক্যে চ স্বধাপদপ্রয়োগো ন কর্ত্তব্য ইত্যর্থঃ। বক্ষ্যমাণাশ্বলায়নসূত্রে যবানিতি মন্ত্রে স্বধাপদস্থানে পুষ্টিপদপ্রয়োগদর্শনাৎ সর্ব্বেষ্বেব মন্ত্রেষু স্বধাস্থানে পুষ্টিপ্রয়োগঃ কার্য্যঃ। বাক্যে তু পুষ্টিপদস্য নানর্থকত্বাভাবাৎ তদযোগে চতুর্থ্যনুপপত্তেশ্চ। সদা পরিচরেদ্‌ভক্ত্যা পিতৄনপ্যত্র দেববদি-

খেভ্য উদঙ্মুখো দদ্যাদিতি। ছন্দোগব্যতিরিক্তবিষয়ম্। উদঙ্মুখেভ্যঃ প্রাঙ্মুখো দদ্যাদিতি ছন্দোগবিষয়ম্। প্রাঙ্মুখত্বস্য ছন্দোগপরিশিষ্টকৃতোক্তত্বাৎ। যথা। সর্ব্বস্মাদন্নমুদ্ধৃত্য ব্যঞ্জনৈরুপসিচ্য চ। সংযোজ্য যবকর্কন্ধুং দধিভিঃ প্রাঙ্মুখস্ততঃ॥ অবনেজনবৎ পিণ্ডান্ দত্ত্বা বিল্বপ্রমাণকান্। ইতি বক্ষ্যতে। ব্রহ্মপুরাণে। নান্দীমুখানাং কর্ত্তব্যং পিতৃকার্য্যার্থসিদ্ধয়ে। সযবৈশ্চ তথর্জুভির্দ্দর্ভৈঃ পূর্ব্বমুখস্থিতঃ॥ শাতাতপঃ। প্রদদ্যাৎ প্রাঙ্মুখঃ পিণ্ডা-

তাতিদেশাৎ দৈবে দৃষ্টং নমঃপদমেব প্রয়োক্তব্যম্। ন তু শ্রীদত্তমিশ্রাদিভিরুক্তং স্বাহাপদং উক্তাতিদেশেন নমঃপদস্যৈব প্রাপ্তেঃ। দৈবেনমোবিশ্বেভ্যো দেবেভ্য ইত্যাদিনা নমঃপদস্যৈবোপদেশাৎ। অপাং গ্রহণমিতি সংস্রবগ্রহণমিত্যর্থঃ। বিসর্জ্জনং সাধারসংস্রবন্যুব্জীকরণরূপং ন তু নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিত্যনেন পিতৃবিসর্জ্জনমিতি গোবিন্দানন্দব্যাখ্যানং যুক্তম্। নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিতি বিসর্জ্জেতিসূত্রশেষাংশেন সহ পৌনরুক্ত্যাপত্তেঃ। এবমপি উত্তরয়োঃ পিতামহ প্রপিতামহয়োরপি নান্দীমুখাঃ পিতামহাঃ প্রীয়ন্তামিত্যাদি পিতামহাদিপদোহেনাপাং গ্রহণং কার্য্যমিত্যর্থঃ। নিত্যমিতি অগ্নৌকরণং পার্ব্বণোক্তং নিত্যবৃদ্ধিশ্রাদ্ধেঽপ্যবিশিষ্টং ন তু তত্র নান্দীমুখবিশেষণবত্তয়া পিতৃপদপ্রয়োগ ইত্যর্থঃ। অতো দেবা ইতি তেন ইদং বিষ্ণুরিতি দ্বিজাঙ্গুষ্ঠনিবেশনসময়োঽক্তো দেবা ইতি মন্ত্রে ন দ্বিজাঙ্গুষ্ঠগ্রহঃ পার্ব্বণাদধিকঃ। কুশানাস্তীর্য্যেতি কুশানাস্তীর্য্য তান্ পুষ্পতোয়াদিরলংকৃত্য পিণ্ডদানমিতি পর্ব্বেণান্বয়ঃ। পৃষদায্যমিতি সর্ব্বত্র অন্নোৎসর্গে পিণ্ডে চ দধ্যাজ্যমিশ্রৌদনো হবিরিত্যর্থঃ। প্রাগগ্নৌকরণহোম উক্তঃ। তস্য পরিমাণমাহ তস্যার্দ্ধেনেতি। তস্য পৃষদাজ্যমিশ্রৌদনস্যার্দ্ধেন কিঞ্চিদ্ভাগেনাগ্নয়ে কব্যবাহনায় স্বাহেত্যাদি মন্ত্রেণ আহুতী-

নেভ্যঃ সব্যেন বাগ্যতঃ। প্রাগগ্রেম্বথ দর্ভেষু পিণ্ডান্ দদ্যাদ্‌যথাবিধি॥ অত্র কর্তুঃ প্রাঙ্মুখত্বে ব্রাহ্মণানাম-প্যুদঙ্মুখত্বমেকবিধিনির্দ্দেশাৎ। তথা। দধ্যক্ষতৈঃ সবদরৈঃ প্রাঙ্মুখোদঙ্মুখোঽপি বা॥ ১৮০॥

দেবতীর্থেন বৈ পিণ্ডং দদ্যাৎ কায়েন বা নৃপঃ॥ ইতি বিষ্ণুপুরাণোক্ততীর্থবিকল্পশ্ছন্দোগব্যতিরিক্তবিষয়ঃ। নাত্রাপসব্যকরণং ন পিত্র্যং তীর্থমিষ্যতে। পাত্রাণাং পূরণাদীনি দৈবেনৈব হি কারয়েৎ॥ ইতি ছন্দোগপরিশিষ্টক্তা এবকারেণ তীর্থান্তরনিষেধাৎ। কায়ং প্রাজাপত্যম্। এবঞ্চ। নান্দীমুখানাং কুর্ব্বীত প্রাজ্ঞঃ পিণ্ডোদকক্রিয়াম্। প্রাজাপত্যেন তীর্থেন যচ্চ কিঞ্চিৎ প্রজাপতেঃ॥ ইতি মার্কণ্ডেয়পুরাণবচনং শাখিভেদব্যবস্থিতম্। দ্বৌ দর্ভাবিতি দর্ভদ্বয়মাত্রমত্র পবিত্রমিত্যর্থঃ।

পাশ্চাত্যেনৈব মন্ত্রেণ দ্বে আজ্যাহুতী চ জুহুয়াদিত্যর্থঃ। প্রদদ্যাদিতি পূর্ব্বার্দ্ধে কর্তুঃ প্রাঙ্মুখত্বং উত্তরার্দ্ধে তু প্রাগগ্রকুশাস্তরণমাত্রবিধীয়তে। একবিধিদর্শনাদিতি। উদঙ্মুখেভ্যঃ প্রাঙ্মুখোদদ্যাদিত্যাশ্বলায়নে কর্তুঃ প্রাঙ্মুখত্ববিধৌ ব্রাহ্মণানামুদঙ্মুখত্বদর্শনাদিত্যর্থঃ। অভ্যক্ষতৈরিতি প্রাশস্ত্যার্থং ন ত্বাবশ্যকত্বার্থম্। প্রাঙ্মুখোদঙ্মুখোঽপি বিকল্পঃ। সামগতদিতরভেদেন ব্যবস্থিতঃ। আশ্বলায়নচ্ছন্দোগপরিশিষ্টৈকবাক্যত্বাৎ ন স্বৈচ্ছিকঃ। তদুভয়বিরোধাৎ অষ্টদোষগ্রাসাচ্চ॥ ১৮০॥

কায়েন বেতি তীর্থবিকল্পোঽপি বেত্যাদিনা দেবতীর্থস্যাববোধবিষয়ে ব্যবস্থিত এব। শাখিভেদেতি সামগেতর ব্যবস্থিতমিত্যর্থঃ। দর্ভদ্বয়মাত্রমিতি তেন প্রাদেশমাত্রত্বাদীনামনিয়মঃ। দেবসহিতেতি দেবপক্ষে এবং পিত্রাদিত্রয়ে ত্রয়ং মিলিত্বা চত্বার্য্যর্ঘ্যপাত্রাণি এবং বিশ্বেদেবসহিতে মাতৃ-

সোপযামানি সকুশানি চত্বারি পবিত্রপাত্রাণীতি দেবসহিতপুরুষত্রয়বিষয়তয়া জ্ঞেয়ম্। একৈকপুরুষাপেক্ষয়েতি হলায়ুধঃ। ভুক্তাশয়েষু ভুক্তসমীপদেশেষ্বিত্যর্থঃ। পৃষদাজ্যং সদধ্যাজ্যম্। সর্ব্বং দ্বির্দ্বিরিতি। সর্ব্বমেব যবাদিবিকরণং হবিস্ত্যাগাদিবাক্যঞ্চ দ্বিরাবর্ত্তনীয়ম্। ছন্দোগপরিশিষ্টে কাত্যায়নঃ। কর্ম্মাদিষু তু সর্ব্বেষু মাতরঃ সগণাধিপাঃ। পূজনীয়াঃ প্রযত্নেন পূজিতাঃ পূজয়ন্তি তাঃ॥ প্রতিমাসু চ শুভ্রাসু লিখিত্বা বা পটাদিষু। অপি বাক্ষতপুঞ্জেষু নৈবেদ্যৈশ্চ পৃথগ্বিধৈঃ॥ কুড্যলগ্নাং বসোর্ধারাং সপ্তধারান্ ঘৃতেন তু। কারয়েৎ পঞ্চধারান্ বা নাতি নীচাং ন চোচ্ছ্রিতান্॥ আয়ুষ্যাণি চ শান্ত্যর্থং জপ্ত্বা তত্র সমাহিতঃ। ষড্ভ্যঃ পিতৃভ্যস্তদনু শ্রাদ্ধদানমুপক্রমেৎ॥ বশিষ্ঠোক্তোবিধিঃ কৃৎস্নো দ্রষ্টব্যোঽত্র নিরামিষঃ। অতঃপরং প্রবক্ষ্যামি বিশেষ ইহ যো ভবেৎ॥

পক্ষে মাতামহপক্ষে চ চত্বারি চত্বারি ইতি দ্বাদশার্ঘ্যপাত্রাণি বিশ্বেদেবতন্ত্রতাপক্ষে তু দশার্ঘ্যপাত্রাণীতি বোধ্যম্। একৈকপুরুষাপেক্ষয়েতি পিত্রাদ্যেকৈকং প্রতি চত্বারি চত্বারীতি হলায়ুধ আহ ইত্যর্থঃ। ব্যাচষ্টে-কর্ম্মাদিষ্বিতি বৈদিককর্ম্মাদিষ্বিতি তথা চাত্র কর্ম্মপদং দেবপ্রতিষ্ঠাযজ্ঞাদিসাধারণবৈদিককর্ম্মসামান্যপরমেব ন তু প্রকরণাৎ গৃহ্যোক্তকর্ম্মমাত্রপরং গৃহ্যানুক্তেঽপি দেবপ্রতিষ্ঠাদৌ মাতৃপূজায়া উক্তত্বাৎ তত্র মাতৃপূজায়াং প্রমাণমাহ বৈদিককর্ম্মদাবিতি শ্রাদ্ধাপ্রাপ্ত্যা কথং মাতৃপূজাপ্রাপ্তিরিত্যর্থঃ। আহ যত্র যত্রেতি ন চ তর্হি কর্ম্মাদিষ্বিতি শ্রাদ্ধবৎ কর্ম্মাদিষ্বিতি পর্য্যবসিতোঽর্থঃ। তথাচ যত্র যত্রেতি বচনব্যর্থমিতিবাচ্যম্। এত-

প্রাতরামন্ত্রিতান্ বিপ্রান্ যুগ্মানুভয়তস্তথা। উপবেশ্য কুশান্ দদ্যাদৃজুনৈব হি পাণিনা॥ তথা। নিপাতো ন হি সব্যস্য জানুনো বিদ্যতে ক্বচিৎ। সদা পরিচরেদ্ভক্ত্যা পিতৄনপ্যত্র দেববৎ॥ পিতৃভ্য ইতি দত্তেষু উপবেশ্য কুশেষু তান্। গোত্রনামভিরামন্ত্র্য পিতৄনর্ঘ্যং প্রদাপয়েৎ॥ নাত্রাপসব্যকরণং ন পিত্র্যং তীর্থমিষ্যতে। পাত্রাণাং পূরণাদীনি দৈবে নৈব হি কারয়েৎ॥ জ্যেষ্ঠোত্তরকরান্ যুগ্মান্ করাগ্রাগ্রপবিত্রকান্। কৃত্বার্ঘ্যং সংপ্রদাতব্যং নৈকৈকস্যাত্র দীয়তে॥ তথা। মধুমধ্বিতি যস্তত্র ত্রির্জ্জপোঽশিতুমিচ্ছতাম্। গায়ত্র্যনন্তরং সোঽত্র মধুমন্ত্রবিবর্জ্জিতঃ॥ ন চাশ্নৎসু জপেদত্র কদাচিৎ পিতৃসংহিতাম্। অন্য এব জপঃ কার্য্যঃ সোমসামাদিকঃ শুভঃ॥ যস্তত্র প্রকরোঽন্নস্য তিলবদ্যববত্তথা। উচ্ছিষ্টসন্নিধৌ সোঽত্র তৃপ্তেষু বিপরীতকঃ॥ সম্পন্নমিতি

দ্বাক্যস্য শ্রাদ্ধবৎকর্ম্মসামান্যবিষয়কস্য উপসংহারবাক্যত্বেন উপক্রমবাক্যস্যাপি শ্রাদ্ধবৎকর্ম্মসামান্যবিষয়ত্বাবগমকতয়া সার্থকত্বাৎ উপক্রমোপসংহারয়োঃ সমানবিষয়ত্বনিয়মাৎ। গৌরী পদ্মেতি অত্র মাতরো লোকমাতর ইতি বিশেষণদ্বয়ং নতু পৃথগ্দেবতে। আত্মদেবতাকুলদেবতা চ দেবতাদ্বয়ম্। তেন মাতরঃ পঞ্চদশ ইতি ছন্দোগপরিশিষ্টদীপিকায়াং শূলপাণিনা স্বয়মেব বিবৃতম্। শান্তিঃ পুষ্টির্ধৃতিস্তুষ্টিরিত্যনিরুদ্ধভট্টাদিসম্মতঃ পাঠঃ। তন্মতেঽপি মাতরো লোকমাতর ইতি বিশেষণমেব আত্মকুলদেবতাদ্বয়ং তেন ষোড়শ মাতরঃ। শ্রীদত্তস্তু। হৃষ্টিঃ পুষ্টিস্তথা তুষ্টিরন্তে চ কুলদেবতা। এতাবন্মাত্রং পঠিত্বা মাতরো লোকমাতর ইতি দেবতাদ্বয়ং আত্মদেবতা কুলদেবতা চৈকেতি ষোড়শেত্যাহ।

তৃপ্তাঃ স্থঃ প্রশ্নস্থানে বিধীয়তে। সুসম্পন্নমিতি প্রোক্তে শেষমন্নং নিবেদয়েৎ॥ প্রাগগ্রেম্বথ দর্ভেষু আদ্যমামন্ত্র্য পূর্ব্ববৎ। অপঃ ক্ষিপেন্মূলদেশেঽবনে নিক্ষ্বিতি নিস্তিলাঃ॥ দ্বিতীয়ঞ্চ তৃতীয়ঞ্চ মধ্যদেশাগ্রদেশয়োঃ। মাতামহপ্রভৃতীংস্তু এতেষামেব বামতঃ॥ সর্ব্বস্মাদন্নমুদ্ধৃত্য ব্যঞ্জনৈরুপসিচ্য চ। সংযোজ্য যবকর্কন্দুদধিভিঃ প্রাঙ্মুখস্ততঃ॥ অবনেজনবৎ পিণ্ডান্ দত্ত্বা বিল্বপ্রমাণকান্। তৎপাত্রক্ষালনেনাথ পুনরপ্যবনেজয়েৎ॥ উত্তরোত্তরদানেন পিণ্ডানামুত্তরোত্তরঃ। ভবেদধশ্চাচরণাদধরঃ শ্রাদ্ধকর্ম্মসু॥ তস্মাৎ শ্রাদ্ধেষু সর্ব্বেষু বৃদ্ধিমৎস্বিতরেষু চ। মূলমধ্যাগ্রদেশেষু ঈষৎ শক্তাংশ্চ নির্ব্বপেৎ॥ গন্ধাদীন্নিক্ষিপেৎ তূষ্ণীং তত আচাময়েদ্দ্বিজান্। অন্যত্রাপ্যেষ এব স্যাদ্যবাদিরহিতো বিধিঃ॥ দক্ষিণপ্লবনে দেশে দক্ষিণাভিমুখেন তু। দক্ষিণাগ্রেষু দর্ভেষু এষোঽন্যত্র বিধিঃ স্মৃতঃ॥ অথাগ্রভূমিমাসিঞ্চেৎ সুস্থপ্রোক্ষিতমস্ত্বিতি।

---

হৃষ্টিঃ পুষ্টিস্তথা তুষ্টিঃ আত্মকুলদেবতয়া সহেতি মিশ্রসম্মতঃ পাঠঃ। এতন্মতেঽপি শ্রীদত্তোক্তবৎমাতরঃ ষোড়শ আত্মকুলদেবতায়াঃ একত্বাৎ। অক্ষতপুঞ্জেম্বিতি যবপুঞ্জেম্বিত্যর্থঃ। অক্ষতাস্তু যবাঃ প্রোক্তাধানাভূর্ষ্যো ভবন্তি তে। ইতি গোভিলভাষ্যলিখিতবচনাৎ। অত্র বহুবচনাৎ পৃথক্ পৃথক্ পুঞ্জে একৈকস্যাঃ পূজাভিহিতা। ফলাতিশয় ইতি ন তু পূর্ব্বাভাবে উত্তরাবধি। অভাবানুপ্রবেশেন বিধৌ গৌরবাৎ। অনুকল্পত্বেঽঙ্গবাধাপত্তেশ্চেতি ভাবঃ। বসুর্ঘৃতমিতি ঘৃতেনেত্যভিধানাৎ বসুপদস্য ঘৃতএব তাৎপর্য্যকল্পনাদিতি ভাবঃ। নম্বেবং বসুপদং ব্যর্থং ধারাং ঘৃতেন দদ্যাদিত্যত্র প্রকৃতার্থনির্ব্বাহাৎ ঘৃতপরত্বে পুংস্ত্বানুপপত্তিশ্চে-

শিবা আপঃ সন্ত্বিতি চ যুগ্মানেবোদকেন তু ॥ সৌমনস্য-মস্ত্বিতি চ পুষ্পাদানমনন্তরম্। অক্ষতঞ্চারিষ্টঞ্চাস্ত্বিত্যক্ষ-তানপি দাপয়েৎ ॥ অক্ষয্যোদকদানন্তু অর্ঘ্যদানবদিষ্যতে। ষষ্ঠ্যৈব নিত্যং তৎ কুর্য্যান্ন চতুর্থ্যা কদাচন ॥ প্রার্থনাসু প্রতিপ্রোক্তে সর্ব্বাস্বেব দ্বিজোত্তমৈঃ। পবিত্রান্তর্হিতান্ পিণ্ডান্ সিঞ্চেদুত্তান্ পাত্রকৃৎ ॥ যুগ্মানেব স্বস্তিবাচ্যান-ঙ্গুষ্ঠগ্রহণং সদা। কৃত্বা ধূর্য্যস্য বিপ্রস্য প্রণম্যানুব্রজে-ত্ততঃ ॥ কর্ম্মাদিষু বৈদিককর্ম্মাদিষ্বিত্যর্থঃ। বৈদিকক-র্ম্মাদৌ শ্রাদ্ধস্যোক্তত্বাৎ। যত্র যত্র ভবেৎ শ্রাদ্ধং তত্র

ত্যেত আহ উদ্দেশ্যোহপীতি। বস্তু তস্তু বসোর্ধারেতি কর্ম্মণোনাম অলু-ক্সমাসঃ। তথাচ ভানুভট্টধৃতং দেবীপুরাণবচনম্। বসুদ্রব্যং ঘৃতঞ্চাজ্যং অমৃতং ভুবি কামিকম্। তেন ধারা সদা দেয়া বসোর্ধারেতি সা মতা। অতএব যজ্ঞেষু জুহ্বতং বিপ্রৈর্বসোর্ধারাং মহাত্মভিরিতি। মহাভারতবচনে বরদানসময় এব বসোর্দ্ধারামিত্যুক্তম্। তদানীন্তু ন ধারায়া বসূদ্দেশ্যকত্বস্য প্রাগসিদ্ধত্বেন যৌগিকব্যুৎপত্ত্যসম্ভবাৎ। অতএব বসোর্ধারাপদস্য ঘৃতধারাত্বেনাবোধকত্বাৎ ঘৃতেনেতি সার্থকম্। কেচিৎ তু ঘৃত ইতি ব্যাখ্যায় সপ্ত পঞ্চ ধারা পৃথগ্দেয়া ন তু ধারোপরি-ধারা ইত্যর্থমাহুঃ। তন্ন তুশব্দবৈয়র্থ্যাপাতাৎ তৃতীয়ান্তব্যাখ্যানে তু ঘৃতেনৈবেতি। তৈলাদিব্যবচ্ছেদার্থকতয়া বৈয়র্থ্যাভাবাৎ। গোবিন্দা-নন্দস্তু বসুর্ঘৃতমিতিপাঠং ধৃত্বা প্রমাদলিখিতমিদং বচনে ঘৃতেনেত্য-ভিধানাদিত্যাহ তদ্ধেয়ম্। উক্তদেবীপুরাণাদিবচনাপরিজ্ঞানমূলকত্বাৎ। যজ্ঞেষু জুহ্বতামিতি বিপ্রৈর্দ্বারভূতৈঃ জুহ্বতাং যজমানানামিত্যর্থঃ। অস্পৃশদিতি স্পৃশত্বিত্যর্থঃ। ক্ষুৎপিপাসাভাবে হেতুমাহ বসোর্দ্ধারেতি পাতং দানং তেনৈব বসোর্দ্ধারায়াঃ পানং যস্যেতি বহুব্রীহিণা বসোর্দ্ধারাং পাতয়িত্বা ইত্যর্থঃ। বসুধারাদানমন্ত্রস্তু ওঁ বসোঃ পবিত্রমসীত্যাদি বসু-

তত্র তু মাতরঃ। ইতি মাতৃপূজাশ্রাদ্ধয়োরব্যভিচারাৎ মাতরশ্চোক্তাঃ যথা বহ্বৃচগৃহ্যপরিশিষ্টম্। গৌরী পদ্মা শচী মেধা সাবিত্রী বিজয়া জয়া। দেবসেনা স্বধা স্বাহা মাতরো লোকমাতরঃ॥ শান্তিঃ পুষ্টির্ধৃতিস্তুষ্টিরাত্মদেবতয়া সহ। আদৌ বিনায়কঃ পূজ্যো অন্তে চ কুলদেবতা॥ পূজয়ন্তি প্রীণয়ন্ত্যভ্যুদয়দানেনেত্যর্থঃ। অক্ষতপুঞ্জেষু পূজনীয়া ইত্যর্থঃ। প্রতিমা লেখ্যাক্ষতপুঞ্জেষু পূর্ব্বং পূর্ব্বং ফলাতিশয়ঃ। বসুর্ঘৃতম্। উদ্দিশ্যোঽপি চেদিরাজো বসুরেব। যথা মহাভারতে মোক্ষধর্ম্মে বসুং প্রতি দেববাক্যম্। একন্ত্বনুগ্রহং তুভ্যং দদামি নৃপসত্তম। যাবত্তং শাপদোষেণ কালমাসিষ্যতেঽনঘ॥ ভূমের্ব্বিবরগো ভূত্বা তাবত্তং কালমাপদি। যজ্ঞেষু ঋজুতাং বিপ্রৈর্ব্বসোর্ধারাং মহাত্মভিঃ। প্রাপ্স্যসেঽস্মদনুধ্যানান্মা চ ত্বাং গ্লানিরস্পৃশেৎ। ন ক্ষুৎপিপাসে রাজেন্দ্র ভূমেশ্ছিদ্রে ভবিষ্যতঃ॥ বসোর্ধারাভিপাতেন তেজসাপ্যায়িতেন চ। সদেবোঽস্মদ্বরঃ প্রীতো ব্রহ্মলোকং নয়িষ্যতি॥ আয়ুষ্যাণি আয়ুষে হিতানি। তদন্বিতি ক্রমবিশেষার্থঃ। ষড়্ভ্য ইতি মাতৃশ্রাদ্ধ-

---

ধারাপ্রকাশকো যজুর্বৈদিক এব। ততশ্চান্যশাখিনাং মন্ত্রান্তরানুপদেশাৎ সর্ব্বশাখিভিরয়মেব মন্ত্রো নিযোজ্যঃ। পরোক্তমবিরোধি চেতি বচনাৎ। মন্ত্রস্য চ সকৃদেব পাঠো নত্বাবৃত্তিঃ। বীজাভাবাদিতি মিশ্রপ্রভৃতয়ঃ। বস্তুতস্তু প্রধানাবৃত্তৌ গুণাবৃত্তেরুক্তত্বান্মন্ত্রাবৃত্তিরেব সমুচিতেতি প্রতীমঃ। ক্রমবিশেষার্থ ইতি কৃতমাতৃযাগস্যৈব শ্রাদ্ধেঽধিকার ইতি বিশেষঃ। তেন মাতৃযাগাৎ পূর্ব্বমেকদৈব তন্ত্রেণ বৃদ্ধিশ্রাদ্ধস্যাপি সঙ্কল্পো

নিষেধার্থম্ ইতরথা বৈয়র্থ্যাপত্তেঃ। বশিষ্ঠোক্তশ্ছন্দোগ-গৃহ্যপরিশিষ্টে। পার্ব্বণে যো বিধিরুক্তঃ সোঽত্রামিষব্যা-দাসেন বোদ্ধব্যঃ। অত্রৈকনিয়োগশিষ্টত্বান্মাংসনিষেধাৎ মধুনিষেধ ইতি কশ্চিৎ। তদযুক্তম্॥ ১৮১॥

শাল্যন্নং দধিমধ্বক্তং বদরাণি যবাংস্তথা। ইতি বক্ষ্যমাণব্রহ্মপুরাণবচনাৎ। প্রাতরামন্ত্রিতানিতি। পূর্ব্ব-দিননিমন্ত্রণনিষেধার্থঃ। যুগ্মোপবেশনং হস্তঋজুত্বমিত্যা-দি পার্ব্বণাদ্বিশেষঃ। উভয়তঃ পিতৃপক্ষে মাতামহপক্ষে চেত্যর্থঃ। দৈবে যুগ্মস্য প্রাপ্তত্বেন বিশেষত্বাসম্ভবাৎ। তথোপবেশ্য পার্ব্বণবদুদঙ্মুখা কৃত্যেত্যর্থঃ। দেববদিতি।

দুরাচার এব। তস্মাৎ কর্ম্মণাং ভিন্নভিন্নত্বাৎ মাতৃযাগে বসুধারাদানে আয়ুষ্যমন্ত্রজপে শ্রাদ্ধে চ পৃথগেব সঙ্কল্পঃ। আয়ুষ্যমন্ত্রজপশ্চ সামগানা-মেব। মাতৃশ্রাদ্ধনিষেধার্থমিতি ছন্দোগানামেবেতি শেষঃ। ন যোষি-দ্ভ্যঃ পৃথগ্দদ্যাদিত্যনেনৈকমূলত্বাদিতি ভাবঃ। ষড়ভ্য ইতি মাত্রা-দীনামপ্যুপলক্ষণম্। মাতৃশ্রাদ্ধন্তু পূর্ব্বং স্যাৎ পিতৃণাং তদনন্তরম্। ততো মাতামহানাঞ্চ বৃদ্ধৌ শ্রাদ্ধত্রয়ং স্মৃতমিতি। শাতাতপবচনেনৈকমূলকত্ব-কল্পনালাঘবাদিতি কল্পতরুঃ। জীবন্মাত্রাদিত্রিকপরমিতি পিতৃভক্তিঃ। একনিয়োগশিষ্টত্বাদিতি ব্রহ্মচর্য্যাদিগোচরো যত্র মাংসনিষেধঃ তত্রৈব মধুনিষেধস্যাপ্যুক্তত্বাদিত্যর্থঃ॥ ১৮১॥

শাল্যন্নমিতি। যদ্যপীদং পিণ্ডএব মধুবিধানকং ন তু শ্রাদ্ধে তথাপি সর্ব্বমন্নমেকতোদ্ধৃত্যেতি গোভিলেন শ্রাদ্ধশেষদ্রব্যেন পিণ্ডদানবিধা-নাৎ। পিণ্ডস্য শ্রাদ্ধশেষদ্রব্যকর্ত্তব্যতয়া শ্রাদ্ধেঽপি মধুদানপ্রাপ্তি-রিতি। শ্রাদ্ধসংপ্রদায়োঽপ্যেবম্। অতএব প্রোদ্গাতৃণাং ফলচমসং ভক্ষ্যং দদাতীত্যনেন ঋত্বিজাং ফলচমসং ভক্ষণপ্রাপ্তযোগেঽপি ফল-চমসপ্রাপ্তিঃ যাগশেষদ্রব্যস্যৈব ঋত্বিগ্ভক্ষ্যত্বোক্তেঃ। এতেন পিণ্ডাংশ

দক্ষিণজানুপাতাদিনা পরিচরেদিতি পিতৃভ্য ইতি ইতি প্রকারেণ পিতৃভ্যো দত্তেষু কুশেষু তান্ দ্বিজানুপবেশ্যেতি কিং গোত্রনামভিরামন্ত্র্য ইতি প্রক্রংস্যমান ইতি শব্দঃ। এবকারঃ প্রাজাপত্যতীর্থব্যবচ্ছেদার্থঃ। জ্যেষ্ঠোত্তরকরানিতি জ্যেষ্ঠস্য করোপরি করো যেষাং তে তথা। করাগ্রাগ্রপবিত্রকানিতি করাগ্রেঽগ্রপবিত্রকং পবিত্রাগ্রং যেষাং তে তথা। তাংস্তথা কৃত্বার্ঘ্যং দেয়মিত্যর্থঃ। পার্ব্বণবন্নৈকৈকস্যাত্র দীয়তে যতঃ। মধুমধ্বিতি যস্তত্র

দধিমধ্বক্তানিতি বচনেন পিণ্ডানাং মধুযুক্তত্বস্যৈব প্রতিপাদনাৎ মধুনঃ পিণ্ডঘটকত্বাভাবেন নীতফলচন্দনন্যায়েন শ্রাদ্ধে মধুপ্রাপ্তিরিতি মিশ্রমতং নিরস্তম্। ব্রহ্মপুরাণবচনে মধুনঃ পিণ্ডঘটকত্বাবগমাৎ। অত এব মধুমধ্বিতি যস্তত্রেতি বচনে মধুমন্ত্রনিষেধাৎ মধুনোনিবৃত্তির্নাস্তীত্যবগম্যতে ইতিবক্ষ্যতে গ্রন্থকৃতাপি। পূর্ব্বদিনামন্ত্রণনিষেধার্থ ইতি ন চামন্ত্রিতান্ বিপ্রান্ প্রত্যুপবেশ্যেত্যন্বয়ো বাচ্যঃ। তথাত্বেঽতিদেশাদেবামন্ত্রণপ্রাপ্তেরামন্ত্রিতান্ ইত্যস্য বৈয়র্থ্যাদতঃ সন্নিধানাচ্চ প্রাপ্তপদস্যামন্ত্রণান্বয়ে পূর্ব্বদিননিমন্ত্রণব্যাবৃত্তিরিত্যর্থঃ। দৈবে যুগ্মস্যেতি প্রাপ্তত্বেনাতিদেশপ্রাপ্তত্বেন বিষয়াসম্ভবাৎ বিশেষপ্রতিজ্ঞাবিষয়ত্বাসম্ভবাৎ। দৈবে ন যুগ্মবিধিরয়মিতি শেষঃ। সাহিত্যেন দেবতাত্বস্য প্রাঙ্নিরস্তত্বাৎ। পিতৃভ্য ইত্যস্য ত্যাগবাক্যাকারত্বাসম্ভবাৎ অন্যথা আচষ্টে পিতৃভ্য ইতীতি ইতি প্রকারেণেতি তথা চেতিশব্দস্য গোত্রনামভিরামন্ত্র্যেতি প্রক্রম্যমানাবির্ভাবকতয়া তৎপ্রকারেণ পিতৃভ্যো দত্তেষু কুশেষু তানুপবেশ্যেতি বচনার্থ ইত্যর্থঃ। জ্যেষ্ঠস্যেতি জ্যেষ্ঠস্য পঙ্‌ক্তিমূর্দ্ধণ্যস্য কর উত্তর উপস্থিতঃ করস্তবকরসমূহে যেষামিত্যর্থঃ। অত্র নৈকৈকস্যাত্র দীয়তে ইত্যুপসংহারাৎ জ্যেষ্ঠোত্তরকরত্বমাত্রং বিশেষঃ। করাগ্রাগ্রপবিত্রকত্বন্তু পার্ব্বণেঽপি মন্তব্যম্। পার্ব্বণবিশেষণেঽ-

পার্ব্বণে ভোক্তুমিচ্ছতাম্। ব্রাহ্মণানাং শ্রাব্যত্বেন মধুমধ্বিতি ত্রির্জ্জপঃ মধুবাতেতি মন্ত্রসহিতো গায়ত্রীজপানন্তরং ক্রিয়তে সোঽত্র মধুবাতেতি মন্ত্রবর্জ্জিতঃ। এতেন ভোজনকালে মধুমন্ত্রপাঠো ন নিষিদ্ধঃ মধুমন্ত্রনিষেধাচ্চ মধুনো নিবৃত্তির্নাস্তীত্যবগম্যতে। অন্যথা প্রধাননিবৃত্তৌ গুণনিবৃত্তেরপ্যর্থসিদ্ধত্বেন বিধাতুমশক্যাৎ। ন চ গুণনিবৃত্তাবপি প্রধাননিবৃত্তিঃ গুণলোপেন মুখ্যস্যেতি ন্যায়-

---

ভিধানাদিহাবিশেষেণোক্তম্ তত্র বান্যত্রাপ্যেষ এব স্যাদিতি বক্ষ্যতে। তেন পার্ব্বণেঽপি পবিত্রাণামুত্তরাগ্রত্বং ব্রাহ্মণানামুদঙ্মুখত্বং বাচ্যং মিশ্রমতসম্মতমপোতদেব। জ্যেষ্ঠোত্তরকরত্বং করাগ্রাগ্রপবিত্রকত্বঞ্চ দ্বয়মেব পার্ব্বণাদ্বিশেষঃ। নৈকৈকস্যাত্র দীয়তে ইত্যভিধানাচ্চ পার্ব্বণবৎ পিত্রাদীনামেকৈকস্যার্ঘ্যদাননিষেধেন পিত্রাদিত্রয়ব্রাহ্মণানাং মিলিতহস্তোপরি দানং লাভার্থং অতএব পিতৃব্রাহ্মণয়োর্দ্বয়োর্জ্যেষ্ঠোত্তরহস্তোপরি উত্তরাগ্রং কৃত্বা পবিত্রং দত্ত্বা সমুৎসৃজেৎ। এবমেব পিতামহাদিপক্ষানামেকৈকশোদ্বয়োর্দ্বয়োর্ব্রাহ্মণয়োঃ পৃথক্ পৃথগ্দদ্যাদিতি পিতৃদয়িতোক্তং নিরস্তম্। তথাত্বে নৈকৈকস্যাত্রদীয়ত ইতি ব্যর্থমিতি তেন পার্ব্বণে পবিত্রাণাং দক্ষিণাগ্রত্বমেব কুশাসনার্ঘ্যার্থাস্তৃতকুশানাং তথাত্বেন সাংদৃষ্টিকন্যায়াদিতিস্মার্ত্তমতম্। তদসং বিপ্রানিতি বহুবচনবলাদেব পিত্রাদিত্রয়ং ব্রাহ্মণানাং লাভেনৈকৈকস্যেত্যস্য বৈয়র্থ্যতাদবস্থ্যাৎ তস্মাদস্মদুক্তমেব যুক্তম্। মধুমধ্বিতীতিবচনং মধুমধ্বিত্যস্য ত্রির্জপে ষড়াবৃত্তিপ্রসঙ্গঃ। গায়ত্রীং ত্রিঃসকৃদ্বাপি জপেদ্ব্যাহৃতিপূর্ব্বিকাম্। মধুবাতা ইতি ত্র্যচঃ মধ্বিত্যেতৎত্রিকং জপেদিতি। মিতাক্ষরালিখিতপারস্করবচনে মধ্বিত্যেতাবন্মাত্রশ্রুতেঃ। তদেকবাক্যতয়া মধুমধ্বিত্যত্রাপি প্রথমমধুপদস্য দ্রব্যপরত্বম্। তেন মধুপ্রকাশকমধ্বিত্যর্থ ইতি মতঃ। অন্যথেতি প্রধানস্য মধুদানস্য নিবৃত্তৌ গুণস্যাঙ্গস্য তন্মন্ত্র-

বিরোধাৎ। মধুমধ্বিবতি জপাভ্যনুজ্ঞানঞ্চ ন স্যাৎ। পিতৃসংহিতামিতি। পিতৃপ্রকাশকমন্ত্রমাত্রোপলক্ষণার্থম্। অতএব কাত্যায়নঃ। পিত্র্যমন্ত্রবর্জ্জং জপঃ। এবং রুচিস্তব পাঠোঽপি। যস্তত্রেতি অন্নস্য প্রকরঃ অগ্নৌবিকরণং তিলযুক্তং কৃতং তদত্র যবযুক্তং কার্য্যম্। অপরস্তু তত্র তৃপ্তেষু ব্রাহ্মণেষু কৃতম্। অত্র বিপরীতমতৃপ্তেষু এব দৈবতীর্থাদিনা দানপ্রকারেণেতি বিপরীতস্যার্থ ইতি কল্পতরুঃ। তন্ন দৈবতীর্থস্য পূর্ব্বোক্তত্বাৎ। প্রাগগ্রেষ্বিতি। আদ্যং পুরুষং পূর্ব্ববৎ গোত্রপূর্ব্বনামভিরিত্যর্থঃ। প্রাগগ্রত্বতিলশূন্যত্বে বিশেষঃ। দ্বিতীয়ং তৃতীয়ং পুরুষমানন্ত্র্যেতি

---

পাঠস্য নিরুক্তেরর্থসিদ্ধত্বেনাপ্রাপ্তপ্রাপকাভাবাৎ মন্ত্রনিষেধস্য বিধাতুমশক্যত্বাদিত্যর্থঃ। ন চেতি গুণবৃত্তিবিধানাৎ প্রধানস্যাপি নিবৃত্তিবশাদাগতেতি ভাবঃ। হেত্বন্তরমাহ মধুমধ্বিতীতি যদি মধুনিবৃত্তির্ভবিষ্যতি তদা মধুনাঙ্গভূতমধ্বিতি ত্রিজপাভ্যনুজ্ঞানং ন স্যাদিত্যর্থঃ। এবঞ্চেতি পিতৃপ্রকাশকমন্ত্রসামান্যস্যৈব নিষেধে সতীত্যর্থঃ। ন রুচীতি তস্যাপি পিতৃপ্রকাশকত্বাদিতি ভাবঃ। তিলযুক্তং কৃতমিতি তিলবদ্যথাবদিতি ক্রিয়াবিশেষণং তেন যোঽন্নস্য প্রকরঃ তিলবৎ যথা স্যাৎ তথা তত্র পার্ব্বণে কৃতঃ সোঽত্র যববদ্যথা স্যাৎ তথা কার্য্য ইত্যর্থঃ। অপরমিতি বৈলক্ষণ্যমিতি শেষঃ। তদেবাহ তদিতি অন্নপ্রকরমিত্যর্থঃ। তৃপ্তিষু উক্তবৎসু অতৃপ্তিষু ভঞ্জানেষু। তেন পার্ব্বণে প্রত্যাপোঽশনাৎ প্রাক্কাল এবান্নপ্রকরঃ। ইহ তু ভোজনকালমাত্র ইতি বিপরীতকঃ বিপরীতকালকঃ প্রকর ইতি সম্বন্ধঃ। মতান্তরমাহ দেবতীর্থেতি আদিনা দক্ষিণজানুপাতনাদীনাং গ্রহণম্। পার্ব্বণে পিত্রপ্রকারেণ ইহ তু দেব প্রকারেণেতি বৈপরীত্যং কল্পতরুমতমিত্যর্থঃ। মতঞ্চৈতদ-

সম্বন্ধঃ। মধ্যদেশাগ্রদেশয়োর্দর্ভস্থ অপঃ ক্ষিপেদিতি সম্বন্ধঃ। এতেষাং পিণ্ডস্থানে আবাহিতানাং পিত্রাদীনাং ত্রয়াণাং বামতো দক্ষিণস্যাং দিশি যথা দক্ষিণোপচারো ভবতি। এতেন পার্ব্বণে পিতৃদক্ষিণে মাতামহোপবেশনং লভ্যতে। মাতামহপ্রভৃতীনামন্ত্র্য দর্ভেষ্বপঃ ক্ষিপেদিত্যন্বয়ঃ। উত্তরোত্তরদানেন পিণ্ডানাং মূলাদিক্রমেণো-পর্য্যুপরি দানেন দাতাপ্যূর্দ্ধগতির্ভবতীতি স্তুতিঃ। ইতরেষু পার্ব্বণাদিষু ॥ ১৮২ ॥

ঈষৎ শক্তান্ ঈষল্লগ্নান্। তূষ্ণীমিতি। পিণ্ডে গন্ধাদি-দানমন্ত্রনিষেধঃ। অগ্রভূমিং ব্রাহ্মণস্যেত্যর্থঃ। অর্ঘ্যদা-নবদিতি। জ্যেষ্ঠোত্তরকরস্থাতিদেশার্থঃ ন তু তন্ত্রতা-নিবৃত্তিরতিদিশ্যতে। অর্ঘ্যেঽক্ষয্যোদকে চৈব পিণ্ডদানে-

সং। তৃপ্তেষ্বিতি বৈয়র্থ্যাৎ। নাত্রাপসব্যকরণং নাপিত্র্যং তীর্থমিষ্যতে। পাত্রাণাং পূরণাদীনি দৈবেনৈব হি কারয়েদিতি। প্রাগুক্তবচনেন প্রাপ্ত-ত্বাদনুবাদকতাপত্তেঃ। বচনে সম্পন্নে ইতি পার্ব্বণে তৃপ্তাঃ স্থ ইহ সম্পন্ন-মিতি প্রশ্ন ইত্যর্থঃ। প্রাগগ্রেষ্বিতি এতচ্ছন্দোগানামেব অধ্বর্য্যূনান্তু দক্ষাবুদঙ্মুখত্বাৎ উদগগ্রত্বমেবেতি সম্প্রদায়ঃ। পিণ্ডস্থানে আবাহিতানাং পিত্রাদীনামিতি প্রত্যঙ্মুখানামিতি শেষঃ। দক্ষিণস্যাং দিশীতি প্রাঙ্-মুখস্য কর্ত্তুর্দক্ষিণস্যাং দিশীত্যর্থঃ। এতেনেতি যতঃ পার্ব্বণবৃদ্ধৌ দক্ষি-ণোপচারবিশেষঃ। এতেন পার্ব্বণে বামোপচারাৎ পিতৃদক্ষিণে মাতা-মহোপবেশনং লভ্যত ইত্যর্থঃ। বচনেঽবনেজনবদিতি অবনেজন-দানক্রমেণ মূলমধ্যাগ্রদেশেষ্বিত্যর্থঃ ॥ ১৮২ ॥

ঈষৎ শক্তানিতি। পরস্পরমীষল্লগ্নান্ পিণ্ডানিত্যর্থঃ। অনাদেশ্যো-ঽপোষ্য এব স্যাদিতি পাঠাদনেঽপোষ্য এব [illegible] কিন্তু যবাদিরহিতঃ তিল-

শ্বনেজনে। তন্ত্রস্য বিনিবৃত্তিঃ স্যাৎ স্বধাবাচন এব চ॥ ইতি প্রাপ্তত্বাৎ ষষ্ঠীবিধানমামন্ত্রণস্থলে ন চতুর্থীস্থানে তৎস্থানে বিধানাদেব নিষেধপ্রাপ্তৌ ন চতুর্থ্যা কদাচনেতি নিষেধবৈয়র্থ্যাৎ। তস্মান্ন চতুর্থ্যা কদাচনেতি চতুর্থ্যন্তস্য তস্মৈ ইত্যস্য নিষেধঃ। অক্ষয্যবিধানাৎ স্বধানিষেধঃ। উত্তরার্দ্ধমিদং পার্ব্বণবিষয়ঞ্চ। অতএব গোভিলঃ। গোত্রস্যাক্ষয্যকর্ম্মণি। পিতুরক্ষয্যকালে তু। শর্ম্মণোঽক্ষয্যকালেষ্বিতি। প্রার্থনাসু সুসম্প্রোক্ষিতমিত্যাদিষু প্রতিপ্রোক্তেঽস্তু সন্ত্বিত্যাদিপ্রতিবচনে কৃতেঽর্ঘ্যপাত্রসম্বন্ধিপবিত্রাচ্ছাদিতান্ পিণ্ডান্ ঊর্জ্জং বহন্তীরিতি সিঞ্চেৎ। স্বধাবাচনঞ্চ ন কার্য্যম্। ন স্বধাঞ্চ প্রযুঞ্জীতেতি

---

সহিত ইত্যর্থঃ। এতদেব বিবৃণোতি দক্ষিণাপ্লবনেতি অত্র ভূমিং ব্রাহ্মণস্যেতি গন্ধাদীন্নিক্ষিপেত্তূষ্ণীমিত্যন্তেন পিণ্ডবিধিং সমাপ্য তত আচাময়েদ্দ্বিজানিত্যনেনাব্রহ্মণাং প্রকৃতত্বাদিতি ভাবঃ। তৎস্থানেতদ্বিধানাদেবেতি যদি চতুর্থীস্থানে ষষ্ঠীবিধানং স্যাৎ তদা তদ্বলাদেব চতুর্থীনিষেধে সিদ্ধে ন চতুর্থ্যেতি নিষেধোঽনর্থকঃ স্যাদিত্যর্থঃ। ননু আমন্ত্রণস্থা ষষ্ঠীবিধানেঽপি ন চতুর্থ্যেতি ব্যর্থমেব ষষ্ঠ্যন্তেন সহ চতুর্থ্যন্তস্যান্বয়াসম্ভবেনার্থতঃ চতুর্থীনিষেধসিদ্ধেরত আহ তস্মাদিতি চতুর্থ্যন্তস্যেতি তে তস্মৈ ইত্যস্য চতুর্থ্যন্তপদদ্বয়স্য নিষেধ ইত্যর্থঃ। তেন চতুর্থ্যন্তপদযুক্তস্য মন্ত্রস্যৈব নিষেধঃ। একোদ্দিষ্টস্য পিণ্ডে তু অনুশব্দো ন যুজ্যতে। ইত্যত্রানুনিষেধাৎ তদনুক্তমন্ত্রনিষেধবৎ। তর্হি স্বধাপদস্য ত্যাগঃ কুতো লভ্যত ইত্যত আহ অক্ষয্যবিধানাদিতি। নাসৎ ত্যাগঃ কিন্তু ত্যক্তদ্রব্যস্যাক্ষয্যাসংশয়মাত্রবোধান্নত্যাগার্থকস্বধাশব্দপ্রয়োগ ইতি কেচিৎ। তদসৎ অক্ষয্যোদকদানস্তু অর্ঘ্যদান-

নিষেধাৎ। অনন্তরং ন্যুব্জীকৃতমর্ঘ্যপাত্রমুত্তানং কৃত্বা বক্ষ্যমাণং কর্ম্ম কুর্ব্বীত। ধূর্য্যস্য পঙ্‌ক্তিমূর্দ্ধন্যস্যানঙ্গুষ্ঠ-পাণিং গৃহীত্বা প্রণম্যানুগচ্ছেৎ। ব্রহ্মপুরাণে। রক্ষো-ঘ্নীর্জুহুয়াদগ্নৌ সমিদর্থে মহৌষধীঃ। অন্নং দদ্যাচ্চ দৈবেন তীর্থেনৈব জপন্ স্বধাম্॥ কশ্চিৎ সম্পন্নমেতান্ তানপৃচ্ছেচ্চ প্রহর্ষিতান্। সুসম্পন্নঞ্চ তে ব্রূয়ুঃ সর্ব্বং সিদ্ধং ততঃ ক্ষিপেৎ॥ নান্দীমুখেভ্যশ্চাক্ষয্যমিদমস্ত্বিতি সংজপন্। প্রাঙ্মুখাংস্তুথ দর্ভাংস্তু দদ্যাৎ ক্ষীরাবনেজনম্॥ দত্ত্বা নান্দীমুখেভ্যশ্চ প্রাচীঙ্গচ্ছেদ্দিশং ক্রমাৎ। শাল্যন্নং দধিমধ্বক্তং বদরাণি যবাংস্তথা॥ মিশ্রীকৃত্য চ চত্বারি

---

বদিষ্যতে। ইত্যত্রাক্ষয্যোদকস্যাপি দানক্রোক্তিঃ স্বধাপদস্যাবাধিতার্থকত্বাৎ অতএব স্নানাদিসঙ্কল্পবাক্যনিরূপণপ্রকরণেঽক্ষয্যোদকদানে তু ষষ্ঠ্যন্ততা-ম্নাহেতি গ্রন্থকৃতাপি লিখিতম্। বস্তুতস্ত্ত অক্ষয্যবিধানাৎ ষষ্ঠ্যন্ততাক্ষ-য্যবিধানাৎ স্বধানিষেধ ইত্যর্থঃ। অন্যথা নমঃ স্বস্তি স্বাহা স্বধেত্যাদি-সূত্রেণ স্বধাযোগে চতুর্থীবিধানেন ষষ্ঠ্যনুপপত্তেরিতি ভাবঃ। উত্তরার্দ্ধ-মিদমিতি। ষষ্ঠ্যৈব নিত্যং তৎকুর্য্যাদিত্যুত্তরার্দ্ধমিত্যর্থঃ। পার্ব্বণবিষয়ম-পীতি নিত্যমাত্রস্য সকলশ্রাদ্ধপ্রাপ্ত্যর্থকতয়ৈবার্থকত্বাৎ। অন্যথা তদ্বৈ-য়র্থ্যাপত্তেরিতি ভাবঃ। অপরমপি হেতুমাহ অতএবেতি গোভিলেন সামান্যত এবাভিধানাদিতি ভাবঃ। তেন ন কেবলং প্রকরণাৎ নান্দী-মুখমাত্রে কিন্তু পার্ব্বণাদাবপি সামগানাং ষষ্ঠ্যন্তেনাক্ষয্যোদকমিতি ভাবঃ। পবিত্রান্তর্হিতান্ পিণ্ডানিতিবচনং ব্যাচষ্টে অর্ঘ্যপাত্রসম্বন্ধি পবিত্রাচ্ছাদিতানিতি অর্ঘ্যপাত্রসম্বন্ধিপবিত্রসহিতকুশান্তরেণাচ্ছাদিতা-নীত্যর্থঃ। তথা চ ব্রহ্মপুরাণম্। অর্ঘ্যপাত্রস্য পিণ্ডানামন্তরে সপবিত্র-কান্। অপ ঊর্জ্জং বহন্তীতি কুশাংস্তোবমথাক্ষিপেদিতি। অস্যার্থঃ পাত্রস্য পবিত্রেণ সহিতান্ কুশান্ পিণ্ডানামুপরি নিঃক্ষিপ্য ঊর্জ্জং বহন্তীতি

পিণ্ডান্ শ্রীফলসন্নিভান্। দদ্যান্নান্দীমুখেভ্যশ্চ পিতৃভ্যো বিধিপূর্ব্বকম্॥ অর্ঘ্যং পুষ্পঞ্চ ধূপঞ্চ প্রশস্তমনুলেপনম্। বাসশ্চাপ্যাহতং শুভ্রং দেয়ং চ সদশং সমম্॥ দ্রাক্ষামলকমূলানি যবাংশ্চাথ নিবেদয়েৎ। তান্যেব দক্ষিণার্থন্তু দদ্যাদ্বিপ্রেষু সর্ব্বদা॥ অথাক্ষয্যোদকস্থানে দত্বা ক্ষীরযবোদকম্। প্রপিতামহসংজ্ঞাশ্চ নান্দীমুখ্যশ্চ মাতরঃ॥ মাতামহ্যঃ পিতামহ্যঃ প্রপিতামহ্য এব চ। মাতামহেভ্যশ্চ তথা নান্দীবক্ত্রেভ্য এব চ॥ প্রমাতামহসংজ্ঞেভ্যো ভবদ্ভিশ্চ স্বধোচ্যতাম্। অস্তু স্বধেতি তে তত্র জপন্তি প্রহসাঃ শুভম্॥ বিশ্বেদেবাশ্চ প্রীয়ন্তামিতি দাতা ব্রবীতি

---

মন্ত্রেণ তোয়ং নিক্ষিপেদিতি। এতেন পবিত্রান্তরেণৈব পিণ্ডাচ্ছাদনম্। নত্বর্ঘপাত্রসম্বন্ধিপবিত্রেণ বিনিযুক্তবিনিয়োগাপত্তেরিতি মৈথিলমতং নিরস্তম্। উৎসৃষ্টানাং পুনরুৎসর্গস্যৈব বিনিযুক্তবিনিয়োগপদার্থত্বেন পিণ্ডোপরিপ্রক্ষেপমাত্রস্য তথাত্বাপ্রশক্তেশ্চ। অন্যথা দত্তপিণ্ডাদীনাং গবাদিদ্ভুক্তরাপ্রতিপত্তিরপি বিনিযুক্তবিনিয়োগাপত্তেঃ। স্বধাবাচনন্তু ন কার্য্যমিতি। যদ্যপি নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিতি দৈবে বাচয়িত্বা নান্দীমুখেভ্যঃ পিতৃভ্যঃ পিতামহেভ্যঃ প্রপিতামহেভ্যঃ মাতামহেভ্যঃ প্রমাতামহেভ্যঃ বৃদ্ধপ্রমাতামহেভ্যঃ প্রীয়ন্তাং ন স্বধাঞ্চ প্রযুঞ্জীত। ইতি গোভিলেন স্বধাবাচনস্থানে প্রকারান্তরমুক্ত্বা ন স্বধাঞ্চ প্রযুঞ্জীতেতি পৃথগভিধানাৎ বাক্যে মন্ত্রে চ স্বধাপদনিষেধ উক্ত ইতি ব্যাখ্যাতং তৎ কথং স্বধাবাচননিষেধে ন স্বধাঞ্চ প্রযুঞ্জীতেতি প্রমাণতরোপন্যাস্তং তথাপ্যয়মর্থঃ স্বধাম্বাচয়িষ্যে ইতি প্রশ্নবাক্যং গোভিলেনোক্তং কিন্তু পার্ব্বণাতিদেশবলাদেব প্রশক্তং তচ্চাত্র নাস্তি ন স্বধাঞ্চ প্রযুঞ্জীতেতি গোভিলেন সামান্যতো নিষেধাৎ কিন্তু নান্দীমুখান পিতৄন্ আবাহয়িষ্যে ইতি স্বধাপদশূন্যং কাত্যায়নেনোক্তপ্রশ্নবাক্যমেবাত্র গ্রাহ্যম্। পরোক্তমবিরোধি

চ। প্রীতা ভবন্তু তে তত্র জপন্তি মধুরাক্ষরম্॥ যে মুষবাদিনমিতি পঠংস্তাংস্তু বিসর্জ্জয়েৎ। জপন্ স্বধামিতি শাখিভেদব্যবস্থিতম্। ন স্বধাঞ্চ প্রযুঞ্জীতেতি কাত্যায়নগোভিলদর্শনাৎ। সর্ব্বং সিদ্ধং ততঃ ক্ষিপেদিতি অন্নবিকরণমুক্তম্। নান্দীমুখেভ্যশ্চাক্ষয্যমিত্যপি শাখিভেদব্যবস্থিতম্। নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিতি কাত্যায়নদর্শনাৎ। ক্ষীরমবনেজনমিতি ফলাতিশয়ার্থম্। অপঃ ক্ষিপেন্মূলদেশে ইতি ছন্দোগপরিশিষ্টদর্শনাৎ। মূলমার্দ্রকাদি। এতদপি ফলাতিশয়ার্থম্। মাতামহীশব্দেন মাতা লক্ষ্যতে। স্বধোচ্যতামস্তু স্বধেতি স্বধাবাচনং শাখিভেদব্যবস্থিতম্। নান্দীমুখান্ পিতৄন্ আবাহয়িষ্যে ইতি পৃচ্ছতি নান্দীমুখাঃ পিতরঃ পিতামহাঃ প্রপিতামহাশ্চ

---

চেতি বচনাদিতি বক্ষ্যমাণং কর্ম্ম ইতি তথাচ যুগ্মানেব স্বস্তিবাচ্যেত্যাদি বক্ষ্যমাণকর্ম্মণ্যেব উক্তা ন পাত্রকৃদিত্যস্য কর্তৃত্বেনান্বয়ো ন তু বাক্যার্থেতি পিণ্ডমেকানন্তরমেব পাত্রোত্তানীকৃতং করণং বশিষ্ঠেন পার্ব্বণে তথৈবাভিধানাদিতি ভাবঃ। অনঙ্গুষ্ঠমিতি অঙ্গুষ্ঠাতিরিক্তদেশে পাণিং গৃহীত্বা ইত্যর্থঃ। এতচ্চ বৃদ্ধাবিব পার্ব্বণাদাবপি বোধ্যং সদেতি শ্রবণাদিতি ভাব্যম্। রক্ষোঘ্নীর্মহৌষধীর্যবানিত্যর্থঃ। তান্ সমিদার্থ অগ্নৌ জুহুয়াদিত্যর্থঃ। ইদমপি স্রুবেণাগ্নৌকরণং শাখিভেদব্যবস্থিতম্। ছন্দোগাদীনাং ঘৃতাক্তস্রুতত্বান্নৈব তদ্বিধানাৎ। নান্দীমুখেভ্য ইতি নান্দীমুখেভ্যশ্চাক্ষয্যমস্ত্বিতি সঞ্জপন্ অক্ষয্যোদকং দদ্যাদিত্যধ্যাহৃত্যান্বয়ঃ। ইত্থমেব বক্ষ্যমাণাক্ষয্যোদকদানে চতুর্থ্যন্তবাক্যস্য শাখিভেদব্যবস্থা গ্রন্থকৃতঃ সাধু সঙ্গতে তত্র প্রথমান্তবাক্যবোধককাত্যায়নবচনস্য হেতুত্বেনৈবোপন্যাসাৎ এতচ্চাক্ষয্যোদকদানবাক্যমাত্রাভিধায়কম্। অথাক্ষয্যোদক-

প্রীয়ন্তামিতি ন স্বধাঞ্চ প্রযুঞ্জীতেতি কাত্যায়নদর্শনাৎ। ছন্দোগপরিশিষ্টম্। অসকৃদ্যানি কর্ম্মাণি ক্রিয়েরন্ কর্ম্মকারিণা। প্রতিপ্রয়োগং নৈব স্যুর্মাতরঃ শ্রাদ্ধমেব চ॥ আধানে হোময়োশ্চৈব বৈশ্বদেবে তথৈব চ। বলিকর্ম্মণি দর্শে চ পৌর্ণমাসে তথৈব চ॥ নবযজ্ঞেষু যজ্ঞজ্ঞা বদন্ত্যন্যে মনীষিণঃ। একমেব ভবেৎ শ্রাদ্ধমেতেষু ন পৃথক্ পৃথক্॥ নাষ্টকাসু ভবেৎ শ্রাদ্ধং ন শ্রাদ্ধে শ্রাদ্ধমিষ্যতে। ন শোষ্যন্তী জাতকর্ম্ম প্রোষিতাগতকর্ম্মসু॥ বিবাহাদিঃ কর্ম্মগণো য উক্তো গর্ভাধানং শুশ্রুম যস্য চান্তে। বিবাহাদাবেকমেবাত্র কুর্য্যাৎ শ্রাদ্ধং নাদৌ কর্ম্মণঃ কর্ম্মণঃ স্যাৎ॥ প্রদোষে শ্রাদ্ধমেকং স্যাৎ গোনিষ্ক্রামপ্রবেশয়োঃ। ন শ্রাদ্ধং যুজ্যতে কর্ত্তুং প্রথমে পুষ্টিকর্ম্মণি॥ হলাভিযোগাদিষু তু ষট্সু কুর্য্যাৎ পৃথক্ পৃথক্। প্রতিপ্রয়োগমন্যেষামাদাবেকঞ্চ কারয়েৎ॥ বৃহৎপত্রক্ষুদ্রপশুস্বস্ত্যর্থং পরিবিশ্যতোঃ। সূর্য্যেন্দ্বোঃ কর্ম্মণী যে

---

স্থানে ইতি বক্ষ্যমাণবচনঞ্চ তত্র ক্ষীরাদি দ্রব্যবিধায়কমিত্যপুনরুক্তিঃ। তন্ত্রাণেতি শ্রবণাদত্রাক্ষয্যোদকদানপাঠক্রমোন গ্রাহ্যঃ। কিন্তু পিণ্ডদানানন্তরমেবাক্ষয্যোদকদানমিতি বোধ্যম্। দত্ত্বেতি নান্দীমুখেভ্যোঽবনেজনং দত্ত্বা পিণ্ডনির্ম্মাণার্থং প্রাচীং দিশং গচ্ছেদিত্যর্থঃ। মধ্বক্তং দধীত্যেকতমশ্চত্বারীত্যর্থঃ। বাসোবাসসূত্রং আহতং নবীনং দশাসহিতং বস্ত্রঞ্চ সমং দেয়মিত্যর্থঃ। সমমিত্যনেন মাতৃপিতৃমাতামহাদিভ্যো বস্ত্রাদিদানে বৈষম্যং কার্য্যমিতি প্রতিপাদিতম্। দ্রাক্ষেতি ফলাতিশয়ার্থম্। তানীতি নপুংসকনির্দ্দেশাদেবকারাচ্চ দ্রাক্ষামলকমূলানামেব গ্রহণং ন তু যবানাম্। অতএব যবাংশ্চার্থে পৃথঙ্নির্দ্দেশঃ। সর্ব্বদেত্যনেন

তু তয়োঃ শ্রাদ্ধং ন বিদ্যতে ॥ ন দশাগ্রন্থিকেনৈব বিষবদ্দষ্টকর্ম্মণি। ক্রমিদষ্টচিকিৎসায়াং নৈব শেষেষু বিদ্যতে॥ গণশঃ ক্রিয়মাণে তু মাতৃভ্যঃ পূজনং সকৃৎ। সকৃদেব ভবেৎ শ্রাদ্ধমাদৌ ন পৃথগাদিষু। যত্র যত্র ভবেৎ শ্রাদ্ধং তত্র তত্র তু মাতরঃ। প্রাসঙ্গিকমিদং প্রোক্তমতঃ প্রকৃতমুচ্যতে। তথা ॥ স্বপিতৃভ্যঃ পিতা দদ্যাৎ সুতসংস্কারকর্ম্মসু ॥ পিণ্ডানোদ্বহনাত্তেষাং তস্যাভাবেঽপি তৎ ক্রমাৎ ॥ অসকৃদিতি প্রতিদিনং প্রতিমাসং প্রতিসংবৎসরঞ্চ যানি ক্রিয়ন্তে তানি বৈশ্বদেববলিকর্ম্ম দর্শপৌর্ণমাসশ্রাবণ্যাগ্রায়ণ্যাদীনি তেষু প্রথমপ্রয়োগ এব শ্রাদ্ধং মাতৃপূজা চ ॥ ১৮৩॥

প্রত্যব্দমেব যেন পশুযাগাদিক্রিয়তে তেনাপি প্রথমপ্রয়োগ এব শ্রাদ্ধং কার্য্যম্। বিশেষান্তরমাহ আধানে ইতি। হোময়োঃ সায়ং প্রাতর্হোময়োঃ। নবযজ্ঞশ্চাগ্রয়ণেষ্টিঃ।

ব্রাহ্মণাভাবে জলাদিপ্রক্ষেপপক্ষেঽপি ব্রাহ্মণায়ৈব দক্ষিণা দেয়া ন তু তস্যাপি জলাদিপ্রক্ষেপ ইত্যুক্তম্। শ্রাদ্ধোদ্দেশ্যানাহ প্রপিতামহসংজ্ঞাশ্চেতি বহুবচনাৎ প্রপিতামহপিত্রাদয় ইত্যর্থঃ। প্রপিতামহান্তেভ্যঃ পিত্রাদিভ্য ইত্যর্থঃ। চকারান্মাত্রাদিভ্যশ্চ। তে ব্রাহ্মণাঃ মাতৃপূজাভ্যুদয়িকাবাহ ছন্দোগপরিশিষ্টং কাত্যায়ন ইতি। বচনানি ক্রমেণ ব্যাচষ্টে অসকৃদিত্যাদি প্রথমপ্রয়োগ এব শ্রাদ্ধং মাতৃপূজা চেতি। ননু নৈমিত্তিকে পুনরুপনয়নে দ্বিতীয়বিবাহাদৌ চ পুনঃ শ্রাদ্ধমাতৃপূজে ন স্যাতাম্। ন তত্রাবৃত্তেরবৈধত্বাৎ যত্রাবৃত্তের্বৈধত্বং তত্রৈব সকৃত্ত্বিধানাৎ ॥ ১৮৩ ॥

প্রত্যব্দমেবেতি। প্রতিবর্ষং চরেৎ সোমং পশুপ্রত্যয়নং তথা। ইতি যাজ্ঞবল্ক্যাৎ তত্রাপ্যাবৃত্তের্বৈধত্বাদিতি ভাবঃ। কস্মাদস্থেন প্রাপ্ত-

এতেষ্বাধানাদিষু প্রতিপ্রয়োগমিব প্রতিকর্ম্মাপি শ্রাদ্ধং ন কার্য্যং কিন্ত্বাধানাদৌ কৃতে সর্ব্বেষ্বেব কৃতং স্যাৎ। তেনান্যত্র শ্রাবণ্যাদৌ প্রতিকর্ম্মৈব শ্রাদ্ধমিত্যুক্তম্। অপবাদমাহ নাষ্টকাস্বিতি। অষ্টকেষ্টিষু তিসৃষু শ্রাদ্ধে পার্ব্বণাদৌ আসন্নপ্রসবায়া বধ্বাঃ সুখপ্রসবার্থং শোষ্যন্তী হোমে গোভিলোক্তে ব্রীহিযবপিষ্টেন কুমারস্য জিহ্বামার্জ্জনাখ্যে জাতকর্ম্মণি গোভিলোক্তে প্রবাসাদাগতস্য গৃহপতেঃ কুমারমূর্দ্ধাভিঘ্রাণরূপে প্রোষিতাগতকর্ম্মণি গোভি-

শ্রাদ্ধস্যাপবাদমাহেত্যর্থঃ। বিবাহাদাবিতীতি অত্র বচনেঽন্তশব্দঃ সমীপার্থোনত্ববয়বার্থঃ। তেন সামগানামপি গর্ভাধানে শ্রাদ্ধমস্তীতি গোবিন্দানন্দাদয়ঃ মিশ্রসম্মতমপ্যেতৎ। অতএব শ্রাদ্ধচিন্তামণিঃ। কেচিৎ তু গর্ভাধানমপি গণান্তর্নিবিশ্য তত্রাপি শ্রাদ্ধপ্রতিষেধং বর্ণয়ন্তি। তন্ন। নিষেককালে সোমে চেত্যাদিনা গর্ভাধানোপক্রমে শ্রাদ্ধবিধানাদিত্যাহ। স্মার্ত্তাস্ত অন্তশব্দস্যাবয়বার্থমভ্যুপেত্য গর্ভাধানে সামগৈঃ শ্রাদ্ধং ন কার্য্যমিতি বদন্তি। তদসৎ অন্তশব্দস্য সমীপার্থকত্বেনৈব উপপত্তৌ অবয়বার্থপরতামভ্যুপেত্য নিষেককালে সোমে চেত্যস্য সঙ্কোচকল্পনায়া অন্যায্যত্বাৎ। প্রদোষে প্রবেশনাদৌ তন্ত্রেণৈকং শ্রাদ্ধমিতি। প্রদোষে প্রবেশনস্যৈব সম্ভবাদিতি ভাবঃ। যদ্যপি যোনিঃসরণপ্রবেশনয়োর্ভিন্নকালতয়া ন তন্ত্রত্বসম্ভবঃ তথাপি বচনাৎ তথা মন্তব্যম্। প্রবপনপনপর্য্যায়ানাং গোভিলসূত্রোক্তানামর্থমাহ প্রবাপনং বীজবপনমিত্যাদি। প্রতিযোগং প্রত্যহমিত্যর্থঃ। গোভিল ইতি বৃক্ষ ইবেত্যাদয়ঃ পঞ্চঋচস্তাসাং মধ্যে দ্বিতীয়য়া ঋচা প্রকৃতে কর্ম্মণি আদিত্যে পরিবিশ্যমানে সতি চূতে পত্রাণাং হস্ত্যশ্বাদিবাহনানাং স্বস্ত্যয়নকামোঽক্ষততণ্ডুলান জুহুয়াদিত্যর্থঃ। তথা চান্দ্রে পরিবিশ্যমানে সতি পঞ্চঋচাং মধ্যে তৃতীয়য়া ঋচা ক্ষুদ্রপশূনামজাব্যাদীনাং স্বস্ত্যয়নকামাস্তিলতণ্ডুলান্ জুহু-

লোক্তে শ্রাদ্ধং ন কার্য্যম্। বিবাহাদিরিতি সমশনীয়চরুহোমগৃহপ্রবেশনযানারোহণচতুষ্পথামন্ত্রণাক্ষভঙ্গসমাধানার্থহোমচতুর্থীহোমানামাদিশব্দেন গ্রহণম্। এষু বিবাহাদিগর্ভাধানান্তকর্ম্মস্বেকমেব শ্রাদ্ধং কার্য্যম্। প্রদোষে শ্রাদ্ধমিতি। গোনিঃসরণপ্রবেশনকর্ম্মণোর্গোভিলোক্তয়োরঙ্গত্বেন প্রদোষে প্রবেশনাদৌ তন্ত্রেণ একং শ্রাদ্ধম্। গবাং পুষ্টিকর্ম্মত্রয়ে গোভিলোক্তে প্রথমপুষ্টিকর্ম্মণি শ্রাদ্ধং ন কার্য্যম্। হলাভিযোগেন হলস্যাভিমুখ্যেন যোগঃ পক্বেষু ধান্যেষু সীতাযজ্ঞঃ কৃষ্ণক্ষেত্রমধ্যে হলযজ্ঞঃ প্রবপণং বীজপবনং প্রলবনং ধান্যচ্ছেদনং পর্য্যর্পণং ধান্যানাং গৃহগমনং এষু হলাভিযোগাদিষু ষট্কর্ম্মস্বেকৈককর্ম্মণি পৃথক্ পৃথক্ প্রতিপ্রয়োগঞ্চ শ্রাদ্ধং কার্য্যম্। অন্যেষাং শ্রাবণীকর্ম্মাদীনাং আদাবেকং শ্রাদ্ধং কারয়েৎ। বৃহৎপত্রেতি। বৃহৎপত্রং হস্ত্যশ্বাদিঃ। ক্ষুদ্রপশুঃ অজাব্যাদিঃ। তয়োঃ স্বস্ত্যর্থং পরিবিশ্যমানয়োঃ। সূর্য্যেন্দ্বোর্যে কর্ম্মণী গোভিলোক্তে তয়োঃ শ্রাদ্ধং ন কার্য্যম্। যথা গোভিলঃ। বৃক্ষ ইবেতি। পঞ্চর্চ্চ ইতি। প্রকৃতে দ্বিতীয়য়া আদিত্যে পরিবিশ্যমানেঽক্ষততণ্ডুলান্ জুহুয়াৎ। বৃহৎপত্রস্বস্ত্যয়নকামঃ। তৃতীয়য়া চন্দ্রমসি তিলতণ্ডুলান্ ক্ষুদ্রপশুস্বস্ত্যয়নকামঃ। এতেন যদুক্তং কেনচিৎ ছন্দোগবাক্-

য়াদিত্যর্থঃ। এতেনেতি যৎকেনচিদুক্তং তদন্বয়াপরামর্শাদেবোক্তমিত্যন্বয়ঃ। গৃহ্যায়াং গৃহ্য ইত্যর্থঃ। এতেন নিষ্ক্রমণে শ্রাদ্ধং নির্বিবাদমেবেতি গ্রন্থকৃতা দর্শিতম্। প্রতিভয়ে ইতি পথি তস্করাদিভয়ে সতি বসনযতো-

সন্যৈরিনোর্নিষ্ক্রমণ কর্ম্মণি গৃহ্যায়াং চন্দ্রদর্শনাদিত্যদর্শনয়োর্ব্বিহিতত্বাৎ। সূর্য্যেন্দুকর্ম্মণা নিষ্ক্রমণকর্ম্মগ্রহণং তৎ-

বস্ত্রযুক্তানর্থাস্তীত্যানুপেত্য স্বাহাকারান্তাভিশ্চতসৃভিঃ প্রকৃতাভিঃ ঋগ্ভিঃ বস্ত্রদশানাং গ্রন্থিদ্বয়ং বধ্নীতেত্যেকং সূত্রম্। বিষবতা দষ্টমদ্ভিরভ্যুক্ষণ-মাভৈষীর্মামরিষ্যসীতি মন্ত্রং জপেদিতি বিধিবদ্দষ্টচিকিৎসার্থমিতি দ্বিতীয়ং সূত্রম্। তথা কৃমিদষ্টদেশমদ্ভিরভ্যুক্ষণহতস্তেহত্রিণা কৃমিরিতি মন্ত্রং জপেদিতি তৃতীয়ম্। কৃমিদষ্টচিকিৎসার্থং সূত্রমুক্তম্। গণশ ইতি একাদি-ক্রিয়মাণেষু নানাকার্য্যেষ্বিত্যর্থঃ। তদ্দর্শয়তি যথেতি যজনীয়ে ইতি যাগা-ধিকরণেঽহনীত্যর্থঃ। তত্র সামান্যাভিধানাৎ একদিনেঽনেকপুত্র-সংস্কারেষ্বপি সকৃদেব শ্রাদ্ধং গণত্বাবিশেষাৎ। দিনভেদে তু কালভেদান্ন-তন্ত্রতা যদাপ্যঙ্গানামেব তন্ত্রতেতি সিদ্ধান্তস্তথাপি তদুপলক্ষণত্বমেব-ষ্ঠেন প্রধানানামপি দেশকালকর্ত্রাদিভেদস্য বাধকস্যাভাবে তন্ত্রতেতি অতএব তন্ত্রতাবিচারে গ্রন্থকৃদাহ সতি বাধকে নাঘবমেব তন্ত্রতান্যাবে যুক্তিরিতি সামান্যত এবাভিহিতং ন তু তত্রোক্তানমিত্যুক্তম্। প্রায়-শ্চিত্তবিবেকেঽপি হেতুশ্চ তন্ত্রতায়াঃ কালদেশকর্ত্রাদীনামেকত্ববিশে-ষাগ্রহ ইতি সামান্যত এবোক্তমিতি পুত্রজন্মাদাবিত্যাদিশব্দাল্লৌকি-কগৃহপ্রবেশাগ্রহণম্। নামকরণাদিষ্বিতি জাতকর্ম্মণি ন সোষ্যন্তী-জাতকর্ম্মেত্যনেন শ্রাদ্ধনিষেধাৎ তৎ ত্যাগঃ। জাতস্যেতি পুংস্ত্বমবিব-ক্ষিতম্। তূষ্ণীমেতাঃ ক্রিয়াঃ স্ত্রীণাং বিবাহস্তু সমন্ত্রক ইত্যনেন স্ত্রীণা-মপি সংস্কারপ্রাপ্তেঃ। ততশ্চ কন্যাসংস্কারেঽপি শ্রাদ্ধং কর্ত্তব্যমুক্তবিষ্ণু-পুরাণাৎ। অতএব স্ত্রিয়াস্তূষ্ণীং মন্ত্রেণ তু হোম ইতি গোভিলসূত্র-ব্যাখ্যানে তুল্যত্বাদ্বৃদ্ধিশ্রাদ্ধমপি স্ত্রীসংস্কারে সমন্ত্রকমিতি শূলপাণ্যুপা-ধ্যায়াঃ। গোবিন্দানন্দস্তু সুতসংস্কারকর্ম্মস্বিত্যনেন কন্যাসংস্কারে শ্রাদ্ধং নাস্তীতি সূচিতম্। বিষ্ণুপুরাণেঽপি কন্যাপুত্রবিবাহেষ্বিত্যনেন কন্যা-বিবাহে বিশেষ্যশ্রাদ্ধস্যোক্তা। অন্যেষু কন্যাসংস্কারেষু শ্রাদ্ধং নাস্তীতি স্ফুটমভিহিতম্। অন্যথা চূড়াকর্ম্মাদিকে ইত্যনেন বিবাহস্যাপি প্রাপ্তৌ

পরিবিশ্যতোঃ সূর্য্যেন্দ্বোরিতি অন্বয়াপরামর্শাৎ গোভিল-
সূত্রার্থাপরিজ্ঞানাচ্চ। ন দশা গ্রন্থিক ইতি। প্রতি-
ভয়েহধ্বনি বস্ত্রদশায়াং গ্রন্থিং ন বধ্নীয়াৎ উপেত্য বসন-
বতঃ স্বাহাকারান্তাভির্ম্মা ভৈষীর্ন মরিষ্যসীতি বিষবতা
দষ্টং দেশমদ্ভিরভ্যুক্ষ্য জপেৎ। হতস্তেহত্রিণা ক্রিমি-
রিতি ক্রিমিমন্ত্রং দেশমদ্ভিরভ্যুক্ষঞ্জপেদিতি গোভিল-
সূত্রত্রয়োক্তে কর্ম্মত্রয়ে। শেষেষ্বিতি। অর্হণীয়র্ত্বিগা-
দীনাং পাদ্যার্ঘ্যবিষ্টরমধুপর্কদানাদিষু শ্রাদ্ধং নাস্তি। গণশ
ইতি। যথা যজনীয়েহহনি নবযজ্ঞবাস্তুযজন গমনগো-
দজ্ঞাশ্চ যজ্ঞেষু সমুদায়েন ক্রিয়মাণেষু মাতৃপূজা শ্রাদ্ধঞ্চ

কন্যাপুত্রবিবাহেষ্বিতি ব্যর্থং স্যাৎ। গোভিলেন পুত্রজন্মোপক্রমস্য জাত-
কর্ম্মাদিসংস্কারাভিধানাৎ। কন্যাসংস্কারস্য গৃহ্যানুক্তত্বাৎ কুতঃ শ্রাদ্ধ-
প্রাপ্তিঃ কুতস্তর্হি কন্যায়াঃ সংস্কারপ্রাপ্তিরিতি চেৎ। তূষ্ণীমেতাঃ ক্রিয়াঃ
স্ত্রীণামিতি যাজ্ঞবল্ক্যবচনাদিত্যাহ। কার্য্যান্বয়ানুরোধেনেতি কার্য্যং সম-
ভিব্যাহৃতক্রিয়া তদন্বয়ানুরোধেনেত্যর্থঃ। তথাহি আঙোঽভিবিধ্যর্থত্বে
সমভিব্যাহৃতক্রিয়ায়াং পিতৃদানানুরূপায়ামুদ্বাহস্যাপ্যন্বয়ঃ স্যাৎ। মর্য্যা-
দার্থত্বে তু উদ্বাহস্যোপলক্ষণত্বান্নোক্তক্রিয়ায়ামন্বয়ঃ। যথা পাটলিপুত্রাৎ
বৃষ্টোদেব ইত্যত্র আঙোঽভিবিধ্যর্থত্বে পাটলিপুত্রমভিব্যাপ্য বৃষ্টো-
দেব ইত্যন্বয়বোধাৎ বৃষ্টিক্রিয়ায়াং পাটলিপুত্রস্যাপ্যন্বয়ঃ। মর্য্যাদার্থত্বে
তু পাটলিপুত্রং বিহায় বৃষ্টোদেব ইত্যন্বয়াৎ পাটলিপুত্রস্য বৃষ্টিক্রি-
য়ায়াং নান্বয় ইতি। দৃষ্টান্তমাহ বিশেষণেতি যথা নৃত্যন্তং পশ্যন্তী-
ত্যত্র নৃত্যং বিশেষণমুপলক্ষণং বেতি সন্দেহে উপলক্ষণত্বে দর্শন-
ক্রিয়ায়াং ইত্যস্যান্বয়াৎ। বিশেষণত্বে তু তত্র তদন্বয়াৎ বিশেষণত্ব-
স্যৈবাভ্যুপগমস্যেষ্টত্বাদিত্যর্থঃ। মৃতমাতামহাদীতি স্বশব্দাভাবে শুত-

সকৃদেব গণাদৌ ন কর্ম্মসংখ্যানুসারেণ। যত্র যত্রেতি। নন্বু কর্ম্মাদৌ ষড্ভ্যঃ পিতৃভ্য ইত্যনেন শ্রাদ্ধং বিহিতং কর্ম্মাদিষু তু সর্ব্বেষ্বিতি অনেন মাতৃপূজা বিহিতেতি পুনরুক্তিঃ। ন কর্ম্মাদৌ মাতৃপূজা পূর্ব্বমুক্ত্বা। অনেন পুত্রজন্মাদৌ কর্ম্মাদিত্বাভাবেঽপি শ্রাদ্ধনিমিত্তত্বাদেব বিধীয়তে। অথবা যত্র যত্র শ্রাদ্ধং ভবেত্তত্র তত্রৈব মাতর ইতি বচনার্থঃ। তেনাষ্টকাদৌ শ্রাদ্ধনিষেধে মাতৃপূজা-নিষেধঃ। স্বপিতৃভ্য ইতি। সুতসংস্কারকর্ম্মসু নাম-করণাদিষু পিতা শ্রাদ্ধং দদ্যাৎ। যথা বিষ্ণুপুরাণে। জাতস্য জাতকর্ম্মাদি ক্রিয়াকাণ্ডমশেষতঃ। পুত্রস্য কুর্ব্বীত পিতা শ্রাদ্ধঞ্চাভ্যুদয়ার্থকম্॥ আউদ্বহনাদিতি। অভিবিধা-বাঙ্মর্য্যাদাভিবিধিসংশয়ে কার্য্যান্বয়ানুরোধেনাভিবিধে-

সংস্কারকর্ম্মণি পিতৃভ্যঃ পিতা দদ্যাদিত্যত্র সুতস্য পিতৃভ্য ইতি বোধঃ স্যাৎ। ন তু পিতুঃ পিতৃভ্য ইতি পিতৃপদস্য জনকপরত্বেন জন্য-সাকাঙ্ক্ষতয়া সুতপদস্য জন্যবচনত্বাৎ তেনৈবান্বয়স্যৌচিত্যাৎ জনক-বচনয়োঃ পিতৃপদয়োঃ ন তু পরস্পরান্বয়স্যানৌচিত্যাৎ। স্বশব্দোপা-দানাৎ পিতৃপদয়োরেবোপপত্ত্যা পরস্পরান্বয়লাভাদিতি ভাবঃ। তস্যা-ভাবেঽন্যঃ ক ইত্যাকাঙ্ক্ষায়ামাহ সংস্কার্য্যঃ সপিণ্ডাদিবেতি যদ্যপি বৃদ্ধিশ্রাদ্ধসংস্কারকর্ম্মণোরঙ্গাঙ্গিনোঃ সমানকর্ত্তৃকত্বসিদ্ধেন সংস্কার্য্যস্য বৃদ্ধিশ্রাদ্ধেঽধিকারঃ। অতএব উপনয়নকর্ত্তুরেব শ্রাদ্ধাধিকারো ন তু সংস্কার্য্যস্য সমানকর্ত্তৃকত্ববাধাদিতি পিতৃভক্তিঃ। তথা সংস্কার্য্য ইতি বিবাহকর্ত্তেতি বোধ্যম্। নান্দীমুখেভ্যঃ শ্রাদ্ধন্তু পিতৃভ্যঃ কার্য্য-মৃদ্ধয়ে। ততোবিবাহঃ কর্ত্তব্যঃ শুদ্ধঃশুভসুতপ্রদ ইতি। ব্রহ্মপুরাণ-বচনেন বিবাহকর্ত্তুঃ শ্রাদ্ধকর্ত্তৃত্বপ্রতিপাদনাৎ। কিন্তু প্রথমবিবাহে

াব্যত্বাৎ। বিশেষণোপলক্ষণসন্দেহে বিশেষণবৎ।
ত্রবিবাহেঽপিতি বচনাচ্চ স্বশব্দঃ সুতমাতামহাদি-
দার্থঃ। তস্যাভাবে পিতুরভাবেঽন্যঃ সংস্কার্য্যঃ
াদির্ব্বা তৎক্রমাৎ সংস্কার্য্যপুত্রদুহিতৃপিতৃক্রমা-
পিতৃণাং দদ্যাদিত্যর্থঃ। তেন। ভ্রাতা বা ভ্রাতৃ-
বা সপিণ্ডঃ শিষ্য এব বা। সহপিণ্ডক্রিয়াং কৃত্বা
ভ্যুয়ন্ততঃ। ইতি লঘুহারীতবচনেন সপিণ্ডপুত্র-
ংস্কারকর্ম্মণি সপিণ্ডাদীনাং বৃদ্ধিশ্রাদ্ধাধিকারে
ত্রকন্যাপিতৃপক্ষমাতামহপক্ষয়োরেব শ্রাদ্ধং কার্য্যং
তৃপক্ষস্য ন বা সংস্কার্য্যপিতুঃ পিতৃগণমাতামহ-
তৎক্রমাদিত্যনুপপত্তেঃ। অতএব কন্যাপুত্র-
ঽপিতি বিষ্ণুপুরাণবচনাৎ। উৎসবানন্দসন্তানে
াহাদিমঙ্গলে। ইতি মৎস্যপুরাণবচনাচ্চ। বিবাহে
তৃকন্যাপিতৃণামেব বৃদ্ধিশ্রাদ্ধাধিকার ইতি নিরস্তম্।

---

স্বরূপং বিশেষবচনাৎ পিতৃসত্ত্বে পিতুরধিকার ইতি বিশেষঃ।
পিতুরভাবে বিবাহে স্বয়মেব শ্রাদ্ধং কুর্য্যাদিতি পিতৃভক্তিঃ।
চ পিতুরভাবে বরো নান্দীমুখশ্রাদ্ধং কার্য্যমিতি ছন্দোগপরি-
কা। সপিণ্ডাদির্বেতি নামকরণাদৌ যৎ তু নারায়ণোপাধ্যা-
করণাদৌ জাতস্য বালত্বেনাধিকারাভাবাদন্যত্রাধিকার ইত্যু-
তেন সংস্কার্য্যস্য কর্তৃত্বসম্ভবে তস্যৈবাধিকার ইতি তন্মতং
সপিণ্ডপুত্রকন্যাপিতৃপক্ষমাতামহপক্ষয়োরেবেতি সংস্কার্য্য-
মাতামহগণয়োরেবেত্যর্থঃ। ন স্বপিতৃপক্ষস্যেতি ন সংস্কর্তৃপিতৃ-
ত্যর্থঃ। তৎক্রমাদিত্যনুপপত্তেরিতি তথাহি আদ্যে সংস্কর্ত্তুর-

পিতুরভাবে সংস্কারকর্ম্মণি অন্যস্যাধিকারপ্রতিপা
অতোঽপি ন বরপিতৃকন্যাপিত্রোরেবাধিকার ইতি ॥

অথ নিত্যশ্রাদ্ধম্। মনুঃ। দদ্যাদহরহঃ শ্রাদ্ধমন্না
নোদকেন বা। পয়োমূলফলৈর্ব্বাপি পিতৃভ্যঃ
মাবহন্ ॥ পিতৃভ্য ইতি বহুবচনাৎ ষাট্‌পুরুষিকমি
তথাদিপুরাণম্। অপ্যেকং ভোজয়েদ্বিপ্রং ষণ্ণামপ্য
গৃহী। অতৃপ্তাঃ প্রহরন্ত্যস্মৈ চক্রেণৈতে ষড়শ্রিণা।
কাদিশ্রাদ্ধধর্ম্মাত্র কর্ত্তব্যম্। যথা ছন্দোগপরিশি
পিতৃভ্য ইত্যুক্ত্বা স্বধাকারমুদীরয়েৎ। হস্ত
নুষ্যেভ্যস্তদন্তে নয়েদপঃ ॥ ব্রহ্মপুরাণে। নিত্যং
মদৈবং স্যান্মনুষ্যৈঃ সহ গীয়তে। যাজ্ঞবল্ক্যঃ।
পিতৃমনুষ্যেভ্যো দেয়মপ্যন্বহং জলম্। কাঙ্‌ক্ষি
দর্ভাংশ্চৈবাসনে দদ্যান্ন তু পাণৌ কদাচন। পি
মনুষ্যাণামেবং তৃপ্তিহি শাশ্বতী ॥ অর্ঘ্যপিণ্ডদৈবরহি
কার্য্যম্। যথা হারীতঃ। নিত্যশ্রাদ্ধমদৈবং স্যাদর্ঘ্য
বিবর্জ্জিতম্। মৎস্যপুরাণে। নিত্যং তাবৎ প্রব

প্রক্রান্তত্বেন তৎপাদেন তৎপরামর্শাসম্ভবঃ দ্বিতীয়ে
সংস্কার্য্যপিতুঃ পিতৃগণমাতামহগণয়োঃ শ্রাদ্ধস্য প্রাপ্ত্যা তৎ
ব্যর্থমেবেত্যুভয়পক্ষএব তৎক্রমাদিত্যস্যানুপপত্তিরিতি। তেন
পদেন প্রক্রান্তস্য সংস্কার্য্যস্য তৎপদেন পরামর্শাৎ তস্যাভাবে
ভাবে তৎক্রমাৎ সংস্কার্য্যক্রমাৎ পিতৃণাং পিণ্ডান্ শ্রাদ্ধমনো
বচনার্থঃ ॥ ১৮৪ ॥

তম্। অদৈবং তদ্বিজানীয়াৎ পার্ব্বণং
তম্॥ অর্ঘ্যাদিনিষেধানুপপত্ত্যা পার্ব্বণধর্ম্মা-
অপ্রজাস্তা ইতি নিষেধানুপপত্ত্যা দীক্ষ-
দর্শপৌর্ণমাসধর্ম্মাতিদেশবৎ। নিত্যশ্রাদ্ধং পিণ্ড-
র্জিতমিতি লিখিতজাতুকর্ণবচনাদগ্নৌকরণহোম-
ইতি বদন্তি। হোমবাধে হুতশেষাঙ্গত্বাৎ পাত্রা-
আশীঃপ্রার্থনবাধস্তু চিন্তনীয়ঃ। শ্রাদ্ধাশক্তা-
কর্ত্তব্য ইত্যাহ ছন্দোগপরিশিষ্টে কাত্যায়নঃ।
াশয়েদ্বিপ্রং পিতৃযজ্ঞার্থসিদ্ধয়ে। অদৈবং নাস্তি
ভোক্তা ভোজ্যমথাপি বা॥ অভ্যুদ্ধৃত্য যথা-
কিঞ্চিদন্নং যথাবিধি। পিতৃভ্যোঽথ মনুষ্যেভ্যো
াহদ্বিজঃ॥ অত্র অথশব্দাৎ পিত্রনন্তরং মনুষ্য-
ত্রয়ম্। বাক্যরচনামাহ স এব। পিতৃভ্য ইদ-
স্বধাকারমুদীরয়েৎ। হন্তকারং মনুষ্যেভ্যস্ত-
রয়েদপঃ॥ পিতৄনুদ্দিশ্যেদমিত্যুক্ত্বা স্বধাকার-
। মনুষ্যানুদ্দিশ্যেদমিত্যুক্ত্বা হন্তকারমুদীর-
উদ্দেশশ্চ পার্ব্বণোক্তপ্রকারেণ বাক্যাবসানে
জেৎ। একে তু পিতৃভ্য ইদমন্নং স্বধা মনুষ্যেভ্য
স্ত ইতি বাক্যং বর্ণয়ন্তি। তচ্চিন্ত্যং অন্নসঙ্ক-
মূলভূতশ্রুতিভেদকল্পনাপত্তেঃ। ন চ পৃথ-
নানুপপত্ত্যা শ্রুতিভেদঃ কল্পনীয়ঃ। পরি-
পার্ব্বণাদাবন্নসঙ্কল্পবাক্যবিধানাৎ। মনুষ্যেভ্য
হস্তযোগে চতুর্থ্যনুপপত্তেশ্চ। অতঃ পূর্ব্বো-

ক্তৈব যোজনা কার্য্যা। পার্ব্বণানন্তরং নিত্য বিকল্প উক্তঃ মার্কণ্ডেয়পুরাণে। নিত্যক্রিয়াং

সত্তমাঃ। ন পিতৃণাং তথৈবান্যে

পূর্ব্ববদাচরেৎ॥ নিত্যক্রিয়ামিতি পিত্রুপকারর্থং নম্। ন পিতৃণামিত্যাবশ্যকনিষেধপরমিতি পার্ব্বণেনৈব পিতৃপ্রীতের্জ্জাতত্বাৎ প্রত্যবায়পা সিদ্ধত্বাৎ। পূর্ব্বার্দ্ধাৎ পিতৃণামিতি প্রাপ্তৌ ন পি ত্যত্র পুনঃ পিতৃণাং গ্রহণং সনকাদীনামন্নোৎস জ্ঞানার্থং সনকাদিতৃপ্তেঃ পার্ব্বণেনাজাতত্বাৎ। ন শ্রাদ্ধরং সনকাদিশ্রাদ্ধমঙ্গং প্রমাণাভাবাৎ। পিতৃকল্পে সপ্তব্যাধোপাখ্যানে সপ্তানাং ভ্রাতৃণা সম্পাদনমাহাত্ম্যকথনপ্রস্তাবে মৎস্যপুরাণে। দ্বে ভ্রাতরৌ কৃত্বা পিত্রো্ ত্রীণীত্যনুক্রমাৎ। তথৈক কৃত্বা শ্রাদ্ধঃ স্বয়মেব তু॥ চকার মন্ত্রবৎ শ্রাদ্ধ পিতৃপরায়ণঃ। তথৈকমতিথিং কৃত্বেতি স শ্রাদ্ধবিষয়ং নাতিথিবজ্ঞপরং শ্রাদ্ধপ্রকরণাৎ লোৎকর্ষকথনাচ্চ। অন্যে তু। সাগ্নিনা নিত্যা কর্ত্তব্যা নিরগ্নিনা তু কর্ত্তব্যেতি ব্যবস্থামাহুঃ। যুক্তিকং সাগ্নেরিব নিরগ্নেরপি পার্ব্বণেন পিতৃতৃ তত্বাৎ। তস্মাৎ পূর্ব্বোক্তৈব ব্যবস্থেতি। বিধিপাঠজ্ঞানফলশ্রুতিঃ। হারীতঃ। ইমং পুণ্যং কুর্য্যাদ্বাপি পঠেৎ তু যঃ। স সর্ব্বকা হ্মতত্বঞ্চ বিন্দতি॥ বৃহস্পতিঃ। য এবং